वेदनिधि ग्रन्थमाला ...408DV

# अथर्ववेदीय
# पैप्पलाद संहिता

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

## अवधूत दत्तपीठम्

श्रीगणपति सच्चिदानन्द आश्रमः, दत्त नगरम्

मैसूरु 570025

वेदनिधि ग्रन्थमाला – 408DV

अथर्ववेदीय पैप्पलाद संहिता

May 2017

Editorial Team

**Vidwan Kunja Vihari Upadhyaya**

**Vidwan Ashok Kumar Mishra**

Printed by

**Ma Prints,** Bengaluru

Published by

**SVAMI (SGS VedaNidhi Academy & Masters' Institute)**

**Avadhoota Datta Peetham**

**Sri Ganapathy Sachchidananda Ashrama**

Datta Nagara, Ooty Road, Mysore 570025 India

**Email - veda@dattapeetham.com**

Website - www.vedanidhi.in/books



अवधूत दत्तपीठाधीश्वराणां जगद्गुरूणां

परमपूज्यानां

श्री श्री श्री गणपति सच्चिदानन्द स्वामिश्रीचरणानां

# आविष्कार वचांसि

।। नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणम् ।।

महतां सज्जनानां सम्पत्तिः - ऋचः, यजूंषि, सामानि, तद्विनियोजकानि प्रख्यापकानि ब्राह्मणवाक्यानि - इति श्रुतिः ब्रवीति। तथाविध सम्पत्तिमन्तः नैके महान्तः श्रोत्रियाः ब्रह्मनिष्ठागरिष्ठाः शब्दब्रह्मोपासनधुरीणाः वर्षेऽस्मिन् भारते राराजन्ते स्म। ऋषिकल्पानां तादृशां महतां परम्परा अद्यापि प्रकर्षेण वर्तते, यस्याः परिपोषणाय छात्राणामधीतिः निदानमास्ते। तदधीत्यै उपकुर्वन्ति महान्ति उपकरणानि बह्वनि वर्तन्ते, यदन्यतमं पुस्तकजातम् - इति सम्प्रति वैदिकलोकः गाढं विश्वसिति।।

आचार्योपदिष्टानि वेदवाक्यानि समामनन्तः छात्राः, स्वेषामध्ययनाय मुद्रितग्रन्थानेव सर्वधा आद्रियन्ते। अतः गुरुणा उपदिष्टान्, उपदेष्टव्यान्, विकार- लोप- आगम- आदेशात्मकान् विषयान् सङ्कलय्य मुद्रापितो वेदग्रन्थः, नितरां छात्रोपकाराय कल्पते। तथा च मन्त्रसम्बन्धि ऋषि-च्छन्दो- दैवत-विनियोग-प्रकरणादिकं तत्तद्देशेषु निविष्टं सत्, पाठकेषु सुकृतं सम्पादयेत्।

एवंविधग्रन्थसहायेन अध्ययनसम्पत्त्या समासादितयशसः संसाधितपरमेश्वरानुग्रहाः भूयासुरिति सङ्कल्पः दत्तगुरोरनुग्रहेण पूर्वं समजनि। तदीयमहितकृपावशेन, सद्यः अस्माकं दत्तपीठस्य वेदनिधिबृन्दः पूर्वोदित-बह्वंश-कलितं वेदग्रन्थसमुदायं प्रकाशयतीति महान्तमानन्दमनुबोभूयामहे।

तदस्य ग्रन्थजातस्य पठनेन, अधीयाना अपि भूयिष्ठानन्दभाजस्सन्तः, शब्दब्रह्मोपासनधुरं ससुखं वहन्तः श्रेयसे पारयेयुरिति श्रीदत्त सद्गुरुं प्रार्थयामहे।

प्रायेण संवत्सराष्टकात् सञ्चलतः वेदग्रन्थप्रकाशनस्य आविष्कृतिरूपा समुद्गतिः महत्यस्मिन् वज्रोत्सवे विधीयत इति विषयं, दत्तगुरोः समधिकवरिवस्याफलत्वेन सम्भावयामः। महतोऽस्मात् वज्रोत्सवादारभ्य वैदिकलोकः निरायासं निश्शुल्कं ग्रन्थजातमिदं (अन्तर्जालात्) वेदनिधि निवेशनात् (वॆब्सैट् द्वारा) प्राप्नुवन्तु - इति श्रीदत्तस्मरणपूर्वकं समाशास्महे।

शेवधिर्यः पुमर्थानां षडध्वातीत विग्रहः।

राद्धान्तो निगमार्थानां प्रसद्यात् दत्तसद्गुरुः।।

# विज्ञापनम्

**विद्वान् वंशीकृष्ण घनपाठी**
निर्देशकः - वेदनिधि प्रकाशनम्

तद्विश्वमुप जीवति।

यददो ब्रह्म- विश्वस्य अधिष्ठानत्वेन परस्सहस्रैः श्रौत स्मार्त पौराणिक वाक्य प्रमाणैः सङ्कीर्तितं- तदिदं विश्वं सञ्जीवयति, तदाधारेण विश्वमिदं उपजीवतीति भारतीयेषु सम्प्रदायसिद्धं सत्यम्। विश्वसिसृक्षोः अभितप्ताद्ब्रह्मणः- त्रयो लोकाः, त्रयो वेदाः, गायत्र्यास्त्रयः पादाः, तिस्रो व्याहृतयो जज्ञिर इति मन्त्रेभ्यः, तदुपबृंहक ब्राह्मणवाक्येभ्यश्च अवगम्यते।

तदासु वेदवाक्यराजीषु भगवता पिप्पलादेन दृष्टाः मन्त्राः, महता भृग्वङ्गिरोगणेन परिदृष्टामन्त्राः ब्रह्मवेदरूपेण प्रसिद्धिं गताः। अधुना उपलभ्यमान वेदशाखयोः शौनकशाखा प्रचुरतरा स्वरसहिता द्विजैरधीयते। परन्तु पैप्पलाद संहितायास्तावत् स्वरो लुप्तो दृश्यते। ऋङ्मन्त्रैः यजुर्निभैश्च मन्त्रैः पठ्यमानोऽयं वेदः संहिता ब्राह्मणरूपेण विराजते।

प्रकृतः शौनक संहिता ग्रन्थः 20 काण्डेषु, 36 प्रपाठकेषु वा सुभक्तस्सन्नधुना अध्याप्यते। बहुशः यज्ञकर्मप्रतिष्ठापनाय, दोपागमनाय च ब्रह्मणा ऋत्विजा प्रयुज्यमानाः मन्त्राः सङ्कलिता दृश्यन्ते ग्रन्थेऽस्मिन्। इत्थम्भूतः परकृतपीडानिवारकः आत्मरक्षाहेतुकः संहिताग्रन्थः, बहुभिः धार्मिकैः बहुवारं मुद्रितोऽपि तत्तत्कालिकच्छात्र पठितृवर्ग प्रयोजनाय, पौनःपुन्येन बहुधा प्राकाश्यं नीयत इति मोदस्य महत आस्पदं भवति।

सम्प्रति पाठकोपकाराय श्रीमदवधूत दत्तपीठाधीश्वराणां श्री श्री गणपति सच्चिदानन्द स्वामि श्रीचरणानां दिव्याशीर्मञ्जूषया, दत्तपीठस्य विद्वांसः नैकान् वर्षानधीत्य ग्रन्थमेनं प्रकाशयन्तीति, तेषु गुरुकृपा वृष्टिर्नूनं भूयोभूयो भवेदिति समाशासाना निवेदयामः। तथा च वेदनिधि.ग्रन्थमालायां बहवो वैदिका ग्रन्थाः देशभाषासु मुद्राप्यन्त इति, तत्तत्सम्पादका विपश्चितो वेदविद्व.दुपकारैकपथिकाः वेदपुरुषस्वरूपं सद्गुरुवर्यं सेवमाना इति, तेषु सर्वेषु- आदिगुरो.र्दत्तात्रेयस्य वात्सल्य.दृक्पातो निरन्तरं संपद्यतामिति च प्रार्थयन्तो विरमामः।

समानी व आकूति स्समाना हृदयानि वः।।

******



**आथर्वणाभिधो वेदो धवलो मर्कटाननः ।**
**अक्षसूत्रञ्च खट्वाङ्गं बिभ्राणोऽयं जयप्रियः।।**

# अथर्ववेदीय पैप्पलाद संहितागन्थस्य विषयसूचिका


- आविष्कार वचांसि ........................................................ 2
- विज्ञापनम् ........................................................ 3
- अथर्ववेदीय पैप्पलाद संहितागन्थस्य विषयसूचिका ........................................................ 4
- अस्मिन् प्रकाशने प्रयुक्तानि चिह्नानि ........................................................ 5
- प्रथमकाण्डम् ........................................................ 6
- अथ द्वितीयः काण्डः 2 - 1 ........................................................ 38
- अथ तृतीयः काण्डः ........................................................ 70
- अथ चतुर्थः काण्डः 4 - 1 ........................................................ 89
- अथ पञ्चमः काण्डः 5 - 1 ........................................................ 110
- अथ षष्ठः काण्डः ........................................................ 134
- अथ सप्तमः काण्डः 7 - 1 ........................................................ 148
- अथ अष्टमः काण्डः 8 - 1 ........................................................ 161
- अथ नवमः काण्डः 9 - 1 ........................................................ 175
- अथ दशमः काण्डः 10 - 1 ........................................................ 197
- अथ एकादशः काण्डः 11 - 1 ........................................................ 207
- अथ द्वादशः काण्डः 12 - 1 ........................................................ 218
- अथ त्रयोदशः काण्डः 13 - 1 ........................................................ 232
- अथ चतुर्दशः काण्डः 14 - 1 ........................................................ 237
- अथ पञ्चदशः काण्डः 15 - 1 ........................................................ 243
- अथ षोडशः काण्डः (क्षुद्रकाण्डः) ........................................................ 259
- अथ सप्तदशः काण्डः 17- 1 ........................................................ 359
- अथ अष्टादशः काण्डः (महत्काण्डः) ........................................................ 392
- अथोनविंशः काण्डः 19 - 1 ........................................................ 449
- अथ विंशतिः काण्डः ........................................................ 510


Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

## अस्मिन् प्रकाशने प्रयुक्तानि चिह्नानि

आदौ अष्टक - अध्याय संख्या (यथा - प्रथमाष्टके प्रथमाध्यायः)

वेदः - स्तरः1, शाखा - स्तरः 2, ग्रन्थः - स्तरः 3

ʊ अष्टक/ काण्ड प्रारम्भः (स्तरः 4)

अध्याय/ प्रपाठक प्रारम्भः (स्तरः 5)

सूक्त/ अनुवाक प्रारम्भः (स्तरः 6)

❀ वर्गः/ पञ्चाशत्/ दशतिः (स्तरः 7)

卐 मन्त्र/ ब्राह्मण वाक्य समूहः (स्तरः 8)

✡ परिशिष्टम् — गणान्तः (ऋग्वेदे)

। वाक्यावसानः — ।। (ऋक्/ यजुः/ साम मन्त्र) वाक्यसमूहावसानः

‡ मन्द्रस्थायिना वक्तव्यम् अथवा इतः प्राक् पाठं नावसादयेत्।

ऽऽ आकार प्रश्लेषः, ऽअकार प्रश्लेषः

ᳵ उपध्मानीय/जिह्वामूलीये

अनुदात्तः (यथा – अ॒ग्निमी॑ळे), स्वरितः (यथा - पव॑स्व सोम),

अध्यर्ध स्वरितः (य॒ज्ञेषु॑ वर्धते), दीर्घ स्वरितः (सोमो॑ धेनुम्)

अनुस्वार आगमः (देवा एह)

^ विसर्जनीय स्थलानि (यथा शि॒वा^ नः॑ प्र॒दिशः॑)

अयावाद्यादेश स्थलम्, उच्चारणे धारणे वा विशिष्टं स्थलम्,

ँ सानुनासिक यकार/वकार/ लकार विशिष्टः (अर्धानुस्वारः) (यँ वयम्, त्र्यम्बकँ यजामहे)

ं अनुस्वारः

द्विमात्रादि कालोच्चारण संकेतः ‘2’, ‘3’, ‘4’

क्लिष्टा दशतिः☞, मन्त्रविशेषाः ✍,

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

# अथर्ववेद (पैप्पलाद शाखा) संहिता

ओम् श्री लक्ष्मिनृसिंहाभ्यां नमः।

ओम् नत्वा नरहरिदेवं सर्वविघ्नप्रणाशनम्। पिप्पलादप्रसादाच्च पठाम्याथर्वणीं श्रुतिम्।।

## ॐ प्रथमकाण्डम्

संख्या 1 - 1

卐1.1.1 ओम् शं नो देवीरभिष्टय आपो भवन्तु पीतये। शं योरभि श्रवन्तु नः।। 1।।

卐1.1.2 आपः पृणीत भेषजं वरथं तन्वे मम। ज्योक्च सूर्यं दृशे।। 2।।

卐1.1.3 अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा। अग्निं च विश्वशंभुवम्।। 3।।

卐1.1.4 ईशाना वार्याणां क्षयन्तीश्चर्षणीनाम्। अपो याचामि भेषजम्।। 4।। 1- 2

卐1.2.1 अम्बयो यन्त्यध्वभिर्जामयो अध्वरीयताम्। पृञ्चतीर्मधुना पयः।। 1।।

卐1.2.2 अमूर्या उप सूर्ये याभिर्वा सूर्यः सह। तानो हिन्वन्त्वध्वरम्।। 2।।

卐1.2.3 अपो देवीरुप ब्रुवे यत्र गावः पिबन्ति नः। सिन्धुभ्यः कर्त्वं हविः।। 3।।

卐1.2.4 अप्वन्तरमृतमप्सु भेषजम्। अपामुत प्रशस्तिष्वश्वा भवथ वाजिनः।। 4।। 1- 3

卐1.3.1 विद्मा शरस्य पितरं पर्जन्यं भूरिधायसम्। विद्मो ह्यस्य मातरं पृथिवीं विश्वधायसम्।। 1।।

卐1.3.2 ज्यायके परिणो नमाश्मा भवत नस्तनूः। विरुड्विहि वरियोरातीरप द्वेषांस्या कृधि।। 2।।

卐1.3.3 वृक्षं यद्गावः परिषस्वजाना अनस्फुरं शरमर्चन्त्यृभुम्। शरमस्मद् यावय दिद्युमिन्द्र शं नो भवन्त्वप ओषधीरिमाः।। 3।।

卐1.3.4 इन्द्रस्य वज्रो अप हन्तु रक्षस आराद् विसृष्टा इषवः पतन्त्वस्मत्।। 4।। 1- 4

卐1.4.1 विद्म ते शर पितरं पर्जन्यं भूरिरेतसम्। तेना ते तन्वे शङ्करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति।। 1।।

卐1.4.2 विद्म ते शर पितरं इन्द्रं भूरिरेतसम्। तेना ते तन्वे शङ्करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति।। 2।।

卐1.4.3 विद्म ते शर पितरं वरुणं भूरिरेतसम्। तेना ते तन्वे शङ्करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति।। 3।।

卐1.4.4 विद्म ते शर पितरं चन्द्रं भूरिरेतसम्। तेना ते तन्वे शङ्करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति।। 4।।

卐1.4.5 विद्म ते शर पितरं सूर्यं भूरिरेतसम्। तेना ते तन्वे शङ्करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति।। 5।।

卐1.4.6 यदान्त्रेषु गवीन्योर्यद्वस्तावधि संश्रुतम्। तेना ते तन्वे शङ्करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति।। 6।।

卐1.4.7 प्र ते भिनद्मि मेहनं वर्त्रं वेशन्त्या इव। तेना ते तन्वे शङ्करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति।। 7।।

卐1.4.8 यथेषुका परापतदवसृष्टाधि धन्वनः। एवा ते मूत्रमुच्यतां बहिर्बालिति सर्वकम्।। 8।। 1- 5

卐1.5.1 वषट् ते पूषन्नस्यै सुवृक्तिमर्यमा होता कृणोतु वेधाः। सिस्रतां नार्युत प्रदाता वि पर्वाणि जिहतां सूतवा उ।। 1।।

卐1.5.2 चतस्रो दिशः प्रदिशश्चतस्रो भूम्या उत। देवा गर्भं समैरयन् ते व्यूर्णुवन्तु सूतवे।। 2।।

卐1.5.3 सुष्ठा व्यूर्णोतु वि योनिं हापयामसि। श्रथया सूषणे त्वमवत्वं विष्कले सृज।। 3।।

卐1.5.4 नेव स्नावसु न पर्वसु न केशेषु नखेषु च। अवैतु पृश्नि शेवलं शुने जराय्ववत्तवे।। 4।।

卐1.5.5 नेव मांसे न पीवसि नेव कस्मिंश्चनायत्तम्। अव जरायु पद्यताम्।। 5। । (इति चतुर्चो नाम प्रथमकाण्डे प्रथमोऽनुवाकः) 1 - 6

卐1.6.1 ये त्रिषप्ताः पर्यन्ति विश्वा रूपाणि बिभ्रतः। वाचस्पतिर्बला तेषां तन्वमद्य दधातु मे।। 1।।

卐1.6.2 उप न एहि वाचस्पते देवेन मनसा सह। असोष्पते नि रमय मय्येव तन्वं मम।। 2।।

卐1.6.3 इहैवाभि वितनुभे आर्त्नी इवज्यया। वाचस्पतिर्नियच्छतु मय्येव तन्वं मम।। 3।।

卐1.6.4 उपहूतो वाचस्पतिरुपहूतोऽहं वाचस्पत्युः। सं श्रुतेन राधिषीय मा श्रुतेन विराधिषि।। 4।। 1-7

卐1.7.1 दिव्यो गन्धर्वो भुवनस्य यस्पतिरेकायुवो नमसा विक्ष्वीड्यः। तं त्वा योमि ब्रह्मणा देव दिव्य नमस्ते अस्तु दिवि ते सधस्थम्।। 1।।

卐1.7.2 दिवस्पृष्टो यजतः सूर्यत्वगवयाता हरसो दैव्यस्य। एकायुवो नमसा सुशेवो मृडाद् गन्धर्वो भुवनस्य यस्पतिः।। 2।।

卐1.7.3 अनवद्याभिः समु जग्म आभिरप्सराभिरपि गन्धर्व आसु। समुद्र आसां सदनं म आहुर्यतः सद्य आ च परा च यन्ति।। 3।।
卐1.7.4 अभ्रिये दिद्युन्नक्षत्रिये या विश्वावसुं गन्धर्वं सचध्वे। ताभ्यो वो देविर्नम इत् कृणोमि।। 4।।
卐1.7.5 याः क्लन्दास्तमिषीचयो अक्षकामा मनोमुहः। ताभ्यो गन्धर्वपत्नीभ्यो अप्सराभ्योऽकरं नमः।। 5।। 1- 8
卐1.8.1 अमुष्मादधि पर्वतादवतकमसि भेषजम्। भेषजं सुभेषजं यत्ते कृणोमि भेषजम्।। 1।।
卐1.8.2 आदङ्गा कुविदङ्गा शतं यत् भेषजानि ते सहस्रं वा घ यानि ते। तेषामसि त्वमुत्तममनास्रावमरोगणम्।। 2।।
卐1.8.3 अरुस्यानमिदं महत् पृथिव्या अध्युद्धृतम्। तदास्रावस्य भेषजं तदु रोगमनीनशत्।। 3।।
卐1.8.4 उपजीका उद्धरन्ति समुद्रादधि भेषजम्। अरुस्यानमस्याथर्वणं रोगस्थानमस्याथर्वणम्।। 4।। 1- 9
卐1.9.1 अयं देवानामसुरो वि राजति वसा हि सत्या वरुणस्य राज्ञः। ततस्परि ब्रह्मणा शाशदान उग्रस्य मन्योरुदिमं नयामि।। 1।।
卐1.9.2 नमस्ते राजन् वरुणास्तुमन्यवे विश्वं हि देव निचिकेषि द्रुग्धम्। शतं सहस्रं प्रसुवाम्यन्यानयं नो जीवं शरदो व्यापेत्।। 3।।
卐1.9.3 यदुवक्थानृतं जिह्वया वृजीनं बहु। राज्ञस्त्वा सत्य धर्मणो मुञ्चामि वरुणादहम्।। 3।।
卐1.9.4 अमुञ्चं त्वा वैश्वानरादर्णवान् महतस्परि। सजातानुग्र आ वद ब्रह्म चाप चकीहि नः।। 4।। 1- 10
卐1.10.1 सीसायान्वाह वरुणः सीसायाग्निरुपावति। सीसं म इन्द्रः प्रायच्छदमीवायास्तु चातनम्।। 1।।
卐1.10.2 इदं विष्कन्धं सहत इदं बाधते अत्रिणः। अनेन विश्वा सासहै या जातानि पिशाच्याः।। 2।।
卐1.10.3 येऽमावास्यां रात्रिमुदस्थुर्भ्राजमत्रिणः। अग्निस्तुरीयो यातुहा स उ नः पातु तेभ्यः।। 3।।
卐1.10.4 यदि हंस्यश्वं यदि गां यदि पूरुषम्। सीसेन विध्यामस्त्वा यथा नो सो अवीरहा।। 4। (इति चतुर्चो नाम प्रथमकाण्डे द्वितीयोऽनुवाकः) 1 - 11
卐1.11.1 अभीवर्त्तेन मणिना येनेन्द्रो अभिवावृते। तेनेमं ब्रह्मणस्पते अभिराष्ट्राय वर्तय।। 1।।

Sri Ganapati Sacchidananda Avadhoota Datta Peetham

卐1.11.2 अभिवृत्तः सपत्नाभि या नो अरातयः। अभिपृतन्यन्तं तिष्ठाभि यो नो दुरस्यति।। 2।।

卐1.11.3 अभि त्वा देवः सविताभिः सोमो अवीवृतत्। अभि त्वा विश्वा भुतान्यभिवर्त यथा ससि।। 3।।

卐1.11.4 उदसौ सूर्यो अगादुदितं मामकं वचः। यथाहं शत्रुहासान्यसपत्नः सपत्नहा।। 4।।

卐1.11.5 सपत्नक्षयणो वृषाभिराष्ट्रो विषासहिः। यथाहमेषां वीराणां विराजानि जनस्य च।। 5।। 1-12

卐1.12.1 तुभ्यमेव जरिमन् वर्धतामयं मैनमन्ये मृत्यवो हिंसिषुस्त्वत्। मातेव पुत्रं प्रमना उपस्थे मित्र एनं मित्र्यात् पात्वं हसः।। 1।।

卐1.12.2 मित्रश्च त्वा वरुणश्च रिशादौ जरां मृत्युं कृणुतां संविदानौ। तदग्निर्होता वयुनानि विद्वान् विश्वानि देवो जनिमा विवक्तु।। 2।।

卐1.12.3 द्यौष्टे पिता पृथिवी माता जरां मृत्युं कृणुतां दीर्घमायुः। यथा जीवा अदित्या उपस्थे प्राणापानाभ्यां गुपितः शतं हिमाः।। 2।।

卐1.12.4 त्वमशीषे पशूनां पार्थिवानां ये जाता उत ये जनित्वा। मेमं प्राण हासिन्मो अपानो मैनं मित्रा वधिषुर्मो अमित्राः।। 4 1 - 13

卐1.13.1 इन्द्रेण दत्तो वरुणेन शिष्टो मरुद्भिरुग्रः प्रयतो न आगन्। एतं वां द्यावापृथिवी परि ददामि स मा तृषत् स मा क्षुधत्।। 1।।

卐1.13.2 ऊर्जमस्मा ऊर्जस्वती धत्तं पयोऽस्मै पयस्वती धत्तम्। ऊर्जमस्मै द्यावापृथिवी अधातां विश्वे देवा मरुत ऊर्जमापः।। 2।।

卐1.13.3 शिवा अस्य हृदयं तर्पयन्त्व नमीवो मोदमानश्चरेह। सवासिनौ पिबतां मन्थमेतमश्विनो रूपं परिधायमायाम्।। 3।।

卐1.13.4 तस्य पातारं सचतां पुरीषमूर्जा स्वधा सचतामेतमेषा। इन्द्र एतां ससृजे विद्धो अग्र ऊर्जां स्वधामजरां सा त एषा।।

卐1.13.5 तया त्वं जीवो शरदः सुवर्चा मा त आ शुस्रोद्भिषजस्ते अक्रन्।। 4।। 1- 14

卐1.14.1 विश्वे देवासो अभि रक्षतेममुतादित्या जाग्रुत यूयमस्मिन्। मेमं समान उत वा न्यनाभिर्मेमं प्रापत् पौरुषेयो बधो यः।। 1।।

Sri Ganapati Sacchidananda Avadhoota Datta Peetham • Mysore •

卐1.14.2 ये वो देवाः पितरो ये च पुत्राः सचेतसो मे श्रुणुतेदमुक्तम्। सर्वेभ्यो वः परिदाम्येतं त एनं स्वस्ति जरसे नयाथ।। 2।।

卐1.14.3 ये देवा दिविष्ठ ये पृथिव्या ये अन्तरिक्ष औषधीष्वप्सु। ते कृणुत जरसमायुरस्मै शतमन्यान् परि वृणक्त मृत्यून्।। 3।।

卐1.14.4 येषां प्रयाजा उत वानुयाजा हुतभागा हुतादश्च देवाः। येषां वः पञ्चप्रदिशो विभक्तास्तां वो अस्मै सत्रसदः कृणोमि।। 3।। 1- 15

卐1.15.1 अहं ते भगमा ददेऽधि शीर्ष्ण इव स्रजम्। महामूल इव पर्वतो ज्योक् पितृष्वासासै।। 1।।

卐1.15.2 इयं ते राजन् कन्या वधूर्नि धूयते यमः। सा मातुर्बध्यतां गृहेऽथो भ्रातुरथो पितुः।। 2।।

卐1.15.3 इयं ते केतपा राजन्निमां ते परि दध्मसि। ज्योक् पितृष्वासाता आ शीर्ष्णः समोप्यात्।। 3।।

卐1.15.4 असितस्य ब्रह्मणा कश्यपश्य गयस्य च। अन्तःकोशमिव जामयोऽपि नह्यामि ते भगम्।। 4। (इति चतुर्चो नाम प्रथमकाण्डे तृतीयोऽनुवाकः) 1 - 16

卐1.16.1 नक्तं जातास्योषधे रामे कृष्णे असिक्नि च। इदं रजनि रजय किलासं पलितं च यत्।। 1।।

卐1.16.2 किलासं च पलितं च निरितो नाशया पृषत्। आ त्वा स्वो अश्नुतां वर्णः पराश्वेतानि पातय।। 2।।

卐1.16.3 असितं ते प्रलयनमास्थानमसितं तव। असिक्न्यस्योषधे निरितो नाशयापृषत्।। 3।।

卐1.16.4 अस्थिजस्य किलासस्य तनूजस्य च यत्त्वचि। दूष्या कृतस्य ब्रह्मणा लक्ष्म श्वेतमनीनशम्।। 4।। 1- 17

卐1.17.1 जरायुजः प्रथम उस्त्रियो वृषा वातभ्रजा स्तनयन्नेति वृष्ट्या। स नो मृडाति तन्व ऋजुगो ऋजन् य एकमोजस्त्रेधा विचक्रे।। 1।।

卐1.17.2 अङ्गे अङ्गे शोचिषा शिश्रियाणो यो अग्रभीत् परुरस्य ग्रभीता। अङ्गं समङ्गं हविषा यजामि हृदि श्रितो मनसा यो जजान।। 2।।

卐1.17.3 मुञ्चामि शीर्षक्त्या उत कास एनं परस्परुराविवेश यो अस्य। यो अभ्रजा वातजा यश्च शुष्मो वनस्पतीन् सचतां पर्वतांश्च।। 3।।

卐1.17.4 शं ते परस्मै गात्राय समस्त्ववरायते। शं ते पृष्टिभ्यो मज्जभ्यः शमस्तु तन्वे तव।। 4।। 1- 18

卐1.18.1 आ यातु मित्र ऋतुभिः कल्पमानः संवेशयन् पृथिवीमुश्रियाभिः। तदस्मभ्यं वरुणो वायुरग्निर्बृहद्राष्ट्रं संवेश्यं दधातु।। 1।।
卐1.18.2 धाता मित्रो वरुणो देवो अग्निरिन्द्रस्त्वष्टा प्रतिगृह्णन्तु मे वचः। हुवे देवीमदितिं शूरपुत्रां सजातानां मध्यमेष्ठा स्या महम्।। 2।।
卐1.18.3 हुवे सोमं सवितारं नमोभिर्विश्वान् देवाँ अहमुत्तरत्वे। अयमग्निर्दीदाय दाह्मेव सजातैरिद्धो अप्रतिब्रूवद्भिः।। 3।।
卐1.18.4 इहेदसाथ न पुरो गमाथेर्यो गोपाः पुष्टपतिर्व आजत्। अस्मै वः कामायोप कामिनीर्विश्वे वो देवा उप संद्यामिह। 4।। 1- 19
卐1.19.1 अस्मिन् वसु वसवो धारयन्त्विन्द्रस्त्वष्टा वरुणो मित्रो अग्निः। इममादित्या उत विश्वे च देवा उत्तमे देवा ज्योतिषि धारयन्तु।। 1।।
卐1.19.2 अस्मै देवाः प्रदिशो ज्योतिरस्तु सूर्यो अग्निरुत वा हिरण्यम्। उत्तरेण ब्रह्मणा वि भाहि कृण्वानो अन्यानधरान् सपत्नान्।। 2।।
卐1.19.3 येनेन्द्राय समभरं पयांस्युत्तरेण ब्रह्मणा जातवेदः। तेन त्वमग्न इह वर्धयेमं रायस्पोषं श्रैष्ठ्यमा धेह्यस्मै।। 3।।
卐1.19.4 ऐषां यज्ञमुत वर्चो भरेहं रायस्पोषमुत वित्तान्यग्ने। सपत्ना अस्मदधरे भवन्तूत्तमेदेवा ज्योतिषि धत्तनेमम्।। 4।। 1- 20
卐1.20.1 मा नो विदन् विव्याधिनो मो अभिव्याधिनो विदन्। आराच्छरव्या अस्मद् विषूचीरिन्द्र पातय।। 1।।
卐1.20.2 विष्वञ्चो अस्मच्छरवः पतन्तु ये अस्ता ये चास्याः। देवा मनुष्या ऋषयो मित्रान्नो वि विध्यत।। 2।।
卐1.20.3 यस्समानो यो समानो मित्रो नो जिघांसति। रुद्रश्शरव्यया तानमित्रान्नो वि विध्यतु।। 3।।
卐1.20.4 सबन्धुश्चासबन्धुश्च यो न इन्द्राभिदासति। देवास्तं सर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरम्।। 4।
(इति चतुर्चो नाम प्रथमकाण्डे चतुर्थोऽनुवाकः) 1- 21
卐1.21.1 नासन्न सन् स्वयं स्त्रसन्नसतीभ्यो असत्तराः। सेहोररसतरा लवणाद्विक्लेदीयसीः।। 1।।
卐1.21.2 अपचितः प्र पततः सुपर्णो वसतेरिव। सूर्यः कृणोतु भेषजं चन्द्रमा वोपोच्छतु।। 2।।

Sri Ganapathy Sachchidananda Avadhoota Datta Peetham • Mysore •

卐1.21.3 एन्येका श्येन्येका कृष्णैका रोहिणी द्वे। सर्वासामग्रभं नामावीरघ्नीरपेतन।। 3।।
卐1.21.4 असूतिका रामायण्यपचित् प्र पतिष्यति। ग्लौरितः प्र पतिष्यति स गलन्तो न शिष्यति।। 4।। 1- 22
卐1.22.1 आशानामाशापालेभ्यश्चतुर्भ्यो अमृतेभ्यः। इदं भूतस्याध्यक्षेभ्यो विधेम हविषा वयम्।। 1।।
卐1.22.2 य आशानामाशापालाश्चत्वार स्थनदेवाः। ते नो निर्ऋत्या पाशेभ्यो मुञ्चतां हसो अंहसः।। 2।।
卐1.22.3 अश्लोणस्ते हविषा विधेयमस्रामस्ते घृतेना जुहोमि। य आशानामाशापालास्तुरीयो देवः स नः सुभूतमेह वक्षत्।। 3।।
卐1.22.4 स्वस्ति मात्र उत पित्रे नो अस्तु स्वस्ति गोभ्य उत पूरुषेभ्यः। विश्वं सुभूतं सुविदत्रमस्तु नो ज्योगेव दृशेम सूर्यम्।। 4।। 1- 23
卐1.23.1 इदं जनासो विदथं महत् ब्रह्म वदिष्यति। न तत् पृथिव्यां नो दिवि यतः प्राणन्ति वीरुधः। अन्तरिक्षे समहासां स्थानं श्रान्त सदामिव।। 1।।
卐1.23.2 आस्थानमस्य भूतस्य विदुष्टद्वेधसो जनाः।। 2।।
卐1.23.3 यद्रेदसा रेजमाने भूमिश्च निरतक्षताम्। आर्दं तदद्य सर्वदा भिदूरस्येव वर्तसी।। 3।।
卐1.23.4 विश्वमन्याभि ववार विश्वमन्यस्यामधि श्रितम्। दिवे च विश्ववेदसे पृथिव्यै चाकरं नमः।। 4।। 1- 24
卐1.24.1 सं सं स्रवन्तु सिन्धवः संवाता दिव्या उत। तेभिर्मे सर्वैः संस्रावैर्धनं संस्रावयामसि।। 1। तेभिर्मे सर्वैः संस्रावैर्धनं संस्रावयामसि।। 2।।
卐1.24.2 ये सं स्रावाः संस्रवन्ति क्षीरस्य चोदकस्य च। तेभिर्मे सर्वैः संस्रावैर्धनं संस्रावयामसि।। 2।।
卐1.24.3 ये नदीभ्यः संस्रवन्त्युत्सासः सदमक्षिताः। तेभिर्मे सर्वैः संस्रावैर्धनं संस्रावयामसि।। 3।।
卐1.24.4 इदं हव्या उपेतनेदं संस्रावणा उत। इहैतु सर्वो यः पशुरस्य वर्धयता रयिम्।। 4।। 1- 25
卐1.25.1 हिरण्य वर्णाश्शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः। या अग्निं गर्भं दधिरे सुवर्णास्ता न आपश्शं स्योना भवन्तु।। 1।।

卐1.25.2 यासां राजा वरुणो याति मध्ये सत्या नृते अवपश्यं जनानाम्। या अग्निं गर्भं दधिरे सुवर्णास्ता न आपश्शं स्योना भवन्तु।। 2।।

卐1.25.3 यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति। या अग्निं गर्भं दधिरे सुवर्णास्ता न आपश्शं स्योना भवन्तु।। 3।।

卐1.25.4 शिवेन मा चक्षुषा पश्यतापश्शिवया तन्वोप स्पृशत त्वचं मे। घृतश्चुतश्शुचयो याः पावकास्ता न आपश्शं स्योना भवन्तु।। 4।। 1- 26

卐1.26.1 सुपर्णो जातः प्रथमस्तस्य त्वं पित्तमासिथ। तदासुरी युधा जीता रूपं तक्रे वनस्पतीन्।। 1।।

卐1.26.2 आसुरी चक्रे प्रथमेदं किलासभेषजमिदं किलासनाशनम्। अनीनशत् किलासं सरूपामकरत्वचम्।। 2।।

卐1.26.3 सरूपा नाम ते माता सरूपो नाम ते पिता। सरूप कृत्त्वमोषधे सा सरूपमिदं कृधि।। 3।।

卐1.26.4 यत्तनूजं यदग्निजं चित्रं किलासं यज्ञिषे। तदस्तु सुत्वक् तन्वो यतस्त्वाप नयामसि।। 4।।

卐1.26.5 श्यामा सरपं करणी पृथिव्या अध्युद्भृता। इदमूषु प्र साधय पुनारूपाणि कल्पय।। 5।। 1- 27

卐1.27.1 अभयं सोमः सविता कृणोत्वभयं द्यावापृथिवी उभे। अभयं स्वरन्तरिक्षं नो अस्तु सप्तऋषिणां हविषाभयं नोऽस्तु।। 1।।

卐1.27.2 अभयं द्यावापृथिवी इहास्तु नो अग्निनामित्रान् प्रत्योषत प्रतीचः। मा ज्ञातारं मा प्रतिष्ठां विदन्तमिथो विघ्नाना उपयन्तु मृत्युम्।। 2।।

卐1.27.3 पञ्च देवा अभयस्येशत इन्द्रस्त्वष्टा वरुणे मित्रो अग्निः। मायं ग्रामो दुरितमेनआरदन्यत्र राज्ञामभि यात मन्युः।। 3।।

卐1.27.4 अस्मै ग्रामाय प्रदिशश्चतस्र ऊर्जं सुभूतं सविता दधातु। अशत्रुमिन्द्रो अभयं कृणोतु मध्ये च विशां सुकृते श्याम।। 4।। 1- 28

卐1.28.1 अनु सूर्यमुदयतां हृद्योत हरिमा च ते। यो रोहितस्य गोर्वर्णस्तेन त्वा परिदध्मसि।। 1।।

卐1.28.2 परि त्वा रोहितैर्वर्णैर्दीर्घायुत्वाय दध्मसि। यथा त्वमरपा असो अथो हरितो भव।। 2।।

卐1.28.3 या रोहिणार्देव पत्या गावो या रोहिणीरुत। रूपं रूपं वयो वयस्तेन त्वा परि दध्मसि।। 3।।

卐1.28.4 शुकेषु ते हरिमाणं प्रपणाकासु दध्मसि। अथो हारिद्रवेषु ते हरिमाणं नि दध्मसि।। 4।। 1-29

卐1.29.1 याः पुरस्तादाचरन्ति नीचैः सूर्यादथो दिव। एतमप्सरसव्रातं ब्रह्मणाच्छा वदामसि।। 1।।

卐1.29.2 या अधरादाचरन्ति जिह्मामुखा करिक्रतीः। आहता अपता हतो नश्यन्तो तश्चिन्वतीः।। 2।।

卐1.29.3 याः कुल्या यावन्या या उ चोन्मादयिष्णवः। सर्वासाता मृश्मशाकरं दृषदा खल्वाँ इव।। 3।।

卐1.29.4 चेतन्तीमश्मलां पलां तासां वो नमो अर्चिषे। आराद्यक्ष्मं नि धत्तास्मान्नो अधि पूरुषात्।। 4।। 1- 30

卐1.30.1 कामस्तदग्रे समवर्तत मनसो रेतः प्रथमं यदासीत्। स काम कामेन वृहता सयोनिं रायस्पोषं यजमानाय धेहि।। 1।।

卐1.30.2 त्वं कामो सहसासि प्रतिष्ठितो विभुर्विभाव सुषखा सखीयते। त्वमुग्रः पृतनासु सासहिः सह ओजो यजमानाय धेहि।। 2।।

卐1.30.3 दूराच्चकमानाय प्रविपाणायाक्षये। आस्मा अशृण्वन्नाशाः कामेन माजनयत् स्वः।। 3।।

卐1.30.4 कामेन मा काम आगन् हृदयाद्धृदयं परि। यदोमीषामदो मनस्तदैतूप मामिह।। 4।।

卐1.30.5 यत्काम कामयमाना इदं कण्मसि ते हविः। तन्नः सर्वं समृध्यतामथैतस्य हविषो वीहि स्वाहा।। 5।।

卐1.30.6 क इदं कस्मा अदात् कामः कामायादात्। कामो दाता कामः प्रतिग्रहीता कामस्समुद्रमाविवेश। कामेन त्वा प्रति गृह्णामि कामैतत्ते।। 6। (इति चतुर्थो नाम प्रथमकाण्डे षष्ठोऽनुवाकः) 1 - 31

卐1.31.1 इमं मे कुष्ठ पूरुषं तमा वह तं निष्कृधि। तमु मे अगदं कृधि।। 1।।

卐1.31.2 उदग् जातो हिमवतः स प्राच्यां नीयसे जनम्। तत्र कुष्ठस्य नामान्युत्तमानि वि भेजिरे।। 2।।

卐1.31.3 उत्तमो नामास्युत्तमो नाम ते पिता। यतः कुष्ठ प्रजायसे तत एह्यरिष्टतातये।। 3।।

卐1.31.4 शीर्षहत्यामुपहत्यामक्ष्योस्तन्वो रपः। कुष्ठो नो विश्वतस्पातु दैवं समह वृष्ण्यम्।। 4।। 1-32

卐1.32.1 यदि शोको यद्यभीशोको रुद्रस्य प्राणो यदि वारुणोऽसि। हुडुर्नामासि हरितस्य देव स नः संविद्वान् परि वृङ्गि तक्मन्।। 2।।

卐1.32.2 यद्यर्चिर्यदि वासि धूमः शाकल्येषु यदि वा ते जनित्रम्। हुडुर्नामासि हरितस्य देव स नः संविद्वान् परि वृङ्गि तक्मन्।। 3।।

卐1.32.3 नमः शीताय तक्मने नमो रुराय कृण्मो वयं ते। योऽन्ये द्युरुभयद्युश्चरन्ति तृतीयकाय नमो अस्तु तक्मने।। 4।।

卐1.32.4 तृतीयकं वितृतीयं सदन्दिमुत हायनम्। तक्मानं विश्वशारदं ग्रैष्मं नाशय वार्षिकम्।। 5।। 1- 33

卐1.33.1 आपो अद्यान्वचारिषं रसेन समसृक्ष्महि। पयस्वानग्न आगमं तं मा सं सृज वर्चसा।। 1।।

卐1.33.2 सं माग्ने वर्चसा सृज प्रजया च बहुं कृधि। विद्युर्मे अस्य देवा इन्द्रो विद्यात् सहर्षिभिः।। 2।।

卐1.33.3 इदमापः प्रवहता वद्यं च मलं च यत्। यच्च दुद्रोहानृतं यच्च शेपे अभीरुणम्।। 3।।

卐1.33.4 शिवेनमा चक्षुषा पश्यतापः शिवया तन्वोप स्पृशत त्वचं मे। शिवानग्नि नप्सुषदो हवामहे मयि क्षत्रं वर्च आ धत्त देवीः।। 4।।

卐1.33.5 यदापो नक्तं मिथुनं चचार यद्वा दुद्रोह दुरितं पुराणम्। हिरण्यवर्णास्तत उत् पुनन्तु मा प्रमा मुञ्चन्तु वरुणस्य पाशात्।। 5।। 1- 34

卐1.34.1 अग्निर्जनविन् मह्यं जायामिमामदात्।। 1।।

卐1.34.2 सोमो वसुविन् मह्यं जायामिमामदात्।। 2।।

卐1.34.3 पूषा ज्ञातिविन् मह्यं जायामिमामदात्।। 3।।

卐1.34.4 इन्द्रः सहीयान् मह्यं जायामिमामदात्।। 4।। 1- 35

卐1.35.1 अग्नये जनविदे स्वाहा।। 1।।

卐1.35.2 सोमाय वसुविदे स्वाहा।। 2।।

卐1.35.3 पूष्णे ज्ञातिविदे स्वाहा।। 3।।

卐1.35.4 इन्द्राय सहीयसे स्वाहा।। 4। (इति चतुर्थो नाम प्रथमकाण्डे सप्तमोऽनुवाकः) 1 - 36

卐1.36.1 याः पुरस्तादाचरन्ति या वा पश्चात् सदान्वाः।।
卐1.36.2 अश्मानमृच्छन्तीर्यन्तु योयं स्वादावनाद्यः।। 1।।
卐1.36.3 या अधरादाचरन्त्युत्तराद्वा सदान्वाः। अश्मानमृच्छन्तीर्यन्तु योयं स्वादावनाद्यः।। 2।।
卐1.36.4 याः पश्चादाचरन्ति पुरस्ताद्वा सदान्वाः। अश्मानमृच्छन्तीर्यन्तु योयं स्वादावनाद्यः।। 3।।
卐1.36.5 या उत्तरादाचरन्त्यधराद्वा सदान्वाः। अश्मानमृच्छन्तीर्यन्तु योयं स्वादावनाद्यः।। 4।। 1-37
卐1.37.1 उभयीरहमायताः पराचीर करं त्वत् देवेभिरन्या अस्ता वह्वीरन्या अथो दिवम्।। 1।।
卐1.37.2 नमस्ते रुद्रास्यते नमः प्रतिहिताभ्यः। नमो विसृज्यमानाभ्यो नमो निपतिताभ्यः।। 2।।
卐1.37.3 हिरण्ययीर्म उल्बण्यः षट् सहस्राणि षट् शताः। ताभिः परि श्रयामहे ता नो रक्षन्तु सर्वतः। बह्विदमन्यद्विष्ठितं तस्य कामं वि विध्यत।। 3।।
卐1.37.4 अयस्मयं मे विमितं यूष्मद्विया महत् कृतं नमसा नमसेन्यम्। तेना परि श्रयामहे तन्नो रक्षतु सर्वतः।। 4।।
卐1.37.5 अयस्मयं वर्म कृण्वे द्वारं कृण्वे अयस्मयम्। खीलानयस्मयान् कृण्वे तेनो रक्षन्तु सर्वतः। बह्वीदमन्यद्विष्ठितं तस्य कामं वि विध्यत।। 5।। 1- 38
卐1.38.1 इमा यास्तिस्रः पृथिवीस्तासां ह भूमिरुत्तमा। तासामधि त्वचो अहं समु जग्रभ् भेषजम्।। 1।।
卐1.38.2 श्रेष्ठमसि वैरुधानां वसिष्ठं भेषजानां। यज्ञो भगो इव यामेषु देवेषु वरुणो यथा।। 2।।
卐1.38.3 रेवतीरनाधृष्टाः सीषासन्तीः सिषाशथ। एतास्थः केशवर्धनी रथो स्थ केशदृंहणीः।। 3।।
卐1.38.4 दृंह मूलमाग्रं यच्छ वि मध्यं यमयौषधे। केशवर्धनमस्याथर्वणं केशदृंहणमस्याथर्वणम्।। 4।। 1- 39
卐1.39.1 अग्ने गोभिर्न आ गहीन्द्रो रय्या सचस्वनः। इन्द्रो धर्ता गृहेषु नः।। 1।।
卐1.39.2 सविता यः सहस्रियः स नो गृहेषु रण्यतु। आ पुष्टमेत्वा वसु।। 2।।
卐1.39.3 त्वष्टा यो वृषभो युवा स नो गृहेषु रारणत्। सहस्रेण शतेन च।। 3।।
卐1.39.4 धाता दधातु नो रयिमीशानो जगतस्पतिः। स नः पूर्णेन यच्छतु।। 4।। 1- 40
卐1.40.1 ममोभा मित्रा वरुणा मम भेन्द्रा बृहस्पती। मम त्वष्टा च पूषा च ममैव सविता वशे।। 1।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐1.40.2 मम विष्णुश्च सोमश्च ममैव मरुतो भुवन्। सरस्वांश्च भगश्च विश्वे देवा वशे मम।। 2।।

卐1.40.3 ममोभे द्यावापृथिवी अन्तरीक्षं स्वर्मम। ममेमाः सर्वा ओषधीरापः सर्वा वशे मम।। 3।।

卐1.40.4 मम गावो ममाश्वा ममाजाश्चावयश्च। ममेदं सर्वमात्मन्वदेजत् प्राणद्वशे मम।। 4।।

卐1.40.5 मह्यमाप मधुमतेरयन्त मह्यं सूर्यो अभरो ज्योतिषाकम्। मह्यं देवा उत विश्वे तपोजा मह्यं देवः सविता व्यचोधात्।। 5। (इति चतुर्चो नाम प्रथमकाण्डे अष्टमोऽनुवाकः) 1 - 41

卐1.41.1 अग्नेभ्यावर्तिन्नभि न आ ववृत्स्व। आयुषा वर्चसा सन्या मेधया प्रजया धनेन।। 1।।

卐1.41.2 अग्ने जातवेदः शतं ते सन्त्वावृतः सहस्रं त उपावृतः। अधा पुष्टस्येशानः पुनर्नो रयिमा कृधि।। 2।।

卐1.41.3 सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया। विश्वप्स्न्या विश्वतस्परि।। 3।।

卐1.41.4 पुनरूर्जा ववृत्स्व पुनरग्ने विशायुषा। पुनर्नः पाह्यं हसः।। 4।। 1- 42

卐1.42.1 याः सेना अभीत्वरीरा व्याधिनीरुगणा उत। यस्ते नो यश्च तस्करस्तांस्ते अग्नेपि दधाम्यासनि।। 1।।

卐1.42.2 जम्भ्रैर्मलिम्लुनग्ने दंष्ट्राभ्यां तस्करानुत। हनूभ्यां स्तेनान्मघवन्तांस्त्वं खाद सुखादितान्।। 2।।

卐1.42.3 ये ग्रामेषु मलिम्लुच स्तेनासस्तस्करावने। ये कक्षेश्वघायवस्तांस्तेऽग्नेपि दधाम्यासनि।। 3।।

卐1.42.4 यो अस्मभ्यमरातीयाद् यश्च नो द्वेषदिज्जनः। आमादः क्रव्यादो रिपूंस्तानग्ने सं दहात्वम्।। 4।। 1- 43

卐1.43.1 आ क्रन्दय धनपत उदेनमर्दयामुतः। अर्वाञ्चं पुनराकृधि यधाहं कामये तथा।। 1।।

卐1.43.2 परिसर्तः परिधावा कर्तः पुनरा कृधि। अथओ म इन्द्रश्चाग्निश्चामुमा नयतादिह।। 2।।

卐1.43.3 एकार्क अककामाय यस्मै कामय खायसे। तेन मे विश्वधावीर्यामुमा नयतादिह।। 3।।

卐1.43.4 यत्र यत्र चरन्तं न्यग्नैगभि सूर्यः। ततो मे पथ्ये रेवत्यमुमा नयतादिह।। 4।। 1- 44

卐1.44.1 असितस्य तैमातस्य बभ्रोरपोदकस्य च। सर्वा विषस्य धामान्युद् नेवाग्निमवीवरे।। 1।।

卐1.44.2 इषीकादन्त दूल्लभः किं मे सखायमा तुदः। न मामपश्य आगतं सतीनं विषदूषणम्।। 2।।

卐1.44.3 यत्तालव्ये दति संसिसिख्ये विषं त्वम्। त्रयस्तुदा रुजामसि बभ्रुवो न कुलस्त्वत्।। 3।।

卐1.44.4 त्रयो वै स्मः सखायो बभ्रूवो न कुलस्त्वत्। ते सर्वे अप्यपातयन्नाहेयमरसं विषम्।। 4।। 1-45

卐1.45.1 सारस्वतं वृषणं बभ्रुवक्षं शीतरूरे तन्वावस्य भीमे। अन्येद्युकं सदन्दित्वा तृतीयक हुवेनमस्यं सहदेवमप्सुजम्।। 1।।

卐1.45.2 यो अप्सुजो अरुणो मानुषे जने विवेश बभ्रुर्हर्षयिष्णुरक्षितः। शीतरुराय तर्षयिष्णवे जुगुशीर्षसाक्ये शन्नमो अस्तु देवाः।। 2।।

卐1.45.3 यो हर्षयञ्जञ्जभः स्वेदनो वशी वशः प्रारः शीतरूराशीषे मनुन्। यो अस्मभ्यं मृडयन्नेहि संसितो यं वयं द्विष्मस्तमभि प्रजानन्।। 3।।

卐1.45.4 नमस्ते विद्म ते कासनायनं यतोयतस्सुरभे सं बभूविथ। स नो मा हिंसीर्नमो अस्तु तुभ्यं शीर्षक्त्या यस्मादिह पारया नः।। 4। (इति चतुर्थो नाम प्रथमकाण्डे नवमोऽनुवाकः) 1 - 46

卐1.46.1 अस्य त्वं ददतः सोम राजन् वर्मेव तन्वं परि पाहि विश्वतः। यो ब्रह्मणे राधो विध्यो ददाति तस्य सोम प्र तिर दीर्घमायुः।। 1।।

卐1.46.2 अस्य सोम प्र तिर दीर्घमायुरहानीव सूर्यो वासराणि। मास्या सुस्रोन्नाशया व्यध्मनो विषं बहिः शल्यश्चरतु रोगो अस्मात्।। 2।।

卐1.46.3 दानं तृष्णायाः परि पातु विद्धं दानं क्षुधो दानविदेव मृत्योः। अविष्कन्धो भवतु यो ददात्याप्यायते पपुरिर्दक्षिणया।। 3।।

卐1.46.4 आ प्यायतां पपुरिर्दक्षिणया वर्मेव स्यूतं परि पाहि विश्वतः। बहिर्विषं तन्वो अस्त्वस्य स्रंसतां शल्यो अध्यारे अस्मात्।। 4।।

卐1.46.5 ब्रह्मा शरव्यामप बाधतामितो नद्याः कूलान्नावमिवाधि शम्बी। तस्मै दद दीर्घमायुष्कृणुष्व शतं च नः शरदो जीवतादिह।। 5।।

卐1.46.6 यदा ददाति प्रददाति यदा ब्रह्मा प्रति गृह्णाति राधो अस्य। आदिद्विद्यादुपहत्याराति: सर्वे यक्ष्मा अप तिष्ठन्तु साकम्।। 6।। 1- 47

卐1.47.1 व्याघ्ररूपः सुरभिः सिंहस्य रेतसा कृतः। मध्ये पृथिव्या निष्ठितं समक्षद् यातुधान्यः।। 1।।

卐1.47.2 अभि प्रेहि माप विक्थाः पदे गृभाय मापदे। अत्रैव सर्वा जम्भय याः काश्च यातुधान्यः।। 2।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham • Mysore •

卐1.47.3 प्रतीबोधश्चतुरक्षः स्त्रक्त्यो अस्मेव वीडुभित्। प्रतीचीः कृत्या आकृत्यामुं कृत्या कृतं जहि।। 3।।

卐1.47.4 कृत्याकृतं बलगिनं मूलिनं शपथेय्यम्। इन्द्रस्तु सर्वांस्तान् हन्तु सप्तघ्नेन रुवामिव।। 4।। 1- 48

卐1.48.1 अरसस्य सर्कोटस्य नीचीनस्योपसर्पतः। विषं हि सर्वमादिष्यथो एनमजीदभम्।। 1।।

卐1.48.2 न ते बाह्वो रसो अस्ति न शीर्षे नोत मध्यतः। किमिदं पापयामुया पुच्छे विभर्ष्यर्भकम्।। 2।।

卐1.48.3 यत्ते स्कन्धानुपतस्थौ विजाम्नि यच्च ते परौ। अपमित्यमिवाभृतं मलन्ते प्रति दध्मसि।। 3।।

卐1.48.4 अदन्ति त्वा पिपीलिका वि वृश्च्यन्ति मयूर्यः। सर्वेभलव्रवाथ शार्कोटमरसं विषम्।। 4।। 1- 49

卐1.49.1 कृतं मे दक्षिणे हस्ते सव्ये मे जय आहित। गोजिद्भूया समस्वजित् कृतं च यो हिरण्य जित्।। 1।।

卐1.49.2 अक्षाः फलवतीं दिवं दत्त गां क्षीरिणीमिव। सं मा कृतस्य धारया धनुः स्नाव्नेव नह्यत।। 2।।

卐1.49.3 उभौ हस्तौ प्रतिदीव्नो ब्रह्मणापोम्भामसि। कलिरेनं यथा हनदास्य वेदो भरामहै।। 3।।

卐1.49.4 आ भद्रं द्वापरमुत त्रेतां पराकलिम्। कृतं मे हस्त आहितं स हि सौमनसो महान्।। 4।। 1- 50

卐1.50.1 यदेयथ परेयथ यत्त एतन्मन ईयते। ततस्त्वा पुनर्वाञ्चं भूतस्याजीगमत् पतिः।। 1।।

卐1.50.2 आत्वानयाद्भूत पतिरा देवो बृहस्पतिः। आदित्याः सर्वे त्वा नेषन् विश्वे देवाः सुवर्चसः।। 2।।

卐1.50.3 अनुमतिः सरस्वती भगो राजा न्या नयात्। शाला मानस्य पत्नीहैवास्य मनस्करत्।। 3।।

卐1.50.4 यस्त्वा निनानयकः स उ त्वेहा नयात्पुनः। मनो हि ब्रह्माणो विदुर्विश्वकर्मा मनीषिणः।। 4।

(इति चतुर्चो नाम प्रथमकाण्डे दशमोऽनुवाकः) 1 - 51

卐1.51.1 गातो हविर्जनयन्तस्थ इन्द्राग्रं ज्येष्ठ पर्यगामेह देव। स गातो गातोत्तमापयापि मस्मभ्यमिन्द्र ददतः प्रचेतः।। 1।।

卐1.51.2 अग्निर्नः पुरएतास्त्वञ्जसा बृहस्पतिः सन्यास्तु नः सखा। इन्द्रं हुवे वृत्रहणं पुरन्दरं भगेनाद्य भगवन्तः स्याम।। 2।।

卐1.51.3 त्वं सोम दिव्यो नृचक्षा सुगां अस्मभ्यं पथो अनु ख्यः। अभि नो गोत्रं विदुष इव नेषोऽच्छा नो वाचमुशतीं जिगासि।। 3।।

卐1.51.4 इमामग्ने शरणिं मीमृषो न इममध्वानं यमगाम दूरम्। आपिः पिता प्रमतिः सोम्यानां भृमिरस्यृषिकृन्मर्त्यानाम्।। 4।। 1- 52

卐1.52.1 ये पुरस्तादास्यन्देते गावौ स्वऋषभे इव। कृणोम्यर्वणी अहमश्ववारादणीयसी।। 1।।

卐1.52.2 ये अधरादास्यन्देते गावौ स्वऋषभे इव। कृणोम्यर्वणी अहमश्ववारादणीयसी।। 2।।

卐1.52.3 ये पश्चादास्यन्देते गावौ स्वऋषभे इव। कृणोम्यर्वणी अहमश्ववारादणीयसी।। 3। ।

卐1.52.4 ये उत्तरादास्यन्देते गावौ स्वऋषभे इव। कृणोम्यर्वणी अहमश्ववारादणीयसी।। 4।। 1- 53

卐1.53.1 अग्ने यशस्विन् यशसा वर्धयेममिन्द्रवतीमुपचितिमिहावह। अयं मूर्धा परमेष्ठी सुवर्चाः समानानामुत्तमश्लोको अस्तु।। 1।।

卐1.53.2 धाता विधर्ता परमोत संदृक् प्रजापतिः परमेष्ठी विराट्। स्तोमाश्छन्दांसि निविदो म आहुस्ते अस्मै राष्ट्रमुप सं नमन्तु।। 2।।

卐1.53.3 भद्रमिच्छन्त ऋषयः स्वर्विदस्तपो दीक्षामुपनिषे दुरग्रे। ततो राष्ट्रं बलमोजश्च जातं तदस्मै देवा उप सं नमन्तु।। 3।।

卐1.53.4 उपा वर्तध्वमुप न एत सर्वेऽयं चेत्ताधिपतिर्वो अस्तु। समानं मन्त्रमभि मन्त्रयाध्वा इमं पश्चादुप जीवाथ सर्वे।। 4।। 1- 54

卐1,54.1 त्वमग्ने प्रमतिस्त्वं पितासि नस्तवं सखा युज्योसि जातवेदः। त्वं विश्ववित् गातुवित् कविर्विश्वा आशा अभयाः सन्तस्मे।। 1।।

卐1,54.2 इदं वर्चो अग्निनादत्तमागन् भर्गो यशः सह ओजो वयो बलम्। त्रयस्त्रिंशत् यानि विर्याणि तान्यग्निः प्रददातु मे।। 2।।

卐1,54.3 वर्च आ धेहि मे तन्वां सह ओजो वयो बलम्। इन्द्रियाय त्वा कर्मणे वीर्याय प्रति गृह्णामि शतशारदाय।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐1,54.4 ऊर्जे त्वा बलाय त्वौजसे सहसे त्वा। अभि भूयाय त्वा राष्ट्र भृत्याय पर्युहामि शतशारदाय।। 4।।

卐1,54.5 ऋतुभिष्ट्वार्त वैरायुषे वर्चसे त्वा। सम्वत्सरस्य तेजसा तेन सं हनु कृण्मसि।। 5।। 1- 55

卐1.55.1 इदमाञ्जनमानजे शैलूनमाकनिक्रदम्। अभि मा चक्रन्द भग ऋषभो वासितामिव।। 1।।

卐1.55.2 अश्वः कनिक्रदत् यथा प्रत्यङ् मा भग आगमत्। तमहं प्रेण्या अधि पुत्रमिवोपस्थ आधिषि।। 2।।

卐1.55.3 अक्ष्यौ मे मधुसंकाशे जिह्वा मे मधुवादिनी। नसोरधि प्रमन्दनं दत्सु मे सारघं मधु।। 3।।

卐1.55.4 मधुमन्मम नीसनं जघनं मधुमन्मम। मामित् किल त्वं वावनः शाखां मधुमतीमिव।। 4।

(इति चतुर्थो नाम प्रथमकाण्डे एकादशोऽनुवाकः) 1 - 56

卐1.56.1 प्रेता जयता नर उग्रावः सन्तु बाहवः। इन्द्रो वः शर्म यच्छत्वनाधृष्या यथासथ।। 1।।

卐1.56.2 उर्द्धर्षन्तां मघवन्नायुधान्युत सत्वनां मामकानां मनांसि। उर्द्धर्षन्तां वाजिनां वाजिनान्युद्धीराणां जयतामेतु घोषः

卐1.56.3 पृथक् घोषा उलुलयः केतुमन्त उदीरताम्। देवा इन्द्रज्येष्ठा मऋतो यन्तु सेनया।। 3।।

卐1.56.4 अवसृष्टा परापत शरव्ये ब्रह्म संशिते। जया मित्रान् प्र पद्यस्व मामीषां कञ्चनोच्छिषः।। 4।। 1- 57

卐1.57.1 दूष्या दूषिरसि हेत्या हेतिरसि मेन्या मेनिरसि। आप्नुहि श्रेयान्समति समं क्राम।। 1।।

卐1.57.2 स्रक्त्योसि प्रतिसरोसि पुनः सरोसि प्रत्यभि चरणोसि। आप्नुहि श्रेयान्समति समं क्राम।। 2।।

卐1.57.3 प्रति तमभि चर योऽस्मान् द्वेष्टि यं वयं द्विष्मः। आप्नुहि श्रेयान्ससमति समं क्राम।। 3।।

卐1.57.4 सुरिरसि वर्चोधास्तनूपानायुष्यः कृतिया दूषणः। आप्नुहि श्रेयान्समति समं क्राम। ।

卐1.57.5 शुक्रोसि भ्राजोसि ज्योतिरसि स्वरसि। आप्नुहि श्रेयान्समति समं क्राम।। 5।। 1-58

卐1.58.1 विष्कन्धस्य काबवस्य कर्दमस्योलूक्याः। अपस्थानस्य कृत्या यास्तेषां त्वं खृगले जहि।। 1।।

卐1.58.2 प्र मृणीह्युपहत्यां कर्दमं नीलशाक्यम्। अधा सारमिव दारुण आयुष्कृणोम्यन्तरम्।। 2।।

卐1.58.3 विविद्धस्यावतृण्णस्य हृदस्य चाहृदस्य च। त्रिपर्णी विश्वभेषजीदं कृणोतुभेषजम्।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐1.58.4 काबवस्य विष्कन्धस्यापस्थापन भेषजम्। इदं कृणोमि भेषजं यथा यमगदोषति।। 4।। 1-59

卐1.59.1 यस्माद‌ङ्गात् संसुस्राव यद् बभूव गलन्त्यशः। गावो वत्समिव जानानास्तत् परैतु यथा यथम्।। 1।।

卐1.59.2 नासृगस्ति पतङ्गस्य तर्दस्य मशकाद्याः। वेणोः पुतुद्रोर्नास्त्यसृङ् मास्य ग्लौर्मापचिद् भुवत्।। 2।।

卐1.59.3 अहं वेद यथासिथ गुर्विका नाम वा असि। अमूं त्वं तमितो गच्छ यमहं द्वेष्मि पूरुषम्।। 3।।

卐1.59.4 तस्यापि मध्य आ सीद नील ग्रीवासु सीदता। वातस्यानु प्रवां मसकस्यानु सं विदम्।। 4।।

卐1.59.5 प्रेतो यन्त्वग्रुवो निरितो यन्त्वग्रुवः। अधराचीमितः परः।। 5।।

卐1.59.6 प्राहं ग्लाव मध्मासं निरहं ग्लाव मध्मासम्। अधराचीरितः परः।। 6।। 1-60

卐1.60.1 अभि त्वामहमोजसेन्द्रो दस्यूनिवाभुवम्। सपत्नी नश्यतादितो दूरं गच्छाध्योकसः।। 1।।

卐1.60.2 सासहा इदहं पतिं सासहै श्वशुरा उभौ। अथो सपत्नीं सासहै यथा नश्यात्योकसः।। 2।।

卐1.60.3 अभिभूरहमागमं विश्वकर्मा महावदात्। अहं मित्रस्य कल्पन्येषु गृहेषु दुष्टरात्।। 3।।

卐1.60.4 उत्तिष्ठ मम वा इदन्न तवेहापि किं च न। माञ्चैव पश्यन्नायत्य मुञ्च दिवि सूर्यम्।। 4। (इति चतुर्चो नाम प्रथमकाण्डे द्वादशोऽनुवाकः) 1 - 61

卐1.61.1 यस्त्वा मृत्युरभ्यधत्त जायमानं सुपाशया। तन्ते सत्यस्य हस्ताभ्यामुदमुञ्चद् बृहस्पतिः।। 1।।

卐1.61.2 अभि त्वा जरिमाहित गामुक्षणमिव रज्वा। व्यन्ये यन्तु मृत्यवो यानाहुरितराञ्छतम्।। 2।।

卐1.61.3 प्र विशतं प्राणापानावनड्वाहाविव व्रजम्। शरीरमस्याङ्गानि जरिम्णे नयतं युवम्।। 3।।

卐1.61.4 इहैवस्तं प्राणापानौ मेमं हासिष्टं मृत्यवे। अयं जरिम्णः शेवधिररिष्ट इह वर्धताम्।। 4।।

卐1.61.5 जरसे त्वा परि दध्मो जरसे नि धुयामसि। जरा त्वा भद्रया नेषत् व्यन्ये यन्तु मृत्यवो यानाहुरितराञ्छत्म्।। 6।। 1- 62

卐1.62.1 मुञ्चामि त्वा हविषा जीवनाय कमज्ञातयक्ष्मादुत राजयक्ष्मात्। ग्राह्या गृभीतो यद्येष एतत्त इन्द्राग्नी प्र मुमुक्तमेनम्।। 1।।

卐1.62.2 यदि क्षितायुर्यदि वा परेतो यदि मृत्योरन्तिकं नीत एव। तमा हरामि निर्ऋतेरुपस्थादस्पार्षमेनं शतशारदाय।। 2।।

卐1.62.3 सहस्राक्षेण शतवीर्येण शतायुषा हविषा हार्षमेनम्। इन्द्रो यथैनं जरसे नयात्यति विश्वस्य दुरितस्य पारम्।। 3।।

卐1.62.4 शतं जीवो शरदो वर्धमानश्शतं हेमन्ताञ्छतमु वसन्तान्। शतमिन्द्राग्नी सविता बृहस्पतिश्शतायुषा हविषा हार्षमेनम्।। 4।। 1- 63

卐1.63.1 यत्ते अन्नं भुवस्पत आक्षियेत पृथिवीमनु। तस्यनस्त्वं भुवस्पते सं प्रयच्छ प्रजापते।। 1।।

卐1.63.2 व्यात्ते परमेष्ठिनो ब्रह्मणापीपदाम तम्। संवत्सरस्य दंष्ट्राभ्यां हेतिस्तं समधादभि।। 2।।

卐1.63.3 इयं त्वं भवस्त्वाहुतिः समिद्देवी सहीयसी। राज्ञो वरुणस्य बन्धोसि सोमुमामुष्यायणममुष्याः पुत्रमह्ने रात्र ये बधान।। 3।।

卐1.63.4 मृणोसि देव सवितर्गायत्रेणच्छन्दसा। मृणामुष्य पशून् द्विपदश्चतुष्पदः।। 4।।

卐1.63.5 योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तञ्जहि तं मृणस्तस्मै मा मीमृणस्तस्मै दुराहा।। 5।। 1- 64

卐1.65.1 नि ते पदं पदे मम नि चित्तमेतु निष्कृतः। यथा सः केवलो ममाहं साधारणी तव।। 1।।

卐1.65.2 पदेन गामनु यन्ति पदेनाश्वं पदारथम्। पदेन मर्या मत्वं न एषो नो अहं त्वत्।। 2।।

卐1.65.3 माप सृपो मा परा सृपो मान्यत्रास्मन्मनस्कृथाः। यं त्वाहिरिव भोगैर्नाकुलेन परीमसि।। 3।।

卐1.65.4 नि त्वा कृण्वे सं नहने नि कुरीरे न्योपशे। नि त्वाधमस्मि लोम्निन्वित्वा मुष्कयोर्मृजे।। 4।। 1- 65

卐1.65.1 घृता हृदा पृथिवी मा न एनोऽस्मान् प्रजान्वोचत किल्बिषाणि। अनातुरास्सुमनस स्सुवीरा ज्योग्जीवन्तस्तव सख्ये स्याम।। 2।।

卐1.65.2 अन्तरेमि यातुधानानन्तरेमि किमीदिनः। धियाम पित्र्या वयं सरस्वत्या चरामसि।। 2।।

卐1.65.3 मा ते रिषं खनिता यस्मै च त्वा खनामसि। द्विपाच्चतुष्पादस्माकं मा रिषद्देव्योषधे।। 3।।

卐1.65.4 अन्य वो अन्या अन्यामवत्वन्यान्यस्या उपावत। सध्रीचीस्सव्रता भूत्वा अस्या वत वीर्यम्।। 4। (इति चतुर्थो नाम प्रथमकाण्डे त्रयोदशोऽनुवाकः) 1 - 66

卐1.66.1 ध्रुवस्तिष्ठ भुवनस्य गोप मा सं विक्था वनस्पते। अत्रैव त्वमिह वयं सुवीरा विश्व मृधो अभिमातीर्व्यस्य।। 1।।

卐1.66.2 अत्रैव त्वमिह वयं सुवीरा विश्वा मृधो अभिमातीर्व्यस्य।। 1।।

卐1.66.3 यो वानस्पत्यानामधिपतिर्बभूव यस्मिन्निमा विश्वा भुवनान्यार्पिता। तमनज्मी मिथुना दैव्येन तस्मान्मणिं निर्ममे विश्वरूपम्।। 2।।

卐1.66.4 इमं मणिं विश्वजितं सुवीरमस्मादश्वत्थात् पर्युद्धरामि। येन विश्वाः पृतनास्सञ्जयान्यथो द्युमत्समितिमा वदानि।। 3।।

卐1.66.5 सबन्धुश्चासबन्धुश्च यो न इन्द्राभिदासति। वृश्चामि तस्याहं मूलं प्रजां चक्षुरथो बलम्।। 4।।

1- 67

卐1.67.1 देवी देव्यां जातासि पृथिव्यामध्योषधे। तं त्वा नितत्नि केशेभ्यो दृंहणाय खनामसि।। 1।।

卐1.67.2 इन्द्रस्त्वा खनत् प्रथमो वरुणस्य दुहितृभ्यः। दृंह जातां जनयाजातां ये जातास्तानु वर्षीयसस्कृधि।। 2।।

卐1.67.3 यस्ते केशो वततस्समूलो यश्च वृह्यते। सर्वं तं विश्वभेषज्याभि षिञ्चामि वीरुधा।। 3।।

卐1.67.4 अभिशुना मेयोऽस्तु विजामेनानुमेयः। केशो नड इव वर्धतां शीर्ष्णस्ते असितस्परि।। 4।।

1- 68

卐1.68.1 यथा नडं कशिपुने स्त्रियो भिन्दन्त्यश्मना। एवा भिनद्मि ते मुष्कौ तस्मै त्वामवसे हुवे।। 1।।

卐1.68.2 त्वं वीरुधां श्रेष्ठतमाभिश्रुतास्योषधे। सामुमद्य पूरुषं क्लीवमोपशिनं कृधि।। 2।।

卐1.68.3 क्लीवं कृध्योपशिनमथो कुरीरिणं कृधि। उभाभ्यामस्य ग्रावभ्यामिन्द्रो भिनत्वाण्ड्यौ।। 3।।

卐1.68.4 क्लीव क्लीवं त्वाकरं वध्रे वध्रिं त्वाकरमरसारसं त्वाकरमरसारसोसि। कुरीरमस्य शीर्षणी कुम्भं चाधि निदध्मसि।। 4।। 1- 69

卐1.69.1 जायमानो निररुजत् सपत्नान् दोधतो भयान्। स वै सपत्नानां सभा अवालप्स्यो अनाशयत्।। 1।।

卐1.69.2 आरादरातिं कृणुते ऽशस्तिमप बाधते। अवालप्स्यस्स यो मणिस्सहस्वानभिमातिहा।। 2।।

卐1.69.3 चक्षुरस्य सूत्रमासीत्तर्द्म श्रोत्रमुताभरत्। अवालप्स्यस्स यो मणिस्सहस्वानभिमातिहा।। 3।।

卐1.69.4 इमं मणिमावालप्स्यं यस्मिन्नारोहयामसि। स वै सपत्नाना दत्ते स एनं पातु विश्वतस्स एनं जरसे नयात्।। 4।। 1- 70

卐1.70.1 यतो जीवेभ्यो न पितूनुपैति यमानशे दुष्कृतं दैधिसव्यम्। अयज्ञः प्रथमो यो विवेश कृछ्रादिज्योतिरभ्यस्नवातै।। 1।।

卐1.70.2 नास्यौषधीष्वप्यस्ति नाप्स्वन्तर्नास्य सूर्यं संदृशमेति चक्षुः। भूमिर्द्वेष्टि चरन्तमेनं यमानसे दुष्कृतं दैधिषव्यम्।। 2।।

卐1.70.3 कृते देवा अमृजतैन एतत्कृत एनं मनुष्येष्वमृष्ट। तत एतदमुया रक्ष ईर्तें प्रमुक्तं ज्योतेरधि दूरमेति।। 3।।

卐1.70.4 येभिः पाशैर्दिधिषुपतिर्विबद्धः परो परावार्पितो अङ्गे अङ्गे। वि ते चृत्यन्तां विचृतो हि सन्ति भ्रूणाघ्नि पूषन् दुरितानि मुष्टाः।। 4। (इति चतुर्चो नाम प्रथमकाण्डे चतुर्दशोऽनुवाकः) 1 - 71

卐1.71.1 अग्निष्टे विश आ नयादिन्द्रो वायुर्बृहस्पतिः। स ते धर्ममदीधरद्धातेव भुवनेभ्यः।। 1।।

卐1.71.2 बृहस्पते पुरयेता विशामि ह्यग्निः पश्चादभि नुदात्यायतीः। वायुरेना दक्षिणतः पूषोत्तरादपानुदात्।। 2।।

卐1.71.3 आ सहस्त्री शतरथ आ रेवान्येतु नो विशन्। इन्द्रो वामेन विश्पतिरा रूपेण बृहस्पतिः।। 3।।

卐1.71.4 स्वर्जुष्टः कश्यपस्य स राष्ट्रे जागरत्स्वे। ऋषभश्शातमातुर श्श्वेतन्तादविहृतो देवान् यज्ञेन बोधयात्।। 4।। 1- 72

卐1.72.1 महाजनाः प्रथमा ये दिदिविरे धने संहत्य महति द्विराजे। तेषां वरे यः प्रथमो जिगाय तस्याहं लोकमनुद्भिदेयम्।। 1।।

卐1.72.2 मेदिनस्ते वैभिदकास्तत इन्द्र उपावतु। अव्या वृक इव संरभ्य जिगीवानस्तमायसि।। 2।।

卐1.72.3 उद्वाहृ हिरण्य जिद् गोजिदश्वजितौ भरे। व्याघ्रो जघ्निवाँ इवोत्तिष्ठाधि देवनात्।। 3।।

卐1.72.4 आदि नवं प्रतिदीब्ने कृतेनास्माँ अभिक्षर। वृक्षमिवाशन्या जहि यो अस्मान् प्रतिदीव्यति।। 4।। 1- 73

卐1.73.1 दिवस्पृथिव्याः पर्यन्तरिक्षाद्वनस्पतिभ्यो अध्योषधीभ्यः। यत्रयत्र विभृतो जातवेदा स्ततस्ततो जुषमाणो न एहि।। 1।।

卐1.73.2 यस्ते अप्सु महिमा यो वनेषु य ओषधीषु पशुष्वप्स्वन्तः। अग्ने सर्वास्तन्वः सं रभस्व ताभिर्न एहि द्रविणोदा अजस्रः।। 2।।

卐1.73.3 यस्ते देवेषु महिमा स्वर्गो या ते तनूः पितृष्वाविवेश। पुष्टिर्जाते मनुष्येषु पप्रथे ऽग्ने तया रयिमस्मासु धेहि।। 3।।

卐1.73.4 श्रुत् कर्णाय कवये वेद्याय वचोभिर्वाकैरुप याम रातिम्। यतो भयमभयं तन्नो अस्त्वव देवानां यज हेड अग्ने।। 4।। 1- 74

卐1.74.1 इन्द्रो देवानां वरुणो धृतव्रतः सोमो वीरुधां जगतः परस्पाः। वायुः पशूनां पशुपा जनानामयं पुरोरा नो अस्यास्तु मूर्धा।। 1।।

卐1.74.2 मूर्धादिवो अन्तरिक्षस्य मूर्धा मूर्धा सिन्धूनामुत पर्वताम्। मूर्धा विश्वस्य भुवनस्य राजाऽयं पुरोरा नो अस्यास्तु मूर्धा।। 2।।

卐1.74.3 मृघस्ते सम्राड् वहन्तु सर्वाँ अमित्रान् राजा वरुणो विषूचः। इन्द्रश्शत्रूनसुनीतिं नयाति तेऽयं पुरोरा नो अस्यास्तु मूर्धा।। 3।।

卐1.74.4 विशस्त्वा राजन् प्रदिशो जुषन्तां दैविर्विशः सुप्रकेताः सकेताः। विश्वा आशा मनुष्यो वि भाह्ययं पुरोरा नो अस्यास्तु मूर्धा।। 4।। 1- 75

卐1.75.1 वि बाधस्व दृंहस्व व्रीडयस्वाधस्पदं शत्रवस्ते भवन्तु।।

卐1.75.2 सपत्नसाह ऋषभो जनाषाडुग्रश्चेत्ता पञ्चकृष्टिर्विराजः।। 1।।

卐1.75.3 शिवं क्षेत्र मनमिवन्ते अस्तूत्तमे नाके अधि तिष्ठेहि। पुत्रान् भ्रातृन् बहुलान् पश्यमानो विश्वे त्वा देवा इह धारयन्तु।। 2।।

卐1.75.4 त्वष्टा रूपेण सविता सवेनाहर्मित्रेण वरुणेन रात्री। इन्द्रो ज्यैष्ठ्येन ब्रह्मणायं बृहस्पतिर्धाता त्वा धीभिरभि रक्षत्विह।। 3।।

卐1.75.5 वास्तोस्पत इह नः शर्म यच्छ घने वृत्राणां सङ्गथे वसूनाम्। इहैवैधि ग्रामपतिर्जनाषाड् विश्वैर्देवैर्गुपितो रक्षमाणः।। 4। (इति चतुर्चो नाम प्रथमकाण्डे पञ्चदशोऽनुवाकः) 1 - 76

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐1.76.1 ऊर्ध्वो भव प्रति विध्याध्यस्मदुग्रं धनुरोजस्वाना तनुष्व। प्रतिदुर्हार्दं हरसा शृणीहि कृत्वानमग्ने अधरं कृणुष्व।। 1।।

卐1.76.2 प्रत्येनं याहि प्रतिभङ्क्ष्वेनं विविध्यन्नग्ने वितरं वि भाहि। प्रत्यङ् प्रेहि वर्त्मना जर्हृषाणः कृत्याकृते दुष्कृते माधि वोचः।। 2।।

卐1.76.3 यो नो दुर्हार्द्धृदयेनाभिवस्ते यश्चक्षुषा मनसा यश्च वाचा। प्रत्यङ् दंष्ट्राभ्यामभितं वभूषं कृत्याकृतं दुष्कृतं निर्दहाग्ने।। 3।।

卐1.76.4 प्रती बोधश्चतुरक्षो दिव्यो अश्मेव वीडुभित्। प्रभञ्जञ्छत्रून् प्रति या ह्यग्ने कृत्याकृतं दुष्कृतं हृदये विध्य मर्मणि।। 4।। 1- 77

卐1.77.1 इन्द्र क्षत्रमभि वाममोजोऽजायथा वृषभ चर्षणीनाम्। अपानुदो जनममित्रयन्तमुरुं देवेभ्यो अकृणोरु लोकम्।। 1।।

卐1.77.2 मृगो नो भीमः कुचरो गिरिष्ठाः परावत आजगामा परस्याः। सृकं संशाय पविमिन्द्र तिग्मं वि शत्रून्ताडि विमृधो नुदस्व।। 2।।

卐1.77.3 अंहोमुचे प्रभरे मनीषामाशुत्राम्णे सुमतिमावृणानः। इदमिन्द्र प्रतिहव्यं गृभाय सत्याः सन्तु यजमानस्य कामाः।। 3।।

卐1.77.4 अंहोमुचं वृषभं यज्ञानां विराजन्तं प्रथममध्वराणाम्। अपां नपातमश्विनौ हुवे धिय इन्द्रेण न इन्द्रियं धत्तमोजः।। 4।। 1- 78

卐1.78.1 धातारमिन्द्रं सवितारमूतये हुवे देवाँ अमृतान्मर्त्यः सन्। श्रेष्ठो नो वसवो धत्त धाम्नि मा रधाम द्विषते मो अरातये।। 1।।

卐1.78.2 अधि ब्रवीत्वधि वक्ता न इन्द्रो अधि ब्रवीतु सविता दैव्येन। स्वस्ति मित्रा वरुणा च धत्तां रात्रिं रात्रिमहरहश्च देवाः।। 2।।

卐1.78.3 अधि ब्रवीतु पृथिवी उतद्यौरधि ब्रुवन्तु मरुतः पृश्निमातरः। यो नो द्वेष्ट्यरणो योः सनाभिः पविरिव नेमेरधरः सो अस्तु।। 3।।

卐1.78.4 यस्य त्रया गतमनुप्रयन्ति देवा मनुष्याः पशवश्च सर्वे। तन्नो देवं मनो अधि ब्रवीतु सुनीतिन्नो नयतु द्विषते मा रधाम।। 4।। 1- 79

卐1.79.1 वर्चस्वानसि देवेषु वर्चस्वानोषधीष्वा। अथो वर्चस्विनं कृधि यमश्वत्थाधिरोहसि।। 1।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐1.79.2 यमश्वत्थो अध्यरुक्षद्राजा मनुष्यं जनम्। इन्द्रमिव वि मृधो हनत्तस्माद्राष्ट्रमनपच्युतम्।। 2।।

卐1.79.3 आरोह नाम वा असि सहस्वानुदजायथाः। तं त्वा सपत्न सासहमश्वत्थ वि भरादयम्।। 3।।

卐1.79.4 राजा वा असि भूतानामृषभो वीरुधां पतिः। स नः सपत्नानश्वत्थ विषूचो व्युदा कृधि।। 4।।

1- 80

卐1.80.1 संपश्यमाना अमृता य आयन् शुद्धा योनिभ्योस्परिजायमानाः। शिवं कृण्वाना उपजिघ्रतेमं वीरं वीरेष्वप्या कृणुध्वम्।। 1।।

卐1.80.2 शिवो वो वीर इह जातो अस्तु शुद्धो योनिभ्यस्परिजायमानः। अरिष्टोऽयं वर्द्धतां सर्वमायुर्वर्मं ज्यायोभ्यो हविषा कृणोतु।। 2।।

卐1.80.3 जरां मृत्युं प्रेप्सतु जीव एष नास्य क्रिमिरीशातो नोत जम्भः। शंरभ्य जीव शरदः सुवर्चा अग्निष्टे गोपा अधिपा वसिष्ठः।। 3।।

卐1.80.4 जरामृत्युर्जरायुर्जराचक्षुर्जरास्वः। जरसे त्वा जरदष्टिं परिददामि।। 4।।

卐1.80.5 द्योष्टे पिता पृथिवी मातान्तरिक्षमात्मा। वातः प्राणः सूर्यचक्षुर्दिवस्पयः।। 5।।

卐1.80.6 सुपर्णस्त्वाभ्यव पश्यादायुषे वर्चसेऽयमन्नस्यान्न पतिरस्तु वीरः।। 6। (इति चतुर्थो नाम प्रथमकाण्डे षोडशोऽनुवाकः) 1 - 81

卐1.81.1 यज्ञस्य चक्षुः प्रभृतिर्मुखं च वाचा श्रोत्रेण मनसा जुहोमि। इमं यज्ञं विततं विश्वकर्मणा देवा यन्तु सुमनस्यमानाः।। 1।।

卐1.81.2 ये देवानामृत्विजो ये च यज्ञिया येभ्यो हव्यं क्रियते भागधेयम्। इमं यज्ञं सह पत्नीभिरेत्य यावन्तो देवास्तति मा दयन्ताम्।। 2।।

卐1.81.3 यन्मा हुतं यदहुतमाजगाम यस्मादन्नान्मनसोद्रारजीमि। यद्देवानां चक्षुषो आगसीनमग्निष्टद्धोता सुहुतं कणोतु।। 3।।

卐1.81.4 अग्नेष्ट्वा जिह्वयाहुतमिष्टं मरुद्भिरनुमतं पितृभिः प्राश्नामि।। 4।। 1- 82

卐1.82.1 ग्नेः प्रजातं परि यद्धिरण्यममृतं दधे अधि मर्त्येषु। य एनद्वेद स इदेनदर्हति जरामृत्युर्भवति यो विभर्ति।। 1।।

卐1.82.2 चद्धिरणयं सूर्येण सुवर्णं प्रजावन्तो मनवः पूर्वं ईषिरे। तत्त्वा चन्द्रं वर्चसा सं सृजात्यायुष्मान् भवति यो विभर्ति।। 2।।

卐1.82.3 आयुषे त्वा वर्चसे त्वौजसे च बलाय च। यथा हिरण्य तेजसा विभासासि जनाँ अनु।। 3।।

卐1.82.4 यद्वेद राजा वरुणो वेद देवो बृहस्पतिः। इन्द्रो यत् वृत्रहा वेद तत्त आयुष्यं भुवत्तत्ते वर्चसं भुवत्।। 4।। 1- 83

卐1.83.1 यदा बध्नन् दाक्षायणा हिरण्यं शातनीकाय सुमनस्यमानाः। तत्ते बध्नामि शतशारदायायुष्मान् जरदष्टिर्यथासः।। 1।।

卐1.83.2 नैनं रक्षांसि नः पिशाचाः सहन्ते देवानामोजः प्रथमजं ह्येतत्। यो विभर्ति दाक्षायणा हिरण्यं स जीवेषु कृणुते दीर्घमायुः।। 2।।

卐1.83.3 अपां रेतो ज्योतिरोजो बलं च वनस्पतीनामुत वीर्याणि। इन्द्र इवेन्द्रियमव रुध्मो अस्मिन् स दक्षमाणो विभरद्धिरण्यम्।। 3।।

卐1.83.4 समानां मासामृतुभिष्ट्वाहं संवत्सरस्य पयसा पिपर्मि। इन्द्राग्नी त्वा ब्रह्मणा वावृधानावायुष्मन्तमुत्तमं त्वा करातः।। 4।। 1- 84

卐1.84.1 यत्ते चतस्रः प्रदिशो मनो जगाम दूरकम्। तत्त आवर्तयामसीह क्षयाय जीवसे।। 1।।

卐1.84.2 यत्ते भूमिं चतुः स्त्रक्तिं मनो जगाम दूरकम्। तत्त आवर्तयामसीह क्षयाय जीवसे।। 2।।

卐1.84.3 यत्ते यमं वैवस्वतं मनो जगाम दूरकम्। तत्त आवर्तयामसीह क्षयाय जीवसे।। 3।।

卐1.84.4 यत्ते समुद्रमर्णवं मनो जगाम दूरकम्। तत्त आवर्तयामसीह क्षयाय जीवसे।। 4।।

卐1.84.5 यत्ते दिवं यत् पृथिवीं मनो जगाम दूरकम्। तत्त आवर्तयामसीह क्षयाय जीवसे।। 5।।

卐1.84.6 यत्ते वायुमन्तरिक्षं मनो जगाम दूरकम्। तत्त आवर्तयामसीह क्षयाय जीवसे।। 6।।

卐1.84.7 यत्ते सूर्यं यदूषसं मनो जगाम दूरकम्। तत्त आवर्तयामसीह क्षयाय जीवसे।। 7।।

卐1.84.8 यत्ते चन्द्रं नक्षत्राणि मनो जगाम दूरकम्। तत्त आवर्तयामसीह क्षयाय जीवसे।। 8।।

卐1.84.9 यत्त आपो यदोषधीर्मनो जगाम दूरकम्। तत्त आवर्तयामसीह क्षयाय जीवसे।। 9।।

卐1.84.10 यत्ते परमां परावतं मनो जगाम दूरकम्। तत्त आवर्तयामसीह क्षयाय जीवसे।। 10।। 1- 85

卐1.85.1 यं गृह्णन्त्यप्सरसो यं मथ्नाति बृहस्पतिः। तं कश्यपस्य ब्रह्मणा सविता पुनराभरत्।। 1।।

卐1.85.2 यो भर्ताकूः परिधाय मृगेष्वपि धावति। तं कश्यपश्य ब्रह्मणा सविता पुनराभरत्।। 2।।

卐1.85.3 सविताग्निर्ब्रह्म सोम इन्द्रस्त्वष्टा बृहस्पतिः। एते मरुद्युतं त्वा ब्रह्मणा पुनराभरन्।। 3।।

卐1.85.4 भद्रां वाचं शिवं चक्षुर्मरुद्युताय कृण्मसि। इमा ह्यस्मा ओषधीमा हराम्य रुन्धतीम्।। 4।

(इति चतुर्थो नाम प्रथमकाण्डे स्तदशोऽनुवाकः) 1 - 86

卐1.86.1 त्रिभ्यो रुद्रेभ्यः प्रवसन् यजामि ज्येष्ठः कनिष्ठ उत मध्यमो यः। ज्योतिस्कारः कवयः सोमपा ये कण्वा अदन्तु निरितो बधेन।। 1।।

卐1.86.2 इन्द्राग्नी वीतं हविषः संविदानौ समिद्धो अग्निः समिधा गीर्भिरिन्द्रः। नुदेथां कण्वा निरितो अरातिमाराद्रक्षांसि तपतं व्यस्मत्।। 2।।

卐1.86.3 वास्तोष्पते सुप्रजसः सुवीरा षष्ठीस्यामि शरदः शतानि। दुर्वास्तु कण्वा अभि निर्णुदस्व सुवास्त्वस्माँ उप सं विशस्व।। 3।।

卐1.86.4 या तन्तिषत्खलसद् या च गोष्ठे या जाताः शकधूमे सभायाम्। प्रपायां जाता उत याश्च भित्सु ताश्चातयामः शिवता नो अस्तु।। 4।।

卐1.86.5 दुद्वा च दुद्वती च स्थस्तद्वां नाम तद्वां नामधेयम्। रुद्र प्रेषिते स्तो व्ये नाम पर्यस्मान् वृङ्क्तम् यो नो द्वेष्टि तमृच्छतम्।। 5।।

卐1.86.6 वीची नामास्यघहारा नाम। नमस्ते अस्तु वातकेऽन्यत्रास्मदघं कृधि।। 6।।

卐1.86.7 ऋजीते परि णो नमाग्रेण परि णो नम। अश्मानं तन्वं कृण्महे अद्या नः सोम मृडय।। 7।।

1- 87

卐1.87.1 त्वं दर्भासि पतिरोषधीनां विभिन्दन् यासि कन्या इवैनाम्। भिन्धि शिरः कृमेर्जायां न्यस्य शरीरं भिन्ध्युत भिन्ध्यस्थि।। 1।।

卐1.87.2 यः कीकसास्श्नो वीरदात्परूंषि यस्योद्धार उष्णिहास्ता हि वव्रे। हनिष्यामि वां निरतः परेतं तृणान्यत्तम वसीरिणामिव।। 2।।

卐1.87.3 अयं य आस्ते जठरेष्वन्तः कास्फीवशं निरुजं मर्त्यस्य। हनिष्यामि वां निरतः परेतं स्तायदेयथुः प्रति वामभुत्सि।। 3।।

卐1.87.4 येनेयथुस्तेनपथापरेतं स्तायदेयथुः प्रति वामभुत्सि। ब्रह्मणा वां परितृह्य समन्तं विच्छेत्स्यामि नकुल इव सर्पम्।। 4।। 1- 88

卐1.88.1 यज्ञपतिमृषय एनसाहुर्निर्भक्ता भागादनु तप्यमानाः। यदेनश्चकृवान् बद्ध एष ततो विश्वकर्मन् प्र मुमुग्ध्येनम्।। 1।।

卐1.88.2 अदान्यान् सोमपान् मन्यमानो यज्ञस्य विद्वान् समये न धीरः। मधव्यान् स्तोकानप यान् रराध सं मा तैः सृजतु विश्वकर्मा।। 2।।

卐1.88.3 ये भक्षयन्तो न वसु न्यानुधुर्यानग्नयो अन्वतप्यन्त्व धृष्ण्या। या तेषामवया दुरिष्टात् स्विष्टं तत् विश्वकर्मा कृणोतु।। 3।।

卐1.88.4 भीमा ऋषयो नमो अस्त्वेभ्यश्चक्षुर्यदेषां मनसश्च संदृक्। बृहस्पतये महिषाय दिवे नमो विश्वकर्मन्नमस्ते पाह्यस्मान्।। 4।। 1- 89

卐1.89.1 सर्वा इमा ओषधयः पृथिव्यामधिनिष्ठिताः। अथैव भद्रिके त्वमसुरेभ्यो अजायथाः।। 1।।

卐1.89.2 शतं जह्यप्सरसां शतं स्वन्वतीनाम्। गन्धर्वपत्नीनां शतस्येन्द्रो अपि कृतच्छिरः।। 2।।

卐1.89.3 याः पतन्ति पुरो वातं पतन्ति रेष्मभिः सह। चेतन्ति मश्मलां पलामिन्द्रो अप्सरसो हनत्।। 3।।

卐1.89.4 वि वो यशो हवामहे वि वो हविष्य मोदनम्। अपावरीरपोर्णुतास्मद् यक्ष्ममपोर्णुत वातस्तेजन्यं यथा।। 4।। 1- 90

卐1.90.1 असितस्य विद्रधस्य लोहितस्य वनस्पते। विसल्पकस्यौषधे मोच्छिषः पिशितं च न।। 1।।

卐1.90.2 यत्ते बलास तिष्छतः कक्षे मुष्कावपाकृतम्। वेदाहं तस्य भेषजं चीपद्रामभिचक्षणम्।। 2।।

卐1.90.3 निर्बलासं बलासिनो विसल्पमुत विद्रधम्। परोप हत्यां ते वयं परा यक्ष्मं सुवामसि।। 3।।

卐1.90.4 शीर्षरोगमङ्गरोगं शूक्तिबल्गं विलोहितम्। परा ते अज्ञातं यक्ष्ममधराञ्चं सुवामसि।। 4। (इति चतुर्थो नाम प्रथमकाण्डे अष्टादशोऽनुवाकः) 1 - 91

卐1.91.1 पयो देवेषु पय ओषधीषु पय आशासु पयोऽन्तरिक्षे। तन्मे धाता सविता च धत्तां विश्वे तद्देवा अभि सं गृणन्तु।। 1।।

卐1.91.2 पयो यदप्सु पय उस्त्रियासु पय उक्थेषूत पर्वतेषु। तन्मे धाता सविता च धत्तां विश्वे तद्देवा अभि सं गृणन्तु।। 2।।

卐1.91.3 यन् मृगेषु पय आविष्टमस्ति यदेजति पतति यत् पतत्रिषु। तन्मे धाता सविता च धत्तां विश्वे तद्देवा अभि सं गृणन्तु।। 3।।

卐1.91.4 यानि पयांसि दिव्यार्पितानि यान्यन्तरिक्षे बहुधा बहुनि। तेषामीशाने वशिनि नो अद्य प्रदत्तां द्यावापृथिवी अहृणीयमाने।। 4।। 1- 92

卐1.92.1 आगन्मेमां समितिं विश्वरूपां यस्यां पूर्वमवदद्येव एकः। सा नः सूक्तैर्जुजुषाणा समीच्यस्मान् वृणीतां सुमनस्यमाना।। 1।।

卐1.92.2 इयं देवी समितिर्विश्वरूपा शिल्पं कृण्वाना चरति जनेषु। तां राजानः कवय हृत्सु केतैरराजानश्च वदनैः पुनन्ति।। 2।।

卐1.92.3 अग्निं सामित्यमुप सं सदेम वाचा प्रियं मधुमत्या वदन्तः। सोमो राजा वरुणो मित्रधर्मा मयि श्रीयमाण उप सं नमन्तु।। 3।।

卐1.92.4 यो वः शुष्मो हृदये यो बाह्वोर्यश्च चक्षुषि। जिह्वाया अग्रे यो मन्युस्तं वो वि नयामसि।। 4।। 1- 93

卐1.93.1 त्रिष्कुष्ठासि वृत्राज्जातस्त्रिर्दिवस्परि जज्ञिरे। त्रिस्सोमाज्जज्ञिषे त्वं त्रिरादित्येभ्यस्परि।। 1।।

卐1.93.2 जीवलं नघारिषं जयत्कमपराजितम्। तं त्वामृतस्येशानं राजन् कुष्ठा वदामसि।। 2।।

卐1.93.3 अन्तरा द्यावापृथिवी अन्तरिक्षमिदं महत्। तत्रामृतस्येशानं कुष्ठं देवा अबध्नत।। 3।।

卐1.93.4 कुष्ठोसि देवकृतो हिमवद्भ्यो निराभृतः। तीक्ष्णाभिरभ्रिभिः खातुः स च कर्तार सं विषम्।। 4।। 1- 94

卐1.94.1 यास्ते शतं धमनयः सहस्राणि च विंशतिः। बभ्रोरश्वस्य वारेणापि नह्यामि ता अहम्।। 1।।

卐1.94.2 शतस्य ते धमनिनां सहस्रस्यायुतस्य च। दृतेः पदमिव सारथिरपि नह्यामि यद् बिलम्। । 2।।

卐1.94.3 परमस्यां परावकि शुष्को भण्डुश्च तिष्ठतः। ततः शुष्कस्य शुष्मेण तिष्ठन्तु लोहिनीरपः।। 3।।

卐1.94.4 परि वः सिकतामयं मरुं बिले वपामसि। दकचिदस्रवित् पुरा तकचिदशमीदिदम्।। 4।। 1- 95

卐1.95.1 रुद्र मा त्वा जिहीडाम सुष्टुत्या मघवन्मा सहूत्या। भिषक् तमं त्वा भिषजं श्रुणोम्युन्नो वीराँ ईरय भेषजेभिः।। 1।।

卐1.95.2 रुद्र यत्ते गुह्यं नाम यत्ते अद्धातयो विदुः। शिवा शरव्या या तव तया नो मृडजीवसे।। 2।।
卐1.95.3 अग्निं त्वाहुर्वैश्वानरं सदनान् प्रदहन्वगाः। स नो देवत्राधि ब्रूहि मा रिषामा वयं तव।। 3।।
卐1.95.4 याः देवैः प्रहितेषु पतात्तपसे वा महसे वावसृष्टा। सोमस्त्वामस्मद्यावयतु विद्वानवन्तु नः पितरो देव हूतिषु।। 4। (इति चतुर्चो नाम प्रथमकाण्डे ऊनविंशोऽनुवाकः) 1 - 96
卐1.96.1 रायस्पोषं धेहि नो जातवेद ऊर्जावदग्ने यशस्सूनृतावत्। दधाम भागं सुनवाम सोमं यज्ञेन त्वामुप शिक्षेम शक्र।। 1।।
卐1.96.2 वयमग्ने धनवन्तः स्यामालं यज्ञायोत दक्षिणायै। ग्रावावदे दभि सोमस्यांशुनेन्द्रं शिक्षे मेन्दुना सुतेन।। 2।।
卐1.96.3 ईशानं त्वा शुश्रुमा वयं पुरो दधानां धनपते। गोमदग्ने अश्ववद्भूरिपुष्टं हिरण्य वदन्नवद्धे हि मह्यम्।। 3।।
卐1.96.4 दुहां मे द्यौः पृथिवी पयोऽजगरो मा सोदकोभि वि सर्पतु। प्रजापतिना तन्वमा प्रीणेऽरिष्टो म आत्मा।। 4।। 1- 97
卐1.97.1 अस्मां जुषध्वमसवोऽद्य मा नः पुरा जरसोऽसवो वधिष्ठ। पाका गृणीमस्तव वीर्याय शतं हिमानधिपतिर्न एहि।। 1।।
卐1.97.2 उन्मृणो अगादार्जुनमगात् सुश्रुद् भगवो गोपाय मा। अह्वेद्यात्मानं परि ददे सूर्य प्राणो भवामि।। 2।।
卐1.97.3 नि मृणो अगादासितमगात् सुश्रुद् भगवो गोपाय मा। रात्रये द्यात्मानं परि ददेऽग्निप्राणो भवामि।। 3।।
卐1.97.4 अनाभूरस्य नाभोऽनाभुवो भूयास्म। स यत्र त्वं प्रजापते त्रिरेकस्याह्नः प्रजाः संपश्यसि। तत्र मामपि सं पश्यानष्टपशुर्भुवनस्य गोपाः।। 4।। 1- 98
卐1.98.1 यथा मृगं रोपयसि तिरश्चर्माति विध्यसि। एवा त्वमुग्र ओषधेऽमुं रोपय मामभि।। 1।।
卐1.98.2 बन्धश्चेमा उपधिश्च मधुमन्नौ समञ्जनम्। द्वारौ भगस्येमा ऊरू मृगस्तुस्यन्निवा चर।। 2।।
卐1.98.3 अभि त्वा धामभिधिना जालेनेव महाजषम्। यथा मम क्रतावसो मम चित्ते स चावहै।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐1.98.4 अहं वै त्वदुत्तरास्म्यध त्वमुपधिर्मम। सं नौ बध्नामि सं बन्धनेन यथा सावाविचर्त्यावा मृत्योरा परावतः।। 4।। 1- 99

卐1.99.1 अपोच्छन्ति दुःस्वप्न्यमप दुर्हार्दमुच्छतम्। अपोष्टं सर्वं क्षेत्रियं सर्वाश्च यातुधान्यः।। 1।।

卐1.99.2 उदगातां भगवती विचृतौ नाम तारके। वि क्षेत्रियस्य मुञ्चतां सं ग्रन्थिं हृदयस्य च।। 2।।

卐1.99.3 नमो अस्तु वरत्राभ्यो नम ईषा युगेभ्यः। मृगायारण्ये तिष्ठते क्षेत्रियायाकरं नमः।। 3।।

卐1.99.4 आखोरिदं क्षैत्रपत्यं मनोश्च मानवस्य च। मनः सर्वस्य पश्यत इह भूयस्स्यादिति।। 4।। 1- 100

卐1.100.1 उदेहि देवि कन्य आचिता वसुना सह। न त्वा तरन्त्योषधयो बाह्याः पर्वतीया उत।। 1।।

卐1.100.2 यथा त्वा देव्योषधे सर्वः कामयते जनः। एवा भगस्य नो धेहि देवेभ्य इवामृतं परि।। 2।।

卐1.100.3 उत्सक्तपल्योषध आवतं करणीदसि। यदेषी यन्निषीदसि तत्र त्वाहं समग्रभमश्वमिवाश्वाभिधान्या।। 3।।

卐1.100.4 यथा कुमारस्तरुणो मातरं प्रति नन्दति। एवास्मान् प्रति नन्दतु यां वयं कामयामहे।। 4।

(इति चतुर्थो नाम प्रथमकाण्डे विंशोऽनुवाकः) 1 - 101

卐1.101.1 त्रीणि पात्राणि प्रथमान्यासन् तानि सत्यमुत भूतं ततक्ष। ऋतस्यमाने अधि या धृवाणि येभिर्देवा अमृतं भक्षयन्ति।। 1।।

卐1.101.2 ऋतस्य माने अधि या धृवाणि येभिर्देवा अमृतं भक्षयन्ति।। 1।।

卐1.101.3 स्वर्यद्देवा विभजन्त आयं त्रीणि पात्राणि प्रथमान्यासन्। आदित्या एकं वसवो द्वितीयं तृतीयं रुद्रा अधि सं बभूवुः।। 2।।

卐1.101.4 धाता वेद सवितै तानि सर्वा बृहस्पतिः प्रथमो देवो अग्निः। येभिरिन्द्रो जठरमापृणीते त्रिभिः पात्रैरुत विश्वे च देवाः।। 3।।

卐1.101.5 ऊर्ध्वा तिष्ठन्ति ननु जिह्वा भवन्ति नोनं बभूव कतमच्चनैषाम्। देवानां पात्राणि निहितानि यानि तानि सं पाति य ऋतस्य गोपाः।। 4।। 1- 102

卐1.102.1 पौर्णमासी प्रथमा यज्ञियासीदह्नां रात्रिणामतिशर्वरेषु। येत्वां यज्ञैर्यज्ञेन बोधयन्त्यमी ते नाकं सुकृतः परेताः।। 1।।

卐1.102.2 पूर्णा पश्चादुत पूर्णा पुरस्तात् पौर्णमासी मध्यत उज्जिगाय। तस्यां देवैः संवसन्तो महित्वा नाकस्य पृष्ठे समिषा मदेम।। 2।।

卐1.102.3 चतस्रो दिशः प्रदिशो ह पञ्च षडुर्वीराहू रजसो विमानीः। द्वादशर्तव आर्तवाश्च ते मा प्यायन्तु भुवनस्य गोपाः।। 3।।

卐1.102.4 यथादित्या अंशुमाप्याययन्ति यमक्षितमक्षितये पिबन्ति। एवा मामिन्द्रो वरुणो बृहस्पतिरा प्यायन्तु भुवनस्य गोपाः।। 4।। 1- 103

卐1.103.1 आगन् रात्री संगमनी वसूनां विश्वं पुष्टं वश्वा वेशयन्ती। अमावास्यायै हविषा विधेमोर्जं वसाना पयसा न आगन्।। 1।।

卐1.103.2 मा त्वा रात्री पुरो दघन्मोत पश्चा विभावरि। आयुष्मन्तः सुप्रजसः सुवीरा ऋध्यास्म त्वा सुवर्चसः।। 2।।

卐1.103.3 यस्य देवस्य सुमतौ सुनीतिरेति सुमतिं गृहाणाम्। आ मा पुष्टं च पोष्यं च रात्र्या देवानां सुमतौ स्याम।। 3।।

卐1.103.4 अहमेवास्म्यमावास्या मा विशन्ति सुकृतो मयी मे। मयि देवा उभये साध्याश्चेन्द्रज्येष्ठाः समगच्छन्त सर्वे।। 4।। 1- 104

卐1.104.1 प्रथमा ह व्युवास सा धेनुरभवद्य मे। सा नः पयस्वती दुहा उत्तरामुत्तरां समाम्।। 1।।

卐1.104.2 यां देवाः प्रतिनन्दन्ति धेनुं रात्रीमुपायतीः। संवत्सरस्य या पत्नी सा नो अस्तु सुमङ्गली।। 2।।

卐1.104.3 संवत्सरस्य प्रतिमां ये त्वा रात्र्युपासते। तेषामायुष्मतीं प्रजां रायस्पोषेण सं सृज।। 3।।

卐1.104.4 इयमेव सा या प्रथमा व्यौच्छत् साप्स्वन्तरासु चरति प्रविष्टा। वधूर्जिगाय नवगज्जनित्री त्रय एनां महिमानः सचन्ते।। 4।। 1- 105

卐1.105.1 वानस्पत्या ग्रावाणो घोषमक्रत हविष्कृण्वन्तः परिवत्सरीणम्। एकाष्टके सुप्रजसः सुवीरा वयं स्याम पतयो रयीणाम्।। 1।।

卐1.105.2 ईडायास्पदं घृतवत्सरीसृपं जातवेदः प्रतिहव्या गृभाय। ये ग्राम्याः पशवो विश्वरूपास्तेषां सप्तानां मयि रन्तिरस्तु।। 2।।

卐1.105.3 इडया जुह्वतो हविर्देवान् घृतवता यजे। गृहानलुभ्यतो वयं दृषदो मोपगोमतः।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐1.105.4 यज ऋतुभ्य आर्तवेभ्यो माद्भ्यः संवत्सराय च। धात्रे विधर्त्रे समृधे भूतस्य पतये यजे।। 4।। 1- 106

卐1.106.1 आयमगन् सम्वत्सरः पतिरेकाष्टके तव। तस्मै देवाय हविषा विधेम स उ नश्शर्म यच्छतु।। 1।।

卐1.106.2 एकाष्टकायै हविषा विधेम यर्तून् पञ्चानु प्रविष्टा। सस्येन सस्यमुप संचरन्तोऽरिष्टास ऋतुनर्तुमुप सं चरेम।। 2।।

卐1.106.3 वसन्तो ग्रीष्मो मधुमन्त वर्षाः शरद्धेमन्तो ऋतवो नो जुषन्ताम्। आनो गोषु भजन्त्वा प्रजायां सु शर्मण्येषां त्रिवरूथे स्याम।। 3।।

卐1.106.4 एकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रम्। तेन देवा व्यषहन्त शत्रून् हन्तासुराणामभवच्छचीपतिः।। 4।।

卐1.106.5 पूर्णादर्वे परापत सुपूर्णा पुनरापत। सर्वान् यज्ञान् संपृञ्चतीषमूर्जं न आ भर।। 5।।

卐1.106.6 इषमूर्जं न आ भृत्येडया पशुभिः सह। सरस्वति त्वमस्मासु रायस्पोषं नि यच्छ।। 6। (इति चतुर्चो नाम प्रथमकाण्डे एकविंशोऽनुवाकः) 1 - 107

卐1.107.1 वातस्य नु महिमा रथस्या रुजन्नेति स्तनयन्नस्य घोषः। दिवस्पृगेत्यरुणानि कृण्वन्नथो एति पृथिव्या रेणुमस्यन्।। 1।।

卐1.107.2 सं प्रेरते अनु वातस्य विष्ठा मैनं गच्छन्ति समनेव योषाः। ताभिर्विद्वान् सरथं देव ईयते पतिर्विश्वस्य भुवनस्य गोपाः।। 2।।

卐1.107.3 आत्मा देवानां भुवनस्य गोपा यथावशं चरति देव एषः। घोष इदस्य श्रूयते न रूपं तस्मै देवाय हविषा विधेम। 3।।

卐1.107.4 अन्तरिक्षे पथिभिरीयमानो न नि विशते कतमच्चनाहः। अपां योनिः प्रथमजा ऋतस्य क्व स्विज्जात कुत आ बभूव।। 4।।

卐1.107.5 अन्तरिक्षे पतयन्तं वात त्वामाशुमाशुभिः। पश्यन्ति सर्वे चक्षुषा न सर्वे मनसा विदुः।। 5।।

卐1.107.6 उपत्रिकं सं च विचं त्रियमं चतुरेकजम्। तं मातरिश्वानं देवं दिवो देवा अवासृजन्।। 6।। 1- 108

卐1.108.1 अप न्यधुः पौरिषेयं बधं मदिन्द्राग्नि धाता सविता बृहस्पतिः। सोमो राजा वररुणो अश्विना यमः पूषास्मान् परि पातु मृत्योः।। 1।।
卐1.108.2 यानि चकार भुवनस्य यस्पतिः प्रजापतिर्मातरिश्वा प्रजाभ्यः। प्रदिशो यानि वस्ते दिशश्च तानि मे वर्माणि बहुलानि सन्तु।। 2।।
卐1.108.3 यत्तनुष्व नह्यन्त देवा द्विराजयोधिनः। इन्द्रो यच्चक्रे वर्म तदस्मान् पातु विश्वतः।। 3।।
卐1.108.4 वर्म मे द्यावापृथिवी वर्माहर्वर्म सूर्यः। वर्म मे विश्वेदेवा क्रन्मा मा प्रापत् प्रतीचिका।। 4।।
1- 109
卐1.109.1 सोमा रुद्रा वि बृहतं विषूचीममीवा या नो गयमाविवेश। बाधेथां द्वेषो निर्ऋतिं पराचैः कृतं चिदेनः प्र मुमुक्तमस्मत्।। 1।।
卐1.109.2 तिग्मायुधौ तिग्महेती सुशेवौ सोमारुद्राविह सु मृडतं नः। प्र णो मुञ्चतं दुरिता दवद्याद् गोपायतं नस्सुमनस्य मानौ।। 2।।
卐1.109.3 समारुद्रा धारयेथां वसुवीर्यं प्रवामिष्ट्वा वरमश्नवातै। युवं नो धत्तमिह भेषजानि प्र यच्छतं वृषणा जेत्वानि।। 3।।
卐1.109.4 सोमारुद्रा युवमस्मास्वन्तस्तनूषु विश्वा भेषजानि धत्तम्। अव स्यतं मुञ्चतं किञ्चिदेनो अङ्गेषु बद्धमुत यद् द्दषत्ते।। 4।। 1- 110
卐1.110.1 घृस्य जूतिः समना सदेवाः संवत्सरं हविषा वर्द्धयन्ती। श्रोत्रं चक्षुः प्राणो ऽछिन्नो नो अस्त्वच्छिन्ना वयमायुषो वर्चसः।। 1।।
卐1.110.2 उपास्मान् प्राणो ह्वयतामुप वयं प्राणं हवामहे। वर्चो जग्राह पृथिव्यन्तरिक्षं वर्चः सोमो बृहस्पतिर्विधर्ता।। 2।।
卐1.110.3 वर्चसो द्यावापृथिवी सं ग्रहणि बभुवतुर्वर्चो गृहीत्वा पृथिवीमनु सं चरेम। यशसा गावो गोपतिमुप तिष्ठन्त्यायतीर्यशो गृहीत्वा पृथिवीमनु सं चरेम।। 3।।
卐1.110.4 व्रजं कृणुध्वं स हि वो नृपाणो वर्मासीव्यध्वं बहूला पृथूनि। पुरः कृणुध्वमयासीरधृष्टा मा वः सुस्रोच्चमसो दृंहता तम्।। 4।। 1- 111
卐1.111.1 न्यग्वात वाति न्यक्तपति सूर्यः। नीचीन मध्न्या दुहे न्यग् भवतु ते विषम्।। 1।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐1.111.2 नि गावो गोष्ठे असदन्नि वत्सा अधि तन्त्याम्। न्युर्मयो नदीनां नि शुष्मा अरसानाम्।। 2।।
卐1.111.3 अहीनामहीकानां सं हि शीर्षाण्यग्रभम्। हृदं सहस्रबाहुः परेत्य व्यनिजमहेर्विषम्।। 3।।
卐1.111.4 तुराणामतुराणां विशामुरुक्षितामुत। कृणोमि तुभ्यं भेषजमाहेयमरसं विषम्।। 4।। 1-112
卐1.112.1 इमा ऊरु सवासिनो वर्चसाञ्जे अहं मम। नाम ह्येनयोर्वेद यथा न बहवो विदुः।। 1।।
卐1.112.2 वर्चसा पीना पृथवी सूर्येणोत्तभिता द्यौः। त्विषिं यां पश्यामो वाते तां नि यच्छे ममोर्वोः।। 2।।
卐1.112.3 वेद वै वां नामधेयं जिगीवाँ अपराजितम्। प्रजां च बह्वीमा शासे राष्ट्रं चेन्द्राभिरक्षितम्।। 3।।
卐1.112.4 विदूषि वां नामधेयमश्विना सारघं मधु। सूर्य इव चक्षुर्भूतानां प्रजां धारयतं मयि रयिं धारयतं मयि।। 4।।
卐1.112.5 शतपाशां वि तनोम्युरुभ्यां जघनेन च। तस्मिन् यो बध्यते बन्धे स मे अस्त्वन्यक्षकः।। 5। (इति चतुर्चो नाम प्रथमकाण्डे द्वाविंशोऽनुवाकः) इत्यथर्ववेदे पैप्पलादसंहितायां चतुर्ऋचो नाम प्रथमकाण्डः समाप्तः

## ʊ अथ द्वितीयः काण्डः 2 - 1

卐2.1.1 अरसं प्राच्यं विषमरसं यदुदीच्यम्। अथेदमधराच्यं करम्भेण विकल्पते।। 1।।
卐2.1.2 करम्भं कृत्वा तिर्यं पिवस्पाक मुदारथिम्। क्षुधा किल त्वा दुष्टनो यक्षिवां स न रूरुपः।। 2।।
卐2.1.3 वि ते मदं मदवति शरुमिव पातयामसि। प्र त्वा चरुमिव येषन्तं वचसा स्थापयामसि।। 3।।
卐2.1.4 परि ग्राममिवाचितं परि त्वा स्थापयामसि। तिष्ठा वृक्ष इव स्थामन्नभ्रि खाते न रूरुपः।। 4।।
卐2.1.5 पवस्तैस्त्वा पर्यक्रीणं दूर्शेभिरजिनैरुत। प्रक्रीरसि त्वमोषधेऽभ्रिखाते न रूरुपः।। 5।। 2-2
卐2.2.1 आविद्य द्यावापृथिवी आविद्य भगमश्विना। आविद्य ब्रह्मणस्पतिंकृणोम्यरसं विषम्।। 1।।
卐2.2.2 अरसं हेदिदं विषं यथैन दहमाशिषम्। उदैन दद्यात् पुरुषो भवादिदगदः पुनः।। 2।।
卐2.2.3 मा बिभेर्न मरिष्यसि परि त्वा पामि विश्वतः। रसं विषस्य ना विदमुद्रः फेनमदन्निव।। 3।।
卐2-2-4 अपावचोदपवक्ता प्रथमो दैव्यो भिषक्। समक्षमिन्द्र गा इव या वाचो विषदूषणीः।। 4।।

卐2-2-5 यच्च पिष्टं यच्चापिष्टं यद्दिग्धं यच्च देह्यम्। देवाः सर्वस्य विद्वांसोरसं कृणुता विषम्।। 5।। 2- 3

卐2-3-1 क्षेत्रिया त्वा निर्ऋत्या जामिशंसाद् द्रुहो मुञ्चामि वरुणस्य पाशात्। अनागसं ब्रह्मणा त्वा कृणोमि शिवे ते द्यावापृथिवी अभूताम्। 1।।

卐2-3-2 शन्ते अग्निस्सहाद्भिरस्तु शं गावस्सहौषधीभिः। शमन्तरिक्षं सहवातमस्तु ते शन्ते भवन्तु प्रदिशश्चतस्रः।। 2।।

卐2-3-3 या देवीः प्रदिशश्चतस्रो वातपत्नीरभिसूर्यो विचष्टे। ता स्वेतं जरस आ दधामि प्र यक्ष्म एतु निर्ऋतिः पराचैः।। 3।।

卐2-3-4 सूर्यो मृतं तमसो ग्राह्या यथा देवा मुञ्चन्तो असृजन्निरेनसः। एवा त्वा क्षेत्रिया निर्ऋत्या जामिशंसाद्रुहो मुञ्चामि वरुणस्य पाशात्।। 4। 2-4

卐2.4.1 निश्शालां धृष्णुं धिषणमेकावाद्यां जिघत्स्वम्। सर्वाश्चण्डस्य नप्त्यो नाशयामस्सदान्वाः।। 1।।

卐2.4.2 यदि वा घ क्षेत्रिया यदि वा पुरुषेषितात्। यदि स्थ दस्युभ्यो जाता नश्यतेतः सदान्वाः।। 2।।

卐2.4.3 परि धामान्यासामाशुर्गाष्ठामि वासरम्। अजैसं सर्वानाजिन्वो नश्यतेतः सदान्वाः।। 3।।

卐2.4.4 निर्वो गोष्ठादजामसि निर्योनेर्निरुपोनसात्। निर्वो मुगुन्द्या दुहितरो गृहेभ्यश्चातयामसि।। 4।।

卐2.4.5 अमुष्मिन्नधरे गृहे सर्वास्सन्त्वराय्यः। तत्र पाप्मा न्यच्यतु सर्वाश्च यातुधान्यः।। 5।। 2-5

卐2.5.1 द्यावापृथिवी उर्वन्तरिक्षं क्षेत्रस्य पत्न्युरुगायो अद्भुतः। उतान्तरिक्षमुरु वातगोपं ते घ तप्यन्तां मयि तप्यमाने।। 1।।

卐2.5.2 इदमिन्द्र श्रृणुहि सोमप यत्त्वा हृदा शोचता जोहवीमि। वृश्चामि तं कुलिशेनेव वृक्षं यो अस्माकं मन इदं हिनस्ति।। 2।।

卐2.5.3 इदं देवा श्रृणुत ये च यज्ञियास्थ भरद्वाजो मह्यमुक्थानि शंसतु। पाशे स बद्धो दुरिते न्यच्यतां यो अस्माकं मन इदं हिनस्ति।। 3।।

卐2.5.4 अशीतिभिस्तिसृभिस्सामगेभिरादित्येभिर्वसुभिरङ्गिरोभिः। इष्टापूर्तमवतु नः पितृणामामुं ददे हरसा दैव्येन।। 4।।

卐2.5.5 द्यावापृथिवी अनु मा दीधीथां विश्वे देवासो अनु मा रभध्वम्। अङ्गिरसः पितरस्सोम्यासः पापमार्च्छत्वपकामस्य कर्ता।। 5।।

Sri Sachidananda Avadhoota Datta Peetham

卐2.5.6 अतीव यो मरुतो मन्यते नो ब्रह्म वा यो निन्दिषत्क्रियमाणम्। तपूंषि तस्मै वृजिनानि सन्तु ब्रह्मद्विषमभि तं शोचतु द्यौः।।

卐2.5.7 आदधामि ते पदं समिद्धे जातवेदसि। अग्निश्शरीरं वेवेष्टु यमं गच्छतु ते असुः।। 7।।

卐2.5.8 सप्तप्राणानष्टौ मज्ज्ञस्तांस्ते वृश्चामि ब्रह्मणा। यमस्य गच्छ सादनमग्निदूतो अरङ्कृतः।। 8।

(इति पञ्चर्चो नाम द्वितीयकाण्डे प्रथमोऽनुवाकः) 2 - 6

卐2.6.1 वेनस्तत्पश्यत्परमं पदं यत्र विश्वं भवत्येकनीडम्। इदं धेनुरदुहज्जायमानास्स्वर्विदो अभ्यनुषत व्राः।। 1।।

卐2.6.2 प्र तद्वोचेदमृतं न विद्वान् गन्धर्वो धाम परमं गुहा यत्। त्रीणि पदा निहिता गुहास्य यस्तानि वेद स पितुष्पिता सत्।। 2।।

卐2.6.3 स नो बन्धुर्जनिता स विधर्ता धामानि वेद भुवनानि विश्वा। यत्र देवा अमृतमानसानास्समाने धामन्नध्यैरयन्त।। 3।।

卐2.6.4 परिलिश्वा भुवनान्यायमुपातिष्ठे प्रथमजा ऋतस्य। वाचमिव वक्तरि भुवनेष्ठा धास्युर्न्वेष नन्वेषो अग्निः।। 4।।

卐2.6.5 परि द्यावापृथिवी सद्य आयमृतस्य तन्तुं विततं दृशे कम्। देवो देव त्वमभिरक्षमाणस्समानं बन्धुं व्यपृच्छदेकः।। 5।। 2 - 7

卐1.7.1 इन्द्र जुषस्वा याहि शूर पिबा सुतस्य मधोश्चकानः। चारुर्मदाय।। 1।।

卐1.7.2 आ त्वा विशन्तु सुतास इन्द्र पृणस्व कुक्षी विड्ढि शक्र। धियेह्या नः।। 2।।

卐1.7.3 इन्द्र जठरं पृणस्व मधोरस्य सुतस्य। उप त्वा मदेषु वाजो अस्तु।। 3।।

卐1.7.4 इन्द्रस्तुराषाड् जघान वृत्रं सासाह शत्रून् समत्सु वज्री। मदे सोमस्य।। 4।।

卐1.7.5 श्रुधी हवं मे गिरो जुषस्वेन्द्र स्वयुग्भिर्मत्स्व मदाय। महे रणाय।। 5।। 2 - 8

卐2.8.1 उदित्ये अक्रमन्त्रयो व्याघ्रः पुरुषो वृकः। हिरुग् ज्योति स्सूर्यो हरुग् देवो वनस्पतिर्हिरुङ् नवन्तु शत्रवः।। 1।।

卐2.8.2 परमेण पथावृकः परपेणस्तेन अर्षतु। ततो व्याघ्रः परमः।। 2।।

卐2.8.3 अक्षौ च ते हनू च ते व्याघ्रं जम्भया मसि। आत् सर्वान् विंशतिं नखान्।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham SGS

卐2.8.4 यत् संनशो विन्नशो यद् विनशो न सं नशः। मूर्णा मृगस्य दन्ता अपि शीर्णा उ पृष्टयः।। 4।।

卐2.8.5 व्याघ्रः दत्वतां वयं प्रथमं जम्भयामसि। आदितस्तेन महिं यातुधानमथो वृकम्।। 5।।

卐2.8.6 नेवरप्ससैन गृहः परश्चर। द्विपाच्चतुष्पान्नो मा हिंसीरिन्द्रजास्सोमजा असि।। 6।। 2 - 9

卐2.9.1 इयं वीरुन्मधुजाता मधोरधि प्रजातासि सा नो मधुमतस्कृधि।। 1।।

卐2.9.2 जिह्वाया एग्रे मे मधु जिह्वा मूले मधूलकम्। यथा मां कामिन्यसो यथा मामन्वायसि।। 2।।

卐2.9.3 परि त्वा परि तत्नुनेक्ष्णाकामविद्विषे। यथा न विद्विषावहै न विभवाव कदाचन।। 3।।

卐2.9.4 राज्ञे ब्रूहि वऋणायाश्वाय पुरुषाय च। यथा मे पथ्ये रेवति जायामा वह साधुना।। 4।।

卐2.9.5 जायां मे मित्रावरुणा जायां देवी सरस्वती। जायां मे अश्विनोभा धत्तां पुष्करस्रजा।। 5।। 2 - 10

卐2.10.1 दशवृक्ष मुञ्चेममंहसो ग्राह्याश्च। अथो एनं वनस्पते जीवानां लोकमुन्नय।। 1।।

卐2.10.2 यश्चकार स निष्करत् स एव सु भिषक्तम्। स एव तुभ्यं भेषजं चकार भिषजाति च।। 2।।

卐2.10.3 चीतिं ते देवा अविदन् ब्रह्माण उत वीरुधः। चीतिं ते द्योत्तमामविदन् भूम्यामधि।। 3।।

卐2.10.4 आगादुदगादयं जीवानां व्रातमप्यगात्। अभूदु पुत्राणां पिता नृणां च भगवत्तमः।। 4।।

卐2.10.5 अधीतिमध्यगादयमधि जीपपुरा अगात्। शतं च यस्य वीरुधस्सहस्रमुत भेषजा।। 5। (इति पञ्चर्चो नाम द्वितीयकाण्डे द्वितीयोऽनुवाकः) 2 - 11

卐2.11.1 दीर्घायुत्वाय बृहते रणायारिष्यन्तो दक्षमाणास्सदैव। मणिं विष्कन्धदूषणं जङ्गिडं बिभृमो वयम्।। 1।।

卐2.11.2 जङ्गिडो जम्भाद्विस्वराद्विष्कन्धादभिशोचनात्। मणिः सहस्र वीर्यः परिणः पातु विश्वतः।। 2।।

卐2.11.3 अयं विष्कन्धं सहते अयं रक्षोप बाधते। अयं नो विश्वभेषजो जङ्गिडः पात्वं हसः।। 3।।

卐2.11.4 देवैर्दत्तेन मणिना जङ्गिडेन मयोभुवा। विष्कन्धं सर्वा रक्षांसि व्यायामे सहामहे।। 4।।

卐2.11.5 शणश्च त्वा जङ्गिडश्च विष्कन्धादधि मुञ्चताम्। अरण्यादन्य आभृतः कृष्या अन्यो रसेभ्यः।। 5।। 2 - 12

卐2.12.1 एह यन्तु पशवो ये परेयुर्वायुर्येषां सहचारं जुजोष। त्वष्टा येषां रूपधेयानि वेदास्मिन्तान् गोष्ठे सविता नि यच्छात्।। 2।।

卐2.12.2 इमं गोष्ठं पशवस्सं सृजन्तु बृहस्पतिरा नयतु प्रजानन्। सिनीवाली नयत्वाग्रमेषामाजग्मुषो अनुमतिर्नि यच्छात्।। 2।।

卐2.12.3 सं सं स्रवन्तु पशवस्समश्वा उत पूरुषाः। सं धान्यस्य या स्फातिस्सं स्राव्येण हविषा जुहोमि।। 3।।

卐2.12.4 सं सिञ्चामि गवां क्षीरं समाज्येन बलं रसम्। सं सिक्ता अस्माकं वीरा मयि गावश्च गोपतौ।। 4।।

卐2.12.5 आ हरामि गवां क्षीरमाहार्षं धान्यं रसम्। आहार्षमस्माकं वीराना पत्नीमेदमस्तकम्।। 5।। 2 - 13

卐2.13.1 सं वः सृजत्वर्यमा सं पूषा सं बृहस्पतिः। समिन्द्रो यो धनञ्जय इह पुष्यत यद्वसु।। 1।।

卐2.13.2 इहैव गाव एतनेहो शका इव पुष्यत। इहैवोत प्र जायध्वं मयि संज्ञानमस्तु वः।। 2।।

卐2.13.3 मया गावो गो पत्या सचध्वमयं वो गोष्ठ इह पोषयाति। रायस्पोषेण बहुला भवन्तिर्जीवा जीवन्तीरुप वः सदेम।। 3।।

卐2.13.4 सं वो गोष्ठेन सुषदा संरय्या सं सुपुष्ट्या। अहर्जातस्य यन्नाम तेन वः सं सृजामसि।। 4।।

卐2.13.5 संजानाना अविह्रुता अस्मिन् गोष्ठे करीषिणीः। बिभ्रतीस्सोम्यं हविस् स्वावेशास एतन।। 5।। 2 - 14

卐2.14.1 उद्यन्नादित्यः क्रिमीन् हन्तु सूर्यो निम्रोचन् रश्मिभिर्हन्तु। ये अन्तः क्रिमयो गवि।। 1।।

卐2.14.2 यो विश्वरूपश्चतुरक्षः क्रिमिस्सारङ्ग अर्जुनः। हतो हतभ्राता क्रिमिर्हतमाता हतस्वसा।। 2।।

卐2.14.3 हतो राजा क्रिमीणामुतैषां स्थपतिर्हतः। हता सो अस्य वेशसो हतासः परिवेशसः।। 3।।

卐2.14.4 प्र ते श्रृणामि श्रृङ्गे याभ्यां त्वं वितुदायसि। अथो भिनद्मि तं कुम्भं यस्मिन् ते निहितं विषम्।। 4।।

卐2.14.5 अत्रिवत्त्वा क्रिमे हन्मि कण्ववज्जमदग्निवत्। अगस्त्यस्य ब्रह्मणा सर्वे ते क्रिमयो हताः।। 5।। 2 - 15

卐2.15.1 इन्द्रस्य या मही दृषत् क्रिमेर्विश्वस्य तर्हणी। तया पिनष्मि सं क्रिमीन् दृषदा खल्वाँ इव।। 1।।

卐2.15.2 दृष्टमदृष्टमतृहमथो कुरूरुम तृहम्। अल्गण्डून् सर्वाञ्छलूलान् क्रिमीन् वचसा जम्भयामसि।। 2।।

卐2.15.3 अल्गण्डून् हन्मि महता बधेन दूना अदूना अरसा अभूवन्। शिष्टानशिष्टान्नि तिरामि वाचा यथा क्रिमीणां नकिरुच्छिषातै।। 3।।

卐2.15.4 अन्वान्त्र्यं शीर्षण्यमथो पार्ष्टेयं क्रमीन्। अवस्कवं व्यध्वरं क्रिमीन् वचसा जम्भयामसि।। 4।।

卐2.15.5 ये क्रिमयः पर्वतेषु ये वनेषु य ओषधीषु पशुष्वप्स्वन्तः। ये अस्माकं तन्वं स्थाम चक्रिर इन्द्रस्तान् हन्तु महता वधेन।। 5। (इति पञ्चर्चो नाम द्वितीयकाण्डे तृतीयोऽनुवाकः) 2 - 16

卐2.16.1 या शत्रून् प्राशं जयात् सहमानाभिमूरसि। शामून् प्रतिप्राशो जह्यरसान् कृण्वोषधे।। 1।।

卐2.16.2 सुपर्णस्त्वाऽन्वविन्दत् सूकरस्त्वा खनन्नसा। इन्द्रस्त्वा चक्रे बाह्वरसुरेभ्य स्तरीतवे।। 2।।

卐2.16.3 पाटामिन्द्रो व्याश्नाद्धन्तवा असुरेभ्यः। त्वयाहं शत्रून् साक्षीयेन्द्र श्शालावृकानिव।। 3।।

卐2.16.4 रुद्र जलासभेषज नीलशिखण्ड कर्मकृत्। प्रश्नं दूरस्यतो जहि यो अस्माँ अभिदासति।। 4।।

卐2.16.5 तस्य प्रश्नं त्वं जहि यो न इन्द्राभिदासति। अधि नो ब्रूहि शक्तिभिः प्राशि मामुत्तरं कृधि।। 5।। 2 - 17

卐2.17.1 यथेदं भूम्यामधि वातस्तृणं मथायति। एवा मथ्नामि ते मनो यथा मां कामिन्यसो यथा मामन्वायसि।। 1।।

卐2.17.2 एयमगन् पतिकामा जनिकामोहमागमम्। अश्वः कनिक्रदद्यथा भगेनाहं सहागमम्।। 2।।

卐2.17.3 सं चेन्नयाथो अश्विना कामिना सं च नेषथः। सं वां मनांस्यग्मत सं चक्षूंसि समुव्रता।। 3।।

卐2.17.4 यदन्तरं तद् वाह्यं यद् वाह्यं तदन्तरम्। कन्यानां विश्वरूपाणां मनो गृभायौषधे।। 4।।

卐2.17.5 या सुपर्णापक्षणवानपक्षणवा। अत्रात आर्पितं मनश्शल्य इव कूर्मलं यथा।। 5।। 2 - 18

卐2.18.1 सिंहे व्याघ्र उत या पृदाकौ त्विषिरग्नौ ब्राह्मणे सूर्ये या। इन्द्रं या देवी सुभगा ववर्ध सा न ऐतु वर्चसा सं विदाना।। 1।।

卐2.18.2 या हस्तिनि द्वीपिनि या हिरण्ये त्विषिरश्वेषु पुरुषेषु गोषु या। इन्द्रं या देवी सुभगा ववर्ध सा न ऐतु वर्चसा सं विदाना।। 2।।

卐2.18.3 या राजान्ये दुन्दुभावायतायां त्विषिस्सेनायां स्तनयित्नौ घोषे या। इन्द्रं या देवी सुभगा ववर्ध सा न ऐतु वर्चसा सं विदाना।। 3।।

卐2.18.4 रथे अक्षेष्वृषभस्य वाजे पर्जन्ये वाते वरुणस्य शुष्मे। इन्द्रं या देवी सुभगा ववर्ध सा न ऐतु वर्चसा सं विदाना।। 4।।

卐2.18.5 या रुद्रेषु या वसुष्वादित्येषु मरुत्सु या। त्विषिर्या विश्वेषु देवेषु सा न ऐतु वर्चसा संविदाना।। 5।। 2 - 19

卐2.19.1 यदि गाधानां यदि नाव्यानां नदीनां पारे नृपतिस्सखा नः। विश्वे देवासो अभि रक्षतैनं यथा जीवो विदथमावदासि।। 1।।

卐2.19.2 यद्यपारे यदि वा घ पारे यदि धन्वनि नृपतिस्सखा नः। विश्वे देवासो अभि रक्षतैनं यथा जीवो विदथमावदासि।। 2।।

卐2.19.3 यदि यत्सु यदि दृत्यां यदि समित्यां नृपतिस्सखा नः। विश्वे देवासो अभि रक्षतैनं यथा जीवो विदथमावदासि।। 3।।

卐2.19.4 अधस्पद्यन्तामधरे भवन्तु ये नस्सुरिं मघवानं पृतन्यान्। विश्वे देवासो अभि रक्षतैनं यथा जीवो विदथमावदासि।। 4।।

卐2.19.5 यम मृत्यो मैनं हिंसीर्यमहं हृदा मनसा जुगोप। यो मां पिपर्ति यमहं पिपर्मि स प्रजान् मघवान् सूरिरस्तु।। 5।। 2 - 20

卐2.20.1 इमां नावमा रोहताछिद्रां पारयिषणवम्। नराशंसस्य या गृहे शतारित्रा भगस्य च।। 1।।

卐2.20.2 उप ध्रुव गुल्गुलुना यक्ष्मा स्सन्त्वघ्न्यायाः। रुद्रस्येष्वा यातुधानामथो राज्ञो भगस्य च।। 2।।

卐2.20.3 रुद्रा वीशाते द्विपदां चतुष्पदां तयोर्वयमधिवाके स्याम। पक्तैर्वित्थै प्रतिभूषन्त एनौ वयं देवानां सुमतौ स्याम।। 3।।

卐2.20.4 प्रतीची नाम ते माता शतवारो घ ते पिता। ततो ब जज्ञिषे त्वमरिष्यन्तरुन्धति।। 4।।

Sri Ganapathy Sachchidananda Avadhoota Datta Peetham • Mysore •

卐2.20.5 माता नामासि मातृतो अमृतस्यैव वा असि। अरुन्धति त्वं सर्वमभि जीवमधा इदम्।। 5।
(इति पञ्चर्चो नाम द्वितीयकाण्डे चतुर्थोऽनुवाकः) 2 - 21

卐2.21.1 आ नो अग्ने सुमतिं सम्भलोगेदिमां कुमारीं सह नो भगेन। जुष्टावरेषु समनेषु वल्गु रोषं पत्या भवतु सम्भगेयम्।। 1।।

卐2.21.2 इयमग्ने नारी पतिं विदेष्ट सोमो हि राजा सुभगां कृणोतु। सुवाना पुत्रान् महिषी भवाति गत्वा पतिं सुभगा वि राजात्।। 2।।

卐2.21.3 सोमजुष्टो ब्रह्मजुष्टो अर्यम्णा सम्भृतो भगः। धातुर्देवस्य सत्येन कृणोमि पति वेदनम्।। 3।।

卐2.21.4 यथा खरो मघवंश्चारुरेष प्रियो मृगाणां सुषदा बभूव। एवेयं जुष्टा भगस्यास्तु सं प्रिया पत्याविराधयन्ति।। 4।।

卐2.21.5 भगस्य नावमा रोह पूर्णामनपदस्वतीम्। तयोपप्रयाहि तं यः पतिः प्रतिकाम्यः।। 5।।

卐2.21.6 इदं हिरण्यं गुल्गुल्व यमौक्षो अथो भगः। एते पतिभ्यस्त्वामदुः प्रतिकामाय वेत्तवे।। 6।। 2 - 22

卐2.22.1 युनक्त सीरा वि युगा तनोत कृते क्षेत्रे वपतेह बीजम्। विराजश्श्नुष्टि सभरा असन्नो नेदीय इत् सृण्यः पक्कमा यवम्।। 1।।

卐2.22.2 सीरा युञ्जन्ति कवयो युगा वितन्वते पृथक् धीरा देवेषु सुम्नयौ। अनड्वाहः पुरुषा ये कृषन्ति लाङ्गलं फालं समनज्मि स्फात्या।। 2।।

卐2.22.3 शुनं कीनाशो अन्वेतु वाहाञ्छुनं फालो विनुदन्नेतु भूमिम्। शुनासीरा हविषा यो ददातै सुपिप्पला ओषधयः सन्तु तस्मै।। 3।।

卐2.22.4 शुनं नरो लाङ्गलेनानडुद्भिर्भगः फालैः क्षेत्रपतिर्मरुद्भिः। पर्जन्यो बीजमिरयेदं हिनोतु शुनासीरा कृणुतं धान्येह।। 4।।

卐2.22.5 इन्द्रः सीतां नि गृह्णातु तां पूषाभि रक्षतु। सा नः पयस्वती दुहामुत्तरामुत्तरां समाम्।। 5।।

卐2.22.6 उदस्थाद्रथजिद् गोजिदश्वजिद्धिरण्यजित् सूनृतया परीवृतः। एक चक्रेण सविता रथेनोर्जो भागैः पृथिवी नेत्या पृणन्।। 6।। 2 - 23

卐2.23.1 गवां गृहाणां रसमोषधीनामनुज्येष्ठं वर्च आयुर्विकल्प्य। स मा हिसीः पितरौ वर्धमानो भद्राच्छ्रेयां समभि लोकमेहि।। 1।।

卐2.23.2 यदीदं भक्तं यदि वा विभक्तं क्षेत्रन्देवानां यदि वा पितृणाम्। यदि सूर्यो उदित्ये यदि वामनुष्यवच्छिवा नो अस्तु पृथिवी उतद्यौः।। 2।।

卐2.23.3 ऊर्जा वां भागो वरया पृथिव्यां देवी द्वारौ ब्रह्मणावां धारयामि। शिवं शग्ममवसानं नो अस्तु रातं देवेभिः पितृभिर्मनुष्यैः।। 3।।

卐2.23.4 विश्वावसोस्त्वा सदनं कुलायं गन्धर्वासो वेधसो मह्यमूचुः। स मा हिंसी श्शेवधिं यन्त एतं शतं हिमाः परिदध्मो मनुष्यम्।। 4।।

卐2.23.5 रुद्रा उत्से सदमक्षीयमाणे देवा मदन्ति पितरो मनुष्याः। अयं भागो भागपतिश्च देवा उर्वीरस्तर्या श्शरदस्तरेम।। 5।। 2 - 24

卐2.14.1 यो अस्मिन् यक्ष्मः पुरुषे प्रविष्ट इषितं दैव्यं सहः। अग्निष्टं घृतबोधनो अप स्कन्दयत्वधि दूरमस्मत्। सो अन्येन समृच्छतां तमस्मै प्र सुवामसि।। 1।।

卐2.14.2 यस्त्वा यक्ष्मो देवेषित इषितः पितृभिश्च यः। तस्मा त्वा विश्वे देवा मुञ्चन्तु पर्यं हसः। ते ते यक्ष्ममप स्कन्दयत्वधि दूरमस्मत्। सो अन्येन समृच्छतां तमस्मै प्र सुवामसि।। 2।।

卐2.14.3 यत्त्वमेनो अन्य कृतं यदात्म कृतमारिथ तस्मा त्वा विश्वा भूतानि मुञ्चन्तु पर्यं हसः। तानि ते यक्ष्ममप स्कन्दयत्वधि दूरमस्मत्। सो अन्येन समृच्छतां तमस्मै प्र सुवामसि।। 3।।

卐2.14.4 यत्त्वा स्व आदृशा यद्वा चकार निष्ट्यः। तस्मात्त्वा पृथिवी माता मुञ्चन्तु पर्यं हसः। सा ते यक्ष्ममप स्कन्दयत्वधि दूरमस्मत्। सो अन्येन समृच्छतां तमस्मै प्र सुवामसि।। 4।।

卐2.14.5 अपस्कन्देन हविषा यक्ष्मं ते नाशयामसि। तदग्निराह तदु सोम आह बृहस्पतिः सविता तदिन्द्रः। ते ते यक्ष्ममप स्कन्दयत्वधि दूरमस्मत्। सो अन्येन समृच्छतां तमस्मै प्र सुवामसि।। 5।। 2 - 25

卐2.25.1 अग्न्यग्रा इन्द्रबला आदित्या या युधो विदुः। युधो अधि प्रतिष्ठिता होत्रा जैत्राय जुह्वति।। 1।।

卐2.25.2 अभियुक्तस्य प्रधनेऽनु योद्धारमिच्छताम्। हवींष्यग्रे युध्यतां प्रतिगृह्णीत जुह्वताम्।। 2।।

卐2.25.3 जेत्रा राज्ञा वरुणेन जेत्रा रुद्रेण केशिना। भवेन जिष्णुना जयति पर्जन्येन सहीयसा।। 3।।

卐2.25.4 अस्त्रा ताम्ब्रेण बृहता अस्त्रा सर्वेण युध्यता। गन्धर्वेण त्विषीमता रथेनासमयोधीना।। 4।।

卐2.25.5 सिनीवाल्यनुमतिर्वाहाश्वा निषङ्गिणः। जयन्तोऽभि प्रेतामित्रान् साकमिन्द्रेण मेदिना।। 5।
(इति पञ्चर्चो नाम द्वितीयकाण्डे पञ्चमोऽनुवाकः) 2 - 26

卐2.26.1 यत् स्वप्ने निजगन्थ यद्वा शेपिषेऽनृतम्। अग्निष्ट्वा तस्मादेनसो ब्रह्मा मुञ्चत्वंहसः।। 1।।

卐2.26.2 यदक्षेषु दुद्रोहिथ यद्वा मित्रेभ्यस्त्वम्। सोमस्त्वा तस्मादेनसो ब्रह्मा मुञ्चत्वंहसः।। 2।।

卐2.26.3 यत्कुमारः कुमारेषु यद्वा ज्यायस्तरेषु च। नीविं यत् कृत्वा शेपिषे तत्कृण्मो अगदं शिवम्।। 3।।

卐2.26.4 प्रतीचीन फलो हि त्वमपामार्ग बभूविथ। सर्वान् मच्छ पथाँ अधि वरीयो यावया त्वम्।। 4।।

卐2.26.5 अपामार्ग ओषधीनां विश्वासामेक इत् पतिः। तेन ते मृज्म आस्थितमथ त्वमगदश्चर।। 5।।
2 - 27

卐2.27.1 शतवारो अनीनशद् यक्ष्मान् रक्षांसि तेजसा। आरोहन् वर्चसा सह मणि दुर्णाम चातनः।। 1।।

卐2.27.2 श्रृङ्गाभ्यां रक्षो नुदते मूलेन यातुधान्यः। मध्येन यक्ष्मं बाधते नैनं पाप्माति तत्रति।। 2।।

卐2.27.3 ये यक्ष्मा सो अर्भका महान्तो ये च शब्दिनः। सर्वान् दुर्णा महामणि श्शतवारो अनीनशत्।। 3।।

卐2.27.4 शतं वीरानजनयच्छतं यक्ष्मानपावपत्। दुर्णाम्नस्सर्वान् हत्वा अपरक्षांसि धूनुते।। 4।।

卐2.27.5 हिरण्यश्रृङ्ग ऋषभश्शातवारो अयं मणिः। दुर्णाम्नस्सर्वांस्तृड्वा अप रक्षांस्यक्रमित्।। 5।।

卐2.27.6 शतमहं दुर्णाम्नीनां गन्धर्वाप्सरसां शतम्। शतं शन्वतीनां शतवारेण वारये।। 6।। 2 - 28

卐2.28.1 विश्व विव्यज्मि पृथिवीवपुष्ट मादायत् प्रति गृह्णाम्यन्नम्। वैश्वानरस्य महतो महिम्नाग्निष्टद्विश्वादगदं कृणोतु।। 1।।

卐2.28.2 यदन्नमद्मि बहुधा विरूपं हिरण्मश्वमुत गामजामविम्। वैश्वानरस्य महतो महिम्नाग्निष्टद्विश्वादगदं कृणोतु।। 2।।

卐2.28.3 यदन्नमद्म्यनृतेन देवा दास्यन्नदास्यन्नुतवा करिष्यन्। वैश्वानरस्य महतो महिम्नाग्निष्टद्विश्वादगदं कृणोतु।। 3।।

卐2.28.4 यन्मुतं यदहुतमाजगाम यस्मादन्नान्मनसो द्वारजीमि। वैश्वानरस्य महतो महिम्नाग्निष्टद्विश्वादगदं कृणोतु।। 4।।

卐2.28.5 यमदग्निः कश्यपस्स्वाद्वेतद् भरद्वाज मध्वन्नं कृणोतु। प्रतिग्रहीत्रे गोतमो वसिष्ठो विश्वामित्रो नः प्रतिरात्यायुः।। 5।। 2 - 29

卐2.29.1 अग्ने यज्ञस्य चक्षो। इदं वेदाम यथेदं भविष्यति स्वाहा।। 1।।

卐2.29.2 अग्ने यज्ञस्य श्रोत्र। इदं वेदाम यथेदं भविष्यति स्वाहा।। 2।।

卐2.29.3 अग्ने यज्ञस्य प्राण। इदं वेदाम यथेदं भविष्यति स्वाहा।। 3।।

卐2.29.4 अग्ने यज्ञस्यापान। इदं वेदाम यथेदं भविष्यति स्वाहा।। 4।।

卐2.29.5 अग्ने यज्ञस्यात्मन्। इदं वेदाम यथेदं भविष्यति स्वाहा।। 5।।

卐2.29.6 अग्ने यज्ञस्य सर्व। इदं वेदाम यथेदं भविष्यति स्वाहा।। 6।। 2 - 30

卐2.30.1 देवानां भद्रा सुमतिर्ऋजुयतां देवानां रातिरभि नो निवर्त्तताम्। देवानां सख्यमुप सेदिमा वयं देवा न आयुः प्र तिरन्तु जीवसे।। 1।।

卐2.30.2 तान् पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्त्रिधम्। अर्यमणं वरुणं सोममश्विना सरस्वती नः सुभगा मयस्करत्।। 2।।

卐2.30.3 इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो ये परासः परेयुः। ये पार्थिवे रजस्या निषत्ता ये वा नूनं सुवृजनासु दिक्षुः।। 3।।

卐2.30.4 प्रत्यञ्चो अग्ने शरवः पतन्तु कृत्याकृते रिपवे मर्त्याय। क्रव्यादे अत्रिणे मा मीमृणः क्रविष्णुमा धेहि निर्ऋते रुपस्थे।। 4।।

卐2.30.5 ज्यायस श्शंसादुत वा कनीयसः सजातिशंसादुत जामीशंसात्। अनादिष्ट मन्यकृतं यदेनस्त्वं नस्तस्माज्जातवेदो मुमुग्धि।। 5। (इति पञ्चर्चो नाम द्वितीयकाण्डे षष्ठोऽनुवाकः) 2 - 31

卐2.31.1 इमौ पादौ प्र हराम्या गृहेभ्यस्स्वस्तये। इन्द्रः पश्चादिन्द्रः पुरस्तादिन्द्रो नः पातु मध्यतः।। 1।।

卐2.31.2 इन्द्रो भयं व्यस्यतु शूद्राच्च न आर्याच्च। इन्द्रः पथिभिरद्रवदसमृद्धा अघायवः।। 2।।

卐2.31.3 इन्द्रो हनिष्यतां वधं वि नः पाशाँ इवाचृतत्। एमं पन्थामरुक्षाम सुगं स्वस्ति वाहनम्।। 3।।

卐2.31.4 येन विश्वाः परिद्विषः वृणक्ति विन्दते विश्वास्तमेत्यनाहतः। परा व्रजतु कृन्तत्यवकां विक्षणन्निव। विष्वञ्चो यन्त्वस्य पाला विष्वञ्चः परि पन्थिनः।। 4।।

卐2.31.5 विष्वक् पुनर्भुवा मनो असमृद्धा अघायवः। स्वस्त्यन्व चाकशं स्वस्ति प्रत्यचाकशम्।। 5।।

卐2.31.6 स्वस्ति पथिषु धन्वसु स्वस्त्यप्स्वन्तः। परि व्रजं स्वरित स्वस्त्ययनमसि भारद्वाजं स्वस्ति पुनरायणम्।। 6।। 2 - 32

卐2.32.1 य उत्तरा दाजायते मधुघो मधुघा दधि। वेदाहं तस्मिन् भेषजं जिह्वा मधुमती मम।। 1।।

卐2.32.2 मधुमत्ते पर्णमासा मधु श्रृङ्गोत पुष्पकम्। मधुमान् पर्वतासिथ यतो जायस ओषधे।। 2।।

卐2.32.3 गर्भो अस्योषधीनामपां गर्भ उतासिथ। अथो सोमस्य भ्रातासि मधुघ प्राव मे वच।। 3।।

卐2.32.4 शुनमहं मधुघस्य पितुर्नामेव जग्रभ। यो मा हिरण्यवर्चसं कृणवत् पुरुषप्रियम्।। 4।।

卐2.32.5 प्रियं मा कृणु देवेषु प्रियं राजषु मा कृणु। प्रियं सर्वस्य पश्यत उत शूद्र उतार्ये। .5।। 2 - 33

卐2.33.1 ऊध्ना वन हृदा वन मुखेन जिह्वया वन। प्रपीना पयसा वन।। 1।।

卐2.33.2 वाञ्छ पदो वाञ्छ त्वचं वाञ्छाक्षौ वाञ्छ सक्थ्यौ। वत्समनु प्र ते मनो निम्नं वारिव धावतु।। 2।।

卐2.33.3 ऊर्ध्वानि ते लोमानि तिष्ठन्त्वक्षौ कामेन शुष्यताम्। समिद्वत्सेन गौरिव मुद्रा सुरेव पृच्यताम्।। 3।।

卐2.33.4 इमा गावस्सबन्धव स्समानं वत्समक्रत। हिङ्गिति करिक्रतीराद्धारानिरमवश्वसा।। 4।।

卐2.33.5 श्रृङ्गौ पशा गलभूषा अघ्न्याश्चर्मवासिनीः। गावो घृतस्य मातरस्ता वत्से वानयामसि।। 5।। 2 - 34

卐2.34.1 यच्च वर्चः कन्यासु यच्च हस्तिष्वाहितम्। हिरण्ये गोषु यद्वर्चस्तस्य भक्षीय वर्चसः।। 1।।

卐2.34.2 यच्च वर्चो राजरथे यच्च राजस्वाहितम्। निष्के रुक्मे च यद्वर्चस्तस्य भक्षीय वर्चसः।। 2।।

卐2.34.3 यदप्सु यद्वनस्पतौ यदग्नौ यच्च सूर्ये। यज्ञे यद्दक्षिणायां वर्चस्तस्य भक्षीय वर्चसः।। 3।।

卐2.34.4 वर्चस्वन्मे मुखमस्तु वर्चस्वदुत मे शिरः। वर्चस्वान् विश्वतः प्रत्यङ् वर्चस्वान् वर्णो अस्तु मे।। 4।।

卐2.34.5 सुभागं मे मुखमस्तु सुभागमुत मे शिरः। सुभागो विश्वतः प्रत्यङ् सुभागो वर्णो अस्तु मे।। 5।। 2 - 35

卐2.35.1 उदसौ सूर्यो अगात्सहावतुना मम। अहं ते मधुमती मधुघान्मधुमत्तरा।। 1।।

卐2.35.2 यद्गिरिषु पर्वतेषु गोष्वश्वेषु यन्मधु। सुरायां सिच्यमानायां कीलाले अधि यन्मधु तेन मधु तन्मयि।। 2।।

卐2.35.3 यथा सुरा यथा मधु यथाक्षा अधि देवने। यथाह गव्यतो मन एवा मा मभिते मनः।। 3।।

卐2.35.4 आते पदं पदेनादिष्या ते मनसा मनः। प्रत्यञ्चमग्रभं त्वा श्वमिवाश्वाभिधान्या।। 4।।

卐2.35.5 मह्यं त्वा द्यावापृथिवी मह्यं देवी सरस्वती। मह्यं त्वा मध्यं भूम्या उभावन्तौ समस्यताम्।। 5।। 2 - 36

卐2.36.1 या वैश्वदेवीरीषवो या वसूनां या रुद्रस्य सोमस्य या भगस्य। विश्वेदेवा इषवो या वतिर्वस्ता वो अग्निना शर्मणा शमयामि।। 1।।

卐2.36.2 या आदित्यानामिषवो या वसूनां या रुद्रस्याश्विनोर्या वतीस्ताः। विश्वेदेवा इषवो यावतीर्वस्ता वो देवस्सविता शमयाति।। 2।।

卐2.36.3 यास्ते अग्न इषवो वातयास्तेऽपामदित्यामुत या मरुत्सु। इन्द्रश्च साम्ना वरुणश्च राजा ता वः सूर्यो बृहता शमयाति।। 3।।

卐2.36.4 मा वृक्षमज्यादित्येभ्यो मा वसुभ्यो मा रुद्रायाग्नये पार्थिवाय। इन्द्रस्य शुचो वरुणस्य याश्शुचस्ता वो देव्यदितिश्शमयाति।।

卐2.36.5 याश्च वाते विश्वग्वाते याश्च रुद्रस्य धन्वनि। अग्निष्टा वसोरीशानः सर्वास्ता भेषजाः करत्।। 5।। 2 - 37

卐2.37.1 चित्तिं यजामि मनसा चित्तिं देवाँ ऋतावृधः। जातवेदः प्र णस्तिराग्ने विश्वाभिरूतिभिः।। 1।।

卐2.37.2 यावयास्मद् द्वेषांसि यवमयेन हविषा। यस्ते त्रित दुःस्वप्नस्य भागः स त एष तं त एतं प्रहिण्मः।। 2।।

卐2.37.3 यथा कलां यथा शफं यथर्णं सं नयन्ति। एवाह दुःस्वप्न्यं सर्वमप्रिये सं नयामसि।। 3।।

Sri Ganapathy Sachidananda Avadhoota Datta Peetham

卐2.37.4 आररोहै शतमद्य गवां भक्षीय शतमजानां। शतमवीनां शतमश्वानां शतं पुरुषाणाम्। तत्रापि भक्षीयामुमामुष्यायणममुष्याः पुत्रम्। । 4।।

卐2.37.5 तमहं निर्ऋतये प्रयच्छामि तं मृत्योः पाशे बध्नामि। स बद्धो हतो अस्तु स ततो मा मोचि।। 5।। 2 - 38

卐2.38.1 ये नः शपन्त्यप ते भवन्तु वृक्षानिव वृक्णां अति तां अयाम। द्राघीय आयुः प्रतरं दधाना वयं देवानां सुमतौ स्याम।। 1।।

卐2.38.2 कृत्याकृतं प्रत्यवशानदर्शनमग्ने प्रति स्म बुध्यस्व। प्रति स्म देव तं दह।। 2।।

卐2.38.3 यस्त्वा कृत्ये प्रतिघाय विद्वाँ अविदुषो गृहम्। पुनस्त्वा तस्मा आ दध्मो यथा कृत्या कृतं हनत्।। 3।।

卐2.38.4 ये नश्शपन्तप ते भवन्तु वृक्षानिव वृक्णामति तां अयाम। द्राघीय आयुः प्रतरं दधाना वयं देवानां सुमतौ स्याम।। 1।।

卐2.38.5 कृत्याकृतं प्रत्यवसानदर्शनमग्ने प्रतिस्म बुध्यस्व। प्रति स्म देव तं दह।। 2।।

卐2.38.6 यस्त्वा कृत्ये प्रतिघाय विद्वाँ अविदुषो गृहम्। पुनस्त्वा तस्मा आ दध्मो यथा कृत्याकृतं हनत्।। 3।।

卐2.38.7 पुनः कृत्यां कृत्याकृते हस्तगृह्य परा णय। उतो तमुत सा पुनस्तर्द इव सदनं स्वम्।। 4।।

卐2.38.8 कृत्या यन्तु कृत्याकृतं वृकीवाविमतो गृहम्। स्तोकं पाकस्य वर्धतां सुवृष्ट ओषधीरिव।। 5।। 2 - 39

卐2.39.1 यत्ते ग्रावा बाहुच्युतो अचक्रन्नरो यद्वा ते हस्तयोरधुक्षम्। तत्त आप्यायतां तत्ते निष्ट्यायतां सोम राजन्।। 1।।

卐2.39.2 यत्ते ग्राव्णां चेच्छिदु स्सोमराजन् प्रियाण्यङ्गानि सुकृता पुरूणि। तत् संधत्स्वाज्येनोत वर्धयस्वानागसो यथा सदमित् संक्षियेम।। 2।।

卐2.39.3 यां ते त्वचं विभिदुर्यां च योनिं यद्वास्थानात् प्रच्युतो यदि वा सुतोसि। त्वया सोम क्लृप्तमस्माकमेतदुप न राजन् सुकृते ह्वयस्व।। 3।।

卐2.39.4 सं प्राणापानाभ्यां समु चक्षुषा सं श्रोत्रेण गच्छस्व सोमराजन्। यत्ते विरिष्टं समुतत्त एतज्जानितान्नः संगमने पथीनाम्।। 4।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐2.39.5 अहाः शरीरं पयसा समेत्यन्यो अन्यो भवति वर्णो अस्य। तस्मै त इन्द्रो हविषा विधेम वयं स्याम पतयो रयीणाम्।। 5।।

卐2.39.6 अभि क्षरन्ति जुह्वो घृतेनाङ्गा परूंषि तव वर्धयन्ती। तस्मै ते सोम नम इद्वषड् वोप न राजन् सुकृते ह्वयस्व।। 6।। 2 - 40

卐2.40.1 इहेत देवीरयमस्तु पन्था अयं वो लोकः शरणाय साधुः। इदं हविर्जुषमाणा उदेत क्षिप्रा राज्ञा वरुणेन प्रसूताः।। 1।।

卐2.40.2 इहैतु राजा वरुणोजिराभिर्देवो देवीभिर्हविषो जुषाणः। कृणुष्व पन्थामुदयानमूर्मिभिरनेन बभ्रो महता पृथिव्याः।। 2।।

卐2.40.3 प्रिये ध्रियध्वमुत या न मुञ्चती रोकैघानामिह रारणीतु। अनेन वेगानसृजत् प्रजापतिरिह ध्रियध्वं शरणं सरस्वतीः।। 3।।

卐2.40.4 इह वो जूतिर्ध्रियतां समान्यपामग्नीनां वरुणस्य सोम। अनेन वेगा नसृजत् त्विषीमतो हिंस्राञ्छम्भू नजिराँ अतृष्णजः।। 4।।

卐2.40.5 ये पारतो मध्यतो ये ते अन्तयो अप्सुषदो निहितास्तीरे अग्नयः। ते देवजा इह नो मृडयन्त्वापश्च जन्मन्नुभये सवन्तवः।। 5।।

卐2.40.6 इदं वो आपो हृदयमयं वत्स ऋतावरीः। इहेत्थमेत शक्वरीर्यत्रेमं पारयामसि।। 6। (इति पञ्चर्चो नाम द्वितीयकाण्डे अष्टमोऽनुवाकः) 2 - 41

卐2.41.1 उदसौ सूर्यो अगादुदयं मामको भगः। तेनाहं विद्वला पतिमभ्यसाक्षि विषासहिः।। 1।।

卐2.41.2 अहं केतुरहं मूर्धाहमुग्रा विवाचनी। ममेदपि क्रतुं पतिः सेहानाया उपाचरात्।। 2।।

卐2.41.3 मम पुत्राश्शत्रुहणोऽथो मे दुहिता विराट्। उताह मस्मि सञ्जया पत्यां मे श्लोक उत्तमः।। 3।।

卐2.41.4 येन देवा असुरेभ्यो भवन् द्युम्नवत्तराः। इदं तदक्रि देवा असपत्ना किलाभुवम्।। 4।।

卐2.41.5 असपत्ना सपत्नघ्नी जयन्त्यभिभूवरी। मुष्णाम्यन्यासां भगं वासो अस्थेयसामिव।। 5।। 2 - 42

卐2.42.1 शेरभक शेरभ। पुनर्वो यन्तु यातवः पुनर्जूतिः किमीदिनः। यस्यस्थ तमत्त यो वः प्राहैत्तमत्त स्वा मांसान्यत्त।। 1।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐2.42.2 शेवृधक शेवृध। पुनर्वो यन्तु यातवः पुनर्जूतिः किमीदिनः। यस्य स्थ तमत्त यो वः प्रहैत्तमत्त स्वा मांसान्यत्त।। 2।।

卐2.42.3 सर्पानुसर्प। पुनर्वो यन्तु यातवः पुनर्जूतिः किमीदिनः। यस्य स्थ तमत्त यो वः प्रहैत्तमत्त स्वा मांसान्यत्त।। 3।।

卐2.42.4 म्रोकानु म्रोक। पुनर्वो यन्तु यातवः पुनर्जूतिः किमीदिनः। यस्य स्थ तमत्त यो वः प्रहैत्तमत्त स्वा मांसान्यत्त।। 4।।

卐2.42.5 जूर्ण। पुनर्वो यन्तु यातवः पुनर्जूतिः किमीदिनः। यस्य स्थ तमत्त यो वः प्रहैत्तमत्त स्वा मांसान्यत्त।। 5।।

卐2.42.6 भरूजी। पुनर्वो यन्तु यातवः पुनर्जूतिः किमीदिनः। यस्य स्थ तमत्त यो वः प्रहैत्तमत्त स्वा मांसान्यत्त।। 6।।

卐2.42.7 अर्जुनी। पुनर्वो यन्तु यातवः पुनर्जूतिः किमीदिनः। यस्य स्थ तमत्त यो वः प्रहैत्तमत्त स्वा मांसान्यत्त।। 7।।

卐2.42.8 उपद्ब। पुनर्वो यन्तु यातवः पुनर्जूतिः किमीदिनः। यस्य स्थ तमत्त यो वः प्रहैत्तमत्त स्वा मांसान्यत्त।। 8 2 - 43

卐2.43.1 द्यावापृथिवी उपश्रुतये मा पातं स्वाहा।। 1।।

卐2.43.2 धनायायुषे प्रजायै मा पातं स्वाहा।। 2।।

卐2.43.3 प्राणापानौ मृत्योर्मा पातं स्वाहा।। 3।।

卐2.43.4 सूर्य चक्षुषे मा पाहि स्वाहा।। 4।।

卐2.43.5 अग्ने विश्वम्भर विश्वतो मा पाहि स्वाहा।। 5।। 2 - 44

卐2.44.1 आयुर्दाग्निरायुर्मे दात् स्वाहा।। 1।।

卐2.44.2 वर्चोदाग्नि वर्चो मे दात् स्वाहा।। 2।।

卐2.44.3 तेजोदाग्निस्तेजो मे दात् स्वाहा।। 3।।

卐2.44.4 सहोदाग्निस्सहमेदात् स्वाहा।। 4।।

卐2.44.5 बलदाग्निर्बलं मे दात् स्वाहा।। 5।। 2 - 45

卐2.45.1 आयुरस्यायुर्मयि धेहि स्वाहा।। 1।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐2.45.2 वर्चोऽसि वर्चो मयि धेहि स्वाहा।। 2।।

卐2.45.3 तेजोऽसि तेजो मयि धेहि स्वाहा।। 3।।

卐2.45.4 सहोऽसि सहो मयि धेहि स्वाहा।। 4।।

卐2.45.5 बलमसि बलं मयि धेहि स्वाहा।। 5। (इति पञ्चर्चो नाम द्वितीयकाण्डे नवमोऽनुवाकः) 2 - 46

卐2.46.1 पिशाचक्षयणमसि पिशाचजम्भनमसि स्वाहा।। 1।।

卐2.46.2 यातुधानक्षयणमसि यातुधानजम्भनमसि स्वाहा।। 2।।

卐2.46.3 सदान्वाक्षयणमसि सदान्वाजम्भनमसि स्वाहा।। 3।।

卐2.46.4 सपत्नक्षयणमसि सपत्नजम्भनमसि स्वाहा।। 4।।

卐2.46.5 भ्रातृव्यक्षयणमसि भ्रातृव्यजम्भनमसि स्वाहा।। 5।। 2 - 47

卐2.47.1 आ ते सौवीर्यं ददे मयि ते सौवीर्यम्।। 1।।

卐2.47.2 आ ते सौवर्चो ददे मयि ते सौवर्चम्।। 2।।

卐2.47.3 आ ते सौतेजो ददे मयि ते सौतेजम्।। 3।।

卐2.47.4 आ ते सौनृम्णं ददे मयि ते सौनृमणम्।। 4।।

卐2.47.5 आ ते सौशुक्रं ददे मयि ते सौशुक्रम्।। 5।। 2 - 48

卐2.48.1 अग्ने यत्ते तपस्तेन त्वं प्रति तप योऽस्मान् द्वेष्टि यं वयं द्विष्मः।। 1।।

卐2.48.2 अग्ने यत्ते हरस्तेन तं प्रति हर योऽस्मान् द्वेष्टि यं वयं द्विष्मः।। 2।।

卐2.48.3 अग्ने यत्ते शोचिस्तेन तं प्रति शोचय योऽस्मान् द्वेष्टि यं वयं द्विष्मः।। 3।।

卐2.48.4 अग्ने यत्तेऽर्चिस्तेन तं प्रत्योषय योऽस्मान् द्वेष्टि यं वयं द्विष्मः।। 4।।

卐2.48.5 अग्ने यत्ते ज्योतिस्तेन तं प्रति दह योऽस्मान् द्वेष्टि यं वयं द्विष्मः।। 5।। 2 - 49

卐2.49.1 प्राची दिग्गायत्रं देवता। यद्देवेषु पितृषु मनुष्येष्वेनश्चकारायं त्वं तस्यावयजनमसि। मुञ्चेममस्माद् यक्ष्मादस्मादामयतः स्वाहाः।। 1।।

卐2.49.2 दक्षिणा दिग् रथन्तरं देवता। यद्देवेषु पितृषु मनुष्येष्वेनश्चकारायं त्वं तस्यावयजनमसि। मुञ्चेममस्माद् यक्ष्मादस्मादामयतः स्वाहाः।। 2।।

卐2.49.3 प्रतीचि दिग् वामदेव्यं देवता। यद्देवेषु पितृषु मनुष्येष्वेनश्चकारायं त्वं तस्यावयजनमसि। मुञ्चेममस्माद् यक्ष्मादस्मादामयतः स्वाहाः।। 3।।

卐2.49.4 उदीचि दिग् यज्ञायज्ञियं देवता। यद्देवेषु पितृषु मनुष्येष्वेनश्चकारायं त्वं तस्यावयजनमसि। मुञ्चेममस्माद् यक्ष्मादस्मादामयतः स्वाहाः।। 4।।

卐2.49.5 ऊर्ध्वा दिग् बृहद्देवता। यद्देवेषु पितृषु मनुष्येष्वेनश्चकारायं त्वं तस्यावयजनमसि। मुञ्चेममस्माद् यक्ष्मादस्मादामयतः स्वाहाः।। 5।। 2 - 50

卐2.50.1 अग्निं वयं त्रातारं हवामहे य इमं त्रायाता अस्माद् यक्ष्मादस्मादामयतः। जुषाणो अग्निराज्यस्य त्राता त्रायतां स्वाहा।। 1।।

卐2.50.2 मित्रावरुणौ वयं त्रातारौ हवामहे याविमौ त्रायैते अस्माद् यक्ष्मादस्मादामयतः। जुषाणौ मित्रावरुणावाज्यस्य त्रातारौ त्रायेतां स्वाहा।। 2।।

卐2.50.3 मरुतो वयं त्रातॄन् हवामहे य इमं त्रायान्ता अस्माद् यक्ष्मादस्मादामयतः। जुषाणाः मरुत आज्यस्य त्रातारस्त्रायन्तां स्वाहा।। 3।।

卐2.50.4 पितॄन् वयं त्रातॄन् हवामहे य इमं त्रायान्ता अस्माद् यक्ष्मादस्मादामयतः। जुषाणाः पितर आज्यस्य त्रातारस्त्रायन्तां स्वाहा।। 4।।

卐2.50.5 बृहस्पतिं वयं त्रातारं हवामहे य इमं त्रायाता अस्माद् यक्ष्मादस्मादामयतः। जुषाणो बृहस्पतिराज्यस्य त्रात त्रायतां स्वाहा।। 5। (इति पञ्चर्चो नाम द्वितीयकाण्डे दशमोऽनुवाकः) 2 - 51

卐2.51.1 अग्निं वयं त्रातारं यजामहे मेनिहनं बलगहनम्। जुषाणो अग्निराज्यस्य मेनिहा बलगहा त्राता त्रायतां स्वाहा।। 1।।

卐2.51.2 इन्द्रं वयं त्रातारं यजामहे मेनिहनं बलगहनम्। जुषाण इन्द्र आज्यस्य मेनिहा बलगहा त्राता त्रायतां स्वाहा।। 2।।

卐2.51.3 सोमं वयं त्रातारं यजामहे मेनिहनं बलगहनम्। जुषाणस्सोम आज्यस्य मेनिहा बलगहा त्राता त्रायतां स्वाहा।। 3।।

卐2.51.4 विश्वान् वयं देवांस्त्रातॄन् यजामहे मेनिघ्नो बलगघ्नः। जुषाणा विश्वेदेवा आज्यस्य मेनिहनो बलगहनस्त्रातारस्त्रायन्तां स्वाहा।। 4।।

卐2.51.5 बृहस्पतिं वयं त्रातारं यजामहे मेनिहनं बलगहनम्। जुषाणो बृहस्पतिराज्यस्य मेनिहा बलगहा त्राता त्रायतां स्वाहा।। 5।। 2 - 52

卐2.52.1 ये केशिनः प्रथमा सत्रमासथ येभिराभृतं यदीदं विरोचते। तेभ्यो जुहोमि हविषा घृतेनाश्ववान् गोमानयमस्तु वीरः।। 1।।

卐2.52.2 नर्ते दानात्तमसो मुच्यते परि द्विनाम्नीं दीक्षां वशिनीं य आयत्। प्राश्यकेशाः सुवते काण्डिनो भवन्ति तेषां ब्रह्मेशे वपनस्य नान्यः।। 2।।

卐2.52.3 येनावपत् सविता शीर्ष्णोऽग्रे क्षुरेण सोमस्य राज्ञो वरुणस्य क्शान्। तेन ब्रह्माणो वपतेदमस्या श्रामो दीर्घायुरयमस्तु वीरः।। 3।।

卐2.52.4 मा ते केशाँ अनुगाद् वर्च एतत्तथा धाता दधातु ते। तुभ्यमिन्द्रो वरुणो बृहस्पतिस्सविता वर्च आदधन्।। 4।।

卐2.52.5 आ रोह प्रोष्ठं वि षहस्व शत्रूनवास्त्रा दीक्षां वशिनी ह्युग्रा। देहि दक्षिणां ब्राह्मणेभ्यो ऽथो मुच्यस्व वरुणस्य पाशात्।। 5।। 2 - 53

卐2.53.1 ये देवाः पुरस्सदो ऽग्निनेत्रा रक्षोहणः। ते नः पान्तु ते नोवन्तु तेभ्यो नमस्तेभ्यस्स्वाहा।। 1।।

卐2.53.2 ये देवा दक्षिणासदो यमनेत्रा रक्षोहणः। ते नः पान्तु ते नोवन्तु तेभ्यो नमस्तेभ्यस्स्वाहा।। 2।।

卐2.53.3 ये देवाः पश्चात् सदो मरुन्नेत्रा रक्षोहणः। ते नः पान्तु ते नोवन्तु तेभ्यो नमस्तेभ्यस्स्वाहा।। 3।।

卐2.53.4 ये देवा उत्तरासदः सोमनेत्रा रक्षोहणः। ते नः पान्तु ते नोवन्तु तेभ्यो नमस्तेभ्यस्स्वाहा।। 4।।

卐2.53.5 ये देवा अन्तरिक्षसदो बृहस्पतिनेत्रा रक्षोहणः। ते नः पान्तु ते नोवन्तु तेभ्यो नमस्तेभ्यस्स्वाहा।। 5।। 2 - 54

卐2.54.1 अग्नये पुरस्सदे रक्षोघ्ने स्वाहा।। 1।।

卐2.54.2 यमाय दक्षिणासदे रक्षोघ्ने स्वाहा।। 2।।

卐2.54.3 मरुद्भ्यः पश्चात् सद्भ्यो रक्षोहभ्यस्स्वाहा।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐2.54.4 सोमायोत्तरासदे रक्षोघ्ने स्वाहा।। 4।।

卐2.54.5 बृहस्पतयेऽन्तरिक्षसदे रक्षोघ्ने स्वाहा।। 5।।

卐2.54.6 अवस्पते दिवस्पते रक्षोघ्ने स्वाहा।। 6।। 2 - 55

卐2.55.1 दिवो जातो दिवस्पुत्रो यस्माज्जातं महत्सहः। अश्वत्थमग्रे जैत्रायाच्छा देवं वदामसि।। 1।।

卐2.55.2 तं त्वाश्वा यथारथमुप तिष्ठन्तु राजानः। समितिभ्यो विवक्तवे।। 2।।

卐2.55.3 त्वया वयं देवजातस्सर्वा प्राशो जयामसि। उत सत्या उतानृताः।। 3।।

卐2.55.4 योऽश्वत्थेन मित्रेण समितीरव गच्छति। जयात् स सर्वाः पृतना याश्च सत्या उतानृताः।। 4।।

卐2.55.5 अधराञ्चो निर्द्रवन्तु समित्या उलुलाकृताः। अश्वत्थमित्रं पुरुषं ये वाचा पृतन्यात्।। 5।
(इति पञ्चर्चो नाम द्वितीयकाण्डे एकादशोऽनुवाकः) 2 - 56

卐2.56.1 उग्रा नामस्थ तेषां वः पुरो गृहाः। प्राची दिक् तेषां व अग्निरिषवः। ते नो मृडतो द्विपदे चतुष्पदे तेषां वो यान्यायुधानि या इषवस्तेभ्यो नमस्तेभ्यस्स्वाहा।। 1।।

卐2.56.2 क्रव्या नामस्थ तेषां वो दक्षिणा गृहा दक्षिणा दिक् तेषां व आप इषवः। ते नो मृडतो द्विपदे चतुष्पदे तेषां वो यान्यायुधानि या इषव स्तेभ्यो नमस्तेभ्यस्स्वाहा।। 2।।

卐2.56.3 विराजो नामस्थ तेषां वः पश्चात् गृहाः प्रतीची दिक् तेषां वः काम इषवः। ते नो मृडतो द्विपदे चतुष्पदे तेषां वो यान्यायुधानि या इषवस्तेभ्यो नमस्तेभ्यस्स्वाहा।। 3।।

卐2.56.4 अवस्था नामस्थ तेषां व उत्तरागृहा उदीची दिक् तेषां वो वात इषवः। ते नो मृडतो द्विपदे चतुष्पदे तेषां वो यान्यायुधानि या इषवस्तेभ्यो नमस्तेभ्यस्स्वाहा।। 4।।

卐2.56.5 उत्तरे नामस्थ तेषां व उपरि गृहा ऊर्ध्वादिक् तेषां वो वर्षमिषवः। ते नो मृडतो द्विपदे चतुष्पदे तेषां वो यान्यायुधानि या इषवस्तेभ्यो नमस्तेभ्यस्स्वाहा।। 5।। 2 - 57

卐2.57.1 यदीदं देवो दिव आजगाम यद्यन्तरिक्षद् यदि पार्थि वो यः। यदि यज्ञो यज्ञपतेस्स्वर्गस्तेभ्यस्सर्वेभ्यो नमसा विधेम।। 1।।

卐2.57.2 यमिन्द्रमाहुर्वरुणं यमाहुर्यं मित्रमाहुर्यमु सोममाहुः। यमग्निर्माहुर्यमु सूर्यमाहुस्तेभ्यस्सर्वेभ्यो नमसा विधेम।। 2।।

卐2.57.3 ये श्मशानानि मनसा नयन्ति सूर्यस्य रश्मिननु सञ्चरन्ति। ये देवानामृत्विजो यज्ञियानां तेभ्यस्सर्वेभ्यो नमसा विधेम।। 3।।

卐2.57.4 ये तन्त्रिया जल्प्याः प्रोर्णुवन्ति स्वप्नं दुर्भूतमभि ये किरन्ति। ये देवानां धर्मधृतो बभूवुस्तेभ्यस्सर्वेभ्यो नमसा विधेम।। 4।।

卐2.57.5 स्वभ्यसैरभि ये भा यन्ति ये भाः कृण्वन्ति य उ रोदयन्ति। ये वा स्त्रीणां प्रतिरूपा बभूवुस्तेभ्यस्सर्वेभ्यो नमसा विधेम।। 5।। 2 - 58

卐2.58.1 व्यावृत्तौ पथो गावौ व्यस्यौ युग्या उत। विद्वेषणं किलासिथ यथैनौ व्यदिद्विषः।। 1।।

卐2.58.2 वि किलैनावदिद्विषः शश्वतीभ्यस्समाभ्यः। अथोल्मुकमिव खादिरमग्निर्वामस्त्वन्तरा।। 2।।

卐2.58.3 सिंहस्ते अस्तु चक्षुषे व्याघ्रः परिष्वज्जने। अग्निर्वामस्त्वन्तरा यथा वां न सहासति।। 3।।

卐2.58.4 व्यद्योर्वद्य तत नद्यास्तत् कपद्विव। यो ओषधे प्रसर्पसि व्यग्निरिव तौ दह।। 4।।

卐2.58.5 वि वां यन्तु हृदययानि वि चित्तानि मनांसिच। अथो यत्तन्वोः सङ्गतं तद्वामस्तु वि दूरकम्।। 5।।

卐2.58.6 अस्ति वै वां विद्विकमुभौ शयने अन्तरा। विष्वञ्चौ पर्यावर्तेथां यथा वां न सहासति।। 6।। 2 - 59

卐2.59.1 त्रयः पोषास्त्रिवृतः श्रयन्तामनक्तु पूषा पयसा घृतेन। अन्नस्य भूमा पुरुषस्य भूमा भूमा पशूनां त इह श्रयन्ताम्।। 1।।

卐2.59.2 इममादित्या वसुना समुक्ष तेममाग्ने वर्धय वा वृधानः। अस्मिंस्त्रिवृच्छ्रयतां पोषयिष्णुरिमिमिन्द्र सं सृज वीर्येण।। 2।।

卐2.59.3 भूमिष्ट्वा पातु हरितेन विश्वभृदग्निः पिपर्त्वयसा सजोषाः। वीरुद्भिस्ते अर्जुनं सम्विदानमवर्चो दधातु सुमनस्य मानम्।। 3।।

卐2.59.4 त्रेधा जातं जन्मनेदं हिरण्यमग्नेरेकं प्रियतमं बभूव। सोमस्यैकं हिंसीतस्य परापतदपामेकं वेधसो रेत आहुस्तत्ते हिरण्यं त्रिवृतस्त्वायुषे।। 4.

卐2.59.5 त्र्यायुषं यमदग्ने कश्यपश्य त्र्यायुषम्। त्रेधामृतस्य चक्षणं त्रीण्यायुंषि नस्कृधि।। 5।।

卐2.59.6 त्रयः सुपर्णास्त्रिवृता यदायन्नेकाक्षरमभिसम्भूय शक्राः। प्रत्युह्यमृत्युममृते न साकमन्तर्दधाना भुवनानि विश्वा।। 6।।

卐2.59.7 दिवस्त्वा पातु हरितं मध्यात्वा पात्वर्जुनम्। भूम्या अयस्मयं पातु प्रागाद्देव पुरा अयम्।। 7।।

卐2.59.8 इमास्तिस्रो देवपुरा स्तास्त्वा रक्षन्तु सर्वतः। तास्त्वं विभ्रदायुष्मान् वर्चस्वानुत्तरो द्विषतो भव।। 8।।

卐2.59.9 पुरं देवानाममृतं हिरण्यं य आ वेधे प्रथमो देवो अग्रे। तस्मै नमो दश प्राचीः कृणोम्यनु मन्यतांत्रिवृता वधेन।। 9।।

卐2.59.10 नव प्राणान्नवभि सं मिमीते दीर्घायुत्वाय शतशारदाय। हरिते त्रीणि रजते त्रिण्ययसि त्रीणि तपसा विष्ठितानि।। 10।।

卐2.59.11 आ ते चृतत्वर्यमा पूषा बृहस्पतिः। अहर्जातस्य यन्नाम तेन तेऽति चृतामसि।। 11।।

卐2.59.12 ऋतुभिष्ट्वार्त वैरायुषे वर्चसे त्वा। सम्वत्सरस्य तेजसा तेन सं हनु कृणमसि।। 12।। 2 - 60

卐2.60.1 यज्ञं यन्तं तपसा वृहन्तमन्वारोहामि मनसा सयोनिः। उपहूताग्ने जरसः परस्ताच्तृतीये नाके सधमादं मदेम।। 1।।

卐2.60.2 तं प्रजानन् प्रतिगृह्णातु विद्वान् प्रजापतिः प्रथमजा ऋतस्य। अस्माभिर्दत्तं जरसः परस्तादच्छिन्नं तन्तुमनु सं चरेम।। 1।।

卐2.60.3 श्येनः सुपर्णो दिव्यो नृचक्षाः सहस्रपाच्छतयोनिर्वयोधाः। स नो नि यं सद्वसु यत्पराभृतमस्माकमस्तु पितृषु स्वधावत्।। 3।।

卐2.60.4 एतं सधस्थाः परि णो ददामि यमावहाच्छेवधिं जातवेदाः। अन्वागन्ता यजमानस्स्वस्ति तं स्म जानीत परमे व्योमन्।। 4।।

卐2.60.5 जानीत स्मैनं परमे व्योमन् देवास्सधस्था विदलोकमेतम्। इष्टापूर्तमनुसंक्राम विद्वान् यत्र ते दत्तं बहुधा विबन्धुषु।। 5। (इति पञ्चर्चो नाम द्वितीयकाण्डे द्वादशोऽनुवाकः) 2 - 61

卐2.61.1 येभिः पाशैरभि दधासि दृंह्णस्समामिनो अनृतं ये समामिरे। तांस्ते विष्याम्यायुषे बलायानमिवं पितु मद्धि प्रसूतः।। 1।।

卐2.61.2 अनागा बभ्रो अयमस्तु वीरो द्रुहः पाशेभ्यः परि पाह्येनम्। राजन् प्रविद्वान् प्र मुमुग्धि पाशान् यस्मै चरामि हविषा घृतेन।। 2।।

卐2.61.3 कश्यप इन्द्राय हविषा चचार हरित्वतीषु मघोवा मघोने। पस्पार विश्वा भुवनस्य गोपा अन्तरिक्षस्य महतो विमाने।। 3।।

卐2.61.4 अपूपं नाभिलं ते घृतश्चुतं नदीनां पदे शुश्रुतं जुहोमि। प्रविद्वान् राजन् प्रमुमुग्धि पाशानस्य पत्नी विधवा यथासत्।। 4।।

卐2.61.5 अनातुरेण वरुणः पथेमं स्वस्तिभिरति दुर्गाणि नेषत्। तमश्विना प्रतिगृह्या स्वस्तये दोषा एनमुषसे सं प्रयच्छात्।। 5।। 2 - 62

卐2.62.1 ये पिशाचा इमां वित्तिमाकूतिं मोहयन्ति नः। तेषां त्वमग्ने नाशय वर्चश्चित्तमथो प्रजाम्।। 1।।

卐2.62.2 नाशयाग्ने पिशाचानां वर्चश्चित्तमथो प्रजाम्। अथाशां मह्यं राधय यथाहं कामये तथा।। 2।।

卐2.62.3 आशां मह्यं राधयत्वेन्द्रियेण यथा मृताम्। त्वमग्ने क्रव्यादः सर्वान् पिशाचाँ अर्चिषा दह।। 3।।

卐2.62.4 प्रति दह यातुधानान् मूरदेवान् विचर्षणे। ये नो दूरस्या द्वेषेणाथाशां मोहयन्ति नः।। 4।।

卐2.62.5 ये नः पशुषु दिप्स्वन्त्या शायां पुरुषेषु च। तांस्त्वं सहस्राक्षेशानः पिशाचाँ अर्चिषादह।। 5।। 2 - 63

卐2.63.1 सहस्वेदं सहमाने अथो देवी सरस्वती। अथेदमश्विना लक्ष्म रोहितं कृणुतं युवम्।। 1।।

卐2.63.2 आसुरस्य मुखस्याग्ने लक्ष्म मुखं नामासि। मेतो ज्यायो भूरित इत् कनायोसो नश्येतः पुरो मा त्वा हिंसिषम्।। 2।।

卐2.63.3 यासां पिता पर्जन्यो भूमिर्माता बभूव। ह्वयामि सर्वा ओषधीर्गोजाताः सम जिन्व ताः।। 3।।

卐2.63.4 इदं सप्तप्रखे त्वं किलासं नाशयात्वचः। निष्कृतिर्नाम वा असि सेदं निष्कृधि भद्रया।। 4।।

卐2.63.5 निष्कृतिर्नाम ते माता निष्कृतिर्नाम ते पिता। उतो त्वमसि निष्कृतिस्सेदं निष्कृधि भद्रया।। 5।। 2 - 64

卐2.64.1 और्ध्व नभसः प्रथमस्सूर्य चेता उशद्भ्यः। चकार कृत्यामासुरः सा नो भवतु भद्रया।। 1।।

卐2.64.2 य इमां कृत्या मुपजह्रुर्ये वा चकमिरेऽक्षितम्। देवानां सर्वेषां स्वसा तान् देवी निर्ऋतिर्हनत्।। 2।।

卐2.64.3 कश्यपस्य प्रतिसरो द्यौष्पिता पृथिवी माता। यथाभि चक्र देवास्तथापि कृणुता पुनः।। 3।।

卐2.64.4 याः कृत्या नीलवतीर्याः कृत्या पाश्यावतीः। कृत्या याश्चकृर्लोहिनीस्ता इतो नाशयामसि।। 4।।

卐2.64.5 यदि वा इदमाजह्रुरिमे भद्रा असन्निति। कृत्यासि कल्याण्यसि सामुं कर्तार मन्विहि।। 5।।

2 - 65

卐1.65.1 वृहत्ते वर्चः प्रथतामुपद्यां मित्रेभ्य एधि सुरभिस्सुवर्चाः। अधि ते राजा वरुणो ब्रवीतु तस्मा उ त्वं हविषा भागधा असः। शतं हेमन्तान् दमया सपत्नान् विशस्त्वा सर्वा अनु गुङ्गवो भवन्तु।। 1।।

卐1.65.2 यस्त्वोत्पिपानं प्रत्युत्पिपाति यस्त्वा सजातो विरिफात्यन्तितः। इन्द्रस्तं योक्त्रे अधि मे युनक्तु तस्मा उ त्वं हविषा भागधा असः। शतं हेमन्तान् दमया सपत्नान् विशस्त्वा सर्वा अनु गुङ्गवो भवन्तु।। 2।।

卐1.65.3 यस्त्वा यच्छन्तं प्रतियंयमीति यस्त्वा जिगीषात् पृतनाः समर्ये। बृहस्पतिस्तमव जङ्घनीतु तस्मा उ त्वं हविषा भागधा असः। शतं हेमन्तान् दमया सपत्नान् विशस्त्वा सर्वा अनु गुङ्गवो भवन्तु।। 3।।

卐1.65.4 ये ते शुल्कमाहरां य उ ते बलिं सोमस्सजाताँ उत संनयाति ते। अग्निस्सयुग्धानधि ते ब्रवीतु तस्मा उ त्वं बविषा भागधा असः। शतं हेमन्तान्दमया सपत्नान् विशस्त्वा सर्वा अनु गुङ्गवो भवन्तु।। 4।।

卐1.65.5 वरिष्यै अधि पुरुः प्रजया सुवीरो अभि प्र युंक्ष्व दमया सपत्नान्। इन्द्रो मरुत्वानधि ते ब्रवीतु तस्मा उ त्वं हविषा भागधा असः। शतं हेमन्तान्दमया सपत्नान् विशस्त्वा सर्वा अनु गुङ्गवो भवन्तु।। 5। (इति पञ्चर्चो नाम द्वितीयकाण्डे त्रयोदशोऽनुवाकः) 2 - 66

卐2.66.1 भगाय राज्ञे प्रथमं जुहोमि विश्वेदेवा उत्तरे मा दयन्ताम्। उशन् पत्नीभ्य उशतीभ्य आभ्य पतिमग्न आवह रातहव्यः।। 1।।

卐2.66.2 पतिं वृणीष्व हविषा गृणाना तमा वहात् सविता तं ते अग्निः। तस्मै नमस्व शतशारदाय भगभक्ता भगवती सुवीरा।। 2।।

卐2.66.3 यमर्यमन् पतिमस्यै दिदेशिथ जने चित्सन्तं तमिहा वहासि। सुमङ्गल्यपतिघ्नी सुशेवा रायस्पोषेण तमिषा सचस्व।। 3।।

卐2.66.4 यं ते पतिमर्यमा जायमानायै धाता च कल्प तमिहा वहासि। अभिवरेण हविषा जुहोमि प्रजानन्नैतु सुमनस्य मानः।। 4।।

卐2.66.5 पतिं ते द्यावापृथिवी अधातां पतिर्मित्रावरुणा वातो अग्निः। सप्त ऋषयो अदितिस्सोम इद्रस्ते त्वा देवाः पति पत्नीं कृण्वन्तु।। 5।। 2 - 67

卐2.67.1 यस्त्वारायः प्रविवेशा जानि जनिवाँ उत। अथो यस्तन्वं पस्पर्श तमितो निर्णयामसि।। 1।।

卐2.67.2 निष्वाराय नयामसि य इमां प्रविवेशिथ। आत्मानमस्या मा हिंसीरन्यत्र चर मेह भूः।। 2।।

卐2.67.3 यदरायेमामुपायसि धेह्यस्यै रयिपोषणम्। प्रजां चिदस्या मा हिंसीरन्यत्र चर मेह भूः।। 3।।

卐2.67.4 यदराये हायसि हनाम वीरुधा त्वा। अथो खनित्रिमैस्त्वाद्दूषेण यथा भगम्।। 4।।

卐2.67.5 यदरायासू यं स्त्रैषू यमावतोक्यम्। यत् पैतृषद्यं दौर्भाग्यं तदितो निर्णयामसि।। 5।। 2 - 68

卐2.68.1 अग्नेर्वो बलवतो बलेन मन्युं वि नयामसि।। 1।।

卐2.68.2 इन्द्रस्य वो बलवतो बलेन मन्युं वि नयामसि।। 2।।

卐2.68.3 सोमस्य वो बलवतो बलेन मन्युं वि नयामसि।। 3।।

卐2.68.4 बृहस्पतेर्वो बलवतो बलेन मन्युं वि नयामसि।। 4।।

卐2.68.5 प्रजापतेर्वो बलवतो बलेन मन्युं वि नयामसि।। 5।।

卐2.68.6 यत्ते सूर्य दिवि देवेषु वर्चस्तस्य नो धेहि त्वमसि प्रचेताः।।

卐2.68.7 अहं त्वदुग्रस्त्विषितस्त्विषीमा निमां वाचं वि साक्षीय।। 6।। 2 - 69

卐2.69.1 वार्तः पुरस्तात् पवसे नभस्वान्। नमस्ते विघ्नते नामधेयं मा नो हिंसीः।। 1।।

卐2.69.2 तपोजा असुरो दक्षिणतः पवसे नभस्वान्। नमस्ते विघ्नते नामधेयं मा नो हिंसीः।। 2।।

卐2.69.3 विश्वायुर्विश्वजनीनः प्रतीच्या दिशः पवसे नभस्वान्। नमस्ते विघ्नते नामधेयं मा नो हिंसीः।। 3।।

卐2.69.4 शिवो वैश्वदेव उदीच्या दिशः पवसे नभस्वान्। नमस्ते विघ्नते नामधेयं मा नो हिंसीः।। 4।।

卐2.69.5 अतिष्ठावान् बार्हस्पत्य ऊर्ध्वाया दिशः पवसे नभस्वान्। नमस्ते विघ्नते नामधेयं मा नो हिंसीः।। 5।। 2 - 70

卐2.70.1 अप द्यौरपातततनदपस्कद्य वधे दहिम्। कण्याण्या यथा स्मृतं समुनः सन्तु विद्युतः।। 1।।

卐2.70.2 यत् पर्जन्य स्तनयति सर्वं सं विजते जगत्। पतिं तद्दत्वियावती पृथिवी प्रति मोदते।। 2।।

卐2.70.3 एष एनाभ्य क्रन्दीद्वृषाश्वो धेनुका इव। अहींस्त्वं विद्युतां जहि मास्माकं पुरुषान् वधीः।। 3।।

卐2.70.4 अभिक्रन्दास्तनयित्नो रवस्फुर्जादशन्या उत। देवा मरुतो मृडत नः पातु नो दुरितादवद्यात्।। 4।।

卐2.70.5 ऋजीते परि णो नमादित्या श्शर्मयच्छत। युयुत् पर्णिनं शरमुतापर्णं रिशादसः।। 5। (इति पञ्चर्चो नाम द्वितीयकाण्डे चतुर्दशोऽनुवाकः) 2 - 71

卐2.71.1 कृतव्यधनि विध्य तं यश्चकार तमिज्जहि। न त्वाम चक्रुषे वयं वधाय सं सिसीमहे।। 1।।

卐2.71.2 यथा ते देव्योषधे प्रतीचीनं फलं कृतम्। एवा त्वं कृत्वने कृत्यां हस्तगृह्य पराणय।। 2।।

卐2.71.3 पुनः कृत्यां कृत्याकृते गोधेवा वटमन्नयत्। सक्तुरिव सक्तु प्रेष्यं प्रतीचीः प्रति दध्म सत्।। 3।।

卐2.71.4 यां ते चक्रुर्वर्तनेषु वार्ताकुषु वृतासु च। मण्डूके कृत्यां यां चक्रुस्तया कृत्याकृतो जहि।। 4।।

卐2.71.5 अग्निरिवैतु प्रतिकूलमनुकूलमिवोदकम्। सुखे रथ इव वर्ततां कृत्या कृत्याकृतं कृता।। 5।। 2 - 72

卐2.72.1 अग्निर्द्युम्नेन सूर्यो ज्योतिषा द्यौर्महिम्नान्तरिक्षं व्यचसा। दिश आशाभिः पृथिवी पयोभिरिदं राष्ट्रं वर्धयन्तु प्रजावत्।। 1।।

卐2.72.2 त्वष्टा रूपेण सविता सवेनाहर्मित्रेण वरुणेन रात्री। पूषा पुष्टैर्भगो अंशेन भक्त्येदं राष्ट्रं वर्धयन्तु प्रजावत्।। 2।।

卐2.72.3 यां विश्वकर्मा निजघान मेथिमन्तरा द्यावापृथिवी उभे। तस्या आहुः क्षत्रियं गर्भमेतं परि माव पत्था मूर्धनि धारयस्व।। 3।।

卐2.72.4 छन्दांस्यस्या अभितो मयुखा स्तोमा आत्मा यजुरस्या पुरीषम्। तस्या आहुः क्षत्रियं निर्मितं परि माव पत्था मूर्धनि धारयस्व।। 4।।

卐2.72.5 पराणुदस्व व्यथयाभिमातिमधस्पदं कृणस्व दुर्धरायतः। मा त्वा दभन् सपत्ना दिप्सन्तस्तव राष्ट्रमुत्तरं द्युम्नमस्तु।। 5।। 2 - 73

卐2.73.1 इदं तन्मित्रावरुणा हविर्वाङ् येनाग्रे देवा अमृतत्वमायन्। येनास्मै क्षत्रमधिधारयौजोऽसपत्नाः प्रदिशस्सन्तवस्मै।। 1।।

卐2.73.2 घृतस्य धारा मित्रावरुणा दुहां वां धेनुरनुपस्फुरन्ती। देवस्सवितोत वायुरग्निर्भूतस्य पतिरिह शर्म यच्छात्।। 2।।

卐2.73.3 शन्नस्तन्मित्रावरुणा गृणीतं दृढावमित्रा बहुधा वि शेराम्। जयतु सेनोप घोष एतु पृथक् सत्त्वानो बहुधा भरन्ताम्।। 3।।

卐2.73.4 हनाम मित्रावरुणावमित्रान् भवाम भद्रे सुकृतस्य लोके। पारयान्नस्सविता देवो अग्निर्जयामेदं हविषा कश्यपस्य।। 4।।

卐2.73.5 वातोयं मित्रावरुणा तदाह विश्वन्तरं निर्मितं कश्यपस्य। अध्वर्यवो मरुतो अस्यासन् तेन देवेभ्यो वरिमाणि चक्रुः।। 5।। 2 - 74

卐2.74.1 अचिक्रदत् स्वपा इह भवदग्ने यजस्व रोदसी ऊरूची। आमुं नय नमसा रातहव्यो युञ्जन्तु सुप्रजसं पञ्च जनाः।। 1।।

卐2.74.2 दूरे चित्सन्तमरुषास इन्द्रमा च्यावयन्तु सख्याय विप्रम्। यद् गायत्रीं बृहतीमर्कमस्मै सौत्रामण्या दधृषन्त देवाः।। 2।।

卐2.74.3 अद्भ्यस्त्वा राजा वरुणो जुहाव सोमस्त्वायं ह्वयतु पर्वतेभ्यः। इन्द्रस्त्वायं ह्वयतु विड्भ्य आभ्यश्श्येनो भूत्वा विश आपतेमाः।। 3।।

卐2.74.4 श्येनं हविर्नय त्वा परस्मादन्य क्षेत्रे अपरुद्धं चरन्तम्। अश्विना पन्थां कृणुतां सुगं ते गर्भं सजाता अभि संविशध्वम्।। 4।।

卐2.74.5 श्येनं हविः कश्यपस्योप शिक्षेन्द्रं वातः प्रहितो दूत आ वह। विषह्य शत्रून् सेनाग्रैर्विशो वृणानोऽव गच्छ कामी।। 5।।

卐2.74.6 यस्ते हवं परितिष्ठात् सजात उत निष्ट्यः। उपाच इन्द्र तां नीत्वाथेममव गमय।। 6।।

卐2.74.7 ह्वयन्तु त्वा पञ्च जनाः पतिर्मित्रा अवर्षत। इन्द्राग्नी विश्वे देवा विशि क्षेममदिधरन्।। 7।। 2 - 75

卐2.75.1 प्रजापतिरनवर्तिस्स प्रजाभिरनवर्तिः। स मानवर्तिरनवर्तिं कृणोतु।। 1।।

卐2.75.2 इन्द्रोऽनवर्तिः स वीर्येणानवर्तिः। स मानवर्तिरनवर्तिं कृणोतु।। 2।।

卐2.75.3 सोमोऽनवर्तिस्स ओषधीभिरनवर्तिः। स मानवर्तिरनवर्तिं कृणोतु।। 3।।

卐2.75.4 आपोऽनवर्तयस्ताः पर्जन्येनानवर्तयः। ता मानवर्तयोऽनवर्तिं कृण्वन्तु।। 4।।

卐2.75.5 देवा अनवर्तयस्तेऽमृतेनानवर्तयः। ते मानवर्तयोऽनवर्तिं कृण्वन्तु।। 5। (इति पञ्चर्चो नाम द्वितीयकाण्डे पञ्चदशोऽनुवाकः) 2 - 76

卐2.76.1 पयो मह्यमोषधयः पयो मे वीरुधो दधन्। अपां पयस्वद्यत् पयस्तन्मे वर्षन्तु वृष्टयः।। 1।।

卐2.76.2 पयो मह्यं पयस्वन्तो हस्तिनो मे पयो दधन्। पयः पतत्रिणो मह्यमैणेया मे पयो दधन्।। 2।।

卐2.76.3 पयस्वन्मे क्षेत्रमस्तु पयस्वदुत धान्यम्। अहं पयस्वान् भूयासं गावो म उत पयस्वतीः।। 3।।

卐2.76.4 पयो मह्यमप्सरसो गन्धर्वा मे पयो दधन्। पयो मे विश्वा भूतानि वातो दधातु मे पयः।। 4।।

卐2.76.5 पयो मह्यं द्यावापृथिवी अन्तरिक्षं पयो दधत्। पयो म इन्द्रश्चाग्निश्च धाता दधातु मे पयः।। 5।। 2 - 77

卐2.77.1 अहं विभर्मि ते मनो अहं चित्तमहं व्रतम्। ममेदपि क्रतावसो मम चित्ते स चावहै।। 1।।

卐2.77.2 आमना अस इह मना अस इह ते रमतां मनः मयि ते रमतां मनः।। 2।।

卐2.77.3 आञ्नस्य मधुघस्य कुष्ठस्य नलदस्य च। वीरोदेकस्य मूलेन मुखे निमन्दनं कृतम्।। 3।।

卐2.77.4 मधु मे अन्तराष्ये मुखे निमन्दनं कृतम्। तत्रो त्वं वि वर्तस्व नराचीव वर्तसि।। 4।।

卐2.77.5 यथा नेमि रथचक्रं समन्तं परिषस्वजे। एवा परिष्वजस्व मा यथा सन्मयि ते मनः।। 5।। 2 - 78

卐2.78.1 यथेदमश्विना तृणं वातो वहति भूम्याः। एवा वयं वहामसि यां वयं कामयामहे।। 1।।

卐2.78.2 उत्वा माता स्थापयतु प्र त्वा नुदतामश्विना। अधा शिशुरिव मातरं मामे वान्वेतु ते मनः।। 2।।

卐2.78.3 यथा क्षीरं च सर्पिश्च मनुष्याणां हृदः प्रियम्। एवाहमस्या नार्या हृदो भूयासमुत्तरः।। 3।।



Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐2.78.4 अग्नेष्ट्वा तपस्तपतु वातस्यध्राजिः मास्पृक्षथा निषदनाय साधव उत्तिष्ठ प्रेह्यग्निवत्ते कृणोमि।। 4।।
卐2.78.5 सूर्यस्य त्वा तपस्तपतु वातस्य ध्राजिः। मास्पृक्षथा निषदनाय साधव उत्तिष्ठ प्रेह्यग्निवत्ते कृणोमि।। 5।। 2 - 79
卐2.79.1 हिरण्यपुष्पी सुभगा कूपश्चायं सुमङ्गलः। तावेनां भद्रया धत्ताममृतावमृते भगे।। 1।।
卐2.79.2 हिरण्यं पृङ्वद्धरितं तत्ते अङ्गेषु रोहतु। तेनेमामश्विना नारीं भगेनाभि षिञ्चतम्।। 2।।
卐2.79.3 यथा कूपमुदहृदस्तृष्यन्तो यन्ति कामिनः। एवा त्वा सर्वे देवरः पतयो यन्तु कामिनः।। 3।।
卐2.79.4 हिरण्याक्षि मधुवर्णे हिरण्य परिचर्तने। अङ्को हिरण्य यस्तव तेनास्यै पतिमा वह।। 4।।
卐2.79.5 यदि वासि तिरोजनं यदि वा नद्यस्तिरः। इयं त्वा मह्यमोषधिरङ्केनेव न्यानयात्।। 5।। 2 - 80
卐2.80.1 पुनः प्राणं पुनरपानमस्मै पुनर्व्यानमुत सोम धेहि। आत्मानं चक्षुरुदते समानस्तमू नु पाहि तमू नु जीव जागृहि।। 1।।
卐2.80.2 त्वष्टा रूपेण सविता सवेनाहर्मित्रेण वरुणेन रात्री। इन्द्रो ज्येष्ठ्येन ब्रह्मणायं बृहस्पतिः पूषास्मै पुनरसुं दधातु।। 2।।
卐2.80.3 य आदित्या वसवो ये च रुद्रा विश्वे देवा अदितिर्या च रात्री। यज्ञो भगस्सविता ये च देवा यमोऽस्मै पुनरसुं दधातु।। 3।।
卐2.80.4 पुनस्ते राजा वरुणो दधातु सोमो राजाऽसुमित्ते पुनर्दात्। इन्द्रो मरुद्भिरश्विना ते भिषज्यतामग्नी रुद्रोऽसुमित्ते पुनर्दात्।। 4।।
卐2.80.5 पुनर्द्यौर्देवी पुनरन्तरिक्षमग्निर्वातः पवमानो भिषज्यतु। ग्राह्याः पाशान्निरुत्याः पाशान्मृत्योः पाशाद्वात्त्वा देवी पुनर्ददातु।। 5। (इति पञ्चर्चो नाम द्वितीयकाण्डे षोडशोऽनुवाकः) 2 - 81
卐2.81.1 इदं चक्षुर्ऋतावरी मा मा हासीत् पुरायुषः। यद्वां तमो यदपिशमप वां तन्निदध्मसि।। 1।।
卐2.81.2 यदन्धियं यदल्गणं योऽर्मो अधिरोहति। अयस्मयस्तदङ्कुशोऽक्षोर्ममप लुम्पतु।। 2।।
卐2.81.3 यमज्याजिमजयं नृचक्षा यं वा श्येनः शकुनिर्यं सुपर्णः। यदाहुश्चक्षुरदितेरनन्तं सोमो नृचक्षा मयि तद्दधातु।। 3।।

卐2.81.4 यथा चक्षुस्सुपर्णस्य यथाश्वस्य यथा शुनः। एवा मे अश्विना चक्षुः कृणुतां पुष्करस्त्रजा।। 4।।
卐2.81.5 यस्यास्सुपर्णः प्रपतन् चक्षुषा चक्षुरादे। तस्या समुद्रजे तव चक्षुषा चक्षुरा ददे।। 5।। 2 - 82
卐2.82.1 अग्निन्ते हरस्सिषक्तु यातुधान स्वाहा।। 1।।
卐2.82.2 वातं ते प्राणस्सिषक्तु यातुधान स्वाहा।। 2।।
卐2.82.3 सूर्यं ते चक्षुस्सिषक्तु यातुधान स्वाहा।। 3।।
卐2.82.4 अन्तरिक्षं ते श्रोत्रं सिषक्तु यातुधान स्वाहा।। 4।।
卐2.82.5 परमां ते परावतं मनस्सिषक्तु यातुधान स्वाहा।। 5।। 2 - 83
卐2.83.1 अपस्ते रसस्सिषक्तु यातुधान स्वाहा।। 1।।
卐2.83.2 ओषधीस्ते लोमानि सिषञ्चन्तु यातुधान स्वाहा।। 2।।
卐2.83.3 पृथिवीं ते शरीरं सिषक्तु यातुधान स्वाहा।। 3।।
卐2.83.4 समुद्रं ते वाक् सिषक्तु यातुधान स्वाहा।। 4।।
卐2.83.5 निर्ऋत्यास्त्वासनि जुहोमि यातुधान स्वाहा।। 5।। 2 - 84
卐2.84.1 इदं ते शिरो भिनद्मि यातुधान स्वाहा। इदं ते मस्तिष्कं नि तृणद्मि भूम्याम्।। 1।।
卐2.84.2 इदं ते हनू भिनद्मि यातुधान स्वाहा। इदं ते जिह्वा नि तृणद्मि भूम्याम्।। 2।।
卐2.84.3 इदं ते ग्रीवा भिनद्मि यातुधान स्वाहा। इदं ते स्कन्धा नि तृणद्मि भूम्याम्।। 3।।
卐2.84.4 इदं ते अंसौ भिनद्मि यातुधान स्वाहा। इदं ते बाहू नि तृणद्मि भूम्याम्।। 4।।
卐2.84.5 इदं ते हृदयं भिनद्मि यातुधान स्वाहा। इदं ते क्लोमानं नि तृणद्मि भूम्याम्।। 5।।
卐2.84.6 इदं ते पृष्ठी भिनद्मि यातुधान स्वाहा। इदं ते पर्शू नि तृणद्मि भूम्याम्।। 6।।
卐2.84.7 इदं ते श्रोणी भिनद्मि यातुधान स्वाहा। इदं ते वस्त्रं नि तृणद्मि भूम्याम्।। 7।।
卐2.84.8 इदं ते ऊरू भिनद्मि यातुधान स्वाहा। इदं ते जङ्घे नि तृणद्मि भूम्याम्।। 8।।
卐2.84.9 इदं ते कुल्फौ भिनद्मि यातुधान स्वाहा। इदं ते पादौ नि तृणद्मि भूम्याम्।। 9।।
卐2.84.10 इदं ते त्वचं भिनद्मि यातुधान स्वाहा। इदं ते प्राणान्नि तृणद्मि भूम्याम्।। 10।।
卐2.84.11 इदं ते परूंषि भिनद्मि यातुधान स्वाहा। इदं ते मज्ज्ञो नि तृणद्मि भूम्याम्।। 11।। 2 - 85

卐2.85.1 नर्दमोद लवुन्तक जिष्णो ह्यपराजितः। अमुं भ्रूणान्यर्पय स्वयं पाशं न्यायति।। 1।।
卐2.85.2 असुरैतु सक्रतुरात्मा प्राणो अथो बलम्। स नो दधातु भद्रयाग्निर्विश्वाद्वसुमान् स्वस्तये।। 2।।
卐2.85.3 दक्षिणामा दक्षिणतो दक्षिणा पातु सव्यतः। पश्चादनु व्याधात् पातु पुरस्तात् पातु दक्षिणा।। 3।।
卐2.85.4 शतमापो दिव्या मित्रस्य च दक्षिणाः। धाता सविता दुद्रस्ते नो मुञ्च त्वं हसः।। 4।।
卐2.85.5 शतं पाशा वरुणस्य ब्रह्मणस्पतेरु शतम्। मर्तात् पाशान्नो विष्य शतात् पाशेभ्यो वयं त्वाम्।। 5। (इति पञ्चर्चो नाम द्वितीयकाण्डे सप्तदशोऽनुवाकः) 2 - 86
卐2.86.1 प्राचीं दिशमास्थामग्निर्मावत्वोजसे बलाय दिशां प्रियो भूयासम्। अनमित्रा मे दिशो भवन्तु घृतप्रतीकाः।। 1।।
卐2.86.2 दक्षिणां दिशमास्थामिन्द्रो मावत्वोजसे बलाय दिशां प्रियो भूयासम्। अनमित्रा मे दिशो भवन्तु घृतप्रतीकाः।। 2।।
卐2.86.3 प्रतीचीं दिशमास्थां वरुणो मावत्वोजसे बलाय दिशां प्रियो भूयासम्। अनमित्रा मे दिशो भवन्तु घृतप्रतीकाः।। 3।।
卐2.86.4 उदीचीं दिशमास्थां सोमो मावत्वोजसे बलाय दिशां प्रियो भूयासम्। अनमित्रा मे दिशो भवन्तु घृतप्रतीकाः।। 4।।
卐2.86.5 ध्रुवां दिशमास्थां विष्णुर्मावत्वोजसे बलाय दिशां प्रियो भूयासम्। अनमित्रा मे दिशो भवन्तु घृतप्रतीकाः।। 5।।
卐2.86.6 ऊर्ध्वां दिशमास्थां बृहस्पतिर्मावत्वोजसे बलाय दिशां प्रियो भूयासम्। अनमित्रा मे दिशो भवन्तु घृतप्रतीकाः।। 6।। 2 - 87
卐2.87.1 मनायी तन्तुं प्रथमं पश्चेदन्या अतन्वत। तन्नारीः प्र ब्रवीमि वः साध्वीर्वस्सन्तुर्वरीः।। 1।।
卐2.87.2 साधुर्वस्तन्तुर्भवतु साधुरोतुरथो वृता। अथो होर्वरीर्यूयं प्रातर्वोढेव धावत।। 2।।
卐2.87.3 खल्गाला इव पत्वरीरपामुग्रमिवायनम्। पतन्तु पत्वरीरिवोर्वरीस्साधुना पथा।। 3।।
卐2.87.4 अपाच्यौ तोतुद्येते तोदेनाश्वतराविव। प्र स्तौममुर्वरीणां शसयानामस्ताविषम्।। 4।।
卐2.87.5 नारी पञ्चमयूखं सूत्रवत् कृणुतं वसु। अरिष्टो अस्यवस्ता प्रेन्द्र वास उतौरिव।। 5।। 2 - 88

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐2.88.1 शासइत्था महाँ अस्यमित्रघातो अद्भुतः। न यस्य हन्यते सखा न जीयते कदा चन।। 1।।
卐2.88.2 वि रक्षो विमृधो जहि वि वृत्रस्य हनू रुज। वि मन्युमिन्द्र वृत्रहन्नमित्रस्याभिदासति।। 2।।
卐2.88.3 वि न इन्द्र वि मृधो जहि नीचा यच्छ पृतन्यतः। अधमं गमया तमो यो अस्माँ अभिदासति।। 3।।
卐2.88.4 स्वस्तिदा विशां पतिर्वृत्रहा विमृधो वशी। वृषेन्द्रः पुर एतु नः सोमपा अभयङ्करः।। 4।।
卐2.88.5 अपेन्द्रो द्विषतो मनोऽप जिज्यासतो बधम्। वि महच्छर्म यच्छ वरीयो यावया बधम्।। 5।।

2 - 89

卐2.89.1 अयं योतितरो मणिस्तेनाति तर दुःश्य सः। सपत्नां द्विषतो मणे प्र णुदस्व पृतन्यतः।। 1।।
卐2.89.2 प्र णुदस्व प्र सहस्व सपत्नां द्विषतो मणे। तराभिमातिं दुःश्यसां वर्चो भङ्धि पृतन्यताम्।। 2।।
卐2.89.3 वर्चो जहि मन्युं जह्याकूतिं द्विषतां मणे। देवो योतितरो मणि स्तेनाति तर धूर्वतः।। 3।।
卐2.89.4 ये धूर्वन्ति ये द्रुह्यन्ति ये द्विषन्ति पृतन्यतः। सर्वां सपत्नांस्ते मणिर्निर्मन्युं द्विषतस्करत्।। 4।।
卐2.89.5 तव चित्ते तव व्रते तवैवाधस्पदं चरान्। देवो योतितरो मणिस्तेनाति तर दुःश्यसः।। 5।।

2 - 90

卐2.90.1 आते मनश्चक्षुसष्यमा ते हृदयं ददे। पदोष्टे पद्यमा ददे यथा तिष्ठासि मे वशे।। 1।।
卐2.90.2 वाञ्छ मे पादौ तन्वं वाञ्छाख्यौ वाञ्छ सक्थ्यौ। अक्ष्यौ वृषण्यन्त्याः केशा ओष्ठौ मान्ते कामेन शुष्यताम्।। 2।।
卐2.90.3 मयि त्वा दोषणि श्लिषं कृणोमि हृदय श्लिषम्। यथा मम क्रतावसो ममासश्चेदसीदपि।। 3।।
卐2.90.4 यासां नाभिरारेहणं हृदि संवननं कृतम्। गावो घृतस्य मातरोऽमुं सं वानयन्तु मे।। 4।।
卐2.90.5 मह्यं त्वा द्यावापृथिवी मह्यं देवी सरस्वती। मह्यं त्वेन्द्रश्चाग्निश्चाहोरात्रे नि यच्छताम्।। 5।।

2 - 91

卐2.91.1 तूलि मूल्यर्जुनि। पुनर्वो यन्तु यातवः पुनर्जूतिः किमीदिनीः। यस्य स्थ तमत्त यो वः प्राहैत्तमत्त स्वा मांसान्यत्त।। 1।।

卐2.91.2 अच्छवो जिघत्सवः। पुनर्वो यन्तु यातवः पुनर्जूतिः किमीदिनीः। यस्य स्थ तमत्त यो वः प्राहैत्तमत्त स्वा मांसान्यत्त।। 2।।

卐2.91.3 अविष्यवस्पास्यवः पुनर्वो यन्तु यातवः पुनर्जूतिः किमीदिनीः। यस्य स्थ तमत्त यो वः प्राहैत्तमत्त स्वा मांसान्यत्त।। 3।।

卐2.91.4 स्फातिहारी रसहारीः पुनर्वो यन्तु यातवः पुनर्जूतिः किमीदिनीः। यस्य स्थ तमत्त यो वः प्राहैत्तमत्त स्वा मांसान्यत्त।। 4।।

卐2.91.5 वातजूते मनोजवः पुनर्वो यन्तु यातवः पुनर्जूतिः किमीदिनीः। यस्य स्थ तमत्त यो वः प्राहैत्तमत्त स्वा मांसान्यत्त।। 5। (इति पञ्चर्चो नाम द्वितीयकाण्डे अष्टादशोऽनुवाकः) इत्यथर्ववेदे पैप्पलादसंहितायां पञ्चर्चो नाम द्वितीयकाण्डः समाप्तः

## ॐ अथ तृतीयः काण्डः

3 - 1

卐3.1.1 आ त्वा गन् राष्ट्रं सह वर्चसोदिहि प्राङ् विशाम्पतिरेकराट् त्वं वि राज। सर्वास्त्वा राजन्प्रदिशो ह्वयन्तूपसद्यो नमस्यो भवेह।। 1।।

卐3.1.2 त्वां विशो वृणतां रज्याय त्वा मिमाः प्रदीशः पञ्चदेवीः। वर्ष्मन् राष्ट्रस्य ककुदि श्रयस्वात वसूनि वि भजास्युग्रः।। 2।।

卐3.1.3 अच्छ त्वा यन्तु हविनस्सजाता अग्निर्दूतो अजिरस्सन्तु रातिः। जायाः पुत्रास्सुमनसो भवन्तु बहुं बलिं प्रति पश्यासा ग्रः।। 3।।

卐3.1.4 अश्विना त्वाग्रे मित्रावरुणोभा विश्वे देवा मरुतस्त्वा ह्वयन्तु। सजातानां मध्यमेष्ठेयस्यास्त्वे क्षेत्रे सवितेव वि राज।। 4।।

卐3.1.5 आ प्र द्रव परमस्याः परापवतश्शिवे ते द्यावापृथिवी अभूताम्। तदयं राजा वरुणस्तथाह स त्वायमह्वत् स इहेदमेहि।। 5।।

卐3.1.6 इन्द्रेन्द्रं मनुष्यः परेहि सं यज्ञियास्त्वा वरुणेन सं विदानः। स त्वायमह्वत् स्वे सधस्थे स देवान् यक्षत् स उ कल्पयाद्विशः।। 6।।

卐3.1.7 पथ्या रेवतीर्बहुधा विरुपास्सर्वा सङ्गत्य वरिवस्ते अक्रन्। तास्त्वा सर्वास्संविदाना ह्वयन्तु दशमीमुग्रस्सुमना वशेह।। 7।।

卐3.1.8 यद्जीरेण हविषाव त्वा गमयामसि। अत्रात इन्द्रः केवलिर्विशो बलि हृतस्करत्।। 8।। 3 - 2

卐3.2.1 हरिणस्य रघुस्यदोऽधि शीर्षणि भेषजम्। सुक्षेत्रियं विषाणयाद् विषूचीनमनानशसत्।। 1।।

卐3.2.2 अनु त्वा हरिणो वृषा पद्भिश्चतुर्भिरक्रमीत्। विषाणे वि ष्य गुष्पितं यत् किञ्च क्षेत्रियं हृदि।। 2।।

卐3.2.3 अदो यदवरो च ते चतुष्पक्षमिव च्छदि। तेन ते सर्वं क्षेत्रियमङ्गेभ्यो नाशयामसि।। 3।।

卐3.2.4 उदगातां भगवती विचृतौ नाम तारके। वि क्षेत्रियस्य मुञ्चतामधमं पाशमुत्तमम्।। 4।।

卐3.2.5 यदासुतेः क्रियमाणायाः क्षेत्रियं त्वा व्यानशे। वेदाहं तस्य भेषजं क्षेत्रियं नाशयामि ते।। 5।।

卐3.2.6 अपवासे नक्षत्राणामपवास उतोषसाम्। अपास्मत् सर्वमामयदप क्षेत्रियमक्रमीत्।। 6।। 3 - 3

卐3.3.1 पुमान्पुंसः परिजातोऽश्वत्थः खदिरादधि। स हन्तु शत्रून् मामकान् यांश्चाहं द्वेष्मि ये च माम्।।

卐3.3.2 तानश्वत्थ निः शृणीहि शत्रून् वै बाध दोधतः। इन्द्रेण वृत्रघ्ना मेद्यग्निना वरुणेन च।। 2।।

卐3.3.3 यथाश्वत्थ निःश्रृणासि पूर्वान् जातानुतापरान्। एवा पृतन्यतस्त्वमभि तिष्ठ सहस्व च।। 3।।

卐3.3.4 यथाश्वत्थ विभिनत्स्यन्तर्महत्यर्णवे। एवा मे शत्रोश्चित्तानि विष्वग्भिन्धि सहस्व च।। 4।।

卐3.3.5 य स्सहमानश्चरसि सासहान इवर्षभः। तेनाश्वत्थ त्वया वयं सपत्नान् सहिषीमहि।। 5।।

卐3.3.6 सिनात्वेनान्निर्ऋतिर्मृत्योः पाशैरमोक्यैः। अश्वत्थ शत्रून् मामकान् यांश्चाहं द्वेष्मि ये च माम्।। 6।।

卐3.3.7 अधराञ्चः प्रप्लवन्तां छिन्ना नौरिव बन्धनात्। ननिर्बाध प्रणुत्तानां पुनरस्ति निवर्त्तनम्।। 7।।

卐3.3.8 प्रैणान्नुदामि मनसा प्र चित्तेन प्र ब्रह्मणा। प्रैणान् वृक्षस्य शाखयाश्वत्थस्य नुदामसि।। 8।। 3 - 4

卐3.4.1 यदद स्संप्रयतीरहावनदता ह ते। तस्मादा नद्यो नाम स्थ ता वो नामानि सिन्धवः।। 1।।

卐3.4.2 यत्प्रेषिता वरुणेना च्छीभं समवल्गत। तदाप्नोदिन्द्रो वो यतीस्तस्मादापो अनु ष्ठन।। 2।।

卐3.4.3 अपकामं स्यन्दमाना अवीवरत वो हि कम्। इन्द्रो व श्शक्तिभिर्देवीस्तस्माद्वार्णाम वो हि कम्।। 3।।

卐3.4.4 एको वो देव उपातिष्ठत् स्यन्दमाना उपेत्य। उदानिषुर्महीरिति तस्मादुदकमुच्यध्वे।। 4।।

卐3.4.5 आपो देवीर्घृतमिदाप आहुरग्नीसोमौ बिभ्रत्याप इत्ताः। तीव्रो रसो मधुपृचामरङ्गम आ मा प्राणेन सह वर्चसागन्।। 5।।

卐3.4.6 आदित् पश्याम्युत वा शृणोम्या मा घोषो गच्छति वाङ्मासाम्। मेने भेजानो अमृतस्य तर्हि हिरण्यवर्णा अतृपं यदापः।। 6।। 3 - 5

卐3.5.1 अग्निर्नो दूतः प्रत्येतु शत्रून् प्रति दहन्नभिशस्तिमरातिम्। स चित्तानि मोहयतु परेषां निहस्तांश्च कृणवज्जातवेदाः।। 1।।

卐3.5.2 अयमग्निरमूमुहद् यानि चित्तानि वो हृदि। वि वो धमात्योकसः प्र वो धमाति सर्वतः।। 2।।

卐3.5.3 इन्द्र चित्तानि मोहयार्वाङ्गा कूत्या अधि। अग्नेर्वातस्य ध्राज्या तान् विषूचो विनाशय।। 3।।

卐3.5.4 व्येषामाकूतय इताथो चित्तानि मुह्यत। अथो यदद्यैषां हृदि तदेषां परिनिर्जहि।। 4।।

卐3.5.5 अमीषां चित्तानि प्रति मोहयन्ती गृहाणाङ्गा न्यप्वे परेहि। अभि प्रेहि निर्दह हृत्सु शोकैर्ग्राह्या मित्रांस्तमसा विध्य शत्रून्।। 5।।

卐3.5.6 असौ या सेना मरुतः परेषामस्मान्यभ्यैत्योजसा स्पर्धमाना। तां गुहत तमसापव्रतेन यथैषामन्यो अन्यं न जानात्।। 6।।

卐3.5.7 (इति षडर्चो नाम तृतीयकाण्डे प्रथमोऽनुवाकः) 3 - 6

卐3.6.1 अग्निर्नो विद्वान् प्रत्येतु शत्रून् प्रतिदहन्नभिशस्तिमरातिम्। स सेनां मोहयतु परेषां निहस्तांश्च कृणवज्जातवेदाः।।

卐3.6.2 यूयमुग्रा मरुत ईदृशे स्थाभि प्रेत मृडत सहध्वम्। अमीमृडन् वसवो नाथितेभ्योऽग्निर्ह्येषां विद्वान् प्रत्येतु शत्रून्।। 2।।

卐3.6.3 अमित्रसेनां मघवन्नस्माञ्छत्रूयतामभि। युवं तानिन्द्रवृत्रहन्नग्निश्च दहतं प्रति।। 3।।

卐3.6.4 प्रसूत इन्द्रः प्रवता हरिभ्यां प्र ते वज्रः प्रमृणन्नेतु शत्रून्। जहि प्रतीचो अनूचः पराचो विश्वं हिरिष्टं कृणुहि सत्यमेषाम्।। 4।।

卐3.6.5 सेनामोहनं कृण्विन्द्रामित्रेभ्यस्त्वम्। अग्नेर्वातस्य ध्राज्या तान् विषूचो वि नाशय।। 5।।

卐3.6.6 इन्द्रस्सेनां मोहयतु मरुतो घ्नन्त्वोजसा। चक्षूंष्यग्निरा दत्तां पुनरेतु पराजिताम्।। 6।। 3 - 7

卐3.7.1 एकशतं विष्कन्धानि विष्ठिता पृथिवीमनु। तेषान्तु सर्वेषामिदमस्तु विष्कन्धदूषणम्।। 1। कर्षफस्य विषफस्य द्योष्पिता पृथिवी माता। यताभिचक्र देवास्तथापि कृणुता पुनः।। 2। अश्लेष्माणो अधारयन् तथा तन्मनुनाकृतम्। कृणोमि वध्रि विष्कन्धं मुष्काबर्हो गवामिव।। 3। सूत्रे पिशङ्गे खृगलं यदा बध्नन्ति वेधसः। श्रवस्यं शुष्मं काबवं वध्रिं कृण्वन्तु बन्धुरः।। 4। येन श्रवस्यो चरथ देवा इवासुरमायया। शुनां कपिरिव दूषणो बन्धुरा काबवस्य च।। 5। दुष्टे हि त्वा भनत्स्यामि दूषयित्वा काबवम्। उदाशवो रथा इव शपथेभिस्सरिष्यथ।। 6।। 3 - 8

卐3.8.1 यमस्य लोकादध्या बभूविथ प्रमदा मर्तान् प्र युनक्षुधीरः। एकाकिना सरथं यासि विद्वान् स्वप्नमिमानो असुरस्य योनौ।। 1।।

卐3.8.2 बम्बस्त्वाग्रे विश्ववयावपश्यत् पुरा रात्र्या जनितोरेके अह्नि। ततस्स्वप्नेदमध्या बभूविथ विष्वङ्गरूपमपगूहमानः।। 2।।

卐3.8.3 वृहन् ग्रावासुरेभ्योऽधिदेवानुपाववर्त महिमानमिच्छन्। तस्मै स्वप्नाय दधुराधिपत्यं त्रयस्त्रिंशासः स्वरानशानाः।। 3।।

卐3.8.4 नैतां विदुः पितरो नोत देवा यैषाजल्पिश्चरत्यन्तरेदम्। त्रिते स्वप्नमदधुराप्त्ये नर आदित्यासो वरुणेनानुशिष्टाः।। 4।।

卐3.8.5 व्यस्य क्रूरमभि यन्तु दुष्कृतो स्वप्नेन सुकृतो पुण्यमायुः। स्वर्मदसि परमेण बन्धुना तप्यमानस्य मनसोऽधि जज्ञिषे।। 5।।

卐3.8.6 विद्मते सर्वाः परिजाः पुरस्ताद् विद्म स्वप्न यो अधिपा इहो ते। यशस्विनो नो यशसेह पाह्या राद्विषेभिरप याहि दूरम्।। 6।। 3 - 9

卐3.9.1 अम्बाः सुमुखाः सृजत पद्वत् सृजत सत्यज्ञेयम्। सृजाम्यहं दूतान्यस्मै विषाय हन्तवे। वारुग्रमरसं विषमाहेयमसं विषं निर्विषम्।। 1।।

卐3.9.2 इन्द्रमहमिह हुवे सोमपामुभयाविनमस्मै विषाय हन्तवे। वारुग्रमरसं विषमाहेयमसं विषं निर्विषम्।। 2।।

卐3.9.3 वरुणमहमिह हुव उग्रं राजन्यैस्सहास्मै विषाय हन्तवे। वारुग्रमरसं विषमाहेयमसं विषं निर्विषम्।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐3.9.4 अदितिमहमिह हुवे सूरपुत्रां कनीनिकामस्मै विषाय हन्तवे। वारुग्रमरसं विषमाहेयमसं विषं निर्विषम्।। 4।।

卐3.9.5 बृहस्पतिमहमिह हुवे यो देवानां पुरोहितोऽस्मै विषाय हन्तवे। वारुग्रमरसं विषमाहेयमसं विषं निर्विषम्।। 5।।

卐3.9.6 आणाश्वाणाश्वण्डामर्का अस्मै विषाय हन्तवे। वारुग्रमरसं विषमाहेयमसं विषं निर्विषम्।। 6।।

卐3.9.7 नवानां नवतीनां विषस्य रोपुषीणाम्। सर्वासामग्रभं नाम वीतापेतारसं विषम्।। 7।। 3 - 10

卐3.10.1 मृत्युरेको यम एकश्शर्व एकश्शरुर्भवः। ते नः कृण्वन्तु भेषजं देवसेनाभ्यस्परि।। 1।।

卐3.10.2 पुनर्नो यमः पितृभिर्ददातु पुनर्मित्रावरुणा वातो अग्निः। अघमारो अघशंसः पुनर्दात् पुनर्नो देवी निर्ऋतिर्ददातु।। 2।।

卐3.10.3 या देवैः प्रहितेषुः पतात्तपसे वा महसे वावसृष्टा। सोमस्त्वामस्मद् यावयतु विद्वान् पितरो वा देवहूता नृचक्षसः।। 3।।

卐3.10.4 सहस्राक्षो अमर्त्यः पुरुरूप इहावतु। सख्ये त उग्र मा रिषं सहगुस्सहपूरुषः।। 4।।

卐3.10.5 यस्ते मन्युः सहस्राक्ष विषेण परिषिच्यते। तेन त्वमस्मभ्यं मृड शिवो नश्शम्भुराचर।। 5।।

卐3.10.6 मा ते मन्यौ सहस्राक्ष भामे भून्मामकं जगत्। यो नो द्वेष्टि तं गच्छ यं द्विष्मस्तं जहि।। 6।

(इति षडर्चो नाम तृतीयकाण्डे द्विदीयोऽनुवाकः) 3 - 11

卐3.11.1 ये स्थास्यां प्रतीच्यां दिशि हेतयो नाम देवास्तेषां वो अग्निरिषवः। ते नो मृडत ते नोऽधि ब्रूत तेभ्यो नमस्तेभ्यस्स्वाहा।। 1।।

卐3.11.2 ये स्थास्यां दक्षिणायां दिश्यविष्यवो नाम देवास्तेषां वो आप इषवः। ते नो मृडत ते नोऽधि ब्रूत तेभ्यो नमस्तेभ्यस्स्वाहा।। 2।।

卐3.11.3 ये स्थास्यां प्रतीच्यां दिशि विराजो नाम देवास्तेषां वः काम इषवः। ते नो मृडत ते नोऽधि ब्रूत तेभ्यो नमस्तेभ्यस्स्वाहा।। 3।।

卐3.11.4 ये स्थास्यामुदीच्यां दिशि प्रविध्यन्तो नाम देवास्तेषां वो वात इषवः। ते नो मृडत ते नोऽधि ब्रूत तेभ्यो नमस्तेभ्यस्स्वाहा।। 4।।

卐3.11.5 ये स्थास्यां ध्रुवायां दिशि विलिम्पा नाम देवास्तेषां वोऽन्नमिषवः। ते नो मृडत ते नोऽधि ब्रूत तेभ्यो नमस्तेभ्यस्स्वाहा।। 5।।

卐3.11.6 ये स्थास्यामूर्ध्वायां दिश्यविष्यन्तो नाम देवास्तेषां वो वर्षमिषवः। ते नो मृडत ते नोऽधि ब्रूत तेभ्यो नमस्तेभ्यस्स्वाहा।। 6।। 3 - 12

卐3.12.1 यो अप्स्वन्तर्यो वृत्रे अन्तर्यः पुरुषे यो अश्मनि। यो आविवेशौषधीर्यो वनस्पतींस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत्। 1।।

卐3.12.2 यः सोमे अन्तर्य उ गोष्वन्तर्य आविष्टो वयसि यो मृगेषु। य आ विवेश द्विपदो यश्चतुस्पदस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत्।। 2।।

卐3.12.3 य इन्द्रेण सरथं संबभूव वैश्वानर उत विश्वदाव्यः। यं जोहवीमि पृतनासु सासहिं तेभ्यो अग्निभ्यो हुतमस्त्वेतत्।। 3।।

卐3.12.4 यो देवो विश्वाद् यमु काममाहुर्यं दातारं प्रति गृह्णन्तमाहुः। यो धीरस्सक्रः परिभूरदाभ्यस्तेभ्यो अग्भ्यो हुतमस्त्वेतत्।। 4।।

卐3.12.5 यं त्वा होतारं मनसाभि संविदुस्त्रयोदश भौवनाः पञ्चमानवाः। वर्चोधसे यशसे सूनृतावते तेभ्यो अग्निभ्यो हुतमस्त्वेतत्।। 5।।

卐3.12.6 उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे। वैश्वानरस्य ज्येष्ठेभ्यस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत्।। 6।।

卐3.12.7 दिवं पृथिवी मन्वन्तरिक्षं ये विद्युतमनुसं चरन्ति। यो दिक्ष्वन्तर्य उ वाते अन्तस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत्।। 7।।

卐3.12.8 बृहस्पतिं वरुणं मित्रमग्निं हिरण्यपाणिं सवितारमिन्द्रम्। विश्वान् देवानङ्गिरसो हवामहे इमं क्रव्यादं समयन्त्वग्निम्।। 8।।

卐3.12.9 शान्तोऽग्निः क्रव्यादथो पुरुषरेषणः। अथो यो विश्वदाव्यस्तं क्रव्यादमशी शमम्।। 9।। 3 - 13

卐3.13.1 आयमगन् पर्णमणिर्बली बलेन प्रमृणं सपत्नान्। ओजो देवानां पय ओषधीनां मयि राष्ट्रं जिन्वत्व प्रयुच्छन्।। 1

卐3.13.2 मयि राष्ट्रं पर्णमणे मयि धारया श्रियम्। अहं राष्ट्रस्याभिवर्गे युजा भूयासमुत्तरः।। 2।।

卐3.13.3 यं निदधुर्वनस्पतौ वाजं देवाः प्रियं निधिम्। तं म इन्द्रस्सहायुषा मणिं दधातु भर्तवे।। 3।।

卐3.13.4 सोमस्य पर्ण सह उग्रमागन्निन्द्रेण दत्तो वरुणेन सख्या। तमहं बिभर्मि बहु रोचमानो दीर्घायुत्वाय शतशारदाय।। 4।।

卐3.13.5 आ मा रुक्षत् पर्णमणिर्मह्या अरिष्टता तये। यथाहमुत्तरोसानि मानुष्या अधि सम्पदः।। 5।।

卐3.13.6 पुनर्मैत्विन्द्रियं पुनरात्मा द्रविणं ब्राह्मणं च। पुनरग्नयो धिष्ण्यासो यथास्थाम कल्पयन्तामिहैव।। 6।।

卐3.13.7 ये तक्षाणो रथकाराः कर्मारा ये मनीषिणः। सर्वांस्तान् पर्णरन्धयोपस्तिं कृणु मे जनम्।। 7।।

卐3.13.8 उपस्तिरस्तु वैश्य उत शूद्र उतार्यः। सर्वांस्तान् पर्ण रन्धयोपस्तिं कृणु मे जनम्।। 8।। 3 - 14

卐3.14.1 येन वेहद् बभूविथ नाशयामसि तद्वयम्। इदं तदन्यत्रत्वदप दूरे निदध्मसि।। 1।।

卐3.14.2 आते गर्भो योनिमेतु पुमान् वाण इवेषुधिम्। आ वीरोऽत्र जायतां पुत्रस्ते दशमस्यः।। 2।।

卐3.14.3 पुमांसं पुत्रं जनय तं पुमाननु जायताम्। भवासि पुत्राणां माता जातानां जनयासि च।। 3।।

卐3.14.4 यानि भद्राणि बीजान्यृषभा जनयन्ति च। तैस्त्वं पुत्रं विन्दस्व सा प्रसूर्धेनुका भव।। 4।।

卐3.14.5 कृणोमि ते प्राजापत्यमा गर्भो योनिमेतु ते। विन्दस्व पुत्रं नारी यस्तुभ्यं समसच्छमु तस्मै त्वं भवा।। 5।।

卐3.14.6 यासां पिता पर्जन्यो भूमिर्माता बभूव। तास्त्वा पुत्रो विद्याय देवीः प्रावन्तोषधीः।। 6।।

卐3.14.7 यस्ते योनिमुदिङ्ग्यादृषभो रेतसा सह। स त आ सिञ्चतु प्रजा दीर्घायुं शतशारदाम्।। 7।। 3 - 15

卐3.15.1 यां त्वा वातो वरयदार्द्रनाभा महर्षभः। तस्यास्ते विश्वधायसो विषदूषणमुद्धरे।। 1।।

卐3.15.2 यां त्वा वराहो अखनदेकस्मिन्नधि पुष्करे। तस्यास्ते विश्वधायसो विषदूषणमुद्धरे।। 2।।

卐3.15.3 यां त्वादितिरवपद् बीजवापमधिपुष्करे। तस्यास्ते विश्वधायसो विषदूषणमुद्धरे।। 3।।

卐3.15.4 यस्याः कुलायं सलिले अन्तर्महत्यर्णवे। तस्यास्ते विश्वधायसो विषदूषणमुद्धरे।। 4।।

卐3.15.5 उत्ते भर उत्तमाया अधमायास्त उद्धरे। उन्मध्यमान्मध्यमे तद्विषदूषणमुद्धरे।। 5।।

Sri Ganapati Sachchidananda Avadhoota Dattapeetham • Mysore •

卐3.15.6 अग्रभं समग्रभमुभावन्तौ समग्रभम्। दिवश्च पृथिव्याश्च विषदूषणमुद्धरे।। 6। (इति चतुर्थो नाम तृतीयकाण्डे तृतीयोऽनुवाकः) 3 - 16

卐3.16.1 पैद्वोसि पृतनायुस्स्वाहा।। 1।।

卐3.16.2 सोममहिंसीस्सोम हिंसीतोसि स्वाहा।। 2।।

卐3.16.3 ब्राह्मणमहिंसीर्ब्रह्महिंसीतोसि स्वाहा।। 3।।

卐3.16.4 नाभूदहिर्भ्रुणमारदहिरद्रिमरसावधीत्।। 4।।

卐3.16.5 विषस्य ब्रह्मणामासीत्ततो जीवन्नमोक्षसे।। 5।।

卐3.16.6 पुनर्ददामि ते विषं पूर्वपद्यमिदारिथ।। 6।।

卐3.16.7 मां ददस्वान् मन्यसे मया दष्टो न मोक्षसे।। 7।। 3 - 17

卐3.17.1 एकशतं भेषजानि तेषां मातास्योषधे। समुद्रमव गच्छसि पृथिव्यामधि निष्ठिता।। 1।।

卐3.17.2 तस्यां वेदाधि भेषजं दशशीर्षो दसजिह्वः। यस्ते प्रथम आददे शं श्वावन्त ओषधे यमदाद् वीरयुग्भिषक्।। 2।।

卐3.17.3 पुनश्चक्षुः पुनः प्राणं पुनरायुर्न आगमत्। निष्वाकरं निष्कृत्या निष्वा निष्कृत्याकरम्।। 3।।

卐3.17.4 मुञ्चामि त्वा शपथ्यादथो वरुण्यादुत। अथो यमस्य पड्वीषाद्विश्वस्माद्देव किल्बिषात्।। 4।।

卐3.17.5 सं ते शीर्ष्णः कपालानि हृदयस्य च यो विदुः। उद्यन् सूर्य आदित्यो अङ्गद्योतमनीनशत्।। 5।।

卐3.17.6 हिमवतः प्र स्रवथ सिन्धौ समह सङ्गमः। ता आप स्सर्वास्सङ्गत्य चक्षुः प्राणञ्च धत्त नः।। 6।। 3 - 18

卐3.18.1 हस्तिवर्चसं प्रथतां वृहद्यशो आदित्या यत्तन्व स्संबभूव। तत्सर्वे सवितुर्मह्यमेतद्विश्वे देवासो अदितिस्सजोषाः।। 1।।

卐3.18.2 मित्रश्च वरुणश्चेन्द्रो रुद्रश्च वेधतु। देवासो विश्वधायसस्तेन माञ्जन्तु वर्चसा।। 2।।

卐3.18.3 यत्ते वर्चो जातवेदो बृहद्भवत्याहुते। तेन मामद्य वर्चसा अग्ने वर्चस्विनं कृधि।। 3।।

卐3.18.4 येन हस्ती वर्चसा सं बभूव येन राजा मनुष्येष्वन्तः। येन देवा ज्योतिषाद्यामुदायन् तेन माग्ने वर्चसा सं सृजेह।। 4।।

卐3.18.5 यावद्वर्चसूर्यस्यासुरस्य च हस्तिनः। तावन्मे अश्विना वर्चः कृणुतं पुष्कर स्रजा।। 5।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham • Mysore •

卐3.18.6 यावच्चतस्रः प्रदिशश्चक्षुर्यावत् समश्नुते। तावत् समैत्विन्द्रियं मयि तद्धस्ति वर्चसम्।। 6।। 3 - 19

卐3.19.1 संशितं म इदं ब्रह्म संशितं वीर्यं मम। संशितं क्षत्रं मे जिष्णु येषामस्मि पुरोहितः।। 1।।

卐3.19.2 समहमेषां राष्ट्रं श्यामि समोजो वीर्यं बलम्। वृश्चामि शत्रूणां बाहू सं श्यामि स्वानहम्।। 2।।

卐3.19.3 तेक्ष्णीयां सः पर्शोरग्नेस्तीक्ष्णतरा उत। इन्द्रस्य वज्रास्तेक्ष्णीयांसो येषामस्मि पुरोहितः।। 3।।

卐3.19.4 अधस्पद्यन्तामधरे भवन्तु ये न इन्द्रं मघवानं पृतन्यान्। क्षणामि ब्रह्मणा मित्रानुन्नयामि स्वानहम्।। 4।।

卐3.19.5 एषामहमायुधा सं श्याम्येषां राष्ट्रं सुवीरं वर्धयामि। एषां क्षत्रमजरमस्तु जिष्णूग्रमेषां चित्तं विश्वेऽवन्तु देवाः।। 5।।

卐3.19.6 अभिप्रेत जयत प्रसूतास्सं वस्स्यामि नर आयुधानि। तीक्ष्णेषवो बल धन्वनो हतोग्रायुधा अबलानुग्रबाहवः।। 6।। 3 - 20

卐3.20.1 इहैव ध्रुवां नि मिनोमि शालां क्षेमे तिष्ठाति घृतमुक्षमाणा। तां त्वा शाले सर्ववीरास्सुवीरा अरिष्टवीरा अभि सञ्चरेम।। 1।।

卐3.20.2 इहैव ध्रुवा प्रति तिष्ठ शाले अश्वावती गोमती सुनृता वती। ऊर्जस्वती घृतवती पयस्वत्युच्छ्रयस्व महते सौभगाय।। 2।।

卐3.20.3 धरुण्सि शाले वृहच्छन्दाः पूतिधान्या। आ त्वा वत्सो मीमयदा कुमार आ धेनवस्सायमा स्यन्दमानाः।। 3।।

卐3.20.4 इमां शालां सविता वायुरग्निस्त्वष्टा होता नि मीनो तु प्रजानन्। उक्षन्तूध्ना मरूतो घृतेन भगो न राजा निकृषिं तनोतु।। 4।।

卐3.20.5 मानस्य पत्नी शरणा स्योना देवी देवेभिर्निमितास्यग्रे। तृणं वसाना सुमना असस्त्वं रयि नो धेहि सुभगे सुवीरम्।। 5।।

卐3.20.6 आत्वा कुमारस्तरुण आ वत्सो जगता सह। आ त्वा परिश्रुतः कुम्भ आ दध्नः कलशयत्।। 6। (इति पञ्चर्चो नाम तृतीयकाण्डे चतुर्थोऽनुवाकः) 3 - 21

卐3.21.1 इममिन्द्र वर्धय क्षत्रियं म इमं विशामेकवृषं कृणु त्वम्। निरमित्रानक्ष्णुह्यस्य सर्वांस्तान् रन्धयास्मा अहमुत्तरेषु।। 1।।

卐3.21.2 अयमस्तु धनपतिर्धनानामयं विशां विश्पतिरस्तु राजा। अस्मिन्निन्द्र मयि वर्चांसि धेह्य वर्चसं कृणुहि शत्रुमस्य।। 2।।

卐3.21.3 एमं भज ग्रामे अश्वेषु गोषु निष्टं भज योऽमित्रो अस्य। वर्ष्मत् क्षत्राणामयमस्तु राजेन्द्र शत्रूं रन्धय सर्वमस्मै।। 3।।

卐3.21.4 अस्मै द्यावापृथिवी भूरिवामं संदुहातां घर्मं दुघे इव धेनुम्। अयं राजा प्रिय इन्द्रस्य भूयात् प्रिय गवामोषधीनामुतापाम्।। 4।।

卐3.21.5 युनज्मित उत्तरावन्तमिन्द्रं ये न जयन्ति न पपराजयन्ते। यस्त्वा करदेकवृषं जनानामुत राजन्नुत्तमं मानवानाम्।। 5।।

卐3.21.6 उत्तरस्त्वमधरे सन्त्वन्ये ये के च राजन् प्रति शत्रवस्ते। एकवृष इन्द्रसखा जिगीवाञ्छत्रूयतामभि तिष्ठा महांसि।। 6. 3 - 22

卐3.22.1 विषाणास्याङ्गिरसी देवजाः प्रतिचक्षणी। दिवस्पृथिव्याः सम्भूता सहस्राक्षीहैधि नः।। 1।।

卐3.22.2 सहस्राक्षी या तु गृभाति पश्यास्योषधे। सदान्वाघ्नी रक्षोघ्नी भवेह प्रति चक्षणी।। 2।।

卐3.22.3 ये हरन्त्यासुतेयं पयस्फातिं चौषधे। तांस्त्वं सहस्रचक्षो गृभाय कृतवीर्ये।। 3।।

卐3.22.4 य आतुरं रन्धयन्तेऽर्ष्मन्तं च विहृतम्। तांस्त्वं सहस्रचक्षो गृभाय कृतवीर्ये।। 4।।

卐3.22.5 यथाश्वा चतुरक्षो रात्रिं नक्ताति पश्यति। एवा सहस्र चक्षो त्वं प्रति पश्यास्यायतः।। 5।।

卐3.22.6 गोभिरश्वैर्वसुभि रपक्रीतास्योषधे। श्यावस्याश्वस्य चक्षुषा प्रति पश्य किमीदिनः।। 6।। 3 - 23

卐3.23.1 सं सचध्वं सं पिबध्वमन्नं वो मधुमत् सह। व्रतं वः सर्वं सध्र्यक् समानं चेतो अस्तु वः।। 1।।

卐3.23.2 सं जानिध्वमिन्द्रश्चेत्ता वोऽस्त्वयं वोऽग्निर्नि हरः शमयाति। यद्वैरहत्यमुत भीममासीद्विश्वे देवा अप तत् प्लावयन्तु।। 2।।

卐3.23.3 शं वस्स्यास्तु बृहस्पतिश्शं द्यावापृथिवी उभे। शमन्तरिक्षमुत वो मरुत्वान् शं वस्स्यास्त्वदितिर्देव पुत्रा।। 3।।

卐3.23.4 कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधीः। कल्पन्तामग्नयस्सर्वेऽस्मै श्रैष्ठ्याय सव्रताः।। 4।।

卐3.23.5 संवस्सृजामि हृदयं संसृष्टं मनो अस्तु वः। संसृष्टा वस्तन्वस्सन्तु संसृष्टः प्राणो अस्तु वः।। 5।।

卐3.23.6 सं वः पशूनां हृदयं सृजामि सं पुत्राणामुत या दुहितरो वः। सं वो जायानां मनसा मनांसि सं पतीनामुत चक्षुस्सृजामि।। 6।। 3 - 24

卐3.24.1 प्राची दिगग्निरधिपतिरसितो रक्षितादित्या इषवः। तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नमो वोऽस्तु। योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मस्तमु प्राणो जहातु।। 1।।

卐3.24.2 दक्षिणादिगिन्द्रोऽधिपतिस्तिरश्चिराजी रक्षिता वसव इषवः। तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नमो वोऽस्तु। योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मस्तमु प्राणो जहातु।। 2।।

卐3.24.3 प्रतीची दिग्वरुणऽधिपतिः पृदाकु रक्षिता मित्र इषवः। तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नमो वोऽस्तु। योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मस्तमु प्राणो जहातु।। 3।।

卐3.24.4 उदीची दिक् सोमोऽधिपतिः स्वजो रक्षिता वात इषवः। तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नमो वोऽस्तु। योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मस्तमु प्राणो जहातु।। 4।।

卐3.24.5 ध्रुवा दिग् विष्णुरधिपतिः कल्माषग्रीवो रक्षिता वीरुध इषवः। तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नमो वोऽस्तु। योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मस्तमु प्राणो जहातु।। 5।।

卐3.24.6 ऊर्ध्वा दिग् बृहस्पतिरधिपतिश्श्वित्रो रक्षिता शनिरिषवः। तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नमो वोऽस्तु। योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मस्तमु प्राणो जहातु।। 6।। 3 - 25

卐3.25.1 अनड्वान्दाधार पृथिवीं द्यामुतामूमनड्वान्दाधारोर्वन्तरिक्षम्। अनड्वान्दाधार प्रदिशः षड्उर्वीरनड्वानिदं विश्वं भुवनमा विवेश।। 1।।

卐3.25.2 अनड्वान्दुहे सुकृतस्य लोक ऐनं प्यायेत पवमानः पुरस्तात्। पर्जन्यो धारा मरुतो ऊधो अस्य यज्ञः पयो दक्षिणा दोह अस्य।। 2।।
卐3.25.3 अनड्वान्निन्द्रस्स पशुभ्यो वि चष्टे त्रयाञ्छक्रोप मिमीते अध्वनः। स भूतं भविष्यद् भूवनं दुहानस्सर्वा देवानां बिभ्रच्चरति व्रतानि।। 3।।
卐3.25.4 यस्य नेशे यज्ञपतिर्न यज्ञो नास्य दातेशे न प्रति ग्रहीता। यो विश्व दृग्विश्व भृद्विश्वकर्मा घर्मं नो ब्रूत यतमश्चतुष्पात्।। 4।।
卐3.25.5 इन्द्र एष मनुष्येष्वन्तर्घर्मस्तप्तश्चरति शोशुचानः। सुप्रजा असत् स उदारे न सर्षत् यो नाश्नीयादनडुहो विजानन्। । 5।।
卐3.25.6 येन देवास्स्वरा रुरुहुर्हित्वा शरीरममृतस्य धाम। तेन गेष्म सुकृतस्य लोकं घर्मस्य व्रतेन यशसा तपस्यया।। 6।।
卐3.25.7 द्वादशैता रात्रीर्व्रत्या आहुः प्रजापतेः। तत्रापि ब्रह्म यो तद्वा अनडुहो बलम्।। 8।।
卐3.25.8 दुहे वा अनड्वान् सायं दुहे प्रातर्दुहे दिवा। दोहा ये अस्य संयन्ति तान् विद्मानुपदस्वतः।। 9।।
卐3.25.9 यो वेदानडुहो दोहान् सप्तानुपदस्वतः। प्रजां च लोकं चाप्नोति तथासप्तर्षयो विदुः।। 10।।
卐3.25.10 मध्यमेतदनडुहो यत्रैष वह आहितः . एतावदस्य प्राचीनं यावान् प्रत्यङ्गमाहितः।। 11।।
卐3.25.11 पद्भि स्सेदिमवक्रामन्निरां जङ्घाभिरुत्खिदन्। श्रमेणानड्वान् कीलालं कीनाशश्चापि गच्छतः।। 12।।
卐3.25.12 इन्द्र एष मनुष्येष्वनड्वानित्युच्यते। शफासो अस्य मा रिषन् सर्वा याश्चास्य कुष्ठिकाः।। 13।।
卐3.25.13 इन्द्रो बलेनासि परमेष्ठी व्रतेन येन गौस्तेन वैश्वदेवः। योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तस्य प्राणान् सं बृहत्तस्य प्राणान् वि वृह।। 14। (इति षडर्चो नाम तृतीयकाण्डे पञ्चमोऽनुवाकः) 3 - 26
卐1.26.1 गृहानैमि मनसा मोदमान ऊर्जं बिभ्रद् वसुमनिस्सुमेधाः। अघोरेण चक्षुषा मित्रियेण गृहाणां पश्यन् पय उत्तरामि।। 1।।
卐1.26.2 इमे गृहा मयोभुव ऊर्जस्स्वन्तः पयस्वन्तः। पूर्णा वामस्य तिष्ठन्तस्ते नो जानन्तु जानतः।। 2।।

Sri Sachchidananda Avadhoota Dattapeetham SGS

卐1.26.3 सूनृतावन्तस्सुभगा इरावन्तो हसामुदाः। अक्ष्युध्या अतृष्यासो गृहामास्मद् बिभीतन।। 3।।

卐1.26.4 येषामध्येति प्रवसन् येषु सौमनसो बहुः। गृहानुप ह्वयामहे ते नो जानन्त्वायतः।। 4।।

卐1.26.5 उपहूता इह गाव उपहूता अजावयः। अथो अन्नस्य कीलाल उपहूतो गृहेषु नः।। 5।।

卐1.26.6 उपहूता भूरिधनाः सखायस्स्वादु संमुदः। अरिष्टास्सर्व पूरुषा गृहा नस्सन्तु सर्वदा।। 6।।

3 - 27

卐3.27.1 हन्तायमस्त्वप्रतिघात्यसासह्वाँ इन्द्रः पृतना अभिष्टिः। प्रजापतिरदधादोजो अस्मै बृहद्धविर्हविषा वर्धनेन।। 1।।

卐3.27.2 प्रजापते हविषा वर्धनेन हन्तारमिन्द्रमकृणोरघात्यम्। तस्मै विशो देवकृता नमन्त स हि हन्ता सहि हव्यो बभूव।। 2।।

卐3.27.3 प्रजापते अभिनो नेषवस्य ऊर्वीं गव्युतिमभिमातिषाहः। वर्धयन्निन्द्रं बृहते रणाय देवं देवेन हविषा वर्धनेन।। 3।।

卐3.27.4 यथा विश्वाः पृतनास्संजयासि यथा शतॄन् सहमानस्सहासै। यथासस्सम्राड् सुसम्राडेवात्वेन्द्रोऽप्रतिवधं कृणोतु।। 4।।

卐3.27.5 अयं वीरोऽप्रति हन्तु शत्रून् विश्वे देवा अप सदस्कराथ। मास्य प्रजां रीरिषन् मोत वीरानिममिन्द्रोऽप्रति वधं कृणोतु।। 5।।

卐3.27.6 जहि शत्रून् प्रतिरन्धयस्वाग्निष्टे गोपा अधिपा वसिष्ठः। शर्म ते राजा वरुणो नियच्छा देवा त्वेन्द्रोऽप्रतिवधं कृणोतु।। 6।। 3 - 28

卐3.28.1 सं स्पृशेथां तनूभ्यां सं मुखाभ्यां समात्मना। सं वां ब्रह्मणस्पतिस्सोमस्सं स्पर्शयाति वाम्।। 1।।

卐3.28.2 अभ्यस्य नाम वाचा दधामि नाह मोक्ष्यते। ममेदहैनं कामे लभै कृष्णमिवाखरे।। 2।।

卐3.28.3 यः प्रेमा प्रेण्यामासीद्दत्त स्सोमेन बभ्रुणा। तस्मादधि श्रुतं मम मय्यस्य मन आहितम्।। 3।।

卐3.28.4 यं पुमांसं कामयसे यस्मिन् वा भगमिच्छसे। हृच्छोकमस्मिन्ना दध्मो यथा शुष्याति त्वा मनु।। 4।।

卐3.28.5 यथास्य हृदयं शुष्यादपि छिन्नेव शङ्गुणी। चक्षुराकास्यं भीमं मां पश्यमभिरोरुदम्।। 5।।

卐3.28.6 प्रियङ्करणमुत्तमं मधुघेन तदाभृतम्। त्वं हासि वर्चस्योऽथो हासि सुमङ्गलः। अथो सर्वासां वीरुधां प्रियङ्करणमुच्यसे।। 6।। 3 - 29

卐3.29.1 प्रतीची सोममस्योषधे प्रतीच्युत सूर्यम्। प्रतीची विश्वान् देवांस्तथा त्वाच्छावदामसि।। 1।।

卐3.29.2 इमां खनाम्योषधिं नितत्नीमनुतन्तमाम्। आयतः प्रतिनन्दनीं परायतो निवर्तनीम्।। 2।।

卐3.29.3 अमुष्याहं परायत आयतो मनोऽग्रभम्। अग्रभं हस्त्यं मनोऽथो हृदयं मनः।। 3।।

卐3.29.4 मयि ते मन आहितं मयि चित्तं मयि व्रतम्। ममेदपि क्रतावसो मम चित्ते स चावहै।। 4।।

卐3.29.5 अहं वदानि मा त्वं सभायां घ त्वं वद। ममेदसस्त्वं केवलो नान्यासां कीर्तयाश्च न।। 5।।

卐3.29.6 यदि वासि तिरोजनं यदि वा नद्यस्तिरः। इयं त्वा मह्यमोषधिरबध्वेव न्यानयात्।। 6।। 3 - 30

卐3.30.1 यथा कलां यथा शफं यथर्णं संनयन्ति। ओवाह दुःस्वप्न्यं सर्वमप्रिये सं नयामसि।। 1।।

卐3.30.2 संराजानोऽगुः सं मृणान्यगुस्सं कुष्ठा अगुस्सं कला अगुः। समस्मासु सुस्वप्न्यं निर्द्विषते दुःष्वप्न्यं सुवामः।। 2।।

卐3.30.3 देवानां पत्नीनां गर्भ यमस्य करणः। यो भद्रस्स्वप्नस्स मम यः पापस्तं द्विषते प्रहिण्मः।। 3।।

卐3.30.4 तृष्णामा नामासि कृष्णशकुनेर्मुखं निर्ऋतेर्मुखम्। तं त्वा स्वप्न तथा विद्म।। 4।।

卐3.30.5 सत्वं स्वप्नास्व इवाकायमश्व इव नीनाहम्। अनास्माकं देवपीयुं पीयारुं वप्सः।। 5।।

卐3.30.6 यदस्मासु दुःष्वप्न्यं यद् गोषु यच्च नो गृहे। अनास्माकस्तद्देवपीयुः पीयारुं निष्क इव प्रति मुञ्चताम्।। 6।।

卐3.30.7 नवारत्नी नव मायास्माकं तन्वस्परि। दुःस्स्वप्न्यं सर्वं दुर्भूतं द्विषते निर्दिशा मसि।। 7। (इति षडर्चो नाम तृतीयकाण्डे षष्ठोऽनुवाकः) 3 - 31

卐3.31.1 देवा मरुतः पृश्निमातरोऽप दत्तोदधिं भिन्त। दिवस्पृथिव्या उरोरन्तरिक्षादस्मै क्षत्रायानेन ब्रह्मणाभ्यः प्रजाभ्य आभ्य ओषधीभ्यस्स्वाहा।। 1।।

卐3.31.2 देवा अग्न इन्द्र सूर्यापो दत्तोदधिं भिन्त। दिवस्पृथिव्या उरोरन्तरिक्षादस्मै क्षत्रायानेन ब्रह्मणाभ्यः प्रजाभ्य आभ्य ओषधीभ्यस्स्वाहा।। 2।।

Sri Ganapati Sacchidananda Avadhoota Datta Peetham SGS

卐3.31.3 देवास्सयुजो मित्र वरुणार्यमन्नपो दत्तोदधिं भिन्त। दिवस्पृथिव्या उरोरन्तरिक्षादस्मै क्षत्रायानेन ब्रह्मणाभ्यः प्रजाभ्य आभ्य ओषधीभ्यस्स्वाहा।। 3।।

卐3.31.4 देवाः पितरोऽवमा आयवः क्राव्य अपो दत्तोदधिं भिन्त। दिवस्पृथिव्या उरोरन्तरिक्षादस्मै क्षत्रायानेन ब्रह्मणाभ्यः प्रजाभ्य आभ्य ओषधीभ्यस्स्वाहा।। 4।।

卐3.31.5 देवाप्सुसदोऽपान्नपात्तनूनपान्नराशं सापो दत्तोदधिं भिन्त। दिवस्पृथिव्या उरोरन्तरिक्षादस्मै क्षत्रायानेन ब्रह्मणाभ्यः प्रजाभ्य आभ्य ओषधीभ्यस्स्वाहा।। 5।।

卐3.31.6 देव बृहस्पतेऽपो धेह्युदधिं भिन्धि। दिवस्पृथिव्या उरोरन्तरिक्षादस्मै क्षत्रायानेन ब्रह्मणाभ्यः प्रजाभ्य आभ्य ओषधीभ्यस्स्वाहा।। 6।।

卐3.31.7 देव प्रजापतेऽपो धेह्युदधिं भिन्धि। दिवस्पृथिव्या उरोरन्तरिक्षादस्मै क्षत्रायानेन ब्रह्मणाभ्यः प्रजाभ्य आभ्य ओषधीभ्यस्स्वाहा।। 7।।

卐3.31.8 देव परमेष्ठीन्नपो धेह्युदधिं भिन्धि। दिवस्पृथिव्या उरोरन्तरिक्षादस्मै क्षत्रायानेन ब्रह्मणाभ्यः प्रजाभ्य आभ्य ओषधीभ्यस्स्वाहा।। 8।। 3 - 32

卐3.32.1 प्रजापतेर्जायमानाः प्रजा जाताश्च या इमाः। ता अस्मै प्रतिवेदय चिकित्वाँ अनुमन्यताम्।। 1।।

卐3.32.2 येषामीशे पशुपतिः पशूनां चतुष्पदामुत वा ये द्विपादः। निष्क्रितास्ते यज्ञीया यन्ति लोकं रायस्पोषाय यजमानं सचन्ताम्।। 2।।

卐3.32.3 प्रमुञ्चन्तो भुवनस्य गोपा गातुं देवा यजमानाय धत्त। उपाकृतं शशमानं यदस्थात् प्रियं देवानामप्येतु पाथः।। 3।।

卐3.32.4 ये वध्यमानमनु दीध्यानां अन्वैक्षन्त मनसा चक्षुषा च। अग्निष्टानग्रे प्र मुमक्त देवः प्रजापतिः प्रजया संविदानः।। 4।।

卐3.32.5 येषां प्राणा अन्वबध्नन्त बद्धं गवां पशूनामुत पूरुषाणाम्। इन्द्रस्तानग्रे प्र मुमुक्त देवः प्रजापतिः प्रजया संविदानः।। 5।।

卐3.32.6 य आरण्या पशवो विश्वरूपा ये विश्वरूपा उतैक रूपाः। वायुष्टानग्रे प्र मुमुक्त देवः प्रजापतिः प्रजया संविदानः। 6।।

卐3.32.7 प्र जानन्तः प्रतिगृह्णन्तु देवाः प्राणमङ्गेभ्यस्पर्या चरन्तम्। द्यां गच्छ प्रति तिष्ठाश्शरीरैः स्वर्गं याहि पथिभि श्शिवेभिः।। 7।। 3 - 33

卐3.33.1 समास्त्वाग्न ऋतवो वर्धयन्तु संवत्सर ऋषयो यानि सत्या। सं द्युम्नेन दीदिहि रोचनेन विश्वा आ भाहि प्रदिशश्चतस्त्रः।। 1।।

卐3.33.2 सं चेध्यस्वाग्ने प्र च बोधयैनमुच्च्य तिष्ठ महते सौभगाय। मा ते रिषन्नुपसत्तारो अत्र ब्राह्मणास्ते यशसस्सन्तु मान्ये।। 2।।

卐3.33.3 त्वामग्ने वृणते ब्राह्मणा इमे शिवो अग्ने प्रतरणो न एधि। सपत्नहाग्ने अभिमातिजिद् भव स्वे क्षये दीदिह्यप्रयुच्छन्।। 3।।

卐3.33.4 इहैवाग्ने अधि धारया रयिं मा त्वा दभन् पूर्व चित्ता निकारिणः। क्षत्रमग्ने सुयममस्तु तुभ्यमुपसत्ता वर्धतां ते अनिष्टृतः।। 4।।

卐3.33.5 क्षत्रेणाग्ने स्वेन संरभस्व मित्रेणाग्ने मित्रधेयं यतस्व। सजातानां मध्यमेष्ठेयमस्या राज्ञामग्ने विहव्यो दीदिहीहः।। 5।।

卐3.33.6 अति निहो अति निर्ऋतीरत्यरातिरति द्विषः। विश्वाह्यग्ने विश्वाह्यग्ने दुरिता तर त्वमथास्मभ्यं सहवीरं रयिं दाः।। 6।।

卐3.33.7 अनाधृष्यो जातवेदा अनिष्टृतो विराडग्ने क्षत्रभिर्दीदिहीह। व्यमीवाः प्रमुञ्चन्मानुभ्यश्शिवेभिरद्य परि पाहि नो गयैः।। 7।। 3 - 34

卐3.34.1 अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः। तं जानन्नग्न आ रोहाथा नो वर्धया रयिम्।। 1।।

卐3.34.2 प्रदातारं हवामहे अग्निमुग्रमूतये। शुचिर्यो वृत्रहन्तमः।। 2।।

卐3.34.3 अग्ने अच्छा वदेह नः प्रत्यङ् नः सुमना भव। प्र णो यच्छ विशां पते धनदा असि नस्त्वम्।। 3।।

卐3.34.4 प्र णो यच्छत्वर्यमा प्र भगः प्र बृहस्पतिः। प्र पूषा प्रोत सुनृता रयिं देवी दधातु नः।। 4।।

卐3.34.5 अर्यमणं बृहस्पतिमिन्द्रं दानाय चोदय। वातं विष्णुं सरस्वतीं सवितारं च वाजिनम्।। 5।।

卐3.34.6 सोमं राजानमवसेऽग्निं गीर्भिर्हवामहे। आदित्यं विष्णुं सूर्यं ब्रह्माणं च बृहस्पतिम्।। 6।।

卐3.34.7 इन्द्रवायू बृहस्पतिस्सुहवेह हवामहे। यथा नः सर्वमिज्जगत् सङ्गत्यां सुमना असत्।। 7।।

卐3.34.8 त्वं नो अग्ने अग्निभिर्ब्रह्मयज्ञं च वर्धय। त्वं नो देव दातवे रयिं दानाय चोदय।। 8।।

卐3.34.9 वाजस्येदं प्रसवे सं बभूव मेमा च विश्वा भुवनान्यन्तः। उतादित्सन्तं दापयति प्रजानन् रयिं च न सर्ववीरं नियच्छात्।। 9।।

卐3.34.10 दुह्रां मे पञ्च प्रदिशो दुह्रामुर्वीर्यथा बलम्। प्रापेयं सर्वामाकूतिं मनसा हृदये न च।। 10।।

卐3.34.11 गोसनिं वाचमुदेयं वर्चसामाभ्यूर्णुहि। आ रुन्धां सर्वतो वायुस्त्वष्टा पोषाय ध्रियताम्।। 11।। 3 - 35

卐3.35.1 यत इन्द्र भयामहे ततो नो अभयं कृधि। मघवञ्छग्घि तव त्वं न ऊतिभिर्वि द्विषो वि मृधो जहि।। 1।।

卐3.35.2 इन्द्रं वयमनुराधं हवामहेऽनुराध्यास्म द्विपदा चतुष्पदा। मा नस्सेना अररूषीरूपगुर्विषूचीरिन्द्र द्रुहो वि नाशय।। 2।।

卐3.35.3 इन्द्रस्त्रातोत वृत्रहा परस्पा नो वरेण्यः। स रक्षिता चरमतस्समध्यतस्सपश्चात् स पुरस्तान्नो अस्तु।। 3।।

卐3.35.4 उरुं नो लोकमनु नेषि विद्वान् स्वर्यज्ज्योतिरभयं स्वस्ति। उग्रात इन्द्र स्थविरस्य बाहू उपक्षियेम शरणा वृहन्ता।। 4।।

卐3.35.5 अभयं नः करत्यन्तरिक्षमभयं द्यावापृथिवी उभे। अभयं पश्चादभयं पुरस्तादुत्तरादधरादभयं नोऽस्तु।। 5।।

卐3.35.6 अभयं मित्रादभयममित्रादभयं ज्ञातादभयं पुरो यः। अभयं नक्तमभयं दिवा नस्सर्वा आशा मम मित्रं भवन्तु।। 6। (इति षडर्चौ नाम तृतीयकाण्डे सप्तमोऽनुवाकः) 3 - 36

卐3.36.1 जय प्रेहि माप क्रामश्शत्रूणां वेद आखिद। इन्द्रस्सपत्नहा भीमस्सञ्जयस्ते समानृधत्।। 1।।

卐3.36.2 त्वं जयासि न परा जयासा अर्भेष्वाजौ मघवन्महत्सु च। उग्रं चित्त्वामवसे सं शीशीमहे स त्वं न इन्द्र हवनेषु मृड।। 2।।

卐3.36.3 गोजिता बाहू असमक्रतु युधि कर्मन्करमञ्छमूती खजङ्करा। अकल्प इन्द्रोऽप्रतिमानमोजस्स त्वं न इन्द्र हवनेषु मृड।। 3।।

卐3.36.4 वेदाहमैन्द्रं प्रियमस्य शेवधिं यदस्य नाम गुह्यं समीके। स इज्जयाति मघवा ममासत्यस्माकं युध्मो विहवेहवङ्गमत्।। 4।।

卐3.36.5 वयं जयेम त्वायुजा भृतोऽस्माकमंशमुदवा भरेभरे। अस्मभ्यमिन्द्र वरिवस्सुगंकृधि प्र शत्रूणां मघवन् वृष्ण्या रुज।। 5।।

卐3.36.6 त्वां देवेषु प्रथमं हवामहे त्वं बभूविथ पृतनासु सासहिः। सेमं नः कारुमुपमन्युमुद्भिदमिन्द्र करासि प्रसवे रथं पुरः।। 6।। 3 - 37

卐3.37.1 स्मर स्मरोऽसि देवैर्दत्तोऽसि स्मर। अमुष्य मन आ स्मर यथाहं कामये तथा।। 1।।

卐3.37.2 शोचयास्य हृदयं काम गच्छाङ्गज्वरो दहतु शोचतुत्मना। संकल्पा अस्य समरन्ताधीभिरियमेवास्य दिगमहन्यन्याः।। 2।।

卐3.37.3 निरानन्दाः प्रमुच्छदो मनोमुहो नयुवो नष्टकृत्वा अरण्यवः। आवेशिनीः प्रद्रुपो रोपयिष्णुरेत आस्ताध्यः प्र हिणोमि ब्रह्मणा।। 4।।

卐3.37.4 हृत्कर्तनी ऋतुदा ग्रामान्नाशनी स्स्वप्नच्छिद् उघ्ननिघ्ना मनो मुहः। आवेशिनीः प्रद्रुपो रोपयिष्णुरेत आस्ताध्यः प्र हिणोमि ब्रह्मणा।। 4।।

卐3.37.5 इन्द्राग्नी मित्रावरुणा ते अद्यो भे च द्यावापृथिवी मातरिश्वा। अश्विना देवस्सविता भगश्च मनस्त उघ्नन्तु न रमासा अत्र।। 5।।

卐3.37.6 त्रयस्त्रिंशत्त्वा उत घ्नन्तु देवा आध्याश्चित्तमुप ते भरन्ताम्। भरद्वाजस्य मतयस्त ईशतां छिन्नेव नौर्बन्धतात् प्र प्लवस्व।। 6।।

卐3.37.7 एताः पतन्त्याध्यो वार्षिकीरिव विद्युतः। तासां प्रतिग्रहो भव सायं गोष्ठे गवामिव।। 7।।

卐3.37.8 नि शीर्षितो नि पातितो आध्यो वेशयामि ते। तास्त्वा समुत्तुदन्तिर्बोधयन्तीरुपासताम्।। 8।।

卐3.37.9 एतास्त आध्यः प्र हिणोमि ब्रह्मणा तृप्रा अश्रीपुरोगवाः। तास्त्वा तृणमिव शोषयानथो त्वा रोदयान् बहु।। 9।। 3 - 38

卐3.38.1 अजो ह्यग्नेरजनिष्ट शोकात् सोऽपश्यज्जनितारमग्रे। तेन देवा देवतामग्र आयन् तेन रोहानरोहन्नुप मे मेधियां सः।। 1।।

卐3.38.2 क्रमध्वमग्निभिर्नाकमुख्यां हस्तेषु बिभ्रतः। दिवस्पृष्ठं स्वर्गत्वा मिश्रा देवेभिराध्वम्।। 2।।

卐3.38.3 अग्ने प्रेहि प्रथमो देवयतां चक्षुर्देवानामुतमर्त्यानाम्। इयक्षमाणा भृगुभिस्सजोषस स्स्वर्यन्तु यजमानास्स्वस्ति।। 3।।

Sri Ganapati Sacchidananda Avadhoota Datta Peetham

卐3.38.4 स्वर्यन्तो नापेक्षन्त आ द्यां रोहन्तु राधसः। यज्ञं ये विश्वतोधारं सुविद्वांसो वितेनिरे।। 4।।

卐3.38.5 ओदनमज्मि शवसा घृतेन दिव्यं समुद्रं पयसं वृहन्तम्। तेन गेष्म सुकृतस्य लोकं सरो रुहाणा अधि नाकमुत्तमम्।। 5।।

卐3.38.6 यौ ते पक्षावजरौ पतत्रिणौ याभ्यां रक्षांस्यपहंस्योदन। ताभ्यां पत्यास्म सुकृतस्य लोकं यत्रर्षयः प्रथमाजाः पुराणाः।। 6।।

卐3.38.7 यतस्तिष्ठो दिवस्पृष्ठे व्योमन्नध्योदन। अन्वायन् सत्यधर्माणो ब्राह्मणा राधसा सह।। 6।।

卐3.38.8 पृष्ठात् पृथिव्या अहमन्तरिक्षमारुहमन्तरिक्षाद्दिवमारुहम्। दिवो नाकस्य पृष्ठात् स्वर्ज्योतिरगामहम्।। 7।।

卐3.38.9 अजोऽस्यज स्वर्गोसि त्वया लोकमङ्गिरसः प्र जानन्। तं लोकमनु प्र ज्ञेष्म।। 9।।

卐3.38.10 येना सहस्रं वहसि येन वा सर्ववेदसम्। तेनेमं यज्ञं नो वह स्वर्देवेषु गन्तवे।। 10।।

卐3.38.11 अजं च पचत पञ्च चौदनान्। अजं पन्चौदनं पक्त्वा देवा लोकान् समानशुः।। 11।। 3 - 39

卐3.39. 1 या ते प्रजापिहिता पुराभूद्धवेणाश्विनापतं भरामि। अग्निष्टे तामाद्यमः पुनर्दाद्वैश्वानरः परमास्माद् व्योम्नः।। 1।।

卐3.39. 2 त्वं पतिश्शिवोऽग्ने द्वितीयोऽस्यै प्रजां जरदष्टिं सृजस्व। मुञ्तैनां ग्राह्या निर्ऋतिर्यद्बन्धाग्ने प्रजां प्रजाकामायै धेहि।। 2।।

卐3.39. 3 त्वामग्ने वृषभं वाशितेयमाच्य जानु पुत्रकामासपर्यति। तमारोह सुमनस्यमानः प्रजापतेः प्रजया संसृजैनाम्।। 3।।

卐3.39. 4 तुभ्यं नारी पुत्रकामेयमग्ने शुद्धं पूतं घृतमाजुहोति। तामधिस्कन्द वीरयस्व रेतोधा उग्रः प्रजया संसृजैनाम।। 4।।

卐3.39. 5 पर्वताद्दिवो यनेर्गात्राद्गात्रात् समाश्र्तम्। रेतो देवस्य देवस्यत्सरौ पर्णमिवा धाम्।। 5।।

卐3.39. 6 इन्द्रस्य जातस्य प्र पपात नाभिस्तामेको देवः प्रतिजग्राह कामी। त्वया वयं ब्राह्मणास्सोमपास्सूपयामनउत या न सूते।। 6।। 3 - 40

卐3.40.1 तेजनात्त्यजनं जातं तेजनं जायते शरात्। न येषति न शोचति यस्त्वा बिभर्ति तेजन।। 1।।

卐3.40.2 परुत्वमसि तेजन परुत्वन्ते प्रभञ्जनम्। परुत्वो अस्चतु स कामो येनामून् कामयामहे।। 2।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐3.40.3 यावदोष श्शरो अस्त्वोजनेभ्यः कृणवद्धयम्। तावदोषस्त्वन्तेजन त्यजनं भवतादिह।। 3।।

卐3.40.4 त्यजनं म आपो दधन्त्यजनं मरुतो दधन्। त्यजनं मे विश्वेदेवास्त्यजनं पितरो दधन्।। 4।।

卐3.40.5 तेनाहमन्येषां स्त्रियो अत्याख्यं विद्विषो पुरा। पुरा द्विषो अत्याख्यं पुरा मध्यन्दिनादुत।। 5।।

卐3.40.6 पुरा सायत्वादत्याख्यं तेजने हि महद्धलम्। अस्थाद्यौरस्थात् पृथिव्यस्थाद्विश्वमिदं जगत्। अस्थादवहृदेवात्तिष्ठात् कामो अयं तव।। 6। (इति षडर्चो नाम तृतीयकाण्डे अष्टमोऽनुवाकः) इत्यथर्ववेदे पैप्पलादसंहितायां षडर्चो नाम तृतीयकाणडः समाप्तः

## ॐ अथ चतुर्थः काण्डः 4 - 1

卐4.1.1 हिरण्यगर्भस्समवर्तताग्रे भूतस्यजातः पतिरेक आसीत्। सदाधार पृथिवीं द्यामुतामुं तस्मै देवाय हविषा विधेम।। 1।।

卐4.1.2 य ओजोदा बलदा यश्च विश्व उपासते प्रशिषं यस्य देवाः। यस्य च्छायामृतं यस्यमृत्युस्तस्मै देवाय हविषा विधेम।। 2।।

卐4.1.3 यः प्राणतो निमिषतो विधर्ता पतिर्विश्वस्य जगतो बभूव। य ईशेऽस्य द्विपदो यश्चतुष्पदस्तस्मै देवाय हविषा विधेम।। 3।।

卐4.1.4 येन द्यौरुग्रा पृथिवी च दृढा येन स्वस्स्तभितं येन नाकः। यो अन्तरिक्षं विममे वरीयस्तस्मै देवाय हविषा विधेम।। 4।।

卐4.1.5 य इमे द्यावापृथिवी तस्तभाना धारयदवसा रेजमाने। यस्मिन्नधि वितत एति सूर्यस्तस्मै देवाय हविषा विधेम।। 5।।

卐4.1.6 यस्य विश्वे हिमवन्तो महित्वा समुद्रं यस्य रसया सहाहुः। दिशो यस्य प्रदिशः पञ्चदेवीस्तस्मै देवाय हविषा विधेम।। 6।।

卐4.1.7 आपो ह यस्य विश्वमायुर्दधाना गर्भं जनयन्त मातरः। तत्र देवानमधि देव आस्त एकस्थूणे विमिते दृढ उग्रे।। 7।।

卐4.1.8 आपो गर्भं जनयन्तिर्वत्समग्रे समैरयन्। तस्योत जायमानस्योल्ब आसीद्धिरण्ययः।। 8।।

卐4.1.9 हिरण्य उल्ब आसीद् योऽग्रे वत्सो अजायत। तंयन्योर्विद्रवन्त्योः पर्यपश्यद्दितिर्मिहि।। 9।।

4 - 2

卐4.2.1 भूतो भूतेषु पय आ दधाति स भूतानामधिपतिर्बभुव। स ते मृत्युश्चरति राजसूयं स राजा राज्यमनु मन्यतामिदम्।। 1।।

卐4.2.2 अभिप्रेहि वीरयस्वोग्रश्चेत्ता सपत्नहा। आ तिष्ठ मित्र वर्धन तुभ्यं देवा अधि ब्रुवन्। आ तिष्ठन्तं परि विश्वे अभूषञ्छ्रियं वसानश्चरति स्वरोचिः। महत्तद्वृष्णो असुरस्य नामा विश्वरूपो अमृतानि तस्थौ।। 2।।

卐4.2.3 एना व्याघ्रं परिषस्वजानास्सिंहं हिन्वन्ति महते सौभगाय। महिषं न सुभुवस्तस्थिवांसं मर्मृज्यन्ते द्विपीनमप्स्वन्तः।। 4।।

卐4.2.4 व्याघ्रो अधि वैयाघ्रे वि क्रमस्व दिशो महीः। विशस्त्वा सर्वा आयन्त्वापो दिव्याः पयस्वतीः।। 5।।

卐4.2.5 या आपो दिव्याः पयसा मदन्ति या अन्तरिक्ष उत पार्थिवा याः। तासां त्वा सर्वासामपामभि षिञ्चामि वर्चसा।। 6।।

卐4.2.6 अभित्वा वर्चसा सिचं दिव्येन पयसा सह। यथा सो मित्रवर्धनस्तथात्वा सविता करत्।। 7।।

4 - 3

卐4.3.1 यत्ते चन्द्रं कश्यपो रोचनावद् यत् संहितं पुष्कलं चित्रभानु। यस्मिन् सूर्या आर्पिता सप्त साकं तस्मिन् राजानमधि विश्रयेमम्।। 1।।

卐4.3.2 येभिश्शिल्पैः पप्रथानामदृंहो येभिर्दिवमभ्यपिंशः प्रविद्वान्। येभिर्वाचं पुष्लैरव्ययस्तेन माग्ने वर्चसा सं सृजेह।। 2।।

卐4.3.3 येभिस्सूर्य आतपति प्रकेतुभिर्येभिरग्निर्ददृशे चित्रभानुः। येभिरापश्चन्द्रवर्णा अजिन्वन्तेन माग्ने वर्चसा सं सृजेह।। 3।।

卐4.3.4 आयं भातु प्रदिशः पञ्च देवीरिन्द्र इव ज्येष्ठो भवतु प्रजानाम्। अस्मिन्धेहि पुष्कलं चित्रभान्वयं पृणातु रजसोरुपस्थम्।। 4।।

卐4.3.5 अनु त्वेन्द्रोवत्वनु बृहस्पतिरनुत्वा सोमो अन्वग्निरावीत्। अनु त्वा विश्वे अवन्तु देवास्सप्त राजानो य उदाभिषिक्ताः।। 5।।

卐4.3.6 अनु त्वा मित्रावरुणेहावतामनु द्यावापृथिवी औषधीभिः। सूर्योहभिरनु त्वावतु चन्द्रमा नक्षत्रैरनु त्वेदमावीत्।। 6।।

卐4.3.7 द्यौश्च त्वा पृथिवी च प्रचेतसौ शुक्रो बृहन्दक्षिणा त्वा पिपर्तु। अनुस्वधा चिकितां सोमो अग्निः पूषा त्वावतु सविता सवेन।। 7।। 4 - 4

卐4.4.1 स्तुवानमग्न आनय यातुधानं किमीदिनम्। त्वं हि देवान्तितो हन्ता दस्योर्बभूविथ।। 1।।

卐4.4.2 आज्यस्य परमेष्ठीन् जातवेदस्तनूवसिन्। अग्ने तौलस्य प्राशान् यातुधानान् वि लापय।। 2।।

卐4.4.3 वि लपन्तु यातुधाना अत्रिणो ये किमीदिनः। अथेदमग्ने नो हविरिन्द्रश्च प्रति हर्यतम्।। 3।।

卐4.4.4 अग्निः पुरस्तादा यच्छतु प्रेन्द्रो नुदतु बाहुमान्। ब्रवीतु सर्व यातुमानयमस्मित्येत्य।। 4।।

卐4.4.5 पशसायामि ते वीर्या जातवेदः प्र णो ब्रूहि यातुधानान्नृचक्षः। त्वया सर्वे परितप्ताः पुरस्तादा यन्तु प्रब्रुवाणा उपेदम्।। 5।।

卐4.4.6 आ रभस्व जातवेदो हृदः कामाय रन्धय। दूतो नो अग्निरुत्तिष्ठ यातुधानानिहा नय।। 6।।

卐4.4.7 त्वमग्ने यातुधानानुप बद्धानिहा नय। अथेषामिन्द्रो वज्रेणापि शीर्षाणि वृश्चतु।। 7।।

卐4.4.8 इदं हविर्यातुधानान्नदी फेनमिवावहात्। यदीदं स्त्री पुमानकरिह स स्तुवतां जनः।। 8।।

卐4.4.9 यातुधानस्य सोमप जहि प्रजां नयस्व च। निष्टुवानस्य पातय परमक्ष्युता वरम्।। 9।।

卐4.4.10 अयं स्तुवान आगमत्त्वं स्मोत प्रति हर्यत। बृहस्पते वशे कृथा अग्निस्सोमा वि विध्यतम्।। 10।। 4 - 5

卐4.5.1. यां त्वा गन्धर्वो अखनद्वरुणायमित भ्रजे। तां त्वा वयं खनामस्योषधीं शेपहर्षणीम्।। 1।।

卐4.5.1. वृषणस्ते खनितारो वृषा त्वमस्योषधे। वृषासि वृष्ण्यावती वृषणे त्वा खनामसि।। 2।।

卐4.5.1. उदुषा उदु सूर्य उच्छुष्मा ओषधीनाम्। उदे जति प्रजापतिर्वृषा शुष्मेण वाजिना।। 3।।

卐4.5.1. ऊर्ध्व श्राणमिदं कृधि यथा स्म ते वि रोहतो अभितप्तमिवानति। ततस्ते शुष्मवत्तरमियं कृणोत्वोषधीः।। 4।।

卐4.5.1. अपां रस ओषधीनामथो वनस्पतीनाम्। अथो सोमस्य भ्रातास्यार्शमसि वृष्ण्यम्। ।

卐4.5.1. अश्वस्य श्यस्य बस्तस्य पुरुषस्य च। य ऋषभस्य वाजस्तमस्मै देह्योषधे।। 6।।

卐4.5.1. सं वाजा ऋषभाणां सं शुष्मा ओषधीनाम्। सं पूषामिन्द्रवृष्ण्यमस्मै धेहि तनूबलम्।। 7।।

卐4.5.1. अद्याग्ने अद्य सवितरद्य देवि सरस्वती। अद्या मे ब्रह्मणस्पते धनुरिवा तानया पसः।। 8।।

卐4.5.1. ऊर्ध्वास्तिष्ठन्ति गिरय ऊर्ध्वावाता उदीरते। ऊर्ध्वोऽयं मामको मयूख इवाधि भूम्याम्।। 9।।

卐4.5.1. उत्तिष्ठोग्र वि धूनुष्व वि ते घ्ना यन्तु नाड्यः। अतन्द्रो अश्वपा इव नावग्लायोऽधि मुष्कयोः।। 10। (इति सप्तर्चो नाम चतुर्थकाण्डे प्रथमोऽनुवाकः) 4 - 6

卐4.6.1 हिरण्यशृङ्गो वृषभो यस्समुद्रादुदा चरत्। तेना सहस्येना वयं नि जनान् स्वापयामसि।। 1।।

卐4.6.2 न भूमिं वातोऽति वाति नाति तपति सूर्यः। जनांश्च सर्वान् स्वापय शुनश्चेन्द्रसखा चरन्।। 2।।

卐4.6.3 वह्येशयाः प्रोष्ठेशया नारीर्यास्तल्पशीवरी। स्त्रियो याः पुण्यगन्धास्तास्सर्वास्स्वापयामसि।। 3।।

卐4.6.4 एजदेजदजग्रभं यक्षुः प्राणमजग्रभम्। अङ्गान्यग्रभं सर्वा रात्रीणामतिसर्वरे।। 4।।

卐4.6.5 य आस्ते यश्च चरति यश्च तिष्ठन् विपश्यति। तेषां सं दध्मो अक्षाणि यथेदं हर्म्यं तथा।। 5।।

卐4.6.6 स्वप्तु माता स्वप्तु पिता स्वप्तु स्वा स्वप्तु विस्पतिः। स्वपन्तु सर्वे ज्ञातयस्सर्वं नि ष्वापया जनम्।। 6।।

卐4.6.7 स्वप्न सवप्नाभि करणेन सर्वं निष्वापया जनम्। ओत् सूर्यमन्यान् स्वापयाव्युषं चरतादहमिन्द्र इवारिष्टो अक्षितः।। 7।। 4 - 7

卐4.7.1 अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यामास्यादुत। यक्ष्मं शीर्षण्यं मस्तिष्काल्ललाटाद्वि वृहामसि।। 1।।

卐4.7.2 ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात्। यक्ष्मं दोषण्यमंसाभ्यामुरस्तो वि वृहामसि।। 2।।

卐4.7.3 क्लोम्नस्ते हृदयाभ्यो हलीक्ष्णात् पार्श्वाभ्याम्। यक्ष्मं मतस्नाभ्यां प्लीह्नो यक्नस्ते वि वृहामसि।। 3।।

卐4.7.4 आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोरुदरादुत। यक्ष्मं पाण्योरङ्गुलिभ्यो नखेभ्यो वि वृहामसि।। 4।।

卐4.7.5 अस्थिभ्यस्थे मांसेभ्यस्स्नावभ्यो धमनिभ्यः। यक्ष्मं पृष्टिभ्यो मज्जभ्यो नाभ्या वि वृहामसि।। 5।।

卐4.7.6 ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णीभ्यां प्रपदाभ्यां। यक्ष्मं भसद्यं श्रोणिभ्यां भंससो वि वृहामसि।। 6।।

卐4.7.7 अङ्गादङ्गाल्लोम्नो लोम्नो बद्धं पर्वणिपर्वणि। यक्ष्मं त्वचस्यन्ते वयं विष्वञ्चं वि वृहामसि।। 7।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham SGS

卐4.7.8 अङ्गादङ्गादहं तव परुषः परुषस्परि। कश्यपस्य वि वृहेण क्ष्मन्ते वि वृहामसि।। 8।। 4 - 8

卐4.8.1 अग्नी रक्षोहा तिग्मस्तिग्मश्रृङ्ग ऋषिरार्षेयः कविः कवितमः। अपाघशंसं नुदतां सहतामरातिं प्रत्यक् प्रतिहरणेनाघायतेऽघं प्रतिहरामः।। 1।।

卐4.8.2 इन्द्रो रक्षोहा तिग्मस्तिग्मश्रृङ्ग ऋषिरार्षेयः कविः कवितमः। अपाघशंसं नुदतां सहतामरातिं प्रत्यक् प्रतिहरणेनाघायतेऽघं प्रति हरामः।। 2।।

卐4.8.3 सोमो रक्षोहा तिग्मस्तिग्मश्रृङ्ग ऋषिरार्षेयः कविः कवितमः। अपाघशंसं नुदतां सहतामरातिं प्रत्यक् प्रतिहरणेनाघायतेऽघं प्रति हरामः।। 3।।

卐4.8.4 वरुणो रक्षोहा तिग्मस्तिग्मश्रृङ्ग ऋषिरार्षेयः कविः कवितमः। अपाघशंसं नुदतां सहतामरातिं प्रत्यक् प्रतिहरणेनाघायतेऽघं प्रति हरामः।। 4।।

卐4.8.5 वायू रक्षोहा तिग्मस्तिग्मश्रृङ्ग ऋषिरार्षेयः कविः कवितमः। अपाघशंसं नुदतां सहतामरातिं प्रत्यक् प्रतिहरणेनाघायतेऽघं प्रति हरामः।। 5।।

卐4.8.6 त्वष्टा रक्षोहा तिग्मस्तिग्मश्रृङ्ग ऋषिरार्षेयः कविः कवितमः। अपाघशंसं नुदतां सहतामरातिं प्रत्यक् प्रतिहरणेनाघायतेऽघं प्रति हरामः।। 6।।

卐4.8.7 धाता रक्षोहा तिग्मस्तिग्मश्रृङ्ग ऋषिरार्षेयः कविः कवितमः। अपाघशंसं नुदतां सहतामरातिं प्रत्यक् प्रतिहरणेनाघायतेऽघं प्रति हरामः।। 7।।

卐4.8.8 सविता रक्षोहा तिग्मस्तिग्मश्रृङ्ग ऋषिरार्षेयः कविः कवितमः। अपाघशंसं नुदतां सहतामरातिं प्रत्यक् प्रतिहरणेनाघायतेऽघं प्रति हरामः। ।

卐4.8.9 सूर्यो रक्षोहा तिग्मस्तिग्मश्रृङ्ग ऋषिरार्षेयः कविः कवितमः। अपाघशंसं नुदतां सहतामरातिं प्रत्यक् प्रतिहरणेनाघायतेऽघं प्रति हरामः।। 9।।

卐4.8.10 चन्द्रमा रक्षोहा तिग्मस्तिग्मश्रृङ्ग ऋषिरार्षेयः कविः कवितमः। अपाघशंसं नुदतां सहतामरातिं प्रत्यक् प्रतिहरणेनाघायतेऽघं प्रति हरामः।। 10।।

卐4.8.11 बृहस्पती रक्षोहा तिग्मस्तिग्मश्रृङ्ग ऋषिरार्षेयः कविः कवितमः। अपाघशंसं नुदतां सहतामरातिं प्रत्यक् प्रतिहरणेनाघायतेऽघं प्रति हरामः।। 11।।

卐4.8.12 प्रजापती रक्षोहा तिग्मस्तिग्मश्रृङ्ग ऋषिरार्षेयः कविः कवितमः। अपाघशंसं नुदतां सहतामरातिं प्रत्यक् प्रतिहरणेनाघायतेऽघं प्रति हरामः।। 12।।

Sri Ganapathy Sachchidananda Avadhoota Datta Peetham

卐4.8.13 परमेष्ठी रक्षोहा तिग्मस्तिग्मशृङ्ग ऋषिरार्षेयः कविः कवितमः। अपाघशंसं नुदतां सहतामरातिं प्रत्यक् प्रतिहरणेनाघायतेऽघं प्रति हरामः।। 13।। 4 - 9

卐4.9.1 संवसव इति वो नामधेयमुग्रम्पश्या राष्ट्रभृतो ह्यक्षाः। तस्मै त इन्द्रो हविषा विधेम वयं स्याम पतयो रयिणाम्।। 1।।

卐4.9.2 इदमुग्राय बभ्रवे योऽक्षेषु तनूवशी। कृततेन कलिं शिक्षाणि स नो मृडातीदृशे।। 2।।

卐4.9.3 घृतमग्ने अप्सराभ्यो वह त्वं पांशूनक्षेभ्यस्सिकता अपश्च। यथा भगं हव्यदातिं जुषाणामदन्तु देवा उभयानि हव्या।। 3।।

卐4.9.4 यो नो देवो धनमिदं दिदेश यो अक्षाणां ग्रहणं शेषणञ्च। स नोवतु हविरिदं जुषाणो गन्धर्वैस्सधमादं मदेम।। 4।।

卐4.9.5 या अप्सरसस्सधमादं मदन्त्यन्तरा हविर्धानं सूर्यञ्च। ता नो हस्तौ कृतेन सं सृजन्तु सपत्नं नः कितवं रन्धयन्तु।। 5।।

卐4.9.6 यद्देवान्नाथितो हुवे ब्रह्मचर्यं यदूषिम। अक्षां यद् बभ्रूनालभे ते नो मृडन्त्वीदृशे।। 6।।

卐4.9.7 आदिनवं प्रतिदीव्ने कृततेनास्माँ अभिक्षर। वृक्षमिवाशन्या जहि यो अस्मान् प्रतिदीव्यति।। 7।। 4 - 10

卐4.10.1 भगस्त्वेतो नयतु हस्तगृह्य बृहस्पतिः पुर एता ते अस्तु। देवस्त्वा सविता सत्यधर्मोपसद्यां नमस्यां कृणोतु।। 1।।

卐4.10.2 यामश्विना मधुकशां देवा अग्रे अजनयन्। तया त्वा पत्यामोतां कृण्मो मधुमतीं वयम्।। 2।।

卐4.10.3 उत्तरा श्वश्रुवा भव ननान्दुरुपशिक्षया। यशस्त्वा पत्यां कृण्मो भवा देवृषु प्रिया।। 3।।

卐4.10.4 अद्भिरात्मानन्तन्वं शुम्भमाना गृहान् प्रेहि महिषी भवासि। तत्र त्वादुर्गार्हपत्याय देवाः प्रजावती जरदष्टिर्यथासः।। 4।।

卐4.10.5 उदुत्तरो मारोहन्ती व्यस्यन्ती पृतन्यतः। अभ्यष्ठाश्शत्रोर्मूर्धानं सह पुत्रा विराड् भव।। 5।।

卐4.10.6 यद्गिरिषु पर्वतेषु गोष्वश्वेषु यन्मधघु। येनाक्षा अभ्यषिच्यन्त तेनाहमस्यामूर्धानमभि षिञ्चामि नार्याः।। 7।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐4.10.7 यद्वर्चो गवि कल्याणे यद्वा सूयवसे तृणे। अभ्यञ्जनस्य यद्वर्चस्तेन मानज्मि वर्चसा।। 8।
(इति सप्तर्चो नाम चतुर्थकाण्डे द्वितीयोऽनुवाकः) 4 - 11

卐4.11.1 येनाचरदुशना काव्योग्रे विद्वान् क्रतूनामुत देवतानाम्। स हृदयेन हविषा जुहोमि सध्रीचीनं वो मनोऽस्तूग्रम्।। 1।।

卐4.11.2 महत् सत्यं महद्धविरुशना काव्यो महान्। देवानामुग्राणां सतां हृदयानि सहाकरम्।। 2।।

卐4.11.3 अहं सत्येन सयुजा चराम्यहं देवीमनुमतिं प्र वेद। इन्द्रो देवानां हृदयं वो अस्तु सध्रीचीनं वो मनोऽस्तूग्रम्।। 3।।

卐4.11.4 त्वष्टा वायुः कश्यप इन्द्रमग्निर्मनसान्वायन् हविषस्पदेन। अविन्दञ्छक्रं रजसि प्रविष्टं सध्रीचीनं वो मनोऽस्तूग्रम्।। 4।।

卐4.11.5 येनेमे द्यावापृथिवी विचष्कभुर्येनाभवदन्तरिक्षं स्वर्यत्। मनसा विद्वान् हविषा जुहोमि सध्रीचीनं वो मनोऽस्तूग्रम्।। 5।।

卐4.11.6 द्यावापृथिवी हृदयं ससूवतुर्येनेदं त्वष्टा विकृणोति धूरः। तस्योशना क्रतुभिस्संविदानश्चित्रं विवेद मनसि प्रविष्टम्।। 6।।

卐4.11.7 चित्तं चैतदाकूतिश्च येन देवा विषेहिरे। एतत् सत्यस्य श्रद्धय ऋषयः सप्त जुह्वति।। 7।। 4 - 12

卐4.12.1 त्वया मन्यो सरथमारुजन्तो हर्षमाणासो हृषिता मरुत्वन्। तीक्ष्णेषव युधा संशिशाना उप प्रयन्तु नरो अग्निरूपाः।। 1।।

卐4.12.2 अग्निरिव मन्यो तरसा सहस्व सेनानिर्नस्सहुरे हूत एधि। जित्वाय शत्रून् वि भजासि वेद ओजो मिमानो वि मृधो नुदस्व।। 2।।

卐4.12.3 सहस्व मन्यो अभिमातिमस्मे रुजन्मृणन् प्रमृणन्नेहि शत्रून्। उग्रं ते शर्धो नन्वारुरुध्रे वशी वशं नयासा एकज त्वम्।। 3।।

卐4.12.4 एको बहुनामसि मन्यवीडिता पशून् पशून् युद्धाय सं शीशाधि। अकृत्तरुक् त्वया युजा वयं द्युमन्तं घोषं विजयाय कृण्महे।। 4।।

卐4.12.5 विजेष कृदिन्द्र इवानवब्रवोऽस्माकं मन्यो अधिपा भवेह। प्रियं ते नाम सहुरे गृणीमसि विद्मातमुत्सं यत आबभूविथ।। 5।।

卐4.12.6 आभूत्या सहसा वज्र सायक सहो बिभर्ष्यभिभूत उत्तरम्। क्रत्वा नो मन्यो लह मेद्येधि महाधनस्य पुरुहूत संसृजि।। 6।।

卐4.12.7 संसृष्टं धनमुभयं समाकृतमस्मभ्यं दत्तं वरुणश्च मन्यो। भियो दधाना हृदयेषु शत्रवः पराजिता यन्तु परमां परावतम्।। 7।। 4 - 13

卐4.13.1 शन्नो देवी पृश्निपर्ण्यशं निर्ऋतये करत्। उग्रा हि कण्व जम्भनी ताम त्वाहार्षं सहस्वतीम्।। 1।।

卐4.13.2 सदान्वाघ्नी प्रथमा पृश्निपर्ण्यजायत। तया कण्वस्याहं शिरश्चनद्मि शकुनेरिव।। 2।।

卐4.13.3 ऊर्जभृतं प्राणभृतं प्रजानामुत तर्पणीम्। सर्वास्ताः पृश्निपर्णीतः कण्वामा अनीनशत्।।

卐4.13.4 समाकृत्यैना निरज तीक्ष्णशृङ्ग इव ऋषभः। अरायं कण्वं पाप्मानं पृश्निपर्णि सहस्वति।। 4।।

卐4.13.5 त्वमग्ने पृश्निपर्ण्यग्निरिव प्रदहन्निहि कण्वा जीवितयोपनी। गिरिमेना आवेशय तमांसि यत्र गच्छांस्तत् पापीरपि पादय।। 5।।

卐4.13.6 अराय मसृक्पावानं यश्चस्फातिं जिहीर्षति। गर्भादं कण्वं नाशय पृश्निपर्णि सहस्वति।। 6।।

卐4.13.7 या नो गा या नो गृहां या नस्स्फातिमुपाहरान्। ता उग्रे पृश्निपर्णि त्वं कण्वामा नीनश इतः।। 7।। 4 - 14

卐4.14.1 यस्मिन्नाशीः प्रतिहित इदं तच्छल्यो वेणुर्वेष्टनं तेजनं च। सूनुर्जनित्रीं जनयेहि शृण्वन्नयं त आत्मेत इत प्रहितः।। 1।।

卐4.14.2 अस्थि भित्वा यदि मज्ज्ञः प्रपाथ यदि वासि रतः पुरुषन्तिकामे। उर्वीं गव्युतिमभ्येह्यर्वाङ् पश्चा रश्मीनुद्यतः सूर्यस्य।। 2।।

卐4.14.3 मातरिश्वा पवमानस्त्वायं सूर्य आभ्राजन् तन्वा दृशेकः। अस्नो गन्धात् पुवसः प्र च्यवस्व वि मुच्यस्व योन्या याते अत्र।। 3।।

卐4.14.4 प्र च्यवस्वातो अध्येह्यर्वाङ् अर्थास्ते विद्म बहुधा बहिर्ये। इमास्स्वसारो अयमित् पितात इयं ते माते ममेहि बन्धुम्।। 4।।

卐4.14.5 अमित्रैरस्ता यदि वासि मित्रैर्देवैर्वा देवि प्रहितावसृष्टा। विद्वान् शृङ्गं पुरुषे जहाथ वाणश्शृङ्गश्शिखरस्सं सतामितः।। 5।।

卐4.14.6 सिखासु सक्तो यदि वास्यग्रे यदि वासि सक्तः पुरुषस्य मांसे। दधिर्नः पाशाँ अपवृह्य मुक्त्वाक्षिशल्यः कृणुतामायनाय।। 6।।

卐4.14.7 हस्ताद्धस्तं समयो भ्रियमाणो बहिष्ठ्वा पश्यां वीरुधां बलेन। अद्भिः प्रणिक्तश्शयासा अभ्यक्तः कोशे यामीनां निहितो अहिंसः।। 7।।

卐4.14.8 षष्टि रात्रे षष्टिकस्य शल्यस्य परिधिष्कृतः। इतस्तमद्य ते वयमास्थानाच्यावयामसि।। 8।।

4 - 15

卐4.15.1 सं मज्जा मज्ज्ञा भवतु समु ते परुषा परुः। सं ते राष्ट्रस्य विस्रस्तं सं स्नाव समु पर्व ते।। 1।।

卐4.15.2 मज्जा मज्ज्ञा सं धीयतामस्थ्नास्थ्यपि रोहतु। स्नाव ते सं दध्मस्स्नान्ना चर्मणा चर्म रोहतु।। 2।।

卐4.15.3 लोम लोम्ना सं धीयतां त्वचासं कल्पया त्वचम्। असृक्ते अस्मा रोहतु मांसं मांसेन रोहतु।। 3।।

卐4.15.4 रोहिणी सं रोहिण्यस्थ्नः शीर्णस्य रोहिणी। रोहिण्यामह्नि जातासि रोहिण्यस्योषधे।। 4।।

卐4.15.5 यदि शीर्णं यदि द्युत्तमस्ति पेष्ट्रं त आत्मनः। धाता तत् सर्वं कल्पयात् सं दधत् परुषा परुः।। 5।।

卐4.15.6 यदि वज्रो विसृष्टस्त्वार काटात् पतित्वा यदि वा विरिष्टम्। वृक्षाद्वा यदवसद्दशशीर्ष ऋभू रथस्येव सं दधामि ते परुः।। 6।।

卐4.15.7 उत्तिष्ठ प्रेहि समिधाय ते परुस्सं ते धाता दधातु तन्वो विरिष्टम्। रथस्सुचक्रस्सुपवीर्यथैति सुखस्सुनाभि प्रति तिष्ठ एवम्।। 7। (इति सप्तर्चो नाम चतुर्थकाण्डे तृतीयोऽनुवाकः) 4 - 16

卐4.16.1 उद्यन्नादित्यो घुणान् हन्तु सूर्यो निम्रोचन् रश्मिभिर्हन्तु। तावन्नो अधि संहितम्।। 1।।

卐4.16.2 अप्सरा मूलमखनद् गन्धर्वः पर्यब्रवीत्। तेव वो वृत्रहा सूर्यो नि जम्भ्यां अमृचद्घुणान्।। 2।।

卐4.16.3 घुणान् हन्त्वायती घुणान्हन्तु परायती। घुणानवघ्नती हन्तु घुणान् पिनष्टु पिंषती। 3।।

卐4.16.4 घुणा न किञ्च नेह वः प्रति बुद्धा अभूतन। प्रदोषं तस्करा इव।। 4।।

卐4.16.5 घुणानामद्यतो ज्येष्ठः कनिष्ठ उत मध्यमः। हतावः सर्वे ज्ञातयो हतामाता हतः पिता।। 5।।

卐4.16.6 यथा फेन उदकेन दद्दशानो निजस्यति। एवा वयं घुणान् सर्वान् साकं वाचा नि जासयामसि।। 6।।
卐4.16.7 नि गोवो गोष्ठे असदन्निमृगासो अविक्षत। नित्यमादित्य रश्मिभिर्घुणान् सर्वाँ अजीजसः।। 7।।
卐4.16.8 उद्यन् रश्मिना तनुष्व वाणवद्भिस्समर्पय। घुणांस्त्वं सर्वानादित्य घोरया तन्वा तप।। 8।।
4 - 17
卐4.17.1 य आनतः पराणतो दारोरिवा पतक्षणम्। शर्कटो नाम वा असि कुतस्त्वं विषवानसः।। 1।।
卐4.17.2 य उभयेन प्रहरसि पुच्छेन चास्ये न च। आस्ये च न ते विषं कुतस्ते पुच्छधावसत्।। 2।।
卐4.17.3 विदुत् सुरस्य दानवस्य तस्य त्वं न पादसि। तस्याग्रे रसं विषं ततस्तु वारसं विषम्।। 3।।
卐4.17.4 अरसारसं त्वाकरं वध्रे वध्रिं त्करम्। वध्रिं त्वा चक्रुर्देवा अमृतास आसुरम्।। 4।।
卐4.17.5 इयत्तकस्स कुम्भक स्तोकं भिनद्मि शम्यया। ततो विषं परासिचमपाचीमनु संवतम्।। 5।।
卐4.17.6 इमाः पश्चामयूर्यः सप्तस्वसारो अग्रुवः। तास्ते विषं विजह्रिर उदकं कुम्भिनीरिव कूपात् कूलजनीरिव।। 6।।
卐4.17.7 नवानां नवतीनां विषस्य रोपुषीणाम्। सर्वासामग्रभं नाम वीतापेतारसं विषम्।। 7।। 4 - 18
卐4.18.1 व्रातमहमपक्ष्णानां व्रातं मुण्डीयसामुत। व्रातं मुण्डिव्लानामहं प्रध्वाङ्क्षाँ इव चातये।। 1।।
卐4.18.2 प्रवक्ता प्रमादैता निद्रातन्द्रीस्तृतीयकः। तान् जङ्गिडस्याग्निना सर्वान्प्रति दहामसि।। 2।।
卐4.18.3 अशुद्धान्नः परि पाहि रक्षोभ्य उत जङ्गिड। यातुधानात् किमीदिनस्तस्मान्नः पाहि जङ्गिड।। 3।।
卐4.18.4 अप्सराभ्यो गन्धर्वेभ्यो देवेभ्यो असुरेभ्यः। अथो सर्वस्मात् पाप्मनस्तस्मान्नः पाहि जङ्गिड।। 4।।
卐4.18.5 निते शत्रून् दहति देवो अग्निर्निररातिममतिं यातुधानान्। आ याहि शत्रून् दूरितापघ्नञ्छतान्नो यक्ष्मेभ्यः परि पाहि जङ्गिड।। 5।।

卐4.18.6 अकर्माग्निमधिपामस्य देवमन्वारप्सि सहसा दैव्येन। सहस्वानस्सहसा पातु जङ्गिडो यथा जयोम पृतनाज्येषु।। 6।।

卐4.18.7 सत्यो अग्निस्सत्या आपो सत्ये मे द्यावापृथिवी विश्वसम्भुवौ। सत्यमिदं ब्रह्मास्माकं कृतमस्तु यमबध्नादुशनेन्द्राय तं ते बध्नामि जङ्गिडम्।। 7।। 4 - 19

卐4.19.1 इयत्तिका शकुन्तिका सका जघास ते विषम्। माहं मृषि मो असौ पुरुषो मृत। स च न मरति मा वयं मराम। आरे अस्य योजनं हरिष्ठा मधु त्वा मधुला करत्।। 1।।

卐4.19.2 सूर्ये विष मा सृजामि दृतिं सुरावतो गृहे। माहं मृषि मो असौ पुरुषो मृत। स च न मरति मा वयं मराम। आरे अस्य योजनं हरिष्ठा मधु त्वा मधुला करत्।। 2।।

卐4.19.3 त्रिषप्ता विस्फुलिङ्गका विषस्य पुष्पमक्षकम्। माहं मृषि मो असौ पुरुषो मृत। स च न मरति मा वयं मराम। आरे अस्य योजनं हरिष्ठा मधु त्वा मधुला करत्।। 3।।

卐4.19.4 आल्वन्तरुटं विषं विदारी करम्भो अरसं विषम्। माहं मृषि मो असौ पुरुषो मृत। स च न मरति मा वयं मराम। आरे अस्य योजनं हरिष्ठा मधु त्वा मधुला करत्।। 4।।

卐4.19.5 वारुग्रमरसं विषमग्निश्च विषचर्षणिम्। माहं मृषि मो असौ पुरुषो मृत। स च न मरति मा वयं मराम। आरे अस्य योजनं हरिष्ठा मधु त्वा मधुला करत्।। 5।।

卐4.19.6 शकुन्तिका मे अब्रवीद् विषपुष्पं धयन्तिका। माहं मृषि मो असौ पुरुषो मृत। स च न मरति मा वयं मराम। आरे अस्य योजनं हरिष्ठा मधु त्वा मधुला करत्।। 6।।

卐4.19.7 न रोपयति न मादयति न विषं हन्ति पूरुषम्। माहं मृषि मो असौ पुरुषो मृत। स च न मरति मा वयं मराम। आरे अस्य योजनं हरिष्ठा मधु त्वा मधुला करत्।। 7।।

卐4.19.8 नवानां नवतीनां विषस्य रोपुषीणाम्। सर्वासामग्रभं नाम वीतापेतारसं विषम्।। 8।। 4 - 20

卐4.20.1 मधुमती पत्ये अस्मि जाराय मधुमत्तरा। अथो मधव्यं मे भंसो मधुनिपदने अहम्।। 1।।

卐4.20.2 मधुना मा सं सृजामि मासरेण सुरा इव। वाञ्च इयं मधुना संसृष्टाक्षौ मे मधु सं दृशी।। 2।।

卐4.20.3 मधु द्यौर्मधु पृथिवी मध्विन्द्रो मधु सूर्यः। स्त्रियो या जज्ञिरे मधु ताभ्योहं मधुमत्तरा।। 3।।

卐4.20.4 मधुमति रोषधय आपो मधुमतीरुत। गावो या जज्ञिरे मधु ताभ्योहं मधुमत्तरा।। 4।।

卐4.20.5 मधोर्जात मधुघो वीरुधां बलवत्तमः। तेनाहं सर्वस्मै पुंसे कृण्वे निकरणं हृदि।। 5।।

卐4.20.6 यथाश्व बन्धनेष्ठो वडवामभिधावति। एवात्वमुग्र ओषधेऽमुं कनिक्रदतमा नय।। 6।।
卐4.20.7 अङ्गो नु मोदिव श्वसो अङ्गो नु मोदिव स्तनः। अन्या विवित् स मा नो। अन्याः परा जिघांसन्। मामनु प्र ते मनश्छाया यन्तुमिवान्वयत्।। 7। (इति सप्तर्चौ नाम चतुर्थकाण्डे चतुर्थोऽनुवाकः) 4 - 21
卐4.21.1 खनन्ति त्वा तैमाता दासा अरसबाहवः। दास्यसि प्रक्रीरस्युत्खातमरसं विषम्।। 1।।
卐4.21.2 अदन्ति त्वा कक्कटासः कुरुङ्गा अधि सानुषु। पापी जग्ध प्रसूरस्यभ्रिखाते न रूरुपः।। 2।।
卐4.21.3 अव ज्यामिव धन्वनश्शुष्मं तिरामि ते विषम्। प्र रोपीरस्य पातय सूर्यः पूर्वा इवोषसः।। 3।।
卐4.21.4 सिन्धुः पश्चात् परिहितः सूर्यस्योदयनं पुरः। ततो यदन्तरा वनं तत्सर्वं विषदूषणम्।। 4।।
卐4.21.5 मधु त्वा मधुकृत् कृणोतु पितुं त्वा पितुकृत् कृणोतु। उतो निषद्य पातवे अथो ऊर्ध्वाय तिष्ठते।। 5।।
卐4.21.6 जघास त्वा लोमकर्णस्तन्यासपरुरुष्णियाम्। तद्वैमीश्चक्रिरे स्रजस्सर्वं महिषदो विषम्।। 6।।
卐4.21.7 उर्व्या उरुक्षितस्तुराया आतुरस्य च। भूम्या हि जग्रभं नाम विषं वारयतामिति विषं दूषयतादिति।। 7।। 4 - 22
卐4.22.1 अहं वा इन्द्र मातरमिन्द्रौजामिन्द्रभ्रातरम्। इन्द्राधिवक्रां वीरुधमाहार्षं विषदूषणीम्।। 1।।
卐4.22.2 यत्किञ्च पद्वच्छफवत् यत्काण्डि यच्च पुष्पवत्। यदेजति प्रजापतिस्सर्वं तद्विषदूषणम्।। 2।।
卐4.22.3 सिन्धुः पश्चाद्वरुणः सूर्यस्योदयनं पुरः। ततो यदन्तरा विषं तद्वाचा दूषयामसि।। 3।।
卐4.22.4 यावत् सूर्यो वि तपति यावच्चाभि वि पश्यति। तावद्विषस्य दूषणं वचो निर्मन्त्रयामहे।। 4।।
卐4.22.5 जिह्वा मे मधु संस्रावा जिह्वा मे मधुवादिनी। जिह्वे वर्चस्वती भव माप ते पुरुषो रिषत्।। 5।।
卐4.22.6 हा हैं कल्याणि सुभगे पृश्निपर्ण्यनातुरे। इमं मे अद्य पूरुषं दीर्घायुत्वायोन्नय।। 6।।
卐4.22.7 याभ्यो वर्षन्ति वृष्टयो याभिर्जीवन्त्यघ्न्याः। ता मे विषस्य दूषणीस्सविता व्यकाशयत्।। 7।। 4 - 23

卐4.23.1 प्रजापतिष्ट्वा बध्नात् प्रथममस्तृतं वीर्याय कम्। तं ते बध्नाम्यायुषे वर्चस ओजसे च बलाय चास्तृतस्त्वाभि रक्षतु।। 1।।

卐4.23.2 ऊर्ध्वस्तिष्ठ रक्षन्नप्रमादस्तृतेमं मा त्वा दभन् पणयो यातुधानाः। इन्द्र इव दस्यू नव धूनुस्व पृतन्यतः सर्वाञ्छत्रून् वि षहस्वास्तृतस्त्वाभि रक्षतु।। 2।।

卐4.23.3 शतं च नः प्रहरन्तोऽभिघ्नन्तो न तस्तिरे। तस्मिन्निन्द्रः पर्यधत्त चक्षुः प्राणमथो बलमस्तृतस्त्वाभि रक्षतु।। 3।।

卐4.23.4 इन्द्रस्य त्वा वर्मणा परि धापयामो यो देवानामधिराजो बभूव। पुरस्त्वा देवाः प्र णयन्तु सर्वेऽस्तृतस्त्वाभि रक्षतु।। 4।।

卐4.23.5 अस्मिन्मणावेकशतं वीर्याणि सहस्रं प्राणा अस्मिन्नस्तृते। व्याघ्रश्शत्रुनधि तिष्ठ सर्वान् यस्त्वा पृतन्यादधरः सोऽस्त्वस्तृतस्त्वाभि रक्षतु।। 5।।

卐4.23.6 यथा त्वमुत्तरो असो असपत्नस्सपत्नहा। सजातानामसो वशी तथा त्वा सविता करदस्तृतस्त्वाभि रक्षतु।। 7।। 4 - 24

卐4.24.1 अपश्च रपश्चोष्मा च वाष्पश्च। शोकश्चाभिशोकश्च तृतीयेकश्च परेपरश्च ते तक्मानो इत नश्यत।। 1।।

卐4.24.2 वेद वै ते तक्मन्नामाग्निष्टं नामासि। तं त्वेतोप नयामश्शनितक्मा।। 2।।

卐4.24.3 वृत्रस्य हरोसि नभसो नपात्। द्यौश्चास्मत् पृथिवी च तक्मानं नाशयतामितः।। 3।।

卐4.24.4 पञ्चप्सिनिर्नाम ते मातास उ एकप्सि निरुच्यसे। तस्याहं वेद ते नाम स तक्मन् निरतो द्रव।। 4।।

卐4.24.5 औदुम्बलश्च नामासि प्रिया तिथिश्च। तं त्वेतो नाशयामसि ब्रह्मणा वीर्यावता।। 5।।

卐4.24.6 योऽसि जल्पश्च लपंश्चावां च तपश्च। तृतीयेकश्च मौञ्जिगलश्च ते तक्मान इतो नश्यत।। 6।।

卐4.24.7 विकिलीतो विलोहित विकाशक्रन्दरञ्जन। गिरिं गच्छ धूमकेतो हृषे नामासि सन्तु ते।। 7।।

卐4.24.8 वृहत्त्वमग्ने रक्षो अधमं जहि मध्यमं न्युत्तमं शृणीहि। शन्नो अग्निर्ज्योतिरनिको अस्तु शं द्यावापृथिवी अनेहसा।। 8।।

卐4.24.9 मातेव पितेवाभि रक्षतैनं मुञ्चतैनं पर्यं हसः।। 9।। 4 -25

卐4.25.1 वाताज्जातो अन्तरिक्षाद्विद्युतो ज्योतिषस्परि। स नो हिरण्यजाश्शङ्खः कृशनः पात्वंहसः।। 1।।
卐4.25.2 हिरण्य नामेकोऽसि सोमादधि जज्ञिषे। रथेसि दार्शत इषुधौ रोचनस्त्वम्।। 2।।
卐4.25.3 यो अग्रतो रोचनावान् समुद्रादधि जज्ञिषे। शङ्खेन हत्वा रक्षांस्यत्रिणो वि षहामहे।। 3।।
卐4.25.4 ये अत्रिणो यातुधाना रक्षसो ये किमीदिनः। सर्वाञ्छङ्ख त्वया वयं विषूचो वि षहामहे।। 4।।
卐4.25.5 शङ्खेनामीवाममतिं शङ्खे नोत सदान्वाः। शङ्खो नो विश्वभेषजः कृशनः पात्वं हसः।। 5।।
卐4.25.6 दिवि जातस्समुद्रतस्सिन्धुतस्पर्याभृतः। स नो हिरण्यजाः शङ्ख आयुष्प्रतरणो मणिः।। 6।।
卐4.25.7 देवानामस्थि कृशनं बभूव तदात्मन्वच्चरत्यप्स्वन्तः। तं ते बध्नाम्यायुषे वर्चस ओजसे च बलाय च कार्शनस्त्वाभि रक्षतु।। 7। (इति सप्तर्चो नाम चतुर्थकाण्डे पञ्चमोऽनुवाकः) 4 - 26
卐4.26.1 कन्या वारवायती सोममपि श्रुताविदत्। अस्तं भरन्त्यब्रवीदिन्द्राय सुनोमि त्वा शक्राय सुनोमि त्वा।। 1।।
卐4.26.2 असौ य एषि वीरको गृहं गृहं विचाकशत्। इमं जम्भसुतं पिब धानावन्तं करम्भिणमपूपवन्तमुक्थिनम्।। 2।।
卐4.26.3 कुविच्छकत् कुवित्करत् कुविन्नो वस्यसस्करत्। कुवित्पति द्वितो यतीरिन्द्रेण सङ्गमामहै।। 3।।
卐4.26.4 आ च न त्वा चकित्सामोधि च न त्वा नेमसि। शनैरिव शनकैरिवेन्द्रायेन्द्रो परिस्रव।। 4।।
卐4.26.5 इमानि त्रीणि विष्टपा तानिन्द्रो वि रोहय। शिरस्त तस्योर्वरामादिदं म उपोदिरे।। 5।।
卐4.26.6 असौ च या न उर्वरादिमां तन्वं मम। अथो ततस्य यच्छिरस्सर्वा ता रोमशा कृधि।। 6।।
卐4.26.7 खे रथस्य खेऽनसः खे युगस्य शतक्रतो। अपालामिन्द्र त्रिष्पुत्व्यकृणोस्सूर्य त्वचम्।। 7।। 4 - 27
卐4.27.1 दिवस्पृष्ठे मधुपृचस्सुपर्णाः पञ्चाशत्ते भुवनस्य गोपाः। आनुजावरमनुरक्षन्त उग्रा येषामिन्द्रं वीर्यायैरयन्त।। 1।।
卐4.27.2 पुरोहितः परमेष्ठी स्वराड् ज्यायाभीवर्धमस्मा अकृणोद् बृहस्पतिः। तेन सपत्नानधरान् कृणुष्व क्षेमे पशून् बहुलान् वर्धयित्वा जैत्रायोद्यातु रथवाहनं ते।। 2।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐4.27.3 गोभाजमं सं तव ये समानास्सर्वे समग्रा दधृगा भरन्त। अभिवर्धस्व भ्रातृव्यानभि येत्वा पृतन्यतः।। 3।।

卐4.27.4 नि पिण्ढि सर्वान् धूर्वतोऽभीवर्धो यथा ससि। अभीवर्धमभीभवमभीषेणं महागणम्। विशस्त्वा सर्वा आयन्त्वापो दिव्याः पयस्वतीः।। 4।।

卐4.27.5 अभि वर्धस्व प्रजया वावृधनोऽभ्यनीकैः पशुभिर्भवाति। ब्रह्मराजन्यैर्विश्वैर्वावृधानः शूद्रैरतीहि सभया पृतन्यतः।। 5।।

卐4.27.6 वर्धस्व क्षेत्रैः प्रथस्व प्रजया वर्धस्व वीरैः पशुभिर्बहुर्भव। श्रिया शुक्लैर्यतमस्त्वा पृतन्यादाप्तस्तुभ्यं स बलि हृत्या तिष्ठतु।। 6।। 2 - 28

卐2.28.1 इन्द्रं मित्रं वरुणमग्निमूतये मारुतं शर्धो अदितिं हवामहे। रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन।। 1।।

卐2.28.2 त आदित्या आ गता सर्वतातये भूत देवा वृत्रतूर्येषु संभुवः। रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन।। 2।।

卐2.28.3 अवन्तु नः पितरस्सुप्रवाचना उच देवी देवपुत्रे ऋतावृधा। रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन।। 3।।

卐2.28.4 नराशंसं वाजिनवाजयन्तं क्षयद्वीरं पूषणं सुम्नैरीमहे। रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन।। 4।।

卐2.28.5 बृहस्पते सदमिन्नस्सुगं कृधि शँयोर्यत्ते मनुर्हितं तदीमहे। रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन।। 5।।

卐2.28.6 इन्द्रं कुत्सो वृत्रहणं शचीपतिं काटे निवाढ ऋषिरह्वदूतये। बृहस्पते सदमिन्नस्सुगं कृधि शँयोर्यत्ते मनुर्हितं तदीमहे। रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन।। 6।।

卐2.28.7 देवैर्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन्। तन्नो मित्रो वरुणो मामहन्तामदितिस्सिन्धुः पृथिवी उत द्यौः।। 7।। 4 - 29

卐4.29.1 अप नश्शोशुचदघम्। अग्ने शुशुग्ध्या रयिम्।। 1।।

卐4.29.2 अप न श्शोशुचदघम्। सुक्षेत्रिया सुगातु या वसु या च यजामहे।।

卐4.29.3 अप नश्शोशुचदघम्। प्र यद्भिन्दिष्ठ एषां प्रास्मा कासश्च सूरयः।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐4.29.4 अप नश्शोशुचदघम्। प्र यत्ते अग्ने सूरयो जायेमहि प्र ते वयम्।। 4।।

卐4.29.5 अप नश्शोशुचदघम्। प्र यदग्ने सहस्वते विश्वतो यन्ति भानवः।। 5।।

卐4.29.6 अप नश्शोशुचदघम्। त्वं हि विश्वतो मुख विश्वतः परि भूरसि।। 6।।

卐4.29.7 अप नश्शोशुचदघम्। द्विषो न विश्वतो मुखाति नावेव पारय।। 7।। 4 - 30

卐4.30.1 देवा श्शरणकृत श्शरणा मे भवत प्राच्या दिशोऽग्निना राज्ञाध्यक्षेण। यशा भूयासं यशसं मा कृणुत चारु मन्नादं परा द्विषन्तं श्र्णीत।। 1।।

卐4.30.2 देवा श्शरणकृत श्शरणा मे भवत दक्षिणाया दिश इन्द्रेण राज्ञाध्यक्षेण। यशा भूयासं यशसं मा कृणुत चारु मन्नादं परा द्विषन्तं श्र्णीत।। 2।।

卐4.30.3 देवा श्शरणकृत श्शरणा मे भवत प्रतीच्या दिशो वरुणेन राज्ञाध्यक्षेण। यशा भूयासं यशसं मा कृणुत चारु मन्नादं परा द्विषन्तं श्र्णीत।। 3।।

卐4.30.4 देवा श्शरणकृत श्शरणा मे भवतोदीच्या दिशस्सोमेन राज्ञाध्यक्षेण। यशा भूयासं यशसं मा कृणुत चारु मन्नादं परा द्विषन्तं श्र्णीत।। 4।।

卐4.30.5 देवा श्शरणकृत श्शरणा मे भवत ध्रुवाया दिशो विष्णुना राज्ञाध्यक्षेण। यशा भूयासं यशसं मा कृणुत चारु मन्नादं परा द्विषन्तं श्र्णीत।। 5।।

卐4.30.6 देवा श्शरणकृत श्शरणा मे भवतोर्ध्वाया दिशो बृहस्पतिना राज्ञाध्यक्षेण। यशा भूयासं यशसं मा कृणुत चारु मन्नादं परा द्विषन्तं श्र्णीत।। 6।।

卐4.30.7 देवा श्शरणकृत श्शरणा मे भवतोत्तमाया दिशः प्रजापतिना राज्ञाध्यक्षेण। यशा भूयासं यशसं मा कृणुत चारु मन्नादं परा द्विषन्तं श्र्णीत।। 7।।

卐4.30.8 देवा श्शरणकृत श्शरणा मे भवत परमाया दिशः परमेष्ठीना राज्ञाध्यक्षेण। यशा भूयासं यशसं मा कृणुत चारु मन्नादं परा द्विषन्तं श्र्णीत।। 8।।

卐4.30.9 देवा श्शरणकृत श्शरणा मे भवत सर्वाभ्यो दिग्भ्य ईशानेन राज्ञाध्यक्षेण। यशा भूयासं यशसं मा कृणुत चारु मन्नादं परा द्विषन्तं श्र्णीत।। 9। (इति सप्तर्चो नाम चतुर्थकाण्डे षष्ठोऽनुवाकः)

4 - 31

卐4.31.1 प्रातरग्निं प्रातरिन्द्रं हवामहे प्रातर्मित्रावरुणा प्रातरश्विना।।

卐4.31.2 प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातस्सोममुत रुद्रं हुवेम।। 1।।

卐4.31.3 प्रातर्जितं भगमुग्रं हुवेम वयं पुत्रमदितेर्यो विधर्ता। आध्रश्चिद् यं मन्यमानस्तुरश्चिद् राजा चिद् यं भगं भक्षित्याह।। 2।।

卐4.31.4 भग प्रणेतर्भग सत्यराध भगेमा धियमुदवा ददन्नः। ङग प्रणो जनय गोभिरश्वैर्भग प्र नृभिर्नृवन्त स्स्याम।। 3।।

卐4.31.5 उतेदानीं भगवन्तस्स्यामोत प्रपित्व उत मध्ये अह्नाम्। उतोदिते मघवन् सूर्ये वयं देवानां सुमतौ स्याम।। 4।।

卐4.31.6 भग एव भगवाँ अस्तु देवास्तेन वयं भगवन्तस्स्याम। तं त्वा भगस्सर्व इज्जोहवीति स नो भग पुरयेता भवेह।। 5।।

卐4.31.7 समध्वरायोषसो नमन्त दधिक्रावेव शुचये पदाय। अर्वाचीनं वसुविदं भगं नो रथमिवाश्वा वाजिन आवहन्तु।। 6।।

卐4.31.8 अश्वावतीर्गोमतीर्न उषासो वीरवती स्सदमुच्छन्तु भद्राः। घृतं दुहाना विश्वतः प्रपीता यूयं पात स्वस्तिभिस्सदा नः।। 7।। 4 -32

卐4.32.1 यस्ते मन्योऽविदधद्वज्र सायक सह ओजः पुष्यति विश्वमानुषक्। साह्याम दासमार्यं त्वया युजावयं सहस्कृतेन सहसा सहीयसा।। 1।।

卐4.32.2 मन्युरिन्द्रो मन्युरेवास देवो मन्युर्होता वरुणो जातवेदाः। मन्युर्विशो ईडते मानुषीर्याः पाहि नो मन्यो तपसा सजोषाः।। 2।।

卐4.32.3 अभिही मन्यो तपस्स्तवीयान्तपसा युजा वि जहि शत्रून्। अमित्रहा वृत्रहा दस्युहा च विश्वावसून्याभरा त्वं नः।। 3।।

卐4.32.4 त्वं हि मन्यो अभिभूत्यो जाः स्वयम्भूर्भामो अभिमातिषाहः। विश्वचर्षणि स्सहुरिस्सहियाँ अस्मास्वोजः पृतनासु धेहि।। 4।।

卐4.32.5 अभागस्सन्नप परेतो अस्मि तव क्रत्वा तविषस्य प्रचेतः। तं त्वा मन्यो अक्रतुर्जिहीडाहं स्वा तनूर्बलदावा न एहि।। 5।।

卐4.32.6 अयं ते अस्म्युप न एह्यर्वाङ् प्रतीचीनस्सहुरे विश्वदावन्। मन्यो लज्रिन्नुप न आ ववृत्स्व हनाव दस्यूँरुत वोध्यापे।। 6।।

卐4.32.7 अभि प्रेहि दक्षिणतो भवा नो अधावृत्राणि जङ्घनाव भूरि। जुहोमि ते धरुणो मध्वो अग्रमुभा उपांशु प्रथमा पिबेव।। 7।। 4 - 33

卐4.33.1 अग्नेर्मन्वे प्रथमस्य प्रचेतसः पाञ्चजन्यस्य बहुधा यमिन्धते। विशो विशः प्रविशिवां समीमहे स नो मुञ्च त्वं हसः।। 1।।

卐4.33.2 सुजातं जातवेदसमग्निं वैश्वानरं विभुम्। हव्य वाहं हवामहे स नो मुञ्च त्वं हसः।। 2।।

卐4.33.3 यथा हव्यं वहसि जातवेदो यथा यज्ञं कलिपयसि प्रजानन्। एवा देवेभ्यस्सुमतिं ह्यावह स नो मुञ्च त्वं हसः।। 3।।

卐4.33.4 या मन्या मन्नुपयुक्तं वहिष्ठं कर्मन् कर्मन्नाभगम्। अग्निमीडे रक्षोहणं यज्ञवृधं घृताहुतं स नो मुञ्च त्वं हसः।। 4।।

卐4.33.5 येन ऋषयो बलमद्योतयन् युजा येना सुराणामयुवन्त मायाः। येनाग्निना पणीनिन्द्रो जिगाय स नो मुञ्च त्वं हसः।। 5।।

卐4.33.6 येन देवा अमृतमन्वविन्दन् येनौषधीर्मधुमतीरकृण्वन्। येनेदं स्वराभरन् स नो मुञ्च त्वं हसः।। 6।।

卐4.33.7 यस्येदं प्रदिशि यद्विरोचते यज्जातं जनितव्यञ्च केवलम्। स्तौम्यग्निं नाथितो जोहवीमि स नो मुञ्च त्वं हसः।। 7।। 4 - 34

卐4.34.1 वायोस्सवितुर्विदथानि मन्महे यावात्मन्वद्विदथो यौ च रक्षथः। यौ विश्वस्य परिभू बभूवथुस्तौ नो मुञ्च त्वं हसः।। 1।।

卐4.34.2 ययोः संख्याता वरिमाणि पार्थिवा याभ्यां रजो गुपितमन्तरिक्षम्। ययोः प्रयां नानु कश्चनानशे तौ नो मुञ्च त्वं हसः।। 2।।

卐4.34.3 तव व्रते नि विशन्ते जनासस्त्वय्युदिते प्रेरते चित्रभानो। युवं वायुस्सविता च भुवनानि रक्षथस्तौ नो मुञ्च त्वं हसः।। 3।।

卐4.34.4 प्रसुमतिं सवितर्वाय ऊतये महस्वन्तं मत्सरं मादयेथाम्। अर्वाग्वामस्य प्रवता नि यच्छथस्तौ नो मुञ्च त्वं हसः।। 4।।

卐4.34.5 रयिं मे पोषं सवितोत वायुस्तनू दक्षमा सुवतां सुशेवम्। अयक्ष्मतां महो अस्मासु धत्तं तौ नो मुञ्च त्वं हसः।। 5।।

卐4.34.6 अपेतो वायुस्सविता च दुष्कृतमप यक्ष्मं शिमिदां सेधतं परः। सं ह्युर्जाः सृजथस्सं बलेन तौ नो मुञ्च त्वं हसः।। 6।।

卐4.34.7 उप श्रेष्ठा नो आशिषो देवयोर्धामन्नस्थिरन्। स्तौमि देवं सवितारं च वायुं तौ नो मुञ्च त्वं हसः।। 7।। 4 - 35

卐4.35.1 मरुतां मन्वे अधि मे ब्रुवन्तु प्रेमं वाजं वाजसाता अवन्तु। आशूनिव स्वयमां ह्व ऊतये ते नो मुञ्चन्त्वं हसः।। 1।।

卐4.35.2 उत्समक्षितं व्यचन्ति ये सदा ये वा सिञ्चन्तु रसमोषधीषु। पुरोदधे मरुतः पृश्निमातृंस्ते नो मुञ्चन्त्वं हसः।। 2।।

卐4.35.3 पयो धेनूनां रसमोषधीनां जवमवर्तां कवयो य इन्वथ। शग्मा भवन्तु मरुतस्स्योनास्ते नो मुञ्चन्त्वं हसः।। 3।।

卐4.35.4 अपस्समुद्राद्दिवमुद्वहन्ति दिवस्पृथिवीमभि ये सृजन्ति। येऽद्भिरीशाना मरुतश्चरन्ति ते नो मुञ्चन्त्वं हसः।। 4।।

卐4.35.5 ये कीलालैस्तर्पयन्ति ये घृतेन ये वा वयो मेदसा सं सृजन्ति। य ईशाना मरुतो वर्षयन्ति ते नो मुञ्चन्त्वं हसः।। 5।।

卐4.35.6 यदीदिदं मरुतो मारुतेन यदि देवा दैव्येनेदृगार। यूयमीशिध्वे वसवस्तस्य निष्कृतेस्ते नो मुञ्चन्त्वं हसः।। 6।।

卐4.35.7 तिग्ममनीकं विदितं सहस्वन् मारुतं शर्धः पृतनासूग्रम्। स्तौमि मरुतो नाथितो जोहवीमि ते नो मुञ्चन्त्वं हसः।। 7। (इति सप्तर्चो नाम चतुर्थकाण्डे सप्तमोऽनुवाकः) 4 - 36

卐4.36.1 मन्वे वां द्यावापृथिवी सुभोजसौ ये अप्रथेथाममितां योजनानि। प्रतिष्ठे ह्यभवतं वसूनां ते नो मुञ्चतमं हसः।। 1।।

卐4.36.2 प्रतिष्ठे हि बभूवतुर्वसूनां प्रवृद्धे देवी सुभगे उरूची। द्यावापृथिवी भवतं मे स्योने ते नो मुञ्चतमं हसः।। 2।।

卐4.36.3 ये स्रोत्या विभ्रुथो ये मनुष्यां ये अमृतं बिभृथो ये हवींषि। द्यावापृथिवी भवतं मे स्योने ते नो मुञ्चतमं हसः।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐4.36.4 ये उस्त्रिया बिभृथो ये वनस्पतीन् ययोर्वां विश्वा भुवनान्यन्तः। द्यावापृथिवी भवतं मे स्योने ते नो मुञ्चतमं हसः।। 4।।

卐4.36.5 ये कीलालैस्तर्पयथो ये घृतेन याभ्यां नर्ते किञ्चन शक्नुवन्ति। द्यावापृथिवी भवतं मे स्योने ते नो मुञ्चतमं हसः।। 5।।

卐4.36.6 असन्तापे सुतपसा हुवे वामुर्वी गभीरे कविभिर्नमस्ये। द्यावापृथिवी भवतं मे स्योने ते नो मुञ्चतमं हसः।। 6।।

卐4.36.7 यन्मेदमभिशोचति येन वा येन वा कृतं पौरुषेयं न दैव्यम्। स्तौमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुञ्चतमं हसः।। 7।। 4 - 37

卐4.37.1 भवाशर्वौ मन्वेवां तस्य वित्तं ययोर्वां विश्वं यदिदं वितिष्ठते। या वीशाते अस्य द्विपदो यश्चतुष्पद् स्तौ न मुञ्चतमं हसः।। 1।।

卐4.37.2 ययोरभ्यध्व उत यद्दुरे चिद् यौ विदिता विषुभृतामसिष्ठौ। भवाशर्वौ भवतं मे स्योनौ तौ नो मुञ्चतमं हसः।। 2।।

卐4.37.3 ययोर्वधान्नापपद्यते किञ्चनान्तर्देवेषूत मानुषेषु। भवाशर्वौ भवतं मे स्योनौ तौ नो मुञ्चतमंहसः।। 3।।

卐4.37.4 यावारेभाते बहुसाकमुग्रौ प्र चेदस्राष्ट्रमभिभां जनेषु। भवाशर्वौ भवतं मे स्योनौ तौ नो मुञ्चतमंहसः।। 4।।

卐4.37.5 सहस्राक्षौ वृत्रहणा हुवे वां दूरेहेती स्वनेमि उग्रौ। भवाशर्वौ भवतं मे स्योनौ तौ नो मुञ्चतमंहसः।। 5।।

卐4.37.6 यः कृत्याकृद्यातुधानो महालो नि तस्मिन् हतमधि वज्रमुग्रौ। भवाशर्वौ भवतं मे स्योनौ तौ नो मुञ्चतमंहसः।। 6।।

卐4.37.7 अधि मे ब्रूतं पृतनासूग्रौ सं वज्रेण सृजतं यत् किमीदि। स्तौमि भवाशर्वौ नाथितो जोहवीमि तौ नो मुञ्चतमंहसः।। 7।। 4 - 38

卐4.38.1 मन्वे वां मित्रावरुणावृतावृधौ सत्यौ जसौ द्रुह्वाणं यौ नुदेथे। यौ सत्यावानमवथ हवेषु तौ नो मुञ्चतमंहसः।। 1।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐4.38.2 सत्यौ जसौ द्रुह्वाणं यौ नुदेथे प्र सत्यावानमवथो हवेषु। यौ गच्छथ नृचक्षसा बभ्रुणा सुतं तौ नो मुञ्चतमंहसः।। 2।।

卐4.38.3 यावङ्गिरसोऽवथो यावगस्तिं मित्रावरुणा यमदग्निमत्रिम्। यौ कश्यपमवथो यौ वसिष्ठं तौ नो मुञ्चतमंहसः।। 3।।

卐4.38.4 यौ भरद्वाजमवथो वध्र्यश्वं विश्वामित्रं वरुण मित्र कुत्सम्। यौ कक्षीवन्तमवथः प्रोत कण्वं तौ नो मुञ्चतमंहसः।। 4।।

卐4.38.5 यौ श्यावाक्षमवथो यौ गविष्ठिरं मित्रावरुणा पुरुमीढमत्रिम्। यौ विमदमवथः सप्तवध्रिं तौ नो मुञ्चतमंहसः।। 5।।

卐4.38.6 ययोरथ स्सप्तवर्त्मर्जुरश्मिर्मिथुया चरन्तमभियाति दूषयन्। स्तौमि मित्रावरुणानाथितो जोहवीमि तौ नो मुञ्चतमं हसः।। 7।। 4 - 39

卐4.39.1 इन्द्रस्य मन्वे शश्वद्यस्य मन्विरे वृत्रघ्न स्तोमा उप मे ममागुः। यो दाशुषस्सुकृतो हवमेता स नो मुञ्चतमंहसः।। 1।।

卐4.39.2 यश्चर्षणिप्रो वृषभस्स्वर्विद् यस्य ग्रावाणः प्रवदन्ति नृम्णे। यस्याध्वरस्सप्त होतामदच्च्युत् स नो मुञ्चतमंहसः।। 2।।

卐4.39.3 य उग्राणामुग्रबाहुर्यजुर्यो दानवानां बलमाससाद। येन जिताः सिन्धवो येन गावस्स नो मुञ्चतमंहसः।। 3।।

卐4.39.4 यस्य वशास ऋषभास उक्षणो यस्मै मीयन्ते स्वरवस्स्वर्विदे। यस्मै शुक्रः पवते ब्रह्मशुम्भितस्स नो मुञ्चतमंहसः।। 4।।

卐4.39.5 यस्य जुष्टिं सोमिनः कामयन्ते यं हवन्त इषुवन्तं गविष्टौ। यस्मिन्नर्कश्शिश्रिये यस्मिन्नोजस्स नो मुञ्चतमंहसः।। 5।।

卐4.39.6 य उत्तमः कर्मकृत्याय जज्ञे यस्य वीर्यं प्रथमस्यानुबद्धम्। ये नोद्योत वज्रोभ्या यताहिं स नो मुञ्चत्वंहसः।। 6।।

卐4.39.7 यस्संग्रामान्नयति संयुगे वशी यः पुष्टानि संसृजति द्वयानि। स्तौमीन्द्रं नाथितो जोहवीमि स नो मुञ्चतमंहसः।। 7।। 4 - 40

卐4.40.1 शुनं वत्सानपा करोमि शुनं बध्नामि तन्त्याम्। आग्रयणं ब्राह्मणं हविस्तस्मिन् जागार कश्यपः।। 1।।

卐4.40.2 बाहुं वत्समुपनयन् पात्रे गां दुहन्नब्रवीत्। अरिष्टं ब्रह्मभ्यो हविश्शिवं कृणोतु कश्यपः।। 2।।

卐4.40.3 त्रयस्तिष्ठन्ति सुकृतस्य लोके त्रयोऽतिकाशास्त्रीणि शीर्षाण्येषाम्। त्रयस्तिष्ठन्ति परिगृह्य कुम्भीं यथा हविः कश्यप न व्यथातै।। 3।।

卐4.40.4 सत्यात् सम्भूतो वदति तण्डुलान् क्षीर आवपन्। ऋषिर्ब्रह्मभ्य आग्रयणं नि वेदयतु कश्यपः।। 4।।

卐4.40.5 ऋतुमुखे चन्द्रभागः पात्र ओदनमुद्धरात्। प्राश्नन्तु ब्रह्माणो हविर्यथा वेदेन कश्यपः।। 5।।

卐4.40.6 येभूतायसृजन्त ये भूतान्यकल्पयन्। सर्वस्य विद्वानध्वर्यु ष्षण्णां भवतु कश्यपः।। 6।।

卐4.40.7 शिवा आपो वत्सेभ्यश्शिवा भवन्त्वोषधीः। वातो वत्सेभ्यः कश्यपश्शिव श्शिवं तपतु सूर्यः।। 7। (इति सप्तर्चो नाम चतुर्थकाण्डे अष्टमोऽनुवाकः) इत्यथर्ववेदे पैप्पलादसंहितायां सप्तर्चो नाम चतुर्थः काण्डस्समाप्तः

## ॐ अथ पञ्चमः काण्डः 5 - 1

卐5.1.1 नमः पिशङ्गबाह्वै सिन्ध्यौ जाताया उग्रायै। यो अस्यै नम इत् करदपेदस्य गृहादय।। 1।।

卐5.1.2 अपेहि नो गृहेभ्योऽपेहि वत्स तन्त्याः। आत्मानमत्र रोत्स्यस्यव रोहमहानसात्।। 2।।

卐5.1.3 हा अम्ब सुहृतले अथो है षामनन्तमे। पुत्रो यस्ते पृश्निबाहुस्तमु त्वं सामनं कृधि। अथो दुहितरं नप्त्रीमथो त्वं सामना भव।। 3।।

卐5.1.4 भूतपतिर्निरजत्विन्द्रश्चेतस्सदान्वाः। गृहस्य बुध्न आसीनास्ता वज्रेणाधि तिष्ठतु।। 4।।

卐5.1.5 अपेतेतस्सदान्वा अहिंसन्तीरिमं गृहम्। धेनुर्वा अत्र य स्थास्यत्यनड्वान वेरया सह।। 5।।

卐5.1.6 या सहमाना चरसि सासहान इव ऋषभः। सदान्वाघ्नीं त्वा वयं जैत्रायाच्छा वदामसि।। 6।।

卐5.1.7 सहस्व नो अभिमातिं सहस्व पृतनायतः। सहस्व सर्वा रक्षांसि सहमानास्योषधे।। 7।।

卐5.1.8 त्वं व्याघ्रान् सहसे त्वं सिहाँ उभयादतः। मक्षाश्चिद् कृण्वाना मधु त्वं सहस ओषधे।। 8।। 5 - 2

卐5.2.1 इयं पित्रे राष्ट्रेत्यग्रे प्रथमाय जनुषे भूमिनष्ठौ। तस्मा एतं सुरुच ह्वारमह्यं घर्मं श्रीणन्तु प्रथमस्य धास्योः।। 1।।

卐5.2.2 ब्रह्म यज्ञानं प्रथमं पुरस्ताद् वि षी मतस्सुरुचो वेन आवः। स बुध्न्या उपमा अस्य विष्ठास्सतश्च योनिमसतश्च वि वः।। 2।।

卐5.2.3 प्र यो जज्ञे विद्वाँ अस्य बन्धुं विश्वानि देवो जनिमा विवक्ति। ब्रह्म ब्रह्मण उज्जभार मध्यान्नीचादुच्चा स्वधा अभि प्रतस्थौ।। 3।।

卐5.2.4 महान् मही अस्कभाय द्विजातो द्यां द्वितः पार्थिवं च रजः। स बुध्न्यादाष्ट्र जनुषाभ्यग्रं बृहस्पतिर्देवता तस्य सम्राट्।। 4।।

卐5.2.5 नूनंतदस्य गव्यं हिनोत महो देवस्य पूर्व्यस्य महि। एष जज्ञे बहिभिस्साकमित्था पूर्वाद्दाद विथुरश्च सन्नु।। 5।।

卐5.2.6 स हि दिवस्स पृथिव्या ऋतेष्ठा महि क्षामन् रजसी विष्कभायति। अहर्य च्छुक्रं ज्योतिषो जनिष्टाधा द्युमन्तो वि वसन्त्वरिप्राः।। 6।।

卐5.2.7 एवाथर्वा पितरं विश्वदेवं बृहस्पतिर्मनसा वोचदच्छ। त्वं विश्वस्य जनिता धास्यग्रे कविर्देवान्नदभाय स्वधावः।। 7।।

卐5.2.8 मूर्ध्ना यो अग्रमभ्यर्त्योजसा बृहस्पतिर्मा विवासन्तु देवाः। भिनद्वलं वि मृधो दर्दरीति कनिक्रदद्गा स्वरपो जिगाय।। 8।। 5 -3

卐5.3.1 उदपप्तदसौ सूर्यः पुरुदृष्टो अदृष्टहा। उदायन् रश्मिभिर्हन्तूदायन्नरसाँ अकः।। 1।।

卐5.3.2 न्यम्रुचदसौ सूर्यौ विश्वदृष्टो अदृष्टहा। निम्रोचन् रश्मिभिर्हन्तु निम्रोचन्नरसाँ अकः।। 2।।

卐5.3.3 ये च दृष्टा ये चादृष्टा उभये हविष्यवः। तेषां वो अग्रभं नाम सर्वे साकं नि जस्यत।। 3।।

卐5.3.4 अदृष्ट हननी वीरुदमितौजा विषासहि। चुकाकणि त्वं जज्ञिषे सादृष्टां जातशो जहि।। 4।।

卐5.3.5 जहि ज्येष्ठमदृष्टानां सर्पाणां मोघचारिणां। क्रिमीणां सर्वा जातानि पौञ्जष्ट इव यवं मृण।। 5।।

卐5.3.6 यश्च तोद यश्च सर्प एकादृष्टश्च यो वृषा। चुकाकणि त्वं तान् वृश्च वृक्षं परशुमानिव।। 6।।

卐5.3.7 सं वृश्चैनां चुकाकणि वृक्षं परशुमानिव। क्रिमीणां सर्वा जातानि सं दहाग्निरिवोलपम्।। 7।।

卐5.3.8 मेथिष्ठाग्निरघलस्त्विषीमान् क्रमीणां जातानि प्र दुनोत सर्वा। बृहस्पतेर्मैदिने जातवेदा अदृष्टान् हन्तु दृषदेव माषान्।। 8।। 5 - 4

卐5.4.1 ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानस्तन्वं पुषेम। मह्यं नमन्तां प्रदिशश्चतस्रस् त्वयाध्यक्षेण पृतना जयेम।। 1।।

卐5.4.2 अग्ने मन्युन्प्रतिनुदन्परेषां त्वं नो गोपाः परि पाहि विश्वतः। अपाञ्चो यन्तु प्रबुधा दुरस्यवोऽमैषां चित्तं बहुधा वि नश्यतु।। 2।।

卐5.4.3 मम देवा विहवे सन्तु सर्व इन्द्रवन्तो मरुतो विष्णुरग्निः। ममान्तरिक्षमुरु लोकमस्तु मह्यं वातः पवतां कामे अस्मिन्।। 3।।

卐5.4.4 मह्यं यजन्तान्मम यानीष्टाकूतिस्सत्या मनसो मे अस्तु। एनो मा निगां कतमच्चनाहं विश्वे देवा अभिरक्षन्तु मामिह।। 4।।

卐5.4.5 मह्यं देवा द्रविणमा यजन्तां ममाशीरस्तु मम देवहूतिः। दैवा होतारस्सनिष न्न एतदरिष्टास्स्याम तन्वा सुवीराः।। 5।।

卐5.4.6 देवीष्षड्डुर्वीररुणस्कराथ विश्वे देवास इह मादयध्वम्। मा हास्महि प्रजया मा धनेन मा रधाम द्विषते सोम राजन्।। 6।।

卐5.4.7 उरुव्यचा नो महिषश्शर्मयच्छादस्मिन् वाजे पुरुहूतः पुरुक्षुः। स नः प्रजायै हर्यश्व मृडेन्द्रो मा नो रीरिषो मा परा दाः।। 7।।

卐5.4.8 धाता विधर्ता भुवनस्य यस्पतिस्सविता देवो अभिमातिषाहः। बृहस्पतिरिन्द्राग्नी अश्विनोभा देवाः पान्तु यजमानन्निर्ऋथात्।। 8।।

卐5.4.9 इहार्वाञ्चमति ह्वय इन्द्रं जैत्राय जेतवे। अस्माकमस्तु केवलो इतः कृणोतु वीर्यम्।। 9।।

卐5.4.10 अर्वाञ्चमिन्द्रो ममुतो हवामहे यो गोजिद्धनजिदश्वजिद्यः। इमं नो यज्ञं विहवे जुषस्वास्माकं कृण्मो हरिवो मेदिनं त्वा।। 10।।

卐5.4.11 त्रातारमिन्द्रमवितारमिन्द्रं हवेहवे सुहवं शूरमिन्द्रम्। हुवेम शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवान् पात्विन्द्रः।। 11।।

卐5.4.12 तिस्रो देवीर्महि मे शर्म यच्छन्प्रजायै मे तन्वे यच्च पुष्टम्। मां विशस्संमनसो जुषन्तान्पित्र्यं क्षेत्रं प्रति जानात्वस्मान्।। 12।।

卐5.4.13 यो नश्शक्राभिमन्युनेन्द्रामित्रो जिघांसति। त्वं तं वृत्रहञ्जहि वस्वस्मभ्य मा भर।। 13।।

卐5.4.14 ये नश्शपन्त्यप ते भवन्त्विन्द्राग्निभ्यामप बाधामहे तान्। आदित्या रुद्रा उपरिस्पृशो मामुग्रं चेत्तारमधिराजमक्रन्।। 14।। 5 - 5

卐5.5.1 पृथिवी वशा साग्निं गर्भं दधे सेमं पाहि तस्यै ते विधेयं तस्यै ते नमस्तस्मै ते स्वाहा।। 1।।

卐5.5.2 अन्तरीक्षं वशा सा वायुं गर्भं दधे सेमं पाहि तस्यै ते विधेयं तस्यै ते नमस्तस्मै ते स्वाहा।। 2।।
卐5.5.3 द्यौर्वशा सा सूर्यं गर्भं दधे सेमं पाहि तस्यै ते विधेयं तस्यै ते नमस्तस्मै ते स्वाहा।। 3।।
卐5.5.4 ऋग्वशा सा साम गर्भं दधे सेमं पाहि तस्यै ते विधेयं तस्यै ते नमस्तस्मै ते स्वाहा।। 4।।
卐5.5.5 दक्षिणा वशा सा यज्ञं गर्भं दधे सेमं पाहि तस्यै ते विधेयं तस्यै ते नमस्तस्मै ते स्वाहा।। 5।।
卐5.5.6 विड्वशा सा क्षत्रियं गर्भं दधे सेमं पाहि तस्यै ते विधेयं तस्यै ते नमस्तस्मै ते स्वाहा।। 6।।
卐5.5.7 वाग्वशा सा परमेष्ठीनं गर्भं दधे सेमं पाहि तस्यै ते विधेयं तस्यै ते नमस्तस्मै ते स्वाहा।। 7।।
卐5.5.8 वशा वशा सा राजन्यं गर्भं दधे सेमं पाहि तस्यै ते विधेयं तस्यै ते नमस्तस्मै ते स्वाहा।। 8।।
卐5.5.9 समा वशा सा सम्वत्सरं गर्भं दधे सेमं पाहि तस्यै ते विधेयं तस्यै ते नमस्तस्मै ते स्वाहा।। 9। (इति अष्टर्चो नाम पञ्चमकाण्डे प्रथमोऽनुवाकः) 5 - 6
卐5.6.1 सप्त सूर्या दिवमनुप्रविष्टास्तान् पथा वान्वेतु दक्षिणावान्। तेऽस्मै सर्वे घृतमा तपन्त्यूर्जं दुहाना अनपस्फुरन्तः।। 1।।
卐5.6.2 आतपन् क्षयति निच्यादा सव्या अधि निष्टपन्। अधा यत्पत्रस्सूर्य उदेति बृहतीरनु।। 2।।
卐5.6.3 आतप्ता पितॄन् विद्म दस्यू निष्टप्ता वयम्। गुहा येऽन्ये सूर्यास्स्वधामनु चरन्ति ते।। 3।।
卐5.6.4 द्यौ स्सचते अराञ्जनासः पञ्चान्ये परो दिवो आ क्षियन्ति। तां ब्रह्मवेदं बृहदा विवेश यस्तान् प्रवेद् प्रथरमतर्यतः।। 4।।
卐5.6.5 यो ददाति यो ददते यो वा निधिज् श्रद्दधानो निधत्ते। यमो वैवस्वतान् राजा सर्वान् रक्षत शेवधीन्।। 5।।
卐5.6.6 मा विदन् पर्यायिणो ये दक्षिणाः परिमुष्णन्ति दत्तम्। सुगेन तान् पथा सर्वान् यमो राजाति नेषत।। 6।।
卐5.6.7 येन पथा वैवस्वतो यम राजेतो ययुः। अग्निर्नस्तेन नयतु प्रजानन् वैश्वानरः पथिकृत् विश्वगृष्टिः।। 7।।
卐5.6.8 महि ज्योतिर्निहितं मर्त्येषु येन देवासो अतरन्नराती। तेनेमं सेतुमति गेष्म सर्वे वैश्वानरं ज्योतिरसीव देवाः।। 8।।
卐5.6.9 उद्वयं तमसस्परि ज्योतिष्पश्यन्त उत्तरम्। देवं देवत्रा स्सुर्यमगन्म ज्योतिरुत्तमम्।। 9।।

卐5.6.10 आरोको भ्राजः पटरः पतङ्गस्स्वर्णरो ज्योतिषीमान् विभासः। तेऽस्मै सर्वे घृतमा तपन्त्यूर्जं दुहाना अनपस्फुरन्तः।। 10।। 5 - 7

卐5.7.1 समुत्पतन्तु प्रदिशो नभस्वतीस्समभ्राणि वातजूतानि यन्तु। महर्षभस्य नदतो नभस्वतो वाश्रा आपो पृथिवीं तर्पयन्तु।। 1।।

卐5.7.2 समीक्षयति विश्वग्वातो नभांस्यपां वेगासः पृथगुत् पतन्तु। वर्षस्य सर्गामभि यन्तु भूमिं पृथग्जायन्तामोषधयो विश्वरूपाः।। 2।।

卐5.7.3 अभि क्रन्दस्तनयार्दयोदधिं भूमिं पर्जन्य पयसा समङ्धि। त्वया वर्षं बहुलमेतु सृष्टमाशारैषी कृशगुरेत्वस्तम्।। 3।।

卐5.7.4 उदीरयत मरुतस्समुद्रतस्त्वेषार्का नभ उत्पातयन्तु। प्र वर्षन्ति तमिषास्सुदानवोऽपां रसैरोषधयस्सचन्ताम्।। 4।।

卐5.7.5 गणास्त्वोप गायन्तु मारुताः पर्जन्य घोषिणः पृथक्। सर्गा वर्षस्य वर्षतस्सृजन्तु पृथिवीमभि।। 5।।

卐5.7.6 समवन्तु सुदानव उत्सा अजगरा उत। वाता वर्षस्य वर्षतः प्र वान्तु पृथिवीमनु।। 6।।

卐5.7.7 वातो विद्युदभ्रं वर्षं समवन्तु सुदानवः। प्र प्यायस्व प्र पिन्वस्य सं भूमिं पयसा सृज।। 7।।

卐5.7.8 अपामग्निस्तनूभिस्संविदानो य ओषधीनामधिपा बभूव। स नो वर्षं वनुतां जातवेदाः प्राणं प्रजाभ्यो अमृतं दिवस्परि।। 8।।

卐5.7.9 आशामाशां वि द्योततां वाता वान्तु दिशो दिशः। मरुद्भिः प्रच्युता मेघा वर्षन्तु पृथिवीमभि।। 9।।

卐5.7.10 प्रजापतिस्सलिलादा समुद्रादापो ईरयन्नुदधिमर्दयाति। प्र प्यायतां विष्णो अश्वस्य रेतोऽर्वाङ् एतेन स्तयित्नु नेह्यपो निषिञ्चन्नसुरः पिता नः।। 10।।

卐5.7.11 स्वसन्तु गर्गरा अपामव नीचीरपस्सृज। वदन्तु पृश्निबाहवो मण्डूका इरिणानु।। 11।।

卐5.7.12 सम्वत्सरं शशयाना ब्राह्मणा व्रतचारिणः। वातं पर्जन्य जिन्वतां प्र मण्डूका अवादिषुः।। 12।।

卐5.7.13 उप प्रवद मण्डूकि वर्षमा वद तादुरि। मध्ये ह्रदस्य प्लवस्व विगृह्य चतुरः पदः।। 13।।

Sri Ganapati Sachchidananda Avadhoota Dattapeetham • Mysore •

卐5.7.14 महान्तं कोशमुत चाभिषिञ्च सविद्युतं भवतु वातु वातः। तन्वतां यज्ञं बहुधा विसृष्टमानन्दिनीरोषधयो भवन्तु।। 14।। 5 - 8

卐5.8.1 यावती द्यावापृथिवी वरिम्णा यावद्वा सप्त सिन्धवो वितष्ठुः। वाचं विषस्य दूषणीं तामितो निरवादिषम्।। 1।।

卐5.8.2 सुपर्णस्त्वा गरुत्मान् विष प्रथममावयत्। नारोपयो नामादय उतास्मा अभवत् पितुः।। 2।।

卐5.8.3 यां त्वास्थत् पञ्चाङ्गुलिर्वक्रा चिदधि धन्वनः। अपस्कम्भस्य बाह्वोर्निरवोचमहं विषम्।। 3।।

卐5.8.4 शल्याद्विषं निरवोच मञ्जनात् पर्णधेरुत। अपाष्ठाच्छृङ्गात् कुर्मलान्निरवोचमहं विषम्।। 4।।

卐5.8.5 अरसस्त इषो शल्योऽथो तेऽरसं विषम्। उतारसस्य वृक्षस्य धनुष्टे अरसारसम्।। 5।।

卐5.8.6 येऽपिशं येऽदिहं य आस्यं ये अवासृजन्। सर्वे ते वध्रयस्सन्तु वध्रिर्विष गिरिष्कृतः।। 6।।

卐5.8.7 वध्रयस्ते खनितारो वध्रिस्त्वमस्योषधे। वध्रिस्सपर्वतो गिरिर्यतो जातमिदं विषम्।। 7।।

卐5.8.8 वारिदं वारयातै वरुणावत आभृतम्। तत्रामृतस्यासिक्तं तच्चकारारसं विषम्।। 8।। 5 - 9

卐5.9.1 खादिरेण सललेनाथो कङ्कतदन्त्या। अथो विषस्य यद्विषं तेन पापीरनीनशम्।। 1.।।

卐5.9.2 कित्या शतपर्वणा सहस्राक्षेण चर्मणा। तीक्ष्णाभिरभ्रिभिर्वयं निरजामस्सदान्वाः।। 2।।

卐5.9.3 सहस्सहस्सत्यसीतः कण्वाः परोऽनुदत्। इमा या अधुनागता याश्चेह ग्रहणीः पुरा।। 3।।

卐5.9.4 नता इत्था नता इहावमासतोखेव शृङ्गवच्छिरः। सदान्वा ब्रह्मणस्पते तीक्ष्णशृङ्गो दृषन्निहि।। 4।।

卐5.9.5 वितेरुपन्था श्वश्रे बिभिदे तेऽगदोहनी। दधौ ते अद्य गौ कण्वे परेह्यवरं मृणे।। 5।।

卐5.9.6 यास्तेङ्के तिष्ठन्ति या वलिके याः प्रेङ्खे प्रेङ्खयत उत या नु घोरा। या गर्भान् प्रमृशन्ति सर्वाः पापीरनीनशम्।। 6।।

卐5.9.7 याश्चेलं वसत उत या नु दूरशं नीलं पिशङ्गमुत लोहितं याः। या गर्भान् प्रमृशन्ति सर्वाः पापीरनीनशम्।। 7।।

卐5.9.8 आ खिदन्तीर्विखिदन्तीः प्राणमस्यापि नह्यत। दुर्णाम्नीस्सर्वास्सङ्गत्य मामुष्योच्छिषद किञ्चन।। 8।। 5 - 10

卐5.10.1 इयं या मुशलाहता दृषद्पिष्टा विषासुता। तपुरग्निस्तपुर्द्यौस्तपुत्वं सुरे भव।। 1।।

卐5.10.2 विषं ते तोक्म रोहयन्तोऽब्रूवन् विषं कुम्भेऽव स्रव। विषं त आमनसुरे विषं त्वं हस्त आहिता विषं प्रतिहिता भव।। 2।।
卐5.10.3 सिंहस्ते अस्तु तण्डुलो व्याघ्रः पर्योदनम्। पृदाकूरस्तु नग्नहुर्वृकस्य हृदि संस्रव।। 3।।
卐5.10.4 इयं या पात्र आसुता शस्यः स्रक्वा विघस्वती। वराहमन्युरजन्युत्तानपादमर्दय।। 4।।
卐5.10.5 उदर्दनी प्रच्यवनी पांशुपिङ्गा विघस्वरी। उत्खातमन्युरजनि यत् पश्चात्तत् पुरष्कृधि।। 5।।
卐5.10.6 विषं ते पवने सुरे रुधिरं स्थाने अस्तु ते। मथ्नं त्वन्यो अन्यस्मा इषुधींस्तद् धनुस्त्वत्।। 6।।
卐5.10.7 विषपावान रुधिराश्चरन्ति पातारो मर्तास्तवसे सुर इमे। हतासो अन्ये योधयन्त्यन्यास्तमिच्छंस महिमानं सुरायाः।। 7।।
卐5.10.8 विषासुतां पिबत जहृषाणा अस्रा संसृष्टां रुधिरेण मिश्राम्। छिन्न हस्तश्चरति ग्रामे अन्तर्वैरहत्यानि बहुधा पणायन्।। 9।।
卐5.10.9 असिमतीमिषुमतीमुन्नयामि सतादधि। मादयाभि मादया हि रवैनां प्र रोपया न्योऽन्यस्य मोच्छिषम्।। 10। (इति अष्टर्चो नाम पञ्चमकाण्डे द्वितीयोऽनुवाकः) 5 - 11
卐5.11.1 अनु ते मन्यतामग्निर्वरुणस्तेनुमन्यताम्। ततस्ते पुत्रो जायतां स वर्मी गोषु युध्यताम्।। 1।।
卐5.11.2 इदं वायोऽनु जानीहीदमिन्द्र बृहस्पते। आञ्जनं पुत्र वेदनं कृण्वः पुंशवनं वयम्।। 2।।
卐5.11.3 येनैतत् परिष्टभितं यस्मात् पुत्रं न विन्दसे। इन्द्राग्नी तस्मात्त्वैनसः परिपातमहर्दिवि।। 3।।
卐5.11.4 अथर्वाणो अङ्गिरसो विश्वेदेवारुतावृधः। श्रृण्वन्त्वद्य मे हवमस्मै पुत्राय वेत्तवे।। 4।।
卐5.11.5 इन्द्राणी वरुणानी सिनीवाल्युतादितिः। वरुत्युग्रा पत्नीनां पुत्रमद्य दिदेष्टु ते।। 5।।
卐5.11.6 पुत्रं ते मित्रावरुणा पुत्रं देवी सरस्वती। पुत्रं ते अश्विनोभा धत्तां पुष्करस्रजा।। 6।।
卐5.11.7 येषां चनाम जग्रभ येषां च नोपसस्मर। देवास्ते सर्वे सङ्गत्य पुत्रं जैवातृकं ददन्।। 7।।
卐5.11.8 आत्मन एनं निर्ममीष्व स त्वत् परि जायताम्। त्वं बीजमुर्वरेव त्वं भिभिर्हि योन्याम्।। 8।।
卐5.11.9 पृथिवी सह यज्ञैर्नक्षत्रैस्सह सूर्यः। वातः पतत्रिभिस्सह पुत्रमद्य दिदेष्टु ते।। 9।। 5 - 12
卐5.12.1 वृषा यज्ञे मघवानोऽयं मधुमतीभ्यः। स उ ते योनिमाशयां वड्यक्षः पुरुषो भवन्।। 1।।
卐5.12.2 योनिं गच्छ मघवान योन्यां पुरुषो भव। ततः पुनर्निरायसि शीर्ष्णा श्रोणी वि नोनुदत्।। 2।।

卐5.12.3 वाणवाँ इषुधेरिव कृण्वं पित्रोर्यथा प्रियम्। श्रोणी अहिंसन्यन्तरा दशमे मास्यायसि।। 3।।

卐5.12.4 स प्रत्यङ् प्रत्यावर्त्यै सा एते सम्वत्सरे पुनः। यथा जीवासि भद्रया वि भरत्वामहाभवे।। 4।।

卐5.12.5 शं ते योनिमचीक्लृपं सुप्रजास्त्वाय भद्रया। तत्राषिञ्चस्व वृष्ण्यं दशमास्यमविह्रुतम्।। 5।।

卐5.12.6 गर्भस्ते योनिमा शयां गर्भो जरायुवाशयाम्। कुमार उल्बमा शयां त्वष्टा क्लृप्तो यथापरु।। 6।।

卐5.12.7 यथा राजन् मघवान त्वं बीजं विरोहसि। एवा त्वमस्या निर्भिन्धि कुमारं योन्या अधि।। 7।।

卐5.12.8 गर्भमधान् मघवानो गर्भं देवो बृहस्पतिः। गर्भं त इन्द्रश्चाग्निश्च गर्भं धाता दधातु ते।। 8।।

5 - 13

卐5.13.1 शिव श्शिवाभिर्वयस्वन् सं गच्छस्व तन्वा जातवेदः। रत्नं दधानस्सुमनाः पुरस्ताद् गृहेभ्यस्त्वा वर्चसे निर्वपामि।। 1।।

卐5.13.2 पृथिव्यां घर्मस्तभितोऽन्तरिक्षे दिविश्रितः। द्यौरेनं सर्वतः पातु यस्त्वा पचत्योदन।। 2।।

卐5.13.3 ये समुद्रमैरयन् ये च सिन्धुं ये अन्तरिक्षं पृथिवीमुत द्याम्। ये वातेन सरथं यान्ति देवास्तानाप्नोत्योदन पाको अत्र।। 3।।

卐5.13.4 ऋचा कुम्भ्यदिहिता साम्ना पच्यत ओदन। अंशुं सोमस्यैतं मन्ये वैश्वदेवमिदं हविः।। 4।।

卐5.13.5 उसूखले मुसले ये च शूर्पे भूभ्यामुखायां यदि वासुसञ्च। यो विप्रुषो यानि निर्णेजनानि सर्वं तत्ते ब्रह्मणा पूरयामि।। 5।।

卐5.13.6 ऊर्ध्वः प्रेहि मा संविक्था व्यस्य रजो अन्तरम्। रक्षांसि सर्वा तीर्त्वाथा रोह दिवं त्वम्।। 6।।

卐5.13.7 तुरो नो अतुरो भव सं धीभिर्धीयतामयम्। सं पृथिव्या समग्निना सं सूर्यस्य रश्मिभिस्सं देवाना मयिस्व।। 7।।

卐5.13.8 आजद्विषस्सुकृतस्य लोके तृतीये नाके अधि रोचने दिवः। मृत्योः पदं योपयन्त्योऽन्येतु पश्चानिकृत्य मृत्युं पदयोपनेन।। 8।। 5 - 14

卐5.14.1 भूत्या मुखमसि सत्यस्य रश्मिरुच्चैः श्लोको दिवं गच्छ। उच्छ्रयेथां हविष्कृतौ साधु देवान् सपर्जतमृजीषमप लम्पतम्।। 1।।

卐5.14.2 आपो देवीर्यज्ञकृतश्चित्रा देवीर्हविष्कृतः। एक पात्र ओदनो ऽग्निष्टोमेन सम्मितः।। 2।।

卐5.14.3 गायत्री हव्यवाडसि देवताग्निस्समिध्यते। सहस्रधारं सुकृतस्य लोके घृतपृष्ठममर्त्यौ।। 3।।

卐5.14.4 उरुगायो शिवायोः प्राणेन सम्मितः। अप मृध्राणि मज्जहि मुक्षीव दुरिता दहन्।। 5।।

卐5.14.5 अप रक्षांसि तेजसा देवेभ्यो हव्यमर्चतम्। व्यचस्वान् सप्रथायसि।। 6।।

卐5.14.6 उच्चैस्सुपर्णो दिवमुत्पतामुं प्रियं देवेभ्यो मा कृणु। ऋषिभ्यः परि देहि माम्। शुक्रं शुक्रेण भक्षया पिबन्तु सुकृतो मधु।। 7।।

卐5.14.7 द्वया देवा उप नो यज्ञमागुर्यानोदनो जुषते यासु पृष्टः। आदित्याङ्गिरसस्स्वर्गमिमं प्राश्नत्वृतुभिर्निषद्य।। 8।। 5 - 15

卐5.15.1 पीयूषस्य क्षीरस्य सर्पिषोऽन्नसाग्रं सं भराम एतत्। एतं भागमहुताभ्यः प्रहिण्मस्तन्नो हविः प्रतिगृह्णन्तु देवा दैवाः।। 1।।

卐5.15.2 हुतादोऽन्येऽहुतादोऽन्ये वैश्वदेवं हविरुभये सं चरन्ति। ते सम्यञ्च इह मादयन्तामिषमूर्जं यजमानाय मत्स्व।। 2।।

卐5.15.3 मेमा भवो मा शर्वो वधीत् गा मा वत्सां क्लोमश्य यो विदन्नः। ये जाता ये च गर्भेष्वन्तररिष्टाग्नेस्तनुमा रभन्ताम्।। 3।।

卐5.15.4 इमा गावो विजावतीः प्रजावतीस्त्रिष्वसं मनसो भवन्तु। आसु भूमा नय पिपृञ्चन्तु देवा आसां वत्सानायुषा मदेसा संसृजामि।। 4।।

卐5.15.5 प्र वीयन्तां स्त्रियो गावो विष्णुर्योनिमनु कल्पयाति। प्रतिगृह्णतीर् ऋषभस्य रेत उक्षानड्वांश्चरति वासितामनु।। 5।।

卐5.15.6 प्रयतमग्रं न हिनस्ति किं च न यथा कामं कृणुत सोम्यं मधु। साधु यज्ञमहुतादो नयन्तु रायस्पोषा यजमानं सचन्ताम्।। 6।।

卐5.15.7 नि ते पदां पृथिवी यन्तु सिन्धवो उदोषोधय जिहतां प्रेरतां मिराः। पर्जन्यस्य मरुत उदधिं सान्वा हत भद्रं सस्यं पच्यतां मोदतां जगत्।। 7।।

卐5.15.8 सप्त ऋषय सप्त पदास्येषां सप्त क्षियो अश्विनोः पञ्चवाजाः। प्राणो व्यानो मन आकुतिर्वाग् देवी देवेभ्यो हव्यं बहतु प्रजानती।। 8।।

卐5.15.9 ये च दृष्टा येचादृष्टाः क्रिमयः ककृशाश्च ये। तेषां शिरांस्यसिना छिनद्म्यथाषां वत्सानायुषा मेदसा सं सृजामि।। 9। (इति अष्टर्चो नाम पञ्चमकाण्डे तृतीयोऽनुवाकः) 5 - 16

卐5.16.1 द्यौश्चेमं यज्ञं पृथिवी च सं दुहातां मातरिश्वा पवमानः पुरस्तात्। त्वष्टा वायुस्सह सोमेन वात इमं सं दुह्यामनपस्फुरन्तः।। 1।।
卐5.16.2 घर्मं तपाम्यमृतस्य धारया देवेभ्यो हव्यं परिधे सवित्रे। शुक्रं देवाश्शृतमदन्तु हव्यमासं जुह्वानाममृतस्य योनौ।। 2।।
卐5.16.3 उद्वासयाग्ने श्टतमकर्म हव्यमा रोह पृष्ठममृतस्य धाम। अनस्पतय उप बर्हिं स्तृणीत मध्वा समन्तं घृतवत् कराथ।। 3।।
卐5.16.4 योऽप्सु यक्ष्मश्शमयामि तं व ऊर्जा गव्यूतिं समनज्म्येताम्। स्तन्यं क्षीरमविषं वः कृणोम्य शुन्धयन्तोऽपि यूथमेत।। 4।।
卐5.16.5 इडानां पुत्रा उत मित्रियाणां पयो धयन्त्यहृणीयमानाः। ऋतुभिस्सश्यमुत क्लृतमस्त्विर्यो गोपा रक्षतु वायुरेनाः।। 5।।
卐5.16.6 पिबत घृतं यतिधा व एतद् गुहा हितं निहितं मानवेषु। विश्वे देवा वैश्वदेवश्चाग्नौ यथा भागं हविषो मादयध्वम्।। 6।।
卐5.16.7 यो देवानामसि श्रेष्ठो रुद्रस्तन्तिचरो वृषा। अरिष्टा अस्माकं वीरा एतदस्तु हुतं तव।। 7।।
卐5.16.8 पूर्णमहं करीषिणं शतवन्तं सहस्रिणम्। विश्वेभिरग्ने देवैरिमं गोष्ठं सहारुहम्।। 8।। 5 - 17
卐5.17.1 देवैनसादुन्मदितं क्षेत्रियाच्छपथादुत। मुञ्चन्तु तस्मात्त्वा देवा उन्मत्तं रक्षसस्परि।। 1।।
卐5.17.2 मुनिं भवन्तं परियानि वा वृतु रक्षांस्यग्न उलुला करिक्रतु। अतस्त्वं नो अधि पाहि वाजिन्निन्द्रेण मेदी बृहते रणाय।। 2।।
卐5.17.3 यथाग्रे देवा ऋभवो मनीषिणो मुनिमुन्मत्त मसृजन्निरेनसः। एवाते शक्रोऽभयं कृणोतु मुच्य स्वैनसोऽभि नयामि रक्षः।। 3।।
卐5.17.4 यथा गावश्च भूम्यां पुरुषस्य न्योकसः। एवोन्मत्तस्य ते मुने गृह्णातु पृथिवी मनः।। 4।।
卐5.17.5 मुनिं दाधार पृथिवी मुनिं द्यौरभिरक्षति। मुनिं हि विश्वा भूतानि मुनिमिन्द्रो अदीधरत् परा रक्षस्सुवामि ते।। 5।।
卐5.17.6 इमं मे अग्ने पुरुषं मुमुग्धि य आवित्तो ग्राह्या लालपीति। अतोदि ते कृणवद् भागधेयमुनुन्मदितो अगदो यथा सत्।। 6।।
卐5.17.7 अग्निष्टे नि शमयतु यत्त एतन्मन उह्यते। जुहोमि विद्वांस्ते हविर्यथानुन्मदितो भुवः।। 7।।

卐5.17.8 पुनस्त्वा दुरप्सरसः पुनर्वातः पुनर्दिशः। पुनर्यमः पुनर्यमस्य दूतास्ते त्वा मुञ्चन्त्वंहसः। जीवातवे न मर्तवेऽथो अरिष्टतातये।। 8।। 5 - 18

卐5.18.1 उत देवा अवहितं देवा उद्धरथा पुनः। उत मरिष्यन्तं देवा दैवा कृणुथ जीवसे।। 1।।

卐5.18.2 आ त्वागमं शन्तातिभिरथो अरिष्टतातिभिः। दक्षं ते भद्रमाहार्षं परा सुवाम्यामयत्।। 2।।

卐5.18.3 द्वाविमौ वातौ वात आ सिन्धोरा परावतः। दक्षं ते अन्य आ वातु परान्यो वातु यद्रपः।। 3।।

卐5.18.4 आ वात वाहि भेषजं विवात वाहि यद्रपः। त्वं हि विश्वभेषजो देवानां दूत ईयसे।। 4।।

卐5.18.5 त्रायन्तामिमं देवास्त्रायन्तां मरुतो गणैः। त्रायन्तां विश्वा भूतानि यथायमगदोऽसति।। 5।।

卐5.18.6 घृतेन द्यावापृथिवी घृतेनापस्समुक्षत। घृतेन मुच्यस्वैनसो यदात्मकृतमारिथ।। 6।।

卐5.18.7 अयं मे हस्त भगवानयं मे भगवत्तरः। अयं मो विश्वभेषजोऽयं शिवाभिमर्शनः।। 7।।

卐5.18.8 हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचो पुरो गवी। अनामयित्नुभ्यां शम्भूभ्यां ताभ्यां त्वाभि मृशामसि।। 8।।

卐5.18.9 आप इद्वा उ भेषजीरापो अमीव चातनीः। आपो विश्वस्य भेषजीस्तास्ते कृण्वन्तु भेषजम्।। 9।। 5 - 19

卐5.19.1 सहृदयं सामनस्यमविद्वेशं कृणोमि वः। अन्यो अन्यमविहृण्यत वत्सं जातमिवाघ्न्या।। 1।।

卐5.19.2 अनुव्रतः पितुः पुत्रो मात्रा भवतु सर्वतः। जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम्।। 2।।

卐5.19.3 मा भ्राता भ्रातरं द्विक्षन् मा स्वसारमुत स्वसा। सम्यञ्चस्सव्रता भूत्वा वाचं वदतु भद्रया।। 3।।

卐5.19.4 येन देवा न वियन्ति नो च विद्विषते मिथः। तत् कृण्मो ब्रह्म वो गृहे संज्ञानं पुरुषेभ्यः।। 4।।

卐5.19.5 ज्यायस्वन्तश्चित्तिनो मा वि यौष्टं संराधयन्तः सधुराश्चरन्तः। अन्योऽन्यस्मै वल्गु वदन्त एत समग्रास्थ सध्रीचीनाः।। 5।।

卐5.19.6 समानी प्रपा सहवोऽन्नभागस्समाने योक्रे सह वो युनज्मि। सम्यञ्चोऽग्निं सपर्यतारा नाभिमिवाभितः।। 6।।

卐5.19.7 येन देवा हविषा यजत्राप मात्मानप्मानमघ्नत। क्रोधं मन्युममृतं भामं दुरुक्तमभि शोचनमारे यक्ष्मं नि दध्मसि।। 7।।

卐5.19.8 सध्रीचीनान् व स्संमनसः कृणोम्येकश्नुष्टीन् संवननेन संहृदः। देवा इवेदमृतं रक्षमाणास्सायं प्रातस्सुमतिर्वो अस्तु।। 8।। 5 - 20

卐5.20.1 परोऽपेहि परश्चर परस्तर्द परस्तरम्। अग्नेर्वातस्य ध्राज्या अप बाधे अहं त्वाम्।। 1।।

卐5.20.2 उदकस्येदमयनं वातस्येदं निभञ्जनम्। अग्नेर्धूमस्सायं पन्था नेह तर्दायनं तव।। 2।।

卐5.20.3 परि त्वा कृष्णवर्त्निरग्निर्धूमेनार्चिषा। स त्वं तर्द परश्चरान्यतर्द्धि तृणं यवात्।। 3।।

卐5.20.4 ये तर्दा असुरेषिता देवेभिरिषिताश्च ये। सर्वांस्तान् ब्रह्मणा वयं शलभाञ्जम्भयामसि।। 4।।

卐5.20.5 इदं यद् गवि भेषजं विश्वाद् रूपात्समाभृतम्। आखोर्घुणस्य जातानि तानि जम्भय तेजसा।। 7।।

卐5.20.6 तूलं तर्दस्तृणस्यात्तु मूलमाखुर्धियेषितः। अथो वृक्षस्य फल्गु यद् घुणा अदन्तु मा यवम्।। 8। (इति अष्टर्चो नाम पञ्चमकाण्डे चतुर्थोऽनुवाकः) 5 - 21

卐5.21.1 द्यौश्च नः पिता पृथिवी च माताग्निश्च नृचक्षा जातवेदाः। ते तक्मानमधराञ्चं न्यञ्चं दशाह्वमस्यन्त्वधि दूरमस्मत्।। 1।।

卐5.21.2 तक्मन् यं ते क्षेत्रभागमपाभजं पृथिव्याः पूर्वे अर्धे। अति हाय तमथ नो हिनस्मि ग्राहिः किल त्वा ग्रहीष्यति किलासशीर्षः।। 2।।

卐5.21.3 तक्मन् पर्वता इमे हिमवन्तस्सोमपृष्ठाः। वातं दूतं भिषजं नो अक्रन् नश्येतो मरटाँ अभि।। 3।।

卐5.21.4 न त्वा स्त्रियः कामयन्ते न पुमांस कतमे च न। नेह तक्मन् काम्या अल्पो रोदिति नो महान्।। 4।।

卐5.21.5 मा नो हिंसीर्महतो मा हिंसीर्मह्यस्त्वम्। कुमारान् बभ्रो मा हिंसीर्मा नो हिंसीः कुमार्यः।। 5।।

卐5.21.6 य स्साकमुत्पातयसि बलासं का समुद्रजम्। भीमास्ते तक्मन् हेतयस्ताभिष्म परिवृङ्धि नः।। 6।।

卐5.21.7 अन्य क्षेत्रे च रमति सहस्राक्षोऽमर्त्यः। अभूदु प्रार्थस्तक्मा स उ नो मृडयिष्यति।। 7।।

卐5.21.8 तक्मन् न त इहाश्वा न गावो नेह ते गृहाः। शकम्भरस्य मुष्टिहा पुनर्गच्छ महावृषान्।। 8।।

5 - 22

卐5.22.1 यौ हेमन्तं स्वापयथो बलेनार्वाग् देवेभ्य उत यौ परो दिवः। भवा रुद्रयोस्सुमतिं प्र णीमहेऽन्यत्रास्मदघविषा व्येतु।। 1।।

卐5.22.2 यो द्यामा तनोति योऽन्तरिक्षं स्तभ्नात्योजसो जायमानाः। तस्मै रुद्राय हविषा विधेमान्यत्रास्मदघविषा व्येतु।। 2।।

卐5.22.3 ययोर्वधान्नापपद्यते किञ्चनान्तर्देवेषूत मानुषेषु। ताभ्यां रुद्राभ्यां हविषा विधेमान्यत्रास्मदघविषा व्येतु।। 3।।

卐5.22.4 यावीशाते पशूनां पार्थिवानां चतुष्पदामुत वा ये द्विपादः। ताभ्यां रुद्राभ्यां हविषा विधेमान्यत्रास्मदघविषा व्येतु।। 4।।

卐5.22.5 यस्य प्रतिहिता यास्सं विशन्त आरण्याः पशव उत ग्राम्यासः। तस्मै रुद्राय हविषा विधेमान्यत्रास्मदघविषा व्येतु।। 5।।

卐5.22.6 यस्मादोषधयो भर्भर्यमाणा यन्ति यस्माद्वृक्षासो न वियन्ति विश्वे। वयांसि यस्मात् प्रचरन्ति भीषा तस्मै रुद्राय हविषा विधेमान्यत्रास्मदघविषा व्येतु।। 6।।

卐5.22.7 यः पर्वतान् विदधेऽति विद्वान् यो भूतानि कल्पयति प्रजानन्। तस्मै रुद्राय हविषा विधेमान्यत्रास्मदघविषा व्येतु।। 7।।

卐5.22.8 या वीशानौ चरतो द्विपदोऽस्य चतुष्पदः। या उग्रौ क्षिप्र धन्वानौ ताभ्यां रुद्राभ्यां हविषा विधेमान्यत्रास्मदघविषा व्येतु।। 8।।

卐5.22.9 पुनश्चक्षुः पुनः प्राणं पुनरायुर्धेहि नो जातवेदः। रुद्र जलासभेषज विद्वांसस्त एना हविषा विधेमान्यत्रास्मदघविषा व्येतु।। 9।। 5 - 23

卐5.23.1 ईशानं त्वा भेषजानां विजेषाय वृणीमहे। चक्रे सहस्रवीर्यं सरस्वानोषधे त्वा।। 1।।

卐5.23.2 सत्यजितं सपथयावनीं सहमानां पुनस्सराम्। सर्वास्समह्वयोषधीरितो मा पारयानिति।। 2।।

卐5.23.3 या शशाप शपनेन या वा घ मूरमादधे। या वा रसस्य प्रा सा रेहे तोकमत्तु सा।। 3।।

卐5.23.4 प्रतीचीन फलो हि त्वमपामार्ग बभूविथ। सर्वान् मच्छपथाँ अधि वरीयो यावया त्वम्।। 4।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐5.23.5 यच्च भ्रातृव्यश्शपति यच्च यामिश्शपाति नः। ब्रह्मायन्मन्युतश्शपात् सर्वं तन्नो अधस्पदम्।। 5।।

卐5.23.6 यां ते चक्रुरामे पात्रे यां सूत्रे नीललोहिते। आमे मांसे कृत्यां यां चक्रुस्तया कृत्याकृतो जहि।। 6।।

卐5.23.7 दुःस्वप्न्यं दुर्जीवितं रक्षो अद्भ्रमराय्यः। दुर्वाचस्सर्वं दुर्भूतं तदितो नाशयामसि।। 7।।

卐5.23.8 क्षुधामारं तृष्णामारमगोतामनपत्यताम्। अपामार्ग त्वया वयं सर्वं तदपमृज्महे।। 8।। 5 - 24

卐5.24.1 समा भूमिस्सूर्येणाह्वा रात्री समावती। कृणोमि सत्यमूतये अरसास्सन्तु कृत्वरीः।। 1।।

卐5.24.2 यो देवाः कृत्यां कृत्वा हराद विदुषो गृहम्। वत्सो धारिव मातरं तं प्रत्यगुप पद्यताम्।। 2।।

卐5.24.3 अमाकृत्वा पाप्मानं यस्त्वयान्यं जिघांसति। अश्मानस्तस्यां दग्धायां बहुलाः फट्करिक्रतु।। 3।।

卐5.24.4 सहस्रधामं विशिखान् विग्रीवाञ्छावया त्वम्। प्रति स्म चक्रुषे कृत्यां प्रियां प्रियावतो हर।। 4।।

卐5.24.5 यां चकार न शशाक चक्रे पादमङ्गुलिम्। चकार भद्रमस्मभ्यमभगा भगवद्भ्यः।। 5।।

卐5.24.6 अनयाहमोषध्या सर्वाः कृत्या अदूषयन्। यां क्षेत्रे चक्रुर्यां गोभ्यो यां वा ते पुरुषेभ्यः।। 6।।

卐5.24.7 अपामार्गोऽप मार्ष्टु क्षेत्रियं शपथांश्च मत्। अपाहि यातुधान्योऽप सर्वा अराय्यः।। 7।।

卐5.24.8 अपमृज्य यातुधानानुप सर्वा अराय्यः। अपामार्ग प्रजया त्वं रय्या सचस्व नः।। 8।। 5 - 25

卐5.25.1 उतेवास्य बन्धुकृदुतास्यनुजामिकः। उतो कृत्याकृतः प्रजां नडमिवा छिन्धि वार्षिकम्।।

卐5.25.2 ब्राह्मणेन पर्युक्तोऽसि कण्वेन नार्षदेन। सेनेवैषि त्विषीमती न तत्र भयमस्ति यत्र प्राप्नोस्योषधे।। 2।।

卐5.25.3 अग्रेस्योषधीनां ज्योतिषेवाभिधीपयन्। उत पाकस्य त्रातास्युत हन्तासि रक्षसः।। 3।।

卐5.25.4 यददो देवा असुरांस्त्वयाग्रे निरकृण्वत। तस्मादधि त्वमोषधे अपामार्गो अजायथाः।। 4।।

卐5.25.5 विभिन्दती शतशाखा विभिन्दन् नाम ते पिता। प्रत्यग्वि भिन्धि तं त्वं यो अस्माँ अभिदासति।। 5।।

卐5.25.6 असद् भूम्याः समभवत्तद्यामेति बृहद्वचः। तदित्तदो विधूमयत् प्रत्यक्कर्तार मृच्छतु।। 6।।
卐5.25.7 प्रत्यङ् हिंसं बभूविथ प्रतीचीन फलस्त्वम्। प्रतीचीः कृत्या आकृत्यामुं कृत्याकृतं जहि।। 7।।
卐5.25.8 शतेन मा परि पाहि सहस्रेणाभि रक्ष मा। इन्द्रस्ते वीरुधां पत उग्र ओज्मानमा दधौ।। 8।
(इति अष्टर्चो नाम पञ्चमकाण्डे पञ्चमोऽनुवाकः) 5 - 26
卐5.26.1 अरात्या द्यावापृथिवी छिन्त्तं मूलमथो शिरः। विच्छिद्य मध्यतः पृष्टीस्तां कृण्वाथामधस्पदम्।। 1।।
卐5.26.2 इदं श्रृणु जातवेदो यदमुष्या वचो मम। अरात्यास्सर्वमिच्छिरः प्रश्नं बृहतमश्विना।। 2।।
卐5.26.3 या स्वप्नया चरति गौर्भूत्वा जनाँ अनु। अरातिमिन्द्र तं जहि तामग्निरिव सा दहात्।। 3।।
卐5.26.4 श्रेष्ठो मे राजा वरुणो हवं सत्येन गच्छतु। अरातिं हत्वा सन्तोकामुग्रो देवोऽभिदासतु।। 4।।
卐5.26.5 देष्ट्री च या सिनीवाली सप्त च स्रोत्या याः। अरातिं विश्वा भूतानि घ्नन्तु दासीमिवागसी।। 5।।
卐5.26.6 सोमो राजौषधीभिः सूर्या चन्द्रमसा उभा। अरातिं सर्वे गन्धर्वा घ्नन्त्वप्सरसश्च याः।। 6।।
卐5.26.7 भवो राजा भवाशर्वाविन्द्रो वायुर्बृहस्पतिः। त्वष्टा मे अध्यक्षः पूषा तेऽरातिं घ्नन्तु सर्वदा।। 7।।
卐5.26.8 ये च देवा भूमिचरा ये चामि दिव्यासते। ये अन्तरिक्षस्येशते तेऽरातिं घ्न्तु सव्रता।। 8।।
卐5.26.9 या चेषिता असुरैर्देवेभिरिषिता च या। अथो या मन्योर्जायतेऽरातिं हन्मि ब्रह्मणा।। 9।। 5 - 27
卐5.27.1 तदिन्नु मे अचच्छदन्महद्यक्ष्मं बृहद्वपुः। विश्वं यद् देवी निर्ऋतिस्तना युजामं मृत्योरिह जायते।। 1।।
卐5.27.2 अमम्रिश्चित् साप्रथोवददहिमहिराजन्तमोजसा। आयं चित्रकुत्समिति तिग्ममर्दय विनिकिल्बिन्दमोजसा।। 2।।
卐5.27.3 यावती द्यावापृथिवी वरिम्णा यावद्वा सप्तसिन्धवो महित्वा। तावती निर्ऋतिर्विश्ववारा विश्वस्य या जायमानस्य देव।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐5.27.4 विश्वस्य हि जायनामस्य देवि पुष्टस्य वा पुष्टपतिर्बभुविथ। नमस्तु ते निर्ऋते मा त्वमस्मान् पराभुजो नापरं हातयासि।। 4।।

卐5.27.5 देवीमहं निर्ऋतिं मन्यमानः पितेव पुत्रं न सचे वचोभिः। विश्वस्य या जायमानस्य देव शिरश्शिरः प्रति सूरो नु तस्थे।। 5।।

卐5.27.6 असुन्वन्तम यजमानमिच्छ स्तेनस्येत्यां तस्करस्यानु शिक्ष। स्वपन्तमिच्छ सा त इत्वा नमस्तु ते निर्ऋतेऽहं कृणोमि।। 6।।

卐5.27.7 असुन्वका निर्ऋतिः संजिघत्सुर्नास्याः पिता विद्यते नोत माता। मध्यात् सस्त्रामनु जिघान सर्वं न देवानामसूर्यं समाप। 7।।

卐5.27.8 यदस्य पारे तमसः शुक्रं ज्योतिरजायत। तन्नः पर्षदति द्विषोऽग्ने वैश्वानर द्युमत्।। 8।। 5 - 28

卐5.28.1 प्रमुच्यमानो भुवनस्य गोप पशुं नो अत्र प्रतिभागमेतु। अग्निर्यज्ञं त्रिवृतं सप्ततन्तुं देवो देवेभ्यो हव्यं बहतु प्रजानन्।। 1।।

卐5.28.2 यौ ते दंष्ट्रौ सुदिहौ रोपयिष्णू निरुह्ययेते दक्षिणास्सं च पश्यतः। अनाष्ट्रं नः पितरस्तत् कृणोतु यूपे बद्धं प्रमुमच्यमादयन्नम्।। 2।।

卐5.28.3 अग्निस्तस्त्वमविदुष्टः परेहीन्द्रस्य गोष्ठमपि धाव विद्वान्। धीरा सस्त्वा कवयः सं मृजन्त्विषमूर्जं यजमानायमस्त्वत्।। 3।।

卐5.28.4 ऋषिभ्यस्त्वा सप्तभिरत्रिणाहं प्रति गृह्णामि हव मे स्योनम्। जमदग्निःकश्यपस्त्वाद्वेतद् भरद्वाजो मध्वन्नं कृणोतु। प्रतिग्रहित्रे गोतमो वसिष्ठो विश्वामित्रो दद्दशे शर्म यच्छात्।। 4।।

卐5.28.5 यन्नो अग्रं हविष आजगामान्नस्य पुत्रमुत सर्पिषो वा। यद्वा धनं वहतोराजगामाग्निष्ठद्धोता सुहुतं कृणोतु।। 5।।

卐5.28.6 यदाज्यं प्रतिजग्रभ यांश्च व्रीहीनजं चन्द्रेण सह सज्जघास। बृहस्पतिर्हविषो नो विधर्ता मा नो हिंसीच्छागो अश्व वसा च। । 6।।

卐5.28.7 अग्निर्न एतत् प्रति गृह्णातु विद्वान् बृहस्पतिः प्रत्येतु प्रजानन्। इन्द्रो मरुत्वान् सुहुतं कृणोत्वयक्ष्ममनमीवं ते अस्तु।। 7।।

卐5.28.8 यन्नो ददुर्वराहमक्षितं वसु यद्वा तल्पमुपधानेन नस्सह। यद्वाभियूथं सह वृष्ण्या नो अग्निष्टद्धोता सुहुतं कृणोतु।। 8।।

卐5.28.9 यन्नश्शालां विश्वभोगामिमां ददुर्गृहं वा युक्तं सह कृत्योत। यद्वाहर उपनाहेन देवा अग्निष्टद्धोता सुहूतं कृणोतु।। 9।। 5 - 29

卐5.29.1 सूर्ये वर्च इति यच्छुश्रवाहं येन प्रजा ज्योतिरग्राश्चरन्ति। सोमे वर्चो यद् गोषु वर्चो मयि देवा राष्ट्रभृतस्तदक्रन्।। 1।।

卐5.29.2 यज्ञे वर्चो मरुतो यददृहन् वायुः पशून् सृजत्सं भगेन। गन्धर्वाणामप्सरसां यदप्सु मयि देवा राष्ट्रभृतस्तदक्रन्।। 2।।

卐5.29.3 यज्ञे वर्चो यजमाने च वर्च उदाभिषिक्ते राजनि यच्च वर्चः। दक्षिणायं वर्चो अधि यन्मयि देवा राष्ट्रभृतस्तदक्रन्।। 3।।

卐5.29.4 रथे वर्चो रथवाहने च वर्च इषुधौ वर्चः कवचे च वर्चः। अश्वेषु वर्चो अधि यन्मयि देवा राष्ट्रभृतस्दक्रन्।। 4।।

卐5.29.5 सभायां वर्चस्समित्यां च वर्चो वध्वां वर्चो उत वर्चो वरेषु। सुरायां वर्चो अधि यन्मयि देवा राष्ट्रभृतस्तदक्रन्।। 5।।

卐5.29.6 सिंहे वर्च उत वर्चो व्याघ्रे वृके वर्चो मधुहारे च वर्चः। श्येने वर्चः पत्वनां यद् बभूव मयि देवा राष्ट्रभृतस्तदक्रन्।। 6।।

卐5.29.7 हिरण्य वर्चमुत हस्तिवर्चसं संग्रामं यज्ज्ञिषां वर्च आहुः। कृष्यां क्षेत्रर्षयो जन्यानजुर्मयि देवा राष्ट्रभृतस्तदक्रन्।। 7।।

卐5.29.8 मयि वर्चो मयि श्रवो मयि द्युम्नं मयि त्विषिः। अधस्पदं पृतन्यवोऽहं भूयासमुत्तमः।। 8।। 5 - 30

卐5.30.1 पयस्वतीरोषधयः पयस्वन्मामकं वचः। अथो पयस्वतां पय आ हरामि सहस्रसः।। 1।।

卐5.30.2 अहं वेद यथा पयश्चकार धान्यं बहु। संभृत्या नाम यो देवस्तं वयं यजामहे सर्वस्यायज्वनो गृहे।। 2।।

卐5.30.3 यथा द्यौश्च पृथिवी च तस्थतुर्धरुणायकम्। एवास्फातिं नि तनोमि मयारेषु खलेषु च।। 3।।

卐5.30.4 यथा कूपश्शतधार स्सहस्रधारो अक्षितः। एवा मे अस्तु धान्यं सहस्रधारमक्षितम्।। 4।।

卐5.30.5 शतहस्त समाहर सहस्रहस्त सं किर। यथेह स्फातिरायति कृतस्य कार्यस्य च।। 5।।

卐5.30.6 इमा याः पञ्च प्रदिशो मानवीः पञ्चकृष्टयः। सर्वाश्शम्भूर्मयोभुवो वृष्टे शापं नदीर्वेहस्फातिं समावहान्।। 6।।

卐5.30.7 इहस्फातिरोषधीनां देवानामुत सङ्गमः। इहैवाश्विनोरस्तु द्वापराश्वो रुहत्।। 7।।

卐5.30.8 तिस्रो मात्रा गन्धर्वाणां चतस्रो गृहपत्नयः। तासां या स्फातिमत्तमा तया त्वाभि मृशामसि।। 8।।

卐5.30.9 ज्येष्ठस्य त्वाङ्गिरसस्य हस्ताभ्यामारभामहे। यथासद् बहुधान्यमयक्ष्मं बहु पूरुषम्। । 9।

(इति अष्टर्चो नाम पञ्चमकाण्डे षष्ठोऽनुवाकः) 5 - 31

卐5.31.1 अत्यासरत् प्रथमा धोक्ष्यमाणा सर्वान् यज्ञान् बिभ्रती वैश्वदेवी। उप वत्सं सृजत वाश्यते गौर्व्यसृष्टस्सुमना हिं कृणोमि।। 1।।

卐5.31.2 बधान वत्समभि धेहि भुञ्जतीं निद्य गोधुगुपसीददुग्धि। इडामस्मा ओदनं पिन्वमाना कीलालं घृतं मदमन्नभागम्।। 2।।

卐5.31.3 सा धावतु यमराज्ञस्सवत्सा सुकृतां पथा प्रथमेह दत्ता। अतुर्ष्टदत्ता प्रथमेदमागन् वत्सेन गां सं सृज विश्वरूपाम्।। 3।।

卐5.31.4 प्रथमेदमागन् प्रथमा दत्ते ताह्यस्मिल्लौंके सय्य उ त्वा ददाति। सैनं धेनोः प्रथमा पारयासि श्रद्धया दत्ता परमे व्योमन्।। 4।।

卐5.31.5 जानीहि स्म संस्कृते धेनो गोपतिं यस्त्वा ददाति प्रथमा स्वधानाम्। पूर्वा हि तत्र सुकृतः परेह्यथैष एता जरसः परस्तात्।। 5।।

卐5.31.6 अति धेनुरनड्वाहमत्यन्यद्वयो अक्रमीत्। अति वत्सानां पितरमृषभं प्रति मा सरत्।। 6।।

卐5.31.7 ज्योतिष्मती सुकृतो याहि सूरे स्योनास्ते धेनो पतयो भवन्तु। सप्त त्वा सूर्या अन्वा तपन्तु यमं धाव माति सरः पराचीः।। 7।।

卐5.31.8 दात्रे मूत्रे मह्यं दुहानोभौ लोकौ भुञ्जती वि क्रमस्व। इषमूर्जं दक्षिणास्सं वसाना भगस्य धारामवसे प्रतीमः।। 8।।

卐5.31.9 सहस्राङ्गा शतं ज्योतींष्यस्या यज्ञस्य पप्रिरमृता स्वर्गा। सा न ऐतु दक्षिणा विश्वरूपाहिंसन्तीं प्रति गृह्णीम एनाम्।। 9।। 5 - 32

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐5.32.1 ये ते पाशा वरुण सप्तसप्ततीस्त्रेधा तिष्ठन्ति विशिता रुशन्तः। छिनन्ति सर्वे अनृतं वदन्तं यस्सत्य वाद्यति तं सृजन्ति।। 1।।

卐5.32.2 इहस्पशः प्र चरन्ती मे अस्य सहस्राक्षा अति पश्यन्ति भूमिम्। योऽस्य वृत्रं प्रमिनाति कश्चन स मुच्यते वरुणस्य पाशात्।। 2।।

卐5.32.3 उतेयमस्य पृथिवी समीच्युतासौ द्यौर्बृहती दूरे अन्ता। उत समुद्रो वरुणस्य कुक्षा उतास्मिन्नल्प उदकेन मुक्तः।। 3।।

卐5.32.4 यस्तिष्ठति मनसा यश्च वञ्चति यो नीलायं चरति यः प्रलायम्। द्वौ यद्वदतः सन्निषद्य राजा तद्वेद वरुणस्तृतीयः।। 4।।

卐5.32.5 सर्वं तद्राजा वरुणो विचष्टे यदन्तरा रोदसी यत् परस्तात्। संख्याता अस्य निमिषो जनानामक्षान्न श्वघ्नी भुवना मिमीते।। 5।।

卐5.32.6 त्वमेव राजन् वरुण धर्ता देवानामसि विश्वरूपः। दुश्चर्मास्त्वधमः पिशङ्गो यस्सत्यां वाचमनृतेन हन्ति।। 6।।

卐5.32.7 यस्समाम्यो वरुणो यो व्याम्यो यस्सन्देश्यो वरुणो यो विदेश्यः। यो दैव्यो वरुणो यश्च मानुषः सर्वांस्त्वेनान् प्रति मुञ्चाम्यत्र।। 7।।

卐5.32.8 शतेन पाशैर्वरुणाभि धेहि मा ते मोच्यनृतवाङ् नृचक्षः। आस्तां जाल्म उदरं श्रंसयित्वा कोश इवावध्रः परिकृत्यमानः।। 8।।

卐5.32.9 उतो त्वतत् प्र पातयत्वतो तदपि नह्यसि। उतो त्वदस्वकं कृत्वा राजा वरुणो ईयते।। 9।।

卐5.32.10 ऐनं छिनत्ति वरुणो नडं कशिपुने यथा। मूलं तस्य वृश्चति य एनं प्रमिमीषति।। 10।। 5 - 33

卐5.33.1 य इमां देवो मेखलामाबबन्ध यस्संननाह य उ मा युयोज। यस्य देवस्य प्रशिषा चरामि स पारमिच्छात् स उ मा विमुञ्चात्।। 1।।

卐5.33.2 आहुतास्य विहुतर्षीणामस्यायुधम्। पूर्वा व्रतस्य प्राश्नाति वीरघ्नी भव मेखले।। 2।।

卐5.33.3 मृत्योरहं ब्रह्मचारी यदस्मि भूतां निर्याचं पुरुषं यमाय। तमहं ब्रह्मणा तपसा श्रमेणानैनं मेखलया सिनामि।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐5.33.4 अयं वज्रस्तर्पयतां व्रतेनावास्य राष्ट्रमभिहन्तु जीवम्। भिनत्तु स्कन्धान् प्र श्रृणातूष्णिहाः।। 4।।

卐5.33.5 अधरोत्तरमधरोत्तरेण गूढः पृथिव्या मोत्सृपत्। वज्रेणावहतश्शयान्।। 5।।

卐5.33.6 यो जिनाति तमन्विच्छ यो जिनाति तमिज्जहि। जिनतो वज्र सायक सीमन्तमन्वञ्चमनु पातय।। 6।।

卐5.33.7 यदश्नामि बलं कुर्वे वज्रमा ददा इति। स्कन्धानमुष्य शातयन् वृत्रस्येव शचीपतिः।। 7।।

卐5.33.8 यत् पिबामि सं पिबामि समुद्र इव सं पिबः। प्राणानमुष्य सं पिबन् सं पिबाम्यहं पिबम्।। 8।।

卐5.33.9 यद् गिरामि सं गिरामि समुद्र इव संगिरः। प्राणानमुष्य संगिरन् सं गिराम्यहं गिरम्।। 9।।

卐5.33.10 श्रद्धाया दुहिता तपसोऽधि जाता स्व सर्षिणां भूतकृतां बभूव। सा नो मेखले मतिमा धेहि मेधामथो नो धेहि तप इन्द्रियं च।। 10।।

卐5.33.11 यां त्वा पूर्वे भूतकृत ऋषयः परि बेधिरे। सा त्वं परि ष्वजस्व मा दीर्घायुत्वाय मेखले।। 11।। 5 - 34

卐5.34.1 अशान्ते श्वश्रुर्वदतु श्वशुरस्ते अशन्तरम्। देवा ते अभिशोचनं ब्रह्म विद्वेषणं कृतम्।। 1।।

卐5.34.2 आ क्रन्दयोलुला कुरु वाच मा धेह्य प्रियाम्। शिरो लिप्सस्व हस्ताभ्यां केशास्ते अभि शोचनम्।। 2।।

卐5.34.3 ये केशा यौ प्रतिधी यत् कुरीरं य ओपशः। अथो ये ते स्वास्सन्ति सर्वे ते तेऽभिशोचनम्।। 3।।

卐5.34.4 अपत्रस परिधाना उन्मादनं कृणोमि ते। अथो यत्ते स्वं वासस्सर्वं तत्तेऽभिशोनम्।। 4।।

卐5.34.5 अर्कमद्धि प्र पतातो मुनि चक्षुं कृणोमि ते। अथो श्वभ्यो रायद्भ्यः प्रति स्म गङ्गणं कुरु।। 5।।

卐5.34.6 उत्तिष्ठारे पलायस्व मरीचीनां पदं भव। अथो यत् कार्यं कुर्वासां समृष मुष्कयोः।। 6।।

卐5.34.7 उप क्ष्वेदाभि चालय वातस्तूलमिवै जय। दद्भिस्संदह्य बाह्वोरुदद्भिमुरवस्थि ये।। 7।।

卐5.34.8 अधिगाय शावलेयं शौणेयं साधुवाहिनिम्। काल्माषे यस्य चक्रुर्ध्यायतः प्रति चालय।। 8।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐5.34.9 रिश्य पुच्छं शुनः पुच्छं वातरंहं मनोजवम्। तं ते रथं सं भरन्तु देवास्तेना चरामि पतिमिच्छमाना।। 9।। 5 - 35

卐5.35.1 अग्नये समनमन् तस्मै पृथिव्या समनमन्। यथाग्नये पृथिव्या समनमन्नेवा मह्यं सं नमस्सं नमन्तु। वित्तिं भूतिं पुष्टिं पशून् ब्रह्म ब्राह्मण वर्चसम्। सं नतयस्थ सं मे नमतस्स्वाहा।। 1।।

卐5.35.2 वायवे समनमन्तस्मा अन्तरिक्षेण समनमन्। यथा वायवे अन्तरिक्षेण समनमन्नेवा मह्यं सं नमस्सं नमन्तु। वित्तिं भूतिं पुष्टिं पशून् ब्रह्म ब्राह्मण वर्चसम्। सं नतयस्थ सं मे नमतस्स्वाहा।। 2।।

卐5.35.3 सूर्याय समनमन्तस्मै दिवा समनमन्। यथा सूर्याय दिवा समनमन्नेवा मह्यं सं नमस्सं नमन्तु। वित्तिं भूतिं पुष्टिं पशून् ब्रह्म ब्राह्मण वर्चसम्। सं नतयस्थ सं मे नमतस्स्वाहा।। 3।।

卐5.35.4 चन्द्राय समनमन्तस्मै नक्षत्रै समनमन्। यथा चन्द्राय नक्षत्रैस्समनमन्नेवा मह्यं सं नमस्सं नमन्तु। वित्तिं भूतिं पुष्टिं पशून् ब्रह्म ब्राह्मण वर्चसम्। सं नतयस्थ सं मे नमतस्स्वाहा।। 4।।

卐5.35.5 सोमाय समनमन्तस्मा ओषधीभिस्समनमन्। यथा सोमायौषधीभिस्समनमन्नेवा मह्यं सं नमस्सं नमन्तु। वित्तिं भूतिं पुष्टिं पशून् ब्रह्म ब्राह्मण वर्चसम्। सं नतयस्थ सं मे नमतस्स्वाहा।। 5।।

卐5.35.6 यज्ञाय समनमन्तस्मै दक्षिणाभिस्समनमन्। यथा यज्ञाय दक्षिणाभिस्समनमन्नेवा मह्यं सं नमस्सं नमन्तु। वित्तिं भूतिं पुष्टिं पशून् ब्रह्म ब्राह्मण वर्चसम्। सं नतयस्थ सं मे नमतस्स्वाहा।। 6।।

卐5.35.7 समुद्राय समनमन् तस्मै नदीभिस्समनमन्। यथा समुद्राय नदिभिस्समनमन्नेवा मह्यं सं नमस्सं नमन्तु। वित्तिं भूतिं पुष्टिं पशून् ब्रह्म ब्राह्मण वर्चसम्। सं नतयस्थ सं मे नमतस्स्वाहा।। 7।।

卐5.35.8 ब्रह्मणे समनमन्तस्मै ब्रह्मचारिभिस्समनमन्। यथा ब्रह्मणे ब्रह्मचारिभिस्समनमन्नेवा मह्यं सं नमस्सं नमन्तु। वित्तिं भूतिं पुष्टिं पशून् ब्रह्म ब्राह्मण वर्चसम्। सं नतयस्थ सं मे नमतस्स्वाहा।। 8।।

卐5.35.9 इन्द्राय समनमन्तस्मै वीर्येण समनमन्। यथेन्द्राय वीर्येण समनमन्नेवा मह्यं सं नमस्सं नमन्तु। वित्तिं भूतिं पुष्टिं पशून् ब्रह्म ब्राह्मण वर्चसम्। सं नतयस्थ सं मे नमतस्स्वाहा।। 9।।

卐5.35.10 देवेभ्यस्समनमन्तेभ्योऽमृतेन समनमन्। यथा देवेभ्योऽमृतेन समनमन्नेवा मह्यं सं नमस्सं नमन्तु। वित्तिं भूतिं पुष्टिं पशून् ब्रह्म ब्राह्मण वर्चसम्। सं नतयस्थ सं मे नमतस्स्वाहा।। 10।।

卐5.35.11 प्रजापतये समनमन्तस्मै प्रजाभिस्समनमन्। यथा प्रजापतये प्रजाभिस्समनमन्नेवा मह्यं सं नमस्सं नमन्तु। वित्तिं भूतिं पुष्टिं पशून् ब्रह्म ब्राह्मण वर्चसम्। सं नतयस्थ सं मे नमतस्स्वाहा।। 11।।

卐5.35.12 सप्त सं नमोऽष्टमी धीतिसाधनी। सं कामानध्वनः कृणु सं ज्ञानमस्तु वो धने।। 12। (इति अष्टर्चो नाम पञ्चमकाण्डे सप्तमोऽनुवाकः) 5 - 36

卐5.36.1 ये वारुणा उत नैर्ऋता वनस्पतीनां वीरुधां च पाशाः। ये भौमा भूम्या अधि सं बभूवुस्ते त्वा न हिंसाञ्छिवतातिरस्तु ते।। 1।।

卐5.36.2 ये अन्तरिक्षे दिवि ये च पाशा अन्ने विचृता बहुधा सिनन्ति। ये पशुभ्यो अधि सं बभूवुस्ते त्वा न हिंसाञ्छिवतातिरस्तु ते।। 2।।

卐5.36.3 यन्मानुषं मनुष्याश्शपन्ते यां वां होत्रां पित्र्यामारभन्ते। समाम्यो वरुणो यज्ञघान स त्वा न हिंसाञ्छिवतातिरस्तु ते।। 3।।

卐5.36.4 अपः प्रगाद्यदि वा समामिषे अग्निमारेमिषे यदि वा समिद्धम्। विद्वानविद्वाननृतं यदुवक्थ तत्त्वा न हिंसाञ्छिवतातिरस्तु ते।। 4।।

卐5.36.5 यत् प्रतीच्याँ दृषदपिष्टाँ आमपेषाँ आमपात्रे पपाथ। हीनस्सत्येनानृतं यदुवक्थ तत्त्वा न हिंसाञ्छिवतातिरस्तु ते।। 5।।

卐5.36.6 यं वाणवन्तं सुदिहं सं भरन्ति यं वा हस्तं ब्राह्मणस्यारभन्ते। समाम्यो वरुणो य आजगाम तस्य श्मशानादधि लोष्ट्र आमृतः। स त्वा न हिंसाञ्छिवतातिरस्तु ते।। 6।।

卐5.36.7 यं ग्रावाणमारभन्ते येनासूनभिषुण्वन्ति सोमम्। यद्वा धनं धनकामो निरेमिषे क्षेत्रं गामश्वं पुरुषं वोभयादत्। तत्त्वा न हिंसाञ्छिवतातिरस्तु ते।। 7।।

卐5.36.8 अपः प्रगाद्यदि वा व्यामिषे अग्निमारेमिषे यदि वा समिद्धम्। जाम्यां हस्तं कृतमारेमिषे धनुर्वोत्तत्तमिति चक्रमिथ। मन्युर्वो राज्ञो वरुणस्यासिसक्त स त्वा न हिंसाञ्छिवतातिरस्तु ते।। 8।। 5 - 37

卐5.37.1 या ते प्रजापिहिता पुराभूद् योनिर्वा मुग्धा निहिता पिशाचैः। आस्नानं वा यदभितिष्ठाथ घोरं सर्वं तत्ते ब्रह्मणा सूदयामि।। 1।।

卐5.37.2 यद्यस्या प्रजा वरुणेन गुष्पिता दुर्णामानो वार्त्वियमस्यार्हन्ति। द्वेषात्सपत्न्याद्यदि चक्रुरस्या अयं ता नाष्ट्रा अप हन्त्वग्निः।। 2।।

卐5.37.3 अस्याः स्त्रिया यदि लक्ष्मीरपुत्र्या गर्भो वास्याः यातुधानैः पराभृतः। दुःस्वप्न्यं वा यत् स्वपती ददर्शेन्द्राग्नी तत्कृणुतां भद्रया पुनः।। 3।।

卐5.37.4 देवैनसाद् यदि पुत्रं न विन्दसे मनुष्याणां वा त्वा शपथो रराध। पितृभिर्वा ते यदि सूतः परिष्ठित इदं तं निष्कृण्मो जनयासि पुत्रम्।। 4।।

卐5.37.5 वैश्वानरो जन्मना जातवेदाः प्रजापतिः सिञ्चन्तु रेतो अस्याम्। बाधथां द्वेषो निर्ऋतिं पराचैः पुत्रिणीमिमां प्रस्वं कृणोतु।। 5।।

卐5.37.6 इह प्रजामग्निरस्यै दधात्वादित्येभिर्वसुभिस्सं विदानः। विश्वे देवा हवमा यन्तु म इमं पुत्रो अस्यां जायतां वीर्यावान्।। 6।।

卐5.37.7 येन देव्यदितिर्गर्भमादधे येन प्रजा असृजत प्रजापतिः। तेनाहमस्यै हविषा जुहोमि यथा पुमांसं जनयाति पुत्रम्।। 7।।

卐5.37.8 वन्वेते पुत्रं परि देवताभ्यो अनुमन्यतां मरुतः पृश्निमातरः। गर्भस्त्वा दशमास्यः प्रविशतु कुमारं जातं पिपृतामुपस्थे।। 8।। 5 - 38

卐5.38.1 केश्यग्निं केशी विषं केशी बिभर्ति रोदसी। केशी विश्वं स्वर्दृशे केशीदं ज्योतिरुच्यते।। 1।।

卐5.38.2 मुनयो वातरसनाः पिशङ्गा वसते मलाः। वातस्यानु ध्राजि यन्ति यद् देवासो अयुक्षत।। 2।।

卐5.38.3 उन्मादिता मौनेयेन वाताँ आतस्थिमा वयम्। शरीरेदस्माकं यूयं मर्तासो अभिपश्यथ।। 3।।

卐5.38.4 अन्तरिक्षेण पतति स्वर्भूतावचाकशत्। मुनिर्देवस्य देवस्य सौकृत्याय सखाहितः।। 4।।

卐5.38.5 इन्द्रस्याश्व वायोः सखाथो देवेषितो मुनिः। उभा समुद्रावा क्षयति सद्यः पूर्वमुतापरम्।। 5।।

卐5.38.6 गन्धर्वाणामप्सरसां देवानां चरणे चरन्। मुनिः केतस्य संविद्वान् सखा स्वादुर्मदिन्तमः।। 6।।

卐5.38.7 वायुरस्मा उपामन्थत् पिनष्टि स्मा कुनन्नमा। मुनिर्विषस्य पात्रेण यद्रुद्रेणापिबत् सह।। 7।।

卐5.38.8 सं युक्ते द्यावापृथिवी तिष्ठन्ती अविचर्त्ये। केशेनैकस्य देवस्य व्यष्टभ्नाच्छचीपतिः।। 8।। 5 - 39

卐5.39.1 न तमंहो न दुरितं देवासो अष्ट मर्त्यम्। सजोषसो यमर्यमा मित्रो नयन्ति वरुणो अतिद्विषः।। 1।।

卐5.39.2 तद्धि वयं वृणीमहे वरुणो मित्रार्यमन्। यन्नो निरंहसो यूयं पाथनेथा च मर्त्यमति द्विषः।। 2।।

卐5.39.3 ते नूनं नो यूयमूतये वरुणो मित्रार्यमन्। नयिष्ठा नो नेषिणस्थ पर्षिष्ठाः पर्षिणो अति द्विषः।। 3।।

卐5.39.4 शुनमस्मभ्यमूतये वरुणो मित्रार्यमन्। शर्म यच्छाथ सप्रथ आदित्यासो यदीमहे अति द्विषः।। 4।।

卐5.39.5 आदित्यासो अति सृधो वरुणो मित्रो अर्यमा। रुद्रं मरुद्भिरुग्रं हुवेमेन्द्रमग्निं स्वस्तये अतिद्विषः।। 5।।

卐5.39.6 नेतार ऊ षु णस्तिरो वरुणो मित्रो अर्यमा। अति विश्वानि दुरिता राजानश्चर्षणीनामति द्विषः।। 6।।

卐5.39.7 यूयं विश्वं परिपाथ वरुण मित्रार्यमन्। युष्माकं शर्मणि प्रिया स्याम सुप्रणीतयोऽति द्विषः।। 7।।

卐5.39.8 यथा हत्यद्वसवो गौर्यं चित्यद्विषता ममुञ्चता यजत्राः। एवोष्वस्मन् मुञ्चता व्यंहः प्रतार्यग्ने प्रतरं न आयुः।। 8।। 5 - 40

卐5.40.1 देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रसूतो ब्राह्मणेभ्यो निर्वपामि। स मे मा क्षेष्ट सदमस्यमानः पितृणां लोके।। 1।।

卐5.40.2 अनुमतं पृथिव्येमं पचाम्यनु मे द्यौर्मन्वता मन्वन्तरिक्षम्। अनुमन्यतामदितिर्देव पुत्रा इमे स्वर्गे लोके अस्तु।। 2।।

卐5.40.3 ब्रह्मणोखामधि दधाम्यग्नौ भूम्यां त्वा भूमिमधि धारयामि। अग्निः पचन् रक्षत्वोदनमिमं रक्षः पिशाचान् नुदतां जातवेदाः।। 3।।

卐5.40.4 अच्युतमक्षितं विश्वदानीमुत्समिव सदमक्षीयमाणम्। पिता पितामहउत यस्तृतीयस्त एनं भागमुप जीवन्त्वत्र।। 4।।

卐5.40.5 प्रपीनमक्षितं विश्वदानीं सोममिव पुनराप्यायमानम्। पुत्रः पौत्र उत यः प्रपौत्रस्तेषामस्तु निहितो भाग एषः।। 5।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham • Mysore

卐5.40.6 मा मे जारीन् निहित भाग एष मानुषन्मानुषद् गुप्तो अस्तु। वैवस्वते नि दधे शेवधिमेतं तस्मोत्सृजतु मह्यमेव।। 6।।

卐5.40.7 पुनः पूर्यतां यदहन्त्वस्यौदनोऽयं तिष्ठत्वक्षितस्सदा। वैवस्वतेन गुप्तो अस्तु राज्ञा मैमतोरूप जीवन्त मे स्वाः।। 7।।

卐5.40.8 शतधारं सहस्रधारमुत्समक्षितं व्यचमानं सलिलस्य पृष्ठे। ऊर्जं दुहानमनपस्फुरन्तमुपासीय सुकृतां यत्र लोकः।। 8। इत्यष्टर्चो नाम पञ्चमकाण्डे अष्टमोऽनुवाकः) इत्यथर्ववेदे पैप्पलादसंहितायां अष्टर्चो नाम पञ्चमकाण्डः समाप्तः

## ꧁ ॐ अथ षष्ठः काण्डः

卐6.1.1 तदिदास भुवनेषु ज्येष्ठं यतो यज्ञ उग्रस्त्वेष नृम्णः। सद्यो जज्ञानो नि रिणाति शत्रूननु यं विश्वे मदन्त्युमाः। 1।।

卐6.1.2 वावृधानश्शवसा भूर्योजाश्शत्रुर्दासाय भियसं दधाति। अव्यनच्च व्यनच्च सस्नि सन्ते नवन्त प्रभृता मदेषु।। 2।।

卐6.1.3 त्वे क्रतुमपि पृञ्चन्ति विश्वे द्विर्यदेते त्रिर्भवन्त्यूमाः। स्वादोस्स्वादीयस्स्वादुना सृजा समदस्सु मधु मधुनाभि योधीः।। 3।।

卐6.1.4 इति चिद्धि त्वा धना जयन्तं रणेरणे अनुमदन्ति विप्राः। ओजीयो धृष्णो स्थिरमा तनुष्व मा त्वा दभन्दुरेवा यातुधानाः।। 4।।

卐6.1.5 त्वया वयं शासद्महे रणेषु प्रपश्यन्तो युधेन्यानि भूरि। चोदयामि त आयुधा वचोभिस्सन्ते श्यामि ब्रह्मणा वयांसि।। 5।।

卐6.1.6 स्नषेज्यं पुरुवर्पसमृभ्व मिनतममाप्त्यमाप्त्यानाम्। आ दर्शते शवसा सप्त दानून् प्र साक्षते युधेन्यानि भूरि।। 6।।

卐6.1.7 नि तद्दधिषेऽवरं परं च यस्मिन्नाविथावसा दुरोणे। आ मातरा स्थापयसे जिगत्नू अत इनोषि कर्वरा पुरूणि।। 7।।

卐6.1.8 इमा ब्रह्म बृहद्दिवो विवक्तीन्द्राय शूषमग्रियस्स्वर्षाः। महो गोत्रस्य क्षयति स्वराजो दुरश्च विश्वा अवृणोदप स्वाः।। 8।।

卐6.1.9 एवा महान् बृहद्दिवो अथर्वा वोचत्स्वां तन्वमिन्द्रमेव। स्वसारो मातरिभ्वरीररिप्रा हिन्वन्ति च शवसा वर्धयन्ति च।। 9।।

卐6 - 2

卐6.2.1 ऋधङ्मन्द्रयोनिनो विभावा अमृतासुस्सुजन्मा वर्धमानः। अदब्धासुर्भ्राजमानोऽहेव त्रितो दाधार त्रीणि।। 1।।

卐6.2.2 नि यो धर्मणि प्रथमस्ससादातो वपूंषि कृणुते पुरूणि। धास्युर्योनिं प्रथम आविवेशा यो वाचमनुदितां चिकाय।। 2।।

卐6.2.3 यस्ते शोकस्तन्व आरिरेच क्षरद्धिरण्यं शुचयोऽनु स्वाः। अत्रा दधिषे अमृतानि नामास्मे वस्त्राणीष एरयन्त।। 3।।

卐6.2.4 प्र यदेदे प्रतरं पूर्व्यं गुस्सदस्सद आतिष्ठन्तो अजुर्यम्। कविश्शुषस्य मातरा रिहाणे जामिर्बधुर्युः प्रतिमानिमीत।। 4।।

卐6.2.5 सप्तमर्यादाः कवयस्ततक्षुस्तासामिदेकामभ्यंहुरो गात्। उतामृतासुर्व्रत एषि कृण्वन्नसुर आप्तस्स्वधया समद्भुः।। 6।।

卐6.2.6 उतायुर्ज्येष्ठो रत्ना दधातुत्युर्जा वा यं स च ते कविर्दाः। पुत्रो वा यत् पितरा क्षत्रमीर्ते ज्येष्ठं मर्यादमह्वयन् स्वस्ति।। 7।।

卐6.2.7 अवीवृधाम शग्मयं सखायं वरुणं पुत्रमदितेरिषिरम्। कविशस्तान्यस्मै वचांस्यवोचाम रोदसी सत्यवाचौ।। 9।। 6 - 3

卐6.3.1 को वः पश्चात्प्राविच्छायत्कः पुरः प्राखनत्पथः। यदैत त्वरमाणा वरुणप्रसूता आपः।। 1।।

卐6.3.2 प्रजापतिरसृजत स पुरः प्राखनत्पथः। स उ नो अन्ववासृजत्तेन सृष्टाः क्षरामसि।। 2।।

卐6.3.3 पुनाना आपो बहुधा स्रवन्ती मांश्च लोकान् प्रदिशश्च सर्वाः। पुनन्त्वस्मान् दुरितादवद्यान्मुञ्चन्तु मृत्योर्निर्ऋतेरुपस्थात्।। 3।।

卐6.3.4 आपो अस्मान् मातरस्सूदन्तु घृतेन नो घृतपुवः पुनन्तु। विश्व हि रिप्रं प्रवहन्ति देवीरुदिदाभ्यश्शुचिरा पूत एमि।। 4।।

卐6.3.5 आपो देवीर्मातरस्सुदयिष्णवो घृतच्युतो मधुना सं पपृच्रे। ता अस्मभ्यं सूरयो विश्वमायुः क्षप उस्रा वरिवस्यन्तु शुभ्राः।। 5।।

卐6.3.6 उदकस्योदकतमा रेवत्तमा रेवतीनाम्। शुन्धन्तामापश्शुन्धन्त्वस्मान्।। 6।।

卐6.3.7 यूयमापो वीरश्रियो यूयं सूदयथा शुचीन्। युष्माकमिद्दिशो महीरीयन्ते प्रदिशः पृथक्।। 7।।

卐6.3.8 यूयं मित्रस्य वरुणस्य योनिर्यूयं सोमस्य धेनवो मधिष्ठाः। युष्मान्देवीर्देव आ क्षीयतीन्दुर्यूयं जिन्वत ब्रह्मक्षत्रमापः।। 8।।

卐6.3.9 शश्वदाभिश्शाशदाना शमनान्वयामसि। आपो विश्वस्य सूदनीर्या देवा मनवे दधुः।। 9।।

卐6.3.10 यद्धावन्ति पुनते तदापो यत्तिष्ठन्ति शुद्धा इत्तद्भवन्ति। नासामवद्यमविदं न रिप्रं सनादेव मधुना सं पपृच्रे।। 10।।

卐6.3.11 हिरण्यवर्णाश्शुचयः पावकाः प्र चक्रमुर्हित्वावद्यमापः। शतं च वः प्रस्रवणेषु देवीस्सहस्रं च पवितारः पुनन्ति।। 11।।

卐6.3.12 तास्तादृशीर्ब्रह्माणं सूदयन्त्यङ्गोष्ठ्या स्तोत्र्या जीवधन्याः। या विश्वस्य शुचिकृतो अयातोर्गाव इव पयसा स्था सुजाताः।। 12।।

卐6.3.13 विश्वाद्रिप्रान्मुञ्चत सिन्धवो नो यान्येनांसि चकृमा तनूभिः। इन्द्रप्रशिष्टा वरुणप्रसूता आ सिञ्चतापो मध्वा समुद्रे।। 13।। 6 - 4

卐6.4.1 रात्री माता नभः पितार्यमा ते पितामहः। शिलाची नाम वा असि सा देवानामसि स्वसा।। 1।।

卐6.4.2 यस्त्वा पिबति जीवति त्रायसे पुरुषं त्वम्। धर्त्री च शश्वतामसि शश्वताञ्च न्यञ्चनी।। 2।।

卐6.4.3 यद्दण्डेन यदिष्वा यदरुर्हरसा कृतम्। तस्य त्वमसि भेषजी निष्कृतिर्नाम वा असि।। 3।।

卐6.4.4 भद्रा प्लक्षे न तिष्ठस्यश्वत्थे खदिरे धवे। भद्रा न्यग्रोधे पर्णे सा न एह्यरुन्धति।। 4।।

卐6.4.5 वृक्षं वृक्षमा रोहसि वृषण्यन्तीव कन्यला। जयन्ती प्रत्यातिष्ठन्ती संजया नाम वा असि।। 5।।

卐6.4.6 हिरण्यवर्णे युवते शुष्मे लोमशवक्षणे। अपामसि स्वसा लाक्षे वातो हात्मा बभूव ते।। 6।।

卐6.4.7 हिरण्य बाहो सुभगे सूर्यवर्णे वपुष्टमे। रुतं गच्छति निष्कृतिस्सेमं निष्कृधि पूरुषम्।। 7।।

卐6.4.8 घृताची नाम कानीनोऽजबभ्रू पिता तव। अश्वो यमस्य यश्शावस्तस्य हास्नास्युक्षिता।। 8।।

卐6.4.9 अश्वस्यास्नस्संपतिता सा पर्णमभि षिष्यदः। सरापत त्रिण्यसि सा न एह्यरुन्धति।। 9।।

卐6.4.10 घृताचिके वातरथे विद्युत्पर्णे अरुन्धति। आतुरङ्गमिष्ठासि त्वमङ्ग निष्करीयसी।। 10।।

卐6.4.11 यत्ते जग्धं पिशाचैस्तत्त आ प्यायतां पुनः। लाक्षा त्वा विश्वभेषजी देवेभिस्त्रायतां सह।। 11।। 6 - 5

卐6.5.1 यथा द्यौश्च पृथिवी च न विभीतो न रिष्यतः। एवा मे प्राण मा बिभेरेवा मेऽपान मा रिषः।। 1।।

卐6.5.2 यथा वायुश्चान्तरिक्षं च न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेरेवा मेऽपान मा रिषः।। 2।।

卐6.5.3 यता सूर्यश्च चन्द्रमाश्च न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेरेवा मेऽपान मा रिषः।। 3।।

卐6.5.4 यथाहश्च रात्री च न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेरेवा मेऽपान मा रिषः।। 4।।

卐6.5.5 यथा धेनुश्चानड्वांश्च न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेरेवा मेऽपान मा रिषः।। 5।।

卐6.5.6 यथा मित्रश्च वरुणश्च न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेरेवा मेऽपान मा रिषः।। 6।।

卐6.5.7 यथा ब्रह्मं च क्षत्रं च न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेरेवा मेऽपान मा रिषः।। 7।।

卐6.5.8 यथेन्द्रश्चेन्द्रियं च न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेरेवा मेऽपान मा रिषः।। 8।।

卐6.5.9 यथा वीरश्च वीर्यं च न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेरेवा मेऽपान मा रिषः।। 9।।

卐6.5.10 यथा प्राणश्चापानश्च न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेरेवा मेऽपान मा रिषः।। 10।।

卐6.5.11 यथा मृत्युश्चामृतं च न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेरेवा मेऽपान मा रिषः।। 11।।

卐6.5.12 यथा सत्यं चानृतं च न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेरेवा मेऽपान मा रिषः।। 12।।

卐6.5.13 यथा भूतं च भव्यं च न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेरेवा मेऽपान मा रिषः।। 13। (इति नवर्चो नाम षष्ठकाण्डे प्रथमोऽनुवाकः) 6 - 6

Sri Ganapathy Sachchidananda Avadhoota Datta Peetham

卐6.6.1 मधुमन्मे निक्रमणं मधुमन्ने परायणम्। वाचा मधुमदुद्यासमकक्ष्यौ मे मधु सं दृशी।। 1।।
卐6.6.2 मामनु प्रसारयन्मम पत्तो निपेदिवान्। अथो मे पुनरायतो अक्ष्यौ कामेन शुष्यताम्।। 2।।
卐6.6.3 वशा मधुघ ते मातोक्षा भ्रातर्षभः पिता। धेन्वा अधि प्रजातोऽसि राजा सन्मधुमत्तमः।। 3।।
卐6.6.4 वृषाणं वृष्ण्यावन्तं सोमपृष्ठं दिवि श्रितम्। इन्द्राण्यग्र आ भरन्मधुघं भगाय कम्।। 4।।
卐6.6.5 पितु भोजनो मधुघ शौष्कास्यो हृदयाय कम्। स मा मधु नानक्तु यथाहं कामये तथा।। 5।।
卐6.6.6 सिन्धु प्रजानो मधुघो अश्व इव नीयते जनाँ अनु। स मा मधु नानक्तु यथाहं कामये तथा।। 6।।
卐6.6.7 मधुमती सिनीवाली मधुना मा समुक्षतु। सा मा मधु नानक्तु यथाहं कामये तथा।। 7।।
卐6.6.8 यथा मधु मधुकृतो न्यञ्जन्ति मधावधि। एवा न्यनज्मि ते मनोऽध्यस्यां मामकी तनू।। 8।।
卐6.6.9 यत्ते मनः परागतं यद्बद्धमिह वेह वा। तत्त आवर्तयामसि मयि बध्नामि ते मनः।। 9।। 6 - 7
卐6.7.1 कश्यपश्च सुपर्णश्च यन्मरीच्यामतिष्ठताम्। सुपर्णः पर्यवापश्यत्समुद्रे भूमिमावृताम्।। 1।।
卐6.7.2 यां सुपर्णः पर्यपश्यदन्तर्महत्यर्णवे। तां सूकर त्वं मायया त्रिस्समुद्रादुदाभरः।। 2।।
卐6.7.3 यां समुद्रादुदाभरो भूमिं सूकर मायया। सैषा विषस्य दुषण्यस्मै भवतु भेषजी।। 3।।
卐6.7.4 अच्युता हिरण्येन या सत्ये अधितिष्ठति। तस्यास्ते विश्वधायसो विषदूषणमुद्धरे।। 4।।
卐6.7.5 यस्याः कुलायं सलिले अन्तर्महत्यर्णवे। तस्यास्ते विश्वधायसो विषदूषणमुद्धरे।। 5।।
卐6.7.6 यस्या भूम्या उपजीका गृहं कृण्वत आत्मने। तस्यास्ते विश्वधायसो विषदूषणमुद्धरे।। 6।।
卐6.7.7 यस्त्वा भूमेऽन्वविन्दद्यस्त्वा भूम उदाभरत्। तयोस्सहस्रधामन्नहं नामि जग्रभ।। 7।।
卐6.7.8 यानि त इन्द्रो अकृणोद्भूमे नामानि वृत्रहा। तानि ते बभ्रोः सं विद्म सेहैधि विषदूषणी।। 8।।
卐6.7.9 यानि ते मरुतश्चक्रुर्यानि सप्तर्षयो विदुः। विश्व आदित्या यां विदुस्सा भूमिर्विषदूषणी। 9।। 6 - 8
卐6.8.1 सहस्व यातुधानान् सहस्व यातुधान्यः। सहस्व सर्वा रक्षांसि सहमानास्योषधे।। 1।।
卐6.8.2 सहमाने सहस्वती सहन्त्यहमुत्तरे। उताहमस्मि सासहिस्सासहे वस्सदान्वाः।। 2।।
卐6.8.3 या सहमाना चरसि सासहान इवर्षभः। सदान्वाघ्नी रक्षोघ्नी सा त्वमुग्रास्योषधे।। 3।।
卐6.8.4 खेले है लम्बनस्तनि नश्येतः प्रामुतः पत। न त्वामविव्यदिहोक्षेव शृङ्गवच्छिरः।। 4।।
卐6.8.5 असुवाने बहु पुत्रे अनन्तर्वे महोदरि। यथास्मत्सत्वरे त्वं शर्करा वस्पती चर।। 5।।

卐6.8.6 अदो यद्दारु प्लवते सिन्धोर्मध्ये अपूरुषम्। तदारभस्व दुर्हणो तेन याहि पस्तरम्।। 7।।
卐6.8.7 यस्या जनित्रमिष्टर्गा अदृष्टाः क्रिमयः प्लुषयः। तस्यै बला सपत्न्यै नमस्कृणोमि कुक्ष्यै।। 8।।
卐6.8.8 शर्वपुत्रे भवपत्नी यातुभ्रात्रि सदान्वे। तस्याद्धि पुत्रान् भ्रातृंश्च यत्र त्वापनयामसि।। 9।। 6 - 9
卐6.9.1 वृषायमंशुर्वृषभाय गृह्यते वृ। यमुग्रो नृचक्षसे। दिव्यो नर्यो अचि क्रदन् महन्नामर्षभस्य यत्ककुत्।। 1।।
卐6.9.2 विषुवान् विष्णो भव त्वं यो नृपतिर्मम। अथो इन्द्र इव देवेभ्यो वि ब्रवीतु जनेभ्यः।। 2।।
卐6.9.3 मनुष्येभ्यो वि ब्रवीतु सजूरिन्द्रेण मेदिना। अग्निश्च तुभ्यं साहन्त्यो राष्ट्रं वैश्वानरो दधत्।। 3।।
卐6.9.4 यस्यायं भागर्षभ इन्द्राय परिणीयते। स हन्तु शत्रूनायतो अथो हन्तु परायतः।। 4।।
卐6.9.5 स हन्ता शत्रोर्भवतु हन्ता भवतु दोधताम्। विशामह प्रणीरयदग्रमुद्भिन्दतामसत्।। 5।।
卐6.9.6 आयुष्मन्तं वर्चस्वन्तमथो अधिपतिं विशाम्। अस्याः पृथिव्याश्चेत्तारमिममिन्द्रर्षभं कृणु।। 6।।
卐6.9.7 यास्सुशृङ्गस्सु ककुदः कल्याणो बर्हिरासदत्। कार्षिवण प्रजानेन ऋषभेण यजामहे।। 7।।
卐6.9.8 ऋषभेण यजमाना अक्रूरेणेव सर्पिषा। मृधश्च सर्वा इन्द्रेण पृतनाश्च सहामहे।। 8।।
卐6.9.9 यं तुभ्यं भागमृषभं देवाः केवल्यं ददुः। तेन वृत्राणि जङ्घनश्शत्रूंश्च जह्याहवे।। 9।।
卐6.9.10 जहि शत्रून् वि मृधो नुदस्व कृष्यास्संभूतो असि वीर्यावान्। इन्द्राय भागं परि त्वा नयाम उरुर्नो लोको अपृतन्यो अस्तु।। 10।।
卐6.9.11 घृवृद्ध घृताहुत सहस्रशृङ्ग सुष्टुत। घृताहवन दीदिही।। 11।।
卐6.9.12 यो घृतेनावघारित उग्रो जैत्राय तिष्ठसि। स नस्सङ्कासु पारय पृतनासाह्येषु च।। 12।। 6 - 10
卐6.10.1 कर्की सुभागर्षभस्य पत्नी प्रजाकामा वशिनी वाशिता गौः। तां सहस्रमेकमुखा ददाति गर्भं दधानामृतुना चरन्तीम्।। 1।।
卐6.10.2 गर्भं दधाना पय इद्दुहाना अग्निहोत्रं वैश्वदेवी दुहाना। गौर्ण मा हिंसीद्वरुणस्य पत्नी।। 2।।
卐6.10.3 कर्क्या योनिं संमनसोऽभि गावः प्रजां धित्सन्तो वृषणश्चरन्ति। सा न ऐत्वदितिर्विश्वरूपाभि क्रन्दन्ति भुवनान्येनाम्।। 3।।

卐6.10.4 प्रजापतिनेषितामृत्वियावतीमैनां प्रजाया ऋषभाश्श्रयन्ते। वृषण्यन्तीं वृषणस्सप्तनाम्नीं हिं कृण्वन्तो अभि नुदन्तु वाशिताम्।। 4।।

卐6.10.5 सा प्रत्युदश्र्युषसा सुवर्णा शुक्रं वसाना वरुणस्य निर्णिजम्। वैश्वदेवी स्वधा मा भरन्ती प्रजान्दाता पुष्यतु गोपतिष्ठे।। 5।।

卐6.10.6 सत्यं स्थावर्यृषभाय तिष्ठसि प्रतीची सोमं प्रति सूर्यमग्निम्। अहिंसन्ती वाशिते मामुपेहि पशुन्दाता पुष्यतु गोपतिष्ठे।। 6।।

卐6.10.7 वशी दाता भवतु वाशिताया अग्नेर्भागमुस्त्रियां यो ददाति। प्रियं धाम हृदयं सोम्यं मधु वाजिनीं त्वा वाजिनो वाजयन्तु।। 7।।

卐6.10.8 यो वाशितायां गव्यन्तरग्निर्यदस्यां नृम्णं महिमा बभूव। नमस्तस्मै प्रतिगृह्णन् कृणोमि स्योना मे अस्तु तन्वे सुशेवा।। 8।।

卐6.10.9 एयमगन्वासिता तां प्रतीमः पुंसां व्रातेन सह पुष्ट्या गौः। ऊर्जं दधाना घृतमिद्दुहाना सहस्रपोषाय मे अस्तु दात्रे।। 9। (इति नवर्चो नाम षष्ठकाण्डे द्वितीयोऽनुवाकः) 6 - 11

卐6.11.1 बेरहेम जज्ञानं प्रथमं पुरस्ताद् वि षीमतस्सुरुचो वेन आवः। स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च वि वः।। 1।।

卐6.11.2 अनाप्ता ये वः प्रथमा यानि कर्माणि चक्रिरे। वीरान्नो अत्र मा दभन् तद्व एतत्पुरो दधे।। 2।।

卐6.11.3 प्रत्नान्मानात्परि ये सं बभूवुः श्लोकवन्तस्सौमनसस्य वन्तवः। अपानक्षासो बधिरा अहासतर्तस्य पन्थां न तरन्ति दुष्कृतः।। 3।।

卐6.11.4 सहस्रधारमभि ते समस्वरन्दिवो नाके मधुजिह्वा असश्चतः। तस्य स्पशो न निमिषन्ति भूर्णयः पदेपदे पाशिनस्सन्तु सेतवे।। 4।।

卐6.11.5 पर्यू षु प्र धन्वा वाजसातये परि वृत्राणि सक्षणिः। दिवस्तदर्णवाङ् अन्वीयसे सनीस्रसो नामासि त्रयोदशो मासः।। 5।।

卐6.11.6 इन्द्रस्य गृहोऽसीन्द्रस्य शर्मासीन्द्रस्य वर्मासीन्द्रस्य वरूथमसि। व्येतेना वैतेनापैतेनारात्सीरसौ स्वाहा।। 6।।

卐6.11.7 तिग्मायुधौ तिग्महेती सुशेवावग्नीषोमाविह सु मृडतं नः। मुमुक्तमस्मान् गृभीतादवद्याज्जुषेथां यज्ञममृतमस्मासु धत्तं स्वाहा।। 7।।



Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐6.11.8 चक्षुषो हेते मनसो हेते ब्रह्मणो हेते मेन्यामेनिरसि। अमेनयस्ते सन्तु येऽस्मानभ्यघायन्ति स्वाहा।। 8।।

卐6.11.9 योऽस्मान् चक्षुषा मनसा यश्च वाचाकूत्या चित्या ब्रह्मणाघायुरभिदासात्। तमग्ने त्वं मेन्यामेनिं कृणु स्वाहा।। 9।।

卐6.11.10 उदायुरुत्कृतमुद् बलमुन्मनीषोदिद्रियं नृम्णमस्मासु धेहि स्वाहा।। 10।। 6 - 12

卐6.12.1 आयुष्कृतायुष्मती स्वधावन्तौ गोपा मे स्थौ गोपायतं मा। आत्मसदौ मे स्तं तन्वे सुशेवौ मा मा हिंसिष्टं स्वाहा।। 1।।

卐6.12.2 इनद्रस्य गृहोऽसीन्द्रस्य शर्मासीन्द्रस्य वर्मासीन्द्रस्य वरूथमसि। तं त्वा प्र विशामि सर्वाङ्गस्सर्वात्मासर्वगुस्सर्व पूरुषस्सह जन्मेऽस्ति तेन।। 2।।

卐6.12.3 अस्तृतो नामाहमयमस्मि स आत्मानं परि दधे द्यावापृथिवीभ्यां गोपीथाय प्र हूयसे।। 3।।

卐6.12.4 अस्तृतो नाम प्राजापत्यो देवो मासस्त्रयोदशः। सर्वगुस्सर्वपूरुषः प्रागान्देवपुरा अहम्।। 4।।

卐6.12.5 अन्तः प्रागान्देवपुरा सह ग्रामस्स्वस्तये। संवत्सरस्य मध्यतस्सर्वैस्सोदर्यैस्सह।। 5।।

卐6.12.6 प्राहमगां देवपुरा य एवास्मि स एव सन्। यो मा कश्चाभिदासति स प्रजापतिमृच्छतु।। 6।।

卐6.12.7 अस्मासि प्रति स्पशः पाहि रिषः पाहि द्विषः। पाहिदैव्याभिशस्त्यास्स म इह तन्वं पाहि।। 7।।

卐6.12.8 योऽस्मान् प्राच्या दिशोऽघायुरभिदासात्। एतत्सर्छादश्मवर्म नोऽस्तु।। 8।।

卐6.12.9 योऽस्मान् दक्षिणाया दिशोऽघायुरभिदासात्। एतत्सर्छादश्मवर्म नोऽस्तु।। 9।।

卐6.12.10 योऽस्मान् प्रतीच्या दिशोऽघायुरभिदासात्। एतच्छर्छादश्मवर्म नोऽस्तु।। 10।। 6 - 13

卐6.13.1 योऽस्मानुदीच्या दिशोऽघायुरभिदासात्। एतच्छर्च्छादश्मवर्म नोऽस्तु।। 1।।

卐6.13.2 योऽस्मान्ध्रुवाया दिशोऽघायुरभिदासात्। एतच्छर्च्छादश्मवर्म नोऽस्तु।। 2।।

卐6.13.3 योऽस्मानूर्ध्वाया दिशोऽघायुरभिदासात्। एतच्छर्च्छादश्मवर्म नोऽस्तु।। 3।।

卐6.13.4 प्राच्यै दिशे स्वाहा।। 4।।

卐6.13.5 दक्षिणायै दिशे स्वाहा।। 5।।

卐6.13.6 प्रतीच्यै दिशे स्वाहा।। 6।।

Sri Ganapati Sachchidananda Avadhoota Dattapeetham • Mysore •

卐6.13.7 उदीच्यै दिशे स्वाहा।। 7।।

卐6.13.8 ध्रुवायै दिशे स्वाहा।। 8।।

卐6.13.9 ऊर्ध्वायै दिशे स्वाहा।। 9।।

卐6.13.10 दिवे स्वाहा।। 10।।

卐6.13.11 अन्तरिक्षाय स्वाहा।। 11।।

卐6.13.12 पृथिव्यै स्वाहा।। 12।।

卐6.13.13 पृथिव्यै स्वाहा।। 13।।

卐6.13.14 अन्तरिक्षाय स्वाहा।। 14।।

卐6.13.15 दिवे स्वाहा।। 15।। 6 - 14

卐6.14.1 महाकण्ठं करीषजमूबध्यादमनाहुतिम्। ओष्ठः कोकमुखश्च यस्तानितो नाशयामसि।। 1।।

卐6.14.2 रामदन्तमवदलं प्रहालमहिनासिकम्। उपवर्तं बलाहकं खेलं गर्दभनादिनं गृध्रं हस्त्यायनं तानितो नाशयामसि।। 2।।

卐6.14.3 प्रमुष्यादिनमभ्यमं भीमहस्तं मरीमृशम्। त्रस्ताक्षं मृद्वङ्गुलिं नखोग्रं दन्तवीर्यम् तानितो नाशयामसि।। 3।।

卐6.14.4 पर्जन्यमभिपापदं जिगीषमाणं रूपकम्। अथो शलल्यं शेवलं तानितो नाशयामसि।। 4।।

卐6.14.5 तण्डमग्रे तुण्डिकमलिंशमुत वत्सपम्। दामग्रन्थिं सनिस्त्रसमरण्येयं चार्म्येयं तानितो नाशयामसि।। 5।।

卐6.14.6 इदं यज्ञानु केशवं रक्षश्चरत्यासुरं वहिः प्रयुतमिच्छति। अंसून् पांस्यूंश्च केश्यानरायाञ्छ्वकिष्किणस्तानितो नाशयामसि।। 6।।

卐6.14.7 यः कुमाराञ्जनस्यात्ति तरुणान्दास आसुरः। अरायः केश्य खलो यो जनान् हन्त्यत्ति च तमितो नाशयामसि।। 7।।

卐6.14.8 हिराक्षो नाम गेह्योऽराया नामसूर्तहा। तमितो नाशयामसि।। 8।।

卐6.14.9 वितूलं भस्वमाखिदं वनक्रोशं च रोरुहम्। आमादं प्रयुतैषणं पर्युन्दानं परिद्रवम्। वृकस्य न्यञ्चगङ्गणम् तानितो नाशयामसि।। 9।। 6 - 15

卐6.15.1 यश्च भूमा या च स्फातिर्योर्जा यो रसश्च ते। हरामि शक्रताङ् अहन्त्वया प्रत्तां शचीपते।। 1।।
卐6.15.2 क्षेत्रात् क्षेत्रादाहरामि स्फातिं सर्वाञ्छचीपते। त्वयाहं वृत्रहन् प्रत्तमा हरामि गृहाँ उप।। 2।।
卐6.15.3 यस्ते सीताभगः क्षेत्रे या राद्धिर्यच्च शीयते। अथो या निष्ठा ते क्षेत्रे तां त आदिषि ब्रह्मणा।। 3।।
卐6.15.4 यत्खले यन्मयारे यद् गोष्ठे यच्च शेवधौ। अथो यत् कुम्भ्यां शये तस्य ते रस मा ददे।। 4।।
卐6.15.5 ऊर्जा या ते निरुप्तस्योर्जा या वहतस्य ते। ऊर्जां ते पिष्यमाणस्योर्जां पिष्टात्त आ ददे।। 5।।
卐6.15.6 ऊर्जां ते निरुप्तस्योर्जा यावहतस्य ते। ऊर्जां ते पच्यमानस्योर्जां पक्वात्त आ ददे।। 6।।
卐6.15.7 ऊर्जा या ते प्रणद्धस्योर्जा या मथितस्य ते। ऊर्जां ते दुह्यमानस्योर्जां दुग्धात्त आ ददे।। 7।।
卐6.15.8 आ ते ददे गवामूर्जामूर्जामविभ्य आ ददे। अजाभ्य ऊर्जा मादाया त एकशफाद्ददे।। 8।।
卐6.15.9 ऊर्जा या ते पुरूषेषूर्जा वित्ते च वेद्ये। ऊर्जां ते सर्वेषामहं गृहाणां ब्रह्मणा ददे।। 9। (इति नवर्चो नाम षष्ठकाण्डे तृतीयोऽनुवाकः) 6 - 16
卐6.16.1 पितुं नु स्तोषं महो धर्माणं तविषीम्। यस्य त्रितो व्योजसा वृत्रं वि पर्व मर्दयत्।। 1।।
卐6.16.2 स्वादो पितो मधो पितो वयं त्वा ववृमहे। अस्माकमविता भव।। 2।।
卐6.16.3 उप नः पितवा गहि शिवश्शिवाभिरूतिभिः। मयो भूरद्विषेण्यः सखा सुशेव एधि नः।। 3।।
卐6.16.4 तव त्ये पितो रसा रजांस्यनु विष्ठिताः। दिवि वाता इव श्रिताः।। 4।।
卐6.16.5 तवत्ये पितो ददतस्तव स्वदिष्ठ ते पितो। प्र स्वाद्मानो रसानां तुविग्रीवा इवेरते।। 5।।
卐6.16.6 त्वे पितो महानां देवानां मनो हितम्। अकारि चारु केतुना तवाहिमवसावधीत्।। 6।।
卐6.16.7 यददः पितो अजगन्विवस्व पर्वतानाम्। अत्रा चिन्नोमधो पितोऽरं भक्षाय गम्याः।। 7।।
卐6.16.8 यत्ते सोम गवाशिरो यवाशिरो भजामहे। वातापे पीव इद्भव।। 8।।
卐6.16.9 यदपामोषधीनां परिंश मा रिशामहे। वातापे पीव इद्भव।। 9।।
卐6.16.10 करम्भ ओषधे भव पीवो वृक्क उदारथिः। वातापे पीव इद्भव।। 10।।
卐6.16.11 तं त्वा वयं पितो वचोभिर्गावो न हव्या सुषूदिम। अस्मभ्यं त्वा सधमादं देवेभ्यस्त्वा सधमादम्।। 11।। 6 - 17

卐6.17.1 प्रतित्यं चारुमध्वरंगोपीथाय प्र हूयसे। मरुद्भिरग्न आ गहि।। 1।।

卐6.17.2 नहि देवो न मर्त्यो महस्तव क्रतुं परः। मरुद्भिरग्न आ गहि।। 2।।

卐6.17.3 ये महो रजसो विदुर्विश्वे देवासो अद्रुहः। मरुद्भिरग्न आ गहि।। 3।।

卐6.17.4 ये शुभ्रा घोरवर्पसः सुक्षत्रासो रिशादसः। मरुद्भिरग्न आ गहि।। 4।।

卐6.17.5 य उग्रा अर्क मा नृचुरनाधृष्टास ओजसा। मरुद्भिरग्न आ गहि।। 5।।

卐6.17.6 ये नाकस्याधि रोचने दिवि देवास आसते। मरुद्भिरग्न आ गहि।। 6।।

卐6.17.7 य इङ्खयन्ति पर्वतान्तिरस्समुद्रमोजसा। मरुद्भिरग्न आ गहि।। 7।।

卐6.17.8 आ ये तन्वन्ति रश्मिभिस्तिरस्समुद्रमर्णवम्। मरुद्भिरग्न आ गहि।। 8।।

卐6.17.9 अभि त्वा पूर्वपीतये सृजामि सोम्यं मधु। मरुद्भिरग्न आ गहि।। 9।।

卐6.17.10 आयन्तु मरुतो गणैस्तुता दधतु नो रयिम्। मरुद्भिरग्न आ गहि।। 10।।

卐6.17.11 आ त्वा कण्वा अहूषत गृणन्ति विप्र ते धियः। मरुद्भिरग्न आ गहि।। 11। (इति नवर्चो नाम षष्ठकाण्डे तृतीयोऽनुवाकः) 6 - 18

卐6.18.1 सम्मा सिञ्चन्तु मरुतस्सं पूषा सं बृहस्पतिः। सम्मायमग्निः सिञ्चन्तु प्रजया च धनेन च दीर्घमायुष्कृणोतु मे।। 1।।

卐6.18.2 सम्मा सिञ्चन्त्वादित्यास्सम्मा सिञ्चन्त्वग्नयः। इन्द्रस्समस्मान् सिञ्चतु प्रजया च धनेन च दीर्घमायुष्कृणोतु मे।। 2।।

卐6.18.3 सम्मा सिञ्चन्त्वरुषा स्समर्का ऋषयश्च ये। पूषा समस्मान् सिञ्चतु प्रजया च धनेन च दीर्घमायुष्कृणोतु मे।। 3।।

卐6.18.4 सम्मा सिञ्चन्तु गन्धर्वाप्सरसः सम्मा सिञ्चन्तु देवताः। भगस्समस्मान् सिञ्चतु प्रजया च धनेन च दीर्घमायुष्कृणोतु मे।। 4।।

卐6.18.5 सम्मा सिञ्चतु पृथिवीस्सम्मा सिञ्चन्तु या दिवः। अन्तरिक्षस्समस्मान् सिञ्चतु प्रजया च धनेन च दीर्घमायुष्कृणोतु मे।। 5।।

卐6.18.6 सम्मा सिञ्चन्तु प्रदिशस्सम्मा सिञ्चन्तु या दिशः। आशा समस्मान् सिञ्चतु प्रजया च धनेन च दीर्घमायुष्कृणोतु मे।। 6।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐6.18.7 सम्मा सिञ्चन्तु नद्यः सम्मा सिञ्चन्तु सिन्धवः। समुद्रस्समस्मान् सिञ्चतु प्रजया च धनेन च दीर्घमायुष्कृणोतु मे।। 7।।

卐6.18.8 सम्मा सिञ्चन्तु कृषयः सम्मा सिञ्चन्त्वोषधीः। सोमस्समस्मान्सिञ्चतु प्रजया च धनेन च दीर्घमायुष्कृणोतु मे।। 8।।

卐6.18.9 सम्मा सिञ्चन्तु या आपस्सम्मा सिञ्चन्तु वृष्टयः। सरस्वती समस्मान्सिञ्चतु प्रजया च धनेन च दीर्घमायुष्कृणोतु मे।। 9।। 6 - 19

卐6.19.1 सं भगो वर्चसामाग्ने सं विष्णुः पुष्ट्या सिचत्। क्षत्रं समस्मान्सिञ्चतु प्रजया च धनेन च दीर्घमायुष्कृणोतु मा।। 1।।

卐6.19.2 सं विराड्वर्चसा माग्ने सं देष्ट्री पुष्ट्या सिचत्। इडा समस्मान्सिञ्चतु प्रजया च धनेन च दीर्घमायुष्कृणोतु मा।। 2।।

卐6.19.3 सं धाता वर्चसा माग्ने सं सिक्तिः पुष्ट्या सिचत्। सं देवो अस्मानर्यमा प्रजया च धनेन चायुष्मन्तं कृणोतु मा।। 3।।

卐6.19.4 समंशो वर्चसा माग्ने सं वायुः पुष्ट्या सिचत्। वातस्समस्मान्सिञ्चतु प्रजया च धनेन चायुष्मन्तं कृणोतु मा।। 4।।

卐6.19.5 सं सभा वर्चसा माग्ने सं सुरा पुष्ट्या सिचत्। सूर्या समस्मान्सिञ्चतु प्रजया च धनेन चायुष्मन्तं कृणोतु मा।। 5।।

卐6.19.6 सं सविता वर्चसामाग्ने सं सूर्यः पुष्ट्या सिचत्। चन्द्रस्समस्मान्सिञ्चतु प्रजया च धनेन चायुष्मन्तं कृणोतु मा।। 6।।

卐6.19.7 सं पशवो वर्चसा माग्ने सं यज्ञः पुष्ट्या सिचत्। दक्षिणा समस्मान्सिञ्चतु प्रजया च धनेन चायुष्मन्तं कृणोतु मा।। 7।।

卐6.19.8 सम्मा सिञ्चतु द्रविणं सम्मासिञ्चन्त्विन्द्रियं। तेजस्समस्मान्सिञ्चतु प्रजया च धनेन चायुष्मन्तं कृणोतु मा।। 8।।

卐6.19.9 सम्मा सिञ्चन्तु वर्चांसि सम्मा सिञ्चन्तु भूतयः। सत्यं समस्मान्सिञ्चतु प्रजया च धनेन चायुष्मन्तं कृणोतु मा।। 9।। 6 - 20

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐6.20.1 आ रात्री पार्थिवं रजः पितुरप्रायि धामभिः। दिवः सदांसि बृहती वि तिष्ठस आ त्वेषं वर्तते तमः।। 1।।
卐6.20.2 न यस्याः पारं ददृशे न योयुवद् विश्वमस्यां नि विशते यदेजति। अरिष्टासस्त उर्वि तमस्वति रात्रि पारमशीमहि भद्रे पारमशीमहि।। 2।।
卐6.20.3 ये ते रात्रि नृचक्षसो द्रष्टारो नवतिर्नव। अशीतिश्शन्त्यष्टा उतो ते सप्त सप्ततिः।। 3।।
卐6.20.4 षष्टिश्च षट् च रेवति पञ्चाशत्पञ्च सुम्नयि। चत्वारश्चत्वारिंशच्च त्रयस्त्रिंशच्च वाजिनि।। 4।।
卐6.20.5 द्वा च विंशतिश्च ते रात्र्येकादशावमाः। तेभिर्नोद्य पायुभिर्नि पाहि दुहितर्दिवः।। 5।।
卐6.20.6 रक्षा मा कीर्णो अघशंस ईशत मा नो दुःशंस ईशत।। 6।।
卐6.20.7 मा नो अद्य गवांस्तेनो मावीनां वृक ईशत। माश्वानां भद्रे तस्करो मा नृणां यातुधान्यः।। 7।।
卐6.20.8 परमेभिः पथिभिस्तेनो धावतु तस्करः। परेण दत्वती रज्जुः परेणाघायुरर्षतु।। 8।।
卐6.20.9 अन्धं रात्रि तिष्ठधूममशीर्षाणमहिं कृणु। हनू वृकस्य जम्भयास्तेनं द्रुपदे जहि।। 9।।
卐6.20.10 त्वयि रात्रि वसामसि स्वपिष्यामसि जागृहि। गोभ्यो नश्शर्मयच्छाश्वेभ्यः पुरुषेभ्यः।। 10।। 6 - 21
卐6.21.1 अथो यानि च वस्महे यानि चान्तः परीणहि। तानि ते परिदध्मसि।। 1।।
卐6.21.2 रात्रि मातरुषसे नः परिधेहि। उषा नो अह्ने परिददात्वहस्तुभ्यं विभावरि।। 2।।
卐6.21.3 यत्किञ्चेदं पतयति यत्किञ्चेदं सरीसृपम्। यत्किञ्च पद्वदासन्वत्तस्मात्त्वं रात्रि पाहिनः।। 3।।
卐6.21.4 सा पश्चात्पाहि सा पुरः सोत्तरादधरादुत। गोपाय नो विभावरि स्तोतारस्त इहस्मसि।। 4।।
卐6.21.5 ये रात्रिमनुतिष्ठन्ति ये च भूतेषु जाग्रति। पशून् ये सर्वान् रक्षन्ति ते न आत्मसु जाग्रतु ते नः पशुषु जाग्रतु।। 5।।
卐6.21.6 वेद वै रात्रि ते नाम घृताची नाम वा असि। तां त्वा भरद्वाजो वेद सा नो वित्तेऽधि जागृहि।। 6।। 6 - 22
卐6.22.1 ब्रह्मास्य शिरो बृहदस्य पृष्ठं वामदेव्यमुदरमोदनस्य। छन्दांसि पक्षौ मुखमस्य सत्यं विष्टारी यज्ञस्तपसोऽधि जातः।। 1।।

卐6.22.2 अनास्थाश्शुद्धाः पवनेन पूताश्शुचयश्शुचीनपि यन्ति लोकान्। विष्टारिणमोदनं ये पचन्ति नैषां शिश्नं प्र दहति जातवेदाः।। 2।।

卐6.22.3 नैषां शिश्नं प्र दहति जातवेदास्स्वर्गे लोके बहुस्त्रैणमेषाम्। नैनान् यमः परि मुष्णाति रेतः।। 3।।

卐6.22.4 आस्ते यम उप याति देवान् सं गन्धर्वैर्मदिति सोम्यैः। विष्टारिणमोदनं ये पचन्ति नैनानवर्तिस्स च ते कुतश्चन।। 4।।

卐6.22.5 रथी ह भूत्वा रथयान ईयते पक्षी ह भूत्वापि दिवं समेति। एष यज्ञो विततो वहिष्ठो विष्टारी पक्व दिवमा ससाद।। 5।।

卐6.22.6 चतुरः कुम्भांश्चतुर्धा ददाति क्षीरेण पूर्णानुदकेन दध्ना। एतास्त्वा कुल्या उप यन्तु विश्वतस्स्वर्गे लोके स्वधया मादयन्तीः।। 6।।

卐6.22.7 घृताह्रदा मधुकुलास्सूरोदकाः क्षीरेण पूर्णा उदकेन दध्ना। एतास्त्वा कुल्या उप यन्तु विश्वहा स्वर्गे लोके स्वधयामादयन्तीः।। 7।।

卐6.22.8 पुण्डरीकं कुमुदं सं तनोति विसं शालुकं शफको मुलाली। स्वर्गे लोके स्वधया पिन्वमाना उप मा तिष्ठन्तु पुष्करिणीस्समक्ताः।। 8।।

卐6.22.9 यमोदनं पचामि श्रद्दधानो विष्टारिणं लोकजितं स्वर्गम्। स मे मा क्षेष्ट सदमस्यमानो विश्वरूपा कामदुघा धेनुरस्तु मे।। 9।।

卐6.22.10 वृषभं सन्तं सह सूनृतया स्वर्गे लोके अमृतं दुहानम्। ये मे पुत्राः पितरश्च सन्ति तेत्वा विष्टारिन्नुप सर्वे सदेयुः।। 10।।

卐6.22.11 य इमान् यज्ञानभिविष्टितार यस्येमे लोकास्स्वधया समक्ताः। ये मे पौत्रा उत ये पितामहास्तेभ्यो विष्टारिन्नमृतानि धुक्ष्व।। 11।।

卐6.22.12 यदि पृथिवीं यद्यन्तरिक्षं यदि दिवं देवता वा जगन्थ। ये मे प्रपौत्राः प्रपितामहाश्च ते त्वा विष्टारिन्ननु प्र ज्ञेषुरत्र।। 12।।

卐6.22.13 स्वर्गे लोके अप्सरस एनाञ्जाया भूत्वोप शेरते। विष्टारिणमोदनं ये पचन्त्यस्मिल्लोँके दक्षिणया परिष्कृतम्।। 13।। 6 - 23

卐6.23.1 निर्णुदैनां प्रणुदैनां स्वान्निपदनादधि। विभ्रंशमस्यै कृण्मो वि गृहैर्भ्रंशतामसौ।। 1।।

卐6.23.2 अपाञ्चं पतिमा कुर्वधराचीं स्त्रियं नय। अतीमान्दश पर्वतानतीमा नाव्यादश।। 2।।
卐6.23.3 अधराचीमवाचीमथो कुशलां दिशम्। विभ्रंशमस्यै कृण्मस्ते नैनां प्र दहामसि।। 3।।
卐6.23.4 आज निरज बिलं बिलादरण्यमा कुर्वरण्यादरणं जनम्। मृगाँ अनु प्रपातय वातस्यैनां शिखां कुरु।। 4।।
卐6.23.5 वाताग्रे अस्या हृदयं मनो रेष्मणि दध्मसि। विभ्रंशमस्यै कृण्मो विद्धंशमा सक्तं दमे।। 5।।
卐6.23.6 सर्वमनु परि प्लवतामन्तरा द्यावापृथिवी उभे। यथा नवधृता चराद्धृशतूलमिवोपरि।। 6।।
卐6.23.7 अशमस्यै वातो वात्वशन्तपतु सूर्यः। अथो यदन्नमश्नाति तदस्यै विषवत्तरम्।। 7।।
卐6.23.8 सिंहस्ते अस्तु चक्षुष व्याघ्रः परिष्वञ्जने। अग्निर्वा मस्त्वन्तरा यथा वां न सहासति।। 8।।
卐6.23.9 एष वा मग्निरन्तरा स विष्वञ्चौ व्यस्यतु। यथा वां न सहासत्युत्तरस्मिंश्चनायुषि।। 9।।
卐6.23.10 उत्पातय शिमिदावति प्र पातय शिमिदावति। इमौ व्यस्य दम्पती पक्कं मांसमिवासिना।। 10।।
卐6.23.11 मेयमस्मिन् पतौ रंस्त मोस्मिं शयने स्वे। जहातु वसनं स्व महिर्जीर्णामिव त्वचम्।। 11।।
卐6.23.12 यथा मृताश्च जीवाश्चास्मिंल्लोके व्योकसः। एवेमौ दम्पती स्तामस्मिल्लोके व्योकसौ।। 12।
(इति नवर्चो नाम षष्ठकाण्डे चतुर्थोऽनुवाकः) इत्यथर्ववेदे पैप्पलादसंहितायां नवर्चो नाम षष्ठः काण्डः समाप्तः

## ऽ अथ सप्तमः काण्डः 7 - 1

卐7.1.1 सुपर्णस्त्वान्वविन्दत्सूकरस्त्वाखनन्नसा। दिप्सौषधे त्वं दिप्सन्तं प्रति कृत्याकृतो दह।। 1।।
卐7.1.2 प्रति दह यातुधानान् प्रति कृत्याकृतो दह। अथो यो अस्मान्दिप्सति तमु त्वं जह्योषधे।। 2।।
卐7.1.3 अग्ने पृतनाषाट् पृतनास्सहस्व। प्रति कृत्यां कृत्याकृते प्रति हरणेन हरामसि।। 3।।
卐7.1.4 इष्वा ऋजीयः पततु द्यावापृथिवी तत्सुतात्। तत्तं मृग इव विध्यतु कृत्या कृत्याकृतं कृता।। 4।।
卐7.1.5 अघमस्त्वघकृते शपथाश्शपथीन्ने। प्रत्यक्प्रति प्र हिण्मसि यश्चकार तमृच्छतु।। 5।।
卐7.1.6 यस्त्वाकृत्ये प्रतिघाय विद्वाँ अविदुषो गृहम्। पुनस्त्वा तस्मा आदध्मो यथा कृत्याकृतं हनत्।। 6।।



Sri Ganapati Sacchidananda Avadhoota Datta Peetham • Mysore •

卐7.1.7 पुनः कृत्यां कृत्याकृते हस्तगृह्य परा णय। समक्षमस्मा आ दध्नो यथा कृत्याकृतं हनत्।। 7।।
卐7.1.8 पुत्र इव पितरं गच्छ स्वज इवाभिष्ठितो दश। तन्तुरिवा वव्यन्निहि कृत्ये कृत्याकृतं कृता।।
8।।
卐7.1.9 उदेणीव वारिण्यभिस्कन्दं मृगीव। कृत्या कर्तारमृच्छतु।। 9।।
卐7.1.10 ऋश्यस्येव परिशासं परिमाय परित्वचः। दुर्हार्दे चक्षुषे कृत्यां ग्रीवासु प्रतिमुञ्चन्त।। 10।।
卐7.1.11 या कृत्ये देवकृता या वा मनुष्यजा असि। तां त्वा प्रति प्र हिण्मसि प्रतीचीनेन ब्रह्मणा।।
11।।
卐7.1.12 यदि स्त्री यदि वा पुमान् कृत्यां चकार पाप्मने। तामु तस्मै नयामस्यश्वमिवास्वाभिधान्या।।
12।। 7 - 2
卐7.2.1 ओक्ते मे द्यावापृथिवी ओक्तादेवी सरस्वती। ओक्तौ म इन्द्रश्चाग्निश्च क्रिमिं जम्भयतामिमम्।।
1।।
卐7.2.2 अस्येन्द्र कुमारस्य क्रिमिं धनपते जहि। हता विश्वा अरातयोऽनेन वचसा मम।। 2।।
卐7.2.3 योऽक्षौ परिसर्पति यो नासे परिसर्पति। दतां यो मध्यं गच्छति तं क्रिमिं जम्भयामसि।। 3।।
卐7.2.4 विरुपौ द्वौ स्वरुपौ द्वौ कृष्णौ द्वौ रोहितौ द्वौ। बभ्रुश्च बभ्रुकर्णश्च गृध्रा कोकाश्च ते हताः।। 4।।
卐7.2.5 ये क्रिमयश्शितिकक्षा ये कृष्णाश्शितिबाहवः। ये के च विश्वरूपास्तान् क्रिमीञ्जम्भयामसि।।
5।।
卐7.2.6 यो द्वि शीर्षा चतुरक्षः क्रिमिश्शारङ्गो अर्जुनः। शृणाम्यस्य पृष्टीरपि वृश्चामि यच्छिरः।। 6।।
卐7.2.7 उदसौ सूर्यो अगाद्विश्व दृष्टो अदृष्टहा। दृष्टांश्च घ्नन्नदृष्टांश्च सर्वांश्च प्रमृणन् क्रिमीन्।। 7।।
卐7.2.8 ये वा षासः कष्कषासो ध्रूक्ष्णासश्शिपविल्लवः। दृष्टश्च हन्यतां क्रिमिरदृष्टश्चोत हन्यताम्।।
8।।
卐7.2.9 हतो येवाषो हतश्शिपविर्हतो गङ्गणिवाङ् उत। हता विश्वा अरातय उग्रेण वचसा मम।।
9।।
卐7.2.10 सर्वेषां च क्रिमीणां सर्वासां च क्रिमीणां। भिनद्म्यश्मना शिरो दहाम्यग्निना मुखम्।। 10।।
7 - 3
卐7.3.1 तिग्मेभिरग्ने अर्चिभिश्शुक्रेण देव शोचिषा। आमादो निवहत्वमन्यमासनि कृण्वताम्।। 1।।

Sri Ganapathy Sachchidananda Avadhoota Datta Peetham • Mysore •

卐7.3.2 शोचिषाग्ने अर्चिषा च निर्दहेतो अघायतः। सख्यमावं कृण्महे त्वं चामाद उप शम्भुवन्।।
2।।
卐7.3.3 निरामादो नयामसि निष्क्रव्यादो गृहेभ्यः। सस्यादो नाम ये देव तेऽग्ने मा दभन्त्वाम्।। 3।।
卐7.3.4 आमादश्च क्रव्यादश्च सस्यादश्चोभयान् सह। प्रजां ये चक्रिरे भागं तानितो निर्णयामसि।। 4।।
卐7.3.5 य आमेष्वरमन्त न पक्कमुपदाधृषुः। ते यन्तु सर्वे संभूयान्यत्रेतो ऽघायवः।। 5।।
卐7.3.6 य एनस्वी दुष्कृतकृत् किल्बिषकृत साधी यः। पुनस्तान् यज्ञिया देवा नयन्तु यत आगताः।।
6।।
卐7.3.7 अव रेणुमव रजो नेनिजे हस्त्यं मलम्। धातानो भद्रया नेषत्स नो गोपायतु प्रजाम्।। 7।।
卐7.3.8 कृण्वेऽहं रोदसी वर्म स्याम सवितुस्सवे। माता नो भद्रया भूमिर्द्यौश्चास्मान् पात्वं हसः।। 8।।
卐7.3.9 यदसुराणामहन्न्यस्मान् पापा उपेथन। देवानां पयश्च दैव्यमापश्शुन्धन्तु मामिमाः।। 9।।
卐7.3.10 आ ते पितर्मरुतां सुम्नमेमि मानस्सुर्यस्य सन्दृशो युवथाः। अभि नो वीरोऽर्वतीः क्षमेत प्र जायामहै रुद्र प्रजया।। 10।।
卐7.3.11 योऽवृद्धं हन्ति यो गर्भे अन्तर्यो जातं जनितव्यं च पूरुषम्। तस्मा ऋध्यासं हविषाहमद्य स नः प्रजां जरदष्टिं कृणोतु।। 11।। 7 - 4
卐7.4.1 इन्द्रस्य बाहू स्थविरौ वृषाणौ चित्रा इमा वृषभौ पारयिष्णू। तौ योक्षे प्रथमौ योग आगते याभ्यां जितमसुराणां स्वर्यत्।। 1।।
卐7.4.2 आशुश्शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम्। संक्रन्दनो ऽनिमिषो एकवीरश्शतं सेना जयतु साकमिन्द्रः।। 2।।
卐7.4.3 संक्रन्दनेनानिमिषेण जिष्णुना योध्येन दुश्च्यवनेन धृष्णुना। तदिन्द्रेण जयत तत्सहध्वं युधो नरो इषुहस्तेन वृष्णा।। 3।।
卐7.4.4 स इषु हस्तैस्स निषङ्गिभिर्वशी संस्रष्टा युध इन्द्रो गणेन। संसृष्टजित् सोमपा बाहुशर्ध्यूर्धधन्वा प्रतिहिताभिरस्तात्।। 4।।
卐7.4.5 बलविज्ञायस्स्थविरः प्रवीरस्सहस्वान्वाजी सहमान उग्रः। अभिवीरो अभिषत्वा सहोजिज्जैत्रायेन्द्र रथमा तिष्ठ गोविदम्।। 5।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐7.4.6 इमं वीरमनु हर्षध्वमुग्रमिन्द्रं सत्वानो अनु सं रभध्वम्। ग्राजितं गोजितं वज्रबाहुं जयन्तमज्मः प्रमृणन्तमोजसा।। 6।।

卐7.4.7 अभि गोत्राणि सहसा गाहमानो अदाय उग्रश्शतमन्युरिन्द्रः। दुश्च्यवनः पृतनाषाडयोध्यो अस्माकं सेना अवतु प्र युत्सु।। 7।।

卐7.4.8 बृहस्पते परि दीया रथेन रक्षोहामित्राँ अपबाधमानः। प्रभञ्जञ्छत्रून् प्रमृणन्नमित्रानस्माकमेध्यविता तनूनाम्।। 8

卐7.4.9 इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः। देवसेनानामभि भञ्जतीनां जयन्तीनां मरुतो यन्तु मध्ये।। 9।।

卐7.4.10 इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां शर्ध उग्रम्। महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात्।। 10।।

卐7.4.11 अस्माकमिन्द्रस्समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु। अस्माकं वीरा उत्तरे भवन्त्वस्मान्देवासोऽवता हवेषु।। 11।। 7 - 5

卐7.5.1 वैश्वानरादरोचत जातो हिरण्ययोमणिः। तमाभरद्बृहस्पतिः कश्यपो वीर्याय कम्।। 1।।

卐7.5.2 बृहस्पतिस्तमकृणोन्मणिं वैश्वानरं सहः। सप्तर्षयो बलाय कं सं दधुष्ट्वा वयोधसः।। 2।।

卐7.5.3 विश्वे देवास्त इन्द्रियं सप्तर्षयश्च सं दधुः। जातो हिरण्ययो मणिरग्नेर्वैश्वानरादधि।। 3।।

卐7.5.4 अश्वत्थो जातः प्रथमोऽग्नेः प्रयतमा तनूः। वैश्वानरस्य सृष्ट्या कृत्यादूषिः कृतो मणिः।। 4।।

卐7.5.5 कृत्यादूषिं त्वाविदं कृत्यादूषिं भरामि त्वा। कृत्यादूषिं कृणोमि त्वा कृत्यादूषिं वयोधसम्।। 5।।

卐7.5.6 पतत्री पक्षी बलवान् कृत्यादूषिस्सपत्नहा। नितत्निर्विश्वभेषज उग्र आपतिको मणिः।। 6।।

卐7.5.7 पतत्री ते बलाय कं नितत्निर्भेषजाय ते। जतो हिरण्ययो मणिरप रक्षांसि सेधतु।। 7।।

卐7.5.8 देवो मणिस्सपत्नहा रक्षोहामीव चातनः। हिरण्ययो निरंशुमान् कश्यपेनाभृतं सहः।। 8।।

卐7.5.9 वैश्वानरं ते जनमेकमाहुरग्नेर्योने स्सह चन्द्रेण जातम्। गयस्फानः प्रतरणो वयोधाः कृत्यादूषिर्बलगहास्युग्रः।। 9।।

卐7.5.10 यस्येदं भूम्यामधि निक्रान्तं पांसुरे पदम्। मृजानस्तन्वो यद्रपस्तस्यस्नाहि तनू अधि।। 10।।

卐7.5.11 दूष्यास्त्वा बधं वयं देवस्य सवितुस्सवे। जीवातवे भरामसि मह्या अरिष्टतातये।। 11।।

卐7.5.12 आच्छेदनः प्रच्छेदनो द्विषतस्तपनो मणिः। शत्रूञ्जयस्सपत्नहा द्विषन्तमप बाधताम्।। 12।

(इति दशर्चो नाम सप्तमकाण्डे प्रथमोऽनुवाकः) 7 - 6

卐7.6.1 सत्यस्य स्थूणा पृथिवीं दाधारर्तेन देवा अमृतमन्वविन्दन्। ध्रुवेण त्वा हविषा धारयाम्यभि तद्यावापृथिवी गृणीताम्।। 1।।

卐7.6.2 येभिर्होमैर्विश्वकर्मा दाधारे मां पृथिवीं मातरं नः। तेभिष्ट्वा होमैरिह धारयम्यृतं सत्यमनु चरन्तु होमाः।। 2।।

卐7.6.3 इह ध्रियध्वं धरुणे पृथिव्या उशत्या मातुस्सुभगाया उपस्थे। अपराणुत्ता महसा मोदमाना अस्मिन्वास्तौ सुप्रजसो भवाथ।। 3।।

卐7.6.4 सुप्रजसो महसा मोदमाना वर्ष्मन् पृथिव्या उपरि श्रयध्वम्। अस्यै शालायै शर्म यच्छन्तु देवा धाराभिरेनां पृथिवी पिपर्तु।। 4।।

卐7.6.5 इमां शालां श्रेष्ठतमां वसूनामरिष्टवीरा अभिसञ्चरेम। दृढा अस्या उपमितो भवन्तु स्थिरा वीरा उपसदो भवन्तु।। 5।।

卐7.6.6 इमां शालां सविता वायुरिन्द्रोर्बृहस्पतिर्नि मिनोतु प्रजानन्। उक्षन्तूद्गा मरुतो घृतेन भगो न राजा नि कृषिं दधातु।। 6।।

卐7.6.7 मानस्य पत्नी हविषो जुषस्व तीव्रान्तस्य बहुलमध्यमस्य। आ त्वा शिशुर्वाश्यतामा कुमार आ वाश्यन्तां धेनवो नित्यवत्साः।। 7।।

卐7.6.8 दृढास्ते स्थूणा भवन्तु भूम्यामधि दृढाः पक्षासस्तव देवि शाले। स्थिरवीरानमित्रा न एधि शर्म नो यच्छ द्विपदे चतुष्पदे।। 8।।

卐7.6.9 शाला देवी गार्हपत्याय चाक्लृपे तृणं वसाना जगते सुशेवा। स्थिराङ्गां त्वा स्थिरपूरुषां मानस्य पत्नी स्थिरां त्वा वीरा अभि सञ्चरेम।। 9।।

卐7.6.10 वास्तोष्पते प्रति जानिह्यस्मान् स्वावेशो अनमीवो न एधि। यत्त्वेमहे प्रति नस्तज्जुषस्व चतुष्पदो द्विपदो आ वेशयेह।। 10।। 7 - 7

卐7.7.1 दर्भो अग्र ओषधीनां शतकाण्डो अजायत। स सहस्रवीर्यः परि णः पातु विश्वतः।। 1।।

卐7.7.2 यथा दर्भो जायमानस्त्वचं भिनत्ति भूम्याः। एवा स भिद्यतां जनो यो नः पापं चिकित्सति।। 2।।

卐7.7.3 अप नडमप कृत्यामप रक्षस्सदान्वाः। अमीवाश्चातयामसि सर्वाश्च यातुधान्यः।। 3।।

卐7.7.4 अस्ति वै निवत उद्वनं न वै सर्वमनुप्लवम्। असि त्वं तस्य दूषणो यो नः पापं चिकित्सति।। 4।।

卐7.7.5 परि सायं परि प्रातः परि मध्यन्दिनं परि। दर्भो हिरण्य हस्तघ्नः परि णः पातु विश्वतः।। 5।।

卐7.7.6 गिरौ जातस्स्वरहासि साकं सोमेन बभ्रुणा। मा पापकृत्वनश्शिषो मा पाकः पुरुषो रिषत्।। 6।।

卐7.7.7 दिवो मूलमवततं पृथिव्यामोत आहितः। दर्भस्सहस्त्रवीर्यः परि णः पातु विश्वतः।। 7।।

卐7.7.8 सहस्त्र काण्डस्तविषस्तीक्ष्णवल्शो विषासहिः। दर्भेण सर्वा रक्षांस्यमीवाश्चाप दहामसि।। 8।।

卐7.7.9 अपदग्धं दुःष्वप्न्यमपदग्धा अरातयः। सर्वाश्च यातुधान्यः।। 9।।

卐7.7.10 मा त्वा दभन्यातुधाना मा ब्रघ्नश्शकुनिः पतन्। दर्भो राजा समुद्रियः परि णः पातु विश्वतः।। 10।। 7 - 8

卐7.8.1 यो नः पापेन वचसा घोषतो दुरुद्भवत्। आराच्छत्म प्राप्यास्मानप तद्यातु सर्वतः।। 1।।

卐7.8.2 यन्नश्शपादरणो यत्सपत्नः श्वश्रुर्वा यच्छ्वशुरो वा शपाति। ज्यायसश्शपथान्वयं यवेन यावयामसि।। 2।।

卐7.8.3 यान् समस्यन्ते शपथान् वाक्षम्यानृत्वियामधि। यवं त्वं बिभ्रद्बाह्वोः पूर्वः प्रति श्रृणीहि तान्।। 3।।

卐7.8.4 ऋजुकेशो यवो बभ्रुर्मघवा नोऽनुमाद्यः। हिरण्यधन्वा शपथानुपेजतु।। 4।।

卐7.8.5 त्वां पीत्वेन्द्रो वृत्रं शक्रो जघान वासवः। सविषाही यथर्षभस्सहस्व शपथान्यव।। 5।।

卐7.8.6 आराच्चरन्तु शपथा युता इतो जिह्वा उ दिता अरसास्सन्तु सर्वे। नामग्राहाद् वाचो हेडादीक्षिताद्घोरचक्षसश्शर्म ते वर्म कृण्मसि।। 6।।

卐7.8.7 अपाञ्चो यन्तु शपथा जनेनास्ता अघायुना। यो नो दुरस्याज्जीवते स्वेनानागसे स ते।। 7।।

卐7.8.8 परि मा पातु शपथादनृताद्दुरितादुत। परि मा ज्यायसश्शंसाद्यवो रक्षतु मा रिषम्।। 8।।

卐7.8.9 अनास्तिघ्यं शपथैरनति व्याध्यं कृतम्। बृहद्वर्म प्रति मुञ्चामि ते यवम्।। 9।।

卐7.8.10 तं वयांसीव पक्षिण आ विशन्तु पतत्रिणः। शप्तारं शपथाः पुनः।। 10।। 7 - 9

卐7.9.1 आ नो दिश मा परि ष्ठा अराते मा नो रक्षीर्दक्षिणां याचमानाम्। प्र णः प्रदाता सविता च यच्छतां नमो वित्सींया असमृद्ध्यै च कृण्मः।। 1।।

卐7.9.2 यमराते पुरोधत्से पुरुषं परिरापिणम्। नमस्ते तस्मै कृण्मो मा वनिं मम विव्यथः।। 2।।

卐7.9.3 यमद्याभि प्रयुञ्ज्महे मनसा हृदयेन च। अराते तं नो मा वीत्सीर्दिप्सन्तं परिरापिणि।। 3।।

卐7.9.4 प्र णो वनिर्देवकृता दिवा नक्तं च सिध्यतु। अरातिमनु प्रेमो वयं नमोऽस्त्वरातये।। 4।।

卐7.9.5 उत नग्ना बोभूवती स्वप्नया सचसे जनम्। अराते चित्तं वीर्त्सन्त्याकूतिं पुरुषस्य च।। 5।।

卐7.9.6 परोऽपेह्यसमृद्धे वि ते हेतिं नयामसि। यं द्विष्मस्तं सचस्व कन्या भूत्वा स्रग्विणी रुक्मणी दृशे।। 6।।

卐7.9.7 नमस्तेऽस्त्वसमृद्धे मा मां पुरोधिं कृणुथाः। वेद त्वाहं निमीवन्तीं नितुदन्तीमराते मर्त्यान्मर्त्येभ्यो अधि निर्वदन्तीम्।। 7।।

卐7.9.8 मा नो वनिं मा वाचं मा वीर्त्सीरुग्राविं ऐन्द्राग्नी न आ भजतां वसूनि। सर्वे नोऽद्य दित्सन्तो ऽरातिं प्रति हर्यत।। 8।।

卐7.9.9 सवितारमनुमतिं भगं यन्तो हवामहे। वाचं जुष्टां मधुमतीं वदानि देवानां देवहूतिषु।। 9।।

卐7.9.10 यं याचामि नकुल्या जिह्वयोष्ठापिधानया। श्रद्धा तमद्य विन्दतु दत्ता सोमेन बभ्रुणा।। 10।। 7 - 10

卐7.10.1 ऐतु देवस्त्रायमाणः कुष्ठो हिमवतस्परि। तक्मानं सर्वं नाशयन् सर्वाश्च यातुधान्चः।। 1।।

卐7.10.2 त्रिणी ते कुष्ठ नामानि नघमारो नघारिषो नघायुषो नघायं पुरुषो रिषत्। यसमै परि ब्रवीमि त्वा सायं प्रातरथोदिवा।। 2।।

卐7.10.3 जीवला नाम ते मात जीवन्तो नाम ते पिता। मारिषा नाम ते स्वसा नघायं पुरुषो रिषत्। यस्मै परि ब्रवीमि त्वा सायं प्रातरथो दिवा।। 3।।

卐7.10.4 उत्तमोऽस्योषधीनामनड्वाञ्जगतामिव। व्याघ्रः श्वपदामिव न घायं पुरुषो रिषत्। यस्मै परि ब्रवीमि त्वा सायं प्रातरथो दिवा।। 4।।

卐7.10.5 त्रिश्शाम्बुभ्यो गिरयेभ्यस्त्रिरादित्येभ्यस्परि। त्रिर्जातो विश्वदेवेभ्यस्स कुष्ठो विश्वभेषजः साकं सोमेन तिष्ठति। तक्मानं सर्वं नाशयन् सर्वाश्च यातुधान्यः।। 5।।

卐7.10.6 अश्वत्थो देवसदनस्तृतीयस्यामितो दिवि। तत्रामृतस्य चक्षणं ततः कुष्ठोऽजाययतः। स कुष्ठो विश्वभेषजस्साकं सोमेन तिष्ठति। तक्मानं सर्वं नाशयन् सर्वाश्च यातुधान्यः।। 6।।

卐7.10.7 हिरण्ययी नौरचरद्धिरण्य बन्धनादिवि। तत्रामृतस्य चक्षणं ततः कुष्ठोऽजायतः। स कुष्ठो विश्वभेषजस्साकं सोमेन तिष्ठति। तक्मानं सर्वन्नाशयन् सर्वाश्च यातुधान्यः।। 7।।

卐7.10.8 यत्र नावः प्रभ्रंशनं यत्र हिमवतः शिरः। तत्रामृतस्य चक्षणं ततः कुष्ठोऽजायतः। स कुष्ठो विश्वभेषजस्साकं सोमेन तिष्ठति। तक्मानं सर्वन्नाशयन् सर्वाश्च यातुधान्यः।। 8।।

卐7.10.9 यं त्वा वेद पूर्व ऐक्ष्वाक यं वा त्वा कुष्ठ काश्यः। यं शावसो यं मात्स्यस्तेनासि विश्वभेषजः।। 9।।

卐7.10.10 शीर्षालाकं तृतीयकं सदन्दिर्यश्च हायनः। तक्मानं विश्वधावीर्याधराञ्चं परा सुव।। 10।

(इति दशर्चो नाम सप्तमकाण्डे द्वितीयोऽनुवाकः) 7 - 11

卐7.11.1 ये पर्वतास्सोमपृष्ठा आप उत्तानशीवरीः। वातः पर्जन्य आदग्निस्ते क्रव्यादमशीशमन्।। 1।।

卐7.11.2 यस्ते हन्ति चराचरमुत्थास्यन्तं सरीसृपम्। गर्भं यो दशमास्यं तमितो नाशयामसि।। 2।।

卐7.11.3 यदि घ्नन्त्यप्सरसो गन्धर्वा गेह्या उत। क्रव्यादो मूरदेविनस्तानितो नाशयामसि।। 3।।

卐7.11.4 यस्त ऊरू आरोहत्यसृक् ते रेहणाय कम्। आमादः क्रव्यादो रिपूंस्तानितो नाशयामसि।। 4।।

卐7.11.5 यस्ते श्रोणी च्यावयत्यन्तरा दम्पती शये। योनिं यो अन्तरारेढि तमितो नाशयामसि।। 5।।

卐7.11.6 यस्त्वा स्वप्नेन तमसा मोहयित्वा निपद्यते। प्रजां यस्ते जिघत्सति तमितो नाशयामसि।। 6।।

卐7.11.7 यस्त्वा पत्युः प्रतिरूपो जारो भूत्वा निपद्यते। अरायं कण्वं पाप्मानं तमितो नाशयासि।। 7।।

卐7.11.8 हा हे खर्व खलते नैगूर कर्ण तूण्डिल। इन्द्रस्य तिग्ममायुधं तेन त्वा नाशयामसि।। 8।।

卐7.11.9 नमस्तण्डाय नमः कुसुमाय नमः प्रतिपान्ने नमः कस्स्वधेये। नमस्तुभ्यं निर्ऋते विश्ववारे जरेमं धापयतां विश्वरूपा।। 9।।

卐7.11.10 यावद्यौर्यावत् पृथिवी यावत् पर्यैति सूर्यः। तावत्त्वमुग्र गुल्गुलो परीमां पाहि विश्वतः।। 10।। 7 - 12

卐7.12.1 एकराज्ञीमेकव्रतामेकस्थामेकलामिकाम्। पाटां सपत्नचातनीं जैत्रायाच्छा वदामसि।। 1।।

卐7.12.2 एकराज्ञ्येक व्रत एकस्थ एकलामिके। न त्वा सपत्नी सासाह गैरेयी च न वाह्या।। 2।।

卐7.12.3 उत्तराहमुत्तराभ्य उत्तरे दधराभ्यः। अधस्सपत्नी मामक्यधरे दधराभ्यः।। 3।।

卐7.12.4 न सैन्धवस्य पुष्पस्य सूर्यो म्लापयति त्वचम्। पाटेऽम्लातया त्वया सपत्न्या वर्च आददे ।। 4।।

卐7.12.5 न वै पाटे पाटेवासि सुभागं करणीदसि। पाटे भगस्य नो धेह्यथो मा महिषीं कृणु।। 5।।

卐7.12.6 यत्पाटे अधि वृक्षे वातप्लवा महीयसे। जयन्ती प्रत्यातिष्ठन्ति संजया नाम वा असि।। 6।।

卐7.12.7 उत्तान पर्णां सुभगां सहमानां सहस्वतीम्। अच्छा बृहद्वदां वद पाटां सपत्न चातनीम्।। 7।।

卐7.12.8 पाटामिन्द्रो व्याश्नाद्धन्तवा असुरेभ्यः। तयाहं सपत्नीं साक्षीय महेन्द्रो दानवानिव।। 8।।

卐7.12.9 पाटा बिभर्त्यङ्कुशं हिरण्यवन्तमङ्किनम्। तेन सपत्न्या वर्च आलुम्पामि ममेदसत्। । 9।।

卐7.12.10 इमां खनाम्योषधीं वीरुधां बलवत्तमाम्। यया सपत्नीं बाधते कृणु ते केवलं पतिम्।। 10।। 7 - 13

卐7.13.1 यासामारादाघोषामो वातस्येव पृथग्यतः। तासां श्वन्वतीनामिन्द्रोऽपि कृतच्छिरः।। 1।।

卐7.13.2 याः पुरस्तादाचरन्ति साकं सूर्यस्य रश्मिभिः। तासां श्वन्वतीनामिन्द्रोऽपि कृतच्छिरः।। 2।।

卐7.13.3 या वातमनु संयन्त्यन्तरिक्षे अधो दिवः। तासां श्वन्वतीनामिन्द्रोऽपि कृतच्छिरः।। 3।।

卐7.13.4 यासां प्रेङ्खो दिवि बद्धो अन्तरिक्षे हिरण्ययः। तासां श्वन्वतीनामिन्द्रोऽपि कृतच्छिरः।। 4।।

卐7.13.5 यास्तल्पा ननु नृत्यन्तरिक्षे हिरण्ययान्। तासां श्वन्वतीनामिन्द्रोऽपि कृतच्छिरः।। 5।।

卐7.13.6 याः पतन्ति वातरथा उत्तानाः पादघातिनीः। तासां श्वन्वतीनामिन्द्रोऽपि कृतच्छिरः।। 6।।

卐7.13.7 या वृक्षं परिसर्पन्ति साच्यक्षि करिक्रतीः। तासां श्वन्वतीनामिन्द्रोऽपि कृतच्छिरः।। 7।।

卐7.13.8 याश्चत्वरे संगच्छन्ते विकुम्भाश्चेलवासिनीः। तासां श्वन्वतीनामिन्द्रोऽपि कृतच्छिरः।। 8।।

卐7.13.9 यासां सिकतवापिषु गृहोऽमितो हिरण्ययः। तासां श्वन्वतीनामिन्द्रोऽपि कृतच्छिरः।। 9।।

Sri Ganapati Sachchidananda Avadhoota Dattapeetham

卐7.13.10 या आरोकैः प्रपद्यन्ते पुष्करैरिव जामयः। तासां श्वन्वतीनामिन्द्रोऽपि कृतच्छिरः।। 10।।
卐7.13.11 या नदीः प्रतिगाहन्ते संरभ्य कन्या इव। तासां श्वन्वतीनामिन्द्रोऽपि कृतच्छिरः।। 11।।
卐7.13.12 यास्तीर्थानि विगाहन्तेऽघ्नयाश्श्वसतीरिव। तासां श्वन्वतीनामिन्द्रोऽपि कृतच्छिरः।। 12।।
卐7.13.13 यास्समुद्रादुच्चरन्त्युच्चैर्घोषान् करिक्रतीः। तासां श्वन्वतीनामिन्द्रोऽपि कृतच्छिरः।। 13।।
卐7.13.14 या गच्छन्ति जनञ्जनमिच्छन्तीः प्रयुतं बहु। तासां श्वन्वतीनामिन्द्रोऽपि कृतच्छिरः।। 14।। 7 - 14
卐7.14.1 अग्निरायुष्मान् स वनस्पतिभिरायुष्मान्। स मायुष्मानायुष्मन्तं कृणोतु।। 1।।
卐7.14.2 वायुरायुष्मान् सोऽन्तरिक्षेणायुष्मान्। स मायुष्मानायुष्मन्तं कृणोतु।। 2।।
卐7.14.3 सूर्य आयुष्मान् स दिवायुष्मान्। स मायुष्मानायुष्मन्तं कृणोतु।। 3।।
卐7.14.4 चन्द्र आयुष्मान् स नक्षत्रैरायुष्मान्। स मायुष्मानायुष्मन्तं कृणोतु।। 4।।
卐7.14.5 सोम आयुष्मान् स ओषधीभिरायुष्मान्। स मायुष्मानायुष्मन्तं कृणोतु।। 5।।
卐7.14.6 यज्ञ आयुष्मान् स दक्षिणाभिरायुष्मान्। स मायुष्मानायुष्मन्तं कृणोतु।। 6।।
卐7.14.7 समुद्र आयुष्मान् स नदीभिरायुष्मान्। स मायुष्मानायुष्मन्तं कृणोतु।। 7।।
卐7.14.8 ब्रह्मायुष्मत् तद्ब्रह्मचारिभिरायुष्मत्। तन्मायुष्मदायुष्मन्तं कृणोतु।। 8।।
卐7.14.9 इन्द्र आयुष्मान् स वीर्येणायुष्मान्। स मायुष्मानायुष्मन्तं कृणोतु।। 9।।
卐7.14.10 देवा आयुष्मन्तस्तेऽमृतेनायुष्मन्तः। ते मायुष्मन्त आयुष्मन्तं कृण्वन्तु ।। 10।।
卐7.14.11 प्रजापतिरायुष्मान् स प्रजाभिरायुष्मान्। स मायुष्मानायुष्मन्तं कृणोतु।। 11।। 7 - 15
卐7.15.1 दक्षिणा मा दक्षिणतो दक्षिणा पातु सव्यतः। पश्चादनुव्याधात्पातु सर्वस्या भवहेत्याः।। 1।।
卐7.15.2 पशुना त्वं पशुपते द्विपाद्त्वा चतुष्पदा। आत्मन्वतीं दक्षिणां प्राणं दत्वा प्राणिहि।। 2।।
卐7.15.3 यां ददासि श्रद्दधानो दक्षिणां ब्राह्मणकृते। सा त्वा यक्ष्मात्पारयत्वग्नेः सन्तापाद्दिव्यस्य शोकात्।। 3।।
卐7.15.4 ददासीमां दक्षिणां मात आममच्छल्यान् यक्ष्मान् विवृहामो वयं ते। कर्णशूलमुपहत्यारातिः सर्वे यक्ष्मा अप तिष्ठन्तु साकम्।। 4।।

卐7.15.5 अन्नेन प्राणं वनुते तिरोधत्ते परिधानेन यक्ष्मम्। हिरण्यमश्वं गां ददत् कृणु ते वर्म दक्षिणाम्।। 5।।

卐7.15.6 उष्णीषं त्वा शीर्षक्त्या वासस्त्वा तन्वामयात्। चन्द्रं हिरण्यमन्ध्यात् कर्णाद्दत्तं शुक्रं भ्राजद्बाधिर्यात् पातु दक्षिणा।। 6।।

卐7.15.7 उपबर्हणं त्वा ग्रीवामयान् मणयो यक्ष्माद्यक्रव्यात्। अङ्गरोगादभ्यञ्जनमन्नं त्वा तष्ट्यामयात्।। 7।।

卐7.15.8 अधस्पदा दामयतः पदो रोगादुपानहौ। दण्डस्त्वादत्तः परि पातु सर्पाद्दक्षिणतः प्रयतो दक्षिणेन।। 8।।

卐7.15.9 सौमनसं दक्षिणां दक्षमाणा इषमूर्जं दक्षिणां संवसानाः। भगस्य धारामवसे प्रतीमः।। 9।।

卐7.15.10 सहस्राङ्गा शतं ज्योतींष्यस्या यज्ञस्य पप्रिरमृता स्वर्गा। आ न एतु दक्षिणा विश्वरूपा हिंसन्तीं प्रति गृह्णीम एनाम्।। 10। (इति दशर्चो नाम सप्तमकाण्डे तृतीयोऽनुवाकः) 7 - 16

卐7.16.1 अग्निर्मा पातु वसुभिः पुरस्तात्तस्मिन् क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि। स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परिददे स्वाहा।। 1।।

卐7.16.2 वायुर्मान्तरिक्षेणैतस्या दिशः पातु तस्मिन् क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि। स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परिददे स्वाहा।। 2।।

卐7.16.3 सोमो मा रुद्रैर्दक्षिणाया दिशः पातु तस्मिन् क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि। स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परिददे स्वाहा।। 3।।

卐7.16.4 वरुणो मादित्यैरेतस्या दिशः पातु तस्मिन् क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि। स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परिददे स्वाहा।। 4।।

卐7.16.5 सूर्यो मा द्यावापृथिवीभ्यां प्रतीच्या दिशः पातु तस्मिन् क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि। स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परिददे स्वाहा।। 5।।

卐7.16.6 अपो मौषधीमतीरेतस्या दिशः पान्तु तासु क्रमे तासु श्रये तां पुरं प्रैमि। तामा रक्षन्तु ता मा गोपायन्तु ताभ्य आत्मानं परिददे स्वाहा।। 6।।

卐7.16.7 विश्वकर्मा मा सप्तर्षिभिरुदिच्या दिशः पातु तस्मिन् क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि। स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परिददे स्वाहा।। 7।।

卐7.16.8 इन्द्रो मा मरुत्वानेतस्या दिशः पातु तस्मिन् क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि। स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परिददे स्वाहा।। 9।।

卐7.16.9 प्रजापतिर्मा प्रजनन्वान् सह प्रतिष्ठया ध्रुवाया दिशः पातु तस्मिन् क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि। स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परिददे स्वाहा।। 9।।

卐7.16.10 बृहस्पतिर्मा विश्वैर्देवैरुर्ध्वाया दिशः पातु तस्मिन् क्रमे तस्मिञ्छ्रये तां पुरं प्रैमि। स मा रक्षतु स मा गोपायतु तस्मा आत्मानं परिददे स्वाहा।। 10।। 7 - 17

卐7.17.1 अग्निन्ते वसुमन्तमृच्छन्तु ये माघायवः प्राच्या दिशोऽभिदासान्।। 1।।

卐7.17.2 वायुं तेऽन्तरिक्षवन्तमृच्छन्तु ये माघायव एतस्या दिशोऽभिदासान्।। 2।।

卐7.17.3 सोमं ते रुद्रवन्तमृच्छन्तु ये माघायवो दक्षिणाया दिशोऽभिदासान्।। 3।।

卐7.17.4 वरुणं त आदित्यवन्तमृच्छन्तु ये माघायव एतस्या दिशोऽभिदासान्।। 4।।

卐7.17.5 सूर्यं ते द्यावापृथिवीवन्तमृच्छन्तु ये माघायवो प्रतीच्या दिशोऽभिदासान्।। 5।।

卐7.17.6 अपस्त ओषधीमतीर्ऋच्छन्तु ये माघायव एतस्या दिशोऽभिदासान्।। 6।।

卐7.17.7 विश्वकर्माणं ते सप्तर्षिवन्तमृच्छन्तु ये माघायव उदीच्या दिशोऽभिदासान्।। 7।।

卐7.17.8 इन्द्रन्ते मरित्वन्तमृच्छन्तु ये माघायव एतस्या दिशोऽभिदासान्।। 8।।

卐7.17.9 प्रजापतिन्ते प्रजननवन्तमृच्छन्तु ये माघायवो ध्रुवाया दिशोऽभिदासान्।। 9।।

卐7.17.10 बृहस्पतिन्ते विश्वेदेववन्तमृच्छन्तु ये माघायव ऊर्ध्वाया दिशोऽभिदासान्।। 10।। 7 - 18

卐7.18.1 वैकङ्कतेनेध्मेन देवेभ्य आज्यं वह। अग्ने तानिह मादय सर्व आ यन्तु मे हवम्।। 1।।

卐7.18.2 इन्द्र आ याहि मे हवमिदं करिष्यामि तच्छृणु। इम ऐन्द्रा अतिसरा आकूतिस्सं नमन्तु मे। तेभिश्शकेम वीर्यं जातवेदस्तनूवशिन्।। 2।।

卐7.18.3 यदसावमुतो देवा अदेवस्संश्चिकीर्षति। मा तस्याग्निर्हव्यं वाक्षीद्धवं देवाश्च मोप गुर्ममैव हवमेतन।। 3।।

卐7.18.4 अति धावतातिसरा विश्वस्येशाना ओजसः। वृश्चतामुष्य जीवितमिन्द्रेण सह मेदिना।। 4।।

卐7.18.5 अतिसृत्यातिसरा इन्द्रस्यौजसा हत। अविं वृक इव मथ्नीत ततो वो जीवन् मा मोचि प्राणमस्यापि नह्यत।। 5।।

卐7.18.6 यानसौ प्रतिसरानकश्चकार कृणवच्चयान्। त्वं तानिन्द्र वृत्रहन् प्रतीचः पुनराकृधि यथामुं तृणहञ्जनम्।। 6।।
卐7.18.7 यममी पुरो दधिरे ब्रह्माणमुपभूतये। इन्द्रस्य ते अधस्पदं तं प्रयच्छामि मृत्यवे क्रव्यादेनं शमयतु।। 7।।
卐7.18.8 यदि प्रेयुर्देवपुरा ब्रह्म वर्माणि चक्रिरे। तनूपानं परिपाणानि चक्रिरे सर्वं तदरसं कृधि।। 8।।
卐7.18.9 अत्रैनमिन्द्र वृत्रहन्नुग्रो मर्मणि विध्य। अत्रैवैनमभि तिष्ठ शक्र मेद्यहं तव। अनु त्वेन्द्रा रभामहे स्याम सुमतौ तव।। 9।।
卐7.18.10 यथेन्द्र उद्वाचनं लब्ध्वा चक्रे अधस्पदम्। कृण्वेऽमुमधरं तथा शश्वतीभ्यस्समाभ्यः।। 10।। 7 - 19
卐7.19.1 आङ्गिरसो जन्मनासि तमु त्वाहुर्वनस्पते। स पीलो रक्षो बाधस्व साकमिन्द्रेण मेदिना।। 1।।
卐7.19.2 अप रक्षांसि बाधस्व बाधस्व परिरापिणः। पिशाचान् पीलो क्रव्यादो बाधस्व मूरदेविनः।। 2।।
卐7.19.3 ययाहुस्तृष्टं कटुकमपगूढं फले कुलम्। तस्यै हिरण्यकेश्यै नमः कृण्मो अरातये।। 3।।
卐7.19.4 या महती महोन्माना सर्वा आशा व्यानशे। तस्यै हिरण्यकेश्यै नमः कृण्मो अरातये।। 4।।
卐7.19.5 यस्ते योनिं प्रति रेढ्याण्डादो गर्भं दूषणः। अरायं पुत्रं प्रापी यस्तं पीलुस्सहतामितः।। 5।।
卐7.19.6 यदा पीलवाङ्गिरस पक्वोऽतिष्ठो वनस्पते। अथाहुरिन्द्रं जज्ञानं शक्रं वर्जह्ये प्रति।। 6।।
卐7.19.7 यथा सेदिम बाधथाः पच्यमानो वनस्पते। एवा पीलो रक्षो बाधस्व साकमिन्द्रेण मेदिना।। 7।।
卐7.19.8 यत् पिशाचैः पुरुषस्य जग्धं भवत्यात्मनः। आ पीलो प्यायते पुनस्तव चाश्नाति पिप्पलम्।। 8।।
卐7.19.9 पीलुं त्वाहुः पीवं त्वाहुरथो त्वाहुर्वनस्पतिम्। सर्वा ते भद्रा नामानि तेभिर्न पाह्यं हसः।। 9।।
卐7.19.10 रक्षोहणं वृत्रहणं पीलुं पिशाचजम्भनम्। जज्ञानमग्रे वृक्षाणां तं ते बध्नाम्यायुषे।। 10।। 7 - 20
卐7.20.1 सगराय शत्रुहणे स्वाहा।। 1।।

卐7.20.2 शर्णीलाय शत्रुहणे स्वाहा।। 2।।

卐7.20.3 समुद्राय शत्रुहणे स्वाहा।। 3।।

卐7.20.4 सन्धसाय शत्रुहणे स्वाहा।। 4।।

卐7.20.5 इषिराय शत्रुहणे स्वाहा।। 5।।

卐7.20.6 वायवे शत्रुहणे स्वाहा।। 6।।

卐7.20.7 वाताय शत्रुहणे स्वाहा।। 7।।

卐7.20.8 मातरिश्वने शत्रुहणे स्वाहा।। 8।।

卐7.20.9 पवमानाय शत्रुहणे स्वाहा।। 9। (इति दशर्चो नाम सप्तमकाण्डे चतुर्थोऽनुवाकः) इत्यथर्ववेदे पैप्पलादसंहितायां दशर्चो नाम सप्तमः काण्डः समाप्तः

## ॐ अथ अष्टमः काण्डः 8 - 1

卐8.1.1 कथा दिवे असुराय ब्रवाम कथा पित्र्ये हरये त्वेषनृम्णः। पृश्निं वरुण दक्षिणान्ददावान् पुनर्मघत्वं मनसा चिकीत्सीः।। 1।।

卐8.1.2 न कामेन पुनर्मघो भवामि संपृच्य कं पृश्निमेतामुपाजे। केनमत् त्वमथर्वन् काव्येन केन जातेनासि जातवेदाः।। 2।।

卐8.1.3 सत्यमहं गभीरः काव्येन सत्यं जातेनास्मि जातवेदाः। न मे दासो नार्यो महित्वं व्रतं मीमाय यदहं धरिष्ये।। 3।।

卐8.1.4 न त्वदन्यः कवितरो न वेधा न धीरतरो वरुणो स्वधावः। त्वमङ्ग विश्वा जनिमानि वेत्थ स चिन्नु त्वज्जनो मायी विभाय।। 4।।

卐8.1.5 त्वं ह्यङ्ग वरुण स्वधावो विश्वानि वेत्थ जनिमा शर्धनीते। किमेना रजसः परोऽस्ति किमवरेणावरममुर।। 5।।

卐8.1.6 एकमेना रजसः परोऽस्ति पर एकेन दुर्दाशं चिदन्यत्। तत्ते विद्वान् वरुण प्र ब्रवीम्यधो वचसः पणयो भवन्तु नीचैर्दासा उप सर्पन्तु रिप्राः।। 6।।

卐8.1.7 त्वं ह्यङ्ग वरुण प्र ब्रवीषि पुनर्मघेष्ववद्यानि भूरि। मो षु पण्यभ्येतावता भूर्मा त्वा वोचन्नराधसं जनासः।। 7।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐8.1.8 मा मा वोचन्नराधसं जनासः पुनस्ते पृश्निं जरितर्ददामि। स्तोत्रं मे विश्वमा याहि जनेष्वन्तर्देवेषु मानुषेषु विप्र।। 8।।

卐8.1.9 आ ते स्तोत्राणि वर्धनानि यामि देहि तन्मह्यं यददत्तमस्ति। युज्यो नस्सप्तपदस्सखासि समा नौ बन्धुर्वरुणस्समा जा।। 9।।

卐8.1.10 वेद वै तद्यन्नौ समा जा ददामि तुभ्यं यददत्तमस्ति। देवो देवाय गृणते वयोधा विप्रो विप्राय स्तुवते सुमेधाः।। 10।।

卐8.1.11 अजीजनो हि वरुण स्वधावन्नथर्वाणं पितरं विश्वदेवम्। तस्मा उर्वायुः कृणुहि प्रशस्तं सखा नोऽसि परमश्च बन्धुः।। 11।। 8 - 2

卐8.2.1 वृषा मे रवो नभसा न तन्यतुरुग्रेण तं वचसा वाध इदु ते। अहं तमस्य ग्रभिरग्रभं रसं ज्योतिषेव तमस उदेति सूर्यः।। 1।।

卐8.2.2 यत्तेऽपोदकं विषं तत्त आत्ताभिरग्रभम्। गृह्णामि मध्यमुत्तममुतावमं भियसा नेशदादु ते।। 2।।

卐8.2.3 बलेन ते बलं हन्मि तन्वा हन्मि ते तनुम्। विषेण हन्मि ते विषमहे मुरिष्टा मा जीवीत् प्रत्यगभ्येतु त्वा विषम्।। 3।।

卐8.2.4 असितस्य तैमातस्य बभ्रोरपोदकस्य च। सात्रासाहस्य मन्योर्ज्यामुग्रस्येव धन्वनो वि मुञ्चामि रथाँ इव।। 4।।

卐8.2.5 कैलात पृश्न उपतृण्य बभ्रवा मे श्रृणुतासिता अलिकाः। मा नस्सख्युः काममपि ष्ठादा श्रावयाद्धो वीर्षे रमध्वम्।। 5।।

卐8.2.6 आलिकि च विलि पिता यस्ते माता च। विद्म ते विश्वतो बन्धुमरसः किं करिष्यसि।। 6।।

卐8.2.7 उरुगूलाया दुहिता जाता दास्यसिक्न्याः। प्रत्यङ्कं दद्दषी नु साहीनरसाँ अकः।। 7।।

卐8.2.8 कर्णा स्वाविदब्रवीतद् गिरेरव चरन्तिका। याः काश्चेमाः खनित्रिमास्तासामरसतमं विषम्।। 8।।

卐8.2.9 ताबुवं न ताबुवं न घेदसि त्वं ताबुवं। ताबुवेनारसं विषम्।। 9।।

卐8.2.10 तस्तुवं न तस्तुवं न घेदसि त्वं तस्तुवम्। तस्तुवेनारसं विषम्।। 10।।

卐8.2.11 अरसं तेऽहे विषमियं कृणोत्वोषधिः। त्रायमाणा सहमाना सहस्वती सहाता इद् गोरश्वात् पुरुषाद् विषम्।। 11।। 8 - 3

卐8.3.1 यदाञ्जनन्त्रैककुदं जातं हिमवतस्परि। यातूंश्च सर्वान् जम्भया सर्वांश्च यातुधानन्यः।। 1।।

卐8.3.2 उतेवासि परिपाणं यातु जम्भनमाञ्जन। उतामृतत्वस्येशिष उतासि पितु भोजनम्।। 2।।

卐8.3.3 परिपाणं पुरुषाणां परिपाणं गवामसि। अश्वानामर्वतामित् परिपाणाय तस्थिषे।। 3।।

卐8.3.4 परि मां परि णः प्रियं परि णः पाहि यद्धनम्। अरातिरिन्नो मा तारीन्मा च नः किञ्चनाममत्।। 4।।

卐8.3.5 न तं प्राप्नोति शपथो न कृत्या नामिशोचनम्। नैनं विष्कन्धमश्नुतं यस्त्वा बिभर्त्याञ्जन।। 5।।

卐8.3.6 आसन्मन्त्र्याद्दुःस्वप्न्यात् क्षेत्रियाच्छपथादुत। दुर्हार्दश्चक्षुषो घोरात्तस्मान्नः पाह्याञ्जन।। 6।।

卐8.3.7 त्रयो दासा आञ्जनस्य तक्मा बलास आदहिः। वर्षिष्ठः पर्वतानां त्रिककुन्नाम ते पिता।। 7।।

卐8.3.8 वृत्रस्यासि कनीनिका पर्वतस्यास्यक्ष्यौ। देवेभिस्सर्वैः प्रोक्तं परिधिर्नाम वा असि।। 8।।

卐8.3.9 वैदो ह वेद ते नाम गन्धर्वः परिवाचनम्। यत आञ्जन प्र जायसे तत एह्यरिष्टतातये।। 9।।

卐8.3.10 यदि वासि त्रैककुदं यदि यामुनमुच्यसे। उभे ते भद्रे नाम्नी ताभ्यां नः पाह्याञ्जन।। 10।।

卐8.3.11 यस्याञ्जन प्रसर्पस्यङ्गमङ्गं परुष्परुः। तस्माद्यक्ष्मं वि बाधस्वोग्रो मध्यमशीरिव।। 11।।

卐8.3.12 नैनं घ्नन्ति पर्यायिणो न सन्नाँ अवगच्छति। जने स न प्र मीयते यस्त्वा बिभर्त्याञ्जन।। 12।।

卐8.3.13 इदं विद्वानाञ्जन सत्यं वक्षामि नानृतम्। सनेयमश्वं गां वास आत्मानं तव पूरुष।। 13।। 8 - 4

卐8.4.1 य एकवृषोऽसि सृजारसोऽसि।। 1।।

卐8.4.2 य द्विवृषोऽसि सृजारसोऽसि।। 2।।

卐8.4.3 यस्त्रिवृषोऽसि सृजारसोऽसि।। 3।।

卐8.4.4 यश्चतुर्वृषोऽसि सृजारसोऽसि।। 4।।

卐8.4.5 यः पञ्चवृषोऽसि सृजारसोऽसि।। 5।।

卐8.4.6 यः षड्वृषोऽसि सृजारसोऽसि।। 6।।

卐8.4.7 यस्सप्त वृषोऽसि सृजारसोऽसि।। 7।।

卐8.4.8 योऽष्टवृषोऽसि सृजारसोऽसि।। 8।।

卐8.4.9 यो नववृषोऽसि सृजारसोऽसि।। 9।।

卐8.4.10 यो दशवृषोऽसि सृजारसोऽसि।। 10।।

卐8.4.11 योऽपोदकोऽसि सृजारसोऽसि।। 11।। 8 - 5

卐8.5.1 एका च मे दश चापवक्तार ओषधे। ऋतजात ऋतावरि मधु त्वा मधुला करत्।। 1।।

卐8.5.2 द्वे च मे विंशतिश्चापवक्तार ओषधे। ऋत जात ऋतावरि मधु त्वा मधुला करत्।। 2।।

卐8.5.3 तिस्रश्च मे त्रिंशच्चापवक्तार ओषधे। ऋत जात ऋतावरि मधु त्वा मधुला करत्।। 3।।

卐8.5.4 चतस्रश्च मे चत्वारिंशच्चापवक्तार ओषधे। ऋत जात ऋतावरि मधु त्वा मधुला करत्।। 4।।

卐8.5.5 पञ्च च मे पञ्चाशच्चापवक्तार ओषधे। ऋत जात ऋतावरि मधु त्वा मधुला करत्।। 5।।

卐8.5.6 षट् च मे षष्टिश्चापवक्तार ओषधे। ऋत जात ऋतावरि मधु त्वा मधुला करत्।। 6।।

卐8.5.7 सप्त च मे सप्ततिश्चापवक्तार ओषधे। ऋत जात ऋतावरि मधु त्वा मधुला करत्।। 7।।

卐8.5.8 अष्ट च मेऽशीतिश्चापवक्तार ओषधे। ऋत जात ऋतावरि मधु त्वा मधुला करत्।। 8।।

卐8.5.9 नव च मे नवतिश्चापवक्तार ओषधे। ऋत जात ऋतावरि मधु त्वा मधुला करत्।। 9।।

卐8.5.10 दश च मे शतं चापवक्तार ओषधे। ऋत जात ऋतावरि मधु त्वा मधुला करत्।। 10।।

卐8.5.11 शतं च मे सहस्रं चापवक्तार ओषधे। ऋत जात ऋतावरि मधु त्वा मधुला करत्।। 11।

(इत्येकादशर्चो नाम अष्टमकाण्डे प्रथमोऽनुवाकः) 8 - 6

卐8.6.1 आ पश्यसि प्रति पश्यसि परा पश्यसि पश्यसि। द्यामन्तरिक्षमाद् भूमिं तत्सर्वं देवि पश्यसि।। 1।।

卐8.6.2 तिस्रो दिवस्तिस्रः पृथिवीः षट् चेमाः प्रदिशो महीः। तयाहं सर्वान् यातुन् पश्यानि देव्योषधे।। 2।।

卐8.6.3 सुपर्णस्य दिव्यस्य तस्य हासि कनीनिका। सा भूमिमा रुरोहिथ वह्यं श्रान्ता वधूरिव।। 3।।

卐8.6.4 तां मे सहस्राक्षो देवो दक्षिणे हस्त आदधत्। तयाहं सर्वं पश्यानि यद्भूतं यच्च भाव्यम् ।। 4।।

卐8.6.5 यथा श्वा चतुरक्षो यथाश्वस्स्यावोर्वताम्। यथाग्निर्विश्वतः प्रत्यङ् एवा त्वमस्योषधे।। 5।।

卐8.6.6 कश्यपस्य चक्षुरसि शुन्याश्चतुरक्ष्याः। वीध्रे सूर्यमिव सर्पन्तं मा पिशाचं तिरस्करः।। 6।।

卐8.6.7 दर्शय मा यातुधानान् दर्शय यातुधान्यः। आपस्पृत इव तिष्ठन्तं दर्शय मा किमीदिनम्।। 7।।

卐8.6.8 उदग्रभं परिपाणं यातुधानात् किमीदिनः। तेनाहं सर्वं पश्यान्युत शूद्रमुतार्यम्।। 8।।
卐8.6.9 यथा सूर्यश्चन्द्रमाश्च विश्वा भूता विपश्यतः। एवा वि पश्य तान्त्वमघायुर्मोप गादिह।। 9।।
卐8.6.10 योऽन्तरिक्षेण पतति भूमिं यश्चोपसर्पति। दिवं यो मन्यते नाथं तं पिशाचं दृशे कुरु।। 10।।
卐8.6.11 आविष्कृणुष्व रूपाणिमात्मानमपगूहथाः। अधा सहस्रचक्षो त्वं प्रति पश्यास्यायतः।। 11।। 8 - 7
卐8.7.1 मोक्षेजांस्तोदांस्तुमलान् पथिष्ठाँ उत पार्षतान्। अहीनां सर्वेषां विषमरसं कृण्वोषधे।। 1।।
卐8.7.2 अश्व क्रन्दस्य वण्डस्य पृदाकोर्गोनसेरुत। श्वित्राणां सर्वेषां विषमरसं कृण्वोषधे।। 2।।
卐8.7.3 द्यां पातस्य गवकस्य गोधापृष्ठेरहेरुत। असितानामेतज्जातमरिष्टेऽरसं कृधि।। 3।।
卐8.7.4 एतज्जातं स्वजानां तद् बभ्रो अरसं कृधि। सर्वस्य बभ्रोर्भेषज्यसीहि विषदूषणी।। 4।।
卐8.7.5 त्रायमाणा प्र ब्रवीतु सर्वाङ् राज्ञो अहीनां। तिरश्चिराजीनसितानथो उपशयाश्च ये।। 5।।
卐8.7.6 सहसाहं यातुधानान् सहसा यातुधान्यः। सहो वस्सर्वान् सासाह तस्याहं नाम जग्रभ।। 6।।
卐8.7.7 सहस्साकं पैद्वेनोग्रेण वचसा मम। अन्धाहींश्च सृजयाश्च शफकांश्च रथव्रयः। सहसा सह उत्पत्य तान् सर्वाँ अरसाँ अकः।। 7।।
卐8.7.8 असितस्य विद्रधस्य हरितो यश्च विद्रधः। निमङ्क्षी विद्रधानां यो मृजन्ती ताँ अजीजभत्।। 8।।
卐8.7.9 यस्स्वजानां नीलग्रीवो यस्स्वजानां हरिरुत। कल्माषपुच्छमोषधे जम्भयास्य रुन्धति।। 9।।
卐8.7.10 मायं मरदहिदष्टः पितुरस्मा असद्विषम्। इमा ह्यस्मा ओषधिमा हराम्य रुन्धतीम्।। 10।।
卐8.7.11 एतज्जातं पृदाकूनामरसं जीवले कृधि। इन्द्रस्य भद्रिका वीरुदसीहि विषदूषणी।। 11।। 8 - 8
卐8.8.1 शतमर्वाक् प्र स्यन्दते प्र स्यन्दते शतं परः। शतं वृत्रस्य काण्डानि तेभ्य आपो विधावथ।। 1।।
卐8.8.2 अन्तरिक्षे पतयिष्णवो नभसस्परि जज्ञिरे। आपो हिरण्यवर्णास्तास्ते भवन्तु शं हृदे।। 2।।
卐8.8.3 शन्ते सन्तु हृदयाय सन्ते हृदयाभ्यः। शन्ते यकक्लोमभ्यश्शमु ते यन्तष्टेभ्यः।। 3।।
卐8.8.4 यदङ्गैरपसिस्मिषे यच्छीर्ष्णा यच्च पृष्टिभिः। आपस्तत् सर्वं निष्करन् तष्टा रिष्टमिवानसः।। 4।।

卐8.8.5 सं हृदयेन हृदय मोपशेन समोपशः। अद्भिर्मुञ्चापस्मितं पार्ष्णिद्योतः समेतु मे।। 5।।
卐8.8.6 आचरन्तीः पर्वतेभ्यो देवीर्देवेभ्यस्परि। आपो यमद्य प्रापन्न स रिष्याति पूरुषः।। 6।।
卐8.8.7 शन्त आपो हैमवतीश्शमुते सन्तूत्स्याः। शन्ते सनिष्यदा आपश्शमु ते सन्तु वर्ष्याः।। 7।।
卐8.8.8 शन्त आपो धन्वन्याश्शमु ते सन्त्वनूप्याः। शन्ते खनित्रिमा आपश्शँ याः कुम्भेभिराभृताः।। 8।।
卐8.8.9 अनभ्रयः खनमाना विप्रा गम्भीरेऽपसः। भिषग्भ्यो भिषक्तरा आपो अच्छा वदामसि।। 9।।
卐8.8.10 अपामह दिव्यानामपां स्त्रोतस्यानाम्। अपामह प्रणेजनेऽश्वा भवथ वाजिनः।। 10।।
卐8.8.11 ता आपश्शिवा आपो ऽयक्ष्मं करणीरपः। यथैव तृष्यते मयस्तास्त आद्युत्तभेषजी।। 11।।
8 - 9
卐8.9.1 ब्रह्मज्येष्ठा सम्भृता वीर्याणि ब्रह्माग्रे ज्येष्ठं दिवमा ततान। भूतानां ब्रह्म प्रथमोत जज्ञे तेनार्हति ब्रह्मणा स्पर्धितुं कः।। 1।।
卐8.9.2 ब्रह्मे मे द्यावापृथिवी ब्रह्मे मे सप्तसिन्धवः। ब्रह्मे मे सर्व आदित्या ब्रह्म देवा उपासते।। 2।।
卐8.9.3 ब्रह्म ब्राह्मणो वदति ब्रह्म रात्री नि विशते। सावित्रं ब्रह्मणो जातं ब्रह्मणाग्निर्वि रोचते।। 3।।
卐8.9.4 ब्रह्मौषधयो नि तिष्ठन्ति ब्रह्म वर्षन्ति वृष्टयः। ब्रह्मेदं सर्वमात्मन्वद् यावत् सूर्यो वि पश्यति।। 4।।
卐8.9.5 ब्रह्म होता ब्रह्म यज्ञो ब्रह्मणा स्वरवो मिताः। अध्वर्युर्ब्रह्मणो जातो ब्रह्मणोत्तिरते हविः।। 5।।
卐8.9.6 ब्रह्म स्त्रुचो घृतवतीर्ब्रह्मणा वेदिरुद्यता। ब्रह्म यज्ञस्य तन्तव ऋत्वियो ये हविष्कृतः।। 6।।
卐8.9.7 ब्रह्म ऋषभो भद्ररेता ब्रह्म गावो हविष्कृतः। ब्रह्म रथस्य देवस्य यज् जयाति स्वरङ्कृतः।। 7।।
卐8.9.8 ब्रह्मणा शीरं वहति ब्रह्मणा युज्यते रथः। ब्रह्मणा पुरुषो द्विपान्न व्यथते चरन्।। 8।।
卐8.9.9 ब्रह्मणो जाता ऋषयो ब्रह्मणो राजन्या उत। ब्रह्मेदं ब्रह्मणो जातं ब्रह्मणोऽविष्या अन्नम्।। 9।।
卐8.9.10 ब्रह्म शूद्रा राजन्यानां ब्रह्मैषामुत विक्षदः। ब्रह्मैषां भद्रं सादनं ब्रह्मणैषां सभासदः।। 10।।
卐8.9.11 ब्रह्म दाशा ब्रह्म दासा ब्रह्मे मे कितवा उत। स्त्रीपुंसौ ब्रह्मणो जातौ स्त्रियो ब्रह्म उत वावन।। 11।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham

卐8.9.12 ब्रह्मोद्वतो निवतो ब्रह्म संवतो वानस्पत्याः पर्वता ब्रह्मवीरुधः। ब्रह्मेदं सर्व मन्वा ततानान्तरा द्यावापृथिवी उभे।। 12।।

卐8.9.13 ब्रह्मैवाभूदुत्तरं जातवेदोरद्वञ्रो यातुधानं महालम्। भवाशर्वौ तपूषीं हेतिमस्मै मयेषितौ वि सृजतां वधाय।। 13।। 8 - 10

卐8.10.1 यदश्विना ओषधीष्वासिक्तं पुष्करस्रजा वीरुधो मधु बिभ्रति। तेनाहमस्या मूर्धानमभि षिञ्चामि नार्याः।। 1।।

卐8.10.2 यदश्विना पुष्पादधि माक्षिकं मधु संभृतम्। अन्ने लवणे यन्मधु तेनाहमस्या मूर्धानमभि षिञ्चामि नार्याः।। 2।।

卐8.10.3 यदश्विना गुलगुन्याञ्जने मधुसंभृतम् यदस्मिन् मधुघे मधु। तेनाहमस्या मूर्धानमभि षिञ्चामि नार्याः।। 3।।

卐8.10.4 यदश्विनाक्ष मधु गोष्वश्वेषु यन्मधु। सुरायां सिच्यमानायां कोलालेऽधि यन्मधु। तेनाहमस्या मूर्धानमभि षिञ्चामि नार्याः।। 4।।

卐8.10.5 यदश्विना गोवर्चसं हिरण्यवर्चसं हस्तिवर्चसमश्विना। तेनाहमस्या मूर्धानमभि षिञ्चामि नार्याः।। 5।।

卐8.10.6 अभिनन्दमभि मोदमभि दर्पं कृणोमि ते। आ ते भगं वर्तयतामश्विना पुष्करस्रजा।। 6।।

卐8.10.7 दत्सु ते वर्चस्सुभगे जिह्वायां ते मधुलकम्। अक्षौ निकरणी तव प्रतीकं मधुमत्तरम्।। 7।।

卐8.10.8 आ सचस्व तलाशेव वृक्ष इवापतिकः पतिम्। त्वं समग्रभीः पुंसश्श्येन इवान्यान् पतत्रिणः।। 8।।

卐8.10.9 आ हि ते हार्षमुदकमपो भगाभिषेचनीः। यत्ते वर्चोऽपक्रान्तं मुखस्य प्रति चक्षणात्। पुनस्तदश्विना त्वय्या धत्तां पुष्करस्रजा।। 9।।

卐8.10.10 अभि त्वा वर्चसा सिचं दिव्येन पयसा सह। यथा पतिवत्यसो देवृभ्यो मधुमत्तरा।। 10।।

卐8.10.11 भगं ते मित्रावरुणा भगं देवी सरस्वती। भगं ते अश्विनोभा धत्तां पुष्करस्रजा।। 11।।

卐8.10.12 पतिं ते राजा वरुणः पतिं देवो बृहस्पतिः। पतिं त इन्द्रश्चाग्निश्च पतिं धाता दधातु ते।। 12। (इत्येकादशर्चं नाम अष्टमकाण्डे द्वितीयोऽनुवाकः) 8 - 11

卐8.11.1 चतस्रस्ते खल स्रक्तीरथो मध्यमहं खल। धाराश्चतस्रस्तोष्यामि वेदिं मनुष्यवर्धनीम्।। 1।।

卐8.11.2 ऊर्जस्वन्तमा रभध्वं स्फातिमन्तं पुनीतन। इन्द्रो बीजस्याभ्या वोढा भग ऐतु पुरोगवः।। 2।।

卐8.11.3 भगस्य ह्यनड्वाहौ युञ्जाथां राशिवाहनौ। अधा पृथिव्याः कीलालमिहा वहतमश्विना।। 3।।

卐8.11.4 अभिवृतः परिहितो धान्येन विभुः प्रभुः। भर्ता मनुष्याणां जज्ञे देवानामाज्यं खलः।। 4।।

卐8.11.5 स्रुच आसन् पवनीः सृणीकाः परिधिष्कृतः। कीनाशा आसन् होतारो बीजदा आसीद्धविष्पतिः।। 5।।

卐8.11.6 इहेन्द्र मुष्टी वि सृजस्व पूर्णाविह सौमनसस्समृध्यताम्। हुतादो ये च गन्धर्वास्त इह स्फातिं समा वहान्।। 6।।

卐8.11.7 अतिपश्यो निचायक इडुकः पक्वमा भर। ईशाना गन्धर्वा भुवनस्य सर्व आ वहन्तु खले स्फातिमिह सुनृतां च।। 7।।

卐8.11.8 आ पश्चदा पुरस्तादोत्तरादधरादुत। इन्द्रेह वसोरीशानः खले स्फातिं समा वह।। 8।।

卐8.11.9 स्फातिमिन्द्रः खले बर्ह्यीमिहोत् प्राण उत् पृणत्। स्फातिं मे विश्वेदेवाः स्फातिं सोमो अथो भगः।। 9।।

卐8.11.10 स्फातिर्मे अस्तु हस्तयोः स्फातिर्यत्र परारभे। शतहस्तेदमुत्पृण समुद्रस्येव मध्यतः।। 10।।

卐8.11.11 इह मे भूय आ भर यथाहं कामये तथा। यथेदमुदिव स्फायातै त्रय इव हस्तिनस्सह।। 11।। 8 - 12

卐8.12.1 स्वाद्वीं त्वा मित्रावरुणा स्वाद्वीं देवी सरस्वती। स्वाद्वीं त्वा अश्विना सुरे कृणुतां पुष्करस्रजा।। 1।।

卐8.12.2 यामसिञ्चन् सौधन्वाना विश्वेदेवा मरुद्गणाः। यामश्विनासिञ्चतां सा सुरा बहु धावतु।। 2।।

卐8.12.3 स्वादोः स्वादीयसी भव मधोर्मधुतरा भव। यथश्यर्यस्येयमारिश्येवा त्वं सुभगे भव।। 3।।

卐8.12.4 अभ्राज्जातं वर्षाज्जातमथो जातं दिवस्परि। अथो समुद्राज्जातं तत् सुरादरणं भव।। 4।।

卐8.12.5 नाडी नामासि जनुषा सा सुरादरणी भव। सखा हि भद्रस्त आसीद् वृक्षः स्वादुविकङ्कतः।। 5।।

卐8.12.6 असुरस्त्वध्र्व नभसश्चकार प्रथमस्सुरे। सुरे दासस्य त्वा गृहे शिरश्चान्धश्च चक्रतुः।। 6।।

卐8.12.7 निष्पुष्पकं कशीकाया निर्धारायास्सुरामुत। उदेहि वाजिनीवति किमङ्कतिष्विच्छसि।। 7।।

卐8.12.8 इमे ते जन्या आसते गम्भीरा अभि धृष्णवः। सुरे देवि परि प्रेहि मादयन्ती जनंजनम्।। 8।।

卐8.12.9 यस्या गृह्णन्ति स्थालेन गामश्वं धान्यं वसु। सा सुरा बहु धावतु।। 9।।

卐8.12.10 आचरन्तीः पर्वतेभ्यः खनमाना अनभ्रयः। यासां समुद्रे संस्थानं यासां नास्ति निवेशनं तास्ते ददतु बुद्बुदम्।। 10।।

卐8.12.11 उदंकद चेमां सुरां यां हृदा कामयामहे। तां मे भगस्तामश्विना तां मा बट् सरस्वती।। 11।।

卐8.12.12 अयं देवो मयूलशस्सा सुरादरणं ददत्। संस्रवणाद् प्रस्रवणाद् गिरिभ्यस्पर्याभृतः। मध्ये शतस्य मस्तिष्कोऽनड्वानिव मेहतु।। 12।। 8 - 13

卐8.13.1 समुद्रादुर्मिर्मधुमाँ उदारदुपांशुना सममृतत्वमानट्। घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः।। 1।।

卐8.13.2 वयं नाम प्र ब्रवामा घृतस्यास्मिन् यज्ञे धारयामा नमोभिः। उप ब्रह्मा शृणवच्छस्यमानं चतुश्शृङ्गोऽवमित् गौर एतत्।। 2।।

卐8.13.3 चत्वारि श्रृङ्गा त्रयोऽस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आ विवेश।। 3।।

卐8.13.4 त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविन्दन्। इन्द्र एकं सूर्य एकं जजान वेनादेकं स्वधया निष्टतक्षुः।। 4।।

卐8.13.5 एता अर्षन्ति हृद्यात्समुद्राच्छत वज्रा रिपुणा नावचक्षे। घृतस्य धारा अभि चाकशीमि हिरण्ययो वेतसो मध्य आसाम्।। 5।।

卐8.13.6 सम्यक् स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः। एते अर्षन्त्यूर्मयो घृतस्य मृगा इव क्षिपणोरीषमाणाः।। 6।।

卐8.13.7 सिन्धोरिव प्राध्वने शूघनासो वातः प्रमीयः पतयन्ति यह्वाः। घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः।। 7।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐8.13.8 अभि प्रवन्त समनेव योषाः कल्याण्यः स्मयमानासोऽग्निम्। घृतस्य धारास्समिधो न सन्त ता जुषाणो हर्यति जातवेदाः।। 8।।

卐8.13.9 कन्या इव बहतु मे तवा उ अञ्ज्यञ्जाना अभि चाकशीमि। यत्र सोमस्सूयते यत्र यज्ञो घृतस्य धारा अभि तत् पवन्ते।। 9।।

卐8.13.10 अभ्यर्षत सुष्टुतिं गव्यमाजीमस्मासु भद्रा द्रविणानि धत्त। इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत् पवन्ते।। 10।।

卐8.13.11 धामन्ते विश्वं भुवनमधि श्रितमन्तस्समुद्रे हृद्यन्तरायुषि। अपामनीकात् समिथाद् य आभृतस्तमस्याम मधुमन्तं त ऊर्मिम्।। 11।। 8 - 14

卐8.14.1 द्वे विरूपे चरतस्स्वर्थे अन्यान्या वत्समुप धापयेते। हरिरन्यसां भवति स्वधावाञ्छुक्रो अन्यस्यां ददृशे सुवर्चाः।। 1।।

卐8.14.2 दशेमं त्वष्टुर्जनयन्त गर्भमतन्द्रासो युवतयो विभृत्रम्। तिग्मानीकं स्व यशसं जनेषु विरोचमानं परि षीं नयन्ति।। 2।।

卐8.14.3 त्रीणि जानात् प्रति भूषन्त्यस्य समुद्र एकं दिव्येकमप्सु। पूर्वामनु प्रदिशं पार्थिवानामृतून् प्रशासद् वि दधावनुष्टु।। 3।।

卐8.14.4 क इमं वो निण्यमा चिकेत वत्सो मातॄर्जनयत स्वधाभिः। बह्वीनां गर्भो अप सामुपस्थान् महान् कविर्निश्चरति स्वधावान्।। 4।।

卐8.14.5 आविष्ट्यो वर्धते चारुरासु जिह्मानामूर्ध्वस्स्वयसामुपस्थे। उभे त्वष्टुर्बिभ्यतुर्जायमानात् प्रतीची सिंहं प्रति जोषयेते।। 5।।

卐8.14.6 उभे भद्रे जोषयेते न मेने गावो नो वाश्रा उप तस्थुरेवैः। स दक्षाणां दक्षपतिर्बभूवाञ्जन्ति यं दक्षिणतो हविर्भिः।। 6।।

卐8.14.7 उद् यं यमीति सवितेव बाहू उभे सिचौ यतते भीम रुञ्जन्। उच्छुक्रमत्कमजते सिमस्मान् नवा मातृभ्यो वसना जहाति।। 7।।

卐8.14.8 त्वेषं रूपं कृणुतं उत्तरं यत् संपृञ्चानस्सदनं गोभिरद्भिः। कविर्बुध्नं परि मर्मृज्यते धीस्सा देवताता समितिर्बभूव।। 8।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐8.14.9 उरु ते ज्रयः पर्यैति बुध्नं विरोचमानं महिषस्य धाम। विश्वेभिरग्ने स्वयशोभिरिद्धो अदब्धेभिः पायुभिः पाह्यस्मान्।। 9।।

卐8.14.10 धन्वं स्रोतः कृणुते गातुमूर्मिं शुक्रैरूर्मिभिरभि नक्षति क्षाम्। विश्वासनानि जठरेषु धत्तेऽन्तर्नवासु चरति प्रसूषु।। 10।।

卐8.14.11 एवा नो अग्ने समिधा वृधानो रेवत् पावक श्रवसा वि भाहि। तन्नो मित्रो वरुणो मामहन्तामदितिस्सिन्धुः पृथिवी उतद्यौः।। 11।। 8 - 15

卐8.15.1 यो जामदग्न्य इह कौशिको य आत्रेय उत काश्यपो यः। भरद्वाजा गोतमा ये वसिष्ठास्तेभ्यः प्र ब्रूम इह किल्बिषाणि।। 1।।

卐8.15.2 अगस्त्य यः कण्वाः कुत्साः प्रस्रवणा विरूपा गर्गा मुद्गला यस्काश्शूनकाः। सं कृतयो ब्राह्मणा ये न द्रुग्धास्तेभ्यः प्र ब्रूम इह किल्बिषाणि।। 2।।

卐8.15.3 यो नोत्तिष्ठाद् ब्राह्मणे नाधमाने मान्येन द्रुप्त उत धैर्येण। विश्वे देवा उपद्रष्टारोऽस्य तस्मिन् विषं सं नयान् किल्बिष्यम्।। 3।।

卐8.15.4 या रोपयः किल्बिषे ब्राह्मणस्य यानि चैनांसि बहुधा दुस्कृतानि। अनुतिष्ठन् प्रोक्त आत्मनि तं नि धत्ते तथा तद्देवा उत वेशयन्ति।। 4।।

卐8.15.5 नाश्नीयान्न पिवेन्न शयीत न निंसीत जायां नोत पुत्रम्। ब्रह्म किल्बिषे प्रोक्त उदेव तिष्ठेत् स ऋतस्य पन्थाः।। 5।।

卐8.15.6 शतर्चिनो माध्यमा ये महर्षयः क्षुद्रसूक्तानामुत या प्रजेह। ऋषीणां यानि जनिमानि विद्मस्तेभ्यः प्र ब्रूम इह किल्बिषाणि।। 6।।

卐8.15.7 सोदर्याणां पञ्चदशानां शतानां त्रयस्त्रिंशदुदशिष्यन्त देवाः। एकस्मिन् बिद्धे सर्वेऽरूप्यं तद् ब्राह्मणे किल्बिषमन्वविन्दन्।। 7।।

卐8.15.8 तस्मै स द्रुह्याद्य इदं नायद्यो नोत्तिष्ठादो न वदाता अस्मिन्। ब्राह्मणस्य किल्बिषे नाथितस्य सोदर्यतामिच्छतो ब्राह्मणेषु।। 8।।

卐8.15.9 उत्तिष्ठद् ब्राह्मणास्सं वदध्वं जीतं याचाम पुनरैतु सर्वम्। इन्द्राग्नी विश्वेदेवास्ते मे जीतं पुनरावर्तयन्तु।। 9।।

卐8.15.10 स दीर्घमायुष्कृणुते स प्रजायै चिकित्सति। यो ब्राह्मणस्य ब्राह्मणो हूतो अन्वेति किल्बिषे।। 10।।

卐8.15.11 नास्य प्रजां शर्वो हन्ति न रुद्रो हन्ति नाशनिः। यो ब्राह्मणस्य ब्राह्मणस्सत्ये वदति किल्बिषे।। 11।।

卐8.15.12 तं सोमपीथो जुषते नृचक्षा ग्रावभिस्सह। यो ब्राह्मणस्यास्तां हृदस्सूर्य इवापालुपत्तमः।। 12।।

卐8.15.13 य उत्थाय किल्बिषे ब्राह्मणस्यान्नसीच्छन्नवायति। उभे एनं द्यावापृथिवी सं तपतामथैत्वगतस्य पन्थाम्।। 13। (इत्येकादशर्चो नाम अष्टमकाण्डे तृतीयोऽनुवाकः) 8 - 16

卐8.16.1 नव च या नवतिश्चारुढा वक्षणा अनु। इतस्तास्सर्वा नश्यन्तु नुत्ताः पुत्थङ्गो मया।। 1।।

卐8.16.2 सप्त च याः सप्ततिश्चारुढा वक्षणा अनु। इतस्तास्सर्वा नश्यन्तु नुत्ताः पुत्थङ्गो मया।। 2।।

卐8.16.3 पञ्च च याः पञ्चाशच्चारुढा वक्षणा अनु। इतस्तास्सर्वा नश्यन्तु नुत्ताः पुत्थङ्गो मया।। 3।।

卐8.16.4 ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां भंससः। स्त्रिया जार इव पुत्थङ्गीं प्र मृणीमसि।। 4।।

卐8.16.5 अनुसृप्तां गहनेषु ध्रुक्षणां पापीं शिमिद्वतीम्। तामेतां दस्यूनां दासीं प्र दहातश्रुकाकणि।। 5।।

卐8.16.6 या स्त्रीणां पुत्र सदनं केवटानुपसर्पति। तामेतां दस्यूनां दासीं प्र दहातश्रुकाकणि।। 6।।

卐8.16.7 प्र पपात सुकटनाळि सुषेः कुषीतको यथा। स्रक्के ते तिप्रं धक्ष्यामि सा न शिष्यसि पुत्थगि।। 7।।

卐8.16.8 संवत्सरमचरो असुरेभ्यः प्रतङ्किनी। यत्र क्षेत्रस्य दुर्गन्धि तत्त एतन्न्यञ्चनम्।। 9।।

卐8.16.9 नैतत्तव मातरंस्था न त एतन्न्यञ्जनम्। अस्माकमेतद्वीरेभ्यो देवैः प्रजननं कृतम्।। 10।।

卐8.16.10 गिरौ ते अश्मपुत्रमुदकं हिमवत्सु। तत्रोपपस्कद्य नृत्य जामियूथेषु पुत्थगि।। 11।।

卐8.16.11 स त्वं गोभिरश्वैः प्रजया प्रतरं भव। यो मा तत्र प्राहैषीर्यत्र जीवन्ति भद्रया।। 12।। 8 - 17

卐8.17.1 मित्रः पृथिव्योदक्रामत्तां पुरं प्र णयामि वः। ता मा विशत तां प्र विशत सा वश्शर्म च वर्म च यच्छतु।। 1।।

卐8.17.2 वायुरन्तरिक्षेणोदक्रामत्तां पुरं प्र णयामि वः। ता मा विशत तां प्र विशत सा वश्शर्म च वर्म च यच्छतु।। 2।।

卐8.17.3 सूर्यो दिवोदक्रामत्तां पुरं प्र णयामि वः। ता मा विशत तां प्र विशत सा वश्शर्म च वर्म च यच्छतु।। 3।।

卐8.17.4 चन्द्रमा नक्षत्रैरुदक्रामत्तां पुरं प्र णयामि वः। ता मा विशत तां प्र विशत सा वश्शर्म च वर्म च यच्छतु।। 4।।

卐8.17.5 सोम ओषधीभिरुदक्रामत्तां पुरं प्र णयामि वः। ता मा विशत तां प्र विशत सा वश्शर्म च वर्म च यच्छतु।। 5।।

卐8.17.6 यज्ञो दक्षिणाभिरुदक्रामत्तां पुरं प्र णयामि वः। ता मा विशत तां प्र विशत सा वश्शर्म च वर्म च यच्छतु।। 6।।

卐8.17.7 समुद्रो नदीभिरुदक्रामत्तां पुरं प्र णयामि वः। ता मा विशत तां प्र विशत सा वश्शर्म च वर्म च यच्छतु।। 7।।

卐8.17.8 ब्रह्म ब्रह्मचारिभिरुदक्रामत्तां पुरं प्र णयामि वः। ता मा विशत तां प्र विशत सा वश्शर्म च वर्म च यच्छतु।। 8।।

卐8.17.9 इन्द्रो वीर्येणोदक्रामत्तां पुरं प्र णयामि वः। ता मा विशत तां प्र विशत सा वश्शर्म च वर्म च यच्छतु।। 9।।

卐8.17.10 देवा अमृतेनोदक्रामन्तां पुरं प्र णयामि वः। ता मा विशत तां प्र विशत सा वश्शर्म च वर्म च यच्छतु।। 10।।

卐8.17.11 प्रजापतिः प्रजाभिरुदक्रामत्तां पुरं प्र णयामि वः। ता मा विशत तां प्र विशत सा वश्शर्म च वर्म च यच्छतु।। 11।। 8 - 18

卐8.18.1 संयुज्यन्तः प्रकृषन्तो यद्वो देवा उपोचिरे। तामेभ्यस्सत्यामाशिषमिन्द्रखल्वां समर्धय।। 1।।

卐8.18.2 अनड्वाहः सत्यावानस्सीरं कृणोतु मे वचः। यत्राहैतद्धिताय ते तत्पर्जन्योऽभि वो वृषत्।। 2।।

卐8.18.3 दिव्या आपो वः शक्करीरनु वि यन्तु गह्वरे। ऊर्जस्वतीर्घृवतीः पयस्वतीर्दृशे भवत मा गुहा।। 3।।

卐8.18.4 उदेहि वाजिनीवती पूर्णपात्रा त्विषीमती। दुहाना पूषरक्षिता काममेषां समा पृण।। 4।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐8.18.5 इयं सीता फलवती शतवल्शा वि रोहतु। इयं सहस्र भोगा अस्या इन्द्र उपावतु।। 5।।

卐8.18.6 अश्विना फालं कल्पयतामुपावतु बृहस्पतिः। यथा सद्बहुधान्यमयक्ष्मं बहुपूरुषम्।। 6।।

卐8.18.7 इदं म उत्पृणादिति स्फातिं म उत्पृणादिति। राशिं मे वर्धयादिति।। 8।।

卐8.18.8 स्पातिकारो बहुकारः स्पिरस्फोष्टायमक्षितः। खलो ज्येष्ठो विभुः प्रभुः।। 9।।

卐8.18.9 तस्मिन् धान्यं न्युप्यते यवो व्रीहिरथो तिलः। तस्य गृह्णीत यत्कृतं परीक्षाय चतुश्शतम्।। 10।।

卐8.18.10 शर्कारिवन्मयारव चक्रीवत्किं च यद्वृषे। तद्वै स्पातिरुपायती सर्वमेवाति रुच्यते।। 11।।

卐8.18.11 महाञ्जने परा जहि सहस्रो पोषमर्दय। बह्वी न ओषधे भव समुद्रस्येव संस्रवः।। 12।। 8 - 19

卐8.19.1 आज्यादजः समभवद्देशेभ्य ओदना इमे। तानपश्यद् बृहस्पतिः स वै पञ्चौदनोऽभवत्।। 1।।

卐8.19.2 चतुर्धै तां समभर ओदनांस्त्वं बृहस्पते। अज आज्याज्जात स एषां पञ्चमोऽभवत्।। 2।।

卐8.19.3 धूमेन दिवमाप्नोत्यन्तरिक्षमुतोष्मणा। दिश आप्नोति चक्षुषा अजः पञ्चौदनस्सवः।। 3।।

卐8.19.4 या ते माता यस्ते पिता भ्रातरो ये च ते स्वाः। अजं पञ्चौदनं पक्त्वा सर्वे तमुपजीवत।। 4।।

卐8.19.5 ये ते पूर्वे परागता अपरे पितरश्च ये तेभ्यो घृतस्य कुल्यैतु शतधारा व्युन्दती।। 5।।

卐8.19.6 ये सर्वदा ददति ये वा पचन्त्योदनम्। ते वै यमस्य राज्यादुत्तरे लोक आसते।। 6।।

卐8.19.7 नातिरात्र आप्नोति नैनमाप्नोत्युक्थ्यः। नाग्निष्टोमो आप्नोत्यजं पञ्चौदनं सवम्।। 7।।

卐8.19.8 दश रात्रेण सम्मितो द्वादशाहेन कल्पते। दीर्घ सत्रेण सम्मितोऽजः पञ्चौदनस्सवः।। 8।।

卐8.19.9 तेषां बर्हिष्यं सर्वं यन्नष्टं यच्च म्रीयते। यच्च स्तेनो अपाजति येषां पञ्चौदनस्सवः।। 9।।

卐8.19.10 या पूर्वपतिं वित्त्वाथान्यं विन्दतेऽपरम्। पञ्चौदनं च तावजं पचतो न वि योषतः।। 10।।

卐8.19.11 समानलोको भवति पुनर्भुवापरः पतिः। अजं पञ्चौदनं दक्षिणा ज्योतिषं ददत्।। 11।। 8 - 20

卐8.20.1 सूर्यो मा वर्चसोक्षतूक्षतामश्विनोभा। आदित्य ऊर्ध्व उच्चरन् स उ मा वर्चसोक्षतु।। 1।।

卐8.20.2 वर्चसा मा पितुरग्निर्वचसा मा बृहस्पतिः। सुरायास्सिच्यमानायाः कीलाल वर्चसेन मा।। 2।।

卐8.20.3 तेन मामश्विनोभा उक्षतां पुष्करस्रजा। वर्चस्वन्मे मुखमस्तु रोचमानं विषासहि। तस्मा हिरण्यवर्चसं कृणोमि पश्यतां प्रियम्।। 3।।

卐8.20.4 मधोरहं मधुतरो मधुघान्मधुमत्तरः। मामनु प्र विशतु वर्च ऋषभो वाशितामिव।। 4।।

卐8.20.5 इदमाञ्जनमानजे वर्चस्य मा कनिक्रदम्। यथा कनिक्रदच्चराणि वर्चसा च भगेन च।। 5।।

卐8.20.6 वर्चसाग्नि मा दधति वर्चसोदेति सूर्यः। यावद्वर्चो गो हिरण्यस्य तावन्मे वर्चो भूयात्।। 6।।

卐8.20.7 यावत्त्वं देव सूर्य उद्यन्नभि वि पश्यसि। तावन्मा वर्चसाभि वि पश्य।। 7।।

卐8.20.8 पूर्णो भगस्याहं भूत्वा रुक्षं वर्चसो रथम्। स मा वहतु सर्वदायुष्मन्तं सुवर्चसम्।। 8।।

卐8.20.9 भगेनाहं परिहितो वर्चसा द्रविणेन च। यथा चराणि सर्वदा रोचमानं विभावसु।। 9।।

卐8.20.10 एवा मा भग आगमदेवामा वर्च आगमत्। एवा मा तेज आगमदेवा मा यश आगमत्।। 10।।

卐8.20.11 हिरण्ययेन चक्रेण भगस्यापिहितो गृहः। तं व्युब्जामि ब्रह्मणा तस्य मे दत्तमश्विना दत्तं मे पुष्करस्रजा।। 11। (इत्येकादशर्चो नाम अष्टमकाण्डे चतुर्थोऽनुवाकः) इत्यथर्ववेदे पैप्पलादसंहितायां एकादशर्चो नाम अष्टमकाण्डः समाप्तः।

## अथ नवमः काण्डः 9 - 1

卐9.1.1 ऊर्ध्वा अस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचींष्यग्नेः। द्युमत्तमा सुप्रतीकस्य सूनोस्तनूनपादसुर विश्ववेदाः।। 1।।

卐9.1.2 देवो देवेषु देवः पथो अनक्ति मध्वा घृतेन मध्वा यज्ञं नक्षति प्रोणानो नराशंसस्सुकृद्देवस्सविता विश्ववारः।। 2।।

卐9.1.3 अच्छायमेति शवसा घृतेनेडे वह्निं नमसाग्निम्। स्रुचो अध्वरेषु प्रयत्सु।। 3।।

卐9.1.4 स यक्षदस्य महिमानमग्नेस्स इन्मन्द्रासु प्र युत्सु। वसोश्चे तिष्ठो वसुधातमश्च।। 4।।

卐9.1.5 द्वारो देवीरन्नस्य विश्वे व्रता ददन्तेऽग्नेः। उरु व्यचसो धाम्ना पत्यमानाः।। 5।।

卐9.1.6 तेऽस्य वृषणो दिव्या नु योना। उषासा नक्तेमं यज्ञमवतामध्वरं नः।। 6।।

卐9.1.7 दैवा होतार इममध्वरं नो अग्नेर्जिह्वेमभि गृणीत। कृणुता नस्स्विष्टिम्।। 7।।

卐9.1.8 तिस्रो देवीर्वर्हिरेदं सदन्त्विडा सरस्वती मही। भारती गृणाना।। 8।।

卐9.1.9 तन्नस्तुरीपमद्भूतं पुरुक्षु। त्वष्टा सुवीर्यं रायस्पोषं वि स्यर्त नाभिमस्मे।। 9।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐9.1.10 वनस्पते अवसृजा रराणत्मना देवेभ्यः। अग्निर्हव्यं समिता सूदयाति।। 10।।

卐9.1.11 अग्ने स्वाहा कृणु जातवेद इन्द्राय भागम्। विश्वे देवा हविरिदं जुषन्ताम्।। 11।। 9 - 2

卐9.2.1 यजुंषि यज्ञे समिधः स्वहाग्निः प्रविद्वानिह वो युनक्तु। युनक्तु देवस्सविता प्रजानन्नस्मिन् यज्ञे सुयुजस्स्वाहा।। 1।।

卐9.2.2 इन्द्र उक्थामदानि यज्ञे अस्मिन् प्रविद्वान् युनक्तु सुयुजस्स्वाहा। छन्दांसि यज्ञं मरुतस्स्वाहा मातेव पुत्रं पिपृतेह युक्ताः।। 2।।

卐9.2.3 प्रैषा निविद आप्रियो यजूंषि शिष्टाः पत्नीभिर्वहतेह युक्ताः। एयमगन् बर्हिषां प्रोक्षणिभिर्यज्ञं तन्वाना अदितिस्स्वाहा।। 3।।

卐9.2.4 विष्णुर्युनक्तु बहुधा तपांस्यस्स्मिन् यज्ञे सुयुजस्स्वाहा।। 4।।

卐9.2.5 त्वष्टा युनक्तु बहुधा नु रूपाण्यस्मिन् यज्ञे सुयुजस्स्वाहा।। 5।।

卐9.2.6 इन्द्रो युनक्तु बहुधा वीर्याण्यस्मिन् यज्ञे सुयुजस्स्वाहा।। 6।।

卐9.2.7 सोमो युनक्तु बहुधा पयांस्यस्मिन् यज्ञे सुयुजस्स्वाहा।। 7।।

卐9.2.8 भगो युनक्त्वाशिषो न्यस्माँ अस्मिन् यज्ञे सुयुजस्स्वाहा।। 8।।

卐9.2.9 अश्विना ब्रह्मणे तमर्वाग् वषट्कारेण यज्ञं वर्धयन्तौ स्वाहा।। 9।।

卐9.2.10 बृहस्पते ब्रह्मणेह्यर्वाङ् यज्ञोयं स्वरितं यजमानाय धेहि स्वाहा।। 10।। 9 - 3

卐9.3.1 आपः पुनन्तु वरुणः पुनात्वयं च यः पवते विश्वदानीम्। यज्ञो भगो अधिवक्ता विधर्ताग्निश्च नः पावयेतां सूर्यश्च।। 1।।

卐9.3.2 दशशीर्षो दशजिह्व आ रभे वीरको भीषक्। मा ते रिषं खनिता यस्मै च त्वा खनामसि।। 2।।

卐9.3.3 दशरात्रे किलासस्य वीरुधा वेद भेषजम्। इतस्तदभ्रियाखनं किलासं नाशयामि ते।। 3।।

卐9.3.4 अप्स्वन्या वि होहति धन्वन्यन्याधि तिष्ठति। किलासमन्या नीनशद् वर्चसान्या समुक्षतु।। 4।।

卐9.3.5 आज्येन घृतेन जुहोमि किलासभेषजम्। वीरुधामग्नेस्संकाशे किलासं नानु विद्यते।। 5।।

卐9.3.6 पिशङ्गरूपो भवति कल्माषमुत संदृशि। किलास नश्येतः परः प्र त्वा ध्यक्षामि वीरुधा।। 6।।

卐9.3.7 यानि पृथगुत्पतन्ति नक्षत्राणिव संदृशि। किलासं सर्वं नाशयन्नोघ इवाभ्येमि वीरुधा।। 7।।

卐9.3.8 यदि वा पुरुषेषितात् किलास पर्याजगन्। नमो नमस्यामो देवान् प्रत्यक्कर्तारमृच्छतु।। 8।।

卐9.3.9 शीर्ष्णस्ते स्कन्धेभ्यो ललाटात् परि कर्णयोः। ओषध्या वर्षजूतया किलासं नाशयामि ते। स्वस्त्वा वर्ण आयत्यनरातिस्सहौषधिः।। 9।।

卐9.3.10 ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात्। ओषध्या वर्षजूतया किलासं नाशयामि ते। स्वस्त्वा वर्ण आयत्यनरातिस्सहौषधिः।। 10।।

卐9.3.11 अंसाभ्यां ते दोर्भ्यां बाहूभ्यां परि हस्तयोः। ओषध्या वर्षजूतया किलासं नाशयामि ते। स्वस्त्वा वर्ण आयत्यनरातिस्सहौषधिः।। 11।।

卐9.3.12 पृष्टिभ्यस्ते पार्श्वाभ्यां श्रोणिभ्यां परि भंससः। ओषध्या वर्षजूतया किलासं नाशयामि ते। स्वस्त्वा वर्ण आयत्यनरातिस्सहौषधिः।। 12।।

卐9.3.13 ऊरूभ्यां तेऽष्ठीवद्भ्यां पार्ष्णीभ्यां प्रपदाभ्याम्। ओषध्या वर्षजूतया किलासं नाशयामि ते। स्वस्त्वा वर्ण आयत्यनरातिस्सहौषधिः।। 13।। 9 - 4

卐9.4.1 सहैव वो हृदयानि सह विज्ञानमस्तु वः। सहेन्द्रो वृत्रहा करत् सह देवो बृहस्पतिः।। 1।।

卐9.4.2 समानमस्तु वो हृदयं समानमुतो वो मनः। समानो अग्निर्वो देवस्सह राष्ट्रमुपाध्वम्।। 2।।

卐9.4.3 सं जानीध्वं सहृदयास्सर्वे सं मनसस्थ। नष्टो वो मन्युर्जीर्णेर्ष्या सह जीवाथ भद्रया।। 3।।

卐9.4.4 यथा पुत्रः प्रवावदः पितृभ्यां वदति प्रियम्। एवा यूयमन्योऽन्यस्मै जिह्वया वदत प्रियम्।। 4।।

卐9.4.5 सहैव वो धान्यानि समानाः पशवश्च वः। सह पृथिव्यां वीरुधस्सह वस्सन्त्वोषधीः।। 5।।

卐9.4.6 सह दीक्षा सह यज्ञो विवाहो वस्सहा सति। सह प्रफर्वा नृत्यन्तु सह वस्स्त्रिय आसताम्।। 6।।

卐9.4.7 सहैव वो वीर्याणि सहान्यान् रन्धयाध्वै। सह पतत्रिणीमिषु मन्यस्मै हेतिमस्यत।। 7।।

卐9.4.8 सं वस्स्यामि समितिं मधुना वाच माञ्जिषम्। युष्माकमन्ये श्रृण्वन्तूदितं सङ्गते जने।। 8।।

卐9.4.9 युष्मान् मित्रा वृणतां युष्मान्प्रतिजना उत। युष्मात् ज्ञातित्वं प्रेप्सन्त्यमृतं मर्त्या इव।। 9।।

卐9.4.10 सं समिद्यस्समाकरं सह यूथा गवामिव। समानमस्तु वो मनो ज्येष्ठं विज्ञानमन्वित।। 10।।

卐9.4.11 इदं यदेषां हृदयं तदेषां हृदये भवत्। अथो यदेषां हृदयं तद् वेषां हृदि श्रितम्। समानमस्तु वो मनश्श्रेष्ठं विज्ञान मन्वित।। 11।।

卐9.4.12 इदं यदेषां मन एषां यानि मनांसि च। सध्र्यगिन्द्र तत् कृणु रथे पादाविवाहितौ।। 12।। 9 - 5

卐9.5.1 सहस्रबाहुः पुरुषस्सहस्राक्षस्सहस्रपात्। स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम्।। 1।।

卐9.5.2 त्रिभिः पद्भिर्द्यामरोहत् पादस्येहा भवत् पुनः। तथा व्यक्रामद् विष्वङ् अशनानशने अनु।। 2।।

卐9.5.3 तावन्तो अस्य महिमानस्ततो ज्यायांश्च पूररुषः। पादस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि।। 3।।

卐9.5.4 पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्यम्। उतामृतत्वस्येश्वरो यदन्नेना भवत् सह।। 4।।

卐9.5.5 यत् पुरुषं व्यदधुः कतिधा व्यकल्पयन्। मुखं किमस्य किं बाहू किमूरु पादा उच्येते।। 5।।

卐9.5.6 ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यो भवत्। मध्यं तदस्य यद् वैश्यः पद्भ्यां शूद्रो अजायत।। 6।।

卐9.5.7 विराडग्रे समभवद् विराजो अधि पूरुषः। स जातो अत्य रिच्यत पश्चाद् भूमिमथो परः।। 7।।

卐9.5.8 यत् पुरुषेण हविषा देवा यज्ञमतन्वत। वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मश्शरद्धविः।। 8।।

卐9.5.9 तं यज्ञं प्रावृषा प्रौक्षन् पुरुषं जातमग्रशः। तेन देवा अयजन्त साध्या वसवश्च ये।। 9।।

卐9.5.10 तस्मादश्वा अजायन्त ये च के चोभयादतः। गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः।। 10।।

卐9.5.11 तस्मात् यज्ञात् सर्वहुत ऋचस्सामानि जज्ञिरे । छन्दो ह जज्ञिरे तस्माद् यजुस्तस्मादजायत।। 11।।

卐9.5.12 तस्मात् यज्ञात् सर्वहुतस्सम्भृतं पृषदाज्यम्। पशून् तांश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये।। 12।।

卐9.5.13 सप्तास्यासन् परिधयस्त्रिस्सप्त समिधः कृताः। देवा यद् यज्ञं तन्वाना अबध्नन् पुरुषं पशूम्।। 13।।

卐9.5.14 मूर्ध्नो देवस्य वृहतोऽशवः सप्तसप्ततीः। राज्ञस्सोमस्या जायन्त जातस्य पुरुषादधि।। 14।।

卐9.5.15 चन्द्रमा मनसो जातश्चक्षुस्सूर्यो अजायत। श्रोत्राद् वायुश्च प्राणश्च मुखादग्निरजायत।। 15।।
卐9.5.16 नाभ्यामासीदन्तरिक्षं शीर्ष्णो द्यौस्समवर्तत। पद्भ्यां भूमिर्दिशश्श्रोत्राङ् तथा लोकाँ अकल्पयन्।। 16। (इति द्वादशर्चो नाम नवमकाण्डे प्रथमोऽनुवाकः) 9 - 6
卐9.6.1 इमां खनाम्योषधिमदृष्टहननीमहम्। अश्वस्यावो ददाति त्वा वैरूपो वाजिनीवति।। 1।।
卐9.6.2 नादृष्टा वो जिह्वाः सन्ति न दन्ता हन्वोरधि। नापि मध्यं नो शिरस्ते यूयं किं करिष्यथ।। 2।।
卐9.6.3 इन्द्रामित्रा इन्द्रहता न व इहास्ति न्यञ्चनम्। इन्द्रो वस्सर्वासां साकं शक्रस्तृणेढु वृत्रहा।। 3।।
卐9.6.4 अश्वतराँ अयश्शफान् यानिन्द्रो अधि तिष्ठति। तैर्वोपि नह्येय ते मुखान्युदर सर्पिणः।। 4।।
卐9.6.5 अपि नह्यमदृष्टानां मुखं पादा दृतेरिव। उतैषां जिह्वा निष्कर्ता निर्दन्ता हन्वोरधि।। 5।।
卐9.6.6 अवधिषमसृगादां नि क्रोडादा अलिप्सत। अभैत्सं सर्वेषामाण्डानि ये अदृष्टाः पृथिवीक्षितः।। 6।।
卐9.6.7 रिश्यासः पौरुषासो दर्भासो वैरिणा उत। मौञ्जा अदृष्टास्सैर्यास्सर्वेसाकं नि जस्यत।। 7।।
卐9.6.8 अदृष्टानां सप्त जाता पृथिवी न शीशे मही। तानिन्द्रो बाहुभ्यां सर्वाञ्छक्रो अपावयत्।। 8।।
卐9.6.9 ये वस्सन्ति सप्त जाता अदृष्टाः पुरुषादिनः। ग्राव्णांशूनिव सोमस्य तान् सर्वान् प्र मृणीमसि।। 9। ।
卐9.6.10 य आत्मजा ये वस्तिजा य ऋषा य उ तोदिनः। तेभ्यः खनाम्योषधिं येभ्यो बिम्बीवधः कृतः।। 10।।
卐9.6.11 अदृष्टेभ्यस्तरुणेभ्यो युवभ्यस् स्थविरेभ्यः। आहार्षमुग्रामोषधिं येभ्यो बिम्बीवधः कृतः।। 11।।
卐9.6.12 ये च दृष्टा ये चादृष्टास्तितीलाश्शलुनाश्च ये। तानग्ने सर्वान् सन्दह क्रिमीननेजतो जहि।। 12।। 9 - 7
卐9.7.1 शीतिजला इति शीता वाता उपा वान्तु। हिमेनाग्निरावृतो हिमेनाग्निः परिवृतः।। 1।।
卐9.7.2 यत्त्वा देवा अपारुन्धन्ना समुद्रमधावयः। हिमो जघान गोऽजं हिमो अक्षं हिमच्छदिः।। 2।।
卐9.7.3 हिमादधि प्र यामसि हिमे अद्यो वि मोचनम्। यमवटं शतदरमवैन्ध सप्तवध्रये।। 3।।

卐9.7.4 अवका तत्र रोहतु खदे परि विलं तव। अर्चिष्टे अग्ने प्रथममङ्गाराँ अपराँ उत।। 4।।
卐9.7.5 गृभ्णामि ब्रह्मणा नाम धामधाम परुष्परुः। शीतिका नाम ते माता जलाषो नाम ते पिता।। 5।।
卐9.7.6 इह त्वमन्तरा भव बाहीकमस्तु यद्रपः। हिमे जातोदके वृद्धा सिन्धुतस्पर्याभृता। तया ते अग्रभं नामाश्वमिवाश्वाभि धान्या।। 6।।
卐9.7.7 आमा नामास्योषधे तस्यास्ते नाम जग्रभ। अगस्त्यस्य पुत्रासो मा वि धाक् पुरुषान् मम।। 7।।
卐9.7.8 मा नो अग्ने तन्वं मा वासांसि रीरिषः। यं त्वा समुद्रज वयमारोहाम स्वस्तये।। 8।।
卐9.7.9 दिवस्तारा अवापद्रन् धारात् समुद्रिया अपः। हिरण्यकुम्भो हरितोऽवकाभिः परिवृतस्तेनाग्निं शमयामसि।। 9।।
卐9.7.10 शमयाम्यर्चिरग्नेः शिवस्तपतु मा वि धाक्। गृभीते द्यावापृथिवी गृभीतं पार्थिवं रजः।। 10।।
卐9.7.11 नि मुञ्जेषु यदुदकं नि नडेषु यदन्तरम्। यत् समुद्रे यत् सिन्धौ तेनाग्निं शमयामसि।। 11।।
卐9.7.12 वेतसस्यावकाया नडस्य वीरणस्य च। रोहितकस्य वृक्षस्याग्निं शमनमुद्धरे।। 12।।
卐9.7.13 आयतीरुदहार्यो वि ते हरन्तु यद्रपः। परायतीः परावतः परा हरन्तु यद्रपः।। 13।।
卐9.7.14 हिमस्य त्वा जरायुणाग्ने परि व्ययामसि। शीतिके शीतमित् करो हिमिके हिममित् करः।। 14।। 9 - 8
卐9.8.1 अक्षण्वता लाङ्गलेन पद्वता पतयिष्णुना। लाङ्गुलगृह्य चर्कृषुर्वृकेण यवमश्विना।। 1।।
卐9.8.2 देवा एतं मधुना संयुतं यवं सरस्वत्यामधि वणावचर्कृषुः। इन्द्र आसीत् सीरपतिश्शतक्रतुः कीनाशा आसन् मरुतस्सुदानवः।। 2।।
卐9.8.3 हिरण्ययं कलशं सुदानवो दिव्यया सरघयाकृतम्। अव भृतमश्विना यवं तद् यवं मधु चक्रथुः।। 3।।
卐9.8.4 क्रिशावेतदजयतमश्विना सारघं मधु। ततो यवो व्यरोहत् सोऽभवद् विषदूषणः।। 4।।
卐9.8.5 युवार्वान् सरघायाः प्रखिद्य मध्वाभरत्। ततो यवो व्यरोहत् सोऽभवद् विषदूषणः।। 5।।
卐9.8.6 यद् वृकं मधुपावानमवामयतमश्विना। ततो यवो व्यरोहत् सोऽभवद् विषदूषणः।। 6।।

卐9.8.7 कैरण्डा नाम सरसो वृकस्य वम्या अधि। ततो यवो व्यरोहत् सोऽभवद् विषदूषणः।। 7।।
卐9.8.8 यदस्य भरथो मधु सरघा सथ्वच्छिनत्। सद्यस्तदर्वतो युवं पुनरा दत्तमश्विना।। 8।।
卐9.8.9 यो यवं दिग्धविद्धो अहिदष्ट उपासरत्। तीर्थे रध्रमिवमज्जन्तं उत्तं भतमश्विना।। 9।।
卐9.8.10 यं वहन्त्यष्टा योगाः षड्योगा यं चतुर्गवाः। स ते विषं वि बाधतामुग्रो मध्यमशीरिव।। 10।। 9 - 9
卐9.9.1 यस्य यव प्रसर्पस्यङ्गमङ्गं परुष्परुः। तस्माद्यक्ष्मं वि बाधस्वोग्रो मध्यमशीरिव।। 1।।
卐9.9.2 शकलं च न ते यवान्या रुहन्त्योषधीः। यव इद् यावयाद्गोरश्वात् पुरुषाद् विषम्।। 2।।
卐9.9.3 यवो राजा यवो भिषक् यवस्य महिमा महान्। यवस्य मन्थं पपिवानिन्द्रश्चकार वीर्यम्।। 3।।
卐9.9.4 आ भरामृतं घृतस्य पुष्प मा भर। अनभ्रिखात ओषध इदं दूषय यद् विषम्।। 4।।
卐9.9.5 य आयन्ति दिग्धविद्धाः शूद्रा राजन्या उत। चक्षुर्मे सर्व आदृश्य ते यन्त्यगदाः पुनः।। 5।।
9 - 10
卐9.10.1 जीवातवे न मर्तवे शिरस्त आ रभामहे। रसं विषस्य नाविदमुद्रः फेनमदन्निव।। 1।।
卐9.10.2 भूम्या मध्याद् दिवो मध्याद् भूम्या अन्तादथो दिवः। मध्ये पृथिव्या यद्विषं तद्वाचा दूषयामसि।। 2।।
卐9.10.3 अश्वत्थे निहितं विषं कपाले निहितं विषम्। शिलाया जज्ञे तैमातः प्रथमो विषदूषणी।। 3।।
卐9.10.4 विषस्याहं वैन्दकस्य विषस्य दार्व्यस्य च। अथो विषस्य स्वैळस्य समानीं वाचमग्रभम्।। 4।।
卐9.10.5 तदिद् वदन्त्यर्थिन उत शूद्रा उतार्याः। विषाणां विष्वगर्थानां सर्वथैवारसं विषम्।। 5।।
卐9.10.6 परुषस्त्वामृतकर्णो विष प्रथममावयत्। यथा ह तं नारोपयस्तथास्य रसं विषम्।। 6।।
卐9.10.7 यद् वो देवा उपजीका उद्देहं शुषिरं ददुः। तत्रामृतस्यासिक्तं तच्चकाराररसं विषम्।। 7।।
卐9.10.8 शकुन्तिका मेऽब्रवीद् विषपुष्पं धयन्तिका। न रोपयति न मादयत्यरसं शार्वीयं विषम्।। 8।।
卐9.10.9 अत्यपप्ताम दुर्गाणि शारीश्शकुनयो यथा। इहेन्द्राणीं वरुणानीं सिनीवालिं क्रकोढ्याम्। ग्राहां शूरपुत्रां देवीं याचामो विषदूषणम्।। 9।।

卐9.10.10 आलकं व्यालकं व्यावं जाल्म जिगीमहे। जरद्विषं युवाभिषक् वयमित् सासहामहै।। 10।।

卐9.10.11 अस्थाद् द्यौरस्थाद् पृथिव्यस्थाद्विश्वमिदं जगत्। अस्थुर्विषस्यारोपयो ऽनड्वाहः क्रिशा इव।। 11।।

卐9.10.12 यावत् सूर्यो वि तपति यावच्चाभि वि पश्यति। तेनाहमिन्द्र दत्तेन कृणोम्यरसं विषम्। तद्विषमरसं विषमधोभागरसं विषम्।। 12।। 9 - 11

卐9.11.1 मातरिश्वा समभरद्धाता समदधात्परुः। इन्द्राग्नी अभ्यरक्षतां त्वष्टा नाभिमकल्पयत्।। 1।।

卐9.11.2 भवस्त्वा अध्यरुक्षद् रुद्रस्ते अंशुमाभरत्। रात्री त्वाभ्यगोपायत् सा त्वं भूतेअजायथाः।। 2।।

卐9.11.3 द्यौष्ट आयुर्गोपायदन्तरिक्षमसुं तव। माता भूतस्य भव्यस्य पृथिवी त्वाभि रक्षतु।। 3।।

卐9.11.4 यां त्वा देवास्समदधु स्सहस्त्रपुरुषं सतीम्। सा देवी त्वमस्येदमपाज व्यजा विषम्।। 4।।

卐9.11.5 याः पुरस्तात् प्रस्यन्दन्ते दिवा नक्तं च योषितः। आपः पुरु स्त्रवन्तीस्ता उ ते विषदूषणीः।। 5।।

卐9.11.6 आतपस्ते वर्षमासीदग्निश्छाया भवत्तपः। उल्बं ते अभ्रमासीत् सा त्वं भूते अजायथाः।। 6।।

卐9.11.7 गन्धर्वस्ते मूलमासीच्छाखा अप्सरसस्तव। मरीचीरासन् पर्णानि सिनीवाली कुलं तव।। 7।।

卐9.11.8 अजरा देवा अदधुरमृतं मर्त्येष्वा। तस्यैतदग्रमा ददे तदु ते विषदूषणम्।। 8।।

卐9.11.9 अनभ्रौ खनमानं विप्रं गम्भीरेऽपसम्। भिषक् चक्षुर्भिषक् खने तदु ते विषदूषणम्।। 9।।

卐9.11.10 याः पुरस्तादवितिष्ठन्ते गावः प्रव्राजिनीरिव। अमृस्येव वा अस्यथो हास्यरुन्धती।। 10।।

卐9.11.11 यो मयस्सरघायाः प्रखाय मध्वाभरत्। ततो यवः प्रजायत्सोऽभवत् विषदूषणः।। 11।।

卐9.11.12 यवस्यैतत् पलालिनो गोधूमस्य तिलस्य च। व्रीहेर्यवस्य दैव्येन कृणोम्यरसं विषम्।। 12।।

卐9.11.13 महीं योनीं समुद्रस्यान्वविन्दन् ऋताय वः। तां देवा गृह्यामासीनां समुद्राच्चिदुदाभरन्।। 13।।

卐9.11.14 समुद्राच्चिदुदाभृत्य तामु पुष्कर आदधुः। अस्याः पृथिव्या देव्याश्चक्षुराकाश्यमसि विषदूषणम्।। 14। (त्रयोदशर्च नाम नवमकाण्डे द्वितीयोऽनुवाकः) 9 - 12

卐9.12.1 समानमर्थं पर्यन्ति देवा रूपं रूपं तपसा वर्धमानाः। यदादित्यमभि सं विशन्ति तदेकं रूपममृतत्वमेषाम्।। 1।।

卐9.12.2 देवो देवेभिरागमन् महान्नो अतिथिष्पिता। स प्रैति जातवेदसमेकरूपो गुहा भवन्।। 2।।

卐9.12.3 आतिथ्यमग्निं निरपप्तदेव उभयेभिः पितृभिस्संविदानः। महान्नुमर्त्य उप भक्षं नागन् संगृभ्यादित्यान्यविष्ट वह्निः।। 3।।

卐9.12.4 त आ विशन्ति पुरुषं शयानं प्राणा निविष्टा न ससन्त्येनम्। ते नो रात्र्या सुमनस्यमाना अह्नारक्षन्त्यहृणीयमानाः।। 4।।

卐9.12.5 पशुभ्यो नः पशुपते मृड सर्व संवृह आयताम्। मा नः प्राणेषु रीरिषः।। 5।।

卐9.12.6 वायुस्सत्ये अधि श्रितः प्राणापानावभिक्षरन्। सं प्रजा ऐरयदिमाः।। 6।।

卐9.12.7 देवा यस्ताः प्रजापतावादित्याश्च येमिरे। पूषा रश्मिष्वायत आदित्यो विष्णुराक्रमे स रोहं दिवि रोहति।। 7।।

卐9.12.8 प्रजाद्देवास्सवितुस्सवे त्वष्टा रूपाणि पिंशतु। अञ्जन्तौ मधुना पयोऽतन्द्रं यातमश्विना।। 8।।

卐9.12.9 विश्वेदेवाः प्रयातनादित्यासः सजोषसः। पुरः पश्चात् स्वस्तये।। 9।।

卐9.12.10 ब्रह्म वर्म बृहस्पतिस्सं गवो नोऽभि रक्षतु। देवो देवैः पुरोहितः।। 10।।

卐9.12.11 मरुतो वृष्ट्या न आ गत सत्यधर्माण ऊतये। अपराह्णेषु जिन्वत।। 11।।

卐9.12.12 इन्द्रो राजा दिवस्पतिरहर्विमाय तिष्ठति। स न इमाः कल्पयाद्दिशः।। 12।। 9 - 13

卐9.13.1 आवतस्ते परावतः परावतस्त आवतः। इहैव भव मा नु गा मा पूर्वा ननु गा गतानसुं बध्नामि ते दृढम्।। 1।।

卐9.13.2 यत्त्वाभिचेरुः पुरुषः सो यदरुणो जनः। उन्मोचन प्रमोचने उभे वाचा वदामि ते।। 2।।

卐9.13.3 यद्दुद्रोहिथ शेपिषे स्त्रियै पुंसे अचित्त्या। उन्मोचन प्रमोचने उभे वाचा वदामि ते।। 3।।

卐9.13.4 यदेनसो मातृकृताच्छेषे पितृकृतादुत। उन्मोचन प्रमोचने उभे वाचा वदामि ते।। 4।।

卐9.13.5 यत्ते माता यत्ते पिता जामिर्भ्राता च सर्जतः। प्रत्यक् सेवस्य भेषजं जरदष्टिं कृणोमि त्वा।। 5।।

卐9.13.6 एह्येहि पुनरेहि सर्वेण मनसा सह। दूतौ यमस्य मा नु गा अधि जीव पुरा इहि।। 6।।

卐9.13.7 अनुहूतः पुनरेहि विद्वानुदयनं पथः। आरोहणमाक्रमणं जीवतो जीवतोऽयनम्।। 7।।

卐9.13.8 मा बिभेर्न मरिष्यसि जरदष्टिर्भविष्यसि। निरवोचमहं यक्ष्ममङ्गेभ्यो अङ्गज्वरं तव।। 8।।

卐9.13.9 शीर्षरोग अङ्गरोगो यश्च ते हृदयामयः। यक्ष्मः श्येन इव प्रापप्तद् वाचा नुत्तः परस्तरम्।। 9।

卐9.13.10 ऋषी बोध प्रतिबोधावस्वप्नो यश्च जागृविः। ते ते प्राणस्य गोप्तारो दिवा नक्तं च जाग्रतु।। 10।। 9 - 14

卐9.14.1 अयमग्निरुपसद्य इह सूर्य उदेतु ते। उदेहि मृत्योर्गम्भीरात् कृच्छ्राच्चित्तमसस्परि।। 1।।

卐9.14.2 नमो यमाय नमोऽस्तु मृत्यवे नमः पितृभ्य उत ये नयन्ते। उत्पारणस्य यो वेद तमग्निं तत् पुरो दधे।। 2।।

卐9.14.3 ऐतु प्राणो ऐतु मन ऐतु यक्षुरथो बलम्। शरीरमस्य सं विदां तत् पद्भ्यां प्रति तिष्ठतु।। 3।।

卐9.14.4 प्राणेनाग्ने चक्षुषा सं सृजेमं समीरय तन्वा सं बलेन। वेत्थामृतस्य मा मृत मो षु भूमिगृहो भुवत्।। 4।।

卐9.14.5 मा ते प्राण उप दसन् मा पानो अपि धायि ते। सूर्यस्त्वाधिपतिर्मृत्योरुदायच्छाति रश्मिभिः।। 5।।

卐9.14.6 इयमन्तर्वदत्युग्रा जिह्वापनिष्पदा। तया रोगान् वि नयामश्शतं रोपीश्च तक्मनः।। 6।।

卐9.14.7 अयं लोकः प्रियतमो देवानामपराजितः। यस्मै त्वमिह जज्ञिषे दिष्टः पुरुष मृत्यवे। तस्मै त्वानु ह्वयामसि मा पुरा जरसो मृथाः।। 7।। 9 - 15

卐9.15.1 तेऽवदन् प्रथमा ब्रह्मकिल्बिषेऽकुपारः सलिलो मातरिश्वा। वीडुहरस्तप उग्रं मयो भुव आपो देवीः प्रथमजा ऋतस्य।। 1।।

卐9.15.2 सोमो राजा प्रथमो ब्रह्मजायां पुनः प्रायच्छदहृणीयमानः। अन्वर्तिता वरुणो मित्र आसीदग्निर्होता हस्तगृह्या निनाय।। 2।।

卐9.15.3 हस्तेनेव ग्राह्य आधिरस्या ब्रह्मजायेति चेदवोचत्। न दूताय प्रह्ये तस्थ एषा तथा राष्ट्रं गुपितं क्षत्रियस्य।। 3।।

卐9.15.4 यामाहुस्तारकां विकेशीं दुच्छुनां ग्राममवपद्यमानाम्। सा ब्रह्मजाया प्र दुनोति राष्ट्रं यत्र प्रापादि शशः कल्कुषीमान्।। 4।।

卐9.15.5 ब्रह्मचारी चरति वेविषद्विषः स देवानां भवत्येकमङ्गम्। तेन जायामन्वविन्दद् बृहस्पतिः सोमेन नीतां जुह्वं न देवाः।। 5।।

卐9.15.6 देवा एतस्यामवदन्त पूर्वे सप्तर्षयस्तपसे ये निषेदुः। भीमा जाया ब्राह्मणस्यापनीता दुर्धां दधाति परमे व्योमन्।। 6।।

卐9.15.7 ये गर्भा अवपद्यन्ते जगत् यच्चापलुप्यते। वीरा ये हन्यन्ते मिथो ब्रह्मजाया हिनस्ति तान्।। 7।।

卐9.15.8 सर्वे गर्भाः प्र व्यथन्ते कुमारा दशमास्याः। यस्मिन् राष्ट्रे निरुध्यते ब्रह्मजाया अचित्या।। 8।।

卐9.15.9 पुनर्वै देवा अददुः पुनर्मनुष्या उत। राजानः सत्यं कृण्वन्तो ब्रह्मजायां पुनर्ददुः।। 9।।

卐9.15.10 यो पुनर्दाय ब्रह्मजायां कृत्वी देवैर्नि किल्बिषम्। ऊर्जं पृथिव्या भक्त्वोरुगायमुपासते।। 10।। 9 - 16

卐9.16.1 न तत्र धेनुर्दुहे नानड्वान् सहते धुरम्। वि जानिर्यत्र ब्राह्मणो रात्रिं वसति पापया।। 1।।

卐9.16.2 न वर्षं मैत्रावरुणं ब्रह्मज्यमभि वर्षति। नास्मै समितिः कल्पते न मित्रं नयते वशम्।। 2।।

卐9.16.3 असृड्मती चरति ब्रह्मजाया आशा लिम्पन्ती प्रदिशश्चतस्रः। यः क्षत्रियः पुनरेनां ददाति स दिवो धारां धयति प्रपीनाम्।। 3।।

卐9.16.4 योऽपुनर्दाय ब्रह्मजायां राजा तल्पे निपद्यते। दुर्योणा अस्मा ओषधीर्याः काश्चाभि वि पश्यति।। 4।।

卐9.16.5 विषमस्नात्यपां विषमस्नाति वीरुधाम्। यो ब्रह्मजायां न पुनर्ददाति तस्मै देवास्सुदिहं दिग्धमस्याम्।। 5।।

卐9.16.6 उद्यत् पतयो दस स्त्रियाः पूर्वे अब्राह्मणाः। ब्रह्मा चेद्धस्तमग्रहीत् स एव पतिरेकथा।। 6।।



Sri Ganapathy Sachchidananda Avadhoota Datta Peetham

卐9.16.7 ब्राह्मण एव पतिर्न राजा नोत वैश्यः। तत् सूर्यः प्र ब्रूवन्नेति पञ्चभ्यो मानवेभ्यः।। 7।। 9 - 17

卐9.17.1 नैतां ते देवा अददुस्तुभ्यं नृपते अत्तवे। मा ब्राह्मणस्य राजन्य गां जिघत्सो अनाद्याम्।। 1।।

卐9.17.2 अक्षद्रुग्धो राजन्यः पाप आत्मपराजितः। स ब्राह्मणस्य गामद्यादद्य जीवानि मा श्वः।। 2।।

卐9.17.3 निर्वै क्षत्रं नयति हन्ति वर्चोऽग्निरिवारब्धः प्र दुनोति राष्ट्रम्। यो ब्राह्मणं देवबन्धुं हिनस्ति न स पितृणामप्येति लोकम्।। 3।।

卐9.17.4 देवपीयुश्चरति मर्त्येषु गरगीर्णो भवत्यस्थि भूयान्। यो ब्राह्मणं मन्यते अन्नमेव स विषस्य पिवति तैमातस्य।। 4।।

卐9.17.5 विषं स पिवति तैमातं पश्यन्नग्निं प्र सीदति। यो ब्राह्मणस्य सद्धनमभि नारद मन्यते।। 5।।

卐9.17.6 शतपाष्ठां नि गीरति तां न शक्नोति निस्खिदम्। अन्नं यो ब्रह्मणां मन्यः स्वाद्वद्मीति मन्यते।। 6।।

卐9.17.7 य एनां हन्ति मृदुमन्यमानो देवपीयुर्धनकामो न चित्तात्। सन्तस्येन्द्रो हृदये अग्निमिन्ध उभे एनं द्युष्टो नभसि चरन्तम्।। 7।।

卐9.17.8 न ब्राह्मणो हिंसीत वा अग्नेः प्रियतमा तनूः। सोमो ह्यस्य दायाद इन्द्रो अस्याभिशस्तिपाः।। 8।।

卐9.17.9 अग्निर्वै नः पदवायः सोमो दायाद उच्यते। जेता अभिशस्तेन्द्रस्तत् सत्यं देव संहितम्।। 9।।

卐9.17.10 आविष्टिताघविषा पृदाकूरिव चर्मणा। सा ब्राह्मणस्य राजन्य तृष्टैषा गौरनाद्या।। 10।। 9 - 18

卐9.18.1 इषुरिव दिग्धा नृपते पृदाकूरिव गोपते। सा ब्राह्मणस्येषुर्दिग्धा तया विध्यति पीयकः।। 1।।

卐9.18.2 तीक्ष्णेषवो ब्राह्मणा हेतिमन्तो यामस्यन्ति शरव्यां न सा मृषा। अनुहाय तपसा मन्युना चोत दूरादव भिन्दन्ति ते तया।। 2।।

卐9.18.3 जिह्वा ज्या भवति कुल्मलं वाङ् नाडिका दन्तास्तपसा सुदिग्धाः। तेभिर्ब्रह्मा विध्यति देवपीयून् हृद्बलैर्धनुर्भिर्देवजूतैः।। 3।।
卐9.18.4 ये ब्राह्मणं हिंसितारस्तपस्विनं मनीषिणं ब्रह्मचर्येण श्रान्तम्। अवर्तिमद् भविता राष्ट्रमेषां तमसीव निहितं नानुवेत्ताः।। 4।।
卐9.18.5 ये सहस्रमराजन् नासन् दशशता उत। ते ब्राह्मणस्य गां जग्धा वैतहव्याः पराभवन्।। 5।।
卐9.18.6 गौरेव तान् हन्यमाना वैतहव्याँ अवातिरत्। ये केशर प्राबन्धायाश्चरमाजामपेचिरन्।। 6।।
卐9.18.7 अतिमात्रा अजायन्त नोदिव दिवमस्पृशन्। भृगुं हिंसित्वा माहीना असम्भव्यं पराभवन्।। 7।।
卐9.18.8 ये बृहत् सामानमाङ्गिरसमार्पयन् ब्राह्मणं जनाः। येत्वस्तेषामुभयादन्नविस्तोकान्यावयत्।। 8।।
卐9.18.9 ये ब्राह्मणं प्रत्यष्ठीवन् ये चास्मिच्छुक्रमीषिरे। अस्नस्ते मध्ये कुल्यायाः केशान् खादन्त आसते।। 9।।
卐9.18.10 अष्टापदी चतुरक्षी चतुःश्रोत्रा चतुर्हनुः। द्विजिह्वा द्विप्राणा भूत्वा सा राष्ट्रमव धूनुते।। 10।।
9 - 19
卐9.19.1 ब्रह्मगवी पच्यमाना यावत् साभि विजङ्गहे। तेजो राष्ट्रस्यनिर्हन्ति न वीरो जायते पुमान्।। 1।।
卐9.19.2 आक्रमणेन वै देवा द्विषन्तो घ्नन्ति पूरुषम्। स्तेयादं ब्रह्मज्यं क्षेत्रे चानृतवादिनम्।। 2।।
卐9.19.3 विषमेतद् देवकृतं राजा वरुणो अब्रवीत्। न ब्राह्मणस्य गां जग्ध्वा राष्ट्रे जागार कश्चन।। 3।।
卐9.19.4 तद्वै राष्ट्र मा स्रवति भिन्नां नावमिवोदकम्। ब्राह्मणो यत्र जीयते तद्राष्ट्रं हन्ति दुच्छुना।। 4।।
卐9.19.5 एकशतं वै जनता भूमिर्या व्यधूनुत। प्रजां हिंसित्वा ब्राह्मणीमसम्भव्यं पराभवन्।। 5।।
卐9.19.6 यामुदाजनृषयो मनीषिणः श्रमसातां बृहतीं देवजूताम्। सा ब्रह्मज्यं पचति पच्यमाना राष्ट्रमस्य बृहती यच्चवर्चः।। 6।।
卐9.19.7 वाचा ब्राह्मणमृच्छति जामि हन्त्यचित्या। मित्राय सत्ये द्रुह्यति यं देवा घ्नन्ति पूरुषम्।। 7।। 9 - 20

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐9.20.1 एकपाच्छन्द एककामं च। तदाप्नोति चाव च रुन्धे प्रथमया रात्र्या प्रथमया समिधा।। 1।।
卐9.20.2 द्विपाच्छन्दो द्विपदश्च पशून्। तदाप्नोति चाव च रुन्धे द्वितीयया रात्र्या द्वितीयया समिधा।। 2।।
卐9.20.3 त्रीँल्लोकान् स्त्रींलोकपतीन्। तदाप्नोति चाव च रुन्धे तृतीयया रात्र्या तृतीयया समिधा।। 3।।
卐9.20.4 चतुष्पाच्छन्दश्चतुस्पदश्च पशून्। तदाप्नोति चाव च रुन्धे चतुर्थ्या रात्र्या चतुर्थ्या समिधा।। 4।।
卐9.20.5 पञ्चदिशः पञ्च प्रदिशः। तदाप्नोति चाव च रुन्धे पञ्चम्या रात्र्या पञ्चम्या समिधा।। 5।।
卐9.20.6 त्रैष्टुभं छन्दो विराजं स्वराजं सम्राजम्। तदाप्नोति चाव च रुन्धे षष्ठ्या रात्र्या षष्ठ्या समिधा।। 6।।
卐9.20.7 सप्त प्राणान् सप्तापानान् सप्त ऋषींश्च। तदाप्नोति चाव च रुन्धे सप्तम्या रात्र्या सप्तम्या समिधा।। 7।।
卐9.20.8 ओजश्च तेजश्च सहश्च बलं च। तदाप्नोति चाव च रुन्धे अष्टम्या रात्र्या अष्टम्या समिधा।। 8।।
卐9.20.9 अम्भश्च महश्चान्नं चान्नाद्यञ्च। तदाप्नोति चाव च रुन्धे नवम्या रात्र्या नवम्या समिधा।। 9।।
卐9.20.10 ब्रह्म च क्षत्रं चेन्द्रियं च ब्राह्मणवर्चसं च। तदाप्नोति चाव च रुन्धे दशम्या रात्र्या दशम्या समिधा।। 10।।
卐9.20.11 विश्वावसू च सर्ववसू च। तदाप्नोति चाव च रुन्धे एकादश्या रात्र्या एकादश्या समिधा।। 11।।
卐9.20.12 पाङ्क्तं छन्दः प्रजापतिं सम्बत्सरम्। तदाप्नोति चाव च रुन्धे द्वादश्या रात्र्या द्वादश्या समिधा।। 12। (इति द्वादशर्चो नाम नवमकाण्डे तृतीयोऽनुवाकः) 9 - 21
卐9.21.1
################################################################
################################################################
################################################################

################################################################
###

卐9.21.2

################################################################
################################################################
################################################################
################################################################
###

卐9.21.3

################################################################
################################################################
################################################################
################################################################
###

卐9.21.4

################################################################
################################################################
################################################################
################################################################
###

卐9.21.5

################################################################
################################################################
################################################################

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

####################################################################
###

卐9.21.6

####################################################################
####################################################################
####################################################################
####################################################################
###

卐9.21.7

####################################################################
####################################################################
####################################################################
####################################################################
###

卐9.21.8

####################################################################
####################################################################
####################################################################
####################################################################
###

卐9.21.9

####################################################################
####################################################################
####################################################################

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

#################################################################
###

卐9.21.10

#################################################################
#################################################################
#################################################################
#################################################################
###

卐9.21.11

#################################################################
#################################################################
#################################################################
#################################################################
###

卐9.21.12

#################################################################
#################################################################
#################################################################
#################################################################
### 9 - 22

卐9.22.1 इमां मात्रां निर्वप ओदनस्य तस्य पक्ता मुच्यतां किल्बिषेभ्यः। अभिद्रोहादेनसो दुष्कृताच्च पुनातु मा पवनैः पवित्रः।। 1।।

卐9.22.2 भद्रौ हस्तौ भद्रा जिह्वा भद्रं भवतु मे वचः। मह्यं पवित्रमोदनं ब्रह्मणा निर्वपामसि हस्ताभ्यां निर्वपामसि।। 2।।

卐9.22.3 यन्मयि गर्भे सति माता चकार दुष्कृतम्। अयं मा तस्मादोदनः पवित्रः पात्वं हसः।। 3।।

卐9.22.4 यदर्वाचीनमेकहायनादनृतं किं चोदिम। अयं मा तस्मादोदनः पवित्रः पात्वं हसः।। 4।।

卐9.22.5 यद्दुष्कृतं यच्छमलं यदेनश्चकृमा वयम्। अयं मा तस्मादोदनः पवित्रः पात्वं हसः।। 5।।

卐9.22.6 यन्मातरं यत्पितरं यद् वा जामि जिहिंसिम। अयं मा तस्मादोदनः पवित्रः पात्वं हसः।। 6।।

卐9.22.7 यन्मातृघ्ना यत् पितृघ्ना भ्रूणघ्ना यत् सहासिम। अयं मा तस्मादोदनः पवित्रः पात्वं हसः।। 7।।

卐9.22.8 श्यावदता कुनखिनास्तेनेन यत् सहासिम। अयं मा तस्मादोदनः पवित्रः पात्वं हसः।। 8।।

卐9.22.9 शिशुन्धानां पूंश्चलानां तक्ष्णां यदन्नमासिम। अयं मा तस्मादोदनः पवित्रः पात्वं हसः।। 9।।

卐9.22.10 यदपामपजह्मिम निमज्य पपिमोदकम्। अयं मा तस्मादोदनः पवित्रः पात्वं हसः।। 10।।

9 - 23

卐9.23.1 यत्कृद्धा मन्युतो वयं ब्राह्मणस्य निजग्मिम। पदा वा गामुपारिम। अयं मा तस्मादोदनः पवित्रः पात्वं हसः।। 1।।

卐9.23.2 यद् ब्रह्मचर्ये यत् स्नातचर्ये अनृतं किं चोदिम। अयं मा तस्मादोदनः पवित्रः पात्वं हसः।। 2।।

卐9.23.3 किलासेन दुश्चर्मणा वण्डेन यत् सहाशिमा धाराभिगतेन वा। अयं मा तस्मादोदनः पवित्रः पात्वं हसः।। 3।।

卐9.23.4 यत् क्षेत्रमभितिष्ठाथाश्वं वा यं निरेमिषे। अयं मा तस्मादोदनः पवित्रः पात्वं हसः।। 4।।

卐9.23.5 यदक्षेषु हिरण्ये गोष्वश्वेषु यद्धने अनृतं किं चोदिम। अयं मा तस्मादोदनः पवित्रः पात्वं हसः।। 5।।

卐9.23.6 सख्युर्जायां स्वां दासीं सूतीकां लोहितावतीमशुद्धां यदुपेयिम। अयं मा तस्मादोदनः पवित्रः पात्वं हसः।। 6।।

卐9.23.7 परिवित्तेन परिविविदानेनाभ्यवस्नातेन परिभक्षितेन दिधिषुपत्या यत् सहासिम। अयं मा तस्मादोदनः पवित्रः पात्वं हसः।। 7।।

卐9.23.8 यत् कुसीदं विभेजिम द्विमेयं धनकाम्या। अयं मा तस्मादोदनः पवित्रः पात्वं हसः।। 8।।

Sri Ganapati Sacchidananda Avadhoota Datta Peetham

卐9.23.9 यद् व्येकं यत्र्येकमुपैकमिति यद् ददौ। अयं मा तस्मादोदनः पवित्रः पात्वं हसः।। 9।।

卐9.23.10 यत्त्वरमाणाश्शबलमपक्कं मांसमाशिम। अयं मा तस्मादोदनः पवित्रः पात्वं हसः।। 10।। 9 - 24

卐9.24.1 यदन्नमाशिमा वयमनन्नमन्न काम्योदरस्याभिशाच्या। अयं मा तस्मादोदनः पवित्रः पात्वं हसः।। 1।।

卐9.24.2 यद्विद्वांसो यदविद्वांसो अनृतं कि चोदिम। अयं मा तस्मादोदनः पवित्रः पात्वं हसः।। 2।।

卐9.24.3 यद् देवस्य सवितः पवित्रं सहस्रधारं विततं हिरण्यम्। येनेन्द्रम पुननमार्तमर्त्यास्तेनायं मां सर्वपशुं पुनातु।। 3।।

卐9.24.4 येनापुनात्सविता रेवतीरपो येनापुनीत वरुणस्सवाय। येनेमा विश्वा भुवनानि पूतास्तेनायं मां सर्वपशुं पुनातु।। 4।।

卐9.24.5 अति क्रामामि दुरितं यदेनो जहामि रिप्रं परमे सधस्थे। येन यन्ति सुकृतो नापि दुष्कृतस्तमा रुहेम सुकृतामु लोकम्।। 5।।

卐9.24.6 मा यक्ष्ममिह हासिष्ट मा रिफन्तो वि गातन। अमैव पुण्यमस्तु नो अत्रीनन्वेतु किल्बिषम्।। 6।।

卐9.24.7 इमं पचाम्योदनं पवित्रं पवनाय कम्। स मा मुञ्चतु दुष्कृताद् विश्वस्माच्चैनसस्परि।। 7।। 9 - 25

卐9.25.1 सहस्राक्षं शतधारमृषिभिः पवनं कृतम्। तेना सहस्रधारेण पवमानः पुनातु मा।। 1।।

卐9.25.2 येन पूतमन्तरिक्षं यस्मिन् वायुरधिश्रितः। तेना सहस्रधारेण पवमानः पुनातु मा।। 2।।

卐9.25.3 येन पूते द्यावापृथिवी आपः पूता अथो स्वः। तेना सहस्रधारेण पवमानः पुनातु मा।। 3।।

卐9.25.4 येन पूते अहोरात्रे दिशः पूता उत येन प्रदेशाः। तेना सहस्रधारेण पवमानः पुनातु मा।। 4।।

卐9.25.5 येन पूतौ सूर्याचन्द्रमसौ नक्षत्राणि भूतकृतः सह येन पूताः। तेना सहस्रधारेण पवमानः पुनातु मा।। 5।।

卐9.25.6 येन पूताः वेदिरग्निः परिधयः सह येन पूताः। तेना सहस्रधारेण पवमानः पुनातु मा।। 6।।

卐9.25.7 येन पूतं बर्हिराज्यमथो हविः। तेना सहस्रधारेण पवमानः पुनातु मा।। 7।।

Srimanapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐9.25.8 येन पूतो यज्ञो वषङ्कार उताहुतिः। तेना सहस्रधारेण पवमानः पुनातु मा।। 8।।

卐9.25.9 येन पूतौ ब्रीहियवौ याभ्यां यज्ञो अधिनिर्मितः। तेना सहस्रधारेण पवमानः पुनातु मा।। 9।।

卐9.25.10 येन पूता अश्वागावो अथो पूता अजावयः। तेना सहस्रधारेण पवमान पुनातु मा।। 10।।

9 - 26

卐9.26.1 येन पूता ऋचस्सामानि यजुर्ब्रह्मणा सहयेन पूतम्। तेना सहस्रधारेण पवमानः पुनातु मा।। 1।।

卐9.26.2 येन पूता अथर्वाण आथर्वणा अङ्गिरसो देवताः सह येन पूताः। तेना सहस्रधारेण पवमानः पुनातु मा।। 2।।

卐9.26.3 येन पूता ऋतवो येनार्तवा येभ्यस्संवत्सरोऽधिनिर्मितः। तेना सहस्रधारेण पवमानः पुनातु मा।। 3।।

卐9.26.4 येन पूता वनस्पतयो वानस्पत्या ओषधयो वीरुधस्सह येन पूताः। तेना सहस्रधारेण पवमानः पुनातु मा।। 4।।

卐9.26.5 येन पूता गन्धर्वाप्सरसः सर्पपूण्यजनास्सह येन पूताः। तेना सहस्रधारेण पवमानः पुनातु मा।। 5।।

卐9.26.6 येन पूता नद्यः सिन्धवः समुद्रस्सह येन पूतः। तेना सहस्रधारेण पवमानः पुनातु मा।। 6।।

卐9.26.7 येन पूताः पर्वताः हिमवन्तो वैश्वानरः परिभूस्सह येन पूतः। तेना सहस्रधारेण पवमानः पुनातु मा।। 7।।

卐9.26.8 येन पूता विश्वे देवाः परमेष्ठी प्रजापतिः। तेना सहस्रधारेण पवमानः पुनातु मा।। 8।।

卐9.26.9 येन पूत स्तनयित्नुरपां वत्सः प्रजापतिः। तेना सहस्रधारेण पवमानः पुनातु मा।। 9।।

卐9.26.10 येन पूतः प्रजापतिर्लोकान् विश्वं भूतं स्वराजभार। तेना सहस्रधारेण पवमानः पुनातु मा।। 10।।

卐9.26.11 येन पूतमृतं सत्यं तपो दीक्षा च पूयते। तेना सहस्रधारेण पवमानः पुनातु मा।। 11।।

卐9.26.12 येन पूतमिदं सर्वं यद्भूतं यच्च भाव्यम्। तेना सहस्रधारेण पवमानः पुनातु मा।। 12।। 9 - 27

卐9.27.1 उच्चैर्घोषो दुन्दुभिस्सत्वनायं वानस्पत्यः संभृत उस्रियाभिः। वाचं क्षणुवानो दमयन् सपत्नान् सिंह इव ज्येष्यन्नभि तंस्तनीभिः।। 1।।

卐9.27.2 सिंह इवास्तानीद् द्रुवयो विबद्धोऽभि क्रन्दन्नृषभो वाशितामिव। वृषा त्वं वध्रयस्ते सपत्ना ऐन्द्रस्ते शुष्मो अभिमातिषाहः।। 2।।

卐9.27.3 सञ्जयन् पृतना ऊर्ध्वमायुर्गृह्या गृह्णानो बहुधा विचक्ष्व। दैवीं वाचमाहुरगुरस्व मेधाश्शत्रूणामुप भरस्व वेदः।। 3।।

卐9.27.4 वृषेव यूथं सह संविदानो गव्यन्नभि रुव सन्धनाजित्। शुचा विध्य हृदयं परेषां हित्वा ग्रामान् प्रच्युता यन्तु शत्रवः।। 4।।

卐9.27.5 दुन्दुभेर्वाचं प्रयतां वदन्ती मा शृण्वती नाथिता घोष बुद्धा। नारी पुत्रान् धावतु हस्तगृह्या मित्री भीता समरे वधाना।। 5।।

卐9.27.6 धीभिः कृत प्र भरस्व वाचमुद्धर्षय सत्वनामायुधानि। अमित्रसेनामभिजञ्जभानो द्युमद् वद दुन्दुभे सूनृतावत्।। 6।।

卐9.27.7 पूर्वो दुन्दुभे वि षहस्व शत्रून् भूम्याः पृष्ठे वद बहु रोचमानः। इन्द्रमेदी सत्वनस्सं ह्वयस्व मित्रैरमित्रानव जङ्घनीहि।। 7।।

卐9.27.8 अन्तरेमे नभसि घोषो अस्तु पृथक् ते ध्वनयो यन्तु शीभम्। अभि क्रन्द स्तनयोत्पिपानां श्लोककृन् मित्रतूर्याय स्वर्धि।। 8।।

卐9.27.9 संक्रन्दनः प्रवेदः धृष्णुसेणः प्रवेदकृत् बहुधा ग्रामघोषी। श्रेयो वन्वानो वयुनानि विद्वान् कीर्तिं बहुभ्यो वि भज द्विराजे।। 9।।

卐9.27.10 श्रेयः केतो वसुजित् सहीयान् मित्रं दधानस्त्विषितो विपश्चित्। अंशूनिव ग्रावाधिषवणे अद्रिर्गव्यं दुन्दुभे अधि नृत्य वेदः।। 10।।

卐9.27.11 शत्रूषाण् नीषाडभिमातिषाहो गवेषणस्सहमान उद्भित्। वाग्वी मन्त्रं प्र जनयस्व वाजिन् सङ्ग्रामजित्यायेषमुद् वदेह।। 11।।

卐9.27.12 अच्युदच्युत् समदो गमिष्ठो मृधो जेता पृतनाषाडयोध्यः। इन्द्रेण क्लृप्तो विदथा निचिक्यद्धृद्द्योतनो द्विषतां याहि शीभम्।। 12।। 9 - 28

卐9.28.1 इमास्तपन्तु त्वौषधीरोषधीनामयं रसः। अश्वत्थस्तेऽयं हृद्यग्निर्भूतो व्योषतु प्र पतातो ममाध्या।। 1।।

卐9.28.2 यथा सूत्रं लाक्षारक्तमाज्येनानुषिच्यते। एवा ते कामः सर्पत्वन्तरस्थसु मज्जसु प्र पतातो ममाध्या।। 2।।

卐9.28.3 यथा कुष्ठः प्रयस्यसि यथा दह्यते अर्चिषा। एवाते दह्यतां मनः प्र पतातो ममाध्या।। 3।।

卐9.28.4 पुंसः कुष्ठात् प्र क्षरति स्तोक आधिभिराभृतः। स ते हृदये वि वर्ततां प्र पतातो ममाध्या।। 4।।

卐9.28.5 एष ते स्तोको हृदयं दिग्धेवेषुः प्र पद्यताम्। अस्त्राखणं यथेष्वा कामो विध्यतु त्वा मम प्र पतातो ममाध्या।। 5।।

卐9.28.6 हरित एधि शुष्काक्षस्सर्वदा हृदयामयि। स्त्रियस्ते अन्या माछाञ्छुरथो त्वाशाभि शोचतु प्र पतातो ममाध्या।। 6।।

卐9.28.7 शोचीमदस्तु ते शयनम् शोचीमदुपवेशनम्। शोचीमदस्तु ते मनो यथात्र न रमासा अर्वाची न मनास प्र पतातो ममाध्या।। 7।।

卐9.28.8 न रमासै सङ्गतेषु शयानं त्वाभि शोचतु। स्तोकस्त्वोत्तुद उत्तुदात् प्र पतातो ममाध्या।। 8।।

卐9.28.9 अन्तर्दहति चर्मणो अस्थिमांसेभिराभृतम्। सर्वान् यज्ञः प्र या शयादैड आधिभिस्तव प्र पतातो ममाध्या।। 9।।

卐9.28.10 हृदयेऽधि समिध्यतां स्वैर्मांसेभिरेष ते। अग्निः कामस्य यो महान् स मह्यं रन्धयन्ति त्वा प्र पतातो ममाध्या।। 10।। 9 - 29

卐9.29.1 अश्वत्थमग्निमाज्यं दूतान् कृण्वे मनोजवान्। अग्निश्चरुमिवार्चिषा कामो विध्यतु त्वा मम प्र पतातो ममाध्या।। 1।।

卐9.29.2 शयानमग्न आसीनमश्वत्थश्च सवासिनौ। चरन्तमुपतिष्ठन्तं ममाधिभिर्वि विध्यतं प्र पतातो ममाध्या।। 2।।

Sri Ganapati Sacchidananda Avadhoota Datta Peetham

卐9.29.3 चरन्तं त्वा तिष्ठन्तमासीनमपि संसदि। रेष्मा तृणमिव मथ्नातु दहन् कामरथो मम प्र पतातो ममाध्या।। 3।।

卐9.29.4 यथेन्द्राया सुरानरन्धयद् बृहस्पतिः। एवा त्वमग्ने अश्वत्थानमून् मह्यमिहानय प्र पतातो ममाध्या।। 4।।

卐9.29.5 अहं ते मन आ दद् ऐडेन सह मेदिना। देवा मनुष्या गन्धर्वास्ते मह्यं रन्धयन्तु त्वा प्र पतातो ममाध्या।। 5।।

卐9.29.6 यथा अश्वत्थस्य पर्णानि नेलयन्ति कदा च न। एवासौ मम कामेन माव स्वाप्सित् कदा च न प्र पतातो ममाध्या।। 6।।

卐9.29.7 कुष्ठं तपन्ति मरुतस्स्वाध्यन्दुर आजानं स्वरयन्तो अर्चिषा। यथा न स्वपात् कतमच्चनाह रैव गच्छान् ममाध्या।। 7। (इति द्वादशर्चो नाम नवमकाण्डे चतुर्थोऽनुवाकः) इत्यथर्ववेदे पैप्पलादसंहितायां द्वादशर्चो नाम नवमकाण्डः समाप्तः

## अथ दशमः काण्डः 10 - 1

卐10.1.1 हा अम्ब ते जने धेनो लम्बनस्तनि। न तद्विदो यदिच्छसि यदु वित्तं न तद् घसः।। 1।।

卐10.1.2 पुत्रो यस्ते पृश्निबाहुस्तमु त्वं सामनं कृधि। अथो दुहितरं नम्रीमथो त्वं सामना भव।। 2।।

卐10.1.3 असामे कुरमे नैगूरस्य स्वसः। अराते निर्ऋते अमते स्नुहिते।। 3।।

卐10.1.4 परेत कस्तुपकं वः पुनर्ददामि। यो वो न वेद तं हत तस्यातु परि शिश्यम्।। 4।।

卐10.1.5 तस्यात्तु पुत्रान् भ्रातृंश्च तस्य गोष्ठं वितावत। यश्च सतो नास्ति वाकी यश्चासावहविर्गृहः। दुर्णाम्नीस्तत्र गच्छत तत्र सर्वाः परेतन।। 5।।

卐10.1.6 परि धामान्यासामाशुर्गाष्ठामि वासरम्। अजैषं सर्वाना जिन्वो नश्यतेतस्सदान्वाः।। 6।।

卐10.1.7 अन्तश्चरां कोशेचरामथो गोष्ठावचारिणीम्। अथो याः स्वप्ने पश्यामस्ता इतो नाशयामसि।। 7।।

卐10.1.8 कण्वा या गर्दभीव निभसत् सूकरीव। तस्यै प्रति प्र वर्तय तप्तमश्मानमासनि।। 8।।

卐10.1.9 यो मर्या अभिगच्छात् स्त्रियं कस्तुपस्तोपिनीम्। कस्तूपमस्या आच्छिद्याथैनां चातयातै परमां चित् परावतम्।। 9।।

卐10.1.10 या भद्रा या शिवा योर्जा पयसा सह। अग्निष्टा अस्माकं गृहे गार्हपत्यो नि यच्छतु।। 10।।

卐10.1.11 इदं वो देवस्सवितेदं देवो बृहस्पतिः। इदं वो विश्वे देवा अवसानमयुक्षत।। 11।।

卐10.1.12 परि प्रागाद् देवो अग्नी रक्षोहामीव चातनः। सेधन् विश्वा अप द्विषो दहन् रक्षांसि विश्वहा।। 12।।

卐10.1.13 परीमे गामनेषत पर्यग्निमहृषत। देवेष्वक्रत श्रवः क इमां आ दधर्षति।। 13।। 10 - 2

卐10.2.1 त्वयीन्द्रियं त्वयि वर्चस्त्वं धर्मपतिर्भव। त्वमुत्तरो भ्रातृव्येभ्यस्तव लक्ष्मीः पयस्वती।। 1।।

卐10.2.2 तवैतामश्विना हवं तव राष्ट्रं दिवि श्रितम्। त्वमायुष्मान् सपत्नहोत्तरो द्विषतो भव।। 2।।

卐10.2.3 तीक्ष्णशृङ्ग ऋषभस्समुद्र इवाक्षितोदकः। त्वं सहस्रवीर्यस्तव बाहू गवांपती।। 3।।

卐10.2.4 भ्रातृव्यश्च सपत्नश्च यस्त्वामित्रो जिघांसति। श्रीयं त्वं सर्वेषां तेषामादायोग्रो वि धारय।। 4।।

卐10.2.5 त्वं वशी सत्याकूतस्सत्यधर्मा गवेषणः। नाष्ट्रास्त्वं सर्वास्तीर्त्वा भ्रातृव्याणां श्रियं वृह।। 5।।

卐10.2.6 तुभ्यं सं यन्तु वलयस्तुभ्यं शुल्कः प्र वीयताम्। तुभ्यं विराट् पयो दुहां त्वां वाञ्छन्तु विशो महीः।। 6।।

卐10.2.7 वाञ्छतु त्वा बृहद्राष्ट्रं त्विषिस्ते मुख आहिता। त्वं देवानां भव प्रियस्त्वयि गावो अधिश्रिताः।। 7।।

卐10.2.8 त्वयीन्द्रियं त्वयि वर्चस्त्वयि यज्ञो अधिश्रितः। तवायन्तु हवं देवास्त्वं प्रियो बृहस्पतेः।। 8।।

卐10.2.9 अग्नीषोमा पवमानो विराड् देवी पयस्वती। अतन्द्रं सर्वे रक्षन्तु राष्ट्रं तेनापवाद्यम्।। 9।।

卐10.2.10 अग्निरिव तृणं प्र दहौघः कूलमिवा रुज। श्रियं भ्रातृव्याणामा दत्स्वाण्डीकमिवाधि पुष्करात्।। 10।। 10 - 3

卐10.3.1 अश्व इव रथमा दत्स्व सिंह इव पुरुषं हर। हस्तीव नड्वलान् भङ्गि भ्रातृव्याणां श्रियं वृह।। 1।।

卐10.3.2 उत् ते कृणोतु कश्यपो ब्रह्मदेवैरभिष्टुतम्। आ प्रीतम विराधुकम्।। 2।।

卐10.3.3 एतं खदिरमा हराथो ते जनमा हर। उतैतं पर्णमा हरा हरानडुहो बलम्।। 3।।

卐10.3.4 इध्मां देवैः समाभृतां स्तांस्ते प्रादाद् बृहस्पतिः। ताना धेहि समाहितेऽग्नौ सूर्याभिचक्षणे।। 4।।

卐10.3.5 तेभिष्ट्वमुत्तरो भव भ्रातृव्याणां श्रियं वृह। अथो एषां पयो हर।। 5।।

卐10.3.6 आदित्या रुद्रा वसव ऋषयो भूतकृतश्च ये। श्रियं च क्षत्रमोजश्च तुभ्यं देवा असाविषुः।। 6।।

卐10.3.7 वसुरसीन्द्रनामायुष्माञ्छतशारदः। स इन्द्र इव देवेषु त्विषीमान् विश आ वद।। 7।। 10 - 4

卐10.4.1 इदं राष्ट्रं प्रथतां गोभिरश्वैरिदं राष्ट्रमन्नेनेरया रसेन। अस्मै षडुर्वीरूप सं नमन्तु सप्तहोत्रा हत शत्रून् सचित्ताः।। 1।।

卐10.4.2 इमे राजान इषुभिर्घ्नन्तु शत्रूनिमे राजानः समित्यान्यान् वधेयुः। इमे राजानः पृतनास्सहन्तामहं ब्रह्मा विमृधो हन्मि सर्वाः।। 2।।

卐10.4.3 इदं राष्ट्रं क्रतुमद्वीर वज्जिष्णूग्रमिदं राष्ट्रं गर्दनुमच्चित्रघोषम्। अस्मै राष्ट्राय बलिमन्ये हरन्त्वहं देवेभ्यो हविषा विधेयम्।। 3।।

卐10.4.4 यदि युद्धं यद्यृतितं वो अस्ति देवैनसाद् यदि वा पित्र्येण। येनर्त्तीया धेनवो अस्तु तस्मा अहं देवेभ्यो हविषा जुहोमि।। 4।।

卐10.4.5 यद्वः क्रूरं मनसो यच्च वाचो देवैनसाद् यदि वा पित्र्येण। आप इव दुःस्वप्न्यमप तत् स्वपध्वमथानन्दिनः सुमनसस्समेत।। 5।।

卐10.4.6 अपामिव वेगः प्र श्रृणीत शत्रून् दिशो दिशो रभमाणास्समेत। एकव्रता विधनं भजध्वं पुरोहितेन वो राष्ट्रं प्रथयन्तु देवाः।। 6।।

卐10.4.7 समयग् वो राष्ट्रं सह वो मनांसि समीचीनाः पशवो विश्वरूपाः। समीचीनानां वो अहमस्मि ब्रह्मा सम्यञ्चो देवा हवमा यन्तु म इमम्।। 7।।

卐10.4.8 यथापस्समुद्राय समीचीर्वहथ श्रियम्। एवा राष्ट्राय मे देवास्सम्यञ्चो वहथ श्रियम्।। 8।।

卐10.4.9 संसृष्टं वो राष्ट्रं पशुभिर्गोभिरश्वैः संसृष्टमन्नेनेरया रसेन। मया ब्रह्मणा प्रथमानाश्वो वशीयांसस्सदमुग्रा भवाथ।। 9।।

卐10.4.10 बहुर्युवा प्रमृणो धृष्णुरस्तु बहुः कुमारः प्रतिरूपः पितृणाम्। सत्यं वदन्तस्समितिं चरन्तो मित्रं गृह्णाना जरसो यन्तु सख्यम्।। 10।।

卐10.4.11 इह क्षत्रं द्युम्नमुत राष्ट्रं समैत्विहेन्द्रियं पशुभिस्सं विदानम्। अव धुन्वाना अप्रियान् यांश्च द्विष्म इदं राष्ट्रं प्रथतां सर्वदैव।। 11।।

卐10.4.12 इदं राष्ट्रमिषुमद्वीरवज्जिष्णूग्रमिदं राष्ट्रं पशुमद् ब्रह्मवृद्धम्। इदं राष्ट्रं हतशत्रु जिष्णु।। 12।।

卐10.4.13 सपत्नसाहं प्र मृणमिदं राष्ट्रं दृढमुग्रम्। साढामित्रमभिमातिषाहं सर्वा जिगाय पृतना अभिष्टि।। 13।। 10 - 5

卐10.5.1 औदुम्बरेण मणिना पुष्टिकामाय वेधसा। पशूनां सर्वेषां स्फातिं गोष्ठे मे सविता करत्।। 1।।

卐10.5.2 यो नोऽग्निर्गार्हपत्यः पशूनामधिपा असत्। औदुम्बरो वृषामणिः सं मा सृजतु पुष्ट्या।। 2।।

卐10.5.3 करीषिणीं फलवतीं स्वधामिरां च नो गृहे। औदुम्बरस्य तेजसा धाता पुष्टिं दधातु मे।। 3।।

卐10.5.4 यद् द्विपाच्च चतुष्पाच्च यान्यन्नानि ये रसाः। गृह्णेहं तेषां भूमानं बिभ्रदौदुम्बरं मणिम्।। 4।।

卐10.5.5 पुष्टिं पशूनां परि जग्रभाहं चतुष्पदां द्विपदां यच्च धान्यम्। पयः पशूनां रसमोषधीनां बृहस्पतिस्सविता मे नियच्छात्।। 5।।

卐10.5.6 अहं पशूनामधिपा असानि मयि पुष्टं पुष्टपतिर्दधातु। मह्य मौदुम्बरो मणिर्द्रविणानि नि यच्छतु।। 6।।

卐10.5.7 उपमौदुम्बरो मणिः प्रजया च धनेन च। इन्द्रेण जिन्वतो मणिरामागन् सह वर्चसा।। 7।।

卐10.5.8 देवो मणिस्सपत्नहा धनसा धनसातये। पशोरन्नस्य भूमानं गवां स्फातिं नि यच्छतु।। 8।।

卐10.5.9 यथाग्रे त्वं वनस्पते पुष्ट्या सह यज्ञिषे। एवा धनस्य मे स्फातिमा दधातु सरस्वती।। 9।।

卐10.5.10 आ मे धनं सरस्वती पयस्पातिं च धान्यम्। सिनीवाल्युतावहादयं चौदुम्बरो मणिः।। 10।।

卐10.5.11 त्वं मणिना मधिपा वृषासि त्वयि पुष्टं पुष्टपतिर्जजान। त्वयि मे वाजा द्रविणानि सर्बौदुम्बर स त्वमस्मत्। सहस्वारादरातिममतिं क्षुधं च।। 11।।

卐10.5.12 ग्रामणीरसि ग्रामनीथ्याया अभिषिक्तो अभि मा षिञ्च वर्चसा। तेजोऽसि तेजो मयि धारयाधि रयिरसि रयिं मयि धेहि।। 12।।

卐10.5.13 पुष्टिरसि पुष्ट्या मा समङ्ग्धि गृहमेधि गृहपतिं मा कृणु। औदुम्बर स त्वमस्मासु रयिं सर्ववीरं नि यच्छ। रायस्पोषाय प्रति मुञ्चे अहं त्वाम्।। 13।।

卐10.5.14 अयमौदुम्बरो मणिर्वीरो वीराय बध्यते। स नस्सनीं मधुमतीं कृणोतु रयिं च नस्सर्ववीरं नि यच्छात्।। 14। (इति त्रयोदशर्चौ नाम दशमकाण्डे प्रथमोऽनुवाकः) 10 - 6

卐10.6.1 भगस्य राज्ञस्सुमतिं गमेम यं हवन्ते बहुधा मानुषासः। कर्मं कृण्वानो भगमा वृणीते स नो जनेषु सुभगां कृणोतु।। 1।।

卐10.6.2 भगं पुरस्तात्प्रति बुध्यमानाः पश्येम देवीमुषसं विभातीम्। प्रतीची शुभ्रा द्रविणेन साकं भगं वहन्त्यदितिर्न ऐतु।। 2।।

卐10.6.3 भगो नो अद्य स्विते दधातु देवानां पन्थामभि नो नयेह। अर्वाची भद्रा सुमतिर्न ऐत्वधा भगेन समिधो नो अस्तु।। 3।।

卐10.6.4 भगेन वाचमिषितां वदानि सरस्वतीं मधुमतीं सुवर्चाः। भगेन दत्तमुप मेदमागन् यथा वर्चस्वान् समितिमा वदानि।। 4।।

卐10.6.5 भगो मा गोष्ववतु भगो मावतु धान्ये। अक्षेषु स्त्रीषु मा भगो भगो मावतु वर्चसा।। 5।।

卐10.6.6 भगो मा सायमवतु भगो मावतु रात्र्या। भगो निपद्यमानेषु प्रातर्मा भग आगमत्।। 6।।

卐10.6.7 भगो मा प्रातरवतु भगो माध्यन्दिनं परि। अपराह्णे वयं भगं वास इव परिदध्महे।। 7।।

卐10.6.8 भगं देवेभ्यस्परि भगं मनुष्येभ्यः। दिवस्पृथिव्या अहमन्तरिक्षात् भगं वृणे। सो अग्ने रमता मयि स मा प्रावतु वर्चसा।। 8।।

卐10.6.9 भगं वृणाना वध्वं वहन्ति वनिं प्रयन्तो भगमिद्धवन्ते। भगेन दत्तमुपमेदमागन् विश्वं सुभूतं द्रविणानि भद्रा।। 9।।

卐10.6.10 भगेन देवा समगन्महि य इमा विश्वा भुवनाभिवस्ते। प्रयच्छन्नेति बहुधा वसूनि स नो दधातु यतमद्वसिष्ठम्।। 10।।

卐10.6.11 वातो भगो वरुणो वायुरग्निः क्षेत्रस्य पत्नी सुहवा नो अस्तु। हिरण्याक्षो अतिपश्यो नृचक्षाः सर्वैस्साकं सचमानो न एहि।। 11।।

卐10.6.12 उदेहि देव सूर्य सह सौभाग्येन। सहर्षभस्य वाजेन सहावतं करणेन।। 12।।

卐10.6.13 हिरण्ययेन चक्रेण भगस्यापिहितो गृहः। तं व्युञ्जामि ब्रह्मणा तस्य मे दत्तमश्विना दत्तं मे पुष्करस्रजा।। 13।। 10 - 7

卐10.7.1 गोभिष्ट्वा पात्वृषभो वृषा त्वा पातु वाजिभिः। वायुष्ट्वा ब्रह्मणा पात्विन्द्रस्त्वा पात्विन्द्रैः।। 1।।

卐10.7.2 सोमस्त्वा पात्वौषधीभिर्नक्षत्रैः पातु सूर्यः। माद्भिष्ट्वा चन्द्रो वृत्रहा वातः प्राणेन रक्षतु।। 2।।

卐10.7.3 तिस्रो दिवस्तिस्रः पृथिवी स्त्रीण्यन्तरिक्षाणि चतुरस्समुद्रान्। त्रिवृतं स्तोमं त्रिवृत आप आहुस्तास्त्वा रक्षन्तु त्रिवृता त्रिवृद्भिः।। 3।।

卐10.7.4 त्रीन्नाकांस्त्रीन् समुद्रांस्त्रीन् ब्रध्नांस्त्रीन् वैष्टपान्। त्रीन्मातरिश्वानस्त्रीन् सूर्यान् गोप्तॄन् कल्पयामि ते।। 4।।

卐10.7.5 घृतेन त्वा समुक्षाम्यग्न आज्येन वर्धयन्। अग्नेश्चन्द्रस्य सूर्यस्य मा प्राणं मायिनो दभन्।। 5।।

卐10.7.6 मा वः प्राणं मा वोऽपानं मा हरो मायिनो दभन्। भ्राजन्तो विश्ववेदसो देवा दैव्येन मावत।। 6।।

卐10.7.7 प्राणेनाग्निं सं दधति वातः प्राणेन संहितः। प्राणेन विश्वतो मुखं सूर्यं देवा अजनयन्।। 7।।

卐10.7.8 आयुषायुष्कृतां जीवायुष्मां जीव मा मृथाः। प्राणेनात्मन्वतां जीव मा मृत्योरूप गा वशम्।। 8।।

卐10.7.9 देवानां निहितं निधिं यमिन्द्रान्वविन्दन् पथिभिर्देवयानैः। आपो हिरण्यं जुगुपुस्त्रिवृद्भिस्तास्त्वा रक्षन्तु त्रिवृता त्रिवृद्भिः।। 9।।

卐10.7.10 त्रयस्त्रिंशद् देवतास्त्रीणि च वीर्याणि प्रियायमाणा जुगुपुरप्स्वन्तः। अस्मिँश्चन्द्रे अधि यद्धिरण्यं तेनायं कृणवद्वीर्याणि।। 10।। 10 - 8

卐10.8.1 ये देवा दिव्येकादशस्थ ते देवासो हविरिदं जुषध्वम्।। 1।।

卐10.8.2 ये देवा अन्तरिक्ष एकादशस्थ ते देवासो हविरिदं जुषध्वम्।। 2।।

卐10.8.3 ये देवाः पृथिव्यामेकादशस्थ ते देवासो हविरिदं जुषध्वम्।। 3।।

卐10.8.4 असपत्नं पुरस्तात् पश्चान्नोऽभयं कृम्। सविता मा दक्षिणत उत्तरान्मा शचीपतिः।। 4।।

卐10.8.5 दिवो मादित्या रक्षन्तु भूम्या रक्षन्त्वग्नयः। इन्द्राग्नी रक्षतां मा पुरस्तादश्विनावभितश्शर्म यच्छताम्। तिरश्चीनघ्न्या रक्षतु जातवेदा भूतकृतो मे सर्वतस्सन्तु वर्म।। 5।। 10 - 9

卐10.9.1 येऽप्स्वन्तरग्नयः प्रविष्टा ग्रोक मनोहा खनो निर्दाह आत्मदूषिस्तनदूषिः। इदं तानति सृजामि निरेनो निरनृतं सृजामि।। 1।।

卐10.9.2 अभूत्यासत्वाय निर्दुःस्वप्न्यं सृजामि। वसिष्ठारुन्धती मा पातां प्रजापतेः प्रस्तरो बृहस्पतेः केशाः।। 2।।

卐10.9.3 अदब्धं चक्षु सुश्रुतौ कर्णावक्षितौ मे प्राणापानौ। हृदयाजरसं मा मा हासीर्मध्य मा रिषम्।। 3।।

卐10.9.4 आपो मा शुन्धन्तु दुष्कृताद् दुरिता यानि चकृम। अयाम शुद्धा उदितस्तनूभिः।। 4।।

卐10.9.5 वैश्वानरो रश्मिभिर्नः पुनातु वातः प्राणेनेषिरो नमोभिः। द्यावापृथिवी पयसा पयस्वती ऋतावरी यज्ञिये मा पुनीताम्।। 5।।

卐10.9.6 पुनन्तुमाग्नयो गार्हपत्याः पुनन्तु मा धृष्णिया देवहूताः। पुनन्तु मा शक्वरीः सोमपृष्ठाः पवमानासो अत्रिणः।। 6।।

卐10.9.7 यः पोता स पुनातु मा बृहद्भिर्देवस् सवितः। वर्षिष्ठैर्द्यामिवोपरि।। 7।।

卐10.9.8 ब्रह्म सवैः पुनातु मा राजसवैः पुनातु मा। शतं पवित्रा वितता तिरश्चा तेभिर्मा देवस्सविता पुनातु।। 8।।

卐10.9.9 शतं च मा पवितारः पुनन्तु सहस्रं च प्रस्रवणेष्वापः। आप इव पूतोऽस्यग्निरिव सुवर्चास्सूर्य इव सुचक्षाः।। 9।।

卐10.9.10 उरूणसावसुतृपा उदुम्बलौ यमस्य दूतौ चरतो जनाँ अनु। तावस्मभ्यं दृशये सूर्याय पुनर्दातामसुमद्येह भद्रम्।। 10।। 10 - 10

卐10.10.1 अगन्म देवास्स्वः स्वरगन्मागन्म ज्योतिर्ज्योतिरगन्म। महेन्द्रोसि परमेष्ठी सुमित्र विश्वतो मुख मा ते यूयोम सन्दृशः।। 1।।

卐10.10.2 उद्यन्नद्य चित्रमहः सपत्नान् मेव जहि। दिवैनान् रश्मिभिर्जहि रात्रैनांस्तमसा वधीस्ते यन्त्वधमं तमः।। 2।।

卐10.10.3 सूर्यस्यावृतमन्वावर्ते दक्षिणामन्वावृतम्। अग्नेस्तेजसा तेजस्वी भूयासमिन्द्रस्येन्द्रियेणेन्द्रियावान् भूयासम्।। 3।।

卐10.10.4 इदमहमग्ने स्तेजसेन्द्रेस्येन्द्रियेण सोमस्य द्युम्नेन विश्वेषां देवानां क्रतूनाम्। अमुष्यामुष्यायणस्यामुष्याः पुत्रस्य वर्चस्तेज इन्द्रियं प्राणमायुर्नि वेष्टयामि।। 4।।

卐10.10.5 आयुर्नि यच्छेत्।। 5।।

卐10.10.6 इदमहमग्नेस्तेजसेन्द्रस्येन्द्रियेण सोमस्य द्युम्नेन विश्वेषां देवानां क्रतूनाम्। अमुष्यामुष्यायणस्यामुष्याः पुत्रस्य वर्चस्तेज इन्द्रियं प्राणमायुरादाय।। 6।।

卐10.10.7 अभूत्या एनं पाशे सित्वा दुःस्वप्न्येन संसृज्य मृत्योर्व्यात्त आसन्नपि दधामि।। 7।। 10 - 11

卐10.11.1 यो नस्स्वो यो अरणो भ्रातृव्यश्च जिघांसति। इन्द्रश्च तस्याग्निश्च मर्म स्कन्धेषु विन्दताम्।। 1।।

卐10.11.2 यो मा शयानं जाग्रतं यश्च सुप्तं जिघांसति। इन्द्रश्च तस्याग्निश्च बाहू मर्मणि वृश्चताम्।। 2।।

卐10.11.3 यो मा चरन्तं तिष्ठन्तमासीनं च जिघांसति। इन्द्रश्च तस्मिन्नग्निश्च दुरितं प्रति मुञ्चताम्।। 3।।

卐10.11.4 यो मा चक्षुषा मनसा यश्च वाचा जिघांसति। इन्द्रश्च तस्मा अग्निश्चैनांसि वहतामितः।। 4।।

卐10.11.5 यः पिशाचो यातुधानः क्रव्याद् यो मा जिघांसति। इन्द्रश्च तस्याग्निश्च मूर्धानं प्रति विध्यताम्।। 5।।

卐10.11.6 यो मा ब्रह्मणा तपसा यश्च यज्ञैर्जिघांसति। इन्द्रश्च तस्याग्निश्च हृदयेऽधि नि विध्यताम्।। 6।।

卐10.11.7 यो मे ब्रह्म यो मे तपो बलं श्रेष्ठं जिघांसति। इन्द्रश्च तस्मा अग्निश्च क्रुद्धौ दिग्धाभिरस्यताम्।। 7।।

卐10.11.8 यो मेऽन्नं यो मे रसं वाचं श्रेष्ठां जिघांसति। इन्द्रश्च तस्मा अग्निश्चाच्छम्बद्कारमस्यताम्।। 8।।

卐10.11.9 यो मे तन्तुं यो मे प्रजां चक्षुः श्रोत्रं जिघांसति। इन्द्रश्च तस्मा अग्निश्च हेतिं देवेषु विन्दताम्।। 9।।

卐10.11.10 यो मे गोभ्य इरस्यत्यश्वेभ्यः पुरुषेभ्यः। इन्द्रश्च तस्मा अग्निश्च ज्यानिं देवेषु विन्दताम्।। 10।। 10 - 12

卐10.12.1 यो मे भूतिरनामयद् वित्तमायुर्जिघांसति। इन्द्रश्च तस्मा अग्निश्च दिवो अस्मानमस्यताम्।। 1।।

卐10.12.2 यो मे वेश्म यो मे सभां श्रियं श्रेष्ठां जिघांसति। इन्द्रश्च तस्याग्निश्च कृत्यां वि तनुतां गृहे।। 2।।

卐10.12.3 यो मे मृत्युमसमृद्धिमह्ना रात्र्या चेच्छति। इन्द्रश्च तस्याग्निश्चार्चिषा दहतां स्वम्।। 3।।

卐10.12.4 यो मे प्राणं यो मेऽपानं व्यानं श्रेष्ठं जिघांसति। इन्द्रश्च तस्याग्निश्च प्राणं प्राणहनौ हताम्।। 4।।

卐10.12.5 यो मा देवजनैस्सर्पैर्विद्युता ब्रह्मणाभ्यमात्। अगस्त्येन मेदिनेन्द्रश्चाग्निश्च तं हताम्।। 5।।

卐10.12.6 तं सत्यौजाः प्र दहत्यग्निर्वैश्वानरो वृषा। यो मा दुरस्यन्निक्षातै यश्च दिप्सति विह्वलः।। 6।।

卐10.12.7 यो मा दिप्सादिप्सन्तं यश्च दिप्सति दिप्स तम्। वैश्वानरस्य दंष्ट्रयोरग्नेरपि दधामि तम्।। 7।।

卐10.12.8 अभि तं द्यावापृथिवी सं तपतां तप्ते धर्मे न्युच्यताम्। निर्ऋत्या बध्यतां पाशे यो नः पापं चिकित्सति।। 8।।

卐10.12.9 प्रत्यग्वधेन प्रच्युतान् भ्रातृव्यान् घोरचक्षसः। इन्द्राग्नी एनान् वृश्चतां मैषामुच्छेषि कश्चन।। 9।।

卐10.12.10 प्रत्यग्वध प्रत्यग्जहि भ्रातृव्यान् द्विषतो मम। अपानान् प्राणां संछिद्य द्विषतस्पातयाधरान्।। 10

卐10.12.11 अग्ने ये मा जिघांसन्त्यग्ने ये च द्विषन्ति मा। अग्ने ये मोपतप्यन्ते तेषां प्रियतमं जहि।। 11।।

卐10.12.12 एतं द्विषन्तमवधिषमन्धेन तमसावृतम्। एतं मृत्योऽभिपद्यस्व मा ते मोचि महोदरः।। 12।। 10 - 13

卐10.13.1 द्यावापृथिवी सं नह्येथां मम राष्ट्राय जयन्ती अमित्रेभ्यो हेतिमस्यन्ती।। 1।।

卐10.13.2 वातापवमानौ सं नह्येथां मम राष्ट्राय जयन्तावमित्रेभ्यो हेति मस्यन्तौ।। 2।।

卐10.13.3 इन्द्राग्नी सं नह्येथां मम राष्ट्राय जयन्तावमित्रेभ्यो हेति मस्यन्तौ।। 3।।

卐10.13.4 मित्रावरुणा सं नह्येथां मम राष्ट्राय जयन्तावमित्रेभ्यो हेति मस्यन्तौ।। 4।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐10.13.5 भवाशर्वौ सं नह्येथां मम राष्ट्राय जयन्तावमित्रेभ्यो हेति मस्यन्तौ। 5।।

卐10.13.6 अश्विना सं नह्येथां मम राष्ट्राय जयन्तावमित्रेभ्यो हेति मस्यन्तौ।। 6।।

卐10.13.7 मरुतः सं नह्यध्वं मम राष्ट्राय जयन्तोऽमित्रेभ्यो हेति मस्यन्तः।। 7।।

卐10.13.8 पितरः सं नह्यध्वं मम राष्ट्राय जयन्तोऽमित्रेभ्यो हेति मस्यन्तः।। 8।।

卐10.13.9 सूर्याचन्द्रमसौ सं नह्येथां मम राष्ट्राय जयन्तावमित्रेभ्यो हेति मस्यन्तौ।। 9।।

卐10.13.10 अहोरात्रे सं नह्येथां मम राष्ट्राय जयन्ती अमित्रेभ्यो हेति मस्यन्ती।। 10।। 10 - 14

卐10.14.1 गन्धर्वाप्सरस स्सं नह्यध्वं मम राष्ट्राय जयन्तोऽमित्रेभ्यो हेति मस्यन्तः।। 1।।

卐10.14.2 सर्प पुण्यजनास्सं नह्यध्वं मम राष्ट्राय जयन्तोऽमित्रेभ्यो हेति मस्यन्तः।। 2।।

卐10.14.3 वनस्पतयस्सं नह्यध्वं मम राष्ट्राय जयन्तोऽमित्रेभ्यो हेति मस्यन्तः।। 3।।

卐10.14.4 वानस्पत्यास्सं नह्यध्वं मम राष्ट्राय जयन्तोऽमित्रेभ्यो हेति मस्यन्तः।। 4।।

卐10.14.5 ओषधयस्सं नह्यध्वं मम राष्ट्राय जयन्तोऽमित्रेभ्यो हेति मस्यन्तः।। 5।।

卐10.14.6 वीरुधस्सं नह्यध्वं मम राष्ट्राय जयन्त्योऽमित्रेभ्यो हेति मस्यन्त्यः।। 6।।

卐10.14.7 बृहस्पते सं नह्यस्व मम राष्ट्राय जयन्नमित्रेभ्यो हेति मस्यन्।। 7।।

卐10.14.8 प्रजापते संनह्यस्व मम राष्ट्राय जयन्नमित्रेभ्यो हेति मस्यन्।। 8।।

卐10.14.9 परमेष्ठिन् सं नह्यस्व मम राष्ट्राय जयन्नमित्रेभ्यो हेति मस्यन्।। 9।।

卐10.14.10 उदारा उदीर्ध्वं विश्वानि भूतानि सं नह्यध्वम्। मम राष्ट्राय जयन्त्यमित्रेभ्यो हेतिमस्यन्ती।। 10।। 10 - 15

卐10.15.1 अग्नी रक्षिता स इमां सेनां रक्षतु। अनुष्ठातरनु तिष्ठ सर्वे वीरा भवन्तु मे।। 1।।

卐10.15.2 इन्द्रो रक्षिता स इमां सेनां रक्षतु। अनुष्ठातरनु तिष्ठ सर्वे वीरा भवन्तु मे।। 2।।

卐10.15.3 सोमो रक्षिता स इमां सेनां रक्षतु। अनुष्ठातरनु तिष्ठ सर्वे वीरा भवन्तु मे।। 3।।

卐10.15.4 वरुणो रक्षिता स इमां सेनां रक्षतु। अनुष्ठातरनु तिष्ठ सर्वे वीरा भवन्तु मे।। 4।।

卐10.15.5 वायू रक्षिता स इमां सेनां रक्षतु। अनुष्ठातरनु तिष्ठ सर्वे वीरा भवन्तु मे।। 5।।

卐10.15.6 त्वष्टा रक्षिता स इमां सेनां रक्षतु। अनुष्ठातरनु तिष्ठ सर्वे वीरा भवन्तु मे।। 6।।

卐10.15.7 धाता रक्षिता स इमां सेनां रक्षतु। अनुष्ठातरनु तिष्ठ सर्वे वीरा भवन्तु मे।। 7।।

卐10.15.8 सविता रक्षिता स इमां सेनां रक्षतु। अनुष्ठातरनु तिष्ठ सर्वे वीरा भवन्तु मे।। 8।।

卐10.15.9 सूर्यो रक्षिता स इमां सेनां रक्षतु। अनुष्ठातरनु तिष्ठ सर्वे वीरा भवन्तु मे।। 9।।

卐10.15.10 चन्द्रमा रक्षिता स इमां सेनां रक्षतु। अनुष्ठातरनु तिष्ठ सर्वे वीरा भवन्तु मे।। 10।। 10 - 16

卐10.16.1 अहा रक्षितृ तदिमां सेनां रक्षतु। अनुष्ठातरनु तिष्ठ सर्वे वीरा भवन्तु मे।। 1।।

卐10.16.2 रात्री रक्षित्री सेमां सेनां रक्षतु। अनुष्ठातरनु तिष्ठ सर्वे वीरा भवन्तु मे।। 2।।

卐10.16.3 इन्द्राणी रक्षित्री सेनां रक्षतु। अनुष्ठातरनु तिष्ठ सर्वे वीरा भवन्तु मे।। 3।।

卐10.16.4 वरुणानी रक्षित्री सेनां रक्षतु। अनुष्ठातरनु तिष्ठ सर्वे वीरा भवन्तु मे।। 4।।

卐10.16.5 सिनीवाली रक्षित्री सेनां रक्षतु। अनुष्ठातरनु तिष्ठ सर्वे वीरा भवन्तु मे।। 5।।

卐10.16.6 समुद्रो रक्षिता स इमां सेनां रक्षतु। अनुष्ठातरनु तिष्ठ सर्वे वीरा भवन्तु मे।। 6।।

卐10.16.7 पर्जन्यो रक्षिता स इमां सेनां रक्षतु। अनुष्ठातरनु तिष्ठ सर्वे वीरा भवन्तु मे।। 7।।

卐10.16.8 बृहस्पती रक्षिता स इमां सेनां रक्षतु। अनुष्ठातरनु तिष्ठ सर्वे वीरा भवन्तु मे।। 8।।

卐10.16.9 प्रजापती रक्षिता स इमां सेनां रक्षतु। अनुष्ठातरनु तिष्ठ सर्वे वीरा भवन्तु मे।। 9।।

卐10.16.10 परमेष्ठी रक्षिता स इमां सेनां रक्षतु। अनुष्ठातरनु तिष्ठ सर्वे वीरा भवन्तु मे।। 10।।

卐10.16.11 विश्वे देवा रक्षिता स इमां सेनां रक्षतु। अनुष्ठातरनु तिष्ठ सर्वे वीरा भवन्तु मे।। 11। (इति त्रयोदशर्चो नाम दशमकाण्डे तृतीयोऽनुवाकः) इत्यथर्ववेदे पैप्पलादसंहितायां त्रयोदशर्चो नाम दशमः काण्डः समाप्तः।

Sri Ganapathy Sachchidananda Avadhoota Datta Peetham • Mysore •

## ॐ अथ एकादशः काण्डः 11 - 1

卐11.1.1 वृषा तेऽहं वृषण्यन्त्यै गर्भं दधामि योन्याम्। यदि देव परिष्ठिता प्रजां तोकं न विन्दसे।। 1।।

卐11.1.2 धाता ते तं सिनीवाली वरुणानी प्र यच्छतु। पुमांसं पुत्रमिन्द्राणी शतदायं दधातु ते।। 2।।

卐11.1.3 संवृतस्ते वक्षणासु गर्भः पुंसा पुमान् कृतः। सर्वाङ्गस्तन्वोर्जायतामग्निरिवारण्योरधि।। 3।।

卐11.1.4 धत्स्व वीरं कर्मण्यं प्रस्वं त्वावध्रिमवशां कृणोमि। आत्मनस्ते लोहिताद् गर्भस्सं वर्ततां वृषा।। 4।।

卐11.1.5 त्वष्टा पिंशतु ते प्रजां धाता तोकं दधातु ते। राका सीव्यतु सूच्या भूतस्येशाना भुवनस्य देवी।। 5।।

卐11.1.6 सिनीवालीमनुमतिं राकां गुङ्गुं सरस्वतीम्। देवानां पत्नीर्या देवीरिन्द्राणीमवसे हुवे।। 6।।
卐11.1.7 अभिन्नाण्डा वृद्धगर्भारिष्टा वीरसूरीयम्। वि जायतां प्र जायतां बह्वी भवतु पुत्रिणी।। 7।।
卐11.1.8 परि सृज गर्भं धेहि माशाः प्रच्योष्ट लोहितम्। अनूनः पूर्णो जायतामश्रामोरन्वो अपिशाचधीतः।। 8।।
卐11.1.9 त्वं दधासि द्विपदे चतुष्पदे गर्भं प्रजामेजते विश्वरूपाम्। कनिक्रदद् वृषभो वीडुशेपाः प्रजापतेः तन्वां धेहि गर्भम्।। 9।।
卐11.1.10 अभिक्रन्दं स्तनयन्धेहि गर्भं विद्योतमानः पवमानो वीरुद्भिः। पर्जन्येमां पृथिवी रेतसावतापां रसैरोषधीनां पशूनाम्।। 10।।
卐11.1.11 आ ते नयामि वृषणं यः प्रजानां प्रजापतिः। स ते दधात्वृत्वियं गर्भं योन्यां विजां प्रजाम्।। 11।।
卐11.1.12 ये वृषाणो गर्भकृत ऋत्वियानां समेनसः। तांस्ते ह्वयामि तदु ते समृध्यताम्।। 12।।
卐11.1.13 अग्नेष्टे त्वष्टुर्वरुणादिन्द्रात् सोमाद् बृहस्पतेः। पुत्रं ते पुत्रकामायै देवेभ्यो निर्ममे प्रजाम्।। 13।।
卐11.1.14 अङ्गादङ्गात् सं स्रवतु तद् योनौ प्रति तिष्ठतु। प्रजा ते वक्षणाशया तत्ते बीजं वि रोहतु।। 14।। 11 - 2
卐11.2.1 अत्ससो यमनंससो ऽभुतिर्यक्ष्ममजीजनत्। इमं सहस्र भागिन्द्रो विशरं नाशयाति ते।। 1।।
卐11.2.2 यः कार्यो यश्च कृतः स्वयंजा उत हार्यः। देवा इन्द्रो ज्येष्ठा विशरं नाशयन्तु ते।। 2।।
卐11.2.3 विशरस्य विजृम्भस्येषुर्माता धनुष्पिता। आदित्याः पुत्रा आदित्या विशरं नाशयन्तु ते।। 3।।
卐11.2.4 धन्वनो ज्याया इष्वा अपस्कम्भस्य बाह्वोः। अपाष्ठाच्छ्ङ्गात् कुर्मलाद्विशरं नाशयामि ते।। 4।।
卐11.2.5 अलवती रुरुशीर्ष्ण्यथो यस्यायो मुखम्। देव्यै पर्जन्य रेतस इषवे कृणुता नमः।। 5।।
卐11.2.6 यामत्रयोऽङ्गिरसो गोतमा वीरुधं विदुः। तया भरद्वाजो कण्वो विशरं नाशयाति ते।। 6।।

卐11.2.7 यस्त्वा स्त्रैणादपसरो यः पुंसो अध्यारुहत्। आक्लान्तं संक्लान्तं स्नाव तदुते कल्पयामसि।।
7।।

卐11.2.8 वात इवाभ्रं च्यावयामि यक्ष्मं ते तन्वस्परि। वाच यश्चकृते गुरु तद्दचा लघु कृण्मसि। तेनाह मृतोद्येन विशरं नासयामि ते।। 8।।

卐11.2.9 यथा न सत्यं पुरुषः सदा वदितुमर्हति। विस्कन्धं त्वदपसरं विशरं पृष्ठ्यामयम्। जम्भं हनुग्राभं शङ्खं तानजेना अजामसि।। 9।।

卐11.2.10 शुनमिद्व ओषधयो वि दधे भेषजाय कम्। धनायुवस्सनायुवः पुरुषं पारयिष्णवः।। 10।।

卐11.2.11 आत्मत्राणि देवजूता वीरुधायुष्या कृता। तयाहमिन्द्र दत्तया विशरं नाशयामि ते।। 11।।

卐11.2.12 अलसल्य व्यञ्जनस्य वेष्टनस्योत पर्णधेः। ग्रन्थेर्ज्याया इष्वा विशरं नाशयामि ते।। 12।।

卐11.2.13 साकं विस्कन्ध प्र पत चाषेण किकिदीव्या। साकं वातस्य ध्राज्या सह नश्य निहाकया।।
13।। 11 -3

卐11.3.1 जङ्गिडोऽसि जङ्गिडो रक्षितासि जङ्गिडः। द्विपाच्चतुष्पादस्माकं सर्वं रक्षतु जङ्गिडः।। 1।।

卐11.3.2 या गृत्स्यस्त्रिपञ्चाशीश्शतं कृत्याकृतश्च ये। सर्वान् विनक्त तेजसोऽरसान् जङ्गिडस्करत्।।
2।।

卐11.3.3 अरसं कृत्रिमं नाडमरसास्सप्त विस्रसः। अपेतो जङ्गिडामतिमिषुमस्तेव साधय।। 3।।

卐11.3.4 कृत्या दूषण एवायमथो अराति दूषणः। अथो सहस्वां जङ्गिडः प्र ण आयूंषि तारिषत् ।।
4।।

卐11.3.5 स जङ्गिडस्य महिमा परि णः पातु विश्वतः। विष्कन्धं येन सासाह संस्कन्धमोज ओजसा।।
5।।

卐11.3.6 तृष्वादेवा अजनयन्निष्ठितं भूम्यामधि। तमुत्वाङ्गिरा इति ब्रह्माणः पूर्व्या विदुः।। 6।।

卐11.3.7 न त्वा पूर्वा ओषधयो न त्वा तरन्तु या नवाः। विबाध उग्रो जङ्गिडः परिपाणस्सुमङ्गलः।।
7।।

卐11.3.8 अश्वोपदानो भगवो जङ्गिडामितवीर्य। पुरा त उग्राय सत उपेन्द्रो वीर्यं ददौ।। 8।।

卐11.3.9 उग्र इत्ते वनस्पत इन्द्र ओज्मानमा दधौ। अमीवास्सर्वाश्चातयञ्जहि रक्षांस्योषधे।। 9।।

卐11.3.10 आशरीकं विशरीकं बलासं पृष्ठ्यामयम्। तक्मानं विश्वशारदमरसं जङ्गिडस्करत्।। 10।।

11 - 4

卐11.4.1 इन्द्रस्य नाम गृह्णन्त ऋषयो जङ्गिडं ददुः। देवा यं चक्रुर्भेषजमग्रे विष्कन्ध दूषणम्।। 1।।

卐11.4.2 स नो रक्षतु जङ्गिडो धनपालो धनेव। देवा यं चक्रुर्ब्राह्मणाः परिपाणमरातिहम्।। 2।।

卐11.4.3 दुर्हार्दसं घोरचक्षुं पापकृत्वानमागतम्। तांस्त्वं सहस्रचक्षो प्रतीबोधेन नाशय परिपाणोऽसि जङ्गिडः।। 3।।

卐11.4.4 परि मा दिवः परि मा पृथिव्याः पर्यन्तरिक्षात् परि मा वीरुद्भ्यः। परि मा भूतान् परिमोत भव्याद् दिशोदिशो जङ्गिडः पात्वस्मान्।। 4।।

卐11.4.5 य ऋष्णवो देवकृता य उचो बभृतेन्याः। सर्वांस्तान्विश्वभेषजो अरसान् जङ्गिडस्करत्।। 5।। 11 - 5

卐11.5.1 प्रति गृहाण पृथिवी नीतमेदतदाज्यस्य मथितं शरीरम्। इमां धेनुमस्य दातुस्त्वं रक्ष बर्हिष्या यथासत्।। 1।।

卐11.5.2 उत त्वाहुर्वरुणस्य पत्नीमथो त्वाहुरदितिं विश्वरूपाम्। अधि जरायुमाघारे हव्यवाहमग्नावस्या महिमानं जुहोमि। । 2।।

卐11.5.3 स साहस्रं तन्तुमन्वा ततान सोऽग्निष्टोमां दशते समाप। अधि जरायुं सवत्सां यो ददाति तं वै देवास्स्वरा रोहयन्ति।। 3।।

卐11.5.4 अधिजरायुस्स्वरा रोहयन्त्यनेन दत्ता सुदुघा वयोधाः। सास्मै दुहां शतधारमक्षितं यमस्य लोके परमे व्योमन्।। 4।।

卐11.5.5 पूर्ववत्सेन सह वत्सिनी गौर्योऽस्या वत्सो अपरो जरायु तत्। तृतीयं मांसं परिनिर्मितं यत्तस्माद्देवा अधिजरायुमाहुः।। 5।।

卐11.5.6 आ धावय शवसा वावृधानोत्तराव श्रव आ धेह्यस्मै। इममिन्द्र महतामेन रक्ष सं प्रजया तन्वा सं बलेन।। 6।।

卐11.5.7 दुर्वेदावस्ताद् बहुधा परस्ताद्विश्वे देवाः प्रति पश्यन्वायतीम्। या भद्रा या सर्वतस्समीची सेदाहुतिर्भवतु मेतराज्याः।। 7।।

卐11.5.8 गृष्टिं धेनुनामधि जरायुं स्वधां कृण्वानः प्र ददाति ब्रह्मणे। सास्मै दुहां शतधारमक्षितममुष्मिल्लोँके युग उत्तरस्मिन्।। 8।।

卐11.5.9 वत्सं जरायु प्रति धुक् पीयूषं यो नो ददाति सुदुघामधेनुम्। तस्य देवाः प्र तिरन्वायुः स आ रोहतु सुकृतामु लोकम्।। 9।।

卐11.5.10 परिवालामधि जरायुं युधाजीवो अददादग्र एताम्। स्योना नस्सग्मा शिवा विशेह मा नो हिंसीर्हरसा दैव्येन।। 10।।

卐11.5.11 भद्रकृतं सुकृतमादु शं भुवमरं भुवं प्रति गृह्णाम्यायतीम्। घृश्रियं नभसी संवसानां देवान् मनुष्याँ असुरानुतर्षिन्।। 11।।

卐11.5.12 पञ्च देवाः प्र पिबन्त एतामिन्द्रस्त्वष्टा वरुणो मित्रो अग्निः। ते सर्वे समदुर्मह्यमेतां तयेह जीवन् प्र तिरस्वायुः।। 12।।

卐11.5.13 कश्यपोऽयं जमदग्निर्वसिष्ठ ऋषयो नः ससनुरग्र एताम्। भरद्वाजो गोतमो अत्रिर्न स्योनां विश्वामित्रो ददुषः प्र तिरात्यायुः।। 13।।

卐11.5.14 ऊर्जं देवेभ्यस्सुभग ऊर्जं मनुष्येभ्यः। ऊर्जं पितृभ्यो अघ्न्य ऊर्जा ददतमा विश।। 14।।

11 - 6

卐11.6.1 या जाता ओषधयो देवेभ्यस्त्रियुगं पुरा। मन्ये नु बभ्रुणामहं शतं धामानि सप्त च।। 1।।

卐11.6.2 शतं वो अम्ब धामानि सहस्रमुत वो रुहः। अधा शतकृत्वो यूयमिमं मे अगदं कृत।। 2।।

卐11.6.3 पुष्पवतीः प्रसूमतीः फलिनीरफला उत। अश्वा इव स्थ जित्वरीर्विरुधः पारयिष्णवः।। 3।।

卐11.6.4 ओषधीरिति मातरो यद्वो देवीरुप ब्रुवे। रपांसि विघ्नतीरित रक्षश्चातयमानाः।। 4।।

卐11.6.5 निष्कृतिर्नाम वो माता निष्कृतिर्नाम वः पिता। सराः पत त्रिणी स्थ यदामयति निष्कृतः।। 5।।

卐11.6.6 अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता। गो भाज इति किलासथ यत् सनवथ पूरुषम्।। 6।।

卐11.6.7 यदहं वाजयन्निमा ओषधीर्हस्त आ दधे। आत्मा यक्ष्मस्य नश्यतु पुरा जीवगृभो यथा।। 7।।

卐11.6.8 उच्छुष्मा ओषधीनां गावो गोष्ठादिवे रते। धनं सनिष्यन्तीनामात्मानं तव पूरुषः।। 8।।

卐11.6.9 यदोषधयः समग्मत राजानस्समिताविव। विप्रस्स उच्यते भिषग् रक्षोहामीव चातनः।। 9।।

卐11.6.10 अश्वावतीं सोमावतीमूर्जयन्तीमुदोजसम्। आवित्सि सर्वा ओषधीरितो मा पारयानिति।। 10।। 11 - 7

卐11.7.1 अति विश्वा परिष्ठास्तेन इव व्रजमक्रमीत्। ओषधयः प्राचुच्युवुर्यत् किञ्च तन्वो रपः।। 1।।

卐11.7.2 यस्यौषधयः प्रसर्पथाङ्गमङ्गं परस्परुः। तस्माद्यक्ष्मं वि बाधध्वमुग्रो मध्यमशीरिव।। 2।।

卐11.7.3 अन्या वो अन्यामवत्वन्यान्यस्या उपावत। ओषधयस्सं विदाना इदं मे प्रावता वचः।। 3।।

卐11.7.4 अव पतन्तीरपदं दिव ओषधयस्परि। यं जीवमश्नवामहै न स रिष्याति पूरुषः।। 4।।

卐11.7.5 या औषधयस्सोम राज्ञीर्बह्वीः शतविचक्षणाः। बृहस्पति प्रसूतास्ता नो मुञ्चन्त्वंहसः।। 5।।

卐11.7.6 या फलिनीर्या अफला अकोशा याश्च केशिनीः। बृहस्पति प्रसूतास्ता नो मुञ्चन्त्वंहसः।। 6।।

卐11.7.7 जीवलां नघारिषामा ते बध्नाम्योषधिम्। या त आयुरुपाहरादप रक्षांसि चातयात्।। 7।। 11 - 8

卐11.8.1 कालो अश्व वहति सप्तरश्मिस्सहस्राक्षोऽजरो भूरिरेताः। तमा रोहन्ति कवयो विपश्चितस्तस्य चक्रा भुवनानि विश्वा।। 1।।

卐11.8.2 सप्त चक्रान् वहति काल एष सप्तास्य नाभीरमृतं न्वक्षः। स इमा विश्वा भुवनान्यञ्जन् कालस्स ईयते प्रथमो नु देवः।। 2।।

卐11.8.3 पूर्णः कुम्भोऽधि काल आहितस्तं वै पश्यामो बहुधा नु सन्तम्। स इमा विश्वा भुवनानि प्रत्यङ् कालं तमाहुः परमे व्योमन्।। 3।।

卐11.8.4 स एव सन् भुवनान्याभरत् स एव सन् भुवनानि पर्यैत्। पिता सन्नभवत् पुत्र एषां तस्माद्वै नान्यत् परमस्ति तेजः।। 4।।

卐11.8.5 कालोऽमुं दिवमजनयत् काल इमां पृथिवीमुत। कालेन भूतं भव्यं चेषितं ह वि तिष्ठते।। 5।।

卐11.8.6 कालो भूतिमसृजत्काले तपति सूर्यः। कालो हि विश्वा भूतानि काले चक्षुर्वि पश्यति।। 6।।

Sri Ganapati Sachchidananda Avadhoota Dattapeetham

卐11.8.7 काले मनः काले प्राणः काले नाम समाहितम्। कालेन सर्वा नन्दन्त्यागतेन प्रजा इमाः।। 7।।

卐11.8.8 काले तपः काले ज्येष्ठं काले ब्रह्म समाहितम्। कालो ह सर्वस्येश्वरो यः पितासीत् प्रजापतेः।। 8।।

卐11.8.9 तेनेषितं तेन जातं तदु तस्मिन् प्रतिष्ठितम्। कालो ह ब्रह्म भूत्वा बिभर्ति परमेष्ठिनम्।। 9।।

卐11.8.10 कालः प्रजामसृजत कालो अग्रे प्रजापतिम्। स्वयम्भूः कश्यपः कालात्तपः कालादजायत।। 10।। 11 - 9

卐11.9.1 कालादापस्समभवन् कालाद् ब्रह्म तपो दिशः। कालेनोदेति सूर्यः काले नि विशते पुनः।। 1।।

卐11.9.2 कालेन वातः पवते कालेन पृथिवी मही द्यौर्मही काल आहिता। कालो ह भूतं भव्यं च पुत्रो अजनयत् पुरः।। 2।।

卐11.9.3 कालादृचः समभवन् यजुष्कालादजायत। कालो यज्ञं समैरयद् देवेभ्यो भागमक्षितम्।। 3।।

卐11.9.4 काले गन्धर्वाप्सरसः काले लोकास्समाहिताः। कालेऽयमङ्गिरा देवो अथर्वा चाधितिष्ठतः।। 4।।

卐11.9.5 इमं च लोकं परमं च लोकं पुण्यांश्च लोकान् विधृतिश्च पुण्याः। सर्वाल्लोँकानभिजित्य ब्रह्मणा कालस्स ईयते परमो नु देवः।। 5।। 11 - 10

卐11.10.1 सप्तैतं सप्त ऋषयश्शल्य कर्ता द्वादश। आविद्धं शल्यं चाक्रतुरिन्द्रराशिं महोदरम्।। 1।।

卐11.10.2 इन्द्रराशिं मित्रावरुणावाविद्धं निरकृन्ततम्। प्रसूतमिन्द्रेणोग्रेणो ब्राह्मणानामसत् पितुः।। 2।।

卐11.10.3 नैनमश्नियादब्राह्मणो न गृहान् प्र हरेत् स्वान्। तृष्टं विषमिव तैमातमिन्द्रराशिः खले शये।। 3।।

卐11.10.4 अयं शये तन्वं रक्षमाणे यो अश्नात्यविचक्षाण एतम्। मध्ये खलस्य निर्मित इन्द्रराशिर्महोदरः।। 4।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham SGS

卐11.10.5 उतैष यक्ष्मं भवतीन्द्रराशिर्महोदरः। भीम अन्नस्य संकाशे अश्व इवात्ति सिनी नडम्।। 5।।

卐11.10.6 य इन्द्रराशिं निरवपाद्वर्धयात् खलमान्याः। स्फातिं च खल्यां गृह्णातु गवां च बहु पुष्यतु।। 6।।

卐11.10.7 यमुवाहो शुनश्शेपो यमिन्द्रो ब्रह्मणस्पतिः। तं चक्रुश्शिवमस्मभ्यमृषयो जीवनाय कम्।। 7।।

卐11.10.8 तृढं शाकं तमशयद् दत्तमासीच्छ्वापदम्। पन्द्रास्म रुप्यन्तश्शेरे य आदन्वहुतन् हविः।। 8।।

卐11.10.9 अनड्डहां पृश्निशफानां वहतां वहरापिणाम्। कीनाशस्य श्रमात् स्वेदादिन्द्रशिरजायत।। 9।।

卐11.10.10 यत्कीनाशस्य स्वेद एति सं तप्तस्तन्वस्परि। अपां गाव इव तृष्यन्तीरिन्द्रराशिं सो अश्नुते।। 10।। 11 - 11

卐11.11.1 यत् कीनाशं सीरपतिर्दण्डेन हन्ति मन्युतः। यत् किञ्च खल्यं सादान्ववमिन्द्राशौ तदाहितम्।। 1।।

卐11.11.2 उलूखलमुसलं तानि चोदय सूर्पं नार्यपविचे कृणुष्व। वाहाय पुत्राय गोतम इन्द्रराशिं मधुमन्तं कृणोतु।। 2।।

卐11.11.3 एतत् सूर्पं जरितराहरोलूखलमुसलं कुम्भ्या गहि। पुत्रा नो अद्य सुदिनत्वे अह्नि पित्तमश्नन्तमधुमन्तमंशुम्।। 3।।

卐11.11.4 अग्निर्नो दूतः प्रहितोयमागन् स नस्सर्वमन्नमविषं कृणोतु। निराविद्धमकृतं ब्रह्मणेतोऽदमधं पित्तमत्त प्रसूताः।। 4।।

卐11.11.5 स्वादो पितो मधो पितो उप नः पितवा गहि। शिवश्शिवाभिरूतिभिः।। 5।।

卐11.11.6 सिंहो भूत्वा गामृणात्यग्निर्भूत्वा धान्यम्। इन्द्रराशिरनिर्मितो मयारं चाव गच्छति।। 6।। 11 - 12

卐11.12.1 शतकाण्ड दुश्च्यवनस्सहस्र पर्ण उत्तिरः। दर्भो यो उग्र ओषधिस्तं ते बध्नाम्यायुषे।। 1।।

Sri Ganapathy Sachchidananda Avadhoota Datta Peetham • Mysore •

卐11.12.2 नास्य केशान् प्र वपन्ति नोरसि नाडमा घ्नते। यस्मा अच्छिन्नपर्णेन दर्भेण शर्म यच्छति।। 2।।

卐11.12.3 दिविते तूलमोषधे पृथिव्यामसि निष्ठितः। त्वया सहस्र काण्डेनायुष्प्रवर्धयामहे।। 3।।

卐11.12.4 तिस्रो दिवो अत्य तृणस्तिस्र इमाः पृथिवीरुत। तयाहं सर्वान् दुर्हार्दो जिह्वा नि तृणद्मि वचांसि च।। 4।।

卐11.12.5 त्वमसि सहमानो अहमस्मि सहस्वान्। उभौ सहस्वन्तौ भूत्वा सपत्नान् सहिषीवहि।। 5।।

卐11.12.6 सहस्व नो अभिमातिं सहस्व पृतनायतः। सहस्व सर्वान् दुर्हादो सुहार्दो मे बहून् कृधि।। 6।।

卐11.12.7 दर्भेण देवजातेन दिविष्टम्भेन शश्वदित्। तेनाहं सश्वतो जनाँ असनं सनवानि च।। 7।।

卐11.12.8 प्रियं मा दर्भ कृणु ब्रह्मराजन्याभ्यां शूद्राय चार्याय च। यस्मै च कामयामहे सर्वस्मै च वि पश्यते।। 8।।

卐11.12.9 यो जायमानः पृथिवीमदृंहद् यो अस्तभ्नादन्तरिक्षं दिवं च। यं विभ्रतं ननु पाप्मा विवेद स नोऽयं दर्भो धरुणो दिवा कः।। 9।।

卐11.12.10 सपत्नहा शतकाण्डस्सहस्वान् ओषधीनां प्रथमस्सं बभूव। स नोऽयं दर्भः परिपातु विश्वतस्तेन साक्षी य पृतनाः पृतन्यतः।। 10।। 11 - 13

卐11.13.1 सहस्रार्घश्शतकाण्डः पयस्वानपामग्निर्वीरुधां राजसूयम्। स नोऽयं दर्भो परि पातु विश्वतो दैवो मणिरायुषा संसृजाति नः।। 1।।

卐11.13.2 घृता दुल्लुप्तो मधुमान् पयस्वान् भूमि दृंहो अच्युतश्च्यावयिष्णुः। नुदन् सपत्नानधरांश्च कृण्वन् दर्भारोह महता महेन्द्रियेण।। 2।।

卐11.13.3 त्वं भूमि मत्येष्योजसा त्वं वेद्यां सीदसी चारुरध्वरे। त्वां पवित्रमृषयोऽभरन्त त्वं पुनीहि दुरितान्यस्मत्।। 3।।

卐11.13.4 तीक्ष्णो राजा विषासहि रक्षोहा विश्वचर्षणीः। ओजो देवानां बलमुग्रमेतत्तं ते बध्नामि जरसे स्वस्तये।। 4।।

卐11.13.5 दर्भेण त्वं कृणु वीर्याणि दर्भं बिभ्रदात्मना मा व्यथिष्ठाः। अतिष्ठा यो वर्च सैध्वन्यान् सूर्य इवाभाहि प्रदिशश्चतस्रः।। 5।। 11 - 14

卐11.14.1 उदीरतां पृथिवी जीरदानुश्शीत एनामन्तर्वा ननु वातु वातः। ऋत्वियावती पृथिवी प्रति गृह्णातु बीजं सहस्रवल्शिं सुरुहा रोहयन्ती।। 1।।

卐11.14.2 इन्द्र एनां हर्यश्वो अग्निर्वा रोहिताश्वः। अश्विना रासभाश्वा कृषिं देवीमयूयुजन्।। 2।।

卐11.14.3 शुनं वरत्रामा यच्छ शुनमष्ट्रामुदिङ्गय। शुनं तोतप्यतां फालश्शुनं बहतु लाङ्गलम्।। 3।।

卐11.14.4 युनक्तवाहान् वियुगा तनोत कृते क्षेत्रे वपतेह बीजम्। तथा धाता तथा भगस्तथा कृणुतामश्विना तथा देवी सरस्वती।। 4।।

卐11.14.5 सुपिप्पला ओषधयो नाहीना अपक्षत। तदिन्द्रो वरुणो वायुरश्विनेदं मे प्र तिरता वचः।। 5।।

卐11.14.6 धाता पूषा बृहस्पतिर्भूत्यास्समजीगमन्। कृषिं देवास्स्वर्विदः।। 6।।

卐11.14.7 कल्याणी सुभगेव या संस्थायां वपुषेण्या। सा नस्तिराति मधुमन्तमंशुम्।। 7।।

卐11.14.8 अन्नस्य भूमा पुरुषस्य भूमा भूमा पशूनां त इह श्रयन्ताम्। तीव्रा वर्षन्तु वृष्टयो भूतये महसे वृधे।। 8।।

卐11.14.9 पिन्वानः पर्जन्यस्तिष्ठतु सह पृष्ठयोर्देति सूर्यः। आनन्दं जनयन् यवस्सर्वा अरातिरप बाधमानः।। 9।।

卐11.14.10 वि जिहीष्व पृथिवीर्मह्युर्विपक्षमृद्वी भव। भद्रं रोहतु धान्यम्। .10।। 11 - 15

卐11.15.1 उत्सेध सेध गा अजन्विन्देहेरां महस्कृधि। मा वो रिषात् कूटग्राहो मा व आ शारि लाङ्गलम्।। 1।।

卐11.15.2 मोऽस्माकमुग्राः संरब्धास्तन्वः किञ्चनाममत्। रायस्पोषं सुनासीरा अथो सीताभगश्च यः।। 2।।

卐11.15.3 देष्ट्री समुद्रः सिनीवाली कृषिं नो अभि हिन्वत। इमा याः पञ्च प्रदिशस्ता वातो अभिहिन्वत। वलीके सत्वतामिव तीव्रा वर्षन्तु वृष्टयः।। 3।।

卐11.15.4 शुनं कीनाशो अन्वेतु वाहाञ्छुनं फालो विनुदन्नेतु भूमिम्। शुनासीरा हविषा वावृधाना शुनं धान्यानि कृणुतं युवं नः।। 4।।

卐11.15.5 या नः पीपरदश्विना ज्योतिष्मती तमस्तिरः। तामस्मे रासेतामिषम्।। 5।। 11 - 16

卐11.16.1 ऊर्ध्वश्रितो वै नामैता आपो यदोषधयश्च वनस्पतयश्च तासामग्निरधिपतिः। यो वा एता ऊर्ध्वश्रित आपो वेदाग्निमधिपतिम्। यथैतमेता ऊर्ध्वा उपतिष्ठन्त्येवैनमूर्ध्वा उपतिष्ठन्त्यधिपतिर्भवति स्वानां चान्येषां च य एवं वेद।। 1।।

卐11.16.2 प्रस्कद्वरीर्वै नामैता आपो यत् पृष्वास्तासामादित्योऽधिपतिः। यो वा एताः प्रस्कद्वरीरापो वेदादित्यमधिपतिम्। यथैता एतस्मिन्नुद्यति प्रस्कन्दन्त्येवास्मिन्नायति प्रस्कन्दन्त्यधिपतिर्भवति स्वानां चान्येषां च य एवं वेद।। 2।।

卐11.16.3 तक्वरीर्वै नामैता आपो यास्सूदय तासां पृथिव्यधिपत्नी। यो वा एता स्तक्वरीरापो वेद पृथिवीमधिपतत्नीम्। यथैता एतस्यां प्रणुतास्तकन्तीर्यन्त्येवैनेनं द्विषन्तः प्रणुता यन्त्यधिपतिर्भवति। स्वानां चान्येषां च य एवं वेद।। 3।।

卐11.16.4 वशीनिर्वै नामैता आपो यास्स्यन्दन्ते तासां वरुणोऽधिपतिः। यो वा एता वशिनीरापो वेद वरुणमधिपतिम्। यथैतमेतासां स्यन्दमानानां वशमादत्त एवा द्विषतां वशमादत्तेऽधिपतिर्भवति स्वानां चान्येषां च य एवं वेद।। 4।।

卐11.16.5 ऊर्जो वै नामैता आपो यद्गावस्तासां त्वष्टाधिपतिः। यो वा एता ऊर्ज आपो वेद त्वष्टारमधिपतिम्। ऊर्जस्वी तेजस्वी भवति प्र साहस्रान् पशूनाप्नोत्यधिपतिर्भवति स्वानां चान्येषां च य एवं वेद।। 5।।

卐11.16.6 वर्चो वै नामैता आपो यद् घृतं तासां पूषा अधिपतिः। यो वा एता वर्च आपो वेद पूषणमधिपतिम्। वर्चस्वी तेजस्वी भवत्युतास्यानभ्यक्तस्य मुखं रोचतेऽधिपतिर्भवति स्वानां चान्येषां च य एवं वेद।। 6।।

卐11.16.7 ओजो वै नामैता आपो यन्मधु तासामिन्द्रोऽधिपतिः। यो वा एता ओज आपो वेदेन्द्रमधिपतिम्। ओजस्वी वीर्यावानिन्द्रियावी भवति प्र राजसभायां मधुपर्कमाप्नोत्यधिपतिर्भवति स्वानां चान्येषां च य एवं वेद।। 7।।

卐11.16.8 उग्रा वै नामैता आपो यद्धादुनयस्तासां मरुतोऽधिपतयः। यो वा एता उग्रा आपो वेद मरुतोऽधिपतीन्। उग्रो बलवान् भवति मारुतं शर्ध इत्येनमाहुरधिपतिर्भवति स्वानां चान्येषां च य एवं वेद।। 8।।

卐11.16.9 महो वै नामैता आपो यद्वर्षं तासां पर्जन्योऽधिपतिः। यो वा एता मह आपो वेद पर्जन्यमधिपतिम्। महस्वी मित्रवाहो भवत्युतैनेन स्वा नन्दन्त्यस्माकमयमिति। तस्मात् सर्वो वृष्टे महीयतेऽधिपतिर्भवति स्वानां चान्येषां च य एवं वेद।। 9।।

卐11.16.10 अतिमन्या वै नामैता आपो यत् सुरा तासामस्विनाधिपती। यो वा एता अतिमन्या आपो वेदाश्विनाधिपती। अतिमन्यते भ्रातृव्यान्नैनं भ्रातृव्या अतिमन्यन्ते तन्नाम्मत्तो मत्तमतिमन्यतेऽधिपतिः स्वानां चान्येषां च य एवं वेद।। 10।।

卐11.16.11 परिचितो वै नामैता आपो याः कर्ष्वां तासां यमोऽधिपतिः। यो वा एताः परिचित आपो वेद यममधिपतिम्। पर्यैनं स्वाश्च विश्याचावस्यन्त्यधिपतिः स्वानां चान्येषां च य एवं वेद।। 11।।

卐11.16.12 रन्तयो वै नामैता आपो यत स्त्रियस्तासां कामोऽधिपतिः। यो वा एता रन्तीरापो वेद काममधिपततिम्। रमन्तेऽस्मिन् रमणीयो भवति काम इव स्त्रीणामधिपतिः। स्वानां चान्येषां च य एवं वेद।। 12।।

卐11.16.13 विश्वभृतो वै नामैता आपो यत्पुरुषस्तासां मृत्युरधिपतिः। यो वा एता विश्वभृत आपो वेद मृत्युमधिपतिम्। विश्वस्य भर्ता भवति विश्वमेनं विभर्त्यास्य त्रयोग्नयो गृहे धीयन्ते दक्षिणाग्निर्गार्हपत्याहवनीयः। ऐनं चत्वारि वामानि गच्छन्ति निष्कः कंसोऽश्वतरो हस्त्यधिपतिः स्वानां चान्येषां च य एवं वेद।। 13।।

卐11.16.14 तासां वा एतासामपां हिमवानूधः सोमो वत्सः परमेष्ठ्यधिपतिः। यो वा एतासामपां हिमवन्तमूधः सोमं वत्सं परमेष्ठीनमधिपतिं वेद। परमेष्ठी भवति गच्छति परमेष्ठी तामधिपतिर्भवति स्वानां चान्येषां च य एवं वेद।। 14। (इति चतुर्दशर्चो नाम एकादशकाण्डे अनुवाकस्समाप्तः) इत्यथर्ववेदे पैप्पलादसंहितायां चतुर्दशर्चो नाम एकादशः काण्डः समाप्तः

## ᑌ अथ द्वादशः काण्डः 12 - 1

卐12.1.1 अग्निस्तक्मानमप बाधतामितस्सोमो ग्रावा मरुतः पूतदक्षाः। वेदिर्बर्हिस्समिधस्सोशुचाना अप रक्षांस्यमुया धमन्तु।। 1।।

卐12.1.2 अयं यो रूरो अभिशोचयिष्णुर्विश्वा रूपाणि हरिता कृणोति। तस्मै तेऽरणाय बभ्रवे तपुर्मघाय नमोऽस्तु तक्मने।। 2।।

卐12.1.3 तक्मन् सार्थिनमिच्छस्व वशी सन् मृडयासि नः। अथेहि तत्र ते गृहा अनिनूर्तेषु दस्युषु।।
3।।
卐12.1.4 यः पुरुषः पारुषेयोऽवध्वंस इवारुणः। तक्मानं विश्वधावीर्या अधराञ्चं परासुव।। 4।।
卐12.1.5 अधराञ्चं प्र हिणोमि नमस्कृत्वा तक्मने शकम्भरस्यमुष्टिहा पुनर्गच्छ महावृषान्।। 5।।
卐12.1.6 महावृषान् मूजवत ओक एधि परेत्य। व्रतानि तक्मने ब्रूमो अन्यक्षेत्राणि वा इमाः।। 6।।
卐12.1.7 ओको अस्य मूजवन्त ओको अस्य महावृषाः। याज्जातस्तक्मं तादसि बलिहिकेषु न्योचरः।। 7।।
卐12.1.8 तक्मन् व्याल वि गद व्यङ्ग भूरि यावय। दासीं निष्टक्करीमिच्छ तां वज्रेण समर्पय।। 8।।
卐12.1.9 गिरिं गच्छ गिरिजासि गिरौ ते माहिषो गृहः। दासीमिच्छ प्रफर्व्यं तां तक्मन्वीव धूनुहि।।
9।।
卐12.1.10 यस्त्वं शीतो अथो रूरस्सह कासावीवियः। भीमास्ते तक्मन् हेतयस्ताभि स्म परि वृङ्ग्धि नः।। 10।। 12 - 2
卐12.2.1 तक्मन् भ्रात्रा बलासेन स्वस्रा क्सिकया सह। पाम्ना भ्रातृव्येण नश्येतो मरटाङ् अभि।।
1।।
卐12.2.2 गन्धारिभ्यो मूजवद्भ्यः काशिभ्यो मगधेभ्यः। जने प्रियमिव शेवधिं तक्मानं परि दध्मसि।।
2।।
卐12.2.3 नार्कविन्दान्नार्विदालान्नान्नदीं वर्तकावतीम्। व्रतानि तक्मने ब्रूमो अन्यक्षेत्राणि वा इमाः।।
3।।
卐12.2.4 अन्य क्षेत्रे न रमते सहस्राक्षो अमर्त्यः। अभूदु प्रार्थस्तक्मा स गमिष्यति बलिहिकाम्।।
4।।
卐12.2.5 अदो गच्छ मूजवतस्ततो वा घ परस्तरम्। मा स्मातो अभ्यैर्नः पुनस्तत्वा तक्मन्नुप ब्रूवे।।
5।।
卐12.2.6 परस्मै व त्वं चर परमस्यां परावति। यथा नो नान्तमायसि यथा नो नाभिशोचया।। 6।।
12 - 3
卐12.3.1 यथेयमुर्वी पृथिवी वृद्धेव गर्भमादधे। एवा दधामि ते गर्भं तस्मै त्वामवसे हुवे।। 1।।

卐12.3.2 पर्वताद्दिवो जनेर्गात्राद् गात्रात् समाश्वतम्। रेतो देवस्य देवस्यत्सरौ पर्णमिवाधाम्।। 2।।
卐12.3.3 विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु। आ सिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते।। 3।।
卐12.3.4 गर्भं धेहि सिनीवाली गर्भं धेहि सरस्वति। गर्भं युवमश्विनास्या मा धत्तं पुष्करस्त्रजा।। 4।।
卐12.3.5 गर्भं ते राजा वरुणो गर्भं देवो वृहस्पतिः। गर्भं त इन्द्रश्चाग्निश्च गर्भं धाता दधातु ते।। 5।।
卐12.3.6 गर्भोऽस्योषधीनां गर्भो वनस्पतीनाम्। गर्भो विश्वस्य भूतस्य सोऽग्ने गर्भमेह धाः।। 6।।
卐12.3.7 येनौषधयो गर्भिणीः पशवो येन गर्भिणः। तेषां गर्भस्य यो गर्भस्तेन त्वं गर्भिणी भव।। 7।।
卐12.3.8 वि ते ग्रन्थिं चृतामसि धाता गर्भं दधातु ते। आ योनिं पुत्रो रोहतु जननं प्रति जायताम्।। 8।।
卐12.3.9 जनिष्ट हि महिया आ योनिं समिहासरत्। अथा सोम इव भक्षण मा गर्भस्सीदत्वृत्वियम्।। 9।।
卐12.3.10 धातश्श्रेष्ठेन रूपेणास्या नार्या गवीन्योः। पुमांसं पुत्रमाधेहि दशमे मासि सुतवे।। 10।।

12 - 4

卐12.4.1 सवितश्श्रेष्ठेन रूपेणास्या नार्या गवीन्योः। पुमांसं पुत्रमाधेहि दशमे मासि सुतवे।। 1।।
卐12.4.2 विष्णोश्श्रेष्ठेन रूपेणास्या नार्या गवीन्योः। पुमांसं पुत्रमाधेहि दशमे मासि सुतवे।। 3।।
卐12.4.3 त्वष्टश्श्रेष्ठेन रूपेणास्या नार्या गवीन्योः। पुमांसं पुत्रमाधेहि दशमे मासि सुतवे।। 3।।
卐12.4.4 भगश्श्रेष्ठेन रूपेणास्या नार्या गवीन्योः। पुमांसं पुत्रमाधेहि दशमे मासि सुतवे।। 4।।
卐12.4.5 अधि स्कन्द वीरयस्व गर्भमाधेहि योन्याम्। वृषाणं वृष्ण्यावन्तं प्रजायै त्वा नयामसि।। 5।।
卐12.4.6 यद्वेद राजा वरुणो वेद देवो बृहस्पतिः। इन्द्रो यद्वृत्रहा वेद तद्गर्भ करणं पिव।। 6।।
卐12.4.7 वि जिहीष्व बार्हत्सामे गर्भस्ते योनि मा शयाम्। ददन्ते पुत्रं देवास्सोमपामुभयाविनम्।। 7।।
卐12.4.8 सोमस्य त्वर्वियेनोपैमि गर्भ कृत्वने। ततस्ते पुत्रो जायतां कर्तवै वीर्येभ्यः।। 8।। 12 - 5
卐12.5.1 ज्यायस्वाग्ने अश्वत्थादस्मै क्षत्रायौजसे। उग्र आपतिकादधि यो वृक्षामधि रोहति।। 1।।
卐12.5.2 विबाधं चित् सहमानं त्वामग्ने जनयामसि। जातां जनिष्यमाणां सपत्नान् प्र णुदस्व मे।। 2।।
卐12.5.3 अश्वत्थस्यारोहस्य वृक्षस्यारणयः कृताः। ततो जाताय तेऽजनि वीडुजम्भाग्निरग्नये।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐12.5.4 तं जातं जातवेदस मा दधाम्यमर्त्यम्। पावकमग्निमूतये शुचिमन्तं विषासहिम्।। 4।।

卐12.5.5 उत्तनूष्व धनुः प्रति मुञ्चस्व वर्म जहि शत्रून् वीर्या ते कृणोमि। अत्र रध्यन्तु य उ ते सपत्नास्त्वमेकवृषो भव।। 5।।

卐12.5.6 वृषभं त्वा सजातानां सपत्नानां विषासहिम्। हन्तारं शत्रूणां कृण्मो विराजं गोपतिं गवाम्।। 6।।

卐12.5.7 समुद्रोऽस्यपां ज्येष्ठ इन्द्रो देवेषु वृत्रहा। व्याघ्रं सिंहं त्वा कृण्मो दमितारं पृतन्यताम्।। 7।।

卐12.5.8 इन्द्र इव दस्यूनधरान् कृणुष्वोग्र इव वातो विश्वणन् सपत्नान्। ते शुष्यन्त्वप दावादिवाग्नेः पर्यवीवरथा एनान्।। 8।।

卐12.5.9 सं वृश्चैनांस्ते शुष्यन्तु वृश्चैनान् मोपजां शिषः। सपत्नान् सर्वांस्तृड्वा त्वमेकवृषो भव।। 9।।

卐12.5.10 त्वमुग्रस्त्वं बली त्वमेधि विवाचनम्। त्वं पृतन्यतः पूर्वः सपत्नां अव धूनुष्व।। 10।। 12 - 6

卐12.6.1 असपत्नस्सपत्नहेन्द्र इवारिष्टो अक्षितः। अधस्सपत्नास्ते पदोस्सर्वे सन्त्वभिष्ठिताः।। 1।।

卐12.6.2 म्लायन्तु ते खातमूलास्सपत्ना अग्निमेषां निर्हयामि शरीरात्। हविषैषामपि दधामि प्राणांस्तथैभ्यो अमुचिः कृताः।। 2।।

卐12.6.3 अभिवर्धमभिभवं सपत्नक्षयणं हविः। राष्ट्राय तुभ्यं कृण्मस्सपत्नेभ्यः पराभवन्।। 3।।

卐12.6.4 यो नस्स्वो यो अरणोऽरातीयति पूरुषः। इध्मस्येव प्रक्षायकस्तस्य मोच्छेषि किञ्चन।। 4।।

卐12.6.5 असपत्नं पुरस्तात्पश्चान्नोऽभयं कृतम्। सविता मा दक्षिणत उत्तरान्मा शचीपतिः।। 5।।

卐12.6.6 दिवो मादित्या रक्षन्तु भूम्यारक्षन्त्वग्नयः। इन्द्राग्नी रक्षतां मा पुरस्तादश्विनावभितश्शर्म यच्छताम्। तिरश्चीनघ्न्या रक्षतु जातवेदा भूतकृतो मे सर्वतस्सन्तु वर्म।। 6।। 12 - 7

卐12.7.1 त्वया पूर्वमथर्वाणो जघ्नुरक्षांस्योषधे। त्वया जघान कश्यपस्त्वया कृण्वो अगस्त्यः।। 1।।

卐12.7.2 त्वयावयमप्सरसो गन्धर्वांश्चातयामसि। अज श्रृङ्ग्यज रक्षस्सर्वान् गन्धेन नासय।। 2।।

卐12.7.3 नदीं यन्त्वप्सरसो अपान्तारमिव श्वसन्। गुल्गुलू पीला नलद्यौक्षगन्धिः प्रमन्दिनी।। 3।।

卐12.7.4 यत्रामर्त्या अप्स्वन्तस्समुद्रे तुरुर्नीली तुर्वशी पुण्डरीका। तत् परेता अप्सरसः प्रतिबुद्धा अभूतन।। 4।।

卐12.7.5 यत्र प्रेङ्खो गन्धर्वाणां दिवि बद्धो हिरण्ययः। तत् परेता अप्सरसः प्रतिबुद्धा अभूतन।। 5।।

卐12.7.6 गन्धर्वाणामप्सरसा मानर्तमिति सङ्गमम्। तत् परेता अप्सरसः प्रतिबुद्धा अभूतन।। 6।।

卐12.7.7 यत्राश्वत्था न्यग्रोधा महारुक्माश्शिखण्डिनः। तत् परेता अप्सरसः प्रतिबुद्धा अभूतन।। 7।।

卐12.7.8 यत्र वोऽक्षा हरिता अर्जुना आघाटाः कर्कयस्सं वदन्ति। तत् परेता अप्सरसः प्रतिबुद्धा अभूतन।। 8।।

卐12.7.9 इयं वीरुच्छिखण्डिनो गन्धर्वस्याप्सरापतेः। भिनत्तु मुष्कावपि यातु शेफः।। 9।।

卐12.7.10 एयमगन्नोषधिर्वीरुधां वीर्यावती। अजश्रृङ्ग्यराटकी तीक्ष्णश्रृङ्गी व्यृषतु ।। 10।। 12 - 8

卐12.8.1 अपेतेतो अप्सरसो गन्धर्वा यत्र वो गृहाः। तीक्ष्णश्रृङ्ग्यजराटक्यजश्रृङ्गी व्यृषतु।। 1।।

卐12.8.2 जाया वेद वो अप्सरसो गन्धर्वाः पतयो यूयम्। अप क्रामत् पुरुषादमर्त्या मर्त्यं मा सचध्वम्।। 2।।

卐12.8.3 भीमा इन्द्रस्य हेतयः शतमृष्टीरयस्मैः। ताभिर्गन्धर्वानभैद्यानवकादान् व्यृषतु।। 3।।

卐12.8.4 अवकादाँ अभिशाचो भित्सु द्योतय मामकान्। गन्धर्वान् सर्वानोषधे प्र णुदस्व पराणय।। 4।।

卐12.8.5 उन्माद्यन्तीरभिशोचयन्तिर्मुनिं नग्नं कृण्वतीमोघहासिनम्। अप्सरसोरघटो याश्चरन्ति गन्धर्वपत्नीरजश्रृङ्ग्याशये।। 5।।

卐12.8.6 श्वेती कृण्वानः पुरुषं विश्वारूपाणि बोभुवत्। श्वेवैकं कपिरिवैकं कुमारस्सर्वकेशकः। प्रियो दृशे भूत्वा गन्धर्वस्सचते स्त्रियं तमितो नाशयामसि।। 6।। 12 - 9

卐12.9.1 यो वै वशां देवयते पचते वाहुताममा। मृत्योः स बध्यते पाशे देवानां च यमस्य च।। 1।।

卐12.9.2 दक्षिणां सूर्यामदितिं वदन्ति वशां वाचं कल्पयन्तस्समानीम्। सप्त ऋषयो नि दधुर्वाचमेतां सरस्वती मृडया कल्पयन्तः।। 2।।

卐12.9.3 इमां वशां वाचमाहुर्वशेति तिस्रो वसा अतिहितास्सधस्थे। तासामग्नौ मनसैकां जुहोमि तां नस्स्वाद्वीं भूतपतिः कृणोतु।। 3।।

卐12.9.4 स्वाद्वीं न एतां सविता कृणोतु स्वाद्वीं न एतां जनिता पशूनाम्। जुहुध्यग्ने वयुनानि विद्वांस्तां नः स्वाद्वीं भूतपतिः कृणोतु।। 4।।

Sri Ganapati Sachchidananda ... Datta Peetham

卐12.9.5 इदं तृतीयं वशिनी वशाशि महिम्ने त्वा गर्भो अस्या विवेश। उशती त्वमुशतो गच्छ देवान् सत्यास्सन्तु यजमानस्य कामाः।। 5।।

卐12.9.6 इयमम्भसा वाजसुतस्तभे गौर्यस्यामिन्द्रो वरुणस्ति त्विषाते। नृम्णमनृम्णं सचत इयमागन् धीरः पशुर्वीर्यमाविवेश।। 6।।

卐12.9.7 वशा ससूव स्थवीरं विपश्चितं वशा ससूव वष्कयं दिविस्पृशन्। वशा ससूव तरुणं विभाजनं वशा ससूव सञ्जितं धनानाम्।। 7।।

卐12.9.8 यत् प्रोक्षणमपतद्बर्हिषस्परि दक्षिणतो वेद्या इन्द्रियावत्। वशा सम्भूत्याधि गौरमीमेतस्याः पीवो अभवद्वर्षवासस्म्।। 8।।

卐12.9.9 नमो महिम्न उत चक्षुषे वां वशर्षभो मनसा तत् कृणोमि। देवाँ अपीतं पथिभिश्शिवेभिर्मानो हिंसिष्टं हरसा दैव्येन।। 9।।

卐12.9.10 वशामस्कन्ददृषभस्तिष्ठन्तीमधि तन्तुषु। गर्भं तमद्य को वेद यतिधा सो अकल्पयत्।। 10।। 12 - 10

卐12.10.1 रूपमेकः पर्यभवद्राजा नामैक उच्यते। पतीरूपस्यैको रूपं रूपमेकं सुकृत्वनाम्।। 1।।

卐12.10.2 प्रजापतिः परमेष्ठी मृत्युर्विश्वानरस्स्वः। सरस्वानस्या यज्ञस्य वशाया अधि जज्ञिरे।। 2।।

卐12.10.3 यस्य गृह आदायेत वशा देवकृतं हविः। निधानमस्या एष्यं दुहित्रे पत्यामिव।। 3।।

卐12.10.4 नास्याः सकृदभि तिष्ठेन्नास्य श्लोणा गृहे स्यात्। वशा कन्येव दुर्मङ्कापचित्या विजानता।। 4।।

卐12.10.5 नैनां रक्षेद् ब्राह्मणेभ्यो नामा वि ग्लापयाति च। यतीं न प्रत्यावर्तयेद् यस्य गोषु वशा स्यात्।। 5।।

卐12.10.6 नास्या वशमारुन्धेद् देवा मनुष्या उत। वशं यदन्वैद् ब्रह्मणा तस्मादेषाभवद्वशा।। 6।।

卐12.10.7 वशं कृण्वाना वशिनीयमागन् पदं कल्याण्यवपश्यमाना। अनिष्ठ्येष्टिमभि जायमाना यज्ञस्य मात्रामभिकल्पमाना।। 7।।

卐12.10.8 इन्द्रवन्तस्ते मरुतस्तुरीयं भेजिरे वशे। तुरीयमादित्या रुद्रास्तुरीयं वसवो वशे।। 8।।

卐12.10.9 तुरीयभाज आदित्यान् वशायाः कवयोः विदुः। अथास्याः पथ्यैका तनुश्चतस्रश्चक्लृपे दिशः।। 9।।

卐12.10.10 वशा पन्था मन्वपश्यन्नाकपृष्ठं स्वर्विदाम्। आदित्या एनामन्वायन्नृषभश्च तपस्विनः।। 10।। 12 - 11

卐12.11.1 पदेपदे कल्पयन्त आदित्याङ्गिरसो यजुः। ईडाना अन्वायन्वशां तदैडं सामोच्यते।। 1।।

卐12.11.2 वशेडा वशानुमतिर्वशामाहुस्सरस्वतीम्। विराजं मन्यन्ते वशां वाग्वशा पृथिवी वशा।। 2।।

卐12.11.3 वशा देष्ट्री सिनीवाली वशोषा निर्ऋतिर्वशा। वशायां मृत्युमविशदा मृत्युमविशद्वशा।। 3।।

卐12.11.4 अग्निर्वागुदकं चक्षुर्मनो वातो वशी वशा। तन्वं को अस्यास्तां वेद ययोदक्रामदेकया।। 4।।

卐12.11.5 यां चक्षुषा मनसा सं विदाना हृदा पश्यन्ति कवयो मनीषिणः। तस्याः प्रजापतिः पशूनां वशा राज्ञा नान्तवेषा सृष्टिः।। 5।।

卐12.11.6 को वशाया ऊधो वेद क उल्बं च जरायु च। स्तनानस्याः को वेद क इ तद्वेद यद्दुहे।। 6।।

卐12.11.7 अहमस्या ऊधो वेदाहमुल्बं च जरायु च। स्तनानस्या अहं वेदाथो तद्वेद यद्दुहे।। 7।।

卐12.11.8 नैनामहं रक्षेयं दद्यामेव स्याच्च मे। स्तनाह्यस्या अहं वेद क्षीरमुल्बं च जरायु च।। 8।।

卐12.11.9 कृत्तिर्योनिरधिवासो जरायु पाण्डमुल्बं नाभिरुष्णीषमस्याः। आ जरसं धयतु मातरं वशी ब्रह्मभिः क्लृप्तस्स ह्यस्य बन्धुः।। 9। (इति पञ्चदशर्चो नाम द्वादशकाण्डे प्रथमोऽनुवाकः) 12 - 12

卐12.12.1 इन्द्रस्य नु वीर्याणि प्र वोचं यानि चकार प्रथमानि वज्री। अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत् पर्वतानाम्।। 1।।

卐12.12.2 अहन्नहिं पर्वते शिश्रियाणं त्वष्टास्मै वज्रं स्वर्यं ततक्ष। वाश्रा इव धेनवस्स्यन्दमाना अञ्जस्समुद्रमव जग्मुरापः।। 2।।

卐12.12.3 वृषायमाणो ऽवृणीत सोमं त्रिकद्रुकेष्वपिबत् सुतस्य। आ सायकं मघवा दत्त वज्रमहन्नेनं प्रथमजा महीनाम्।। 3।।

卐12.12.4 यदिन्द्राहन् प्रथमजामहीनामान् मायिनाममिनाः प्रोत मायाः। आत् सूर्यं जनयन् द्यामुषासं तादित्ना शत्रुन्न किला विवित्से।। 4।।

卐12.12.5 अहन् वृत्रं वृत्रतरं व्यंसमिन्द्रो वज्रेण महता वधेन। स्कन्धांसीव कुलिशेना विवृक्णाहिः शयदुपपृक् पृथिव्याः।। 5।।

卐12.12.6 अयोद्धेव दुर्मद आ हि जुह्वे महावीरं तु विबाधमृजिषम्। नातारीदस्य समृतिं वधानां सं रुजानाः पिपिष इन्द्रशत्रुः।। 6।।

卐12.12.7 अपादहस्तो अपृतन्यदिन्द्रमास्य वज्रमधि सानौ जघान। वृष्णो वध्रिः प्रतिमानं वुभूषन् पुरुत्रा वृत्रो अशयद्यस्तः।। 7।।

卐12.12.8 नदं न भिन्नममुया शयानं मनो रुहाणा अति यन्त्यापः। याश्चिद्वृत्रो महिना पर्यतिष्ठत् तासामहिः पत्सुतश्शीर्बभूव।। 8।।

卐12.12.9 नीचावया अभवद्वृत्रपुत्रेन्द्रो अस्या अव वधर्जभार। उत्तरा सूरधरः पुत्र आसीद् दानुश्शये सह वत्सा न धेनुः।। 9।।

卐12.12.10 अतिष्ठन्ती नामनिवेशनानां काष्ठानां मध्ये निहितं शरीरम्। वृत्रस्य निण्यं वि चरन्त्यापो दीर्घं तम आशयदिन्द्रशत्रुः।। 10।। 12 - 13

卐12.13.1 दासपत्नीरहिगोपा अतिष्ठन् निरुद्धा आपः पणिनेव गावः। अपां बिलमपिहितं यदासीद्वृत्रं जघन्वाँ अप तद् ववार।। 1।।

卐12.13.2 अश्व्यो वारोऽभवस्तदिन्द्र सृके यत्त्वा प्रत्यहन्देव एकः। अजयो गा अजयश्शूर सोममवासृजस्सर्तवे सप्त सिन्धून्।। 2।।

卐12.13.3 नास्मै विद्युन् न तन्यतुः सिषेध न याम्यहमकिरद्ध्रादुनिं च। इन्द्रश्च यद्युयुधाते अहिश्चोतापरीभ्यो मघवा वि जिग्ये।। 3।।

卐12.13.4 अहेर्यातारं कमपश्य इन्द्र हृदि यत्ते जघ्नुषो भीरगच्छत्। नव च यन्नवतिं च स्रवन्तीश्श्येनो न भीतो अतरो रजांसि।। 4।।

卐12.13.5 इन्द्रो जातोऽवसितस्य राजा शमस्य च शृङ्गिणो वज्रबाहुः। सेदु राजा क्षयति चर्षणीनामरान्न नेमिः परिता बभूव।। 5।। 12 - 14

卐12.14.1 यो जात एव प्रथमो मनस्वान् देवो देवान् क्रतुना पर्यभूषत्। यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः।। 1।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐12.14.2 यः पृथिवीं व्यधमानामदृंहद् यः पर्वतान् प्रकुपिताँ अरम्णात्। यो अन्तरिक्षं विममे वरो यो द्यामस्तभ्नात् स जनास इन्द्रः।। 2।।

卐12.14.3 यो हत्वा हिमरिणात् सप्त सिन्धून् यो गा उदाजदपधा बलस्य। यो अश्मनोरन्तरग्निं जजान संवृक् समत्सु स जनास इन्द्रः।। 3।।

卐12.14.4 येनेमा विश्वा च्यवना कृतानि यो दासं वर्णमधरं गुहाकः। श्वघ्नीव यो जिगीवाल्लँक्षमाददर्यः पुष्टानि स जनास इन्द्रः।। 4।।

卐12.14.5 यं स्मा पृच्छन्ति कुह सेति घोरमुतेमाहुर्नैषो अस्तीत्येनम्। सो अर्यः पुष्टीर्वीज इवामिनाति श्रदस्मै दत्त स जनास इन्द्रः।। 5।।

卐12.14.6 यो रध्रस्य चोदिता यः कृशस्य यो ब्रह्मणो नाधमानस्य कीरेः। युक्तग्राव्णो योऽविता सुशिप्रस्सुतसोमस्य स जनास इन्द्रः।। 6।।

卐12.14.7 यस्याश्वासः प्रदिशि यस्य गावो यस्य ग्रामा यस्य विश्वे रथासः। यस्सूर्यं य उषसं जजान यो अपां नेता स जनास इन्द्रः।। 7।।

卐12.14.8 यं क्रन्दसी संयती विह्वयेते परेऽवर उभयाऽमित्राः। समानं चिद् रथमातस्थिवांसा नाना हवेते स जनास इन्द्रः।। 8।।

卐12.14.9 यस्मान्नर्ते विजयन्ते जनासो यं युध्यमाना अवसे हवन्ते। यो विश्वस्य प्रतिमानं बभूव यो अच्युतच्युत् स जनास इन्द्रः।। 9।।

卐12.14.10 यश्शश्वतो मह्येनो दधानानबुध्यमानान् सर्वा जघान। यश्शर्धते नानुददाति शृध्यां यो दस्योर्हन्ता स जनास इन्द्रः।। 10।। 12 - 15

卐12.15.1 यश्शम्बरं पर्वतेषु क्षियन्तं चत्वारिंश्यां शरद्यन्वविन्दत्। ओजायमानं यो अहिं जघान दानुं शयानं स जनास इन्द्रः।। 1।।

卐12.15.2 यश्शम्बरं पर्यचरच्छचीभिर्यो वा वृकस्य नापिबत् सुतम्। अन्तर्गिरौ यजमानं बहुं जनं यस्तं नासूरुक्षु स जनास इन्द्रः।। 2।।

卐12.15.3 यस्सप्तरश्मिर्वृषभस्तु विष्मानवासृजत् सर्तवे सप्त सिन्धून्। यो रौहिणमस्फुरद् वज्रबाहुर्द्यामारोहन्तं स जनास इन्द्रः।। 3।।

卐12.15.4 द्यावाचिदस्मै पृथिवीनमेते शुष्माच्चिदस्य पर्वता भयन्ते। यस्सोमपा निचितो वज्रबाहुर्यो वज्रहस्तस्स जनास इन्द्रः।। 4।।

卐12.15.5 यस्सुन्वन्तमवति यः पचन्तं यश्शंसन्तं यश्शशमानमूती। यस्य ब्रह्मवर्धनं यस्य सोमो यस्येदं राधस्स जनास इन्द्रः।। 5।।

卐12.15.6 यस्सुन्वते पचते दुध्र आ चिद् वाजं दर्दर्षि स किलासि सत्यः। वयं त इन्द्र विश्व ह प्रियासस्सुवीरासो विदथ मा वदेम।। 6।।

卐12.15.7 जातो व्यख्यत् पित्रोरुपस्थे भुवो न वेद जनितुः परस्य। तविष्यमाणोन्वोज अख्यद् व्रता देवानां स जनास इन्द्रः।। 7।।

卐12.15.8 यस्सोमकामो हर्यश्व आसु यस्माद्रेजन्ते भुवनानि विश्वा। यो जघान शम्बरं यश्च शुष्णं य एकवीरस्स जनास इन्द्रः।। 8।। 12 - 16

卐12.16.1 शन्न इन्द्राग्नी भवतामवोभिश्शन्न इन्द्रावरुणा रातहव्या। शमिन्द्रासोमा सविताय शँयोश्शन्न इन्द्रापूषणावाजसातौ।। 1।।

卐12.16.2 शन्नो भगश्शमुनश्शंसो अस्तु शन्नः पुरन्धि शमु सन्तु रायः। शन्नस्सत्यस्य सूयमस्य शंसश्शं नो अर्यमा पुरुजातो अस्तु।। 2।।

卐12.16.3 शन्नो धाता शमुधर्ता नो अस्तु शन्न उरूची भवतु स्वधाभिः। शं रोदसी बृहती शन्न अद्रिश्शन्नो देवानां सुहवानि सन्तु।। 3।।

卐12.16.4 शन्नो अग्निर्ज्योतिरनीको अस्तु शं मित्रावरुणा अश्विना शम्। शन्नस्सुकृतां सुकृतानि सन्तु शन्न इषिरो अभि वातु वातः।। 4।।

卐12.16.5 शन्नो द्यावापृथिवी पूर्वहूतौ शमन्तरिक्षं दृशये नोऽस्तु। शन्न ओषधीर्वनिनो भवन्तु शन्नो रजसः पतिरस्तु जिष्णुः।। 5।।

卐12.16.6 शन्न इन्द्रो वसुभिर्देवोऽस्तु समादित्येभिर्वरुणस्सुशंसः। शन्नो रुद्रो रुद्रेभिर्जलाष श्शन्नस्त्वष्टाग्नाभिरिह श्रृणोतु।। 6।।

卐12.16.7 शन्नस्सोमो भवतु ब्रह्म शन्नश्शन्नो ग्रावाणश्शमु सन्तु यज्ञाः। शन्नस्स्वरुणां मितयो भवन्तु शन्नः प्रस्वः सम्बस्तु वेदिः।। 7।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐12.16.8 शन्नस्सूर्य उरुचक्षा उदेतु शन्नो भवन्तु प्रदिशश्चतस्रः। शन्नः पर्वता ध्रुवयो भवन्तु शन्नस्सिन्धवश्शमु सन्वापः।। 8।।

卐12.16.9 शन्न अदितिर्भवतु व्रतेभिश्शन्नो भवन्तु मरुतस्स्वर्काः। शन्नो विष्णु शमु पूषा नोऽस्तु शन्नो भवित्रं शम्वस्तु वायुः।। 9।।

卐12.16.10 शन्नो देवस्सविता त्रायमाणश्शन्नो भवन्तूषसो विभातीः। शन्नः पर्जन्यो भवतु प्रजाभ्यश्शन्नः क्षेत्रस्य पतिरस्तु शम्भुः।। 10।। 12 - 17

卐12.17.1 शन्नस्सत्यस्य पतयो भवन्तु शन्न अर्वन्तः शमु सन्तु गावः। शन्न ऋभवस्सुकृतस्सुहस्ताश्शन्नो भवन्तु पितरो हवेषु।। 1।।

卐12.17.2 शमभिषाचश्शमु रातिषाचश्शन्नो दिव्याः पार्थिवाश्शन्नो अप्याः।। 2।।

卐12.17.3 शन्नो अज एकपाद् देवोऽस्तु शमहिर्बुध्न्यश्शं समुद्रः। शन्नो अपां नपात्पेरुरस्तु शन्नः पृश्निर्भवतु देवगोपाः।। 3।।

卐12.17.4 आदित्या रुद्रा वसवो जुषन्तामिदं ब्रह्म क्रियमाणं नवीयः। श्रृण्वन्तु नो दिव्याः पार्थिवासो गोजाता उत ये यज्ञियासः।। 4।।

卐12.17.5 ये देवानामृत्विजो यज्ञियासो मनोर्यजत्रा अमृता ऋतज्ञाः। तेनो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिस्सदा नः।। 5।।

卐12.17.6 तदस्तु मित्रावरुणा तदग्ने शंयो रश्मभ्यमिदमस्तु शस्तम्। अशीमहि गातुमुत प्रतिष्ठां नमो दिवे बृहते सादनाय।। 6।। 12 - 18

卐12.18.1 अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अधिराज एषः। तस्मै जुहोमि हविषा घृतेन मा देवानां यूयवद् भागधेयम्।। 1।।

卐12.18.2 युक्तो वह जातवेदः पुरस्तादग्ने विद्धि क्रियमाणं यथेदम्। त्वं भिषग् भेषजस्यापि कर्ता त्वया गामश्वं पुरुषं सनेम।। 2।।

卐12.18.3 तथा त्वमग्ने कृणु जातवेदोऽनेन विद्वान् हविषा यविष्ठ। पिशाचो ऽस्य यतमो जघास यथा सोऽस्य परिधिष्पताति।। 3।।

卐12.18.4 योऽस्य दिदेव यतमो जघास यथा सोऽस्य परिधिष्पताति। तथा त्वमग्ने कृणु जातवेदो विश्वेभिर्देवैस्सह संविदानः।। 4।।

卐12.18.5 अक्ष्यौ निविध्य हृदयं निविध्य जिह्वां नि तृन्धि प्र दतश्श्रृणीहि। पिशाचो अस्य यतमो जघासाग्ने यविष्ठ प्रति तं श्रृणीहि।। 5।।

卐12.18.6 यदस्य हृतं विहृतं यत्पराभृतमात्मनो जग्धमुत यत्पिशाचैः। तदग्ने विद्वान् पुनरा भर त्वं शरीरे प्राणमसुमेरयास्य।। 6।।

卐12.18.7 अपां त्वापाने यतमो ददम्भौदने मन्थे यदि वोत लेहे। तदात्मना प्रजया पिशाचा वि यात यन्तामगदोऽयमस्तु।। 7।।

卐12.18.8 क्षीरे त्वा मांसे यतमो ददम्भाकृष्टपच्ये अशने धान्ये यः। तदात्मना प्रजया पिशाचा वि यात यन्तामगदोऽयमस्तु।। 8।।

卐12.18.9 आमेषु पक्के शबले विपक्के य इमं पिशाचो अशने ददम्भ। तमिन्द्रो वाजी वज्रेण हन्तु भिनत्तु सोमश्शिरोऽस्य धृष्णुः।। 9।।

卐12.18.10 दिवा त्वा नक्तं यतमो ददम्भ क्रव्याद् यातुश्शयने पिशाचः। तदग्ने विद्वान् प्रदह क्षिणीह्यप्येनं धेहि निर्ऋतेरुपस्थे।। 10।। 12 - 19

卐12.19.1 सोमस्येन्द्रस्य वरुणस्य राज्ञो विष्णोर्बलेन सवितुस्सवेन। अग्नेर्होत्रेण प्र णुदे पिशाचान् यविष्ठस्य ब्रह्मणा जातवेदसः।। 1।।

卐12.19.2 क्रव्यादमग्ने रुधिरं पिशाचं मनोहनं जहि जातवेदस्सहोभिः। श्रद्धेमं ब्रह्म जुषतां दक्षिणायुर्यथा जीवात्यगदो भवाति।। 2।।

卐12.19.3 पुनस्त्वा प्राणः पुनरैत्वायुः पुनश्चक्षुः पुनरैतु श्रोत्रम्। अपघ्ना नो दुरितानि विश्वा शतं हिमास्सर्ववीरा मदेम।। 3।।

卐12.19.4 पुनरस्मै मनो धेहि पुनरायुः पुनर्बलम्। अपानमस्य प्राणं चाग्ने वर्धय जीवसे।। 4।।

卐12.19.5 चक्षुस्सूर्य पुनर्देहि वात प्राणं समीरय। शरीरमस्य मांसान्यग्ने सं भारया त्वम्।। 5।।

卐12.19.6 समा भर जातवेदो यज्जग्धं यत् पराभृतम्। गात्राण्यस्य कल्पय पुनराप्यायतामयम्।। 6।।

卐12.19.7 सोमस्येव जातवेदो अंशुरा प्यायतामयम्। अग्ने विरप्सिनं मेध्यमयक्ष्मं कृणु जीवसे।। 7।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐12.19.8 सम्मा सिञ्चन्तु मरुतस्संपूषा सं बृहस्पतिः। सम्मायामग्निस्सिञ्चतु प्रजया च धनेन च दीर्घमायुष्कृणोतु मे।। 8।।

卐12.19.9 विमुञ्चामि ब्रह्मणा जातवेदसमग्निं होतारमजरं रथस्पृतम्। सर्वा देवानां जनिमानि विद्वान् यथाभागं बहतु हव्यमग्निः।। 9।।

卐12.19.10 ये पुमांसो यातुधाना या स्त्रियो यातुधान्यः। बलवदिन्द्रस्य वज्रेणा वाचीनानव हन्मि तान्।। 10।। 12 - 20

卐12.20.1 यं शपामो य उ नश्शपाति यं द्विष्मो य उ द्वेषत् पिशाचः। क्रव्यादमग्ने महता वधेन तमत्रापि प्रदह जातवेदः।। 1।।

卐12.20.2 य आरेभे यस्य वा घास्यप्सरा यः कृण्वेन संविदो यातुमावान्। उलूकयातुं भृमलो यस्य यातुस्तमत्रापि प्र दह जातवेदः।। 2।।

卐12.20.3 य आ ददे यस्य वा घासि पित्र्यास्तेन श्वयातुरुत संभिधेहिभिः। यः पताद्रोधनस्याधिदेवनं क्रव्यात् पिशाचः क्रविषस्तितृप्सन्। उलूकयातुं भृमलो यस्य यातुस्तमत्रापि प्र दह जातवेदः।। 3।।

卐12.20.4 यः पुरुषेणेयते रथेन क्रव्याद् यातुः पिशुनः पिशाचः। वैश्वानरेण सयुजा सूर्येण तमत्रापि प्र दह जातवेदः।। 4।।

卐12.20.5 यो नो बलिं मृगया यश्च नः कृषिं परि तिष्ठाद् यातुभिर्यश्च नश्शपात्। अस्ता रुद्रः श्रथत्वायुरस्य तमत्रापि प्र दह जातवेदः।। 5।।

卐12.20.6 मा यातुमान् विदत मृडितारमलोका अस्मै प्रदिशो भवन्तु। समेनं तपतां रोदसि उभे तमत्रापि प्रदह जातवेदः।। 6।।

卐12.20.7 ज्योतीष्मतीस्तपना याश्च रोचना प्रत्योषन्तीस्तन्वो यास्ते अग्ने। ताभिर्मे मर्माण्यभितो ददस्व मा त्वा दभन्यातुधाना नृचक्षः।। 7।।

卐12.20.8 अपो देवीः पिशाचानामप नह्यन्वास्यम्। यथेमं ममात्मानममाधृष्य पुनः पतान्।। 8।।

卐12.20.9 सदं पुष्पे सदं फले सदमिन्द्राभिरक्षिते। सदा पिशाचा म्रियन्तां मैषामुच्छेषि कश्चन।। 9।।

卐12.20.10 ये पतन्तो यातुधाना दिवानक्तमुपाचरान्। रात्री मा तेभ्यो रक्षत्वह्न आत्मानं परि ददे।। 10।। 12 - 21

卐12.21.1 इमं बध्नामि ते मणिं दीर्घायुत्वाय तेजसे। दर्भं सपत्न जम्भनं द्विषतस्तपनं हृदः।। 1।।

卐12.21.2 द्विषतस्तापयन् हृदश्शत्रूणां तापयन् मनः। दुर्हार्दस्सर्वांस्त्वं दर्भ घर्म इवाभीत् सुतापयन्।।
2।।
卐12.21.3 घर्म इवाभितपन् दर्भ द्विषतो नितपन् मणे। हृदस्सपत्नानां भिन्धीन्द्र इव विरुजं बलम्।।
3।।
卐12.21.4 भिन्धि दर्भ सपत्नानां हृदयं द्विषतां मणे। उद्यं त्वचमिव भूम्याश्शिर एषां वि पातय।। 4।।
卐12.21.5 भिन्धि दर्भ सपत्नान्मे भिन्धि मे पृतनायतः। भिन्धि मे सर्वान् दुर्हार्दो भिन्धि मे द्विषतो
मणे।। 5।।
卐12.21.6 छिन्धि दर्भ सपत्नान्मे छिन्धि मे पृतनायतः। छिन्धि मे सर्वान् दुर्हार्दः छिन्धि मे द्विषतो
मणे। 6।।
卐12.21.7 वृश्च दर्भ सपत्नान्मे वृश्च मे पृतनायतः। वृश्च मे सर्वान् दुर्हार्दो वृश्च मे द्विषतो मणे।। 7।।
卐12.21.8 कृन्त दर्भ सपत्नान्मे कृन्त मे पृतनायतः। कृन्त मे सर्वान् दुर्हार्दः कृन्त मे द्विषतो मणे।।
8।।
卐12.21.9 पिंश दर्भ सपत्नान्मे पिंश मे पृतनायतः। पिंश मे सर्वान् दुर्हादः पिंश मे द्विषतो मणे।।
9।।
卐12.21.10 विध्य दर्भ सपत्नान्मे विध्य मे पृतनायतः। विध्य मे सर्वान् दुर्हार्दो विध्य मे द्विषतो मणे।।
10।। 12 - 22
卐12.22.1 निक्ष दर्भ सपत्नान् मे निक्ष मे पृतनायतः। निक्ष मे सर्वान् दुर्हार्दो निक्ष मे द्विषतो मणे।।
1।।
卐12.22.2 तृन्धि दर्भ सपत्नान्मे तृन्धि मे पृतनायतः। तृन्धि मे सर्वान् दुर्हार्दस्तृन्धि मे द्विषतो मणे।।
2।।
卐12.22.3 भङ्ग्धि दर्भ सपत्नान्मे भङ्ग्धि मे पृतनायतः। भङ्ग्धि मे सर्वान् दुर्हार्दो भङ्ग्धि मे द्विषतो मणे।।
3।।
卐12.22.4 मृण दर्भ सपत्नान्मे मृण मे पृतनायतः। मृण मे सर्वान् दुर्हार्दो मृण मे द्विषतो मणे।। 4।।
卐12.22.5 मन्थ दर्भ सपत्नान् मे मन्थ मे पृतनायतः। मन्थ मे सर्वान् दुर्हार्दो मन्थ मे द्विषतो मणे।।
5।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐12.22.6 पिण्ढि दर्भ सपत्नान्मे पिण्ढि मे पृतनायतः। पिण्ढि मे सर्वान् दुर्हार्दः पिण्ढि मे द्विषतो मणे।। 6।।

卐12.22.7 ओष दर्भ सपत्नान् मे ओष मे पृतनायतः। ओष मे सर्वान् दुर्हार्द ओष मे द्विषतो मणे।। 7।।

卐12.22.8 दह दर्भ सपत्नान् मे दह मे पृतनायतः। दह मे सर्वान् दुर्हार्दो दह मे द्विषतो मणे।। 8।।

卐12.22.9 जहि दर्भ सपत्नान् मे जहि मे पृतनायतः। जहि मे सर्वान् दुर्हार्दो जहि मे द्विषतो मणे।। 9।।

卐12.22.10 यत्ते दर्भो जरामृत्यू स ते मर्मसु वर्म ते। तेनेमं वर्मिणं कृत्वा सपत्नान् जहि वीर्यैः।। 10।।

卐12.22.11 शतन्ते दर्भ वर्माणि सहस्रं वीर्याणि ते। तमस्मै विश्वे त्वां देवा जरसे भर्तवा अदुः।। 11।।

卐12.22.12 त्वामाहुर्देव वर्म त्वां दर्भ ब्रह्मणस्पतिम्। त्वामिन्द्रस्याहुर्वर्म त्वं राष्ट्राणि रक्षसि।। 12।।

卐12.22.13 सपत्नक्षयणं दर्भ द्विषतस्तपनं हृदः। मणिं क्षत्रस्य वर्धनं तनूपानं कृणोमि ते।। 13।।

卐12.22.14 यत् समुद्रो अभ्यक्रन्दत् पर्जन्यो विद्युता सह। ततो हिरण्ययो बिन्दुस्ततो दर्भो अजायत।। 14। (इति पञ्चदशर्चो नाम द्वादशकाण्डे द्वितीयोऽनुवाकः) इत्यथर्ववेदे पैप्पलाद संहितायां पञ्चदशर्चो नाम द्वादशकाण्डः समाप्तः।

## ॐ अथ त्रयोदशः काण्डः 13 - 1

卐13.1.1 ओँ अन्तर्हितं मे बृहदन्तरिक्षमन्तर्हिताः पर्वता अग्नयो मे। मैषां राध्यभिचार एष प्रत्यगेनान् प्रतिसरेण हन्मि।। 1।।

卐13.1.2 तपश्श्रमावन्तरौ मत्परीतं ब्रह्म यज्ञमन्तरं मद् दधामि। मैषां राध्यभिचार एष प्रत्यगेनान् प्रतिसरेण हन्मि।। 2।।

卐13.1.3 अग्नीषोमावन्तरौ मद् भवाथो दिवं वर्म पृथिवीं च कृण्वे। मैषां राध्यभिचार एष प्रत्यगेनान् प्रतिसरेण हन्मि।। 3।।

卐13.1.4 अन्तर्हितं मे साम प्रस्तुतमन्तर्हितः परमेष्ठी प्रजापतिः। मैषां राध्यभिचार एष प्रत्यगेनान् प्रतिसरेण हन्मि।। 4।।

卐13.1.5 अन्तर्हिता सर्पराज्ञी विराण्मेऽन्तर्हितः पुरुषो मेध्यो मे। मैषां राध्यभिचार एष प्रत्यगेनान् प्रतिसरेण हन्मि।। 5।।

卐13.1.6 अन्तर्हिता मे षडुर्वीः सध्रीचीरन्तर्हिताः साध्या आप्त्या मे। मैषां राध्यभिचार एष प्रत्यगेनान् प्रतिसरेण हन्मि।। 6।।

卐13.1.7 अन्तर्हिता म ऋषयः प्रचेतसोऽन्तर्हितस्सूर्यो मातरिश्वा। मैषां राध्यभिचार एष प्रत्यगेनान् प्रतिसरेण हन्मि।। 7।।

卐13.1.8 अन्तर्हिता मे नद्यस्स्यन्दमाना अन्तर्हिता ओषधीः पुष्पिणीर्मे। मैषां राध्यभिचार एष प्रत्यगेनान् प्रतिसरेण हन्मि।। 8।।

卐13.1.9 अन्तर्हिताः पशवः कक्षा मेऽन्तर्हितं वयो यत् पतत्रि। मैषां राध्यभिचार एष प्रत्यगेनान् प्रतिसरेण हन्मि।। 9।।

卐13.1.10 अन्तर्हिता म इषवो ब्राह्मणानामन्तर्हिता वनस्पतयस्समूलाः। मैषां राध्यभिचार एष प्रत्यगेनान् प्रतिसरेण हन्मि।। 10।। 13 - 2

卐13.2.1 अन्तर्हिता देवतल्पाः पुरो मेऽन्तर्हिता जगती छन्दसां मे। मैषां राध्यभिचार एष प्रत्यगेनान् प्रतिसरेण हन्मि।। 1।।

卐13.2.2 अन्तर्हिता मे समुद्रा द्वादशा अन्तर्हिता उषसि तारका मे। मैषां राध्यभिचार एष प्रत्यगेनान् प्रतिसरेण हन्मि।। 2।।

卐13.2.3 अन्तर्हिता अग्नयो धिष्ण्या मेऽन्तर्हिता ऋतव आर्तवा मे। मैषां राध्यभिचार एष प्रत्यगेनान् प्रतिसरेण हन्मि।। 3।।

卐13.2.4 अन्तर्हिता मे प्रदिशश्चतस्त्रो ऽन्तर्भूतमुत भव्यं दधेऽहम्। मैषां राध्यभिचार एष प्रत्यगेनान् प्रतिसरेण हन्मि।। 4।।

卐13.2.5 हन्मि तेऽहं कृतं हविर्यो मे घोरमचीक्लृपः। अपाञ्चौ त उभौ बाहू अपि नह्याम्यास्यम्।। 5।।

卐13.2.6 अपि नह्यामि ते बाहू अपि नह्याम्यास्यम्। अग्नेर्देवस्य मन्युना तेन तेऽवधिषं हविर्यो मे घोरमचीक्लृपः।। 6।। 13 - 3

卐13.3.1 उदितश्शतयोजनमिन्द्रो वर्तयते रथम्। सायकं क्षुरवर्तमानमहेर्जातानि जम्भयन्।। 1।।

卐13.3.2 दृढास आसन्नहयो हता उदरसर्पिणः। पुच्छमिद्द्वेष्यायन्त श्वापिण्डमदन्निव।। 2।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐13.3.3 पापक पापरूपक किं मे शखायमातुदः। न मामपश्य आगतं सतीनं विषदूषणम्।। 3।।
卐13.3.4 अहि जम्भाश्वरामसि मुष्कावरुहो गवामिव। पीलु उप स्वजं हन्म उपस्तम्भे पृदाकम्।। 4।।
卐13.3.5 ये के चेदमुपासौषुर्वातस्येव पृथग् यतः। अङ्गो नु सर्वे ब्रूताहेयमरसं विषम्।। 5।।
卐13.3.6 त्रिन्धिसि ते निषदनं त्रिपुषि पाप ते गृहः। अच्छन्नं त्वा वातो हन्त्यच्छन्नमभि वर्षति।। 6।।
卐13.3.7 नाकुलेन भेषजेन तेनाहीन् जम्भयामसि। मश्वतुर्नाम वृक्षकः स एनान् अरसान् अकः।। 7।।
卐13.3.8 असिताहेरहं विषमुभयोरिशितस्य च। अभिक्रन्दस्य या रोपीस्ता इतोऽप नयामसि।। 8।।
卐13.3.9 इदं पैद्वो अजायतेदमस्य पिपर्तनम्। इदं कनिक्रदो मृगो विषमेति पराभवन्।। 9।।
卐13.3.10 विषूचीना वाता वान्तु विष्वग्वर्षन्तु वृष्टयः। विष्वग्विष प्र मेह त्वं शतधार इवावटः।। 10।। 13 - 4
卐13.4.1 निरितो हरितस्त्रजमिन्द्रो वर्तयते रथम्। तेनापिलिह्व इयते निपिसंनहिना मनः।। 1।।
卐13.4.2 येनेन्द्र दस्यूनमृणोर्येन वृत्रं पराभिनः। तेना शतक्रतो त्वमहेर्जातानि जम्भय।। 2।।
卐13.4.3 प्रत्यमोदत पृथिवी प्रति द्यौः प्रति सूर्यः। पैद्वो यदश्वमाता क्रन्देनाहीनपावपत्।। 3।।
卐13.4.4 यदा पैद्वोऽश्वमाता क्रन्देनाहीनपावपत्। रज्जुष्म द्त्वती शेरे पूयन्तीं पृथिवीमनु।। 4।।
卐13.4.5 नापो जीर्यन्ति नामृतं नेन्द्राणी अविधवा भवत्। न त्वामास्तेभिषद्विषमश्मानमिव सायकम्।। 5।।
卐13.4.6 इन्द्राग्नी मित्रावरुणा त्वष्टारमदितिं भगम्। हुवेहमर्वन्तं पैद्वं म्यामेयं पुरुषो रिषत्।। 6।।
卐13.4.7 सद्यो जातोऽकनिक्रदत् सोल्वो व्यधूनुत। क्रन्देनाश्वस्य वाजिनो ऽहन्यन्ताहयः पृथक्।। 7। (इति षोडशर्चो नाम त्रयोदशकाण्डे प्रथमोऽनुवाकः) 13 - 5
卐13.5.1 इमं स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया। भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव।। 1।।
卐13.5.2 यस्मै त्वमायजसे स साधत्यनर्वा क्षेति दधते सुवीर्यम्। सं तूताव नैनमश्नोत्यंहतिरग्ने सख्ये मा रिषामा वयं तव।। 2।।

卐13.5.3 भरामेध्मं कृणुवामा हवींषि ते चितयन्तः पर्वणा पर्वणा वयम्। जीवातवे प्रतरं साधया धियोऽग्ने सख्ये मा रिषामा वयं तव।। 3।।

卐13.5.4 शकेम त्वा समिधं साधया धियस्त्वे देवा हविरदन्त्याहुतम्। त्वमादित्याँ आ वह तान् ह्युष्मस्यग्ने सख्ये मा रिषामा वयं तव।। 4।।

卐13.5.5 त्वमध्वर्युरुत होतासि पूर्व्यः प्रशास्ता पोता जनुषा पुरोहितः। विश्वा विद्वाँ आर्त्विज्या धीर पूष्यस्यग्ने सख्ये मा रिषामा वयं तव।। 5।।

卐13.5.6 दिशां गोपा अस्य चरन्ति जन्तवो द्विपाच्च यदुत चतुष्पदक्तुभिः। चित्रः प्रकेत उषसो महाँ अस्यग्ने सख्ये मा रिषामा वयं तव।। 6।।

卐13.5.7 यो विश्वतः सुप्रतिकस्सदृंसि दूरे चित्सन्तडिदिवाति रोचसे। रात्र्याश्चिदन्धो अति देव पश्यस्यग्ने सख्ये मा रिषामा वयं तव।। 7।।

卐13.5.8 पूर्वो देवा भवतु सुन्वतो रथोऽस्माकं शंसोऽभ्यस्तु दूढ्यः। तदा जानितोत पुष्यता वचोऽग्ने सख्ये मा रिषामा वयं तव।। 8।।

卐13.5.9 वधैर्दुःशंसाँ अप दूढ्यो जहि दूरे वा ये अन्ति वा के चिदत्रिणः। अथा यज्ञाय गृणते सुगं कृध्यग्ने सख्ये मा रिषामा वयं तव।। 9।।

卐13.5.10 यदयुक्था अरुषा रोहिता रथे वातजूता वृषभस्येव ते रवः। आदिन्वसि वनिनो धूमकेतुनाग्ने सख्ये मा रिषामा वयं तव।। 10।। 13 - 6

卐13.6.1 अधस्वनादुत विभ्युः पतत्रिणो द्रप्सा यत्ते यवसादो व्यस्थिरन्। सुगं तत्ते तावकेभ्यो रथेभ्योऽग्ने सख्ये मा रिषामा वयं तव।। 1।।

卐13.6.2 त्वं मित्रस्य वरुणस्य धास्यव या तां मरुतां हेडो अद्भुतः। मृडा सु नो भूत्वेषां मनः पुनरग्ने सख्ये मा रिषामा वयं तव।। 2।।

卐13.6.3 देवो देवानामसि मित्रोऽद्भुतो वसुर्वसुनामसि चारुरध्वरे। शर्मन्त्स्याम तमसः प्रथस्त मेऽग्ने सख्ये मा रिषामा वयं तव।। 3।।

卐13.6.4 तत्ते भद्रं यत् समिद्धः स्वे दमे सोमाहुतो जरसे मृडयत्तमः। दधासि रत्नं द्रविणं च दाशुषेऽग्ने सख्ये मा रिषामा वयं तव।। 4।।

卐13.6.5 यस्मै त्वं सुद्रविणो ददासि सो नागास्त्वमदिते सर्वताता। यं भद्रेण शवसा चोदयासि प्रजावन्तो राधसा ते स्याम।। 5.

卐13.6.6 स त्वमग्ने सौभगत्वस्य विद्वानस्माकमायुः प्र तिरेह देव। तन्नो मित्रो वरुणो मामहन्तामदितिस्सिन्धुः पृथिवी उत द्यौः।। 6।। 13 - 7

卐13.7.1 किमिन्द्रस्य परिहितं किमग्नेः किं विष्णोस्त्वष्टुर्वरुणस्य वासः। बृहस्पतेरुत सोमस्य राज्ञः किं वसाना मरुतो वर्षयन्तु।। 1।।

卐13.7.2 धातूरुद्रस्य किं वायोर्वाजिनां वसनं महत्। किं पूषा ब्रह्मणस्पतिर्विश्वे देवाश्च बिभ्रति।। 2।।

卐13.7.3 किं देवानां परिधानं समानं यस्मिन्नेषां सांमनस्यं बभूव। क्व रात्री नि विशते क्वाहः क्वेदमभ्रं भवति यत्समेति व्येति च।। 3।।

卐13.7.4 कतमेनापो दिवमुद्वहन्ति कस्समेनोदयनेन नेता। वातस्य त्वा विद्युतां स्तनयित्नुरपां पृच्छाम्ययनान्यग्नेः।। 4।।

卐13.7.5 पृच्छामि त्वा पृषतीं रोहिणीं च वत्सं पृच्छामि सह मातरं त्वा। इन्द्रं त्वा नु पृच्छामि साक्षात् सभानां च सभापतिम्।। 5।।

卐13.7.6 को वयसा मदधान्नामानि कः पशूनां कस्सर्पाणां देवजना य आसन्। कोऽस्य जन्तोरदधाद् ब्रूहि नस्तत्।। 6।।

卐13.7.7 कति रोहा स्वरा रोहयन्ति येभी रोहितो दिवमारुरोह। राष्ट्रभृतः क्षत्रभृतो वसुभृतो वसुदानवो वसुयवः।। 7।।

卐13.7.8 कश्चतुर्धा विक्रमते महित्वा कं रक्षन्ति कवयोऽप्रमादम्। पुरुषं त्वा नु पृच्छामि साक्षान्मृत्योरङ्गानि कति तानि वेत्थ।। 8।।

卐13.7.9 यं सिषेव वृषभश्चर्षणीनामिन्द्रो वज्रमहिना स्पर्धमानः। येन वृत्रं मघवा सं पिपेशः तं नः प्र ब्रूहि यदि तं प्रवेत्थ।। 9।।

卐13.7.10 कः पर्वतानामदधान्नामानि को वनस्पतीनामदधादोषधीनाम्। पृच्छामि त्वा भुवनस्य नाभिं गां त्वा पृच्छामि कतमानि साक्षात्।। 10।। 13 - 8

卐13.8.1 देवतल्पा देवकोशाः क्वेह तान्नः प्र ब्रूहि यदि तान् प्रवेत्थ। पृच्छामि त्वा गरगिरः कियन्तो येभ्योऽग्निर्हव्यं वहति प्रजानन् हुतं मर्त्यैरमृतोमर्त्येभ्यः।। 1।।

卐13.8.2 स्वप्ने य एकस्तमसा सहैत्यङ्गानि गृण्हन् पुरुषस्य चक्षुः। स प्रातरेति तमसा पुनस्सहाज्योतिरेति क्व सददेति।। 2।।

卐13.8.3 व्रतपतिमधिपतिं मधुकृता मधुपतिम्। देवांस्त्वा सर्वान् पृच्छाम्यहुतादश्च ते कति।। 3।।

卐13.8.4 कोऽन्तरिक्षात् परि पश्यतीदं यस्मादग्र इन्द्रियं सं बभूव। महत्स कस्मादभयं विभाय कस्य युक्तस्यास्यास्त्रोकाल्लोहितं परापतत्तत्केह।। 4।।

卐13.8.5 इत्थमेके व्रजन्तीत्थमेके दक्षिणाः प्रत्यञ्च उदञ्चः प्राञ्चोऽभि व्रजन्त्येके। तेषां सर्वेषामिह सङ्गतिस्साकं स एको भूतश्चरति प्रजानन्।। 5।। 13 - 9

卐13.9.1 मरीचिरासीत् सा मनसस्समभवत्। सा प्रावीयत सा गर्भमधत्त। स गर्भोऽवर्धत स वृद्धोऽब्रवीज्जाया इति। तस्यै प्रजापतिरजुहोत् स्वधिष्ठाना चेति स्वधिचरणा चेति। प्राजपते स्वसुर्ज्यो कपाले वि जिहीथां मामासन्ताप्तं महान्तं लोकमभिपश्यमाने।। 1।।

卐13.9.2 सोऽजायत तस्य जातस्य द्यावापृथिवी पार्श्वे आस्तां समुद्रौ कुक्षी सूर्याचन्द्रमसावक्षी विराट् शिरः। तस्माज्जातात् सर्वे पाप्मानो विजन्ते सर्वे अस्मात्पाप्मामानो विजन्ते य एवं वेद।। 2। (इति षोडशर्चो नाम त्रयोदशकाण्डे द्वितीयोऽनुवाकः) इत्यथर्ववेदे पैप्पलादसंहितायां षोडशर्चो नाम त्रयोदशः काण्डस्समाप्तः

## ꣼ अथ चतुर्दशः काण्डः 14 - 1

卐14.1.1 एन्द्रो बाहूभ्यामभरच्चिकित्वानपो देवीर्वरुणाय प्रजानन्। तमादित्या अभ्यषिञ्चन्त सर्वे राजानमुग्रं बृहते रणाय तान आपो राजसूया अवन्तु।। 1।।

卐14.1.2 हिरण्य वर्णाश्शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः। या अग्निं गर्भं दधिरे सुवर्णास्ता न आपश्शं स्योना भवन्तु।। 2।।

卐14.1.3 यासां राजा वरुणो याति मध्ये सत्या नृते अवपश्यं जनानाम्। या अग्निं गर्भं दधिरे सुवर्णास्ता न आपश्शं स्योना भवन्तु।। 3।।

卐14.1.4 यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति। या अग्निं गर्भं दधिरे सुवर्णास्ता न आपश्शं स्योना भवन्तु।। 4।।

卐14.1.5 शिवेन मा चक्षुषा पश्यतापश्शिवया तन्वोप स्पृशत त्वचं मे। घृतश्चुतश्शुचयो याः पावकास्ता न आपश्शं स्योना भवन्तु।। 5।।

卐14.1.6 अपो देवीर्मधुमतीरगृण्हतोर्जस्वती राजसूया मयोभुवः। याभिर्मित्रावरुणावभ्यषिञ्चन् तान आपो राजसूया अवन्तु।। 6।।

卐14.1.7 वरुणेन प्रेषिता यन्ति शुभ्रा उत्सं देवीर्दधते या हिरण्ययम्। या ब्रह्मणा पुनते संविदानास्तान आपो राजसूया अवन्तु।। 7।।

卐14.1.8 अपस्समुद्राद्दिवमुद्वहन्ति दिवस्पृथिवीमभि यास्सृजन्ति। याभिरीशाना मरुतश्चरन्ति तान आपो राजसूया अवन्तु।। 8।।

卐14.1.9 या अमृतं बिभ्रति या मधुप्रियं या अगृभ्णन् ऋषयो देव सख्ये। याभिरिन्द्रमत्यनयन्नरातिस्तान आपो राजसूया अवन्तु।। 9।।

卐14.1.10 या जीवधन्या धनमुत्पृणन्ति देवायते दाशुषे मर्त्याय। यासां पयो अक्षितमक्षितानां तान आपो राजसूया अवन्तु। ।। 10।। 14 - 2

卐14.2.1 हिरण्यौपशा ध्वजनीः पुनाना यास्समुद्रमभ्यर्चन्ति धेनवः। याः पर्जन्यो बहत्यन्तरिक्षे ता न आपो राजसूया अवन्तु।। 1।।

卐14.2.2 रथन्तरे बृहती गीयमाने क्षत्रं जिन्वन्ति प्र तिरन्त्यायुः। याभिस्त्रयान् वाजिनो वाजयन्ति ता न आपो राजसूया अवन्तु।। 2।।

卐14.2.3 याभिस्सह वृत्रहा सोममिन्द्रो वसोरीशानो अपिवत् सुतस्य। यास्सप्त ऋषयः कवयः पुनन्ति ता न आपो राजसूया अवन्तु।। 3।।

卐14.2.4 सप्तऋषयो भरतमभ्यषिञ्चन्नास्मिन् राष्ट्रमदधुर्दक्षिणावत्। प्रजायै मनुमसुमवन्त देवास्ता न आपो राजसूया अवन्तु।। 4।।

卐14.2.5 याभिर्यज्ञं प्राञ्चमुक्षयन्ति धीरा याभिस्सोमं मधुपृचं पुनन्ति। याभिरिदं जीवति विश्वमेजत्ता न आपो राजसूया अवन्तु।। 5।।

卐14.2.6 यासां स्तोका मधुमया बभूवतुर्घृतं संज्ञानं मधु पिन्वते याः। यास्सोम आपो प्रणयन्ति ब्रह्मणा ता न आपो राजसूया अवन्तु।। 6।।

卐14.2.7 यासां पदो राज्यं वाजिनन्तु सोमस्य प्रसवमनु याः पवन्ते। अन्तर्वतीस्तरुणवत्सा घृताचीस्ता न आपो राजसूया अवन्तु।। 7।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐14.2.8 अजीजनन्त मतयस्स्वर्विदं आ ब्रह्मणा सूक्तधेयान्यगुः। असूषुत राजसूयाः पयांसि प्रासाविद्देवस्सविता भुवनानि विश्वा।। 8।।

卐14.2.9 सोमो राजा भवो राजा पशुपतिः पशूनां वरुणो धृतव्रतः। ये राजसूये असूयन्त देवास्ते ते क्षत्रं दधत्वायुरोजः।। 9।।

卐14.2.10 आस्थादुदस्थादजनिष्ट विप्रो मृधो व्यास्थदशसीत बाहू। आरे अवाधिष्ट निर्ऋतिं पराचैस्समपृक्त रश्मिभिस्सूर्यश्च।। 10।। 14 - 3(नीलरुद्रोपनिषत्)

卐14.3.1 अपश्यं त्वावरोहन्तं दिवितः पृथिवीमिव। अपश्यमस्यन्तं रुद्रं नीलग्रीवं शिखण्डिनं।। 1।।

卐14.3.2 दिव उग्रो ऽवारुक्षत् प्रत्यष्ठाद् भूम्यामधि। जनासः पश्यतेमं नीलग्रीवं विलोहितम्।। 2।।

卐14.3.3 एष ऐत्यवीरहा रुद्रो जलाषभेषजी। वि ते क्षेपमनीनषद्वातीकारो व्येतु ते।। 3।।

卐14.3.4 नमस्ते भव भामाय नमस्ते भव मन्यवे। नमस्ते अस्तु बाहुभ्यामुतो त इषवे नमः।। 4।।

卐14.3.5 यामिषं गिरिशन्त हस्ते विभर्ष्यस्तवे। शिवां गिरिश तां कृणु मा हिंसीः पुरुषान्मम।। 5।।

卐14.3.6 शिवेन वचसा त्वा गिरिशाच्छा वदामसि। यथा नस्सर्वमिज्जगदयक्ष्मं सुमनो असत्।। 6।।

卐14.3.7 या त इषुश्शिवतमा शिवं बभूवते धनुः। शिवा शरव्या या तव तया नो मृड जीवसे।। 7।।

卐14.3.8 या ते रुद्र शिवा तनूरघोरापापकाशिनी। तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकश।। 8।।

卐14.3.9 असौ यस्ताम्रो अरुण उत बभ्रुर्विलोहितः। ये चे मेऽभितो रुद्रा दिक्षु श्रितास्सहस्रशोऽवैषां हेड ईमहे।। 9।।

卐14.3.10 अदृशन्त्वावरोहन्तं नीलग्रीवं विलोहितम्। उत त्वा गोपा अदृशन्नुत त्वोदहार्यः। उतो त्वा विश्वा भूतानि तस्मै दृष्टाय ते नमः।। 10।। 14 - 4 (नीलरुद्रोपनिषत्)

卐14.4.1 नमोऽस्तु नीलशिखण्डाय सहस्राक्षाय वाजिने। अथो ये अस्य सत्वानस्तेभ्योऽहमकरं नमः।। 1।।

卐14.4.2 नमांसि त आयुधायानातताय धृष्णवे। उभाभ्यामकरं नमो बाहुभ्यां तव धन्वने।। 2।।

卐14.4.3 प्र मुञ्च धन्वनस्पर्युभयोरात्न्योर्ज्याम्। याश्च ते हस्त इषवः परा ता भगवो वप।। 3।।

卐14.4.4 अवतत्य धनुस्त्वं सहस्राक्ष शतेषुधे। निशीर्य शल्यानां मुखा शिवो नश्शम्भुरा चर।। 4।।

卐14.4.5 विज्यं धनुश्शिखण्डिनो विशल्यो वाणवाँ उत। अनेशन्नस्येषवः शिवो अस्य निषङ्गतिः।। 5।।

卐14.4.6 परि ते धन्वनो हेतिरस्मान् वृणक्तु विश्वतः। अथो य इषुधिस्तवारे अस्मिन्नि धेहि तम्।। 6।।

卐14.4.7 या ते हेतिर्मिढुष्टम हस्ते बभूव ते धनुः। तया त्वं विश्वतो अस्मानयक्ष्मया परि भुजहि।। 7।। 14 - 5

卐14.5.1 सुपार्श्वा कामदुघा न आगञ्छतौदना पयसा पिन्वमाना। ऊर्जं दुहाना अनपस्फुरन्ती यजमानस्य प्रतिरन्त्यायुः।। 1।।

卐14.5.2 गृभ्णामि मेध्यामुशतीं स्वस्तय ऊर्जस्वतीमनमीवां स्वाध्याम्। विश्वो लोको मम देवेष्वस्तु शतौदनां श्रद्दधानः पचामि।। 2।।

卐14.5.3 बधान देवीमभि धेहि भुञ्जतीञ्छतौदनां कामदुघा ह्येषा। मैनां हिंसीरश्मना जहृषाणोऽप्येतु देवाँ अति गच्छति द्विषः।। 3।।

卐14.5.4 आरभस्व ब्रह्मणा वैश्वदेवीञ्छतौदनां शतपाप्मानो अस्याः। समर्पयन्नश्मना पर्वतेन स्वर्गं लोकमधि रोहयैनम्।। 4।।

卐14.5.5 धृष्णुह्येनां विकृता विकृन्तन्नपघ्नंश्चर्मैरया सं सृजैनाम्। विराजो दुहितेरया समक्ता कामंकामं यजमानस्य दुहाम्।। 5।।

卐14.5.6 यथा परु विशसन्नाति मंस्थाः कृणुष्वामेनावधेयान् पृथक्। अगन् देवान् मानुषी या पुराभुच्छतौदना पुरुरूपा सुवर्णा।। 6।।

卐14.5.7 द्विपाद् द्विहस्तः पुरुषो महदमो वनस्पतिं बिभर्ति सायकाग्रम्। तेन परूंषि प्रविद्वानघ्न्यायाः शतौदनां देवीं शतधा व्यस्य।। 7।।

卐14.5.8 एतं ब्रध्नं चर्मणः कृन्त साधु तमु प्रमाय शतधा व्यस्य। समुत्सृजन्नवधानानि सर्वा रायस्पोषं यजमानाय धेहि।। 8।।

卐14.5.9 ऋचा कुम्भी मध्यग्नौ श्रयामि भूम्यां त्वा भूमिमधि धारयामि। अपो मांसं बिभ्रती सा व्यथिष्ठा मा त्वा वधिषुर्मेनिभिः पिशाचाः।। 9।।

卐14.5.10 ऊर्ध्वं प्रेहि मासं विक्ष्था व्यस्य रजो अन्तरम्। रक्षांसि सर्वा तीर्त्वाथा रोह दिवं त्वम्।। 10।। 14 - 6

卐14.6.1 दिवं प्रेहि शतौदने सहस्रस्यायनं भव। अयुतं प्रयुतं भवाक्षितिर्भवता त्वं स्वर्गं लोकमा रुहः।। 1।।

卐14.6.2 शतौदनां शतधा भक्षयन्ति शतं रोहान् रोहति यो ददाति। वामदेव्यं नौधसमस्याः पक्षौ तृतीये नाके अधि विष्टपि श्रिता।। 2।।

卐14.6.3 शतौदनां शतधा कल्पमाना शतं रूपाणि कृणुते स्वर्यती। सा नो देवी सुहवा शर्मयच्छत्वथो मृडातीदृशे।। 3।।

卐14.6.4 शतौदना द्वादशाहेन संमिता शतं पृष्ठानि ससृजे स्वर्यती। सर्वान् यज्ञान् परियती परस्तात् सा दातारं रायस्पोषे दधातु।। 4।।

卐14.6.5 अभि प्रेहि शतौदन ईजानान् समसत्वनः। यज्ञांस्त्वं सर्वानाप्त्वा काम प्रस्यायनं भव।। 5।।

卐14.6.6 अभि प्रेहि शतौदने यज्ञेनायज्वनस्तर। आ देव यूनरूरुहो यत्रादस्त्रिदिवं दिवः।। 6।।

卐14.6.7 इरापदी प्रथमा शतौदना सत्यं ह मध्यममृतं शिरस्तव। उभे देवी रोदसी आपृणासि।। 7।।

卐14.6.8 ऋतं ह श्रोणी उत सक्थौ तवौजो ह बाहू उत तद्बलायकम्। अनुष्टु जठरमादु पार्श्वे सर्वाल्लोकाँ छतौदना समाप।। 8।।

卐14.6.9 चक्षुष्मती प्रथमा शतौदना सूर्यो ह चक्षुरुत चन्द्रमास्तव। विश्वैर्देवैर्ऋतुभिः संविदाना सा दातारं तृप्त्या तर्पयासि।। 9।।

卐14.6.10 शतं पयांसि शतमस्या वत्साः शतधा पक्वां वि भजन्त्येनाम्। सप्तलोका दिव्यार्पिता ये तां जिगेथ प्रथमा शतौदने।। 10।। 14 - 7

卐14.7.1 सहस्रेण शतमाना यदेषि लोकां जिगेथ प्रथमा शतौदने। सर्ववेदसमुत वाजपेयं सर्वाल्लोँकाञ्छतौदना समाप।। 1।।

卐14.7.2 इन्द्रः पपात प्रथमश्शतौदनां सप्तऋषिभ्यस्सुमनस्यमानः। तयासुराणां बलमोज आ ददे तया रुरोह विष्टपो देवलोकान्।। 2।।

卐14.7.3 विश्वामित्रोऽयं जमदग्निरत्रिर्भरद्वाजो गोतोमोऽयं वसिष्ठः। इदं पक्वं कश्यपसप्तमाः प्राश्नन्तु प्रथमाश्शतौदनाम्।। 3।।

卐14.7.4 ज्योतिष्मती प्रथमा शतौदना त्रीणि ज्योतींषि कृणुते स्वर्यती। तां दातार उपजीवन्ति यत्र तत्र देवैस्सधमादं मदन्ति।। 4।।

卐14.7.5 छन्दः पक्षा वृहती शतौदना त्रीणि छन्दांसि ससृजे स्वर्यती। ऋतूनामधिराजं संवत्सरं पतिमस्या विन्दन्।। 5।।

卐14.7.6 अतिक्रम्याग्निष्टममतिरात्रं शतौदने। यज्ञांस्त्वं सर्वानाप्त्वा चित्यमग्निं व्यश्नुहि।। 6।।

卐14.7.7 अश्वमेध्यमतिक्रम्यद्वादशाहं शतौदने। त्रिरात्रं साह्नमाप्त्वा वाजपेयेन कल्प्यते।। 7।।

卐14.7.8 ये सहस्रैरीजाना अग्निहोत्रहुतश्च ये। यज्ञैर्ये सर्वैरीजानास्ता न आप्नोति शतौदना।। 8।।

卐14.7.9 शं ते परूंषि सुभगे दधामि शं ते मांसान्यत्तथा भवन्ति। अस्थि यत्ते शमिता शशार तत्ते त्वष्टा विहृतं निष्कृणोतु।। 9।।

卐14.7.10 ये यज्ञेन जिता लोका या नु छन्दांसि भेजिरे। सर्वांस्ताल्लोँकानाप्नोति यो ददाति शतौदनाम्।। 10।। 14 - 8

卐14.8.1 इषिरा योषा युवतिर्दमूना रात्री देवस्यसवितुर्भगस्य। अश्वक्षता सुहवा सम्भृतश्रीराप प्रौ द्यावापृथिवी महित्वा।। 1।।

卐14.8.2 अव विश्वान्यरुहद् गभीरद्वर्षिष्ठमरुहदश्रमिष्ठा। उशती रात्र्यनुसानु भद्राद्वितिष्ठते मित्र इव स्वधाभिः।। 2।।

卐14.8.3 नर्ये वन्द्ये सुभगे सुजात आ चागन् रात्रि सुमना इह स्याम्। अस्मांस्त्रायस्व नर्याणि जाताश्व्या यानि गव्यानि पुष्टा।। 3।।

卐14.8.4 सिंहस्य रात्र्युशती पिशस्य व्याघ्रस्य द्वीपिनो वर्च आ ददे। अश्वस्य ब्रध्नं पुरुषस्य मायं पुरु रूपाणि कृणुषे विभाती।। 4।।

卐14.8.5 शिवां रात्रिमह्नि सूर्यं च हिमस्य माता सुहवा नो अस्तु। अस्य स्तोमस्य सुभगे नि बोध येन त्वा वन्दे विश्वासु दिक्षु।। 5।।

卐14.8.6 स्तोमस्य न विभावरि रात्रि राजेव जोषसै। असाम सर्ववीरा भवाम सर्ववेदसो व्युच्छन्तीरनूषसः।। 6।।

卐14.8.7 शम्या ह नाम दधिषे मम दिप्सन्ति ये धना। रात्री हि तानसदपाथ स्तेनो न विद्यते ऽथ रिपुर्न विद्यते।। 7।।

卐14.8.8 भद्रासि रात्रि चमसो न पिष्टो विश्वङ्गोरूपं युवतिर्विभर्षि। चक्षुष्मती मे मृषती वपूंषि प्रदीत्यां दिव्यां रुक्मां अमुक्थाः।। 8।।

卐14.8.9 यो अद्य स्तेन आयत्यघायुर्मृत्यो रिपुः। रात्री तस्य प्रतीत्य प्र ग्रीवा प्र शिरो हनत्।। 9।।

卐14.8.10 प्र पादौ न यथायति प्र हस्तौ न यथाशिषत्। यो मलिम्लुरुपायति स संपिष्टो अपायति। अपायति स्वपायति शुष्के स्थाणावपायत।। 10।। 14 - 9

卐14.9.1 अन्धं रात्रि तिष्ठधूममशीर्षाणमहिं कृणु। अक्षौ वृकस्य निर्जह्यास्तेनं द्रुपदे जहि।। 1।।

卐14.9.2 ये ते रात्र्यनड्वाहस्तीक्ष्णशृङ्गास्स्वाशवः। तेभिर्नो अद्य पारयाति दुर्गाणि विश्वहा।। 2।।

卐14.9.3 रात्रिं रात्रिमरिष्यन्तस्तरेम तन्वा वयम्। गम्भीरमप्लवा इव न तरेयुररातयः।। 3।।

卐14.9.4 यथा शाम्याकः प्रपतन् प्रेदिवान्नानु विद्यते। एवा रात्रि प्र पातय योऽस्माँ अभ्यघायति।। 4।।

卐14.9.5 अपस्तेनं वासमथं गो अजमुततस्करम्। अथो यो अर्वतश्शिरोऽभिधाय निनीषति।। 5।।

卐14.9.6 यदद्य रात्रि सुभगे विभजन्त्ययो वसु। यदेह्यस्मान् भ्राजयाथेदन्यानुपायसि।। 6।।

卐14.9.7 उषसे नः परि धेहि सर्वान् रात्र्यनागसः। उषा नो अह्न आ भजादहस्तुभ्यं विभावरि।। 7। (इति सप्तदशर्चो नाम चतुर्दशकाण्डे तृतीयोऽनुवाकः) इत्यथर्ववेदे पैप्पलादसंहितायां सप्तदशर्चो नाम चतुर्दशः काण्डः समाप्तः।

## ʊ अथ पञ्चदशः काण्डः 15 - 1

卐15.1.1 सम्यन्दिग्भ्यः पवते सं स्वर्विन्मधोरतो माधवः पात्वस्मान्। अग्निर्देवो दुष्टरितुरदाभ्य इदं क्षत्रं रक्षतु पात्वस्मान्।। 1।।

卐15.1.2 रथन्तरं सामभिः पात्वस्मान् गायत्रेण छन्दसा विश्वरूपम्। द्वादशा इष्टयस्तोमो अह्नां समुद्रो वाच इदमोजः पिपर्तु।। 2।।

卐15.1.3 उग्रा दिशामभिभूतिर्वयोधाश्शुचिश्शुक्रे अहन्योजस्ये। इन्द्राधिपतिः पिपृतादतो नो मयि क्षत्रं विश्वतो धारयेदम्।। 3।।

卐15.1.4 बृहद्राष्ट्रं क्षत्रभृद्वृद्धवृष्ण्यं त्रिष्टुभौजश्शुभितमुग्रवीरम्। इन्द्र स्तोमैः पञ्चदशेन वर्च इदं वातेन सगरेण रक्षतु।। 4।।

卐15.1.5 प्राची दिशां सह यशा यशस्वती विश्वे देवाः प्रावृषाह्णां स्वर्वती। इदं क्षत्रं दुष्टरमस्त्वोजो अनाधृष्टं सहस्वं सहस्वत्।। 5।।

卐15.1.6 वैरूपे सामन्यह तच्छकेयं जगत्यैनद्विक्ष्वा वेशयामि। विश्वे देवास्सप्तदशेन वर्च्यमिदं क्षत्रं सलिलावतमुग्रम्।। 6।।

卐15.1.7 धर्त्री दिशां क्षत्रमिदं दाधर्तूपस्थाशानां मित्रवदस्त्वोजः। मित्रावरुणा शरदाह्णा चिकित्नू अस्मै क्षत्राय महि शर्म यच्छतम्।। 7।।

卐15.1.8 वैराजे सामन्यधि मे मनीषानुष्टुभा संभृतं वीर्यं सहः। इदं क्षत्रं मित्रवदार्द्रदान्वोजा मित्रावरुणा रक्षतमाधिपत्ये।। 8।।

卐15.1.9 सम्राड् दिशां सहसाम्नी सहस्वत्यृतुर्हेमन्तो विष्ठया नः पिपर्तु। ओषजातां बृहती तु शक्करीमं यज्ञमवतां नो घृताची।। 9।।

卐15.1.10 स्वर्वती सुदुघा नः पयस्वती दिशां देव्यवतु नो घृताची। त्वं गोपाः पुर एतोत पश्चाद् बृहस्पते याम्यां युङ्धि वाचम्।। 10।। 15 - 2

卐15.2.1 स्तोमैकविंशे भुवनस्य पत्नि विवस्वग्वाते अभि नो गृणीहि। घृतवती सवितराधिपत्ये पयस्वती रन्तिराशा नो अस्तु।। 1।।

卐15.2.2 ऊर्ध्वा दिशां रन्तिराशौषधीनां संवत्सरेण सविता नो अह्णा। रेवत् साम्नां पङ्क्तिश्छन्दसामजातशत्रुस्स्योना नो अस्तु।। 2।।

卐15.2.3 विष्टम्भो दिवो धरुणः पृथिव्या अस्येशाना जगतो विष्णुपत्नी। विश्वव्यचा इषयन्ती सुहुतिस्स्योना नो अस्त्वोदितेरुपस्थे।। 3।।

卐15.2.4 ध्रुवा दिशां विष्णुपत्न्य घोरास्येशाना सहसो या मनोता। बृहस्पतिर्मातरिश्वोत वायुस्सन्धाना वाता अभि नो गृणन्तु।। 4।।

卐15.2.5 यो नः पिता जनिता यो विधर्ता यो नस्सतो अभ्या सज्जजान। स आशीषा द्रविणमिच्छमानः प्रथमच्छदो वर आ विवेश।। 5।।

卐15.2.6 अभ्या वर्तस्व पृथिवी यज्ञेन पयसा सह। अपान्तो अग्निरिषितोऽवरोहतु।। 6।।

卐15.2.7 यदग्ने चन्द्रं यत् पूतं यच्छुक्रं यच्च यज्ञियम्। तद्देवेभ्यो भरामसि।। 7।।



Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐15.2.8 इषमूर्जमहमत आदि यज्ञस्य योनौ महिषस्य धामन्। आ नो गोषु विशस्त्वा प्रजायां जहामि सेदिमनिराममीवाम्।। 8।। 15 - 3

卐15.3.1 आयुषोऽसि प्रतरणं विप्रं भेषजमुच्यसे। तदाञ्जनत्वं शन्तातेसि मायोभवं कृतम्।। 1।।

卐15.3.2 यो हरिमा जायान्यो अङ्गभेदो विसल्पकः। सर्वं ते यक्ष्ममङ्गेभ्यो बहिर्निर्हन्त्वाञ्जनम्।। 2।।

卐15.3.3 आञ्जनं पृथिव्यां जातं भद्रं पुरुषजीवनम्। कृणोत्वत् प्रमायकम् रथजूतिमनागसम्।। 3।।

卐15.3.4 प्राण प्राणं त्रायस्वासो असवे मृड। निर्ऋते निर्ऋत्या नः पाशेभ्यो मुञ्च।। 4।।

卐15.3.5 सिन्धोर्गर्भोऽसि विद्युतां पुष्पम्। वातः प्राणस्सूर्यचक्षुर्दिवस्पयः।। 5।।

卐15.3.6 देवाञ्जनं त्रैककुदं परि मा पाहि विश्वतः। न त्वा तरन्त्योषधयो बाह्याः पर्वतीया उत।। 6।।

卐15.3.7 वीदं मध्यमवासृजद्रक्षोहामीवचातनः। अमीवास्सर्वाश्चातयन्नाशयदभिभा इतः।। 7।।

卐15.3.8 बह्विदं राजन् वरुणानृतमाह पूरुषः। तस्मात् सहस्रवीर्य मुञ्च नः पर्यं हसः।। 8।।

卐15.3.9 यदापो अघ्न्या इति वरुणेति यदूचिम। तस्मात् सहस्रवीर्य मुञ्च नः पर्यं हसः।। 9।।

卐15.3.10 मित्रश्च त्वा वरुणश्चानुप्रेयतुराञ्जन। तौ त्वानुगत्य दूरं भोगाय पुनरोहतु।। 10।। 15 - 4

卐15.4.1 ऋणादृणमिव सं नय कृत्यां कृत्याकृतो गृहम्। यक्षुर्मन्त्रस्य दुर्हादः पृष्टीरपि श्रृणाञ्जन।। 1।।

卐15.4.2 यदस्मासु दुःस्वप्न्यं यद् गोषु यच्च नो गृहे। अमाम गत्यस्त दुर्हार्दः प्रिय प्रति मुञ्चताम्।। 2।।

卐15.4.3 अपामूर्ज अतसो वावृधातमग्नेर्जातमधि जातवेदसः। चतुर्वीरं पर्तीयं यदाञ्जनं दिशः प्रदिशः करदिच्छिवास्ते।। 3।।

卐15.4.4 चतुर्वीरं बध्यत आञ्जनं ते सर्वा दिशो अभयास्ते भवन्तु। ध्रुवस्तिष्ठाधि सवितेव वार्य इमा विशो अभि हरन्तु ते बलिम्।। 4।।

卐15.4.5 आक्ष्वैकं मणिमेकं कृणुष्व स्नाह्येकेन पिबैकमेषाम्। चतुर्वीरं नैरुतेभ्यश्चतुर्भ्यो ग्राह्या बन्धेभ्यः परि पात्वस्मान्।। 5।।

卐15.4.6 अग्निर्माग्न्येनावतु प्राणायापानायायुषे। वर्चस ओजसे तेजसे स्वस्तये सुभूतये स्वाहा।। 6।।

卐15.4.7 इन्द्रोमेन्द्रेणावतु प्राणायापानायायुषे। वर्चस ओजसे तेजसे स्वस्तये सुभूतये स्वाहा।। 7।।

卐15.4.8 सोमो मा सेम्येनावतु प्राणायापानायायुषे। वर्चस ओजसे तेजसे स्वस्तये सुभूतये स्वाहा।। 8।।

卐15.4.9 भगो मा भगेनावतु प्राणायापानायायुषे। वर्चस ओजसे तेजसे स्वस्तये सुभूतये स्वाहा।। 9।।

卐15.4.10 मरुतो मा गणैरवन्तु प्राणायापानायायुषे। वर्चस ओजसे तेजसे स्वस्तये सुभूतये स्वाहा।। 10। (इत्यष्टादशर्चो नाम पञ्चदशकाण्डे प्रथमोऽनुवाकः) 15 - 5

卐15.5.1 आयुर्दा देव जरसं पृणानो घृतप्रतीको घृतपृष्ठो अग्ने। घृतं पिबन्नमृतं चारु गव्यं पितेव पुत्रं जरसे नयेमम्।। 1।।

卐15.5.2 आयुरस्मै धेहि जातवेदः प्रजां त्वष्टरधि नि धेह्योनः। रायस्पोषं सवितरा सुवास्मै शतं जीवाति शरदस्तवायम्।। 2।।

卐15.5.3 इममग्न आयुषे वर्चसे धाः प्रियं रेतो वरुण मित्र राजन्। मातेवास्मा अदिते शर्मयच्छ विश्वे देवा जरदष्टिर्यथा सत्।। 3।।

卐15.5.4 अग्निष्ट आयुः प्रतरं कृणोतु सोमस्ते पृष्टिं प्रतरं दधातु। इन्द्रो मरुत्वानधि ते ब्रवीत्वादित्यैस्ते अदितिश्शर्म यच्छतु।। 4।।

卐15.5.5 रेवतीस्त्वा व्यक्षणं कृत्तिकाश्चकृतस्त्वा। अपसस्त्वामतन्वत धियो ऽवयन्नवाग्नायीरपृञ्चन्।। 5।।

卐15.5.6 सहस्रमन्तां अभितो ऽददन्ताशीतिर्मध्यमभयं वि नारीः। देवीर्देवाय परिधे सवित्रे महत्तदा सा मघवन्महित्वम्।। 6।।

卐15.5.7 इममश्मानमा तिष्ठाश्मेव त्वं स्थिरो भव। प्र मृणीहि दुरस्यतस्सहस्व पृतनायतः।। 7।।

卐15.5.8 येन देवं सवितारं परि देवा अधारयन्। तेनेमं ब्रह्मणस्पते परि राष्ट्राय धत्तन।। 8।।

卐15.5.9 परीममिन्द्रमायुषे महे क्षत्राय धत्तन। यथैतं जरसे नयां यक्ष्मन्त्रे अधि जागरत्।। 9।।

卐15.5.10 परीमं सोममायुषे महे श्रोत्राय धत्तन। यथैनं जरसे नयां ज्योक् श्रोत्रे अधि जागरत्।। 10।। 15 - 6

卐15.6.1 परि धत्त धत्त वर्चसेमं जरामृत्युं कृणुत दीर्घमायुः। बृहस्पतिः प्रायच्छद्वास एतत् सोमाय राज्ञे परि दधातवा उ।। 1।।

卐15.6.2 जरां सु गच्छ परि धत्स्व वासो भवा गृष्टीनामभिशस्तिवा उ। शतं च जीव शरदस्सुवर्चा रायस्पोषमुप सं व्ययस्व।। 2।।

卐15.6.3 परीदं वासो अपि धाः स्वस्तयेऽभूर्वापीनामभिशस्तिपा उ। शतं च जीव शरदः पुरूचीर्वसूनि चारुर्वि भजासि जीवन्।। 3।।

卐15.6.4 योगेयोगे तवस्तरं वाजे वाजे हवामहे। सखाय इन्द्रमूतये।। 4।।

卐15.6.5 हिरण्यवर्णो अजरस्सुवीरो जरामृत्युः प्रजया सं विशस्व। तदग्निराह तदु सोम आह बृहस्पतिस्सविता तदिन्द्रः।। 5।।

卐15.6.6 यदोत्तमत्तन्तु बद्धाय नावद्वासः पूर्व यावत् पुरुरूपपेशः। भद्रातीकाशमजरं सुवीरं तेन ते देवाः प्र तिरन्त्वायुः।। 6।।

卐15.6.7 यस्य ब्रह्माणस्सिच मारभन्ते श्रश्नन्तो नीवं प्रतिरन्त आयुः। तस्य देवा देवहूतिं जुषन्तां स विश्वहा सचतां स्वस्ति।। 7।।

卐15.6.8 अन्यदा धत्स्व परिधत्स्व वास इममुल्वमपलम्पामि यस्ते। जरसे त्वामृषयस्सं व्ययन्तु सूर्यो भगस्ते प्र तिरन्त्वायुः।। 8।।

卐15.6.9 यस्य देवासः प्रथमवास्यं हरामि तं त्वा विश्वे अवन्तु देवाः। तं त्वा भ्रातरस्सुवृधा वर्धमानमनु जायन्तां बहवस्सुजातम्।। 9।।

卐15.6.10 अहतेनाहतो भव स्थिर स्थिरेण सम्भव। प्र मृणीहि दुरस्यतस्सहस्व पृतनायतः।। 10।।

15 - 7

卐15.7.1 मित्रः पृथिव्या अध्यक्षः। स मावत्वस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां देवहूत्यामस्यामाकूत्यामस्यामाशिषिस्स्वाहा।। 1।।

卐15.7.2 वरुणोऽपामध्यक्षः। स मावत्वस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां देवहूत्यामस्यामाकूत्यामस्यामाशिषिस्स्वाहा।। ।

卐15.7.3 वायुरन्तरिक्षस्याऽध्यक्षः। स मावत्वस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां देवहूत्यामस्यामाकूत्यामस्यामाशिषिस्स्वाहा।। 3।।

卐15.7.4 सूर्यो दिवोऽध्यक्षः। स मावत्वस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां देवहूत्यामस्यामाकूत्यामस्यामाशिषिस्स्वाहा।। 4।।

卐15.7.5 चन्द्रमा नक्षत्राणामध्यक्षः। स मावत्वस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां देवहूत्यामस्यामाकूत्यामस्यामाशिषिस्स्वाहा।। 5।।

Sri Ganapathi Sachchidananda Avadhoota Dattapeetham SGS

卐15.7.6 वसुस्सम्वत्सराणामध्यक्षः। स मावत्वस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां देवहूत्यामस्यामाकूत्यामस्यामाशिषिस्स्वाहा।। 6।।

卐15.7.7 संवत्सर ऋतूनामध्यक्षः। स मावत्वस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां देवहूत्यामस्यामाकूत्यामस्यामाशिषिस्स्वाहा।। 7।।

卐15.7.8 अग्निर्वनस्पतीनामध्यक्षः। स मावत्वस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां देवहूत्यामस्यामाकूत्यामस्यामाशिषिस्स्वाहा।। 8।।

卐15.7.9 इन्द्रः कर्मणामध्यक्षः। स मावत्वस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां देवहूत्यामस्यामाकूत्यामस्यामाशिषिस्स्वाहा।। 9।।

卐15.7.10 सविता प्रसवानामध्यक्षः। स मावत्वस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां देवहूत्यामस्यामाकूत्यामस्यामाशिषिस्स्वाहा।। 10।। 15 - 8

卐15.8.1 विष्णुः पर्वतानामध्यक्षः। स मावत्वस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां देवहूत्यामस्यामाकूत्यामस्यामाशिषिस्स्वाहा।। 1।।

卐15.8.2 त्वष्टा रूपाणामध्यक्षः। स मावत्वस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां देवहूत्यामस्यामाकूत्यामस्यामाशिषिस्स्वाहा।। 2।।

卐15.8.3 रुद्रः पशूनामध्यक्षः। स मावत्वस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां देवहूत्यामस्यामाकूत्यामस्यामाशिषिस्स्वाहा।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐15.8.4 सोमः पयसामध्यक्षः। स मावत्वस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां देवहूत्यामस्यामाकूत्यामस्यामाशिषिस्स्वाहा।। 4।।

卐15.8.5 पर्जन्य ओषधीनामध्यक्षः। स मावत्वस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां देवहूत्यामस्यामाकूत्यामस्यामाशिषिस्स्वाहा।। 5।।

卐15.8.6 समुद्रो नदीनामध्यक्षः। स मावत्वस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां देवहूत्यामस्यामाकूत्यामस्यामाशिषिस्स्वाहा।। 6।।

卐15.8.7 हिंकारस्साम्नामध्यक्षः। स मावत्वस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां देवहूत्यामस्यामाकूत्यामस्यामाशिषिस्स्वाहा।। 7।।

卐15.8.8 सरस्वती वाचामध्यक्षा। स मावत्वस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां देवहूत्यामस्यामाकूत्यामस्यामाशिषिस्स्वाहा।। 8।।

卐15.8.9 पूषा पथीनामध्यक्षः। स मावत्वस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां देवहूत्यामस्यामाकूत्यामस्यामाशिषिस्स्वाहा।। 9।।

卐15.8.10 गायत्री छन्दसामध्यक्षा। स मावत्वस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां देवहूत्यामस्यामाकूत्यामस्यामाशिषिस्स्वाहा।। 10।। 15 - 9

卐15.9.1 बृहसपतिर्देवानामध्यक्षः। स मावत्वस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां देवहूत्यामस्यामाकूत्यामस्यामाशिषिस्स्वाहा।। 1।।

卐15.9.2 प्रजापतिः प्रजानामध्यक्षः। स मावत्वस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां देवहूत्यामस्यामाकूत्यामस्यामाशिषिस्स्वाहा।। 2।।

卐15.9.3 यमः पितृणामध्यक्षः। स मावत्वस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां देवहूत्यामस्यामाकूत्यामस्यामाशिषिस्स्वाहा।। 3।।

卐15.9.4 पितरः परेऽवरस्ततस्ततामहः। ते मावत्वस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां देवहूत्यामस्यामाकूत्यामस्यामाशिषिस्स्वाहा।। 4।।

卐15.9.5 देवानां देवा देवा देवेष्वधिदेवाः परा क्रमध्वम्। प्रथमा द्वितीयेषु द्वितीयास्तृतीयेषु।। 5।।

卐15.9.6 त्रिरेकादशा विश्वे वैश्वानरा महि महान्तो न मा रभध्वम्। इदं शकेयं यदिदं कृणोमि स्वाहा।। 6। (इत्यष्टादशर्चो नाम पञ्चदशकाण्डे द्वितीयोऽनुवाकः) 15 - 10

卐15.10.1 जीमुतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे। अनाविद्धया तन्वा जय त्वं स त्वा वर्मणो महिमा पिपर्तु।। 1।।

卐15.10.2 धन्वना गा धन्वनाजिं जयेम धन्वना तीव्रास्समदो जयेम। धनुश्शत्रोरपकामं कृणोतु धन्वना सर्वाः पृतना जयेम।। 2।।

卐15.10.3 वक्ष्यन्ती वेदा गनीगन्ति कर्णं प्रियं सखायं परिषस्वजाना। योषेव शीङ्क्ते वितताधि धन्वञ्ज्या इयं समिति पारयन्ती।। 3।।

卐15.10.4 ते आचरन्ती समनेव योषा मातेव पुत्रं पिपृतामुपस्थे। अप शत्रून् विध्यतां सम्विदाने आर्त्नी इमे विस्फुरन्ती अमित्रान्।। 4।।

卐15.10.5 बह्वीनां पिता बहुरस्य पुत्रो व्यचः कृणोति समदोऽवगत्य। इषुधिस्सङ्का पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः।। 5।।

卐15.10.6 रथे तिष्ठन्नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः। अभीशूनां महिमानं पनायत मनः पश्चादनु यच्छन्ति रश्मयः।। 6।।

卐15.10.7 तीव्रान् घोषान् कृण्वतां वृषपाणयोऽश्वा रथेभिस्सह वाजयन्तः। अपक्रामन्तः प्रपदैरमित्रान् क्षिणन्ति शत्रूँरनपव्ययन्तः।। 7।।

卐15.10.8 रथवाहनं हविरस्य नाम यत्रायुधं निहितमस्य वर्म। तत्रारथमुपशग्मं सदेम विश्वाहा वयं सुमनस्यमानाः। 8।।

卐15.10.9 स्वादुषंसदः पितरो वयोधाः कृछ्रेश्रितः शक्तीवन्तो गभीराः। चित्रसेना इषुबला अमृध्राः सतो वीरा उरवो व्रातसाहाः।। 9।।

卐15.10.10 ब्राह्मणासः पितरस्सोम्यासश्शिवे नो द्यावापृथिवी अनेहसा। पूषा नः पातु दुरितादृतावृधो रक्षा माकीर्णो अघशंस ईशत।। 10।। 15 - 11

卐15.11.1 बृहस्पतिर्नः परिपातु पश्चादुतोत्तरस्मादधरादघायोः। इन्द्रः पुरस्तादुत मध्यतो नस्सखा सखिभ्यो वरिवः कृणोतु।। 1।।

卐15.11.2 सुपर्णं वस्ते मृगो अस्या दन्तो गोभिस्सन्नद्धा पतति प्रसूता। यत्रा नरस्सं च वि च द्रवन्ति तदस्मभ्यमिषवः शर्म यच्छान्।। 2।।

卐15.11.3 सुपर्णो वासो यदु सर्पिरासा मनो हिरण्यमिषवः पतत्री। मास्माङ् अरन्नमुत आपतन्तीरितः प्रहितास्सवितर्जयन्तु।। 3।।

卐15.11.4 अहिरिव भोगैः पर्यैति बाहुं ज्याया हेतिमपबाधमानः। हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमांसं परि पातु मृत्योः।। 4।।

卐15.11.5 आ जङ्घन्ती सान्वेषां जघनाँ उप जिघ्नते। अश्वाजनि प्र चोदयाश्वान् समत्सु पादय।। 5।।

卐15.11.6 दिवस्पृथिव्याः पर्योज आभृतं वनस्पतिभ्यः परि संभृतं सहः। अपामोज्मानं परि गोभिराभृतमिन्द्रस्य वज्रं हविषा रथं यज।। 6।।

卐15.11.7 इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः। सेमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय।। 7।।

卐15.11.8 वनस्पते विड्वङ्गो हि भूया अस्मद् सखा प्रतरणस्सुवीरः। गोभिस्संनद्धोरथ वीडयस्वास्थाता ते जयतु जेत्वानि।। 8।।

卐15.11.9 उप श्वासय पृथिवीमुतद्यां पुरुत्रा ते मनुतां विष्ठितं जगत्। सदुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयो अप सेध शत्रून्।। 9।।

卐15.11.10 आ क्रन्दयो बलमोज न आ धा अभिष्टन दुरिता बाधमानः। अप सेध दुन्दुभे दुच्छुनामित इन्द्रस्य मुष्टिरसि वीडयस्व।। 10।। 15 - 12

卐15.12.1 प्रामुञ्जयाभीमे जयन्तु केतुमद् दुन्दुभिर्वावदीतु। समश्वपर्णाः पतयन्तु नो नरोऽस्माकमिन्द्र रथिनो जयन्तु।। 1।।

卐15.12.2 इन्द्रो रथाय प्रपदं कृणोतु यमध्यष्ठान् मघवा जयन्तम्। इर्यं इव पशुभिर्युयोतु गोपा अरिष्टो जातः प्रथमस्सिषासन्।। 2।।

卐15.12.3 पर्जन्यस्येव स्तनयित्नुरासोरिन्द्राग्न्योरिव चेखिद्यते घोषो अस्य। साहस्रो वीरश्शतं ससन्वानयुतं ससन्वान् रथ मृडेह।। 3।।

卐15.12.4 श्येनस्य पक्षौ हरिणस्य बाहू इन्द्रस्य मुष्टिर्मरुतामनीकम्। गोभिस्सन्नद्धो असि वीडयस्व।। 4।।

卐15.12.5 उद्यं यमीति सवितेव बाहू उभे सिचौ यजते भीम ऋञ्जन्। उच्छुक्रमत्कमजते शचीभिर्नवा मातृभ्यो वसना जहाति।। 5।।

卐15.12.6 उग्रौ ते नेमि पवी त उग्रा उग्राश्शङ्कवो बृहतो रथस्य। ईषात्र वेणवो नमतिस्त उग्राग्निश्चक्षुः प्रवयणं रथस्य तेनामित्रान् प्रमृणन् याहि शत्रून्।। 6।।

卐15.12.7 अरा नाभयो बलमित्ते अक्ष उग्रौ ते कोषौ सह निस्यदाभ्याम्। आण्योर्वध्रानुत कोषघोरा स्थानं बन्ध उत बन्धुरं ते।। 7।।

卐15.12.8 गौष्ठे बलं मृग एकमङ्गं परा क्रमध्वं मह आ सुवन्त। अभीशवो हतानेन वृत्रमयं क्षत्रेण प्रजयास्तूग्रः।। 8।।

卐15.12.9 आ तिष्ठ जिष्णुस्तरसा सपत्नान् साहस्रो वीरः प्रमृणन् याहि शत्रून्। पृष्टि युगे कृणुतं वीर्याणि तदेतामेतं रथमस्य शग्मे।। 9।।

卐15.12.10 अष्टौ चक्षुंषि कवयस्सं नमन्त्वश्वा प्रकाशा ऋजु धावयन्तः। अनु त्वा स्कम्भो ददतां पितेव चक्रमाणमैनं धत्स्वोपस्थे प्र तिरात्यायुः।। 10।।

卐15.12.11 कविभिस्स्यूतस्स रथे विबद्धस्स धन्वधिर्धनु चित्ते जजान। अनु प्रास्येमानि पृथुमध्यमान श्वेभ्यश्शन्त्वाय कविभिः कृतानि तेभिष्टे शर्म यच्छन्तु देवाः।। 11।। 15 - 13

卐15.13.1 अग्निं ब्रूमो वनस्पती नोषधीरुत वीरुधः। इन्द्रं बृहस्पपतिं सूर्यं ते नो मुञ्चन्त्वं हसः।। 1।।

卐15.13.2 ब्रूमो देवं सवितारं धातारमुत पूषणम्। त्वष्टारमग्र्यं ब्रूमस्ते नो मुञ्चन्त्वं हसः।। 2।।

卐15.13.3 ब्रूमो राजानं वरुणं मित्रं विष्णुमथो भगम्। अंशं विवश्वन्तं ब्रूमस्ते नो मुञ्चन्त्वं हसः।। 3।।

卐15.13.4 गन्धर्वाप्सरसो ब्रूमो अश्विना ब्रह्मणस्पतिम्। अर्यमा नाम यो देवस्ते नो मुञ्चन्त्वं हसः।। 4।।

卐15.13.5 वातं ब्रूमः पर्जन्यमन्तरिक्षमथो दिशः। आशाश्च सर्वा ब्रूमस्ते नो मुञ्चन्त्वं हसः।। 5।।

卐15.13.6 अहोरात्रे इदं ब्रूमस्सूर्या चन्द्रमसा उभा। आदित्यान् सर्वान् ब्रूमस्ते नो मुञ्चन्त्वं हसः।। 6।।

卐15.13.7 मुञ्चन्तु मा शपथ्यादहोरात्रे अथो उषाः। सोमो मा दिव्यो मुञ्चतु यमाहुश्चन्द्रमा इति।। 7।।

卐15.13.8 पञ्च राज्यानि वीरुधां सोमश्श्रेष्ठानि ब्रूमसि। भङ्गो दर्भो यवस्सहस्ते नो मुञ्चन्त्वं हसः।। 8।।

卐15.13.9 ये ग्राम्यास्सप्त पशव आरण्या उत ये मृगाः। शकुन्तान् पक्षिणो ब्रूमस्ते नो मुञ्चन्त्वं हसः।। 9।।

卐15.13.10 भवाशर्वाविदं ब्रूम उग्रः पशुपतिश्च यः। इषुर्या एषां विद्मस्ते नो मुञ्चन्त्वं हसः।। 10।। 15 - 14

卐15.14.1 यज्ञं ब्रूमो यजमानमृचस्सामानि भेषजा। यजूंषि होत्रान् ब्रूमस्ते नो मुञ्चन्त्वं हसः।। 1।।

卐15.14.2 ऋतून् ब्रूम ऋतुपतीनार्तवाँ उत हायनान्। समास्सम्वत्सरान् मासस्ते नो मुञ्चन्त्वं हसः।। 2।।

卐15.14.3 दिवं ब्रूमो नक्षत्राणि भूमिं यक्षाणि पर्वतान्। समुद्रा नद्यो वेशन्तास्ते नो मुञ्चन्त्वं हसः।। 3।।
卐15.14.4 सप्त ऋषीन्वा इदं ब्रूमोऽप देवीः प्रजापतिम्। पितृन् यमश्रेष्ठान् ब्रूमस्ते नो मुञ्चन्त्वं हसः।। 4।।
卐15.14.5 विश्वान् देवानिदं ब्रूमस्सत्य सन्धानृता वृधः। विश्वाभिः पत्नीभिस्साकं ते नो मुञ्चन्त्वं हसः।। 5।।
卐15.14.6 आदित्या रुद्रा वसवो देवा दैवा अथर्वाणः। अङ्गिरसो मनीषिणस्ते नो मुञ्चन्त्वं हसः।। 6।।
卐15.14.7 ये देवा दिविसदोऽन्तरिक्षसदश्च ये। पृथिव्यां शक्रा ये श्रितास्ते नो मुञ्चन्त्वं हसः।। 7।।
卐15.14.8 एत देवा दक्षिणतः पश्चात् प्राञ्च उदेतन। पुरस्ताच्छक्रा उत्तराद्विश्वेदेवाः समेत्यते नो मुञ्चन्त्वं हसः।। 8।।
卐15.14.9 अरायान् ब्रूमो रक्षांसि सर्पान् पुण्यजनानुत। मृत्युनेकसतं ब्रूमस्ते नो मुञ्चन्त्वं हसः।। 9।।
卐15.14.10 या देवीः पञ्च प्रदीशो ये देवा द्वादशर्तवः। सम्वत्सरस्य ये दंष्ट्रास्ते नो मुञ्चन्त्वं हसः।। 10।।
卐15.14.11 भूतं ब्रूमो भूतपतिं भूतानामुत यस्पतिः। भूतानि सर्वा ब्रूमस्ते नो मुञ्चन्त्वं हसः।। 11।
(इत्यष्टादशर्चो नामः पञ्चदशकाण्डे तृतीयोऽनुवाकः) 15 -15
卐15.15.1 यावद् द्यौर्यावत् पृथिवी यावत् पर्यैति सूर्यः। तावत्त्वमुग्र ओषधे परि पाह्यरुन्धति।। 1।।
卐15.15.2 अरिष्टस्त्वा खनत्यरिष्टाय खनामि त्वा। द्विपाच्चतुष्पादस्माकं सर्वमस्त्वनातुरम्।। 2।।
卐15.15.3 देवानामसि स्वसा मरुतामसि सञ्जरी। यं जीवमश्नुषे त्वं न स रिष्याति पूरुषः।। 3।।
卐15.15.4 अरुन्धती नामासि तृतीयस्यामितो दिवि। तत्रामृतस्य रोहणं तेन त्वाच्छावदामसि।। 4।।
卐15.15.5 शन्त आपो हृद्या शन्ते कुलिज्या उत। शं वातश्शं बृहस्पतिश्शन्ते तपतु सूर्यः।। 5।।
卐15.15.6 शन्त इन्द्राग्नी भवतां शं रात्री प्रतिधीयताम्। शन्ते पृथिव्यां वीरुधश्शमु ते सन्त्वोषधीः।। 6।।
卐15.15.7 बह्वीषु हि त्वामविदमोषधीं वीर्यावतीम्। अरुन्धति त्वामाहार्षमितो मा पारयानिति।। 7।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐15.15.8 अभि प्रेप्सेव जीवन्तमभि दस्येदरुन्धती। एषादविद्यभेषजी देवी वाती कृतस्य च।। 8।।
卐15.15.9 अनु षिञ्च नस्तद् कुर्वगदो वै भविष्यति। वाती कृतस्य भेषज्यागन् देव्यरुन्धती।। 9।।
卐15.15.10 मा बिभेर्न मरिष्यस्यगदो वै भविष्यसि। वाती कृतस्य भेषज्यागन् देव्यरुन्धती।। 10।।
15 - 16
卐15.16.1 अरुन्धत्यस्सं वदन्ते गावः प्रव्राजिनीरिव। यमातुरमभिगच्छामावातं कृणु मावतम्।। 1।।
卐15.16.2 इमं मे त्वं जरामृत्युं पुरुषं कृण्वोषधे। राज्ञी हि सर्वासामस्योषधीनामरुन्धती।। 2।।
卐15.16.3 त्रायमाणा ह्यसि जीवला वीर्यावती। अरुन्धति त्वामाहार्षमितो मा पारयानिति।। 3।।
卐15.16.4 दिग्धेन च विद्धस्याघस्याघविषा च या। अरुन्धति त्वं तस्यासि विषस्य विषदूषणी।। 4।।
卐15.16.5 आहेये न च दष्टस्याघस्याघविषा च या। अरुन्धति त्वं तस्यासि विषस्य विषदूषणी।। 5।।
卐15.16.6 वातीकारेण च क्षिप्तस्याघस्याघविषा च या। अरुन्धति त्वं तस्यासि विषस्य विषदूषणी।। 6।।
卐15.16.7 भवेन च क्षिप्तस्याघस्याघविषा च या। अरुन्धति त्वं तस्यासि विषस्य विषदूषणी।। 7।।
卐15.16.8 शर्वेण च क्षिप्तस्याघस्याघविषा च या। अरुन्धति त्वं तस्यासि विषस्य विषदूषणी।। 8।।
卐15.16.9 रुद्रेण च क्षिप्तस्याघस्याघविषा च या। अरुन्धति त्वं तस्यासि विषस्य विषदूषणी।। 9।।
卐15.16.10 पशुपतिना च क्षिप्तस्याघस्याघविषा च या। अरुन्धति त्वं तस्यासि विषस्य विषदूषणी।। 10।। 15 - 17
卐15.17.1 उग्रेण च देवेन च क्षिप्तस्याघस्याघविषा च या। अरुन्धति त्वं तस्यासि विषस्य विषदूषणी।। 1।।
卐15.17.2 महादेवेन च क्षिप्तस्याघस्याघविषा च या। अरुन्धति त्वं तस्यासि विषस्य विषदूषणी।। 2।।
卐15.17.3 ईशानेन च क्षिप्तस्याघस्याघविषा च या। अरुन्धति त्वं तस्यासि विषस्य विषदूषणी।। 3।।
卐15.17.4 यत् पृथिव्यां विषं वीरुत्स्वधि यद्विषम्। अरुन्धति त्वं तस्यासि विषस्य विषदूषणी।। 4।।
卐15.17.5 यदोषधीभ्यस्संभरन्ति ब्रह्माणो मेनये विषम्। अरुन्धति त्वं तस्यासि विषस्य विषदूषणी।। 5।।

卐15.17.6 यद् ब्राह्मणास्सं भरन्ति तृष्टमाशी विषं विषम्। अरुन्धति त्वं तस्यासि विषस्य विषदूषणी।। 6।।

卐15.17.7 यः क्षिप्तो मृत्युनायस्मैर्यो दष्टस्तृष्टदंश्मभिः। अरुन्धति त्वं तस्यासि विषस्य विषदूषणी।। 7।।

卐15.17.8 सञ्जिहीष्वामुक्था यक्ष्मादारुक्षो लोकमुत्तमम्। अपा जीवसि पात्रेणाधि जीवपुरा इहि।। 8।। 15 - 18

卐15.18.1 अप्सरसो वि वो यकृद्वि वो भनद्मि मेहनम्। वि चण्डालं व्यर्जुनं वि ववृत्रं भिनद्मि वः।। 1।।

卐15.18.2 विश्वजन्याः पाञ्चजन्या महारुक्माः शिखण्डिनीः। सर्वा इन्द्रस्य वज्रेणहस्ता बुद्बुदयातवः।। 2।।

卐15.18.3 अन्धाचीमसिताचीमुलूखलस्य बुध्नेन। अवैतं वत्सपं जहि।। 3।।

卐15.18.4 दूरादेनाः प्रत्यपश्यमापतन्तीरथो दिवः। देवानां हव्यमोहनीरिन्द्रो अप्सरसो हनत्।। 4।।

卐15.18.5 आ हता अप ता इतः खलादिव यातुधान्यः। अमुं गच्छथ पूरुषं समुद्रमपगच्छति।। 5।।

卐15.18.6 दिवं गच्छन्तु दिव्याः सरो गच्छन्तु सारसीः। उलुङ्गुलस्य यो गृहस्तदु गच्छन्त्वासुरीः।। 6।।

卐15.18.7 आस्कन्दिके विस्कन्दिके पराचीरप नृत्यतु। सारङ्गेण शुना सह।। 7।।

卐15.18.8 यस्सारङ्गो हिरण्यदन् श्वा दिव्यः परिप्लवः। तस्याहं नाम जग्रभास्मा अरिष्टतातये।। 8।।

卐15.18.9 अद्यां ते विरणी पराचीरप नृत्यत। श्रृणामि घोरा वः पृष्टी ब्रह्मणा कीकसा उत।। 9।।

卐15.18.10 एकत्रिंशदश्ववतीश्चतस्र उत गुङ्गवः। शिवा दश श्र्यता दश केशिनीः पञ्चविंशतिः। इदमुलुङ्गुलुकाभ्यो अप्सराभ्योऽकरं नमः।। 10।। 15 - 19

卐15.19.1 याः प्रेङ्खे प्रेङ्खयन्ते सन्ताने मालवा इव। इदमुलुङ्गुलुकाभ्यो अप्सराभ्योऽकरं नमः।। 1।।

卐15.19.2 याः पुरस्तादाचरन्ति साकं सूर्यस्य रश्मिभिः। इदमुलुङ्गुलुकाभ्यो अप्सराभ्योऽकरं नमः।। 2।।

卐15.19.3 या अधरादाचरन्त्यनसा छदिसा सह। इदमुलुङ्गुलुकाभ्यो अप्सराभ्योऽकरं नमः।। 3।।

卐15.19.4 याः पश्चादाचरन्त्यन्धेन तमसा सह। इदमुलुङ्गुलुकाभ्यो अप्सराभ्योऽकरं नमः।। 4।।

卐15.19.5 या उत्तरादाचरन्ति वर्षेण विद्युता सह। इदमुलुङ्गुलुकाभ्यो अप्सराभ्योऽकरं नमः।। 5।।

卐15.19.6 या अधस्तादुद्वीक्षन्ते साच्यक्षि करिक्रतीः। इदमुलुङ्गुलुकाभ्यो अप्सराभ्योऽकरं नमः।। 6।।

卐15.19.7 या उपरिष्टादवेक्षन्ते नीलव्यक्तानि बिभ्रतीः। इदमुलुङ्गुलुकाभ्यो अप्सराभ्योऽकरं नमः।। 7।।

卐15.19.8 या अन्तरिक्ष ईरयन्ति वातेन रेष्मणा सह। इदमुलुङ्गुलुकाभ्यो अप्सराभ्योऽकरं नमः।। 8।।

卐15.19.9 या नदीः प्रतिगाहन्ते संरभ्य कन्या इव। इदमुलुङ्गुलुकाभ्यो अप्सराभ्योऽकरं नमः।। 9।।

卐15.19.10 यास्तीर्थानि विगाहन्तेऽघ्न्याः श्वसतीरिव। इदमुलुङ्गुलुकाभ्यो अप्सराभ्योऽकरं नमः।। 10।।

卐15.19.11 यास्समुद्रादुच्चरन्त्युच्चैर्घोषान् करिक्रतीः। इदमुलुङ्गुलुकाभ्यो अप्सराभ्योऽकरं नमः।। 11।।

卐15.19.12 या गच्छन्ति जनञ्जनमिच्छन्तीः प्रयुतं बहु। इदमुलुङ्गुलुकाभ्यो अप्सराभ्योऽकरं नमः।। 12। (इत्यष्टादशर्चो नामः पञ्चमकाण्डे चतुर्थोऽनुवाकः ) 15 - 20

卐15.20.1 त्वज्जाता रुद्र शन्तमा त्वं हि नो बभूर्या भेषजेभिः। व्यक्ष्मां यावयास्मद् व्यंहो व्यमीवाश्चातयास्मद् विषूचीः।। 1।।

卐15.20.2 त्वं देवानामसि रुद्र श्रेष्ठस्तव स्तवस्तवसामुग्रबाहो। हृणीयसा मनसा मोदमान आ बभूविथ रुद्रस्य सूनोः।। 2।।

卐15.20.3 त्वं हि नो वीराँ ईरय भेषजेभिरुरुं नो भवन्तमघवो मरुत्वम्। करा नः पारमंहसः स्वस्ति विश्वा अभीतीरप सेधास्मत्।। 3।।

卐15.20.4 त्वं हि नो वृषभ चक्षिमेष्ठा अस्मै रुद्रायोग्राय मीढुषे। क्षयद्वीराय प्र भरामहे मतिं यथा नश्शमसो द्विपदे शं चतुष्पदे।। 4।।

卐15.20.5 क्व तेषु रुद्र हस्तो मृडयाको जलाषः। अपभर्ता रपसो दैव्यस्य।। 5।।

卐15.20.6 प्र यक्ष्मः प्र निर्ऋतिरेत्वस्मत् सेनेव सृष्टा प्र चताममीवा। आराद्धत् सना वृजना जहीति।। 6।।

Sri Ganapathy Sachchidananda Avadhoota Datta Peetham • Mysore •

卐15.20.7 अर्हन् धनुर्हितं बिभर्ष्यर्हन् निष्कं रजतं विश्वरूपम्। अर्हन्निदं दयसे विश्वमेजन्न ते दूरं परिष्ठास्ति ते भव। सद्यस्सर्वान् परि पश्यसि भूमिम्।। 7।।

卐15.20.8 नमस्ते अस्तु विद्युते नमस्ते स्तनयित्नवे। नमस्ते अस्त्वश्मने येन प्रदिशमस्यसि।। 8।।

卐15.20.9 मा देवानामुग्र राजन्नस्माकं पुरुषा रिषन्। रक्षांस्यस्मद् यक्ष्मांश्च नाशयामसि ब्रह्मणा।। 9।।

卐15.20.10 ब्रह्मणेतो नाशयामो यत् किञ्चाङ्गेष्वामयत्। शल्यां यक्ष्मस्याथो रोपीस्ता इतो वि नयामसि।। 10।। 15 - 21

卐15.21.1 नयामि वां पशुपती घृतेनाज्येन वर्धयन्। यं द्विष्मो यश्च नो द्वेष्टि तस्य वेशः करिष्यथः।। 1।।

卐15.21.2 अधि ब्रूतं पशुपती द्विपदे मे चतुष्पदे। प्रसूतौ यत्र जघ्नतुस्ततो मे मातरं रिषत्।। 2।।

卐15.21.3 या वां रुद्रश्शिवा तनू या वां सन्ति रोगणाः। या वामायुष्मतीस्तनूस्ताभिर्नो मृडतं युवम्।। 3।।

卐15.21.4 न प्र मिनन्ति व्रतिनो व्रतानि सत्यं जिन्वन्तो विदथा वदन्तः। यस्येमे रोदसी उभे संयुक्ते मनसा हृदा।। 4।।

卐15.21.5 स प्रजानां प्रजापतिः साधु रक्षति वर्षति। स वेद रत्नभेषजं देवेभ्यस्पर्याभृतं तेन नो मृडतं युवम्।। 5।।

卐15.21.6 जीवातवे न मर्तवे ऽथो अरिष्टतातये। सगुणास आसते संयुक्ता बलाय कम्। तेषां यदिन्द्रियं वृहच्चतिरो चतिरोचना।। 6।।

卐15.21.7 ये ते रोचने बृहती अन्तरिक्षे अथो दिवः। ताभ्यामुप प्र याहि नस्सर्ववीराँ अरिष्यतः।। 7।।

卐15.21.8 सर्ववीरा अरिष्यन्तो रोचने अधि तस्थिम। यथा नस्तृणमद्वसु दिवि क्षिपद्भ्यो अप्सु या।। 8।। 15 - 22

卐15.22.1 इन्द्रागनी हुवे प्रथमौ ह्वयामि मरुतश्शिवाम्। ह्वयामि विश्वां देवानिमं होममवन्तु मे।। 1।।

卐15.22.2 त्वं प्रथमो अमृतत्वमग्ने देवो देवत्वं प्रथमो जिगेथ। तव दिवि हृदयं सं बभूव स नश्शिवा आपो जायवेदो नियच्छ।। 2।।

卐15.22.3 अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रोऽधि राज एषः। तस्मै जुहोमि हविषा घृतेन मा देवानां यूयवद्भागधेयम्।। 3।।

卐15.22.4 ये देवा दिविष्ठ ये पृथिव्यां जातवेदो य उरावन्तरिक्षे। ये गिरिषु पर्वतेष्वप्स्वन्तस्ते देवा अशनिं यावयाथ।। 4।।

卐15.22.5 मित्रं दिग्भिः कृणुष्व जातवेद आशाभिर्मित्रमधिपा विपश्चित्। मा नो हिंसीर्दिव्येनाग्निना सस्यां येन यन्ति मरुतः स्पर्धमानाः।। 5।।

卐15.22.6 विद्योतमान स्तनयन् वृषे वैषि कनिक्रदत्। भईमः पर्जन्य ते रथः स उ नश्शर्म यच्छतु।। 6।।

卐15.22.7 ये विद्युत मशनिमातन्वन्ति मरुतस्सलिलादधि। कृष्यै नो विश्ववाराया अवधन्वा नि तन्वताम्।। 7।।

卐15.22.8 ता यन्तु स्वरंकृताः स्योनाश्शिवतमा पथा। मा न इन्द्र यवं वधीर्मित्रमेनेन कृण्महे।। 9।।

卐15.22.9 दर्भो अग्र ओषधीनां शतकाण्डो अजायत। स देवैः प्रहितोऽयमागन् स्वस्तये वृषा मरुद्भिस्सह संविदानः।। 10।। 15 - 23

卐15.23.1 वृषाक्षस्यासुरस्य मेनिरसि तां त्वया तथा वेद कर्णस्य कौविदस्येवमाशा। तां माभ्यव गाद्वादशाह्नानि वि रक्षे।। 1।।

卐15.23.2 असिर्मे तिग्मस्यायस इन्द्राग्निभ्यां सुसंशितः। तेन सेधामिदादूनिं कृषिं मे माव गादिति सस्यं मे मा वधीदिति।। 2।।

卐15.23.3 मरुतः परिवृङ्धि नो दिवः क्षुद्रेभिरश्मिभिः। उदुम्बरस्य शाखया चक्षुषाशनिं यावयामसि।। 3।।

卐15.23.4 मरुतो मृडयात नो दिवश्शुक्रेभिरश्मिभिः। उदुम्बरस्य शाखया विचक्षुषाशनिं यावयामसि।। 4।।

卐15.23.5 वर्ताद्वर्तमा क्राम पर्वतादधि पर्वतम्। गिरौ प्रतिश्श्रता सती वृक्षान् भङ्धि मा यवम्।। 5।।

卐15.23.6 अदाम्ना त्वा सन्द्यामि यावण्या परिभूर्ण्या। सानौ प्रतिश्वता सती तृणं भङ्धि मा यवम्।।
6।।

卐15.23.7 उशती नामासि सलिन्दा नाम। अन्यामासां गच्छ यं द्विष्मस्तं गच्छ।। 7।।

卐15.23.8 पराचीमनु संवतं पराचीमनु संविदं पराच्यनु नि द्रव। इतस्त्वा नाशयामसि ब्रह्मणा वीर्यावता।। 8।।

卐15.23.9 वार्भवोदकं भवोदकस्योदकं भव। क्षुद्रात् क्षोदीयसी भूत्वाथेह्यधमं तमः।। 9।।

卐15.23.10 स्योना भव शिवा भव शिवाच्छिवतरा भव। फेनान्मृदीयसी भूत्वेदं शस्यमुपा चर।।
10।।

卐15.23.11 नमस्ते अस्तु विद्युते नमस्ते स्तनयित्नवे। नमस्ते अग्ने दूरेहेते कृण्मो मा नो हिंसीर्द्विपदो मा चतुष्पदः।। 11।।

卐15.23.12 प्रति त्वा सहसा सहस्सहसा प्रति रुध्मसि। ऐन्द्रमिदं सहो महद् भूम्यास्तवं दिवि श्रितम्। अफालकृष्टमा क्राम मा न इन्द्र यवं वधीः।। 12।।

卐15.23.13 यास्समुद्रादुच्चरन्त्युत्सेभ्यो या नदीभ्यः। अत्यन्तस्सर्पो वैद्युतोऽशनिं यावयादितः।।
13। (इत्यष्टादशर्चो नाम पञ्चदशकाण्डे पञ्चमोऽनुवाकः) इत्यथर्ववेदे पैप्पलादसंहितायां अष्टादशर्चो नाम पञ्चदशः काण्डः समाप्तः)

## ʊ अथ षोडशः काण्डः (क्षुद्रकाण्डः)

16 - 1

卐16.1.1 ॐ अन्तकाय मृत्यवे नम इहाय मस्तु पुरुषस्सहासुना। सूर्यस्य भागे अमृतस्य लोके प्राणापाना इह ते रमन्ताम्।। 1।।

卐16.1.2 उदेनं भगोऽग्रभीदुदेनं सोमो अंशुमान्। उदेनं मरुतो देवा उदिन्द्राग्नी स्वस्तये।। 2।।

卐16.1.3 इह तेऽसुरीह प्राण इहाऽऽयुरिह ते मनः। उत्वा निर्ऋत्याः पाशेभ्यो दैव्या वाचा भरामसि।।
3।।

卐16.1.4 उत्क्रामातः - माव पत्था मृत्योः पड्बीश मवमुञ्चमानः। मा छित्था अस्मा ल्लोका दग्ने स्सूर्यस्य सन्दृशः।। 4।।

卐16.1.5 तुभ्यं वातꣳ पवतां मातरिश्वा तुभ्यं वर्षन्त्वमृता न्यापः। सूर्यस्ते तन्वे श न्तपाति त्वां मृत्यु र्दीयतां मा प्रमेष्ठाः।। 5।।

卐16.1.6 उदन्यन्ते पुरुष नावयान ञ्जीवातन्ते दक्षपति ङ्कृणोतु। आ हि रोहो ममामृतं सुखं रथ मथ जीर्वी र्विदथ मा वदासि।। 6।।

卐16.1.7 मा ते मन स्तत्र गा न्मा तिरो भून्मा जीवेभ्यो प्रमोद माऽनुगाꣳ पितॄन्। विश्वे देवा अभिरक्षन्तु त्वेह।। 7।।

卐16.1.8 मा गताना मा दिधीथा ये नयन्ति परावतम्। उदारोह तमसो ज्योति रेह्या ते हस्तं रभामहे।। 8।।

卐16.1.9 श्वामश्च त्वा मा बलश्च प्रेषितौ यमस्य यौ पथि रक्षि श्वानौ। अर्वाङ् - एहि मा विदिध्यो मात्र तिष्ठ पराङ्मनाः।। 9।।

卐16.1.10 मैतं पन्था मनुगाभी मयेष येन पूर्वं न्नेयथ तँ वदामि। तम एत त्पुरुषे मा प्रपत्था अभयं पुरस्ता दभय न्ते अर्वाकः।। 10।। 16 - 2

卐16.2.1 रक्षन्तु त्वाऽग्नयो ये अप्स्वन्ता रक्षन्तु त्वा मनुष्या य मिन्धते। वैश्वानरो रक्षतु जातवेदा दिव्य स्तामा प्रधा ग्विद्युता सह।। 1।।

卐16.2.2 रक्षन्तु त्वा पृथिवी रक्षतु द्यौ स्सूर्यश्च त्वा रक्षता ञ्चन्द्रमाश्च। मा त्वा क्रव्या दभीमंस्तारा त्सङ्कसुका च्चर।। 2।।

卐16.2.3 अन्तरिक्षं रक्षतु देवहेत्या बोधश्च त्वा प्रतीबोधश्च रक्षताम्। अस्वप्नश्च त्वानवद्राणश्च रक्षता ङ्गोपायंश्च त्वा रक्षता ञ्जागृभिश्च।। 3।।

卐16.2.4 ते त्वा रक्षन्तु ते त्वा गोपायन्तु ते त्वांऽहसस्पातु तेभ्यो नम स्तेभ्य स्स्वाहा।। 4।।

卐16.2.5 जीवेभ्यस्त्वा समुद्रे वायु रिन्द्रो धाता दधातु सविता त्रायमाणः। मा त्वा प्राणो बलं हासी दसुन्तेऽनु ह्वयामसि।। 5।।

卐16.2.6 मा त्वा जय स्सहनु र्मा तमो विदं मा जिह्वा बर्हिꣳ प्रमयुꣳ कथा स्याः। उ त्वाऽऽदित्या वसवो भरन्तूदिन्द्राग्नी स्वस्तये।। 6।।

卐16.2.7 अय न्देवा इहैवास्त्वयं माऽमुत्र गादितः। इमं सहस्र वीर्येण मृत्यो रुत्पारयामसि।। 7।।

卐16.2.8 उ त्वा मृत्यो रपिपरं सन्धशन्तु वयोधसः। मा त्वा व्यस्त केश्यो मा त्वाघरुदो रुदन्।। 8।।

卐16.2.9 अर्हासि न्त्वाविद न्त्वा पुन रागा पुनर्नवः। सर्वाङ्ग स्सर्वं न्ते चक्षु स्सर्वमायुश्च तेऽविदन्।। 9।।

卐16.2.10 उ त्वा द्यौरु त्पृथिव्यु त्प्रजापति रब्रवीत्। उ त्वा मृत्यु रोषधय स्सोमराज्ञी रपिपरम्।। 10।।

卐16.2.11 व्यवात्ते ज्योति रभू दपत्वत्तमोऽक्रमीत्। अप त्वन्मृत्यु न्निर्ऋति मप यक्ष्म न्नि दध्मसि।। 11।। 16 - 3

卐16.3.1 आ रभस्वेमा ममृतस्य श्नुष्टि मच्छिद्यमाना जरदष्टि रस्तु ते। असु न्त आयु॰ पुन राभरामि रज स्तमो मोपो गा मा प्रमेष्ठाः।। 1।।

卐16.3.2 जीवता ञ्ज्योति रभ्येहि लोक मा त्वा हरामि शतशारदाय। द्राघीय आयु॰ प्रतर न्ते कृणो म्यव मुञ्चन्तु मृत्यु पाशा अशस्तीः।। 2।।

卐16.3.3 वातत्ते प्राण मविद न्सूर्या च्चक्षु रहं परि। यस्ते मन स्त्वयि तद्धारयामि सँवित्स्वाङ्गै र्वदज्जिह्वया लपन्।। 3।।

卐16.3.4 प्राणेन त्वा न्द्विपदा चतुष्पदा मग्नि मिव जात मभि सन्धमामि। नमस्ते मृत्यो चक्षुषे नम॰ प्राणाय तेऽकरन्।। 4।।

卐16.3.5 अय ञ्जीवतु मामृतेमं समीरयामसि। कृणोम्यस्यै भेषजं मृत्यो मा पूरुषं वधीः।। 5।।

卐16.3.6 अधि ब्रूहि मा रभथा स्सृजेम न्तवैव सन्त्सर्वहाया इहास्तु। भवाशर्वौ मृडतं शर्म यच्छमपसिध्य दूरितं धत्त मायुः।। 7।।

卐16.3.7 देवानां हेति॰ परि त्वा वृणक्तु पारयामि रजस उ त्वा मृत्युरपिपरम्।।

卐16.3.8 आरा दग्नि क्रव्याद न्निरुह ञ्जीवतवे ते परिधि न्दधामि।। 8।।

卐16.3.9 अस्मै मृत्यो रधिब्रूहीमं दयस्वोदितो यमेतु। अरिष्ट स्सर्वाङ्ग स्सुश्रुज्जरसा शतहायनाऽऽत्मना भुज मश्नुवत्।। 1।।

卐16.3.10 यत्ते नियानं रजसं मृत्यु ?- अनवधर्ष्यम्। पथ इम न्तस्माद्रक्षन्तो ब्रह्मास्मै वर्म्म कृण्मसि।। 10।। 16 - 4

卐16.4.1 कृणोमि ते प्राणापानौ जरां मृत्यु ङ्कृणुता न्दीर्घ मायु स्स्वस्ति। वैवस्वतेन प्रहितान् यमदूतांश्चरत आरा दपसेधामि सर्वान्।। 1।।

卐16.4.2 अरा दरातिं निर्ऋतिं परोग्राहि क्रव्याद॰ पिशाचान्। रक्षो यत्सर्व न्दुर्भूत न्तत्तम इवाप हन्मसि।। 2।।

卐16.4.3 अग्नेष्टे प्राण ममृता दायुष्मतो वन्वे जातवेदसः। यथा न रिष्या अमृत श्शजूरस स्तत्ते कृणोमि तदुते समृध्यताम्।। 3।।

卐16.4.4 शिवे ते स्ता न्द्यावापृथिवी असन्तापे अधिश्रियौ। शन्ते सूर्या तपति सँवात वातु ते हृदे।। 4।।

卐16.4.5 शिवा अभिक्षरन्तु त्वापो दिव्या॰ पयस्वती श्शिवास्ते सन्त्वोषधीः। उ त्वा हार्ष मधरस्या दुत्तरां पृथिवी मभि। तत्र त्वाऽऽदित्यौ रक्षतां सूर्या चन्द्रमसा वुभा।। 5।।

卐16.4.6 यत्ते वास॰ परिधानँ या न्नीवि क्कृणुषे त्वम्। शिव न्ते तन्वे तत्कृण्म स्संस्पर्शोऽद्रक्षण मस्तु ते।। 6।।

卐16.4.7 यत्क्षुरेण मर्चायता सुतेजसा वप्ता वपसि केशश्मश्रु। शुम्भं मुखं मैन मायु॰ प्र मोषी?।। 7।।

卐16.4.8 शिवौ ते स्ताँ व्रीहियवा ववलासावदो मधौ। एतौ यक्ष्मँ वि बाधेते एतौ मुञ्चतौ ? अंहसः।। 8।।

卐16.4.9 यदश्नासि यत्पिबसि धान्यं कृष्या॰ पयः। आद्यँ यदनाद्यं सर्वान्ते अन्न मपि सङ्कृणोमि। । 9।।

卐16.4.10 अह्ने च त्वा रात्रये चोभाभ्यां परि दध्मसि। अरायेभ्यो जिघत्सुभ्य इम न्न॰ परि रक्षतु।। 10।। 16 - 5

卐16.5.1 शत न्तेऽयुतं हायना द्वे युगे त्रीणि चत्वारि सन्तु। इन्द्राग्नी विश्वे देवा अनुमन्यन्ता मह्णीयमानाः।। 1।।

卐16.5.2 शरदे त्वा हेमन्ताय वसन्ताय ग्रीष्माय परि दध्मसि। वर्षाणि तुभ्यं स्योनानि येषु वर्धन्त ओषधीः।। 2।।

卐16.5.3 मृत्युरिशे द्विपदां मृत्युरिशे चतुष्पदाम्। तस्मात्त्वां मृत्यु र्गोपते रुद्धरामि समामृथाः।। 3।।

卐16.5.4 सोऽरिष्ट न मरिष्यसि न मरिष्यसि मा बिभेः। न वै तत्र प्र मीयन्ते नो यन्त्यध्वरं रजः।। 4।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐16.5.5 सर्वो वै यत्र जीवति गौरश्वः पुरुषः पशुः। यत्रेदं ब्रह्म क्रियते परिधि र्जीवनाय कम्।। 5।।

卐16.5.6 परित्वा पातु समानेभ्योऽभिचारा त्स बन्धुभ्यः। यमग्नि र्भवामृतोऽतिजीवो मा ते हासिषु रसव श्शरीरम्।। 6।।

卐16.5.7 विश्वे त्वा देवा अमृतेन बिभ्र त्त्वधिवक्ता पशुपतिष्टे अस्तु। अनामयत्सविता ते कृणोत्वा त्वा प्राणो विशतु जीवनाय।। 7।।

卐16.5.8 यो मृत्यव एकशतँ या नाष्ट्राऽतिजीव्या। मुञ्चन्तु तस्मात्त्वा न्देवा अग्ने वैश्वानरा दधि।। 8।।

16 - 6

卐16.6.1 रक्षोहणं वाजिन मा जिघर्मि मित्रं प्रथिष्ठ मुप यामि शर्म। शिवा नो अग्निः क्रतुभि स्समिद्ध स्स नौ दिवा स रिषः पातु नक्तम्।। 1।।

卐16.6.2 अयो दंष्ट्रो अर्चिषा यातुधाना नुपस्पृश जातवेद स्समिद्धः। आ जिह्वाया? मूरदेवा न्रभस्व क्रव्यादो वृष्ट्वापि धत्स्वासन्।। 2।।

卐16.6.3 उभोभया विन्नुपदेहि दंष्ट्रौ हिंस्र श्शिशानोऽवरं परञ्च। उतान्तरिक्षे परि याह्यग्ने जम्भै स्सन्देह्यभि हि यातुधानान्।। 3।।

卐16.6.4 अग्ने त्वचँ यातुधानस्य भिन्धि हिंस्राशनि र्हरसा हन्त्वेनम्। प्र पर्वाणि जातवेद श्शृणीहि क्रव्याद्क्रविष्णु र्विचनोत्येनम्।। 4।।

卐16.6.5 यज्ञै रिषु स्सन्नममानो अग्ने वाचा शल्याँ अशनिभि र्दिहान। ताभि र्विध्य हृदये यातुधाना न्प्रतीचो बाहू न्प्रति भङ्ध्येषाम्।। 5।।

卐16.6.6 यत्रेदानीं पश्यसि जातवेद स्तिष्ठन्त मग्न उत वा चरन्तम्। उतान्तरिक्षे पतन्तँ यातुधानान्तमस्ता विध्य शर्वा शिशानः।। 6।।

卐16.6.7 उताऽऽरब्धा च्छृणुहि जातवेद उतारेभाणां दृष्टिभि र्यातुधानान्। अग्ने पूर्वो नि जहि शोशुचान मामादः - क्ष्विंका स्तमद न्त्वेनीः।। 7।।

卐16.6.8 इह प्र ब्रूहि यतम स्सोऽग्ने यो यातुधान य इदं श्रृणोति। तमारभस्व समिधा यविष्ठ नृचक्षस श्चाक्षुषे रन्धयैनम्।। 8।।

卐16.6.9 तीक्ष्णेनाग्ने चक्षुषा रक्षो यज्ञं प्राञ्चँ वसुभ्यः प्रणयः प्रचेतः। हिंस्रो रक्षां स्यभिशोशुचान मा त्वा दभन् यातुधाना नृचक्षः।। 9।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐16.6.10 नृचक्षा रक्ष प्रतिपश्य विक्षु तस्य त्रीणि प्रतिश्रृणीह्यग्राः। तस्याग्ने पृष्टी र्हरसा श्रृणीहि त्रेधा मूलं यातुधानस्य वृश्च।। 10।। 16 - 7

卐16.7.1 त्रियातुधान꠳ प्रशितिन्त एत्वृतँ यो अग्ने अनृते न हन्ति। तमर्चिषा स्फुर्जय न्जातवेद स्समक्षमेन ङ्गृणते नि वृङ्धि।। 1।।

卐16.7.2 यदग्ने अद्य मिथुना शपातो यद्वा स्तृष्ट ञ्जनयन्त रेभाः। मन्यो र्मनस श्शरव्या जायते या तया विध्य हृदये यातुधानान्।। 2।।

卐16.7.3 परा श्रृणीहि तपसा यातुधाना न्पराऽग्ने रक्षो हरसा श्रृणीहि। पराऽर्चिषा मूरदेवा ञ्छृणीहि परासुतृप श्शोशुचत श्श्रृणीहि।। 3।।

卐16.7.4 पराद्य देवा वृजिनं श्रृणीहि प्रत्यङ्केनं शपथा यन्तु सृष्टाः। वाचा स्तेनं शरव ऋच्छन्तु मर्मन् विश्वस्यैतु प्रसितिँ यातुधानः।। 4।।

卐16.7.5 सनादग्ने मृणसि यातुधाना न्नत्वा रक्षांसि पृतनासु जिग्युः। अनु दह सहमूरा न्क्रव्यादो मा ते हेत्या मुख्यत दैव्यायाः।। 5।।

卐16.7.6 य꠳ पौरुषेण क्रविषा समक्ते यो अश्वेन पशुना यातुधानः। यो अघ्न्यायाः भरतीक्षिर?मश्मे स्तेषां शीर्षाणि हरसाऽपि वृश्च।। 6।।

卐16.7.7 सँवत्सरीणं पय उस्त्रीयायास्तस्यमशी द्यातुधानो नृचक्षः। पीयूष मग्ने यतमस्ति तृप्सात्तं प्रत्यञ्च मर्चिषा विध्य मर्मणि।। 7।।

卐16.7.8 विष ङ्गवाँ यातुधाना꠳ पिवन्त्वावृश्चन्त्वा मदितये दुरेवाः। परैणा न्देव स्सविता ददातु परा भाग मोषधीना ञ्जयन्ताम्।। 8।।

卐16.7.9 त्वन्नो अग्ने अधरा दुदक्त स्त्वं पश्चा दुत रक्षा पुरस्तात्। प्रति त्ये ते अजरास स्तपिष्ठा अघशंसं शोशुचतो दहन्तु।। 9।।

卐16.7.10 पश्चा त्पुरस्ता दधरा दुदक्त꠳ कवि꠳ काव्येन परिपाह्यग्ने। सखा सखाय मजरो जरिम्णेऽग्ने मर्त्याँ अमर्त्यस्त्व न्नः।। 10।। 16 - 8

卐16.8.1 तदग्ने चक्षु꠳ प्रति धेहि रेभे शफारुजँ येन पश्यसि यातुधानान्। अथर्वोऽव ज्योतिषा दैव्येन सत्य न्धूर्वन्त मचित न्न्योषः।। 1।।

卐16.8.2 परित्वाऽग्ने पुरँ वयँ विप्रं सहस्य धीमहि। धृषद्वर्ण न्दिवे दिवे हन्तारं भङ्गुरावतम्।। 2।।

卐16.8.3 वि ज्योतिषा वृहता भात्यग्नि रावि र्विश्वानि कृणुते महित्वा। प्रादेवी र्माया स्सहते दूरेवा श्शिणीते श्रृङ्गे रक्षसे विनिक्षे।। 3।।

卐16.8.4 अग्निं रक्षांसि सेधति शुक्रशोचि रमर्त्यः। शुचिः पावक ईड्यः।। 4।।

卐16.8.5 अग्ने रक्षाणो अंहसः प्रतिस्म देव रिषतः। तपिष्ठै रजत्पे दह।। 5।।

卐16.8.6 ये ते श्रृङ्गे अजरे जातवेद स्तिग्म शोची ब्रह्म संशिते। ताभ्या न्दुर्हार्द मभिदासन्त ङ्किमीदिनं प्रत्यञ्चँ यातुधान ञ्जातवेदो विनिक्ष्व।। 6।।

卐16.8.7 विषेण भङ्गुरावत स्समिन्द्रो रक्षसो दह। अग्ने शुक्रेण शोचिषा तपुरग्रेभि रर्चिभिः।। 7।।

卐16.8.8 प्रत्यग्ने मिथुना दह यातुधाना किमीदिना। स न्त्वा शि? जागृह्यि दब्धं विप्र मन्मभिः।। 8।।

卐16.8.9 प्रत्यग्ने हरसा हर श्श्रृणीहि विश्वतः प्रति। यातुधानस्य रक्षसो बलँ वि रुज वीर्यम्।। 9।।

卐16.8.10 सीदान्वेयाः प्र मृण रक्ष इन्द्र यातुधान क्षयणै मूँरैः। एतावग्ने मिथुना यातुधाना विष्वञ्चौ - उत्कै र्हरसा शयाताम्।। 10।।

卐16.8.11 बृहस्पतिर्नः पूरयतु विश्वतो व्युच्छन्ति रिषसः पवित्रा ध्रुवाः। उद्यन् समुद्रा भिषगस्तु चन्द्रमा स्सूर्य रश्मिभि रेभि गृणा त्वेतत्।। 11।। 16 - 9

卐16.9.1 इन्द्रासोमा तपतं रक्ष उब्जत न्थिर्षयतँ वृषणा तमो वृधः। परा श्शृणीहि तमचितन्योषतँ हत न्नुदेथा न्निशिशी तमत्रिणः।। 1।।

卐16.9.2 इन्द्रासोमा समघशं समभागन्तपुर्ययस्तु तरुरग्निवाङ् इव। ब्रह्मद्विषे क्रव्यादे घोरचक्षसे द्वेषो धत्तमनवायं किमीदिने।। 2।।

卐16.9.3 इन्द्रासोमा दुष्कृतो वव्रे अन्तरनारम्भणे तमसि प्र विध्यतम्। यथैषा न्नातः पुनरे कश्च नः दयत्तद्वाममस्तु सहसे मन्युमच्छवः।। 3।।

卐16.9.4 इन्द्रासोमा वर्तयत न्दिवस्पर्यग्नि तप्तेभिर्युवमस्महन्मभिः। तपुर्वधेभिरजरेभिरत्रिणो नि पर्शाने विध्यतँ यन्तु निस्वरम्।। 4।।

卐16.9.5 इन्द्रासोमा प्रहरत्त्र न्दिवो वधं सं पृथिव्या अघशंसाय तर्हणम्। उत्तक्षतं स्वर्यं पर्वतेभ्यो येन रक्षो वावृधानं निजूर्वथः।। 5।।

卐16.9.6 इन्द्रासोमा परि वा म्भूतु विश्वत इयं मतिः कक्षाश्वेव वाजिना। या वाँ होत्रा म्परि हिनोमि मेधये मा ब्रह्माणि नृपतीवजिन्वतम्।। 6।।

卐16.9.7 प्रति स्मरेथां तु जयद्भिरे वैर्हतं द्रुहो रक्षसो भङ्गुरावतः। इन्द्रासोमा दुष्कृते मा सुग म्भूद्यो मा कदाचिदभिदासति द्रुहः।। 7।।

卐16.9.8 यो मा पाकेन मनसा चरन्तमभिचष्टे अनृतेभिर्वचोभिः। आपो इव काशिना सङ्गृभीता असन्नस्त्वासत इन्द्र वक्ता।। 8।।

卐16.9.9 ये पाकशं सम्विहरन्तमेवैर्ये वा भद्रन्दूषयन्ति स्वधाभिः। अहये वा तान्प्र ददातु सोम आवा दधातु निर्ऋतेरुपस्थे।। 9।।

卐16.9.10 यो नो रसन्दिप्सति पित्वो अग्ने यो अश्वानां यो गवां यस्तनूनाम्। रिपुस्ते न स्तेयकृद्दभ्रमेतु नि ष हीयतां तन्वा तना च।। 10।। 16 - 10

卐16.10.1 पर स्सोऽस्तु तन्वा तना च तिस्रः पृथिवीरधोऽस्तु विश्वाः। प्रति शुष्यति यशोऽस्य देवा यो मा दिवा दिप्सति यश्च नक्तम्।। 1।।

卐16.10.2 सुविज्ञान ञ्चिकितुषे जनाय सच्चासच्च वचसी पस्पृधाते। तयोर्यत् सत्यं यतरद्दजीयस्तदित्सोमो ऽवति हन्त्यासत्।। 2।।

卐16.10.3 न वा उ सोमो वृजीनँ हिनोति न क्षत्रियं मिथुना धारयन्तम्। हन्ति रक्षो हन्त्या सद्वदन्तमुभाविन्द्रस्य प्रसितौ शयाते।। 3।।

卐16.10.4 यदि वाऽहमनृतो देवोऽस्मि मोघं वा देवामप्युहे अग्ने। किमस्मभ्य ञ्जातवेदो हृणीषे द्रोघ वाचस्ते निर्ऋथं सचन्ताम्।। 4।।

卐16.10.5 अद्यामुरीय यदि यातुधानोऽस्मि यदि वायुस्तदप पूरुषस्य। अथासवीरैर्दशभिर्वयूया यो मा मोघँ यातुधानेत्याह।। 5।।

卐16.10.6 यो मा पातुं यातुधानेत्याह यो वा रक्षा श्शुचिरस्मित्याह। इन्द्रस्तं हन्तु महता वधेन विश्वस्य यन्तो रधमस्पदिष्ट।। 6।।

卐16.10.7 प्र या जिगति खर्गलेव नक्तमपद्दं हुस्तन्व ञ्गूहमाना। वव्राभमनन्ताभमवसादिष्ट ग्रावाणो घ्नन्तु रक्षस उपद्बैः।। 7।।

卐16.10.8 वि तिष्ठध्वं मरुतो विक्ष्वीच्छत गृभायतः रक्षसस्सं पिनष्टन। वयो ये भूत्वा पतयन्ति नक्तभिर्ये वा रिपो दधिरे देवे अध्वरे।। 8।।

卐16.10.9 एत उ त्ये पतयन्ति श्वयातव इन्द्रन्दिप्सन्ति दिप्सवो ऽदाभ्याम्। शिशाते शक्रः पिशुनेभ्यो वध नूनं सृजदशनिं यातुमद्भ्यः।। 9।।

卐16.10.10 प्र वर्तय दिवोऽश्मानमिन्द्र सोमशितं मघवन्सं शिशाधि। प्राक्तो ऽपाक्तोऽधरा दुदक्तो ऽभिजहि रक्षसः पर्वतेन।। 10।। 16 - 11

卐16.11.1 इन्द्रो यातूना मभवत्पराशरो हविर्मथीनामभ्या वि वासताम्। अभीदु शक्रः परशुर्यथा वनं पात्रेव भिन्दन्त्सत एतु रक्षसः।। 1।।

卐16.11.2 उलूकयातुं सुशुलुक यातुञ्जहि श्वयातुमुत कोकयातुम्। सुपर्णयातुमुत गृध्रयातुं दृषदेवः प्रमृण रक्ष इन्द्र।। 2।।

卐16.11.3 मा नो रक्षो अभिनड्यातु मावतामपोच्छतँ मिथुना या किमीदिना। पृथिवी नः पार्थिवात् पात्वँ हसोऽन्तरिक्ष दिव्यात्पात्वस्मान्।। 3।।

卐16.11.4

卐16.11.5 इन्द्र जहि पुमांसँ यातुधानमुत स्त्रियं मायया शाशदानाम्। वि ग्रीवासो मूरदेवा ऋदन्तु मा ते दृशन्त्सूर्यमुच्चरन्तम्।। 4। प्रति चक्ष्व वि चक्ष्वेन्द्रश्च सोम जागृतम्। रक्षभ्यो वधमस्यतमशनिं यातुमद्भ्यः।। 5। षोडशकाण्डे द्वितीयोऽनुवाकः 16 - 12

卐16.12.1 या बभ्रवो याश्च शुक्रा रोहिणीरुत पृश्नयः। असिक्नीः कृष्णा-ओषधी स्सर्वाच्छा वदामसि।। 1।।

卐16.12.2 त्रायन्तामिमं पुरुषं यक्ष्माद्देवेषितादधि। यासान्द्यौष्पिता पृथिवी माता समुद्रो मूलं वीरुधाम्बभूव।। 2।।

卐16.12.3 आपोऽग्रं दिव्या ओषधयः। तास्ते यक्ष्ममेनस्य मङ्गादङ्गा दनीनशम्।। 3।।

卐16.12.4 प्रस्तृणोती स्तम्बिनी रेकशृङ्गाः प्रोतन्वतीरोषधीरा वदामि। अंशुमतीः काण्डिनीर्या विशाखा ह्वयामि ते वीरुधो वैश्वदेवीरुग्राः पुरुष जीवनिः।। 4।।

卐16.12.5 यद्व स्सह स्सहमाना वीर्यँ यच्च वो बलम्। ते नेममस्मा द्यक्ष्मात्पुरुषं मुञ्चतौषधीः।। 5।।

卐16.12.6 जीवलां नघारिषा ञ्जीवन्ति मोषधीमुत। अरुन्धती मुन्नयन्तीँ पुष्पां मधुमतीँ हुवेऽस्मा अरिष्टतातये।। 6।।

卐16.12.7 इहायन्तु प्र चेतसो मेदिनिर्वचसो मम। यथेमं पारयामसि पुरुषन्दुरिता दधि।। 7।।



Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐16.12.8 अग्नेर्घासो अपाङ्गर्भो या रोहन्ति पुनर्नवाः। ध्रुवा स्सहस्रनाम्नीर्भेषजी स्सन्त्वाभृताः।। 8।।

卐16.12.9 अवकोल्वा उदकात्मानोषधयः। व्यृषन्ति दुरित न्तीक्ष्ण श्रृङ्ग्यः।। 9।।

卐16.12.10 उन्मुञ्चन्तीर्विं वरुणा उग्रा या विषदूषणी रथोबलास नाशनीः। रक्षो नाशनीः कृत्या दूषणीश्च यास्ता इहा यन्त्वोषधीः।। 10।। 16 - 13

卐16.13.1 शिवास्ते सन्त्वोषधी रपक्रीता स्सहीयसी र्वीरुधो या अभिष्टुताः। अपां रसस्वती र्ज्येष्ठान्त्रायन्ता मस्माकङ्गा मश्वं पुरुषं पशुम्।। 1।।

卐16.13.2 मधुमन्मूलन्मधु मदग्रमासां मधुमन्मध्यं वीरुधा बभूव। मधुमत्पर्णँ मधुमत्पुष्प मासां मधोस्संभूता अमृतस्य भक्षो घृतमन्नन्दुह्रत ङ्गो पुरो गवम्।। 2।।

卐16.13.3 यावतीः कियतीश्चेमाः पृथिव्या मध्योषधीः। तान स्सहस्रपर्णो मृत्युर्मुञ्चन्त्वं ह्सः।। 3।।

卐16.13.4 वैयाघ्रो मणिर्वीरुधा न्त्रायमाणो ऽभिशस्तियाः। अमीवा स्सर्वा रक्षांस्यप हन्त्वधि दूरमस्मत्।। 4।।

卐16.13.5 सिंहस्येव स्तनथो रोषधीना मग्नेरिव विजन्त आभृताभ्यः। गवां यक्ष्मः पुरुषाणां वीरुद्भि रतिनुक्तो नाव्या एतु स्रोत्याः।। 5।।

卐16.13.6 मुमुञ्चाना ओषधयोऽग्नेर्वैश्वानरादधि। भूमिं सन्तन्वतीरिव यासाँ राजा वनस्पतिः।। 6।।

卐16.13.7 याश्चाहं वेद वीरुधो याश्च पश्यामि चक्षुषा। अज्ञाता जानिमश्च या यासु विद्मसि संभृतम्। सर्वा स्समग्रा ओषधीर्वोधन्तु वचसो मम।। 7।।

卐16.13.8 या रोहन्त्याङ्गिरसीः पर्वतेषु समेषु च वीरुधो विश्व भेषजीः। ता नो पयस्वती श्शिवा ओषधी स्सन्तु शं हृदे।। 8।।

卐16.13.9 अश्वत्थो दर्भो वीरुधां सोमो राजामृतँ हविः। व्रिहीर्यवश्च भेषजौ दिवस्पुत्रावमर्त्यौ।। 9।।

卐16.13.10 उज्जीहिध्वे स्तनयत्यभि क्रन्दन्त्योषधीः। यदा वः पृश्निमातरः पर्जन्यो रेतसावति।। 10।। 16 - 14

卐16.14.1 तस्यामृतं स्येमं बलं पुरुषं पारयामसि। अथो कृणोमि भेषजं यथा सच्छतहायनः।। 1।।

卐16.14.2 वराहो वेद वीरुधन्नकुलो वेद भेषजीम्। गन्धर्वा स्सर्पा या विदुस्ता इहा सन्त्वोषधीः।। 2।।

卐16.14.3 या स्सुपर्णा आङ्गिरसी र्दिव्या या रघटो विदुः। वयांसि हंसा या विदुर्याश्च सर्वे पतत्रिणः।। 3।।

卐16.14.4 मृगा या विदुरोषधीस्ता ऽस्मा ऽवसे हुवे। यावतीनामोषधीना ङ्गाव॰ प्राश्नन्त्यघ्न्या यावतीना मजावयः। तावतीर्विश्व भेषजीरा भरामि त्वामभि।। 4।।

卐16.14.5 यावतीषु मनुष्या भेषजं विषयो विदुः। तावती स्तुभ्यमाभृता श्शर्मयच्छ न्त्योषधीः।। 5।।

卐16.14.6 पुष्पवती॰ प्रसुमती॰ फलिनीरफला उत। सम्मातर इव दुह्रा मस्मा ऽरिष्ट तातये।। 6।।

卐16.14.7 उ त्वा ऽऽहार्षँ पञ्चशला दुत्वा दश शलादुत। उत्त्वा यमस्य पड्वीशा दोषधीभि रपीपरम्।। 7।। 16 - 15

卐16.15.1 इन्द्रस्य प्रथमो रथो देवानामपरो रथो वरुणस्य तृतीय ईत्। अहिना मपमारथ स्थाणुमारदथार्षत्।। 1।।

卐16.15.2 दर्भ श्शोचिस्तरुण कमश्वस्य वार॰ पुरुषस्य वारः। रथस्य बन्धुर्महीना मरसम्विषं वारिदुग्रम्।। 2।।

卐16.15.3 अव श्वेत पदाजहि पूर्वेण चापरेण च। उदप्लुतमिव दार्वहिनामरसं विषं वारिदुग्रम्।। 2।।

卐16.15.4 अरङ्घुषो निमज्योन्मज्य पुनरब्रवीत्। उदप्लुतमिवदार्वहिनामरसं विषं वारिदुग्रम्।। 4।।

卐16.15.5 पैद्वो हन्ति कसर्णीलं पैद्व श्वित्र मुपासितम्। पैद्वो रथर्व्या श्शिर स्सम्विभेद पृदाक्वाः।। 5।।

卐16.15.6 पैद्वो प्रेहि प्रथमोऽनु त्वा वयमेमसि। अहीन्व्यस्यतात्पथो येन स्मा वयमेमसि।। 6।।

卐16.15.7 इदं पैद्वो ऽजायतेदमस्य परायणम्। इमान्यर्वत॰ पदाहिघ्न्यो वाजिनीवतः।। 7।।

卐16.15.8 सं यतं न विष्परद्याात्तं ना सं यमत्। अस्मिन्क्षेत्रे द्वावही स्त्री च पुमांश्च ता वुभारसा।। 8।।

卐16.15.9 अरसास इहाहयो येऽन्ति ये च दूरके। घनेन हन्मि वृश्चिक महि न्दण्डेनागतम्।। 9।।

卐16.15.10 अघाश्वस्येदं भेषजमुभयो स्स्वजस्य च। इन्द्रो मह्यमघायन्त महिन्पैद्वो ऽरन्धयत्।। 10।। 16 - 16

卐16.16.1 पैद्वस्य मन्महे वयं स्थिरस्य स्थिरधाम्नः। इमे पश्चात्पृदाकव॰ प्रदीध्यत आसते।। 1।।

卐16.16.2 नष्टासवो नष्टविषा हता इन्द्रेण वज्रीणा। जघानेन्द्रो जघ्निमा वयम्।। 2।।

卐16.16.3 हतास्तिरश्चिराजयो निपिष्ठासो पृदाकवः। दर्विङ्कारि क्रतं श्वित्रं दर्भेष्व सितञ्जहि।। 3।।
卐16.16.4 कैरातिका कुमारिका सका खनति भेषजम्। हिरण्ययीभि रभ्रिभि र्गिरीणामुप सानुषु।। 4।।
卐16.16.5 आयमगन्युवा भिषक्पृश्निहा पराजितः। स वै स्वजस्य जम्भन उभयोर्वृश्चिकस्य च।। 5।।
卐16.16.6 इन्द्रो मे ऽहीन्जम्भयन्मित्रश्च वरुणश्च। वाता पर्जन्योभा।। 6।।
卐16.16.7 पैद्वो मे ऽहीन्जम्भय त्पृदाकुञ्च पृदाकः। स्वजन्ति रश्चिराजिङ्क शर्णीलन्दशो दशान्।। 7।।
卐16.16.8 इन्द्रो जघान प्रथम ञ्जनितारमहेतव। तेषां वस्तृह्यमाणानाङ्क स्स्वि त्तेषामसद्रसः।। 8।।
卐16.16.9 सं हि शीर्षाण्यग्रभं पौञ्जिष्ठ इव कर्वरम्। सिन्धोर्मध्यं परेत्य व्यनिजमहेर्विषम्।। 9।।
卐16.16.10 अहीनां सर्वेषाम्विषम्परा वहन्तु सिन्धवः। हतास्तिरश्चि राजयो निपिष्टासः पृदाकवः।। 10।। 16 - 17
卐16.17.1 ओषधीनामहं वृण उर्वरीरिव साधु या। नयाम्यर्वती रिवाहे निरैतु ते विषम्।। 1।।
卐16.17.2 यदग्नौ सूर्ये विषं पृथिव्यामोषधीषु यत्। कान्दा विषं कनिक्क्रक न्निरैत्वैतु ते अहे।। 2।।
卐16.17.3 अङ्गा दङ्गा त्प्रच्यावय हृदयं परि वर्जय। अधा विषस्य तत्तेजो ऽवाचीन न्तदेतु ते।। 3।।
卐16.17.4 अग्ने त्रायस्व विमदन्नयेमं पुनर्देहि जीवसे जातवेदः। माते हेडांसि दुरितावग न्माहिर्वधी द्विषतᳲ पुरुषन्नः।। 4।।
卐16.17.5 ये अग्निजा ओषधीजा ऽहीनां येऽभ्रजा विद्युत आबभूवुः। येषां जातानि बहुधा बहुनि स्तेभ्य स्सर्पेभ्यो नमसा विधेम।। 5।।
卐16.17.6 तौदी नामासि कन्या घृताची नाम वा असि। अधस्पदेन ते पदो राददे विषदूषणम्।। 6।।
卐16.17.7 आरेऽभूद्विषमरौ द्विषे विषमप्रागपि। अग्निरहे र्निरधाद्विषं सोमो निरणयीत्। दंष्ट्रारमन्व गाद्विष महीरमृत।। 7।। 16 - 18
卐16.18.1 कृतस्तौ जातौ कतमस्सो अर्द्धᳲ कस्मा ल्लोका त्कतमस्याᳲ पृथिव्याः। वत्सौ विराज स्सलिला दुदैतान्त्वौ त्वा पुच्छामि कतरेण दुग्धा।। 1।।
卐16.18.2 योऽक्रन्दयत् सलिलं महित्वा योनिङ्कृत्वा त्रिभूजं शयानः। वत्सᳲ कामदुघो विराजो गुहाश्चक्रे तन्वᳲ पराचैः।। 2।।

卐16.18.3 यानि चत्वारि बृहन्ति येषाञ्चतुर्थँ वि युनक्तु वाचम्। ब्रह्मैनद्विद्या त्तपसा विपश्चि द्यस्मिन्नेकं युज्यते यस्मिन्नेकम्।। 3।।

卐16.18.4 बृहतः परिसामानि षष्ठात्पञ्चाधि निर्मिता। बृहद्बृहत्या निर्मितं कुतोऽधि बृहती मिता।। 4।।

卐16.18.5 बृहती परि मात्राया मातुर्मात्राधि निर्मिता। माया हि यज्ञे मायाया मायाया मातली परि।। 5।।

卐16.18.6 वैश्वानरस्य प्रतिमो परि द्यौर्याव द्रोदसी विबबाधे ऽग्निः। ततष्षष्ठा दामुतो यन्ति स्तोमा उदितो यन्त्यधि षष्ठमह्नः।। 6।।

卐16.18.7 षड्वा पृच्छाम ऋषयः कश्यपेदं त्वं हि युक्तं युजुक्षे योग्यञ्च। विराजमाहुर्ब्रह्मणः पितरं तान्नो विधेह्युतुधा सखिभ्यः।। 7।।

卐16.18.8 यां प्रच्युतामनु यज्ञाः प्रोच्यवन्तो पतिष्ठन्तो पतिष्ठमानाम्। यस्या व्रते प्रसवे यक्षमेजति साविराडृषयः परमे व्योमन्।। 8।।

卐16.18.9 अप्राणैति प्राणेन प्रणतैना न्विराड्स्वराज मभ्येति पश्चात्। विश्वं मृशन्ती मभिरूपां विराजं पस्यन्ति त्वे न त्वे पश्यन्तेनाम्।। 9।।

卐16.18.10 को विराजो मिथुनत्वं प्रवेद क ऋतून्क उ कल्पमस्याः। क्रमान्कोऽस्या बहुधा विदुग्धान् कोऽस्या धाम कतिधा व्युष्टीः।। 10।। 16 - 19

卐16.19.1 इयमेव सा या प्रथमा व्यौच्छात्साप्स्वन्तश्चरति प्रविष्टा। वधूर्जिगाय नवगज्जनित्री महान्तो अस्यां महिमान अन्तः।। 1।।

卐16.19.2 छन्दः पक्षे उषसा पेपिशाने समानं योनिमनुषञ्चरेते। सूर्यपत्नी सञ्चरतः प्रजानती केतुमतत्यजरे भूरिरेतसा।। 2।।

卐16.19.3 ऋतस्य पन्थामनुतिस्र आगुस्त्रयो धर्माऽनुरेत आगुः। प्रजामेका जिन्वन्त्यूर्जमेका राष्ट्रमेका रक्षति देवयूनाम्।। 3।।

卐16.19.4 अग्निषोमावदधुर्या तुरीयासीद्यज्ञस्य पक्षावृषयः कल्पयन्तः। गायत्रीन्त्रिष्टुभ ञ्जगतीमनुष्टुभं बृहदर्कीं यजमानाय स्वराभरन्तः।। 4।।

卐16.19.5 पञ्च व्युष्टिरनु पञ्च दोहागां पञ्चनाम्नी मृतवोऽनुपञ्च। पञ्चदिशः पञ्चदशेन क्लृप्ता स्ता एकमूर्ध्नीरभि लोकमेकम्।। 5।।

卐16.19.6 षङ्जाता भूताः प्रथमजर्तस्य षडुसामानि षडहं बहन्ति। षड्योगं सीरमनु सामसाम षडाहुर्द्यावापृथिवी ष्षडुर्वीः।। 6।।

卐16.19.7 षडाहु श्शीतान्षडु मास ऊष्णा नृतुन्नो ब्रूत यतमोऽतिरिक्तः। सप्त सुपर्णाः कवयो नि षेदुस्सप्त छन्दांस्यनु सप्त दीक्षाः।। 7।।

卐16.19.8 सप्तहोमा स्समिधो ह सप्त मधूनि सप्तर्तवो नु सप्त।। 8।।

卐16.19.9 सप्ताज्यानि परिभूत मायन्सप्तहोतार ऋतुष्या यजन्ति। ता स्सप्त गृध्रा इति शुश्रुवाहम्।। 9।।

卐16.19.10 अष्टौ धामानि प्रथमजर्तस्याष्टेन्द्र ऋत्विजा दैव्या ये। अष्ट योनि रदितिरष्टपुत्रा अष्टमीं रात्रि मभिहव्यमेतु।। 10।।

卐16.19.11 इत्थं श्रेयो मन्यमानेदमागमं युष्माकं सख्ये अहमस्मि शेवा। समानमज्मा क्रतुरस्तु व श्शिव स्स न स्सर्वा स्सञ्चरति प्रजानन्।। 11।। 16 - 20

卐16.20.1 केबलीन्द्राय दुदुहेहि गृष्टिर्वशं पीयूषं प्रथमं दुहाना। अथातर्पय चतुरश्चतुर्धा देवान्मनुष्याँ असुरानुतर्षीन्।। 1।।

卐16.20.2 अष्टेन्द्रस्य षड्यमस्य ऋषीणां सप्त सप्तधा। आपो मनुष्यानोषधीस्ताँ उ पञ्चानु सेचिरे।। 2।।

卐16.20.3 को नु गौः क एकर्षिः किमुसाम काऽऽशिषः। यक्ष्मं पृथिव्या मेकवृदेकर्तुः कतमो नु सः।। 3।।

卐16.20.4 एक गौरेक एकर्षिरेकं सामैक धाशिषः। यक्ष्मं पृथिव्यामेकवृदेकर्तुर्नाति रिच्यते।। 4।। 16 - 21

卐16.21.1 प्राणाय नमो यस्य सर्वमिदं वशे। यो भूत स्सर्वस्येश्वरो यस्मिन्सर्वं प्रतिष्ठितम्।। 1।।

卐16.21.2 नमस्ते प्राण क्रन्दाय नमस्ते स्तनयित्नवे। नमस्तेऽस्तु विद्युते नमस्ते प्राण वर्षते।। 2।।

卐16.21.3 यत्प्राणर्तावागते ऽभिक्रन्दन्त्योषधीः। प्र वीयन्ते गर्भन्दधतेऽथो वह्विर्विजायन्ते।। 3।।

卐16.21.4 यत्प्राण स्तनयित्नूनाऽभिक्रन्द्रत्योषधीः। सर्वन्तदा प्रमोदते यत्किञ्च भूम्यामधि।। 4।।

卐16.21.5 यदा प्राणोऽभ्यक्रन्दीद्वर्षेण स्तनयित्नुना। पशवस्तत् प्र मोदन्ते महो वै नो भविष्यति।।
5।।
卐16.21.6 अभिवृष्टा ओषधयः प्राणेन समवादिरन्। आयुर्वै नः प्रातीतरत्सर्वा नस्सुरभीरकः।। 6।।
卐16.21.7 नमस्ते प्राण प्राणते नमोऽस्त्वोपानते। प्रतिचीनाय ते नमः पराचीनाय ते नम स्सर्वस्मैत इदन्नमः।। 7।।
卐16.21.8 नमस्ते ऽस्त्वायते नमोऽस्तु परायते। नमस्ते प्राण तिष्ठत आसीनायोत ते नमः।। 8।।
卐16.21.9 या ते प्राण प्रिया तनूर्या वा ते प्राण प्रेयसी। अथो यद्भेषजन्तव तस्य नो धेहि जीवसे।।
9।।
卐16.21.10 प्राणः प्रजा अनुपास्ते पिता पुत्रमिव प्रियम्। प्राणो ह सर्वस्येश्वरो यच्च प्राणति यच्च न।।
10।। 16 - 22
卐16.22.1 प्राण मृत्युः प्राणोऽमृतं प्राणन्देवा उपासते। प्राणो ह सत्यवादिनमुत्तमे लोक आदधत्।।
1।।
卐16.22.2 प्राणो विराट् प्राणो देष्ट्री प्राणं सर्व उपासते। प्राणोऽग्नि श्चन्द्रमा स्सूर्यः प्राणमाहुः प्रजापतिम्।। 2।।
卐16.22.3 प्राणापानौ व्रीहियवा वनड्वान् प्राण उच्यते। यवे ह प्राणाहितोऽपानो व्रीहिरुच्यते।। 3।।
卐16.22.4 अपानति प्राणति पुरुषो गर्भे अन्तरा। यदा त्वं प्राण जिन्वस्यथ स जायते पुनः।। 4।।
卐16.22.5 प्राणमाहुमातरिश्वानं वातो ह प्राण उच्यते। प्राणेह भूतं भव्यञ्च प्राणे सर्वं समाहितम्।।
5।।
卐16.22.6 आथर्वणी राङ्गीरसी दैवीमनुष्यजाश्च याः। सर्वाः प्रमोदन्त्वोषधयो यदात्वं प्राण जीन्वसि।। 6।।
卐16.22.7 यदा प्राणोऽभ्यवर्षिद्वर्षेण पृथिवीं महीम्। ओषधयः प्र मोदन्ते अथो याः काश्च वीरुधः।।
7।।
卐16.22.8 यस्ते प्राणेदं वेद यस्मिंश्चासि प्रतिष्ठितः। सर्वेऽस्मै बलिं हरानमुष्मिं ल्लोकमुत्तमे।। 8।।
卐16.22.9 यथा प्राण बलिहृतस्तुभ्यं सर्वाः प्रजा इमाः। एवा तस्मै बलिं हरान्यस्त्वा शुश्राव स्सुश्रवाः।। 9।।

卐16.22.10 अन्तर्गर्भे श्चरति देवता स्वाभूतो भूत स्स उ जायते पुनः। स भूतं भव्यं भुवनं भविष्यत् पिता पुत्रं प्र विवेशा शचीभिः।। 10।। 16 - 23

卐16.23.1 एकपादं नोत्खिदति सलिलार्द्धं स उत्पतम्। यदङ्ग स तमुत्खिदेन्नैवाद्य न श्वः रात्री नाहस्स्यान्न प्रज्ञायै त्रि किञ्च न।। 1।।

卐16.23.2 अष्टाचक्रं वर्त्तत एकनेमि सहस्राक्षरं प्रपुरो नि पश्चात्। अर्द्धेनेदं परिबभूव विश्वं यदस्यार्द्धङ्कतम स्स केतुः।। 2।।

卐16.23.3 योऽस्य विश्व जन्मन ईशे सर्वस्य चेष्टतः। अन्येषु क्षिप्रधन्वने तस्मै प्राण नमोऽस्तु ते।। 3।।

卐16.23.4 योऽस्य सर्वजन्मन ईशे विश्वस्य चेष्टतः। अतन्द्रो ब्रह्मणा धीरः प्राणो मामभि रक्षतु।। 4।।

卐16.23.5 ऊर्ध्वं स्सुप्तेषु जागार ननु तीर्यङ् निपद्यते। न सुप्तमस्य सुप्तेष्वनु सुश्राव कश्चन।। 5।।

卐16.23.6 प्राणो मा मत् पर्यावृतो न मदन्यो भविष्यसि। अपां गर्भमिव जीवसे प्राण बध्नामि त्वा मयि।। 6।। 16 - 24

卐16.24.1 सहस्र स्त्वेषर्षभः पयस्वान् विश्वा रूपाणि वक्षणासु बिभ्रत्। भद्रां दात्रे यजमानाय शिक्षन्बार्हस्पत्य उस्रिय स्तन्तुमातान्।। 1।।

卐16.24.2 अपां योऽग्रे प्रतीमा बभूवुः प्रभूस्सर्वस्मै पृथिवीव देवी। पिता वत्सानां पतिरघ्न्यानां साहस्रे पोषे अपि नः कृणोतु।। 2।।

卐16.24.3 पुमानन्तर्वाङ् स्थविरः पयस्वान् वसोः कबन्ध मृषभो बिभर्ति। तमिन्द्राय पथिभिर्देव यानैर्हुत मग्निर्बहति जातवेदाः।। 3।।

卐16.24.4 देवानां भाग उपनाह एषोऽपांरस ओषधीनां घृतस्य। सोमस्य द्रप्समवृणीतशक्रो वृहन्नद्रि रभवद्यच्छरीरम्।। 4।।

卐16.24.5 पिता वत्सानां पतिरघ्न्यानामथो पिता महतां गर्गराणाम्। वत्सो जरायुः प्रतिधुक्पीयूष आमिक्षा घृत न्तद्वस्यरेतः।। 5।।

卐16.24.6 सोमस्य पूर्णं कलसं बिभर्षि त्वष्टा रूपाणां जनिता पशूनाम्। शिवास्ते सन्तु प्रजन्व इमान्यस्मभ्यं स्वधिते यच्छ या अमूः।। 6।।

卐16.24.7 इन्द्रस्यौजो वरुणस्य बाहू अश्विनोरंसौ मरुतामिय ङ्ककुत्। बृहस्पति स्सं भूत मेतमाहुर्ये धीरासः कवयो मनीषिणः।। 7।।

卐16.24.8 आज्यं बिभर्ति घृतमस्य रेतस्साहस्रः पोषस्तमु यज्ञमाहुः। इन्द्रस्य रूपमृषभो वा सा न स्सो अस्मान्देवा श्शिव ऐतु दत्तः।। 8।।

卐16.24.9 दैविर्विषः पयस्वाना तनोषि त्वामिन्द्रन्त्वां सरस्वन्तमाहुः। सहस्रं स एकमुखा ददाति यो ब्राह्मणर्षभो मा जुहोति।। 9।।

卐16.24.10 बृहस्पति स्सविता ते मनो दधौ त्वष्टुर्वायोः पर्यात्मा त आ भृतः। अन्तरिक्षे मनसा त्वा जुहोमि बर्हिष्टे द्यावापृथिवी अभूताम्।। 10।। 16 - 25

卐16.25.1 य इन्द्र इव देवेष्वेति गोषु विवावदत्। तस्यर्षभस्याङ्गानि ब्रह्मा सं स्तौतु भद्रया।। 1।।

卐16.25.2 पार्श्वे आस्तामनुमत्या भगस्यास्ता मनूवृजौ। अष्ठीवन्ता वब्रविन्मित्रो ममैतौ केवलाविति।। 2।।

卐16.25.3 भसदासिदादित्यानां श्रोणी आस्तां बृहस्पतेः। पुच्छं वातस्य देवस्य तेन धूनोत्योषधीः।। 3।।

卐16.25.4 क्रोड आसीर्यामि शंसस्य सोमस्य कलशो धृतः। उत्थातु रब्रुवन् पदो यद् ऋषभं व्यकल्पयन्।। 4।।

卐16.25.5 गुदा आसन् सिनिवाल्या स्सूर्याया स्त्वच मब्रूवन्। देवा स्संगत्य यत्सर्व ऋषभं व्यकल्पयन्।। 5।।

卐16.25.6 ते कुष्ठिका स्स्वरमायैः कूर्मेभ्योऽदधु श्शफान्। ऊबध्यमस्य कीटेभ्य स्स्ववर्तेभ्योऽधारयन्।। 6।।

卐16.25.7 श्रृङ्गाभ्यां रक्षर्षत्यरातिं हन्ति चक्षुषा। श्रृणोति भद्रङ्कर्णाभ्या ङ्गवां यः पतिरघ्न्यः।। 7।।

卐16.25.8 शतयाजं यजते नैनमृण्वन्त्यग्नयः। जिन्वन्ति सर्वे तन्देवा यो ब्राह्मणर्षभ मा जुहोति।। 8।।

卐16.25.9 ब्राह्मणेभ्योर्षभं दत्वा वरीयः कृणु ते मनः। पृष्टिं सोऽघ्यानां स्वे गोष्ठे वि पश्यतु।। 9।।

卐16.25.10 गावस्सन्तु प्रजा स्सन्त्वथोऽस्तु तनूबलम्। सर्वन्तदनु मन्यता न्देवा ऋषभ दायिने।। 10।। 16 - 26

卐16.26.1 अयं पिपानेन्द्रियं रयिं बिभर्ति चेतनीम्। अयन्धेनु सुदुघा न्नित्यवत्साम्वश न्दुहे विपश्चितं परो दिवः।। 1।।

卐16.26.2 पिशङ्गरूपो नभसो वयोधा ऐन्द्रश्शुष्मो विश्वरूपो नागन्। प्रजा मस्मभ्यन्दधत रयिञ्च रायस्पोषमुप सत्ता सदेम।। 2।।

卐16.26.3 एतं वो युवानं परिदध्मोऽत्र तेन क्रिडन्ति श्चरतवशाङ् अनु। मा नो हिंसिष्ट जनुषा सुभागा रायस्पोषैरभि न स्सचध्वम्।। 3।।

卐16.26.4 उपेहोप पर्चनोऽस्मिन्गोष्ठे उप पृञ्चतु। उपर्षभस्य
यद्रेत उपेन्द्र तव वीर्यम्।। 4।। 16 - 27

卐16.27.1 अयं प्रतिसरो मणिर्वीरो वीराय बध्यते। वीर्यावान् सपत्नहा शूरवीरꣳ परिपाण स्सुमङ्गलः।। 1।।

卐16.27.2 अयं मणि सपत्नहा सुवीर स्सहस्वान्वाजी सहमान उग्रः। प्रत्यक्कृत्या दूषयन्नेतु वीरः।। 2।।

卐16.27.3 अनेनेन्द्रो मणिना वृत्रमहन्नेनासुरान् पराभावयन्मनीषी। अनेन द्यावापृथिवी उभे अजयदनेना जयत्प्रदिशश्चतस्रः।। 3।।

卐16.27.4 अयं स्राक्त्यो मणिꣳ प्रतिवर्तꣳ प्रतिसरः। ओजस्वान् विमृधो मणि स्सोऽस्मान् पातु विश्वतः।। 4।।

卐16.27.5 तदग्निराह तदुसोमाह बृहस्पति स्सविता तदिन्द्रः। ते ते देवाꣳ पुरोहिताꣳ प्रतीचीꣳ कृत्याꣳ प्रतिसरे ऋजन्तु।। 5

卐16.27.6 अन्तर्दधे द्यावापृथिवी उताह रुत सूर्य मुतेमं ब्रह्मणस्पतिम्। ते ते देवा पुरोहिताꣳ प्रतीचीꣳ कृत्याꣳ प्रतिसरे ऋजन्तु।। 6।।

卐16.27.7 ये स्राक्त्यं मणिञ्जना वर्माणि कृण्वते। सूर्यो दिवमिवारुह्य वि कृत्या बाधते वशी।। 7।।

卐16.27.8 स्राक्त्येन मणिनर्षिणेव मनीषिणा। अजैषं सर्वा पृतना वि मृधो हन्मि रक्षसः।। 8।।

卐16.27.9 याꣳ कृत्या आङ्गिरसीर्याꣳ कृत्याऽऽसुरीरुत। कृत्या या स्वयं कृता या उ चान्येभिराभृताः। उभयीस्ताꣳ परायन्तु परावतो नवतिन्नाव्या अति।। 9।।

卐16.27.10 अस्यै मणिं वर्म बध्नन्तु देवा इन्द्रो विष्णु स्सविता रुद्रोऽग्निः। प्रजापतिः परमेष्ठी विराड् वैश्वानरर्षयश्च सर्वे।। 10।। 16 - 28

卐16.28.1 उत्तमस्योषधीना मनड्वाङ्गतामिव व्याघ्र श्श्वपदामिव। यमैच्छा मा विदाम तं प्रतिस्पाशन मन्तितम्।। 1।।

卐16.28.2 स इद्व्याघ्रो भवत्यथो सिंहोऽथो वृषा। सर्वा दिशो वि राजति यो बिभर्तीमं मणिम्।। 2।।

卐16.28.3 नैनं घ्नन्त्यप्सरसो न गन्धर्वा न मर्त्याः। सर्वा दिशो वि राजति यो बिभर्तीमं मणिम्।। 3।।

卐16.28.4 कश्यप स्त्वामसृजत कश्यपस्त्वा समैरयत्। अबिभत्सेन्द्रो मानुषे बिभ्रत्सं श्रेषिणेऽजयत्।। 4।।

卐16.28.5 मणिं सपत्नजम्भनं वर्म देवा अबध्नत। यस्त्वा कृत्याभिर्यस्त्वा दीक्षाभिर्यस्त्वा यज्ञैर्जिघांसति। प्रत्यक्त्व मिन्द्रन्तञ्जहि वज्रेण शतपर्वणा।। 5।।

卐16.28.6 अयमिद्वैः प्रतिवर्त स्सहस्वान्सञ्जयो मणिः। प्रजान्धनञ्च रक्षतु परिपाण स्सुमङ्गलः।। 6।।

卐16.28.7 असपत्न न्नो अधरादसपत्न न्न उत्तरात्। इन्द्रासपत्नन्नः पश्चाज्ज्योतिशूरः पुरस्कृधि।। 7।।

卐16.28.8 ऐन्द्राग्नं वर्म बहुलं यदुग्रं विश्वेदेवा नाति विध्यन्ति सर्वे। तत्ते तन्वन्त्रायतां सर्वतो बृहदायुष्मान् जरदष्टिर्यथासः।। 8।।

卐16.28.9 आ त्वा रुक्षद्देवमणिर्मह्या अरिष्टतातये। इमं मेथिमभिसं विशाध्वं तनूपान न्त्रिवरुथ मोजसे।। 9।।

卐16.28.10 अस्मिन्निन्द्रो नि दधातु नृम्णमिमं देवासोऽभि संविशध्वम्। दीर्घायुत्वाय शतशारदाया युष्मान् जरदष्टिर्यथासत्।। 10।।

卐16.28.11 इन्द्रो बध्नातु ते मणिञ्जिगीवाङ्कपराजितः। सोमपाभयङ्करो वृषा। स त्वा रक्षतु सर्वदा दिवानक्तञ्च विश्वतः।। 11। इति (क्षुद्रकाण्डे) षोडशकाण्डे पञ्चमोऽनुवाकः) 16 - 29

卐16.29.1 इन्द्रो मन्थतु मन्थिता शक्रश्शूरः पुरन्दरः। यथा ह नाम सेनाममित्राणां सहस्रशः।। 1।।

卐16.29.2 पूतिरज्जुरुपध्मानी पूतिं सेनां कृणोत्वमुम्। अग्निन्धूमं परादृश्य हृत्स्वा दधतां भयम्।। 2।।

卐16.29.3 पुरुषानमून्पुरुषा ह्व¤ कृणोतु हन्तेनान्वधको बधैः। क्षिप्रं शरेव भज्यन्तां बृहज्जालेन सञ्जिताः।। 3।।

卐16.29.4 अमुनश्वत्थ निश्शृणीहि खादामू न्खदिरा जिरम्। ताजभङ्ग इव भज्यन्तां बृहज्जालेन सन्दिताः।। 4।।

卐16.29.5 अन्तरिक्ष ञ्जालमासी ज्जालदण्डा दिशो महीः। तेनाभिधाय सेनामिन्द्रो दस्यूनपावपत्।। 5।।

卐16.29.6 बृहत्ते जालं बृहत इन्द्र श्शूरस्सहस्रार्घ स्तातवीर्यश्च। तेन न्युब्जमघवन्नमित्रा श्शश्वतीभ्यस्समाभ्यः।। 6।।

卐16.29.7 बृहद्धि जालं बृहत श्शक्रस्य वाजिनीवतः। तेन शतं सहस्रमयुतं जघानेन्द्रो दस्युना मभिधायसेनाम्।। 7।।

卐16.29.8 अयं लोको जालमासीच्छक्रस्य महतो महान्। तेनाहमिन्द्र जालेन तमसामूनपि दधामि सर्वान्।। 8।।

卐16.29.9 सेतिरुग्रा व्यृद्धि रार्तिश्चानपवाचना। श्रमस्तन्द्रीश्च मोहश्च तैरमूनभि दधामि सर्वान्।। 9।।

卐16.29.10 मृत्यवेऽमुं प्रयच्छामि मृत्युपाशै रमीसिताः। मृत्योर्ये अघला दूतास्तेभ्य एनान्प्रति नयामि बद्धान्।। 10।। 16 - 30

卐16.30.1 मृत्युदुताऽमूनयत यमदूता ऽपोम्भतः। परस्सहस्रा हन्यन्तां तृणेढ्येनां मत्यं भवस्य।। 1।।

卐16.30.2 साध्या एकं जालदण्डमुद्यत्य यन्त्वोजसा। रुद्रा द्वितीयं वसवस्तृतीय मादित्यैरेक उद्यतः।। 2।।

卐16.30.3 विश्वेदेवा उपरिष्टा दुब्जन्तो यन्त्वोजसा। मध्येनघ्नन्तो यन्तु सेनामङ्गिरसो वधैः।। 3।।

卐16.30.4 वनस्पतीन् वानस्पत्या नोषधीरुत वीरुधः। द्विपाच्चतुष्पा दिष्णामि यथा सेनाममुं हनन्।। 4।।

卐16.30.5 गन्धर्वाप्सरसो देवान् सर्पान् पुण्यजनान् पितृन्। दृष्टानदृष्टा न्निष्णामि यथा सेनाममुं हनन्।। 5।।
卐16.30.6 मृत्युपाशा इमे युक्ता यानाक्रम्य न मुच्यसे। अमुष्या हन्तु सेनाया इदं कूटं सहस्रहम्।।
卐16.30.7 घर्मस्समिद्धोऽग्निनायं होम स्सहस्रहः। भवश्च पृश्निबाहू श्शर्व सेनाममूं हतम्।। 7।।
卐16.30.8 मृत्यराषमापद्यन्तां क्षुधं सेदिं वधं भयम्। इन्द्रश्चाक्षु जालाभ्यां शर्व सेनाममूं हतम्।। 8।।
卐16.30.9 पराजिताः प्र त्रसता मित्रा जिता धावत ब्रह्मणा। बृहस्पति प्रणुत्तानां मामीषां मोची कश्चन।। 9।।
卐16.30.10 अवपद्यन्ता मेषामा युधानि मा शकन् प्रतिधामिषुम्। अथैषां बहु बिभ्यतामिषवो घ्नन्तु मर्मणि।। 10।।
卐16.30.11 समेना न्क्रोशता न्द्यावापृथिवी उभे समन्तरिक्षं सह देवताभिः। मा ज्ञातारं मा प्रतिष्ठां विदन्त मिथो विघ्नाना उप यन्तु मृत्युम्।। 11।। 16 - 31
卐16.31.1 दिशश्चतस्रो ऽश्वतर्यो देवरथस्य पुरोडाशा श्शफा अन्तरिक्षमुद्धिः।। 1।।
卐16.31.2 द्यावापृथिवी यक्षसी ऋतवोऽभीशवो वाक्परिरथ्यम्।। 2।।
卐16.31.3 अहोरात्रे चक्रेमासारा स्सम्वत्सरो ऽधिष्ठानम्।। 3।।
卐16.31.4 विराडीषाग्नी रथमुखमिन्द्र स्सव्यष्ठा श्चन्द्रमा स्सारथिः।। 4।।
卐16.31.5 इतो जयेतो वि जयस्व जय सञ्जय स्वाहा।। 5।। 16 - 32
卐16.32.1 दिवस्पृथिव्या ऽन्तरिक्षा त्समुद्रा दग्नेर्वातान्मधुकशा हि यज्ञे। ताञ्चा इत्वामृतं वसानां ऋग्भिः प्रजाः प्रतिनन्दन्ति सर्वाः।। 1।।
卐16.32.2 पश्यन्तश्याश्चरितं पृथिव्याः पृथङ्गरो बहुधा मीमांसमानाः। अग्नेर्वाता न्मधुकशा हि यज्ञे मरुतामुग्रानप्तिः।। 2।।
卐16.32.3 महद्विश्वरूपं पयो अस्या स्समुद्रस्योत त्वा रेत आहुः। यत ऐति मधुकशा रराणा तत्प्राणस्तदमृत न्निविष्टम्।। 3।।
卐16.32.4 मातादित्याना न्दुहिता वसूनां प्राणः प्रजानाममृतस्य नाभिः। हिरण्यवर्णा मधुकशा घृताची महद् भर्गश्चरति मर्त्येषु।। 4।।

卐16.32.5 मधोꣳ कशामजनयन्त देवास्तस्या गर्भोऽभवद् विश्वरूपः। तञ्जातन्तरूणं पिपर्ति माता स जातो विश्वा भुवनाभि वस्ते।। 5।।

卐16.32.6 कस्तौ प्रवेद क उ तौ न आह यावस्यास्स्तनौ सहस्रधारावक्षितौ। ऊर्जन्दुहाते अनपस्फुरन्तौ।। 6।।

卐16.32.7 कस्तं प्रवेद क उ तञ्चिकेत यो अस्या हृदꣳ कलश स्सोमो धानो अक्षितः। ब्रह्मा सुमेधा स्सोऽस्मिन्मदेत।। 7।।

卐16.32.8 हिं करिक्रती बृहती वयोधा उच्चैर्घोषाभिर्याति या व्रताः। त्रीन्घर्मानभि वावशाना मिमाति मायुं पयते पयोभिः।। 8।।

卐16.32.9 यामापीनामुपसीदन्त्यापो यां शाक्करा वृषभा यां स्वराजः। ते वर्षन्ति ते वर्षयन्ति तद्विदे काममूर्जमापः।। 9।।

卐16.32.10 स्तनयित्नुस्ते वाक्प्रजापते वृषा शुष्मं क्षिपसि भूम्यामधि। अग्ने र्वातान्मधुकशा हि यज्ञे मरुतामुग्रानप्तिः।। 10।। 16 - 33

卐16.33.1 यथा सोमꣳ प्रातस्सवने अश्विनोर्भवति प्रियः। एवा मे अश्विना वर्चात्मनि ध्रियताम्।। 1।।

卐16.33.2 यथा सोमो द्वितीयसवन इन्द्राग्नोर्भवति प्रियः। एवा म इन्द्राग्नी वर्चात्मनि ध्रियताम्।। 2।।

卐16.33.3 यथा सोमस्तृतीयसवन ऋभूणां भवति प्रियः। एवा म ऋभवो वर्चात्मनि ध्रियताम्।। 3।।

卐16.33.4 मधु जनषीय मधु मवं शिषीय। पयस्वानग्न आगमन्तं मा सं सृजवर्चसा।। 4।।

卐16.33.5 सं माग्ने वर्चसा सृज सं प्रजया समायुषा। विद्युर्मे अस्य देवा इन्द्रो विद्यात्सहर्षिभिः।। 5।।

卐16.33.6 यद् गिरिषु पर्वतेषु गोष्वश्वेषु यन्मधु। सुरायां सिच्यमानायां यत्तत्र मधु तन्मयि।। 6।।

卐16.33.7 यथा मधु मधुकृत स्संभरन्ति मधावधि। एवा मे अश्विना बलमोजश्च ध्रियताम्।। 7।।

卐16.33.8 यथा मख्या इदं मधु न्यञ्जन्त्यक्ष्णावधि। एवा मे अश्विना वर्च तेजश्च ध्रियताम्।। 8।।

卐16.33.9 अश्विना सारघेण मा मधुमाङ्क्तं शुभस्पती। यथा वर्चस्वतीं वाच मा वदामि जनाङ् अनु।। 9।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐16.33.10 वृषा शुष्मं क्षिपसि भूम्यां दिवो मधोꣳकशाया पृथिवी मनक्षी। ताञ्जातां पशवो उपजीवन्ती सर्वे ते नो सेषमूर्जं पिपर्ति।। 10।। 16 - 34

卐16.34.1 पृथिवी दण्डो ऽन्तरिक्षं गर्भो द्यौ कशा विद्युत् प्रकाशः।। 1।।

卐16.34.2 मधोꣳ कशा च घृताची हिरण्ययो विदुः।। 2।।

卐16.34.3 उर्व्यसि प्रख्व्यस्यम्भोऽसि नभोऽसि सहोऽसि।। 3।।

卐16.34.4 अम्भो मां कृणु नभो मां कृणु सहो मां कृणु।। 4।।

卐16.34.5 समुद्रोऽस्यक्षितो ऽपरिमिता सहस्र मणिस्सहस्रं मा मृच्छतु।। 5।।

卐16.34.6 यो मधु कशाया स्सप्त मधूनि वेद सप्त मधुमतीन्।। 6।।

卐16.34.7 मधुमन्तं लोकञ्जयति मधुमदस्याहार्यं भवति।। 7।।

卐16.34.8 यद्वीध्रे स्तनयति तत्प्रजापतिरेव प्रजाभ्यꣳ प्रादुर्भवति।। 8।।

卐16.34.9 तस्मा त्प्राचीनोपवित स्तिष्ठे प्रजापतेऽनु मा बुध्यस्वेति।। 9।।

卐16.34.10 अन्वेनं प्रजापतिरनु प्रजा बुध्यन्ते य एवं वेद।। 10। इति (क्षुद्रकाण्डे)षोडशकाण्डे षष्ठोऽनुवाकः 16 - 35

卐16.35.1 या ङ्कल्पयन्ति वहतौ वधूमिव विश्वरूपां हस्तकृता श्चिकित्सवः। सारादेत्वप नुदाम एनान्।। 1।।

卐16.35.2 शीर्षण्वती पयस्वती कर्णिनी कृत्याकृता संभृता विश्वरूपाम्। प्रत्यक्प्रति प्रहिण्मसि यश्चकार तमृच्छतु।। 2।।

卐16.35.3 शूद्रकृता राजकृता स्त्रीकृता ब्रह्मभिꣳ कृता। जाया पत्यानुत्तेव कर्त्तारं बन्धमृच्छतु।। 3।।

卐16.35.4 अनयाह मोषध्या सर्वाꣳ कृत्या अदूदुषम्। यां क्षेत्रे चक्रुर्या ङ्गोभ्यो यां वाते पुरुषेभ्यः।। 4।।

卐16.35.5 कृत्या स्सन्तु कृत्याकृते शपथा श्शपथीब्ने। प्रत्यक्प्रति प्रहिण्मसि यश्चकार तमृच्छतु।। 5।।

卐16.35.6 प्रतीचीन आङ्गिरसो ऽध्यक्षो नꣳ पुरोहितः। प्रतीचीꣳ कृत्याऽऽकृत्या मूङ्कृत्या कृतो जहि।। 6।।

Sri Ganapati Sachchidananda Avadhoota Dattapeetham

卐16.35.7 यस्त्वोवाच परेहीति प्रतिकूल मुदाय्यम्। तं कृत्येऽभि निवर्तस्व मास्मानिच्छो ऽनागसः।। 7।।

卐16.35.8 यस्ते परूंषि सन्दधौ रथस्येव ऋभुर्धिया। तं गच्छ तत्र तेऽयन मज्ञात स्तेऽयञ्जनः।। 8।।

卐16.35.9 ये त्वा कृत्वा लेभिरे विद्वला अभिचारिणः। विद्मेद ङ्कृत्या दूषणं प्रतिवर्त्म पुनस्सरं तेन त्वा स्नपयामसि।। 9।।

卐16.35.10 यद्युर्भगां प्रस्नपितां मृतवत्सा मुपेयिम। अपैतु सर्वं मत्पापन्द्रविणं मोप तिष्ठतु।। 10।।

16 - 36

卐16.36.1 यत्ते पितृभ्यो ददतो यज्ञे वा नाम जगृहुः। सन्देश्या त्सर्वस्मात्पापा दिमा मुञ्चन्तु त्वौषधीः।। 1।।

卐16.36.2 देवै न सात्पित्र्या न्नामग्राहा त्सन्देस्या दभिनिष्कृतात्। मुञ्चन्तु त्वा वीरुधो वीर्येण ब्रह्मण ऋग्भिः पय सर्षीणाम्।। 2।।

卐16.36.3 यथा वातश्च्यावयति भूम्या रेणुमन्तरिक्षाच्चाभ्रम्। एवास्मत्सर्वं दुर्भूतं ब्रह्मनुत्तमपायति।। 3।।

卐16.36.4 अपक्रामना नदती विनद्धा गर्दभीव। कर्तॄन्नक्षस्वेतो नुत्ता ब्रह्मणा वीर्यावता।। 4।।

卐16.36.5 अयं पन्थापि नयामस्त्वा कृत्ये प्रहितान्प्रति त्वा प्र हिण्मः। तेनाभि याहि भुञ्जत्य नस्वतीव वाहिनी विश्वरूपा कुरुटिनी।। 5।।

卐16.36.6 पराक्ते ज्योतिरपथन्ते अर्वागन्यत्रास्मदयना कृणुष्व। परेणेहि नवतिन्नाव्या अति दुर्गास्स्रोत्या मा क्षणिष्ठाः परेहि।। 6।।

卐16.36.7 वात इव वृक्षं नि मृणीही पादय मा गामश्वं पुरुषमुच्छिष एषाम्। कर्तॄन्निवृत्येतः कृत्ये प्रजास्त्वाय बोधय।। 7।।

卐16.36.8 यान्त चक्रुर्वर्हिषि यां श्मशाने कृत्यां क्षेत्रे बलङ्ग वा नि चख्नुः। अग्नौ वा त्वा गार्हपत्येऽभिचेरुः पाकं सन्तन्धीरतरा अनागसन्तदितो नाशयामसि।। 8।।

卐16.36.9 उपाहृतमनु बुद्धन्निखातं वैरन्त्सार्यन्व विदाम कर्त्रम्। तदेतु यत आगतन्त्रातांश्वेव वर्ततां हन्तु कृत्याकृतः प्रजाम्। स्वायसासय स्सन्ति नो गृहे विद्म ते कृत्ये यतिधा परुंषि।। 9।। 16 - 37

卐16.37.1 उत्तिष्ठैव परेहीतोऽज्ञाते किमिहेच्छसि। ग्रीवास्ते कृत्ये पादौ चापि कर्त्स्यामि निद्रव।। 1।।

卐16.37.2 इन्द्राग्म्य स्मात्रक्षतां यौ प्रजानां प्रजापती। सोमराजा अधिपा मृडिता च भूतस्य नः पतयो मृडयन्तु।। 2।।

卐16.37.3 भवा गन्धर्वा वस्यतां पापकृत्वने कृत्याकृते दुष्कृते विद्युत न्देवहेतिम्।। 3।।

卐16.37.4 यद्येयथ द्विपदी चतुष्पदी कृत्याकृता संभृता विश्वरूपा। सतोऽष्टापदी भूत्वा पुनः परेहि दुच्छुने।। 4।।

卐16.37.5 अभ्यक्ताक्ता स्वरंकृता सर्वं भरन्ति दुरितं परेहि। जानीहि कृत्ये कर्तारं दुहितेव पितरं स्वम्।। 5।।

卐16.37.6 परेहि कृत्ये मा तिष्ठो विद्धस्येव पदन्नयः। मृगस्स मृगयुस्तन्न त्वा निकर्तुमर्हति।। 6।।

卐16.37.7 मर्त्यो मृत्वी स्स्वयङ्कृतं यञ्चकाराचित्या। हस्ताभ्या मात्मनेऽवधीम्।। 7।।

卐16.37.8 उत हन्ति पूर्वासिनं प्रत्यादाया वर्हीष्वा। उतो पूर्वस्य निघ्नतो नि हन्त्यः परः प्रति।। 8।।

卐16.37.9 एतद्धि श्रुणु मे वचोऽथेहि यत एयथ। यस्त्वा चकार तं पुनः।। 9।।

卐16.37.10 अनागोहत्या वै भीमा कृत्ये मा नो गामश्वं पुरुषं वधीः।। 10।। 16 - 38

卐16.38.1 यत्र यत्रासि निहिता ततस्त्वोत्थापयामसि। पर्णा ल्लघियसी भव।। 1।।

卐16.38.2 यदि स्थ तमसाभृता जालेनाभिहिता यूयम्। सर्वास्संलुप्येतः कृत्वा पुनः कृत्ये प्र हिण्मसि।। 2।।

卐16.38.3 कृत्याकृतं मूलकृत मभिनिष्कारिणः प्रजाम्। मृणीही कृत्ये मोच्छिषो मुङ्कृत्या कृतञ्जहि।। 3।।

卐16.38.4 यथा सूर्यस्तमसो मुच्यते परि रात्रिञ्जहात्युषसश्च केतून्। एवाहं सर्वन्दुर्भूतं हस्तीव रजो दुरितञ्जहामि।। 4।। 16 - 39

卐16.39.1 उपमितः प्रतिमितोऽथ परिमितश्च यः। शालाया विश्ववाराया नद्धानि वि चृतामसि।। 1।।

卐16.39.2 यत्ते नद्धं विश्ववारे पाशो ग्रन्थिश्च यः कृतः। बृहस्पतिरिवाहं बलं वाचा वि स्रंसयामि तत्।। 2।।

Sri Sanatana Sachidananda Avadhoota Dattapeetham

卐16.39.3 आययाम सम्बबर्ह ग्रन्थीश्चकार ते दृढान्। परूंषि विद्वाञ्छस्तेवेन्द्रेण वि चृतामसि।। 4।।
卐16.39.4 सन्दशानाम्पलदानां परिष्यञ्जल्यस्य च। सर्वा मानस्य पत्नी ते नद्धानि वि चृतामसि।। 4।।
卐16.39.5 वंशानान्ते न हनाना म्प्राणाहस्य तृणस्य च। पक्षाणां विश्ववारेते नद्धानि वि चृतामसि।। 5।।
卐16.39.6 यानि ते अन्त शिशक्यान्याबेधू रण्यायकम्। प्र ते तानि वि चृतामसि शिवा मानस्य पत्नी न उद्धिता तन्वे भव।। 6।।
卐16.39.7 हविर्धानमग्नि शालम्पत्नीनां सदनं सदः। सदो देवानामसि देवि शाले।। 7।।
卐16.39.8 अक्षुमोपशं विततं सहस्राक्षं विषूवति। अपिनद्धमभिहितं ब्रह्मणा वि चृतामसि।। 8।।
卐16.39.9 यश्च त्वा प्रति गृह्णाति येन चासि मिता त्वम्। उभौ मानस्य पत्नी तौ जीवतां जरदष्टी।। 9।।
卐16.39.10 अमुत्रै न मागच्छताद्दृढानद्धा परिष्कृता। यस्यास्ते वि चृतामस्यङ्गमङ्ग परुष्परुः।। 10।।
16 - 40
卐16.40.1 अग्निमन्त श्छादयसि पुरुषान् पशुभिस्सह। विजावति प्रजावति वि ते पाशांश्चृतामसि।। 1।।
卐16.40.2 उर्जस्वती घृतवती पृथिव्यान्निमिता मिता। विश्वान्नं विभ्रति शाले मा हिंसीः प्रति गृह्णतः।। 2।।
卐16.40.3 यस्त्वा पूर्वो निमिमाय सञ्जभार वनस्पतीन्। प्रजायै चक्रे त्वा शाले परमेष्ठी प्रजापतिः।। 3।।
卐16.40.4 नमस्तस्मै नमो दात्रे शालापतये च कृण्मसि। नमोऽग्नये प्रचरते पुरुषाय च ते नमः।। 4।।
卐16.40.5 गोभ्यो अश्वेभ्यो नमो यच्छालायां विजायते। अन्तरा द्याञ्च पृथिवीञ्च यद्व्यचस्तेन शालाम्प्रति गृह्णामि त इमाम्।। 5।।
卐16.40.6 यदन्तरिक्षं रजसो विमानन्तत् कृण्वोदरं शेवधिभ्यः। यच्छालां प्रति गृहणामि तस्मै।। 6।।

卐16.40.7 तृणैरावृता पलदान् वसाना रात्रिव शाला जगतो निवेशनी। मिता पृथिव्यां तिष्ठसि हस्तिनीव पद्वति।। 7।।

卐16.40.8 या द्विपक्षा चतुष्पक्षा षट्पक्षा या निमीयते। अष्टापक्षां दशपक्षां शालां मानस्य पत्नीमग्निर्गर्भ इवा शये।। 8।।

卐16.40.9 इटस्य ते वि चृताम्यपिनद्ध मपोर्णुवन्। वरुणेन समुब्जितां मित्रꣳ प्रातर्व्युब्जतु।। 9।।

卐16.40.10 कुलायेऽधि कुलायं कोशे कोशस्समुब्जितः। तत्र मर्तो वि जायते यस्माद्विश्वम्प्रजायते।। 10।। 16 - 41

卐16.41.1 चतु स्स्रक्तिं परिचक्रां कविभिर्निर्मितां मिताम्। इन्द्राग्नी रक्षतश्शाला ममृतौ सोम्यं सदः।। 1।।

卐16.41.2 मा नꣳ पाशान् प्रति मृचो गुरुर्भारो लघुर्भवः। वधुमिव त्वा शाले यत्र कामं भरामसि।। 2।।

卐16.41.3 इमा आपꣳ प्र हराम्ययक्ष्मा यक्ष्मनाशनीः। गृहानभि प्रसीदाम्यमृतेन सहाग्निना।। 3।।

卐16.41.4 प्रतीचीं त्वा प्रतीचीन श्शाले प्रैम्यहिंसतीम्। अग्निर्ह्यन्तरापश्चर्त्तस्य प्रथमोभा।। 4।।

卐16.41.5 स्वाहा देवेभ्यस्स्वाह्येभ्यꣳ प्राच्या दिशश्शालाया नमो महिम्ने।। 5।।

卐16.41.6 स्वाहा देवेभ्य स्स्वाह्येभ्यः दक्षिणाया दिशश्शालाया नमो महिम्ने।। 6।।

卐16.41.7 स्वाहा देवेभ्य स्स्वाह्येभ्यꣳ प्रतीच्या दिशश्शालाया नमो महिम्ने।। 7।।

卐16.41.8 स्वाहा देवेभ्य स्स्वाह्येभ्य उदीच्या दिशश्शालाया नमो महिम्ने।। 8।।

卐16.41.9 स्वाहा देवेभ्य स्स्वाह्येभ्यः ध्रुवाया दिशश्शालाया नमो महिम्ने।। 9।।

卐16.41.10 स्वाहा देवेभ्य स्स्वाह्येभ्य ऊर्ध्वाया दिशश्शालाया नमो महिम्ने।। 10।।

卐16.41.11 स्वाहा देवेभ्य स्स्वाह्येभ्यः दिशो दिशश्शालाया नमो महिम्ने।। 11।। 16 - 42

卐16.42.1 अरातीयोर्भ्रातृव्यस्य दुर्हार्दो द्विषतश्शिरः। प्र वृश्चामीदमोजसा।। 1।।

卐16.42.2 वर्ममह्य मयं मणि फालाज्जातꣳ करिष्यति। तृप्तो मन्थेनमागमद्रसेन सह वर्चसा।। 2।।

卐16.42.3 यत्त्वा शिक्वꣳ परावधीत्तक्षा हस्तेन वास्या। आपस्त्वा तस्माज्जीवलाꣳ पुनन्तु शुचयश्शुचिम्।। 3।।

卐16.42.4 हिरण्यस्त्रगयं मणिर्दुहानोव स्स्वोषितम्। श्रद्धां यज्ञं महो दधत्गृहे वसतु नोऽतिथिः।। 4।।

卐16.42.5 तस्मै घृतं सुरां मध्वन्नमन्नं क्षदामहे। स नः पितेव पुत्रेभ्य श्श्रेयश्श्रेयश्चिकित्सतु देवेभ्यो मणिरेत्य।। 5।।

卐16.42.6 यम बध्नाद्बृहस्पतिर्मणिं फालं घृतश्चुतमुग्रं खदिरमोजसे। तमग्निः प्रत्यमुञ्चताज्याय रसायकं सोऽस्मा आज्यन्दुहे। भूयो भूय श्श्वश्श्वस्तेन त्वन्द्विषतो जहि।। 6।।

卐16.42.7 यमबध्नाद्बृहस्पतिर्मणिं फालं घृतश्चुतमुग्रं खदिरमोजसे। तमिन्द्रः प्रत्यमुञ्चतौजसे वीर्यायकं सोऽस्मै बलमिदुहे। भूयो भूय श्श्वश्श्वस्तेन त्वं द्विषतो जहि।। 7।।

卐16.42.8 यमबध्नाद्बृहस्पतिर्मणिं फालं घृतश्चुतमुग्रं खदिरमोजसे। तं सूर्यः प्रत्यमुञ्चत तेनेमाऽजयद्दिश स्सोऽस्मै वर्च इद्दुहे। भूयो भूय श्श्वश्श्वस्तेन त्वन्द्विषतो जहि।। 8। 16 - 43

卐16.43.1 यमबध्नाद्बृहस्पतिर्मणिं फालं घृतश्चुतमुग्र ङ्खदिरमोजसे। तं सोमः प्रत्यमुञ्चत द्रविणाय रसायकं सोऽस्मै मोह इद्दुहे। भूयो भूय श्श्वश्श्वस्तेन त्वं द्विषतो जहि।। 1।।

卐16.43.2 यमबध्नाद्बृहस्पतिर्मणिं फालं घृतश्चुतमुग्र ङ्खदिरमोजसे। तं विभ्रचन्द्रमा मणि मसुराणां पुरोऽजय द्दानवानां हिरण्ययी स्सोऽस्मै तेज इद्दुहे। भूयो भूय श्श्वश्श्वस्तेन त्वं द्विषतो जहि।। 2।।

卐16.43.3 यमबध्नाद्बृहस्पतिर्मणिं फालं घृतश्चुतमुग्र ङ्खदिरमोजसे। तं राजा वरुणो मणिं प्रत्यमुञ्चत शम्भुवं सोऽस्मै राज्यं दुहे। भूयो भूय श्श्वश्श्वस्तेन त्व न्द्विषतो जहि।। 3।।

卐16.43.4 यमबध्नाद्बृहस्पतिर्मणिं फालङ्घृतश्चुतमुग्र ङ्खदिरमोजसे। तन्त्वष्टा प्रत्यमुञ्चत प्रजाभ्यो वीर्यायकं सोऽस्मै रूपमिद्दुहे। भूयो भूय श्श्वश्श्वस्तेन त्वन्द्विषतो जहि।। 4।।

卐16.43.5 यमबध्नाद्बृहस्पतिर्मणिं फालङ्घृतश्चुतमुग्र ङ्खदिरमोजसे। तं विभ्रत्सविता मणि न्तेनेदमजयत्स्व स्सोऽस्मै सुनृतां दुहे। भूयो भूय श्श्वश्श्वस्तेन त्व न्द्विषतो जहि।। 5।।

卐16.43.6 यमबध्नाद्बृहस्पतिर्मणिं फालङ्घृतश्चुतमुग्र ङ्खदिरमोजसे। तमापो विभ्रतीर्मणि सदा धावन्त्यक्षिता स्साभ्यो अमृतं दुहे। भूयो भूय श्श्वश्श्वस्तेन त्व न्द्विषतो जहि।। 6।।

卐16.43.7 यमबध्नाद्बृहस्पतिर्मणिं फाल ङ्घृतश्चुतमुग्र ङ्खदिरमोजसे। तेन मां मणिनाकृषि मश्विनावभिरक्षत स्सभिषग्भ्यां पयो दुहे। भूयो भूय श्श्वश्श्वस्तेन त्वन्द्विषतो जहि।। 7।।

卐16.43.8 यमबध्नाद् बृहस्पतिर्मणिं फाल ङ्घृतश्चुतमुग्र ङ्खदिरमोजसे। यमबध्नाद्बृहस्पतिर्वाताय मणिमाशवे सोऽस्मै वाजिनमिद्दुहे। भूयो भूय श्श्वश्श्वस्तेन त्व न्द्विषतो जहि।। 8।।

卐16.43.9 यमबध्नाद् बृहस्पतिर्मणिं फाल ङ्घृतश्चुतमुग्र ङ्खदिरमोजसे। तन्देवा विभ्रतो मणिं सर्वाँ लोकान्युधा जयन्स एभ्यो जितिमिद्दुहे। भूयो भूय श्श्वश्श्वस्तेन त्वन्द्विषतो जहि।। 9।।

卐16.43.10 यमबध्नाद् बृहस्पतिर्मणिं फाल ङ्घृतश्चुतमुग्र ङ्खदिरमोजसे। तमिमन्देवता मणिन्तुभ्य न्दधतु भर्तवे स उ ते भूतिमिद्दुहाम्। भूयो भूय श्श्वश्श्वस्तेन त्वन्द्विषतो जहि।। 10।। 16 - 44

卐16.44.1 अन्तर्देशाऽबध्नत प्रदिशस्तमबध्नत। प्रजापति सृष्टो मणिर्द्विषतो मेऽधराङ् अकः।। 1।।

卐16.44.2 ऋतवस्त मबध्नतार्त्तवा स्तमबध्नत। संवत्सर स्त्वं बध्वा सर्वं भूतं वि राजति।। 2।।

卐16.44.3 अथर्वाणो अबध्नताथर्वणा अबध्नत। अङ्गीरसस्त्वं बध्वा दस्यूनां बिभिदुः पुरः।। 3।।

卐16.44.4 तन्धाता प्रत्यमुञ्चत स भूतं व्यकल्पयत्। भूयो भूय श्श्वश्श्वस्तेन त्व न्द्विषतो जहि।। 4।।

卐16.44.5 यमबध्नाद् बृहस्पति र्देवेभ्यो ऽसुरक्षितिम्। स त्वायं मणिरागमत्सह गोभिरजाविभि रन्नेन प्रजया सह।। 5।।

卐16.44.6 यमबध्ना द्बृहस्पति र्देवेभ्यो ऽसुरक्षितिम्। स त्वायं मणिरागम न्मधोर्घृतस्य धारया किलालेन श्रिया सह।। 6।।

卐16.44.7 यमबध्ना द्बृहस्पति र्देवेभ्यो ऽसुरक्षितिम्। स त्वायं मणिरागमदोजसा तेजसा सहसा भूत्वा द्रविणेन श्रिया सह।। 7।।

卐16.44.8 यस्य लोका इमे त्रयः पयो दुग्धमुपासते। स त्वायमभिरक्षतु मणिश्रैष्ठ्याय मूर्द्धतः।। 8।।

卐16.44.9 सत्वायं शत दक्षिणो मणि श्श्रैष्ठ्याय जिन्वतु। यं देवाः पितरो मनुष्या उपजीवन्तु सर्वदा।। 9।।

卐16.44.10 यस्मै त्वा यज्ञवर्धन मणे प्रत्यमुञ्च शिवम्। तन्त्वा शतदक्षिण मणे श्रैष्ठाय जिन्वतात्।। 10।। 16 - 45

卐16.45.1 असपत्न स्सपत्नहा सपत्नान्मेऽधरां अकः। त्तरं द्विषतस्त्वा मणिः कृणोतु देवजाः।। 1।।

卐16.45.2 मणिं सहस्रवीर्यं ब्रह्मणा तेजसा सह प्रति मुञ्चामि ते शिवम्। स त्वायमभि रक्षतु देवैः फालमणिस्सह।। 2।।

卐16.45.3 यथा वीजमुर्वरायां कृष्टे फालेन रोहति। एवास्मिन् प्रजा पशवोऽन्नमन्नं वि रोहतु।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐16.45.4 एतमिध्मं समाभृत ञ्जुषाणोऽग्ने प्रतिहर्य होमम्। तस्मिन्विदेम सुमतिं स्वस्ति चक्षुः प्राणं प्रजां पशून्जातवेदसि ब्रह्मणा।। 4।। 16 - 46

卐16.46.1 का चासि क्षमाचासि तस्यास्ते भूतञ्च सुभूतश्चैति मुखे। ताभ्यान्ते विधेयं ताभ्यान्ते नमस्ताभ्या न्नो मृडताभ्या न्नोऽधिब्रूहि ताभ्यान्नोभि जिघ्र। मातेव पुत्रं पितेवसूनुमयन्ते अस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदन्न एनम्।। 1।।

卐16.46.2 भूमिश्चासि भूतिश्चासि तस्यास्ते भुवनञ्च सुभूतिश्चैति मुखे। ताभ्यान्ते विधेयन्ताभ्यान्ते नमस्ताभ्यान्नो मृडताभ्या न्नोऽधिब्रूहि ताभ्यान्नोभि जिघ्र। मातेव पुत्रं पितेव सूनुमयन्ते अस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदन्न एनम्।। 2।।

卐16.46.3 पृथ्वी चासि पार्थिवी चासि तस्यास्ते वित्तश्च सुवित्तिश्चैति मुखे। ताभ्यान्ते विधेयन्ताभ्यान्ते नमस्ताभ्यान्नो मृडताभ्या न्नोऽधिब्रूहि ताभ्यान्नोभि जिघ्र। मातेव पुत्रं पितेव सूनुमयन्ते अस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदन्न एनम्।। 3।।

卐16.46.4 क्षेम्या चासि क्षितिश्चासि तस्यास्ते कञ्चनाकश्चैति मुखे। ताभ्यान्ते विधेयन्ताभ्यान्ते नमस्ताभ्यान्नो मृडताभ्या न्नोऽधिब्रूहि ताभ्यान्नोभि जिघ्र। मातेव पुत्रं पितेव सूनुमयन्ते अस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदन्न एनम्।। 4।।

卐16.46.5 दृढा चासि सुदृढा चासि तस्यास्ते स्वश्च स्वर्गश्चैति मुखे। ताभ्यान्ते विधेयन्ताभ्यान्ते नमस्ताभ्यान्नो मृडताभ्या न्नोऽधिब्रूहि ताभ्यान्नोभि जिघ्र। मातेव पुत्रं पितेव सूनुमयन्ते अस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदन्न एनम्।। 5।।

卐16.46.6 अमितिश्चासि निर्ऋतिश्चासि तस्यास्ते मित्रञ्च मैत्रश्चैति मुखे। ताभ्यान्ते विधेयन्ताभ्यान्ते नमस्ताभ्यान्नो मृडताभ्या न्नोऽधिब्रूहि ताभ्यान्नोभि जिघ्र। मातेव पुत्रं पितेव सूनुमयन्ते अस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदन्न एनम्।। 6।।

卐16.46.7 शितिपृष्ठा चासि विधून्वाना चासि तस्यास्ते विन्दश्च विन्दमानश्चैति मुखे। ताभ्यान्ते विधेयन्ताभ्यान्ते नमस्ताभ्यान्नो मृडताभ्या न्नोऽधि ब्रूहि ताभ्यान्नोभि जिघ्र। मातेव पुत्रं पितेव सूनुमयन्ते अस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदन्न एनम्।। 7।।

Sri Ganapathy Sachchidananda Avadhoota Datta Peetham

卐16.46.8 सुहिता चासि सुहितिश्चासि तस्यास्ते वित्तिश्च सुवित्तिश्चैति मुखे। ताभ्यान्ते विधेयन्ताभ्यान्ते नमस्ताभ्यान्नो मृडताभ्या न्नोऽधि ब्रूहि ताभ्यान्नोभि जिघ्र। मातेव पुत्रं पितेव सूनुमयन्ते अस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदन्न एनम्।। 8।।

卐16.46.9 वप्सा चासि वप्सतिश्चासि तस्यास्ते वसुच्च प्रवसुच्चैति मुखे। ताभ्यान्ते विधेयन्ताभ्यान्ते नमस्ताभ्यान्नो मृडताभ्या न्नोऽधि ब्रूहि ताभ्यान्नोभि जिघ्र। मातेव पुत्रं पितेव सूनुमयन्ते अस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदन्न एनम्।। 9।।

卐16.46.10 परुश्चासि सदान्वाना चासि तस्यास्ते स्वञ्च स्वावच्चैति मुखे। ताभ्यान्ते विधेयन्ताभ्यान्ते नमस्ताभ्यान्नो मृडताभ्या न्नोऽधि ब्रूहि ताभ्यान्नोभि जिघ्र। मातेव पुत्रं पितेव सूनुमयन्ते अस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदन्न एनम्।। 10।। 16 - 47

卐16.47.1 पृश्निश्चासि पृषतिश्चासि तस्यास्ते यच्छश्च प्रयच्छश्चैति मुखे। ताभ्यान्ते विधेयन्ताभ्यान्ते नमस्ताभ्यान्नो मृडताभ्या न्नोऽधि ब्रूहि ताभ्यान्नोभि जिघ्र। मातेव पुत्रं पितेव सूनुमयन्ते अस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदन्न एनम्।। 1।।

卐16.47.2 विश्वभृच्चासि विश्वरूपा चासि तस्यास्ते ददच्च प्रददच्चैति मुखे। ताभ्यान्ते विधेयन्ताभ्यान्ते नमस्ताभ्यान्नो मृडताभ्या न्नोऽधि ब्रूहि ताभ्यान्नोभि जिघ्र। मातेव पुत्रं पितेव सूनुमयन्ते अस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदन्न एनम्।। 2।।

卐16.47.3 गिरन्तीचासि गरगृंचासि तस्यास्ते वृन्दश्च संवृन्दानश्चैति मुखे। ताभ्यान्ते विधेयन्ताभ्यान्ते नमस्ताभ्यान्नो मृडताभ्या न्नोऽधि ब्रूहि ताभ्यान्नोभि जिघ्र। मातेव पुत्रं पितेव सूनुमयन्ते अस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदन्न एनम्।। 3।।

卐16.47.4 गुर्वी चासि गुरुभृच्चासि तस्यास्ते दोहश्च दुहानश्चैति मुखे। ताभ्यान्ते विधेयन्ताभ्यान्ते नमस्ताभ्यान्नो मृडताभ्या न्नोऽधि ब्रूहि ताभ्यान्नोभि जिघ्र। मातेव पुत्रं पितेव सूनुमयन्ते अस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदन्न एनम्।। 4।।

卐16.47.5 दितिश्चास्यदितिश्चासि तस्यास्ते पयस्वा पयस्वच्चैति मुखे। ताभ्यान्ते विधेयन्ताभ्यान्ते नमस्ताभ्यान्नो मृडताभ्या न्नोऽधि ब्रूहि ताभ्यान्नोभि जिघ्र। मातेव पुत्रं पितेव सूनुमयन्ते अस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदन्न एनम्।। 5।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐16.47.6 जूर्णा चासि जरयन्ति चासि तस्यास्ते दक्षश्च दक्षमाणश्चैति मुखे। ताभ्यान्ते विधेयन्ताभ्यान्ते नमस्ताभ्यान्नो मृडताभ्या न्नोऽधि ब्रूहि ताभ्यान्नोभि जिघ्र। मातेव पुत्रं पितेव सूनुमयन्ते अस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदन्न एनम्।। 6।।

卐16.47.7 अप्रतिष्ठा चासि प्रतिष्ठिता चासि तस्यास्ते ओजश्च तेजश्चैति मुखे। ताभ्यान्ते विधेयन्ताभ्यान्ते नमस्ताभ्यान्नो मृडताभ्या न्नोऽधि ब्रूहि ताभ्यान्नोभि जिघ्र। मातेव पुत्रं पितेव सूनुमयन्ते अस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदन्न एनम्।। 7।।

卐16.47.8 लोकिनी चासि लोककृच्चासि तस्यास्ते कुर्वच्च संस्कृवाणाश्चैति मुखे। ताभ्यान्ते विधेयन्ताभ्यान्ते नमस्ताभ्यान्नो मृडताभ्या न्नोऽधिब्रूहि ताभ्यान्नोभि जिघ्र। मातेव पुत्रं पितेव सूनुमयन्ते अस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदन्न एनम्।। 8।।

卐16.47.9 उर्वी चासि प्रवुर्वी चासि तस्यास्ते स्रुवच्च स्रुवसश्चैति मुखे। ताभ्यान्ते विधेयन्ताभ्यान्ते नमस्ताभ्यान्नो मृडताभ्या न्नोऽधि ब्रूहि ताभ्यान्नोभि जिघ्र। मातेव पुत्रं पितेव सूनुमयन्ते अस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदन्न एनम्।। 9।।

卐16.47.10 नीची चास्युत्ताना चासि तस्यास्ते रोहच्च विरोहच्चैति मुखे। ताभ्यान्ते विधेयन्ताभ्यान्ते नमस्ताभ्यान्नो मृडताभ्या न्नोऽधि ब्रूहि ताभ्यान्नोभि जिघ्र। मातेव पुत्रं पितेव सूनुमयन्ते अस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदन्न एनम्।। 10।। 16 - 48

卐16.48.1 रोहीणी चासि सुरोहीणी चासि तस्यास्ते चान्नश्चान्नाद्यश्चैति मुखे। ताभ्यान्ते विधेयन्ताभ्यान्ते नमस्ताभ्यान्नो मृडताभ्या न्नोऽधि ब्रूहि ताभ्यान्नोभि जिघ्र। मातेव पुत्रं पितेव सूनुमयन्ते अस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदन्न एनम्।। 1।।

卐16.48.2 सरा चासि सरस्वती चासि तस्यास्ते ब्रह्मञ्च क्षत्रश्चैति मुखे। ताभ्यान्ते विधेयन्ताभ्यान्ते नमस्ताभ्यान्नो मृडताभ्या न्नोऽधि ब्रूहि ताभ्यान्नोभि जिघ्र। मातेव पुत्रं पितेव सूनुमयन्ते अस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदन्न एनम्।। 2।।

卐16.48.3 वसुभृच्चासि वसुमती चासि तस्यास्ते सुनृता चेरा चैति मुखे। ताभ्यान्ते विधेयन्ताभ्यान्ते नमस्ताभ्यान्नो मृडताभ्या न्नोऽधि ब्रूहि ताभ्यान्नोभि जिघ्र। मातेव पुत्रं पितेव सूनुमयन्ते अस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदन्न एनम्।। 3।।

卐16.48.4 महश्चासि महस्वती चासि तस्यास्ते कामश्च तृप्तिश्चैति मुखे। ताभ्यान्ते विधेयन्ताभ्यान्ते नमस्ताभ्यान्नो मृडताभ्या न्नोऽधि ब्रूहि ताभ्यान्नोभि जिघ्र। मातेव पुत्रं पितेव सूनुमयन्ते अस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदन्न एनम्।। 4।।

卐16.48.5 सर्वा चासि सर्वं तदिदं तस्यास्ते विश्वञ्च विश्वे च देवा यन्ति मुखे। ताभ्यान्ते विधेयन्ताभ्यान्ते नमस्ताभ्यान्नो मृडताभ्या न्नोऽधिब्रूहि ताभ्यान्नोभि जिघ्र। मातेव पुत्रं पितेव सूनुमयन्ते अस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदन्न एनम्।। 5।। 16 - 49

卐16.49.1 यद्देवा देवहेडनं देवासश्चकृमा वयम्। आदित्यास्तस्मान्नो यूयमृतस्यर्तेन मुञ्चत।। 1।।

卐16.49.2 ऋतस्यर्तेनादित्या यजत्रा मुञ्च तेह नः। यज्ञं यद्यज्ञवाहस शिशक्षन्तो पारिमः।। 2।।

卐16.49.3 मेदस्वता यजमाना स्स्रुचाज्येन जुह्वतः। आकामा विश्वे वो देवा शिशक्षन्तो नोप शेकिम।। 3।।

卐16.49.4 यद्विद्वांसो यदविद्वांसो एनांसि चकृमा वयम्। तस्मान्नो इह मुञ्चतो विश्वे देवास्सजोषसः।। 4।।

卐16.49.5 यदि जाग्रद्यदि स्वपन्नेन एनस्यऽकरम्। भूतम्मा तस्माद्भव्यञ्च द्रुपदादिव मुञ्चताम्।। 5।।

卐16.49.6 द्रुपदादिवः मुमुचान स्स्विन्न स्स्नात्वा मलादिवः। पूतं पवित्रेणेवाज्यं विश्वान्मुञ्चन्तु मैनसः।। 6।।

卐16.49.7 यद्यामं चक्रुर्निखनन्तोऽग्रे कार्षीवणा अन्नविदो न विद्यया। वैवस्वते राजनि तज्जुहोम्यथ यज्ञियं मधुमन्नोऽस्तु।। 7।।

卐16.49.8 वैवस्वतः कृणवद्भेषजानि मधुभागो मधुना सं सृजाति। मातुर्यदेन इषितं न आगन्यद्वा पितापराद्धो जिहिडे।। 8।।

卐16.49.9 यदीदं मातुर्यदिवा पितुर्नो भ्रातुः पुत्राच्चेतस एनाऽऽगन्। यावन्तोऽस्याः पितर स्सचन्ते तेषां सर्वेषां शिवोऽस्तु मन्युः।। 9।।

卐16.49.10 अपमित्यमप्रतीतँ यदस्मि न्यमस्य येन बलिना चरामि। इदन्तदग्ने अनृणो भवामि जीवन्नेव प्रति ददामि सर्वम्।। 10।। 16 - 50

卐16.50.1 इहैव सन्तः प्रतिदध्म एनज्जीवा जीवेभ्यो नि हराम एनत्। अपमित्य धान्यं यज्जघसाग्निर्मा तस्मादनृणं कृणोतु।। 1।।

卐16.50.2 अनृणा अस्मिन्ननृणाः परस्मिन्तृतीये लोके अनृणा स्स्याम। ये देवयाना उत पितृयाणा न्सर्वान्पथो अनृणा-आक्षियेम।। 2।।

卐16.50.3 यद्धताभ्यां चकृमा किल्विषाण्यक्षाणा मक्तुमुपलिप्सुमाना। उग्रम्पश्ये उग्रजितौ तदद्याप्सरसा वनुदत्तामृणन्नः।। 3।।

卐16.50.4 उग्रम्पश्ये राष्ट्रभृतङ्किल्विषँ यदक्षवृत्तमनुदत्तं नस्तत्। ऋणान्नो नर्णं यद्यच्छमानो यमस्य लोके अधिरज्जुरायत्।। 4।।

卐16.50.5 यस्मा ऋणं यस्य जायामुपैमि यं याचमानोऽभ्यैमि देवाः। ये वाचं वादिषूर्मोत्तरां मद्देवपत्न्यप्सरसा वधीतम।। 5।।

卐16.50.6 यददीव्यन्नहमृणं कृणोम्यदास्यन्नग्न उत सङ्गृणामि। वैश्वानरोऽधिपा नो वसिष्ठ उदिन्नयाति सुकृतस्य लोकम्।। 6।।

卐16.50.7 वैश्वानरः पावयान्नः पवित्रैर्यत्संगरमभिधा वाम्याशाम्। अनाजानन्मनसा याचमानर्यत्तत्रै नोऽपतत्सुवामि।। 7।।

卐16.50.8 वैश्वानराय प्रति वेदयामि यदनृणं सङ्गरो देवतासु। स एतान्पाशान्विचृतं प्रवेदाम्यथ यज्ञेन सह सम्भवेम।। 8।।

卐16.50.9 यदन्तरिक्षं पृथिवीमुतद्यां यन्मातरं पितरं वा जिहिंसिम। अग्निर्मा तस्मादेनसो गार्हपत्यः प्र मुञ्चतु।। 9।।

卐16.50.10 भूमिर्मातादितिर्नो जनित्रं भ्रातान्तरिक्षमभिशस्त्यानः। द्यौर्नः पिता पित्र्याच्छं भवाति यामि मृत्वामावपत्सि लोकान्।। 10।। 16 - 51

卐16.51.1 यत्रा दुर्हार्दस्सुकृतो मदन्ति विहाय रोगन्तन्वस्यायाः। अश्लोणाङ्गैरह्रुता स्स्वर्गे तत्रापश्येम पितरौ च पुत्रान्।। 1।।

卐16.51.2 विशाणा पाशाङ् अधिविष्व तु त्वद्य उत्तमा अधमा वारुणा ये। यद्दारुणावध्यसे यच्च रज्वां यद्भूम्यां वध्यसे यच्च वाचा।। 2।।

卐16.51.3 उदगातां भगवती विचृतौ नामतारके। प्रेहामृतस्य यच्छतां प्रैतुबद्धोक मोचनम्।। 3।।

卐16.51.4 वि जिहीष्व लोकङ्कृणु बन्धान्मुञ्चासि बद्धकम्। योन्या इव प्रच्युतो गर्भः पथस्सर्वाङ् अनु क्षिय।। 4।।

卐16.51.5 तं प्रजानन्प्रतिगृह्णाति विद्वान्बृहस्पतिः प्रतथमजा ऋतस्य। अस्माभिर्दत्तञ्जरसः परस्तादच्छिन्न न्तन्तुमनुसञ्चरेम।। 5।।

卐16.51.6 ततन्तन्तुमन्वे के तरन्ति येषां दत्तमायनं पित्र्येण। अबन्ध्वेके ददतः प्रयच्छान्तो दातुं चेच्छिक्षान्स स्वर्ग एषाम्।। 6।।

卐16.51.7 अन्वारभेथा मनुसंरभेथामेतं लोकं श्रद्दधाना स्सचन्ते। यद्वां पूर्तं परिविष्टमग्नौ तस्य गुप्तये दम्पती सं श्रयेथाम्।। 7।।

卐16.51.8 देवाः पितरः पितरो देवाः। योऽस्मि सोऽस्मि सोऽयमस्मि।। 8।।

卐16.51.9 स पचामि स यजामि स यजतेऽस्य। स्वमय मिष्टमस्तु सूनं शान्तं शिवं कृतन्तस्मान्मा यवम्।। 9।।

卐16.51.10 नाके राजन् प्रति तिष्ठ तत्रैतत्प्रति तिष्ठतु। विद्धि पूर्तस्य नो राजन् स देव सुमना भव।। 10।। 16 - 52

卐16.52.1 अपास्मद्ब्राह्मणा स्सन्ध्यामपधारां नि दध्मसि। इन्द्राग्नी विश्ववेदसा वर्णवादधि मुञ्चताम्।। 1।।

卐16.52.2 नमस्ते ब्राह्मणा सन्ध्येऽपरेहि नाते यथ। योऽस्मान्द्वेष्टि यं वयं द्विष्मस्तन्ते प्र सुवामि स्तमद्धि प्रसूता।। 2।।

卐16.52.3 अपारन्त्वाहुरर्णव मनुर्ययां नये विदुः। यस्ते वेदो वरमास्य महत्साक्षाद्वेदि मुखन्तव निर्याणन्तव ते विदुः।। 3।।

卐16.52.4 इन्द्रेण क्लृप्ता योनिर्नरकोऽस्याः कुलायम्। महान् समुद्रो रजसो विमानस्स्वर्गे लोके अपि नः कृणोतु।। 4।। 16 - 53

卐16.53.1 तस्यौदनस्य बृहस्पतिश्शिरो ब्रह्ममुखम्। सूर्याचन्द्रमसावक्ष्यौ बृहद्रथन्तरे श्रोत्रे। अग्निरास्यं विद्युज्जिह्वा मरुतो दन्ताः पवमानः प्राणः।। 1।।

卐16.53.2 ओषधयो लोमानि वनस्पतयः केशा स्समुद्रोऽमूत्रमश्विना प्रपदे। चरुं पञ्चबिलमुख ङ्घर्मोऽभिन्धे।। 2।।

卐16.53.3 चक्षुर्मुषलङ्काम उलूखलन्दिति श्शूर्पमदिति श्शूर्पग्राही वातोऽपाविनक्। गावस्तण्डुलाऽश्वाः कणा मशकास्तुषाः कब्रुफलीकरणा स्स्याममयो लोहितमयोऽस्य मांसम्। त्रपु भस्मार्जुनमस्थि हरितं वर्णः पुष्कल ङ्गन्धः।। 3।।

卐16.53.4 खलः पात्रमुष्टारौ बाहू स्प्यावंसौ गुदा वरत्राः। इषानूक्यं युगानि जत्रवः।। 4।।

卐16.53.5 ऋतं हस्तावाभिषेचन ङ्कुल्योपसेचनमार्तवाः। पक्तारोऽग्निः प्राशिता ब्राह्मणः प्रतिग्रहीता।। 5।। 16 - 54

卐16.54.1 तस्यौदनस्य भूमिः कुम्भी द्यौरपिधानं शरोऽभ्रमुषा नीहारो बृहदायवनं रथन्तरन्दर्वी। दिशः पार्श्वे सीताः पर्शवस्सिकता ऊबध्यं बलनमुपस्तरण महोरात्रे विक्रमणे ओदनस्य।। 1।।

卐16.54.2 वर्षं प्रोक्षणम्मरुतः पर्यैन्धत किष्करवः परिधयः। ऋचा कुम्भ्यधि हितार्त्विज्येन प्रेष्यते ब्रह्मणा प्रतिगृह्यते।। 2।।

卐16.54.3 य एतस्यौदनस्यैवं महिमानं विद्यात्। नाल्प इति ब्रूयान्नानुपसेचन इति नेदं च किञ्चेति।। 3।।

卐16.54.4 यावद्दाताभिमनस्येत तन्नाति वदेत्। ओदनेन यज्ञवच स्सर्वे लोका स्समाप्याः।। 4।।

卐16.54.5 यस्मिन्समुद्रो द्यौर्भूमिस्त्रयोऽवर परं श्रिताः।। 5।। 16 - 55

卐16.55.1 ब्रह्मवादिनो वदन्ति प्रत्यञ्चमोदनं प्राशीः पराञ्च। त्वमोदनं प्राशीस्त्वा मोदना इति कस्यैनं शीर्ष्णा प्राशीः।। 1।।

卐16.55.2 ब्रह्मवादिनो वदन्ति प्रत्यञ्चमोदनं प्राशीः पराञ्च। त्वमोदनं प्राशीस्त्वामोदना इति कस्यैनं मुखेन प्राशीः।। 2।।

卐16.55.3 ब्रह्मवादिनो वदन्ति प्रत्यञ्चमोदनं प्राशीः पराञ्च। त्वमोदनं प्राशीस्त्वा मोदना इति कस्यैनमक्षीभ्यां प्राशीः।। 3।।

卐16.55.4 ब्रह्मवादिनो वदन्ति प्रत्यञ्चमोदनं प्राशीः पराञ्च। त्वमोदनं प्राशीस्त्वा मोदना इति कस्यैनं श्रोत्राभ्यां प्राशीः।। 4।।

卐16.55.5 ब्रह्मवादिनो वदन्ति प्रत्यञ्चमोदनं प्राशीः पराञ्च। त्वमोदनं प्राशीस्त्वा मोदना इति कस्यैनं आस्येन प्राशीः।। 5।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐16.55.6 ब्रह्मवादिनो वदन्ति प्रत्यञ्चमोदनं प्राशीः पराञ्च। त्वमोदनं प्राशीस्त्वा मोदना इति कस्यैनं जिह्वया प्राशीः।। 6।।

卐16.55.7 ब्रह्मवादिनो वदन्ति प्रत्यञ्चमोदनं प्राशीः पराञ्च। त्वमोदनं प्राशीस्त्वा मोदना इति कस्यैनं दन्तैः प्राशीः।। 7।।

卐16.55.8 ब्रह्मवादिनो वदन्ति प्रत्यञ्चमोदनं प्राशीः पराञ्च। त्वमोदनं प्राशीस्त्वामोदना इति कस्यैनं प्राणैः प्राशीः।। 8।।

卐16.55.9 ब्रह्मवादिनो वदन्ति प्रत्यञ्चमोदनं प्राशीः पराञ्च। त्वमोदनं प्राशीस्त्वामोदना इति कस्यैनमुरसा प्राशीः।। 9।।

卐16.55.10 ब्रह्मवादिनो वदन्ति प्रत्यञ्चमोदनं प्राशीः पराञ्च। त्वमोदनं प्राशीस्त्वामोदना इति कस्यैनं व्यचसा प्राशीः।। 10।।

卐16.55.11 ब्रह्मवादिनो वदन्ति प्रत्यञ्चमोदनं प्राशीः पराञ्च। त्वमोदनं प्राशीस्त्वामोदना इति कस्यैनं पृष्ठेन प्राशीः।। 11।।

卐16.55.12 ब्रह्मवादिनो वदन्ति प्रत्यञ्चमोदनं प्राशीः पराञ्च। त्वमोदनं प्राशीस्त्वामोदना इति कस्यैनमुदरेण प्राशीः।। 12।।

卐16.55.13 ब्रह्मवादिनो वदन्ति प्रत्यञ्चमोदनं प्राशीः पराञ्च। त्वमोदनं प्राशीस्त्वामोदना इति कस्यैनं वस्तिना प्राशीः।। 13।।

卐16.55.14 ब्रह्मवादिनो वदन्ति प्रत्यञ्चमोदनं प्राशीः पराञ्च। त्वमोदनं प्राशीस्त्वामोदना इति कस्यैनमुरुभ्यां प्राशीः।। 14।।

卐16.55.15 ब्रह्मवादिनो वदन्ति प्रत्यञ्चमोदनं प्राशीः पराञ्च। त्वमोदनं प्राशीस्त्वामोदना इति कस्यैनमष्ठीवद्भ्यां प्राशीः।। 15।।

卐16.55.16 ब्रह्मवादिनो वदन्ति प्रत्यञ्चमोदनं प्राशीः पराञ्च। त्वमोदनं प्राशीस्त्वामोदना इति कस्यैनं पद्भ्यां प्राशीः।। 16।।

卐16.55.17 ब्रह्मवादिनो वदन्ति प्रत्यञ्चमोदनं प्राशीः पराञ्च। त्वमोदनं प्राशीस्त्वामोदना इति कस्यामेनं प्रतिष्ठायां प्राशीः।। 17।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐16.55.18 ब्रह्मवादिनो वदन्ति प्रत्यञ्चमोदनं प्राशीः३ पराञ्च। त्वमोदनं प्राशीस्त्वामोदना इति कस्यैनं हस्ताभ्यां प्राशीः।। 18।। 16 - 56

卐16.56.1 ततश्चैनमन्येन शीर्ष्णा प्राशीर्येन चेदमग्रे प्राश्नन्। शिरस्ते अवपतिष्यती त्येनमाह।। 1।।

卐16.56.2 ततश्चैनमन्येन मुखेन प्राशीर्येन चेदमग्रे प्राश्नन्। मुखन्ते विङ्गरिष्यती त्येनमाह।। 2।।

卐16.56.3 ततश्चैन मन्याभ्यामक्षीभ्यां प्राशीर्याभ्याञ्चेद मग्रे प्राश्नन्। अन्धो भविष्यतीत्येनमाह।। 3।
।

卐16.56.4 ततश्चैन मन्याभ्यां श्रोत्राभ्यां प्राशीर्याभ्याञ्चेद मग्रे प्राश्नन्। वधिरो भविष्यसीत्येनमाह।।
4।।

卐16.56.5 ततश्चैन मन्येनास्येन प्राशीर्येन चेदमग्रे प्राश्नन्। वाक् ते प्रक्रमिष्यतीत्येनमाह।। 5।।

卐16.56.6 ततश्चैन मन्यया जिह्वया प्राशीर्यया चेदमग्रे प्राश्नन्। जिह्वा ते पूर्वा मरिष्यतीत्येनमाह।।
6।।

卐16.56.7 ततश्चैन मन्येन मन्यैर्दन्तैः३ प्राशीर्यैश्चेदमग्रे प्राश्नन्। दन्तास्ते शत्स्यन्तीत्येनमाह।। 7।।

卐16.56.8 ततश्चैन मन्येनमन्यैः३ प्राणैः३ प्राशीर्येन चेदमग्रे प्राश्नन्। प्राणास्ता हास्यन्तीत्येनमाह।।
8।।

卐16.56.9 ततश्चैन मन्येनोरसा प्राशीर्येन चेदमग्रे पाश्नन्। कृष्यान ग्रत्स्यसीत्येनमाह।। 9।।

卐16.56.10 ततश्चैन मन्येन व्यचसा प्राशीर्येन चेदमग्रे प्राश्नन्। राजयक्ष्मस्त्वा हनिष्यतीत्येनमाह।।
10।।

卐16.56.11 ततश्चैन मन्येन पृष्ठेन प्राशीर्येन चेदमग्रे प्राश्नन्। विद्युत्वा हनिष्यतीत्येनमाह।। 11।।

卐16.56.12 ततश्चैन मन्येनोदरेणो प्राशीर्येन चेदमग्रे प्राश्नन्। वरुणस्त्वा हनिष्यती त्येनमाह।।
12।।

卐16.56.13 ततश्चैनमन्येन वस्तिना प्राशीर्येन चेदमग्रे प्राश्नन्। अप्सु मरिष्यसीत्येनमाह।। 13।।

卐16.56.14 ततश्चैन मन्याभ्यामूरुभ्यां प्राशीर्याभ्या मेतमग्रे प्राश्नन्। ऊरून्तेऽवपतस्येते इत्येनमाह।।
14।।

卐16.56.15 ततश्चैन मन्याभ्यामष्ठीवद्भ्यां प्राशीर्याभ्यां चेदमग्रे प्राश्नन्। स्रामो भविष्यसीत्येनमाह।।
15।।

卐16.56.16 ततश्चैन मन्याभ्यां पद्भ्यां प्राशीर्याभ्यामेतमग्रे प्राश्नन्। सर्पस्त्वा छास्यतीत्येनमाह।। 16।।

卐16.56.17 ततश्चैन मन्यया प्रतिष्ठयां प्राशीर्यया एतमग्रे प्राश्नन्। अप्रतिष्ठानो मरिष्यसीत्येनमाह।। 17।।

卐16.56.18 ततश्चैन मन्याभ्यां हस्ताभ्यां प्राशीर्याभ्यामेतमग्रे प्राश्नन्। ब्राह्मणं हनिष्यसीत्येनमाह।। 18।। 16 - 57

卐16.57.1 तमहन्न प्रत्यञ्च न्न पराञ्चन्नाहमोदन न्नमामोदनः। ओदन एवौदनं प्राशीद्बृहस्पतिना शीर्ष्णाशीत्।। 1।।

卐16.57.2 तमहन्न प्रत्यञ्चन्न पराञ्चन्नाहमोदन न्नमामोदनः। ओदन एवौदनं प्राशीद्ब्रह्मणा मुखेनाशीत्।। 2।।

卐16.57.3 तमहन्न प्रत्यञ्चन्न पराञ्चन्नाहमोदन न्नमामोदनः। ओदन एवौदनं प्राशीत्सूर्या चन्द्रमसाभ्यामक्षिभ्यामाशीत्।। 3।।

卐16.57.4 तमहन्न प्रत्यञ्चन्न पराञ्चन्नाहमोदन न्नमामोदनः। ओदन एवौदनं प्राशीद्बृहद्रथन्तराभ्यां श्रोत्राभ्यामाशीत्।। 4।।

卐16.57.5 तमहन्न प्रत्यञ्चन्न पराञ्चन्नाहमोदन न्नमामोदनः। ओदन एवौदनं प्राशीदग्ने रास्येनाशीत्।। 5।।

卐16.57.6 तमहन्न प्रत्यञ्चन्न पराञ्चन्नाहमोदन न्नमामोदनः। ओदन एवौदनं प्राशीद्विद्युता जिह्वयाशीत्।। 6।।

卐16.57.7 तमहन्न प्रत्यञ्चन्न पराञ्चन्नाहमोदन न्नमामोदनः। ओदन एवौदनं प्राशीन्मरुद्भिर्दन्तैराशीत्।। 7।।

卐16.57.8 तमहन्न प्रत्यञ्चन्न पराञ्चन्नाहमोदन न्नमामोदनः। ओदन एवौदनं प्राशीत्सप्त ऋषिभिर्प्राणैराशीत्।। 8।।

卐16.57.9 तमहन्न प्रत्यञ्चन्न पराञ्चन्नाहमोदन न्नमामोदनः। ओदन एवौदनं प्राशीत्पृथिव्योरसाशीत्।। 9।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham • Mysore •

卐16.57.10 तमहन्न प्रत्यञ्चन्न पराञ्चन्नाहमोदन न्नमामोदनः। ओदन एवौदनं प्राशीदन्तरिक्षेण व्यचसाशीत्।। 10।।

卐16.57.11 तमहन्न प्रत्यञ्चन्न पराञ्चन्नाहमोदन न्नमामोदनः। ओदन एवौदनं प्राशीद्दिवा पृष्ठेनाशीत्।। 11।।

卐16.57.12 तमहन्न प्रत्यञ्चन्न पराञ्चन्नाहमोदन न्नमामोदनः। ओदन एवौदनं प्राशीद्वरुणस्योदरेणाशीत्।। 12।।

卐16.57.13 तमहन्न प्रत्यञ्चन्न पराञ्चन्नाहमोदन न्नमामोदनः। ओदन एवौदनं प्राशीत्समुद्रेण वस्तिनाशीत्।। 13।।

卐16.57.14 तमहन्न प्रत्यञ्चन्न पराञ्चन्नाहमोदन न्नमामोदनः। ओदन एवौदनं प्राशीन्मित्रावरुणयो रूरुभ्यामाशीत्।। 14।।

卐16.57.15 तमहन्न प्रत्यञ्चन्न पराञ्चन्नाहमोदन न्नमामोदनः। ओदन एवौदनं प्राशीदर्तस्याष्ठीवद्भ्यामाशीत्।। 15।।

卐16.57.16 तमहन्न प्रत्यञ्चन्न पराञ्चन्नाहमोदन न्नमामोदनः। ओदन एवौदनं प्राशीत्सवितुः पद्भ्यामाशीत्।। 16।।

卐16.57.17 तमहन्न प्रत्यञ्चन्न पराञ्चन्नाहमोदन न्नमामोदनः। ओदन एवौदनं प्राशीत्तस्यां प्रतिष्ठायां प्राशीत्।। 17।।

卐16.57.18 तमहन्न प्रत्यञ्चन्न पराञ्चन्नाहमोदन न्नमामोदनः। ओदन एवौदनं प्राशीत्सत्यस्य हस्ताभ्यामाशीत्।। 18।।

卐16.57.19 त एनं प्राशीषुस्त एनमारुरोहन्त एनमजीगमन्। एतस्माद्वै लोकान् त्रयस्त्रिंशतं प्रजापति न्निरमिमीतः।। 19।।

卐16.57.20 तस्य गुप्तये यज्ञानसृजन्त देवाः। ये त्रयस्त्रिंशत्प्रजापतिसृष्टा पुण्यलोकाः। तेऽस्य सर्वेऽभिजिता अवरुद्धा भवन्ति य एवं वेद।। 20।। 16 - 58

卐16.58.1 एष वा ओदनस्सर्वाङ्ग स्सर्वात्मा सर्वपरु स्सर्वपात्सर्वपृष्ठः। सर्वाङ्गस्सर्वात्मा सर्वपरु स्सर्वपात्सर्वपृष्ठो भवति य एवं वेद।। 1।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐16.58.2 स य एवं विदुष उपद्रष्टा भवति प्राणं ऋणद्धि। न च प्राणं ऋणध्य अथ सर्वस्सञ्जीयते।। 2।।

卐16.58.3 न च सर्वस्संजीयते ऽथैनमाहा प्रतिष्ठानोऽनायतनो म्रियते य एवं विदुष उपद्रष्टा भवति।। 3।। 16 - 59

卐16.59.1 केन प्राष्ण्यार्भृते पुरुषस्य केन मांसं संभृतं केन गुल्फौ। केनाङ्गुलिः पेशनिः केन खानिः केनोच्छलङ्खौ मध्यतः कः प्रतिष्ठाम्।। 1।।

卐16.59.2 कस्मान्नु गुल्फावधरा वकृण्वन्नष्ठीवन्तावुत्तरौ पूरुषस्य। निर्ऋत्यजङ्घे निदधुः क्वस्विज्जानुनो स्सन्धीको इमौ जजान।। 2।।

卐16.59.3 चतुष्टयं युज्यते संहितान्तञ्जानुभ्यामुर्ध्वं शिथिरं कबन्धम्। श्रोणी यदुरू क उ तज्जजान याभ्यां कुसिन्धं सुधृतिर्बभूव।। 3।।

卐16.59.4 कति देवाः कतमेत आसन्युर श्चियुरग्र्यं पुरुषस्य। कति स्तनौ न्यदधुः कः कफोडौ कति स्कन्धान्कति पृष्ठीरचिन्वन्।। 4।।

卐16.59.5 कोऽस्य बाहू समभरद्वीर्यं कृणवादिति। अंसौ कोऽस्य तद्देवः कुसिन्ध आदधादधि।। 5।।

卐16.59.6 मस्तिस्कमस्य यतमो ललाटं ककाटिकां प्रथमो यः कपालम्। चित्वाचित्यं पुरुषस्य हन्वो दिवं रुरोह कतमस्स देवः।। 6।।

卐16.59.7 कस्सप्तखानि विततर्द शीर्षणि कर्णाविमावक्ष्णा नासिके मुखम्। येषां पुरुत्रा विजयस्य मह्मनि चतुष्पादो द्विपदो यन्ति यामम्।। 7।।

卐16.59.8 हन्वोर्हि जिह्वामदधात्पुरुची मधामहीमधिशिश्राय वाचम्। स आ वरिवार्ति महिना व्योमन्नपोवसानः का उ चित्प्रवेद।। 8।।

卐16.59.9 मूर्धानमस्य संसिव्याथर्वा हृदयं च यत्। मस्तिष्कादूर्ध्वं प्रैरयत् पवमानोऽधिशीर्ष्णः।। 9।।

卐16.59.10 तद्वा अथर्वण श्शिरो देवकोशस्समुब्जितः। तत्प्राणो अभिरक्षतु श्रिरोऽन्नमथो मनः।। 10।। 16 - 60

卐16.60.1 प्रियाऽप्रियाणि बहुला स्वप्नं सम्बाधतन्द्यः। आनन्दनुग्रो नन्दांश्च तानुद्वहति पुरुषः।। 1।।

卐16.60.2 आर्तिरवर्तिर्निर्ऋतति कुतो नु पुरुषे मतिः। राद्धि स्समृद्धिरव्यृद्धिर्मति रुदितयः कुतः।। 2।।

卐16.60.3 कोऽस्मिन्नापो अदधाद्विषूवृतः पुरुव्यृत स्सिन्धुसृत्याय जाताः। तीव्रारुणा लोहिनिस्ताम्रधूम्रा ऊर्ध्वावाचीः पुरुषेतिरश्चीः।। 3।।

卐16.60.4 कोऽस्मिन् प्राणमदधात्कोऽपानं व्यानयु। समानमस्मिन्को देवोऽधिशिश्राय पूरुषे।। 4।।

卐16.60.5 कोऽस्मिन् रूपमदधात्को मह्यानं च नाम च। गातुं कोऽस्मिन् कः केतुं कश्चरित्राणि पूरुषे।। 5।।

卐16.60.6 कोऽस्मिन् रेतोऽदधात्तन्तुरा तायतामिति। मेधां कोऽस्मिन्नध्यौहत् को वाणं कोऽनृतो दधौ।। 6।।

卐16.60.7 को वाससा पर्यदधात्कोऽस्यायु रकल्पयत्। बलङ्कोऽस्मै प्रायच्छत्कोऽस्या कल्पयज्जवम्।। 7।।

卐16.60.8 कोऽस्मिन्यज्ञ मदधादेको अग्रेऽधि पूरुषे। कोऽस्मिन् सत्यं कोऽनृतं को मृत्युं कोऽमृतं दधौ।। 8।।

卐16.60.9 केनापो अन्वतनुत केनाहरकृणोदृचे। उषसं केनान्वैन्ध केन सायम्भवन्दधे।। 9।।

卐16.60.10 केनेमां भूमिमौर्णोत्केन पर्यभवद्दिवम्। केनाभि मह्ना पर्वतान् केन कर्माणि पूरुषः।। 10।। 16 - 61

卐16.61.1 केन देवाङ्नु क्षियति केन दैवीरजनयद्विशः। केनेदं मन्यन्नक्षत्रं केन सत्क्षत्रमुच्यते।। 1।।

卐16.61.2 केन पर्जन्यमाप्नोति केन सोमं विचक्षणम्। केनेममग्निं पुरुषः केन सम्बत्सरं ममे।। 2।।

卐16.61.3 केनेयं भूमिर्निहिता केन द्यौरुत राहिता। केनेदमूर्ध्वं तिर्यक्चान्तरिक्षं व्यचो हितम्।। 3।।

卐16.61.4 ब्रह्मणा भूमिर्निहिता ब्रह्मद्या मुत्तरान्दधौ। ब्रह्मेदमूर्धं तीर्यक्चान्तरिक्षं व्यचो हितम्।। 4।।

卐16.61.5 केन श्रोत्रियमाप्नोति केनेमं परमेष्ठीनम्। केन यज्ञं श्रद्धा च केनास्मिन्निहितं मनः।। 5।।

卐16.61.6 ब्रह्म श्रोत्रियमाप्नोति ब्रह्मेमं परमेष्ठीनम्। ब्रह्म यज्ञश्च श्रद्धा च ब्रह्मस्मिन्निहितं मनः।। 6।।

卐16.61.7 क इदमस्थ्यसृजत क इदम्मांसं समभरत्। क इमां त्वचं च लोमं च क इदं रूपं समैरयत्।। 7।।

卐16.61.8 ब्रह्मास्थ्यसृजत ब्रह्म मांसं समभरत्। ब्रह्म त्वचञ्च लोमञ्च ब्रह्मरूपं समैरयत्।। 8।।

卐16.61.9 क इदं चक्षुरसृजत कः प्राणङ्क्ष्वामयत्। क इदं मनश्च वाचञ्च क इमां समभरत्पुरम्।। 9।।

卐16.61.10 ब्रह्म चक्षुरसृजत ब्रह्म के प्राणमावयत्। ब्रह्म मनश्च वाचञ्च ब्रह्म समभरत्पुरम्।। 10।।

16 - 62

卐16.62.1 नैनञ्चक्षुर्जहाति न प्राणो जरसः पुरा। पुरं यो ब्राह्मणो वेद यस्मात् पुरुष उच्यते।। 1।।

卐16.62.2 यो वै तां ब्रह्मणो वेदामृतेनावृतां पुरम्। तस्मै ब्रह्म च ब्राह्म्याश्चायु ष्प्राणं प्रजां ददुः।। 2।।

卐16.62.3 अष्टाचक्रा नवद्वारा देवानां पूरयोध्वा। तस्यां हिरण्ययः कोश स्स्वर्गो ज्योतिषावृतः।। 3।।

卐16.62.4 तस्मिन् हिरण्यये कोशे त्र्योरे त्रि प्रतिष्ठिते। तस्मिन्य दन्तरात्मन्वत्तद्वै ब्रह्मविदो विदुः।। 4।।

卐16.62.5 प्रभ्राजमानां हरिणीं यशसा सम्परीवृताम्। पुरं हिरण्ययीं ब्रह्मा विवेशा पराजिताम्।। 5।।

16 - 63

卐16.63.1 अयन्ते वरुणो मणिस्सपत्नः क्षयणः कृतः। तेनारभस्व त्वं शत्रून्प्रमृणीहि दुरस्यतः।। 1।।

卐16.63.2 प्रैणाच्छृणीहि प्र मृणा रभस्व मणिस्ते अस्तु पुरएता पुरस्तात्। अवारयन्त वरणेन देवा अभ्याचार मसुराणां श्वश्वः।। 2।।

卐16.63.3 अन्वारक्षद्वरणो विश्वभेषज स्सहस्राक्षो हरितो हिरण्ययः। यस्ते शत्रूनधरान् पातयामि पूर्वस्तान्दभ्नुहि ये उ त्वा द्विषन्ति।। 3।।

卐16.63.4 अयन्ते कृत्यां विततां पौरुषेयमयं वधम्। अयन्ते सर्वं पाप्मानं वरणो वारयिष्यते।। 4।।

卐16.63.5 वरणो वारयाता अयन्देवो वनस्पतिः। यक्ष्मः प्रविष्टयोऽस्मिन्तमु देवा अवीवरन्।। 5।।

卐16.63.6 स्वप्नं सुप्त्वा यदि पश्यसि पापं मृगस्सृतिं यति धावादजुष्टाम्। परिक्ष्य वाच्छकुनेः पापवादादयं मणिर्वरणो वारयातै।। 6।।

卐16.63.7 अरात्या मा निर्ऋत्या अभिचारादथो भयात्। मृत्योरोजीयसो वधात्त्वं वरणो वारय।। 7।।

卐16.63.8 वरणेन प्रव्यथिता भ्रातृव्या मे सबन्धवः। असूर्त्तं रजो अप्यगुस्ते यन्त्वधमन्तमः।। 8।।

卐16.63.9 यन्मे माता यन्मे पिता भ्रातरो यच्च ते स्वा यदेनश्चकृमा वयम्। तस्मान्नो वारयिष्यते अयन्देवो वनस्पतिः।। 9।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐16.63.10 अरिष्टोऽहमरिष्टगु रायुष्मान्सर्वपूरुषः। तस्मान्मायं वरणो मणिः परिपातु दिशो दिशः।। 10।। 16 - 64

卐16.64.1 अयं मे वरण उरसि राजा देवो वनस्पतिः। स मे क्षत्रञ्च राष्ट्रञ्च पशूनो यश्च ते दधत्।। 1।।

卐16.64.2 इमं बिभर्मि वरणमायुष्माञ्छतशारदः। स मे शत्रून्वि बाधतामिन्द्रो दस्यूनिवासुरान्।। 2।।

卐16.64.3 यथा वातो वनस्पतीन्जीर्णान्भनक्त्योजसा। एवा सपत्नांस्त्वं भङ्ग्धि पूर्वाञ्जातानुतापरान्। वरणस्त्वाभिरक्षतु।। 3।।

卐16.64.4 यथा वातेन प्रक्षीणा वृक्षा श्शेरेन्यर्पिताः। त्वं सर्वान् प्र क्षिणीहिन्यर्पय पूर्वाञ्जातानुता परान्। वरणस्त्वाभिरक्षतु।। 4।।

卐16.64.5 यथा वातश्चाग्निश्च सर्वानप्सातो वनस्पतीन्। एवा सपत्नांस्त्वमप्साहि पूर्वान् जातानुतापरान्। वरणस्त्वाभिरक्षतु।। 5।।

卐16.64.6 तास्त्वं प्रछिन्धि वरण पुरा दिष्टात्पुरायुषः। य इमं पशुषु दिप्सन्ति येचास्य राष्ट्रदिप्सवः।। 6।।

卐16.64.7 यथा सूर्योऽतिभाति यथास्मिन्तेज आहितम्। एवा सपत्नांस्त्वं सर्वान् अतिभाति श्वश्श्वो वरणस्त्वाभि रक्षतु।। 7।।

卐16.64.8 यथा यशजशः पृथिव्यां यथास्मिञ्जातवेदसि। एवामे वरणो मणिः कीर्त्तिं भूतिन्नि यच्छतु। तेजसा मा समुक्षतु यशसा समनक्तु माम्।। 8।।

卐16.64.9 यथा यशो अग्निहोत्रे वषट्कारे यथा यशः। एवामे वरणो मणिः कीर्तिं भूतिन्नियच्छतु। तेजसा मा समुक्षतु यशसा समनक्तु माम्।। 9।।

卐16.64.10 यथा यश स्सोमपीथे मधुपर्के यथा यशः। एवामे वरणो मणिः कीर्तिं भूतिं नियच्छतु। तेजसा मा समुक्षतु यशसा समनक्तु मा।। 10।। 16 - 65

卐16.65.1 यथा यशः कन्यायां यथास्मिन्सम्भृते रथे। एवामे वरणो मणिः कीर्तिं भूतिन्नि यच्छतु। तेजसा मा समुक्षतु यशसा समनक्तु मा।। 1।।

卐16.65.2 यथा यशश्चन्द्रमस्यादित्ये च नृचक्षसि। एवामे वरणो मणिः कीर्तिं भूतिन्नियच्छतु। तेजसा मा समुक्षतु यशसा समनक्तु मा।। 2।।

Sri Ganapati Sacchidananda Avadhoota Dattapeetham

卐16.65.3 यथा यशः प्रजापतौ यथास्मिन्परमेष्ठिनि। एवामे वरणो मणिः कीर्तिं भूतिन्नियच्छतु। तेजसा मा समुक्षतु यशसा समनक्तु मा।। 3।।

卐16.65.4 यथा देवेष्वमृतँ यथैषु सत्यमाहितम्। एवामे वरणो मणिः कीर्तिं भूतिं नियच्छतु। तेजसा मा समुक्षतु यशसा समनक्तु मा।। 4।। 16 - 66

卐16.66.1 अस्य वामस्य पलितस्य होतुस्तस्य भ्राता मध्यमो अस्त्यश्नः। तृतीयो भ्राता घृतपृष्ठो अस्यात्रापश्यं विश्पतिं सप्तपुत्रम्।। 1।।

卐16.66.2 सप्त युञ्जन्ति रथमेक चक्रमेकोऽश्वो बहति सप्तनामा। त्रिनाभिचक्रमजरमनर्वं यस्मिन्निमा विश्वा भुवनानि तस्थुः।। 2।।

卐16.66.3 इमं रथमधि ये सप्त तस्थु स्सप्तचक्रं सप्तवहन्त्यश्वाः। सप्त स्वसारो अभि सन्नवन्त यत्र गवान्निहिता सप्तनाम।। 3।।

卐16.66.4 को ददर्श प्रथमञ्जायमान मस्थन्वतं यदनस्था बिभर्ति। भूम्या असुरसृगात्मा क्व स्वित्को विद्वांसमुपगात्प्रष्टुमेतत्।। 4।।

卐16.66.5 पाकः पृच्छामि मनसा विजानन्देवानामेना निहिता पदानि। वत्से वष्कयेऽधि सप्त तन्तुन्वितत्निरे कवय ओतवा उ।। 5।।

卐16.66.6 अचिकित्वा श्चिकितुषश्चिदत्र क्वीन्पृच्छामि विद्मने न विद्वान्। वियतस्तम्भ षडिमा रजांस्यजस्य रूपे किमपि स्विदेकम्।। 6।।

卐16.66.7 इह ब्रवीतु य इमङ्ग वेदाऽस्य वामस्य निहितं पदं वेः। शीर्ष्णः क्षीरन्दुह्रते गावोऽस्य वव्रिं वसाना उदकं पदापुः।। 7।।

卐16.66.8 माता पितर उत आ वभाज धीत्यग्रे मनसा सं हि जग्मे। सा विभत्सुर्गर्भरसा निविद्धा नमस्वन्त इदुप वाकमीयुः।। 8।।

卐16.66.9 युक्ता माता सिद्धुरि दक्षिणाया अतिष्ठद्गर्भो वृजनीष्वन्तः। अमीमेद्वत्सो अनु गामपश्यद्विश्वरूप्यं त्रिषु योजनेषु।। 9।।

卐16.66.10 तिस्रो मातृन्स्त्रीन्पितृन् बिभ्रदेक ऊर्ध्वस्तस्थौ नेमव ग्लापयन्ति। मन्त्रयन्ते दिवोऽमुष्य पृष्ठे विश्वविदं वाचमविश्वमिन्वाम्।। 10।। 16 - 67

卐16.67.1 द्वादशारं निहितज्जराय वर्वर्ति चक्रं परिद्यामृतस्य। आपुत्रा अग्ने मिथुनासोऽत्र सप्तशतानि विंशतिश्च तस्थुः।। 1।।

卐16.67.2 पञ्चपादं पितरन्द्वादशाकृतिन्दिव आहुः परेऽर्द्धे पुरीषिणम्। अथेमे ऽन्युपरे विचक्षणं सप्तचक्रे षडराऽऽहुरर्पितम्।। 2।।

卐16.67.3 पञ्चारे चक्रे परिवर्तमाने तस्मिन्ना तस्थुर्भुवनानि विश्वा। तस्य नाक्षस्तप्यते भूरिभार स्सनादेव न छिद्यते सनाभिः।। 3।।

卐16.67.4 सनेमि चक्रमजरं वि वावृत उत्तानायान्दश युक्ता वहन्ति। सूर्यस्य चक्षू रजसैत्यावृतं यस्मिन्निमा विश्वा भुवनान्यार्पिता।। 4।।

卐16.67.5 साकञ्जानां सप्तथमाहुरेकजं षडिद्यमा ऋषयो देवजा इति। तेषामिष्टानि निहितानि धामश स्स्थात्रे रेजन्ते विकृतानि रूपशः।। 5।।

卐16.67.6 स्त्रीयस्सतीस्ताँ उ मे पुंस आहुः पश्यदक्षण्वान्न विचेतदन्धः। कविर्यः पुत्र स्स इमा चिकेत यस्ता विजानात्स पितुष्पितासत्।। 6।।

卐16.67.7 अवः परेण पर एनावरेण पदावत्सं बिभ्रती गौरुदस्थात्। सा कद्रीची कं स्विदर्द्धं परागात्क स्वित्सुते नहि युथे अस्मिन्।। 7।।

卐16.67.8 अवः परेण पितरं यो अस्यानुवेद पर एनावरेण। कवीयमानः क इह प्र वोचद्देवं मनः कुतोऽधि प्रजातम्।। 8।।

卐16.67.9 येऽर्वाञ्चस्तानु पराचाऽऽहुर्ये पराञ्चस्ताँ उ अर्वाच आहुः। इन्द्रश्च या चक्रथु स्सोम तानि धुरा न युक्ता रजसो वहन्ति।। 9।।

卐16.67.10 द्वासुपर्णा सयुजा सखायास्समानं वृक्षं परि षस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्यनश्नन्नन्योऽभि चाकशीति।। 10।।

卐16.67.11 यस्मिन्वृक्षे मध्यद स्सुपर्णा निविशन्ते सुवते चाधिविश्वे। तस्येदाहुः पिप्पलं स्वाद्वग्रे तन्नोन्नशद्यः पितरन्न वेद।। 11।।

卐16.67.12 यत्रासुपर्णाऽमृतस्य भक्षमनिमेषं विदथाभिस्वरन्ति। इनो विश्वस्य भुवनस्य गोपा स्स मा धीरः पाकमत्रा विवेश।। 12।। 16 - 68

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐16.68.1 यद्गायत्रे अधिगायत्रमाहितं त्रैष्टुभाद्वा त्रैष्टुभन्निरतक्षत। यद्वा जगज्जगत्याहितं पदं य इत्तद्विदुस्तेऽमृतत्त्वमानशुः।। 1।।

卐16.68.2 गायत्रेण प्रतिमिमीते अर्कमर्केण साम त्रैष्टुभेन वाकम्। वाकेन वाकन्द्विपदा चतुष्पदाक्षरेण मिमीते सप्त वाणीः।। 2।।

卐16.68.3 जगता सिन्धुन्दिव्य स्कभायद्रथन्तरे सूर्यं पर्यपश्यत्। गायत्रस्य समिधस्तिस्र आहुस्ततो मह्ना प्र रिरिचे महित्वा।। 3।।

卐16.68.4 उप ह्वये सुदुघान्धेनुमेतान्सुहस्तो गोधुगुत दोहदेनाम्। श्रेष्ठं सवं सविता साविषन्नोऽभीद्धो घर्मस्तदु षु प्र वोचम्।। 4।।

卐16.68.5 हिङ्कृण्वती वसूपत्नी वसूनां वत्समिच्छन्ती मनसाभ्यागात्। दुहामश्विभ्यां पयोऽघ्नेयं सा वर्द्धतां महते सौभगाय।। 5।।

卐16.68.6 गौरमीमेदभि वत्सं मिषन्तं मूर्धानं हिङ्ङकृणोन्मातवा उ। सृक्वाणं घर्ममभि वावशाना मिमाति मायुं पयते पयोभिः।। 6।।

卐16.68.7 अयं स शिङ्क्ते येन गौरभीवृता मिमाति मायुं ध्वसनावधिश्रिता। सा चित्तिभिर्नि हि चकार मर्त्यं विद्युद्भवन्ती प्रति वव्रि मौहत।। 7।।

卐16.68.8 विधुन्दद्राणं सलिलस्य पृष्ठे युवानं सन्तं पलितो जगार। देवस्य पश्य काव्यं महित्वा द्याममार स ह्य स्समान।। 8।।

卐16.68.9 अनच्छये तुरगातु जीवमेजद्ध्रुवं मध्याऽऽस्त्यानाम्। जीवोऽमृतस्य चरति स्वधाभिरमर्त्यो मर्त्येना सयोनिः।। 9।।

卐16.68.10 अपश्य ङ्गोपामनिपद्यमान मा च परा च पथिभिश्चरन्तम्। स सध्रीची स्स विषुचीर्वसान आ वरीवर्ति भुवनेष्वन्तः।। 10।। 16 - 69

卐16.69.1 य ईञ्चकार न सो अस्य वेद य ईन्ददर्श हिरुगिन्नु तस्मात्। स मातुर्योना परिवीतो अन्तर्बहुप्रजा निर्ऋति माविवेश।। 1।।

卐16.69.2 द्यौर्नः पिता जनिता नाभिरत्र बन्धुर्नो माता पृथिवी महीयम्। उत्तान योश्चम्वोर्योनिरन्तरत्रा पिता दुहितुर्गर्भमाधात्।। 2।।

卐16.69.3 पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि त्वा भुवनस्य नाभिम्। पृच्छामि त्वा वृष्णो अश्वस्य रेतो वाचः पृच्छामि परमं व्योम।। 3।।

卐16.69.4 इयं वेदिः परो अन्तः पृथिव्याऽयं यज्ञो भुवनस्य नाभिः। अयं सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम।। 4।।

卐16.69.5 सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशो विधर्मणि। ते धीतिभिर्मनसा ते विपश्चितः परिभुवः परि भवन्ति विश्वतः।। 5।।

卐16.69.6 न वि जानामि यदि वेदमस्मि निण्य स्सन्नद्धो मनसा चरामि। यदा मागन्प्र थमजार्तस्या दिद्वाचो अश्नुवे भागमस्याः।। 6।।

卐16.69.7 अपाङ् प्राङ्गेति स्वधया गृभीतोऽमर्त्यो मर्त्येना सयोनिः। ता शाश्वन्ता विषूचीना वियन्तान्यन्यं चिक्युर्न निचिक्युरन्यम्।। 7।।

卐16.69.8 ऋचो अक्षरे परमे व्योमन्यस्मिन्देवाऽधि विश्वे निषेदुः। यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते।। 8।।

卐16.69.9 ऋचः पदं मात्रया कल्पयतोऽर्धर्चेन चाक्लृपुर्विश्वमेजत्। त्रिपाद्ब्रह्म पुरुरूपं वि चष्टे तेन जीवन्ति प्रदिशश्चतस्रः।। 9।।

卐16.69.10 सूयवसाद्भगवती हि भूयाऽथो वयं भगवन्तस्स्यामः। अद्धि तृण मघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती।। 10।।

卐16.69.11 गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी। अष्टापदी नवपदी बभूवुषी सहस्राक्षरा भुवनस्य पङ्क्तिस्तस्या स्समुद्रा अधि विक्षरन्ति।। 11।।

卐16.69.12 अपादेति प्रथमा पद्वतीनां कस्तद्वां मित्रावरुणा चिकेत। गर्भो भारं भरत्या चिदस्यार्तं पिपर्त्यनृतं नि पाति।। 12।।

卐16.69.13 कृष्णन्नियानं हरयस्सुपर्णाऽपो वसाना दिवमुत्पतन्ति। त आ ववृत्रन् सदनादृतस्यादिद्घृतेन पृथिवीं व्युदुः।। 13।। 16- 70

卐16.70.1 द्यौर्जवेना पृथिवी वरिम्णाऽन्तरिक्षं महित्वापो भूम्ना।। 1।।

卐16.70.2 देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रसूतो ब्राह्मणेभ्यो निर्वपामि।। 2।।

卐16.70.3 ऋषिभ्यस्त्वार्षेयेभ्यस्त्वा जुष्टतमं वह्नितमं पप्रितमं स्वस्तितममूर्जो भागमाक्षितमक्षितये निर्वपामि।। 3।।

卐16.70.4 वसवस्त्वा गायत्रेण छन्दसा निर्वपन्तु।। 4।।

卐16.70.5 रुद्रास्त्वा त्रैष्टुभेन छन्दसा निर्वपन्तु।। 5।।

卐16.70.6 आदित्यास्त्वा जागतेन छन्दसा निर्वपन्तु।। 6।।

卐16.70.7 इदमभि राव्णामिदमभि गत्वराणामिदमभि मन्यूनाम्। यथा कूप श्शतखा स्सहस्रखा नोपदस्यन्ति।। 7।।

卐16.70.8 एवेद मोपदसत्तीर्थ मश्विनोरिव। यो नो द्वेषन्मनसा यश्च वाचा दैव्ये लोक उत मानुषे यः।। 8।।

卐16.70.9 ग्राव्णा हन्तु महता तस्य सर्वमिन्द्रो देवो मघवाञ्छचीपतिः। वीरुत्सवस्त्रं परि जायैतदुर्जा सोम पुनराविशेह नः।। 9।।

卐16.70.10 दृंहस्य बाह्यो अम्बधृष्व मारिषोऽग्निश्चेत स्सनिष्यतः। देवीराप ऊर्जो भागायवोऽक्षिता त्क्षितयासिञ्चामि।। 10।। 16 - 71

卐16.71.1 अक्रव्यादा तन्वा जातवेदो या ते स्वर्गा तपसा सयोनिः। तस्यौदनमभिश्राम्यै तन्तया नोऽग्ने महि शर्मयच्छ।। 1।।

卐16.71.2 सोमस्यांशुभिर्यतः मध्यमदित्याः पृष्ठे सीदत। ये त ओदन देवयाने लोके विदुः पात्रन्दारुमयं मनुष्याः।। 2।।

卐16.71.3 तेषामेधि पात्र मात्र स्वर्गः पृथिवीं विघ्नतु पात्रम्। एतास्त्वौदनोप यन्त्वापो घृतश्चुतः पयसा वर्धयन्तीः।। 3।।

卐16.71.4 स्तभ्नासिस्वः पृथिवीमुतद्यामुतान्तरिक्षं स्वधया पूरयासि। यावन्तस्तण्डुलास्तत्तस्य विष्ठास्तावन्तो यज्ञास्तत्तस्य दोहाः।। 4।।

卐16.71.5 तावती स्वधा घृतपृष्ठे मेऽस्तूर्य दुहां मधुपृचं व्योमन्। यमोदनं पचामि श्रद्दधानः पात्रे पूरं घृतपृष्ठं जुषाणः।। 5।।

卐16.71.6 स मे मां क्षेष्ट सदमिष्यमानो यमस्य लोके परमे व्योमन्। ओदनः पात्रेण सह दक्षिणया ब्राह्मणेभ्यो दत्तो अमृतत्वे दधाति।। 6।।

卐16.71.7 सूर्यस्य भ्राजिरनु रश्मिन् आगन्दिवस्पृष्ठान्शकुन इवारोहन्। सं प्राणेन प्राणभृतं सृजामि सं वीर्येण पयसाशिषा च।। 7।।

卐16.71.8 आस्तावं गच्छ सुकृतां यत्र लोकं ते त्वां प्राश्नन्तु दक्षिणतो निषद्य। अग्निष्टोमेन सरथं हि याह्यथोक्तमतिरात्रं च गच्छ।। 8।।

卐16.71.9 द्विरात्र मात्र स्त्र्यहं व्यश्नुह्यथारोह चतुरात्रं रथमिव। चतुरात्रेण कल्पमानो हि याह्यथ सप्तरात्रन्दशरात्रञ्च गच्छ।। 9।।

卐16.71.10 द्वादशाहं परिभूय विश्वत एकविंशत्या विमृधो नुदस्व। एकविंशत्या विमृधो हि याह्यथैक चत्वारिंशतोप याह्येकम्। त्रयस्त्रिंशतामृतो भूत्वा त्रिमास्यमोदनान् वा रभस्व।। 10।। 16 - 72

卐16.72.1 इदावत्सरं च परिवत्सरं च ब्रध्नस्य विष्टपि परमे व्योमन्। नाकेन नाकमभि संभवौदन।। 1।।

卐16.72.2 साध्यानयन्तु मुखतो ममैतमादित्यारुद्रा वसवस्सचेतसः। विश्वे देवा ऋतुभि स्संविदाना इमं रक्षन्तु सधमप्रमादम्।। 2।।

卐16.72.3 इदावत्सरं च परिवत्सरं च संवत्सरमहोरात्राणि मासाः। सूर्यस्याग्नेश्चन्द्रमसोऽनुभूतिं वातस्याभूति मन्वावभौदन।। 3।।

卐16.72.4 यमीडते पितरो यं च देवाः पुरोहितन्तपसा ब्रह्मणा च। स्वधामूर्या मक्षितिमा जुहोमि वाते देवे पवमाने बृहस्पतौ।। 4।।

卐16.72.5 चतुर्धेत्योदनः कल्पमान ऊर्जा देवान्स्वधा पितॄन्। शरीरं मनुष्या नाशितं भव ब्राह्मणान् सोऽस्माकमस्तु परमे व्योमन्।। 5।।

卐16.72.6 अयं पन्था ओदन देवयानो अनारुद्धो मृत्युना तेन याहि। अदब्ध स्वतो निहित स्सकृतिभिर्ब्रह्मणा सृष्टः प्रशिषायमस्य सः।। 6।।

卐16.72.7 यत्र ते ग्राहा ओदन तत्परेहि यत्राप स्तद् गच्छन्त्यापः। यत्र योनिमोदनं ब्राह्मणा विदु स्सोऽस्माकमस्तु परमे व्योमन्।। 7।।

卐16.72.8 हुतन्ते वाचि हुतमस्तु चक्षुषि हुतं विज्ञाने हुतमस्तु ते बले। श्रोत्रे प्राणे ते हुतं प्रजा मृतत्वे ते हुतं कामे च हुतमस्तु ते।। 8।।



Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐16.72.9 यद्वाग्ने यो यदि वा सेन्द्रो यदि मारुतो यदि वैश्वदेवः। यस्ते अग्निर्नृम्णाना महृद्यस्तस्मिन्नेष सुहुतोऽस्त्वोदन सोऽस्माकमस्तु परमे व्योमन्।। 9।।

卐16.72.10 य आविवेश नृम्णा मनुष्या अग्निनामग्निः प्रथमो वयोधाः। स्तस्मिन्नेष सुहुतो अस्त्वोदन सोऽस्माकमस्तु परमे व्योमन्।। 10।। 16 - 73

卐16.73.1 या ते तनूरपचक्राम मृत्योर्देवानां सख्यमभिजीव लोकम्। अप्सुचरा गह्वरेष्ठा महित्वा तस्यामेष सुहुतो अस्त्वोदन स्सोऽस्माकमस्तु परमे व्योमन्।। 1।।

卐16.73.2 अहेड मानाभ्ये हि नो गृहं संकाशं भद्रे सुमना अघोरा। प्रति त्वा वर्ष वृद्धमेतु। एषां न स्वधा नवगज्जनित्री य मृतेष्वमृता हुताभूत्।। 2।।

卐16.73.3 तान्नो गोपाय सधमप्रमाद मस्माकमेतो रनुरक्षजागृहि। ये नो निधिमभिधामन्त्वे तं प्रवहं प्रौढं यमराज्ये।। 3।।

卐16.73.4 राजा तेषां वरुण इन्द्रियाण्यभितिष्ठतु हरसा दैव्येन। एतं सधस्थाः परिणो वा ददाम्यनुख्यता यज्ञपतिर्यदायत्।। 4।।

卐16.73.5 य आखिदन्ति विखिदन्ति दत्तं विगृह्णते दक्षिणामियमानाः। तानिन्द्रो देवान् मघवाञ्छचीपति रग्निमेदी प्रदहन्नेतु शक्रः।। 5।।

卐16.73.6 बृहस्पतिर्वरुणस्सोम इन्द्रो ममैव दत्तं केवलं कृण्वन्तु।। 6।। 16 - 74

卐16.74.1 शीर्षक्तिं शीर्षामयं कर्णशूलन्तृतीयकम्। सर्वं शीर्षण्यन्ते रोगं बहिर्निर्मन्त्रयामहे।। 1।।

卐16.74.2 कर्णाभ्यान्ते कङ्कुशेभ्य श्शुक्तिवल्गं विलोहितम्। सर्वं शीर्षण्यन्ते रोगं बहिर्निर्मन्त्रयामहे।। 2।।

卐16.74.3 यः कृणोति प्रमोतमन्धं कृणोति पूरुषम्। सर्वं शीर्षण्यन्ते रोगं बहिर्निर्मन्त्रयामहे।। 3।।

卐16.74.4 यस्य हेतोः प्रच्यवते यक्ष्मो नासत आस्यतः। सर्वं शीर्षण्यन्ते रोगं बहिर्निर्मन्त्रयामहे।। 4।।

卐16.74.5 शीर्षरोगमङ्गरोगं विश्वाङ्गीनं विसल्पकम्। सर्वं शीर्षण्यन्ते रोगं बहिर्निर्मन्त्रयामहे।। 5।।

卐16.74.6 यस्य भीमः प्रतीकाश उद्वेपयति पूरुषम्। तक्मानं शीतं रूरञ्च तन्ते निर्मन्त्रयामहे।। 6।।

卐16.74.7 य उरू अनुसर्पत्यथो एति गवीनिके। बलासमन्तरङ्गेभ्यो बहिर्निर्मन्त्रयामहे।। 7।।

卐16.74.8 यदि कामादपकामा द्धृदया जायते परि। हृदो बलासमङ्गेभ्यो बहिर्निर्मन्त्रयामहे।। 8।।

卐16.74.9 हरिमाणन्ते अङ्गेभ्यो यक्ष्मोधामन्तरात्मनः। यक्ष्मन्ते सर्वमङ्गेभ्यो बहिर्निर्मन्त्रयामहे।। 9।।
卐16.74.10 आ सो बलासो भवतु मूत्रं भवत्यामयत्। यक्ष्माणां सर्वेषां विषं निरवोचमहन्त्वत्।। 10।। 16 - 75
卐16.75.1 बहिर्बिलं निर्द्रवतु काहावाहं तवोदरात्। यक्ष्माणां सर्वेषां विषं निरवोचमहन्त्वत्।। 1।।
卐16.75.2 उदरात्ते परिक्लोम्नो नाभ्या हृदयादधि। यक्ष्मोधा मन्तरात्मनो बहिर्निर्मन्त्रयामहे।। 2।।
卐16.75.3 यास्सीमानं विरुजन्ति मूर्धानं प्रत्यर्षणीः। अहिंसन्तीरनामया निर्द्रवन्ति बहिर्बिलम्।। 3।।
卐16.75.4 या हृदय मुपसर्पन्त्यनु तन्वन्ति कीकसाः। अहिंसन्तीरनामया निर्द्रवन्ति बहिर्बिलम्।। 4।।
卐16.75.5 याꣳ पार्श्वे उपसर्पन्त्यनु निक्षन्ति पृष्ठीः। अहिंसन्तीरनामया निर्द्रवन्ति बहिर्बिलम्।। 5।।
卐16.75.6 यास्तिरश्चीरुरसर्पन्त्यर्षणी वक्षणासु ते। अहिंसन्तीरनामया निर्द्रवन्ति बहिर्बिलम्।। 6।।
卐16.75.7 या गुदा अनुसर्पन्त्यान्त्राणि या हयन्ति च। अहिंसन्तीरनामया निर्द्रवन्ति बहिर्बिलम्।। 7।।
卐16.75.8 या मज्ज्ञो अनुसर्पन्ति परूंषि विरुजन्ति च। अहिंसन्तीरनामया निर्द्रवन्ति बहिर्बिलम्।। 8।।
卐16.75.9 येऽङ्गानि विजयन्ति यक्ष्मासो रोपणास्तव। यक्ष्माणां सर्वेषां विषं निरवोचमहन्त्वत्।। 9।।
卐16.75.10 विसल्पस्य विद्रधस्य वातीकारस्य वालजेः। यक्ष्माणां सर्वेषां विषं निरवोचमहन्त्वत्।। 10।।
卐16.75.11 पादाभ्यान्ते गुल्फाभ्या ञ्जङ्घाभ्या ञ्जानुभ्या मूरुभ्यां श्रोणिभ्यां परि भंससः। अनूकादर्षणी रुष्णिहाभ्यो ग्रीवाभ्य स्स्कन्धेभ्य श्शीर्ष्णरोगमनीनशम्।। 11।।
卐16.75.12 सन्ते शीर्ष्णꣳ कपालानि हृदयस्य च यो विदुः। उद्यन्सूर्य आदित्यो ऽङ्गरोगमनीनशत्।। 12। इति (क्षुद्रकाण्डे) षोडशकाण्डे द्वादशोऽनुवाकः 16 - 76
卐16.76.1 सपत्नहनमृषभङ्घृतेन कामं शिक्षामि हविषाज्येन। नीचैस्सपत्ना न्ममपादयत्वमभिष्टुतो महता वीर्येण।। 1।।

卐16.76.2 यन्मे मनसो न प्रियं न चक्षुषो यन्मे हृदये नाभिनन्दति। तद्दुष्वप्न्यं प्रतिमुञ्चामि सपत्ने कामं स्तुष्ट्वानुदहं भिदेयम्।। 2।।

卐16.76.3 दुष्वप्न्यङ्कामदुरितञ्च कामाप्रजस्ताम स्वगतामवर्तिम्। उग्र ईषानः प्रतिमुञ्च तस्मिन्योऽस्मभ्य मङ्घूरणा चिकित्सात्।। 3।।

卐16.76.4 सा ते काम दुहिता धेनुरुच्यते यामहुर्वाचं कवयो विराजम्। त्वया सपत्नान् परिवृङ्धि ये मम पर्येनान् प्राणः प्रजाः पशवो जीवलं वृणोक्तु।। 4।।

卐16.76.5 कामस्येन्द्रस्य वरुणस्य राज्ञो विष्णोर्बलेन सवितुस्सवेन। अग्नेर्होत्रेण प्र णुदे सपत्नाञ्छम्बीव नावमुदकेषु धीरः।। 5।।

卐16.76.6 अध्यक्षो वाजी मम काम उग्रः कृणोतु मह्यमसपत्नमेव। विश्वे देवा मम नाथं भवन्तु सर्वे देवा हवमा यन्तु म इमम्।। 6।।

卐16.76.7 इदमाज्यङ्घृतवज्जुषाणाः कामज्येष्ठा इह मादयन्ताम्। कृण्वन्तु मह्यमसपत्नमेव।। 7।।

卐16.76.8 इन्द्राग्नी काम सरथं हि भूत्वा निचै स्सपत्नान्मम पादयाथः। तेषां पन्नानामधमा तमांस्यग्ने वास्तुन्यनु निर्दहत्वम्।। 8।।

卐16.76.9 जहि त्वङ्काम मम ये सपत्नान्धातमांस्य वपादयैनान्। निरिन्द्रियाऽरसा स्सन्तु सर्वे यथा न जीवात्कतमच्चनैषाम्।। 9।।

卐16.76.10 अवधीत्कामो मम ये सपत्ना उरुं लोकमकरन्मह्य मेधतुम्। मह्यन्नमन्तां प्रदिशश्चतस्रो मह्यं षड्ुर्वीर्घृत मावहन्तु।। 10।। 16 - 77

卐16.77.1 यत्ते काम शर्मत्रिवरुथमुद्भुद् ब्रह्म वर्म विततमनति व्याध्यं कृतम्। तेन सपत्नान्परिवृङ्धि ये मम पर्येनान् प्राणः प्रजाः पशवो जीवलं वृणक्तु।। 1।।

卐16.77.2 अधराञ्चः प्र प्लवन्तां छिन्नानौरिव बन्धनात्। न सायक प्रणुत्तानां पुनरस्ति निवर्त्तनम्।। 2।।

卐16.77.3 अग्निर्यव इन्द्रो यवस्सोमो यवः। यवयावानो देवा यावयन्त्व मुमामुष्यायणममुष्याः पुत्रञ्जीवलोकां मृतलोकाङ्गतासुम्।। 3।।

卐16.77.4 असर्ववीरश्चरति प्रणुत्तो मित्राणान्द्वेष्यः परिवर्ग्य स्स्वानाम्। उत पृथिव्या मवस्यन्ति विद्युत उग्रो देवः प्रमृणत्सपत्नान्।। 4।।

卐16.77.5 च्युताचेयं बृहत्यच्युता च विद्युत् बिभर्ति स्तनयित्नुंश्च सर्वान्। तेषामादित्यो द्रविणेन तेजसोद्यन्सपत्नान्नुदतां मे सहस्वान्।। 5।।

卐16.77.6 यथा देवा असुरान्प्राणुदन्त यथेन्द्रो दस्यूनधमन्तमो वबाधे। तथा त्वङ्काम मम ये सपत्नास्तानस्माल्लोकात्प्र णुदस्व सर्वान्।। 6।।

卐16.77.7 येन देवा असुरान्प्राणुदन्त यथेन्द्र दस्यूनधमन्तमो वबाधे। तेन त्वङ्काम मम ये सपत्नास्तानस्माल्लोकात्प्र णुदस्व दूरम्।। 7।।

卐16.77.8 कामो यज्ञे प्रथमो नान्यत्पुरानैनन्देवा॰ पितरो नोत मर्त्याः। ततस्त्वमसि ज्यायान्विश्वहा महांस्तस्मै ते काम नम इत्कृणोमि।। 8।।

卐16.77.9 न वै वातश्च न काममाप्नोति नाग्नि स्सूर्यो नोत चन्द्रमाः। ततस्त्वमसि ज्यायान्विश्वहा महांस्तस्मै ते काम नम इत् कृणोमि।। 9।।

卐16.77.10 न वा आपश्चन काममापुर्नाहोरात्राणि विहितानि यन्ति। ततस्त्वमसि ज्यायान्विश्वहा महांस्तस्मै ते काम नम इत्कृणोमि।। 10।। 16 - 78

卐16.78.1 न वै पुण्यजनाश्च न काममापुर्न गन्धर्वाप्सरसो न सर्पाः। ततस्त्वमसि ज्यायान्विश्वहा महांस्तस्मै ते काम नम इत्कृणोमि।। 1।।

卐16.78.2 यावती द्यावापृथिवी वरिम्णा यावदाप शिशिष्यदुर्यावदग्निः। ततस्त्वमसि ज्यायान्विश्वहा महांस्तस्मै ते काम नम इत्कृणोमि।। 2।।

卐16.78.3 यावतीर्दिश॰ प्रदिशो विषूचीर्यावतीराशा अभिचक्षणा दिवः। ततस्त्वमसि ज्यायान्विश्वहा महांस्तस्मै ते काम नम इत्कृणोमि।। 3।।

卐16.78.4 यावतीर्भृङ्गा जत्व॰ कुरुरवोर्यावतीर्वघा वृक्ष सर्प्यो। ततस्त्वमसि ज्यायान् विश्वहा महांस्तस्मै ते काम नम इत्कृणोमि।। 4।।

卐16.78.5 यास्ते शिवास्तन्व॰ काम भद्रा याभिस्सत्यं भवति यद्वृणीषे। ततस्त्वमसि ज्यायान्विश्वहा महांस्तस्मै ते काम नम इत्कृणोमि।। 5।। 16 - 79

卐16.79.1 यौ ते मातोन्ममार्ज जाताया॰ पतिवेदनौ। दुर्णामा तत्र मा गृधदलिंश उत वत्सपः।। 1।।

卐16.79.2 पलालानु पलालौ शर्कुं कोकं मलिम्लुचं पलीजकम्। आश्लेषं वब्रीवाससम् मृक्षग्रीवं प्रमीलिनं मुष्कयोरपहन्मसि।। 2।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐16.79.3 मा सम्वृतो मोप सृप ऊरुमाव सृपोऽन्तरा। कृणोम्यस्यै भेषजं बजन्दुर्णामचातनम्।। 3।।
卐16.79.4 दुर्णामा च सुनामा चोभौ संवृतमिच्छतः। अरायानपहन्मसि सुनामा स्त्रैणमिच्छताम्।। 4।।
卐16.79.5 यꣳ कृष्णꣳ केश्यसुर स्तम्बजोत तुण्डिकः। अरायानस्या भंससो मुष्कयोरपहन्मसि।। 5।।
卐16.79.6 अनुजिघ्रं प्रमृशन्तं क्रव्यादमुतरेरिहम्। अरायां श्वकिष्किणो बजꣳ पिङ्गो अनीशत्।। 6।।
卐16.79.7 यस्त्वा सुप्तान्स्तरति यश्च दिप्सति जाग्रतीम्। छायामिव प्र तान्सूर्यꣳ परिक्रामन्ननीनशत्।। 7।।
卐16.79.8 यस्त्वा सुप्तां निपद्यते भ्राता भूत्वा पितेव च। बजस्तान्सहतामितꣳ क्लीवरूपां स्तिरीटीनम्।। 8।।
卐16.79.9 यꣳ कृणोत्यवतकां मृतवत्सामिमां स्त्रियम्। तमोषधे त्वान्नाशयास्याꣳ कमलमञ्जिवम्।। 9।।
卐16.79.10 ये शालाꣳ परि नृत्यन्ति सायं गर्दभनादिनः। कुसूला ये च कुक्षिलाꣳ कुकुभास्सरमास्सुमाः। तानोषधे त्वङ्गन्धेन विषूचिनान् वि नाशय।। 10।। 16 - 80
卐16.80.1 ये कुकुन्धाꣳ कुकुरभाꣳ कृत्यैर्दूर्शानि बिभ्रती। क्लीबा इव प्रनृत्यन्तो घोषं ये कुर्वते वने तानितो नाशयामसि।। 1।।
卐16.80.2 येषां पश्चात्प्रपदे पुरꣳ पार्ष्णी पुरो मुखम्। खलजा श्शकधूमजा उरुण्डा ये च मट्मटाꣳ कुम्भमुष्का अयाशवः। तानस्या ब्रह्मणस्पते प्रतिबोधेन नाशयः।। 2।।
卐16.80.3 ये सूर्यन्न तितिक्षन्त आतपन्तममुन्दिवः। अरायान्वस्त वासिनो दुर्गन्धीं ल्लोहितास्यान्मूकका न्नाशयामसि।। 3।।
卐16.80.4 ये सूर्यात्परिसर्पन्ति स्नुषेव श्वशुरादधि। बजश्च तेषां पिङ्गश्च हृदयेऽधि नि विध्यताम्।। 4।।
卐16.80.5 य आत्मनमतिमात्र मन्त्राधाय बिभ्रति। स्त्रीणां स्त्रोणी प्रतोदिन इन्द्र रक्षांसि नाशय।। 5।।
卐16.80.6 ये पूर्वे वध्वो यन्ति हस्ते श्रृङ्गाणि बिभ्रतः। आपाकेस्थाः प्रहासिन स्तम्बे ये कुर्वते ज्योतिस्तानितो नाशयामसि।। 6।।

Srimatsachchidananda Avadhoota Dattapeetham • Mysore

卐16.80.7 पर्यस्ताक्षाऽप्रचङ्कशा स्त्रैणास्सन्तु पण्डगाः। अव भेषज पातय य इमां संविवृच्छत्यपति स्वपतिं स्त्रियम्।। 7।।

卐16.80.8 उद्धर्षिणं मुनिकेशं जम्भयन्तं मरीमृशम्। उपेषन्तमुदुम्बलं तुण्डेलमुत शालुडम्।। 8।।

卐16.80.9 पदा प्र विध्य पाष्ण्या स्थालिङ्गौरिव स्पन्दना। । 9।।

卐16.80.10 यस्ते गर्भं प्रतिमृशाज्जातं वा मारयाति ते। पिङ्गस्तमुग्रधन्वा कृणोतु हृदयाविधम्।। 10।।

卐16.80.11 ये अम्नोजातान्मारयन्ती सूतिका अनुशेरते। स्त्रीभागान् पिङ्गो गन्धर्वानभ्रमिव वाताजतु।। 11।। 16 - 81

卐16.81.1 परिसृष्टं धारयन्तु यद्धितं मावपादि तत्। गर्भन्त उग्रौ रक्षन्तां भेषजौ निविभार्यौ।। 1।।

卐16.81.2 परिपाणं पुरुषाणां रक्षसामसि चातनम्। अरायान्सर्वान्दुर्णाम्नो यातुधानान्विषुचीना न्विनाशय।। 2।।

卐16.81.3 पवी न सात्तङ्गल्वा च्छायकादुत नग्नकात्। प्रजायै पत्ये त्वापिङ्ग꣸ परिपातु किमीदिनः।। 3।।

卐16.81.4 द्यास्या चतुरक्षात्पञ्चपादा दनङ्गुलेः। वृन्तादभि प्रसर्पत꣸ परिपाहि वरीवृतात्।। 4।।

卐16.81.5 य आमं मांसमदन्ति पौरुषेयं च ये क्रविः गर्भान्खादन्ति केशवाः। अरायानस्या भंससो मुष्कयोरप हन्मसि।। 5।।

卐16.81.6 पिङ्ग रक्ष जायमानं पुमांसं मा स्त्रियङ्करन्। आण्डादो गर्भान्मा दभन् बाधस्वेत꣸ किमीदिनः।। 6।।

卐16.81.7 अप्रजास्त्वं मार्तवत्स मा द्रोदमघमा वयम्। वृक्षादिव स्त्रजङ्कृत्वा प्रिये प्रति मुञ्च तत्।। 7।।

卐16.81.8 पिङ्ग जहि यातुधानान् दुर्गन्धीं ल्लोहितास्यान्। त्वया प्रणुत्ता क्रव्यादो विश्वञ्चो यन्तु निर्हताः।। 8।। 16 - 82

卐16.82.1 उच्छिष्टे नामरूपाण्युच्छिष्टे लोक आहितः। उच्छिष्ट इन्द्रश्चाग्निश्च विश्वमन्त स्समाहितम्।। 1।।

卐16.82.2 उच्छिष्टे द्यावापृथिवी विश्वं भूतं समाहितम्। आपस्समुद्र उच्छिष्टे चन्द्रमा वात आहितः।। 2।।

卐16.82.3 सन्नुच्छिष्टे ऽसंश्चोभौ मृत्युर्वाजः प्रजापतिः। लौक्या उच्छिष्टा यत्ता व्रश्च द्रश्चापि श्रीर्मयि।। 3।।

卐16.82.4 दृढो दृंहस्थिरोऽन्यो ब्रह्म विश्वसृजो दश। नाभिमिव सर्वतश्चक्रमुच्छिष्टे देवताहिता।। 4।।

卐16.82.5 ऋक्साम यजुरुच्छिष्ट उद्गीथः प्रस्तुतं स्तुतम्। हिंकारा उच्छिष्टे स्वर स्साम्नो मेढिश्च तन्मयि।। 5।।

卐16.82.6 ऐन्द्राग्नं पावमानं महानाम्नीर्महाव्रतम्। उच्छिष्टे यज्ञस्याङ्गान्यन्तर्गर्भ इव मातरि।। 6।।

卐16.82.7 राजसूयं वाजपेयमग्निष्टोमस्ततोऽध्वरः। अर्काश्वमेधावुच्छिष्टे जीवबर्हिर्मदिन्तमः।। 7।।

卐16.82.8 अग्न्याधेयमथो दीक्षा कामप्रच्छन्दसा सह। उत्सन्ना यज्ञा स्सत्त्राण्युच्छिष्टेऽधि समाहिताः।। 8।।

卐16.82.9 अग्निहोत्रञ्च श्रद्धा च वषट्कारो व्रतन्तपः। दक्षिणेष्टं पूर्त्तं चोच्छिष्टेऽधि समाहिताः।। 9।।

卐16.82.10 एकरात्र स्त्रिरात्रश्च सद्यः क्रीः प्रक्रीरुक्थ्यः। ओतन्निहित मुच्छिष्टे यज्ञस्याणुनि विद्ययाः।। 10।। 16 - 83

卐16.83.1 चतुरात्रः पञ्चरात्र ष्षड्रात्रश्चोभय स्सह। षोडशी सप्तरात्रश्चोच्छिष्टाज्जज्ञिरे सर्वे ये यज्ञा अमृते हिताः।। 1।।

卐16.83.2 प्रतीहारो निधनं विश्वजिच्चाभिजिच्च यः। साह्नाति रात्रावुच्छिष्टे द्वादशाहोऽपि तन्मयि।। 2।।

卐16.83.3 सुनृता सन्नति क्षेम स्स्वधोर्जामृतं सहः। उच्छिष्टे सर्वे प्रत्यञ्चः कामाः कामेन तृप्यन्तु।। 3।।

卐16.83.4 नव भूमी समुद्राश्चोच्छिष्टेऽधि श्रिता दिवः। आ सूर्यो भात्युच्छिष्टे अहोरात्रे च तन्मयि।। 4।।

卐16.83.5 उपहव्यं विषूवन्तं ये च यज्ञा गुहा हिताः। बिभर्ति भर्ता विश्वस्योच्छिष्टो जनितुः पिता।। 5।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐16.83.6 पिता जनितुरुच्छिष्टोऽसो॰ पौत्रश्च पितामहः। स क्षियति विश्वस्येशानो वृषा भूम्यामतिघ्न्यः।। 6।।

卐16.83.7 ऋतं सत्यन्तपो दिक्षा श्श्रमो धर्मश्च कर्म च। भूतं भविष्यदुच्छिष्टे वीर्यं लक्ष्मीर्बलं बले।। 7।।

卐16.83.8 समृर्द्धिरोज आकूति॰ क्षत्रं राष्ट्रं षडुर्व्यः। संवत्सरोऽध्युच्छिष्ट इडा प्रैषा ग्रहाहविः।। 8।।

卐16.83.9 चतुर्होताराप्रिय श्चातुर्मास्यानि नीविदः। उच्छिष्टे यज्ञा होत्राश्च पशुबन्धास्तदिष्टयः।। 9।।

卐16.83.10 अर्धमासाश्च मासा श्चार्तवार्तुभिस्सहः। उच्छिष्टे घोषणीराप स्स्तनयित्नु श्श्रुतिर्मही।। 10।। 16 - 84

卐16.84.1 शर्करा स्सिकता अश्मानौषधयोर्विरुध स्तृणा। अभ्राणि विद्युतो वर्षमुच्छिष्टे संश्रिता श्रिताः।। 1।।

卐16.84.2 राद्धि॰ प्राप्तिर्व्याप्ति स्समाप्तिर्मह एधतुः। अत्याप्तिरुच्छिष्टे भूतिराहिता निहिता हिता।। 2।।

卐16.84.3 यच्च प्राणति प्राणेन यच्च पश्यति चक्षुषा। उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः।। 3।।

卐16.84.4 प्राणापानौ चक्षु श्श्रोत्रमक्षितिश्च क्षितिश्च याः। उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः।। 4।।

卐16.84.5 देवा॰ पितरो मनुष्या गन्धर्वाप्सरसश्च ये। उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः।। 5।।

卐16.84.6 ऋचस्सामानि छन्दांसि पुराणं यजुषा सह। उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः।। 6।।

卐16.84.7 अथर्वाङ्गिरसो ब्रह्म सर्प पुण्यजनाश्च ये। उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः।। 7।।

卐16.84.8 आनन्दाश्च प्रमोदाश्चा भीमदोमुदश्च ये। उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः।। 8।। 16 - 85

卐16.85.1 यन्मन्युर्जाया मावहत्संकल्पस्य गृहादधि। क आसञ्जन्या॰ के वरा॰ क उ ज्येष्ठवरोऽभवत्।। 1।।

卐16.85.2 तपश्चैवास्तां कर्म चान्तर्महत्यर्णवे। ताऽऽसञ्जन्यास्तेवरा स उ ज्येष्ठवरोऽभवत्।। 2।।
卐16.85.3 दश साकमजायन्त देवा देवेभ्यः पुरा। यो वै तां विद्यान्नामथा स वा अद्य महद्वदेत्।। 3।।
卐16.85.4 प्राणापानौ चक्षु श्श्रोत्रमक्षितिश्च क्षितिश्च या। व्यानोदानौ वाङ्मनस्ते वाकूतिमावहन्।। 4।।
卐16.85.5 अजाता आसन्नृतवोऽथ धाता बृहस्पतिः। इन्द्राग्नी अश्विना तर्हि कन्ते ज्येष्ठमुपासत।। 5।।
卐16.85.6 तपश्चैवा स्ताङ्कर्म चान्तर्महत्यर्णवे। तपो ह यज्ञे कर्मणस्तत्ते ज्येष्ठमुपासत।। 6।।
卐16.85.7 कुत इन्द्रः कुतस्सोम कुतोऽग्निरजायत। कुतस्त्वष्टा समभवद्धाता समभवत् कुतः।। 7।।
卐16.85.8 इन्द्रादिन्द्र स्सोमात्सोमो ऽग्नेरग्निरजायत। त्वष्टा ह यज्ञे त्वष्टोर्धाता धातोरजरायत।। 8।।
卐16.85.9 ये त आसन्दशजाता देवा देवेभ्यः पुराः। पुत्रेभ्यो लोकन्दत्वा कस्मिन्ते लोक आसते।। 9।।
卐16.85.10 ये तो भूमिः पूर्वासीद्यामद्धातय इद्विदुः। के तस्यां देवा आसते कस्मिन् वृषाधिश्रिताः।। 10।। 16 - 86
卐16.86.1 कुतः केशान्कुत स्स्नाव कुतोऽस्थीन्याभरत्। अङ्गा पर्वाणि मज्जानं को मांसङ्कुतो आभरत्।। 1।।
卐16.86.2 यदा केशानस्थि स्नाव मांसं मज्जानमाभरत्। शरीरं कृत्वा पादवत्कं लोकमनु प्राविशत्।। 2।।
卐16.86.3 संसिचो नाम ते देवा ये संभरैस्समभरन्। सर्वं संसिच्य मर्त्यन्देवाः परुषमा विशन्।। 3।।
卐16.86.4 शिरो हस्तावथो बाहू जिह्वाङ्ग्रीवाश्च कीकसाः। पुष्टिर्बर्जह्ये पार्श्वे कस्त त्समदधादृषिः।। 4।।
卐16.86.5 उरू पादावष्ठीवन्तौ श्रोणीहस्तावथो मुखम्। त्वचा प्रावृत्य तत्सर्वं संधा समदधान्मही।। 5।।
卐16.86.6 यत्तच्छरीर मशयत्संधया संहितं महत्। येनेदमद्य रोचते कोऽस्मिन् वर्णमाभरत्।। 6।।



Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐16.86.7 सर्वे देवा उपाशिक्षन्तदजानाद्वधू स्सती। ईशा वशस्य या जाया सास्मिन् वर्णमाभरत्।। 7।।

卐16.86.8 यदा त्वष्टा व्यतृणत्पिता त्वष्टुर्य उत्तरः। गृहं कृत्वा मर्त्यन्देवा॰ पुरुषमाविशन्।। 8।।

卐16.86.9 स्वप्नो वै तन्द्रीर्निर्ऋतिः॰ पाप्मानो नाम देवताः। जरा खालत्यं पालित्यं शरीरमनु प्राविशन्।। 9।।

卐16.86.10 स्तेयन्दुष्कृतं वृजिनं सत्यं यज्ञो यशो महः। बलञ्च क्षत्रमोजश्च शरीरमनुप्राविशन्।। 10।। 16 - 87

卐16.87.1 भूतिश्च वाऽभूतिश्च रातयोऽरातयोश्च याः। क्षुधश्च सर्वास्तृष्णाश्च शरीरमनु प्राविशन्।। 1।।

卐16.87.2 निन्दाश्च वाऽनिन्दाश्च यच्च हन्तेति नेति च। शरीरं श्रद्धा दक्षिणा श्रद्धा यानु प्राविशन्।। 2।।

卐16.87.3 विद्याश्च वाऽविद्याश्च यच्चान्य दुपदेश्यम्। शरीरं ब्रह्म प्राविशदृच स्सामाथो यजुः।। 3।।

卐16.87.4 आनन्दानन्दा॰ प्रमुदोऽभीमदो मुदश्च ये। हसो नोऽरिष्टा नृत्तानि शरीरमनु प्राविशन्।। 4।।

卐16.87.5 आलापाश्च प्रलापाश्चाभीलापलपश्च ये। शरीरं सर्वे प्राविशन्नायुज॰ प्रयुजो युजः।। 5।।

卐16.87.6 प्राणापानौ चक्षु श्श्रोत्रमक्षितिश्च क्षितिश्च याः। व्यानोदानौ वाङ्मन श्शरीरेण त ईयन्ते।। 6।।

卐16.87.7 आशिषश्च प्रशिषश्च संशिषो विशिषश्च याः। चित्तानि सर्वे संकल्पा श्शरीरमनु प्राविशन्।। 7।।

卐16.87.8 त्त्वराश्च वै धृतयश्चेडाशी स्सूनृते च या। शरीरं सर्वे प्राविशन्नृत रीर्ष्यायुधो ऽमृधः।। 8।।

卐16.87.9 आस्तेयीश्च वास्तेयीश्च त्वरणा॰ कृपणाश्च याः। गुह्या श्शुक्रा आपस्स्थूला स्ताबीभत्स रसादयन्।। 9।।

卐16.87.10 अस्थि कृत्वा समिधं तदष्टापो असादयन्। रेत॰ कृत्वाज्यं देवा॰ पुरुषमा विशन्।। 10।। 16 - 88

卐16.88.1 या आपो याश्च देवता या विराड् ब्रह्मणा सह। शरीरं ब्रह्म प्राविशच्छरीरेऽधि प्रजापतिः।। 1।।
卐16.88.2 सूर्यश्चक्षुर्वातः॰ प्राणं पुरुषस्य वि भेजिरे। अथास्येतर मात्मानन्देवाः॰ प्रायच्छन्नग्नये।। 2।।
卐16.88.3 तस्माद्वै विद्वान्पुरुष इदं ब्रह्मेति मन्यते। सर्वाह्यस्मिन्देवता श्शरीरेऽधि समाहिताः।। 3।।
卐16.88.4 यदेभ्य स्स्थानमङ्गेषु पिता लोकाँ अकल्पयत्। शरीरं सर्वा देवताः यथाङ्गमनु प्राविशन्।। 4।।
卐16.88.5 अङ्गमङ्ग शरीरस्य सर्वे देवाऽनु प्राविशन्। पिताह्येभ्यः॰ प्रायच्छत्तं लोकमपराजितम्।। 5।।
卐16.88.6 तं लोकमपराजितं सर्वे देवाऽनु प्राविशन्। प्रजापतिर्यमा भरच्छरीरं बहुधा हितम्।। 6। ।
इति (क्षुद्रकाण्डे) षोडशकाण्डे चतुर्दशोऽनुवाकः। । 16 - 89
卐16.89.1 अग्ने जायस्वादितिर्नाथितेयं ब्रह्मौदनं पचति पुत्रकामा। सप्तर्षयो भूतकृतस्ते त्वा मन्थतु प्रजया सहेह।। 1।।
卐16.89.2 कृणुत धूमं वृषण स्सखायोऽद्रोघाविता वाचमच्छ। अयमग्निः॰ पृतनाषाट् सुवीरो येन देवाऽसहन्तु शत्रून्।। 2।।
卐16.89.3 अग्नेऽजनिष्ठा महते वीर्याय ब्रह्मौदनाय पक्तवे जातवेदः। सप्तर्षयो भूतकृतस्ते त्वाजीजनन्नस्यै रयिं सर्ववीरन्नियच्छ।। 3।।
卐16.89.4 समिद्धोऽग्ने समिधा समिध्यसे विद्वान्देवान् यज्ञियाङ्केह वक्षः। तेभ्यो हव्यं श्रपयञ्जातवेद स्स्वर्गं लोकमधि रोहयैनम्।। 4।।
卐16.89.5 त्रेधा भागो निहितो यः॰ पुरा वो देवानां पितृणामुत मर्त्यानाम्। अंशाञ्जानीध्वं वि भजामि तान्वो यो देवानां स इमां पारयाति।। 5।।
卐16.89.6 अग्ने सहस्वानभिभू रभीदसि नीचो न्युब्ज द्विषत स्सपत्नान्। इयं मात्रा मीयमाना मिता च सजातांस्ते बलिहृतः॰ कृणोतु।। 6।।
卐16.89.7 साकं सजातैः॰ पयसा सहैध्युदुब्जैनां महते वीर्याय। उर्ध्वो नाकस्याधि रोह विष्टपं स्वर्गो लोक इति यं वदन्ति।। 7।।

卐16.89.8 इयं मही प्रतिगृह्णातु चर्म पृथिवी देवी सुमनस्यमाना। अथ गच्छेम सुकृतामुलोकम्।। 8।।

卐16.89.9 एतौ ग्रावाणौ सयुजा युङ्घि चर्मणि निर्भिन्ध्यंशुन् यजमानाय साधु। अवघ्नती निजहि ये पृतन्यवोर्ध्वं प्रजामुध्वरन्त्युदूह।। 9।।

卐16.89.10 गृहाण ग्रावाणौ सुकृतौ वीर हस्त आ ते देवा यज्ञिया यज्ञमगुः। त्रयो वरा यतमांस्त्वं वृणीषे तास्ते समृद्धीरिहराधयामि।। 10।। 16 - 90

卐16.90.1 उपश्वसे द्रुबये सीदता यूयं वि विच्यध्वं यज्ञियासस्तुषैः। श्रिया समानानति सर्वान्त्स्यामाधस्पदं द्विषतस्पादयेम।। 1।।

卐16.90.2 इयं ते धीतिरिदमु ते जनित्रङ्गृह्णातु त्वामदिति श्शूरपुत्राः। परा पुनीहि य इमां पृतन्यवोऽस्यै रयिं सर्व वीरन्नि यच्छ।। 2।।

卐16.90.3 परेहि नारि पुनरेहि क्षिप्रमपान्त्वा गोष्ठोऽध्यरुक्षद्भराय। ताषां गृह्णीताद्यतमा यज्ञिया असन्विभाज्य धीरीतरा जहीतात्।। 3।।

卐16.90.4 एमा अगुर्योषितश्शुम्भमाना उत्तिष्ठ नारि तव संरभस्व। सुपत्नी पत्या प्रजया प्रजावत्या त्वागन्यज्ञꣳ प्रतिकुम्भं गृभाय।। 4।।

卐16.90.5 ऊर्जो भाग निहितो यꣳ पुरा वोर्षि प्रशिष्टाप आ हरैताः। अयं यज्ञो नाथविद् गातुवि त्प्रजाविदुग्रꣳ पशुविद्वीरविद्वोऽस्तु।। 5।।

卐16.90.6 अग्ने चरुर्यज्ञिय स्त्वाध्यरुक्षच्छुचि स्तपिष्टस्तपसा तपैनम्। आर्षेया दैवाऽभि संहत्य भागमिमे तपिष्ठार्तुभि स्तपन्तु।। 6।।

卐16.90.7 शुद्धा आपो योषितो यज्ञिया इमा आपश्चरुमवसर्पन्तु शुभ्राः। ददन्प्रजां बहुलान्पशुन्मे पक्तौदनस्य सुकृतामेतु लोकम्।। 7।।

卐16.90.8 ब्रह्मणा शुद्धा उत पूता घृतेन सोमस्यांशवस्तण्डुला यज्ञिया इमे। अपꣳ प्र विशत प्रतिगृह्णातु व श्चरुरिमं पक्ता सुकृतामेतु लोकम्।। 8।।

卐16.90.9 अभ्यावर्तस्व प्रजया सहैनां प्रत्यङ्ङेनां देवताभि स्सहैधि। तं स्वर्गं लोकमभि सम्वर्धयैनामादित्यो देवꣳ परमे व्योमन्।। 9।।

卐16.90.10 ऊरुः प्रथस्व महता महिम्ना सहस्र पृष्ठ स्सुकृतस्य लोके। पितामहाः पितरः प्रजोपजाहं पक्ता पञ्चदशस्ते अस्मि।। 10।। 16 - 91

卐16.91.1 सहस्रपृष्ठ श्शतधारोऽक्षितो ब्रह्मौदनौ देवयानस्स्वर्गः। अमूंस्त आ दधामि प्रजया रेषयैनान्सहैनं बलिहाराय कृणुतां मह्यमेव।। 1।।

卐16.91.2 उदेहि वेदिं प्रजया वर्द्धयैनान्नुदस्व रक्षः प्रतरन्धेह्येनाम्। श्रिया समानानति सर्वान्स्यामा धस्पदं द्विषतस्पादयेम।। 2।।

卐16.91.3 ऋतेन तष्टा मनसा हितेयं ब्रह्मौदनस्य निहिता वेदिरग्रे। अंशद्रिं शुद्धामुपधेहि नारि तत्रौदनं सादय दैवानाम्।। 3।।

卐16.91.4 अदितेर्हस्तां सृचमेतान्द्वितीयां सप्तर्षयो भूतकृतो यामकृण्वन्। सा गात्राणि विदुष्योदनस्य दर्विर्वेद्यामध्येन श्चिनोतु।। 4।।

卐16.91.5 श्रृतन्त्वा हविरुपसीदन्तु दैवानुसृप्याग्नेः पुनरेनान्प्र सर्प। सोमेन पूतो जठरे सीद ब्रह्मणामार्षेयास्ते मा रिषन्प्राशितारः।। 5।।

卐16.91.6 सोमो राजन्संज्ञान मावपैभ्य स्सु ब्राह्मणा यतमे त्वोपसीदान्। ऋषिनार्षेयांस्तपसोऽधिजातान्ब्रह्मौदने सुहवा जोहवीमि।। 6।।

卐16.91.7 इमाऽऽपो मधुमतीर्घृतश्चुतो ब्रह्मणां हस्तेषु प्रपृथक्सादयामि। यत्कामिदमभिसिञ्चामि वोऽहमिन्द्रो मरुत्वान्स ददादिदं मे।। 7।।

卐16.91.8 इदं मे ज्योतिरमृतं हिरण्यं पक्वं क्षेत्रात् कामदुघा म एषा। इदन्धनं निदधे ब्राह्मणेषु कृण्वे पन्थां पितृषु य स्स्वर्गः।। 8।।

卐16.91.9 अग्नौ तुषाना वप जातवेदसि परः कम्बुकानप मृड्ढ्येतान्। एतं शुश्रुम गृहराजस्य भागमथो विद्म निर्ऋतेर्भागधेयम्।। 9।।

卐16.91.10 श्राम्यतः पचत एधि सुन्वतस्स्वर्गं लोकमधि रोहयैनम्। येन रोहात्परमापद्य यद्वय उत्तमं नाकं परमं व्योमः।। 10।। 16 - 92

卐16.92.1 वभ्रेरध्वर्यो मुखमेतद्वि मृड्ढ्याज्याय लोकं कृणुहि प्रजानन्। घृतेन गात्रानुसर्वा वि मृड्ढि कृण्वे पन्थां पितृषु यस्स्वर्गः।। 1।।

卐16.92.2 वभ्रे रक्षस्सुमदमा वपैभ्योऽब्राह्मणा यतमे त्वोपसीदान्। पुरीषिणꣳ प्रथमानाꣳ पुरस्तादार्षेयास्ते मा रिषन्प्राशितारः।। 2।।

卐16.92.3 आर्षेयेषु नि दध ओदनत्वा नानार्षेयाणामप्यस्त्वत्र। अग्निर्मे गोप्ता मरुतश्च सर्वे विश्वे देवा अभि रक्षन्तु पक्तम्।। 3।।

卐16.92.4 यज्ञन्दुहानं सदमित्प्रपीनं पुमांसन्धेनुं सदनं रयीणाम्। प्रजा मृतत्वमुत दीर्घमायु रायष्पोषमुप स त्वा सदेम।। 4।।

卐16.92.5 वृषभोऽसि स्वर्ग ऋषीनार्षेयान् गच्छ। सुकृतां लोके सीद तत्र नौ संस्कृतम्।। 5।।

卐16.92.6 समाचिनुष्वानु सम्प्रायाह्यग्ने पथꣳ कल्पय देवयानान्। एभि स्सुकृतैरनु प्रगेष्म यज्ञन्नाके तिष्ठन्तमधि सप्तरश्मौ।। 6।।

卐16.92.7 येन देवा ज्योतिषाद्या मुदायन्ब्रह्मौदनं पक्त्वा सुकृतस्य लोकम्। तन्त्वा पचामि ज्योतिषा ज्ज्योतिरुत्तमं स नस्त्वद्धेहि सुकृतामु लोके।। 7।। 16 - 93

卐16.93.1 प्राच्यै त्वा दिशे निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृताँ यत्र लोको यत्रर्षयꣳ प्रथमजाꣳ पुराणाः।। 1।।

卐16.93.2 दक्षिणायै त्वा दिशे निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षयꣳ प्रथमजाꣳ पुराणाः।। 2।।

卐16.93.3 प्रतीच्यै त्वा दिशे दिशे निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षयꣳ प्रथमजाꣳ पुराणाः।। 3।।

卐16.93.4 उदीच्यै त्वा दिशे निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षयꣳ प्रथमजाꣳ पुराणाः।। 4।।

卐16.93.5 धृवायै त्वा दिशे निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षयꣳ प्रथमजाꣳ पुराणाः।। 5।।

卐16.93.6 उर्ध्वायै त्वा दिशे निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षयꣳ प्रथमजाꣳ पुराणाः।। 6।।

卐16.93.7 दिवे त्वा निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षयꣳ प्रथमजाꣳ पुराणाः।। 7।।

Sri Ganapati Sachchidananda Avadhoota Dattapeetham

卐16.93.8 अन्तरीक्षाय त्वा निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षय꣡
प्रथमजा꣡ पुराणाः।। 8।।

卐16.93.9 पृथिव्यै त्वा निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षय꣡
प्रथमजा꣡ पुराणाः।। 9।।

卐16.93.10 पशुभ्यस्त्वा निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षय꣡
प्रथमजा꣡ पुराणाः।। 10।। 16 - 94

卐16.94.1 मनुष्येभ्यस्त्वा निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षय꣡
प्रथमजा꣡ पुराणाः।। 1।।

卐16.94.2 पितृभ्यस्त्वा निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षय꣡
प्रथमजा꣡ पुराणाः।। 2।।

卐16.94.3 ऋषिभ्यस्त्वा निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षय꣡
प्रथमजा꣡ पुराणाः।। 3।।

卐16.94.4 आर्षेभ्यस्त्वा निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षय꣡
प्रथमजा꣡ पुराणाः।। 4।।

卐16.94.5 अङ्गीरोभ्यस्त्वा निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षय꣡
प्रथमजा꣡ पुराणाः।। 5।।

卐16.94.6 आङ्गीरसेभ्यस्त्वा निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षय꣡
प्रथमजा꣡ पुराणाः।। 6।।

卐16.94.7 अथर्वभ्यस्त्वा निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षय꣡
प्रथमजा꣡ पुराणाः।। 7।।

卐16.94.8 आथर्वणेभ्यस्त्वा निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षय꣡
प्रथमजा꣡ पुराणाः।। 8।।

卐16.94.9 वनस्पतिभ्यस्त्वा निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षय꣡
प्रथमजा꣡ पुराणाः।। 9।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐16.94.10 वानस्पत्येभ्यस्त्वा निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षयᳳ प्रथमजाᳳ पुराणाः।। 10।। 16 - 95

卐16.95.1 वीरुद्भ्यस्त्वा निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षयᳳ प्रथमजाᳳ पुराणाः।। 1।।

卐16.95.2 ओषधीभ्यस्त्वा निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षयᳳ प्रथमजाᳳ पुराणाः।। 2।।

卐16.95.3 ऋतुभ्यस्त्वा निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षयᳳ प्रथमजाᳳ पुराणाः।। 3।।

卐16.95.4 आर्तवेभ्यस्त्वा निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षयᳳ प्रथमजाᳳ पुराणाः।। 4।।

卐16.95.5 लोकेभ्यस्त्वा निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षयᳳ प्रथमजाᳳ पुराणाः।। 5।।

卐16.95.6 लोकानां त्वाध्यक्षेभ्यो निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षयᳳ प्रथमजाᳳ पुराणाः।। 6।।

卐16.95.7 देवेभ्यस्त्वा निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षयᳳ प्रथमजाᳳ पुराणाः।। 7।।

卐16.95.8 दैवेभ्यस्त्वा निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षयᳳ प्रथमजाᳳ पुराणाः।। 8।।

卐16.95.9 सर्वाभ्यस्त्वा निर्वपामि शतधारमपक्षुधम्। स पक्तारोहस्सुकृतां यत्र लोको यत्रर्षयᳳ प्रथमजाᳳ पुराणाः।। 9।। 16 - 96

卐16.96.1 पुमान्पुंसो अधि तिष्ठ चर्म न ते शिश्नं प्र दहाज्जातवेदाः। भवात्ते स्त्रैणमप्यप्सुरासु।। 1।।

卐16.96.2 महती द्यावापृथिवी अन्तरिक्षमिदं महत्। महा महिम्ना सर्वाङ्गो यस्त्वा पचत्योदन।। 2।।

卐16.96.3 सप्तैनं सूर्या सवितृ सप्त पुष्करणीरुत। सप्त सहस्रङ्गन्धर्वा यस्त्वा पचत्योदन।। 3।।

卐16.96.4 धातत्रैषामुद्गातासीद्देवा होतार ऋत्विजः। सर्वाङ्ग यत्रौदनं सत्येनाग्रे समैरयन्।। 4।।

卐16.96.5 सप्तर्षयो भूतकृत ऋषयस्साध्याश्च ये। ते वै सर्वाङ्गमोदनं श्रद्धयाग्रे समैरयन्।। 5।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐16.96.6 यस्सर्वाङ्गञ्चति ब्रह्माणञ्च न हिंसति। तस्मै ज्योतिष्मन्तं लोकं यमो राजाभि रक्षति।। 6।।
卐16.96.7 तं सर्वाङ्गङ्घृतपृष्ठं द्यौमात्रन्देवसंहितम्। निधिस्त्वा मुत्रत्सेवधि तन्ते ब्रह्माभि रक्षतु।। 7।।
卐16.96.8 तस्यौदनस्योदरमन्तरिक्ष नद्यौꣳ पृष्ठं दिशꣳ पार्श्वे। सूर्या चन्द्रमसावक्षौ ऋतवो दन्ताꣳ पवमानꣳ प्राण अङ्गिरसो रूपम्।। 8। इति (क्षुद्रकाण्डे) षोडशकाण्डे पञ्चदशोऽनुवाकः। । 16 - 97
卐16.97.1 आ नयैतमा रभस्व सुकृतां लोकमपि गच्छतु प्रजानन्। तीर्त्वा तमांसि बहुधा विपश्यन् अजो नाक मा क्रमतान्तृतीयम्।। 1।।
卐16.97.2 प्र पदोऽवने निग्धि दुश्चरितं यच्चचार शुद्धै श्शफैराक्रमतां प्रजानन्। ज्योतिष्मन्तं सुकृतां लोकमीप्सन्तृतीये नाके अधि वि क्रमस्व।। 2।।
卐16.97.3 अनुछ्य श्यामेन त्वचमेतां विशस्तर्यथा पर्वसि नामाभि मंस्थाः। माभि द्रुहꣳ परुशꣳ कल्पयैनं सुकृतां मध्ये अधि वि श्रयैमम्।। 3।।
卐16.97.4 भूम्यां त्वा भूमिमधि धारयाम्यासिञ्चोदकमव धेह्येनम्। पर्याधत्ताग्निना शमितारश्श्रतो गच्छतु सुकृतां यत्र लोकः।। 4।।
卐16.97.5 उत्क्रामातꣳ परि चेद् अतप्तस्तप्ताच्चरोरधि नाकन्तृतीयम्। अग्नेरग्निरधिसं बभूविथ ज्योतिष्मान्गाच्छ सुकृतां यत्र लोकः।। 5।।
卐16.97.6 पञ्चौदनꣳ पञ्चधा वि क्रमस्वा क्रंस्यमानꣳ पञ्च ज्योतींषि। ईजानानां सुकृतां प्रेहि मध्यं ज्योतिष्मन्तमभिलोकं जयास्मै।। 6।।
卐16.97.7 अजमेवाग्निमजमु ज्योतिराहुरजं ब्रह्मणे जीवता देयमाहुः। अजस्तमांस्यपहन्ति दूरमस्मिल्लोके श्रद्दधानेन दत्तः।। 7।।
卐16.97.8 एतद्वो ज्योतिꣳ पितरस्तृतीयं पञ्चौदनं ब्रह्मणेऽजं ददाति। अजस्तमांस्यपहन्ति दूरं पञ्चौदनो ब्रह्मणे दीयमानः।। 8।।
卐16.97.9 पञ्चौदनो ब्रह्मणे दीयमानोऽजो नाकं मा क्रमतान्तृतीयम्। विचक्रमाण स्सुकृतस्य लोके स्वर्ज्योतिषा तमोऽपहन्ति दूरम्।। 9।।
卐16.97.10 अजा क्रमस्व सुकृतां यत्र लोकश्शरभो न चत्तोऽति दुर्गाण्येषः। पञ्चौदनो ब्रह्मणे दीयमानो विश्वरूपा कामदूघास्येका।। 10।। 16 - 98

卐16.98.1 ज्योतिष्मन्तं सुकृतां लोकमीप्सन्पञ्चौदनं ब्रह्मणेऽजं ददाति। स व्याप्नुह्येऽभि लोकं जयास्मै शिवोऽस्मभ्यं प्रति गृहीत एधि।। 1।।

卐16.98.2 अजस्त्रिनाके त्रिदिवे त्रिपृष्ठे सुकृतां लोके ददिवासं दधाति। पञ्चौदनो ब्रह्मणे दीयमानस्स दातारं तृप्त्या तर्पयाति।। 2।।

卐16.98.3 अजोह्यग्नेरजनिष्ट शोकाद्विप्रो विप्रस्य सहसो वयोधाः। हुतमिष्टमभिपूर्त्तं वषट्कृतं तद्देवार्तुशः कल्पयन्तु।। 3।।

卐16.98.4 अमोतं वासो दद्याद्धिरण्य मपिदक्षिणाम्। तथा लोका न्समाप्नुयाद्ये दिव्या ये च पार्थिवाः।। 4।।

卐16.98.5 एतास्त्वाधारा उपयन्तु विश्वत स्सोम्या देवीर्घृतपृष्ठा मधुश्चुतः। स्तभान पृथिवीन्दिवं सदस्व नाके तिष्ठास्यधि सप्तरश्मौ।। 5।।

卐16.98.6 पृष्ठात्पृथिव्या अहमन्तरिक्षमारुहमन्तरिक्षा द्दिवमारुहम्। दिवो नाकस्य पृष्ठात्स्वर्ज्योति रगामहम्।। 6।।

卐16.98.7 ओजस्योऽज स्वर्गोऽसि त्वया लोकमङ्गिरसः प्रजानन्। तं लोकमनु प्रज्ञेषम्।। 7।।

卐16.98.8 येन वा सहस्रं वहसि येन वा सर्ववेदसम्। तेनेमं यज्ञन्नो वह स्वर्देवेषु गन्तवे।। 8।।

卐16.98.9 अजञ्च पचत पञ्चचौदनान्। अजं पञ्चौदनान्पक्त्वा देवा लोकान्समानशुः।। 9।।

卐16.98.10 पञ्चौदनं पञ्चभिरङ्गुलिभिर्दर्व्योद्धर पञ्च चौदनमेतम्। प्राचीन्दिशं दक्षिणां प्रतीचीमुदीची न्ध्रुवामूर्ध्वां दिशमाक्रमस्व।। 10।। 16 - 99

卐16.99.1 प्राच्यान्दिशि शिरोऽजस्य धेहि दक्षिणायान्दिशि दक्षिणन्धेहि पार्श्वम्। प्रतीच्यान्दिशि भसदमस्य धेह्युदीच्या न्दिश्युत्तरन्धेहि पार्श्वम्।। 1।।

卐16.99.2 अजस्यानुक मुर्धायां दिशि धेहि पाजस्यन्ध्रुवायान्धेहि पार्श्वम्। अन्तरिक्षे मध्यतो मध्यमस्य पद्भिश्चतुर्भिः प्रतितिष्ठ दिक्षु।। 2।।

卐16.99.3 श्रृतमजं श्रृतया प्रोर्णुहि त्वचा सर्वैरङ्गैस्संभृतं विश्वरूपम्। स उत्तिष्ठ प्रेहि नाकमुत्तमं पद्भिश्चतुर्भिः प्रतितिष्ठ दिक्षु।। 3।।

卐16.99.4 सर्वा दिश स्संविदाना सध्रीचीस्सान्तर्देशा प्रतिगृह्णन्तु तेजम्। तास्ते रक्षन्तु तव तुभ्यमेत न्ताभ्यो जुहोमि हविषा घृतेन।। 4।।

卐16.99.5 यं ब्राह्मणे निदधे यच्च विक्षु या विप्रुष ओदनानामजस्य। सर्वन्तदग्ने सुकृतस्य लोके जानितान्न स्सङ्गमने पथीनाम्।। 5।।

卐16.99.6 अजꣳ पञ्चौदनो व्यक्रमत तस्योरई यमभवदुदरमन्तरिक्षन्द्यौꣳ पृष्ठन्दिशꣳ पार्श्वे।। 6।।

卐16.99.7 दितिश्चादितिश्च शृङ्गे सत्यञ्च रुतञ्च चक्षुषी। विश्वरूपं श्रद्धा प्राणो विराट् शिरः।। 7।।

卐16.99.8 एष वा अपरिमितो यज्ञो यदजꣳ पञ्चौदनः। अपरिमितं लोकं जयत्यपरिमितं लोकमवरुन्धे। य एवं विदुषेजं पञ्चौदनं ददाति।। 8।।

卐16.99.9 नास्यास्थीनि भिन्द्यान्न मज्ज्ञो निर्धयत्। सर्वाणि समादायेदमिदं प्रवेशयेत्।। 9।।

卐16.99.10 इदमिदमस्य रूपं ते नैनं सङ्गमयति। स्वधामूर्जमक्षिति महोऽस्मै दुहे य एवं विदुषेऽजं पञ्चौदनं ददाति।। 10।। 16 - 100

卐16.100.1 इन्द्राय भागं समिता कृणोत्विमं यज्ञं यज्ञपतिश्च सूरिः। ये नो द्विषन्त्यनु तान् रभस्वारिष्टा वीरा यजमानस्य सर्वे।। 1।।

卐16.100.2 पञ्चलोकाःꣳ पञ्चर्तवः। पञ्चषु तुतुष्ट घ्नोति य एवं विदुषेऽजं पञ्चौदनं ददाति।। 2।।

卐16.100.3 एष वै निदाघो यज्ञो यदजꣳ पञ्चौदनः। निरप्रियं भ्रातृव्यन्दहति भवत्यात्मना परास्या प्रियो भ्रातृव्यो भवति य एवं विदुषेऽजं पञ्चौदनं ददाति।। 3।।

卐16.100.4 यो वा आयन्तमित्यृतुं वेद। आयतीमेवा प्रियस्य भ्रातृव्यस्य श्रियमादत्ते भवत्यात्मना परास्याप्रियो भ्रातृव्यो भवति। य एवं विदुषेऽजं पञ्चौदनं ददाति।। 4।।

卐16.100.5 यो वै सं यन्तमित्यृतुं वेद। संयतीमेवा प्रियस्य भ्रातृव्यस्य श्रियमादत्ते भवत्यात्मना परास्या प्रियो भ्रातृव्यो भवति। य एवं विदुषेऽजं पञ्चौदनं ददाति।। 5।।

卐16.100.6 यो वै संभवन्तमित्यृतुं वेद। भवन्तीमेवा प्रियस्य भ्रातृव्यस्य श्रियमादत्ते भवत्यात्मना परास्या प्रियो भ्रातृव्यो भवति। य एवं विदुषेऽजं पञ्चौदनं ददाति।। 6।।

卐16.100.7 यो वा अभिभवन्तमित्यृतुं वेद। अभिभवन्तमेवा प्रियस्य भ्रातृव्यस्य श्रियमादत्ते भवत्यात्मना परास्याप्रियो भ्रातृव्यो भवति। य एवं विदुषेऽजं पञ्चौदनं ददाति।। 7।।

卐16.100.8 यो वा उद्यन्तमित्यृतुं वेद। उद्यतीमेव प्रियस्य भ्रातृव्यस्य श्रियमादत्ते भवत्यात्मना परास्याप्रियो भ्रातृव्यो भवति। य एवं विदुषेऽजं पञ्चौदनं ददाति।। 8।।

Sri Ganapati Sachidananda Avadhoota Datta Peetham

卐16.100.9 यो वै मूर्धानमित्यृतुं वेद। मूर्ध्निमेवा प्रियस्य भ्रातृव्यस्य श्रियमादत्ते भवत्यात्मना परास्याप्रियो भ्रातृव्यो भवति। य एवं विदुषेऽजं पञ्चौदनं ददाति।। 9।।

卐16.100.10 यो वै सर्वमित्यृतुं वेद। सर्वामेवा प्रियस्य भ्रातृव्यस्य श्रियमादत्ते भवत्यात्मना परास्याप्रियो भ्रातृव्यो भवति। य एवं विदुषेऽजं पञ्चौदनं ददाति।। 10।।

卐16.100.11 यावन्त्यस्य लोमानि ब्रह्मणास्तृणोति वेद्याम्। तावतीरस्य धारास्समुद्र स्येवाक्षताः।। 11।।

卐16.100.12 दुहां क्षीरं भवतु सर्पिरेभ्यस्स्वराड् भूत्वोपतिष्ठत्सुराणाम्। मधोर्धारामधिपेभ्यो दुहनोजो नाके तिष्ठतु मोदमानः।। 12।। 16 - 101

卐16.101.1 स्कम्भेनेमे विष्कभिते द्यौश्च भूमिश्च तिष्ठतः। स्कम्भेदं सर्वमार्पित मेजत्प्राण न्निमिषच्च यत्।। 1।।

卐16.101.2 एकचक्रं वर्त्तत एकनेमि सहस्राक्षरं प्र पुरो नि पश्चात्। अर्द्धेनेदं परिबभूव विश्वँ यदस्यार्द्ध ङ्कतमस्सकेतुः।। 2।।

卐16.101.3 पञ्च वा हि बहत्यग्रमस्य प्रष्टयो युक्ता अनुसंवहन्ति। अयातमस्य ददृशे न यातं परं नेदीयो ऽवरन्दवीयः।। 3।।

卐16.101.4 इदं सवितर्वि जानीहि षड्यमा एक एकजः। तस्मिन् हापित्व मिच्छन्ते य एषामेक एकजः।। 4।।

卐16.101.5 तिर्यग्बिलश्चमस ऊर्ध्वबुध्न स्तस्मिन्यशो निहितँ विश्वरूपम्। तत्रासत ऋषयस्सप्त साकं ये अस्य गोपा महतो बभूवुः।। 5।।

卐16.101.6 तिस्रो ह प्रजा अत्यायमाय न्न्यन्यार्कमभितो विशन्त। बृहद्ध तस्थौ रजसो विमानो हरितो हरिणीरा विवेश।। 6।।

卐16.101.7 द्वादश प्रधयश्चक्रमेकन्त्रीणि नभ्यानि क उ तच्चिकेत। तत्राहतास्त्रीणि शतानि शङ्कव ष्षष्टिश्च खीला अविचाचला ये।। 7।।

卐16.101.8 अनन्तं विततं पुरुत्रानन्त मन्तवच्चा समन्ते। ते नाकपाल श्चरति प्रजानन्विद्वान् भूतँ यदि भव्यमस्य।। 8।।

卐16.101.9 आवि स्सन्निहितं गुहा जरन्नाम महत्पदम्। तत्रैदं सर्वमार्पित मेजत्प्राणं निमिषच्चयत्।। 9।।

卐16.101.10 ऊर्ध्वं भरन्तमुदक ङ्कुम्भेनेवोदहार्यम्। पश्यन्ति सर्वे चक्षुषा न सर्वे मनसा विदुः।। 10।। 16 - 102

卐16.102.1 उनात्पूर्णमुदचति पूर्णादून मुदच्यते। कवि स्तद्ब्रह्मणा वेद यतस्तत्परि षिच्यते।। 1।।

卐16.102.2 प्रजापतिश्चरति गर्भे अन्तर दृश्यमानो बहुधा वि जायते। अर्धेन विश्वं भुवनञ्जजान यदस्यार्धं किमुतज्जजान।। 2।।

卐16.102.3 यदेजति चरति यच्च तिष्ठत्य प्राणत्प्राण न्निमिषच्च चेष्टत। तद्दाधार पृथिवीं विश्वरूप न्तत्संभूय भवत्येकमेव।। 3।।

卐16.102.4 याꣳ पुरस्ताद्युज्यते योत पश्चाद्या विश्वतो युज्यते योत सर्वतः। यया यज्ञस्त्रायते प्राङ् तान्त्वा पृच्छामि कतमा नु सर्वाम्।। 4।।

卐16.102.5 यतस्सूर्य उदेत्यस्तं यत्र च गच्छति। तदेव मन्येह ञ्ज्येष्ठं ततो नात्येति किञ्च न।। 5।।

卐16.102.6 सत्येनोर्ध्वो स्तपति ब्राह्मणार्वाङ् वि पश्यति। प्राणेन तिर्यङ् प्राणति यस्मिन् ज्येष्ठमधि श्रितम्।। 6।।

卐16.102.7 यो वै ते विद्यादरणी याभ्यान्निर्मथ्यते वसु। स विद्यान् ज्येष्ठ मन्येत स विद्याद् ब्राह्मणं महत्।। 7।।

卐16.102.8 अपादग्रे समभव त्सोऽग्रे स्वराभरत्। चतुष्पाद् भूत्वा योग्य सर्वमादत्त भोजनम्।। 8।।

卐16.102.9 भग्यो भव दथोऽन्न मदद्वहु। यो वेद मुत्तरावन्त मुपासातै सनातनम्।। 9।।

卐16.102.10 सनातन मेनमाहुरुताद्य स्यात्पुनर्णवः। अहोरात्रे प्र जायेते अन्योऽन्यस्य रूपयोः।। 10।। 16 - 103

卐16.103.1 शतं सहस्र मयुतन्न्यर्बुद मसंख्येयं स्वमस्मि न्निविष्टम्। तदस्यघ्नन्त्यभि पश्यत एव तस्माद्देवो रोचते एष एतत्।। 1।।

卐16.103.2 आराग्र मात्रन्ददृश उतैकन्नैव दृश्यते। ततꣳ परिष्वजीयसी देवता सा मम प्रिया।। 2।।

卐16.103.3 इयं कल्याण्यजरा मर्त्यस्यामृता गृहे। तस्मै कृताशये स यश्चकार जजार सः।। 3।।

卐16.103.4 त्वं स्त्री त्वं पुमानसि त्वं कुमार्युत वा कुमारः। त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवसि विश्वतो मुखः।। 4।।

卐16.103.5 उतैषाञ्ज्येष्ठ उत वा कनिष्ठ उतैषां भ्रात उत वा पितैषाम्। एको देवो मनसि प्रविष्टः प्रथमो जातस्स उ गर्भे अन्तः।। 5।।

卐16.103.6 अनेनैत्येजति सर्व मस्मिन् विश्वाभूतानि पर्याभृतस्य। स पुमान् पुंसो जनयन्नृतेन सर्वानन्तान् गच्छति तिष्ठन्येव।। 6।।

卐16.103.7 मध्ये दिवो निहितः पृश्निरस्मा विचक्रमाणौ रजसस्पात्यन्तौ। स विश्वाभिरभि चष्टे शचीभिरन्तरा पूर्वमपरञ्च केतुम्।। 7।।

卐16.103.8 ये अर्वाञ्मध्यत वा पुराणं वेदं विद्वांस मभितो वदन्ति। आदित्यमेव ते परिवदन्ति सर्वे अग्नि न्द्वितीयं त्रिवृतञ्च हंसम्।। 8।।

卐16.103.9 एकामृचं समिन्धते द्वादशभि रग्निभिः। तस्यामाप स्तस्याङ्गाव स्तस्यामोषधय श्श्रिताः।। 9।।

卐16.103.10 सप्त सुपर्णा उप धावन्ति वाणमनुष्टुभा संभृतं विश्वरूपम्। तमातर न्विततं तन्तुमोतं स नः पुनातु सलिलस्य पृष्ठे।। 10।।

卐16.103.11 सप्तर्षयः प्रतिहिता श्शरीरे सप्त रक्षन्तु सदम प्रमादम्। सप्ताप स्स्वपतो लोकमीयुस्तत्र जागृतो ऽस्वप्नजौ सत्रसदौ च देवौ।। 11। इति (क्षुद्रकाण्डे) षोडशकाण्डे षोडशोऽनुवाकः। । 16 - 104

卐16.104.1 भवाशर्वौ मृडतं माभिजातं भूतपती पशुपती नमो वाम्। प्रतिहिता मायतां मा विस्राष्टं मा नो हिंसिष्टं द्विपदो मा चतुष्पदः।। 1।।

卐16.104.2 शुने क्रोष्ट्रे मा शरीराणि कर्त मलिक्लवेभ्यो गृध्रेभ्यो ये च कृष्णा अविष्यवः। मक्षिकास्ते पशुपते वयांसि ते विघसे मा विदन्त।। 2।।

卐16.104.3 क्रन्दाय ते प्राणाय ते याश्च ते भव रोपयः। नमस्ते रुद्र कृण्म स्सहस्राक्षाय मर्त्यः।। 3।।

卐16.104.4 पुरस्तात्ते नमः कृण्मोत्तरा दधरादुत। अभिवर्गा द्दिवस्पर्यन्तरिक्षाय ते नमः।। 4।।

卐16.104.5 मुखाय ते पशुपते यानि चक्षुंसि ते भव। त्वचे रूपाय सन्दृशे प्रतीचीनाय ते नमः ।। 8।।

卐16.104.6 अङ्गेभ्य उदराय जिह्वाया आस्याय च। दद्भ्यो गन्धाय ते नमः।। 6।।

卐16.104.7 अस्त्रा नीलशिखण्डेन सहस्राक्षेण वाजिना। रुद्रेणार्ध्वक घातिना तेन मा समरामहि।। 7।।

卐16.104.8 स नो भवः परिवृणक्तु विश्वत आपो इवाग्निः परि वृणक्तु नो भवः। मा नो अभि मांस्त नमो अस्त्वस्मै।। 8।।

卐16.104.9 चतुर्नमोऽष्टकृत्वो भवाय दशकृत्वः पशुपते नमस्ते। तवेमे पञ्चपशवो विभक्ता गावो अश्वाः पुरुषा आजावयः।। 9।।

卐16.104.10 तव चतस्त्रः प्रदिश स्तवद्यौ स्तवेदमुग्रोर्वन्तरिक्षम्। तवेदं सर्वमात्मन्व द्यदेजदधि भूम्याम्।। 10।। 16 - 105

卐16.105.1 उरुः कोशो वसुधान स्तवायं यस्मिन्निमा विश्वा भुवनान्यन्तः। स नो मृड पशुपते नमस्ते परः क्रोष्टारोऽभिभा श्वानः परो यन्त्वघरुदो विकेश्यः।। 1।।

卐16.105.2 धनुर्विभर्षि हरितं हिरण्ययं सहस्रघ्नि शतवधं शिखण्डिनम्। रुद्रस्येषु श्चरति देवहति स्तस्मै नमो यतमस्या न्दिशीतः।। 2।।

卐16.105.3 योऽभियात निलयते त्वां रुद्र निचिकीर्षति। पश्चादनु प्रयुङ्क्षे तं विद्धस्य पदनीरिव।। 3।।

卐16.105.4 भवारुद्रौ सयुजा संविदानावुभा उग्रौ चरतो वीर्याय। तयोर्भूमिरन्तरिक्षं स्वर्द्यौ स्ताभ्यां नमो भव मर्त्याय कृण्वः।। 4।।

卐16.105.5 नमस्ते अस्त्वायते नमोऽस्तु पराय ते। नमस्ते रुद्र तिष्ठत आसीनायोत ते नमः।। 5।।

卐16.105.6 नमस्सायं नमः प्रातर्नमो रात्र्या नमो दिवा। भवाय च शर्वाय चोभाभ्या मकरन्नमः।। 6।।

卐16.105.7 सहस्राक्षमतिपश्यं पुरस्ताद्रुद्र मस्यन्तं बहुधा विपश्चितम्। मोपाराम जिह्वयेय मानम्।। 7।।

卐16.105.8 श्यावाश्वं कृष्णमसितं मृणन्तं भीमं रथं केशिनः पादयन्तम्। पूर्वे प्रतीमो नमोऽस्त्वस्मै।। 8।।

卐16.105.9 मा नोऽभिस्रा मत्यं देवहेतिं मा न क्रुधः पशुपते नमस्ते। अन्यत्रास्मद्दिव्यां शाखां वि धूनु।। 9।।

卐16.105.10 मा नो हिंसिरधि नो ब्रूहि परि णो वृङ्धि मा क्रुधः। मा त्वया समरामहि।। 10।। 16 - 106

卐16.106.1 मा नो अश्वेषु गोषु पुरुषेषु मा गृधो नो अजाविषु। अन्यत्रोग्र वि वर्तय प्रियारुणां प्रजाञ्जहि।। 1।।

卐16.106.2 यस्य तक्मा कासिका हेतिरेकाश्वस्येव वृषणः क्रन्द हेति। अभि पूर्वन्निर्णय ते नमोऽस्त्वस्मै।। 2।।

卐16.106.3 यस्तिष्ठति विष्टभितो अन्तरिक्षे ऽयज्वनः प्रमृण न्देवपीयून्। तस्मै नमो दशभि श्शक्करीभिः।। 3।।

卐16.106.4 तुभ्यमारण्याः पशवो मृगा वने हितास्तुभ्यं वयांसि शकुनाः पतत्रिणः। तव यक्ष्मं पशुपतेऽप्स्वन्त स्तुभ्यं क्षरन्ति दिव्याऽऽपो मृधे।। 4।।

卐16.106.5 शिंशुमारा अजगराः पुलिकया जषा मत्स्या रजसा एभ्यो अस्यसि। न ते दूरन्न परिष्ठास्ति ते भव सद्यस्सर्वान् परि पश्यसि भूमिम्।। 5।।

卐16.106.6 पूर्वस्माद्धं स्युत्तरस्मिन् समुद्रे मा नो रुद्र तक्मना मा विषेण। मा न स्संस्रा दिव्येनाग्निना ऽन्यत्रास्मद्विद्युतं पातयैताम्।। 6।।

卐16.106.7 भवो दिवो भव ईशे पृथिव्या भव आप प्र उर्वन्तरिक्षम्। तस्या मा प्रापत् दुच्छुना का चनेह।। 7।।

卐16.106.8 भव राजन् यजमानाय मृड पशूनां हि पशुपतिर्बभूविथ। यश्श्रद्दधाति सन्ति देवा इति चतुष्पदे द्विपदेऽस्य मृड।। 8।।

卐16.106.9 मा नो महान्तमुत मा नोऽर्भकं मा न उक्षन्त मुत मा न उक्षतः। मा नो हिंसी पितरं मोत मातरं स्वां तन्व रुद्र मा रीरिषो नः।। 9।।

卐16.106.10 रुद्रस्यै लवकारेभ्यो ऽसंसुक्त गिरेभ्यः। इदं महाश्वेभ्य श्श्वभ्यो ऽकरन्नमः। नमस्ते घोषिणीभ्यो नमस्ते केशिनीभ्यः। नमस्सं भुञ्जतीभ्यो नमो नमस्कृताभ्यः।। 10।। 16 - 107

卐16.107.1 नमस्ते जायमानायै जाताया उत ते नमः। बालेभ्य श्शफेभ्यो रूपायाघ्न्ये ते नमः।। 1।।
卐16.107.2 यो विद्यात् सप्त प्रवतस्सप्त विद्यात् परावतः। शिरो यज्ञस्य यो विद्यात्स वशां प्रति गृह्णियात्।। 2।।
卐16.107.3 वेदाहं सप्त प्रवत स्सप्त वेदॄ परावतः। शिरो यज्ञस्याहं वेद सोमं चास्यां विचक्षणम्।। 3।।
卐16.107.4 यया द्यौर्यया पृथिवी ययापो गुपिता इमाः। वशां सहस्रधारां ब्रह्मणाच्छा वदामसि।। 4।।
卐16.107.5 शतं वत्सा श्शतं दोग्धार श्शतं गोप्तारावधि पृष्ठे अस्याः। ये देवास्तस्यां प्राणन्ति ते वशां विदुरेकधा।। 5।।
卐16.107.6 यज्ञपदी राक्षिरा स्वधा प्राणा महीलुका। वशा पर्जन्य पत्नी देवाङ्ग प्येति ब्राह्मणा।। 6।।
卐16.107.7 अनुत्वाग्निॄ प्राविशदनु सोमो वसे त्वा। ऊधस्ते भद्रे पर्जन्यो विद्युत स्ते स्तना वशे।। 7।।
卐16.107.8 अपस्त्वं धुक्षे प्रथमा उर्वरा अपरा वशे। तृतीयं राष्ट्रन्धुक्षेऽन्नं क्षीरं वशे त्वम्।। 8।।
卐16.107.9 यदादित्यै र्हूयमानो पातिष्ठ ऋतावरी। इन्द्र स्सहस्रं पात्रान् सोमन्त्वापाय यद्वशे।। 9।।
卐16.107.10 यदनूचीन्द्र मैरात्त्व ऋषभो ऽह्वयत्। तस्मात्ते वृत्रहा पयॄ क्षीरं कृद्धोऽभरद्वशे।। 10।।

16 - 108

卐16.108.1 यत्ते कृद्धो धनपतिॄ क्षीरं तेऽभरद्वशे। इदं तदद्य नाक स्त्रिषु पात्रेषु रक्षति।। 1।।
卐16.108.2 त्रिषु पात्रेषु तं सोम मादेव्य भरद्वशा। अथर्वा यत्र दीक्षितो वर्हिष्यास्त हिरण्यये।। 2।।
卐16.108.3 सं हि सोमेनागत समु सर्वेण पद्वता। वशा समुद्रे प्रानृत्य दृचस्सामानि बिभ्रती।। 3।।
卐16.108.4 सं हि सूर्येणागत समु सर्वेण चक्षुषा। वशा समुद्र मध्यष्ठाद्गन्धर्वैॄ कलिभि स्सह।। 4।।
卐16.108.5 सं हि वातेनागत समु सर्वैॄ पतत्रिभिः। वशा समुद्रमत्यख्यद् भद्रा ज्योतींषि बिभ्रति।। 5।।
卐16.108.6 तद्भद्रा स्समगच्छन्त वशा देष्ट्र्यथो स्वधा। अथर्वा यत्र दीक्षितो बर्हिष्यास्त हिरण्यये।। 6।।

卐16.108.7 अभीवृता हिरण्येन यदतिष्ठ ऋतावरि। अश्वस्समुद्रो भूत्वा ध्यस्कन्दद्वशे त्वा।। 7।।
卐16.108.8 वशामाता राजन्यस्य वशा माता स्वधे तव। वशाया यज्ञ आयुधं ततश्चित्त मजायत।। 8।।
卐16.108.9 ऊर्ध्वो बिन्दुरुदचरद् ब्रह्मणः ककुदादधि। ततस्त्वं यज्ञिषे वशे ततो होता अजायत।। 9।।
卐16.108.10 आस्नस्ते गाथाऽभव न्नुष्णिहाभ्यो मलन्तव। पाजस्याज्जज्ञे ते यज्ञ स्तनेभ्यो रश्मयो वशे।। 10।। 16 - 109
卐16.109.1 इर्माभ्यामयनं जातं शक्थिभ्यां च वशे तव। आन्त्रेभ्यो अत्रा यज्ञिर उदरादधि वीरुधः।। 1।।
卐16.109.2 यदुदरं वरुणस्यानु प्राविशथा वशे। ततस्त्वा ब्रह्मोदह्वयत् स हि नेत्रमवेत्तव।। 2।।
卐16.109.3 सर्वे गर्भादवेपन्त जायमानादसूस्वः। ससूव हि तामाहुर्वशेति ब्रह्मणा क्लृप्त उत वन्धुरस्याः।। 3।।
卐16.109.4 युध एक स्संसृजति योऽस्या एक इद्वशी। तरांसि यज्ञा अभवन्तरसां चक्षु रभवद्वशा।। 4।।
卐16.109.5 वशा सूर्यं प्रत्य गृह्णाद्वशा यज्ञम धारयत्। वशाया मन्तराविश दोदनो ब्रह्मणा सह।। 5।।
卐16.109.6 वशामेवाहुरमृतं वशां मृत्युमुपासते। वशेदं सर्वमभवद्देवा मनुष्या असुराः पितरर्षयः।। 6।।
卐16.109.7 य एवं विद्यात्सवशां प्रति गृह्णीयात्। तथाहि यज्ञ स्सर्वपाद्दुहे दात्रे अनपस्फुरन्।। 7।।
卐16.109.8 तिस्रो जिह्वा वरुण स्यान्तर्दीद्यत्यासनि। तासां या मध्ये राजति सा वशा दुष्प्रतिग्रहा।। 8।।
卐16.109.9 चतुर्धा रेतोऽभव द्वशाया आपस्तुरीय ममृतन्तुरीयं यज्ञस्तुरीयं पशवस्तुरीयम्। य एवं विद्यात्सवशां प्रति गृह्णीयात्।। 9।।
卐16.109.10 वशाद्यौर्वशा पृथिवी वशा विष्णुः प्रजापतिः। वशाया दुग्धमपिव न्साध्या वसवश्च ये।। 10।। 16 - 110

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐16.110.1 वशाया दुग्धं पीत्वा साध्या वसश्च ये। इमे ब्रध्नस्य विष्टपि पयो अस्या उपासते।। 1।।
卐16.110.2 सोम मे नामेके दुह्रे घृतमेक उपासते। य एवं विदुषे वशां ददुष्टे गता स्त्रिदिवन्दिवः।। 2।।
卐16.110.3 वशां दत्वा ब्राह्मणेभ्य स्सर्वांल्लोकान् समश्नुते। ऋतं ह्यस्यामाहित मपि ब्रह्माथो तपः।। 3।।
卐16.110.4 वशान्देवा उप जीवन्ति वशां मनुष्या उत। वशेदं सर्वमभवद्यावत्सूर्यो विपश्यति।। 4।
इति (क्षुद्रकाण्डे)षोडशकाण्डे सप्तदशोऽनुवाकः। । 16 - 111
卐16.111.1 यो वा एकं ब्रह्माऽनुष्ठा विद्यात्स वा अद्य महद्वदेत्। परुंषि यस्य संभारा ऋचो यस्यानूक्यम्।। 1।।
卐16.111.2 छन्दांसि यस्य लोमानि परिस्तरण मिद्धवि र्यजु र्हृदय मुच्यते। यदतिथिपति रतिथीन् प्रति पश्यति देव यजनं प्रेक्षते।। 2।।
卐16.111.3 यदभिवदति दीक्षामुपैति यदुदकं याचत्यपः प्रणयति। या यज्ञ आपः प्रणीयन्ते ता एव ताः।। 3।।
卐16.111.4 यत्तर्पणमाहरन्ति योऽग्नीषोमीयः पशुर्बध्यते स एव सः। यत्खादमाहरन्ति पुरोडाशौ एव तौ।। 4।।
卐16.111.5 यदावसथान् कल्पयन्ति सदोहविर्धानान्येव तत् कल्पयन्ति। यदुपस्तृणन्ति बर्हिरेव तत्।। 5।।
卐16.111.6 यत्कशिपूपबर्हणान्याहरन्ति परिधय एव ते। यदुपरिशयनमाहरन्ति स्वर्गमेव तेन लोकमवरुन्धे।। 6।।
卐16.111.7 यदभ्यञ्जनमाहरन्त्याज्यमेव तत्। यदशनकृतं ह्वयन्ति हविष्कृतमेव तद्ध्वयन्ति।। 7।।
卐16.111.8 यद् व्रीहयो यद्यवा निरुप्यन्ते अंशव एव तेऽन्यूप्यन्ते।। 8।। 16 - 112
卐16.112.1 उलूखल मूसलं ग्रावाणौ शूर्पं पवित्रन्तुषार्जिषा। स्रुग्दर्विर्नेक्षणमायवनं आपोऽभिषवणीः द्रोणः कलशः कुम्भी।। 1।।
卐16.112.2 इदमेव कृष्णाजिनं वायव्यानि पात्राणि। यजमान ब्राह्मणं वा एतदतिथिपतिः कृणुते यदाहार्याण्यवेक्षत इदम्भूया इदामिति।। 2।।

卐16.112.3 यदाह भूय उद्धरेति प्रजाश्चैव तेन पशूंश्च वर्धयते प्राणमेव तेन वर्षीयांसं कृणुते।। 3।।

卐16.112.4 यत्संपृच्छति काममेव तेनावरुन्धे कामं हि पृष्ठो यजति। यदुदकमभिषिञ्चत्यप एव तेनावरुन्धे।। 4।।

卐16.112.5 यदुपहरति हवींष्यासादयति। तेषामासन्नाना मतिथिरात्मनि जुहोति। स्रुक्कारेण वषट्कारेण स्रुचा हस्तेन प्राणे यूपे।। 5।। 16 - 113

卐16.113.1 तस्मान्न द्विषन्नद्यान्न द्विषतोऽन्न मद्यान्न मीमांसितस्य न मीमांसमानस्य। सर्वो वा एष जग्धपाप्मा यस्यान्न मश्नन्ति।। 1।।

卐16.113.2 सर्वो वा एषोऽजग्ध पाप्मा यस्यान्नन्नाश्नन्ति। प्रजापतेर्वो एष विक्रान्त मनुविक्रमते य उपहरति।। 2।।

卐16.113.3 प्राजापत्यो वा एतस्य एव यज्ञो विततो य उपहरति। सर्वदा वा एष सुत सोम युक्तग्रावा द्रपवित्र आहृत यज्ञक्रतु र्विंतताध्वरो य उपहरति।। 3।।

卐16.113.4 योऽतिथीनां स आहवनीयो योऽन्नकरण स्स दक्षिणाग्निर्यो वेश्मनि स गार्हपत्यः। इष्टं च वा एष पूर्तं चाश्नाति यꣳ पूर्वोऽतिथेरश्नाति। प्रजां च वा एष पशूंश्चाश्नाति।। 4।।

卐16.113.5 ऊर्जञ्च वा एष पयश्च गृहाणामश्नाति यꣳ पूर्व अतिथेरश्नाति।। 5।।

卐16.113.6 एष वा अतिथिर्यच्छ्रोत्रिय स्तस्मात्पूर्वो नाश्नियात्। अशितावत्यश्नीयात्तद् व्रतम्।। 6।।

卐16.113.7 यज्ञस्याविच्छेदाय यज्ञस्य गुप्तये यज्ञस्य सात्मत्वाय।। 7।। 16 - 114

卐16.114.1 यत्क्षीरमुपसिच्यो पहरति यावदग्निष्टोमेन समृद्धेनेष्ट्वा वरुन्धे तावदेनेनावरुन्धे।। 1।।

卐16.114.2 यत्सर्पीरुपसिच्योप हरति यावत् साह्नेन समृद्धेनेष्ट्वा वरुन्धे तावदेनेनावरुन्धे।। 2।।

卐16.114.3 यन्मधूपसिच्योपहरति यावदतिरात्रेण समृद्धेनेष्ट्वा वरुन्धे तावदेनेनावरुन्धे।। 3।।

卐16.114.4 यन्मांसमुपसिच्योपहरति यावद्द्वादशाहेन समृद्धेनेष्ट्वा वरुन्धे तावदेनेनावरुन्धे।। 4।।

卐16.114.5 यदुदकमुपसिच्योप हरति प्रजानां प्रजननाय योग्जीवति सर्वमायुरेति न पुरा जरसꣳ प्रमीयते य एवं वेद।। 5।। 16 - 115

卐16.115.1 तस्मै वा उषा हिङ्कृणोति सविता भूत्वा प्रस्तौति बृहस्पतिरूर्जो यद् गायति त्वष्टा पुष्ट्या प्रतिहरति विश्वे देवा निधनम्। निधनं भूत्याꣳ प्रजायाःꣳ पशूनां भवति य एवं वेद।। 1।।

卐16.115.2 तस्मा उद्यन्सूर्यो हिङ्कृणोति सङ्गव॰ प्रस्तौति मध्यन्दिव उद्गायत्यपराह्ण॰ प्रतिहरत्यस्तं यन्निधनम्। निधनं भूत्या॰ प्रजाया॰ पशूनां भवति य एवं वेद।। 2।।

卐16.115.3 तस्मा अभ्रो भवन् हिङ्कृणोति विद्योतमान॰ प्रस्तौति स्तनयन्नुद्गायति वर्षं प्रतिहरत्युद्गृह्णन्निधनम्। निधनं भूत्या॰ प्रजाया॰ पशूनां भवति य एवं वेद।। 3।।

卐16.115.4 अतिथीन्प्रति पश्यति हिङ्कृणोत्यभि वदति प्र स्तौत्युदकं याचत्युद्गाय त्युपहरति प्रतिहरत्युच्छिष्ट न्निधनम्। निधनं भूत्या॰ प्रजाया॰ पशूनां भवति य एवं वेद।। 4।। 16 - 116

卐16.116.1 एते वै प्रियाश्चाप्रियाश्च ऋत्विज स्स्वर्गं लोकङ्गमयन्ति यदतिथयः। यत्क्षत्तारं ह्वयत्या श्रावयति।। 1।।

卐16.116.2 यत्प्रति श्रृणोति प्रत्याश्रावयति। यत्परिवेष्टार आवसथा न्प्रपद्यन्ते चमसाध्वर्यव एव ते तेषां वै कश्चना होता।। 2।।

卐16.116.3 यत्प्रातरुपहरति प्रात स्सवनमेव तत्।। 3।।

卐16.116.4 यद्दिवोपहरति माध्यन्दिनमेव सवनमेव तत्।। 4।।

卐16.116.5 यत्सायमुपहरति तृतीय सवनमेव तत्।। 5।।

卐16.116.6 यदतिथिपति रतिथीन्परिविष्यायनं याचते अवभृथमेव तद् उपावयन्ति। यत्सभागयति दक्षिणामेव तत्सभागयति यदनुतिष्ठत्युदवस्यत्वेव तत्। । 16 - 117

卐16.117.1 स उपहूत॰ पृथिव्यां भक्षयत्युपहूत स्तस्मिन्यत्पृथिव्यां विश्वरूपम्। पृथिव्या न्तपति पृथिव्यामाभाति स्वर्गलोक भवति य एवं वेद।। 1।।

卐16.117.2 स उपहूतोऽन्तरिक्षे भक्षयत्युपहूत स्तस्मि न्यदन्तरिक्षे विश्वरूपम्। अन्तरिक्षे तपत्यन्तरिक्ष आभाति स्वर्गलोक भवति य एवं वेद।। 2।।

卐16.117.3 स उपहूतो दिवि भक्षयत्युपहूत स्तस्मिन् यद्दिवि विश्वरूपम्। दिवि तपति दिव्याभाति स्वर्गलोक भवति य एवं वेद।। 3।।

卐16.117.4 स उपहूतो देवेषु भक्षयत्युपहूत स्तस्मिन्यद्देवेषु विश्वरूपम्। देवेषु तपति देवेष्वाभाति स्वर्गलोक भवति य एवं वेद।। 4।।

卐16.117.5 स उपहूतो लोकेषु भक्षयत्युपहूतस्तस्मिन् यल्लोकेषु विश्वरूपम्। लोकेषु तपति लोकेष्वाभाति स्वर्गलोक भवति य एवं वेद।। 5।। 16 - 118

卐16.118.1 यत् प्राङ्गासीनो निर्वपति यज्ञाय च देवेभ्यश्चा वृश्चते।। 1।।

卐16.118.2 यद्दक्षिणामासीनो निर्वपति यमाय च पितृभ्यश्चा वृश्चते।। 2।।

卐16.118.3 यत्प्रत्यङ्गासीनो निर्वपति वरुणायाप्सुषदे चा वृश्चते।। 3।।

卐16.118.4 यदुदङ्गासीनो निर्वपति सोमाय च राज्ञे सप्तर्षिभ्यश्चा वृश्चते।। 4।।

卐16.118.5 यदुपस्थं कृत्वासीनो निर्वपति भूमये चाग्नये चा वृश्चते।। 5।।

卐16.118.6 यदूर्ध्वकृरासीनो निर्वपति वायवे चान्तरिक्षाय चा वृश्चते।। 6।।

卐16.118.7 यदूर्ध्वस्तिष्ठ न्निर्वपति देवे चादित्याय चा वृश्चते।। 7।। 16 - 119

卐16.119.1 यं कामयेत पापीयानात्मना प्रजया पशुभिगृहैर्ध्वनेन स्यादिति। तस्यैवं निर्वपेत्तस्यैवं निरुप्यैवमेवानु निर्वपेत्। तदेव स पापीयानात्मना प्रजया पशुभिर्गृहैर्ध्वनेन भवतीदमिदं कुर्यात्सा प्रायश्चित्तिः।। 1।।

卐16.119.2 यं कामयेत वसीयाञ्छ्रेयानात्मना प्रजया पशुभिर्गृहैर्ध्वनेन स्यादिति। तस्यैवं निर्वपेत्तस्यैवं निरुप्यैवमेवानु निर्वपेत्। तवैव स वसीयाञ्छ्रेया नात्मना प्रजया पशुभिर्गृहैर्ध्वनेन भवतीदमिदं कुर्यात्सा प्रायश्चित्तिः।। 16 - 120

卐16.120.1 यदवहन्यमानस्य तण्डुलस्कन्दति समामस्य वर४ प्रमायुषो भवति।। 1।।

卐16.120.2 यदयस्ता भवति पितृदेवत्यं करोति।। 2।।

卐16.120.3 यद्विष्यन्दते गृहाणाञ्च पशूनाञ्च पयो वि ष्यन्दते।। 3।।

卐16.120.4 यदुपसिञ्चति गृहाणाञ्च पशूनाञ्च पयोपसिञ्चति।। 4।।

卐16.120.5 यदायवनं शीर्यते गृहपतिर्म्रियते।। 5।।

卐16.120.6 यद्दर्वी शीर्यते गृहपत्नी म्रियते।। 6।।

卐16.120.7 यत्कुम्भी विषमिता सर्वज्यानिर्दाता च प्रतिगृहीता च जीयेते।। 7।। 16 - 121

卐16.121.1 यत्प्राञ्चमुद्वर्त्तयति यज्ञाय च देवेभ्यश्चावृश्चते।। 1।।

卐16.121.2 यद्दक्षिणाञ्च मुद्वर्त्तयति यमाय च पितृभ्यश्चावृश्चते।। 2।।

卐16.121.3 यत्प्रत्यञ्च मुद्वर्त्तयति वरुणायाप्सुषदाया वृश्चते।। 3।।

卐16.121.4 यदुदञ्च मुद्वर्त्तयति सोमाय च राज्ञे सप्तर्षिभ्यश्चा वृश्चते।। 4।।

卐16.121.5 यदनुद्धृतमुद्धरति दिशो दिशो वैनं भय मागच्छति।। 5।। 16 - 122

卐16.122.1 यत्प्राचीनं वर्हिं स्स्तृणाति यज्ञाय च देवेभ्यश्चा वृश्चते।। 1।।

卐16.122.2 यद्दक्षिणाचीनं वर्हिं स्स्तृणाति यमाय च पितृभ्यश्चा वृश्चते।। 2।।

卐16.122.3 यत्प्रतीचीनं वर्हिं स्स्तृणात्य कृतपूर्वङ्करोति।। 3।।

卐16.122.4 यदुदीचीनं वर्हिं स्स्तृणाति सोमाय च राज्ञे सप्तर्षिभ्यश्चा वृश्चते।। 4।। 16 - 123

卐16.123.1 यत्पुरस्तात्पात्रस्य श्छिरङ्करोत्यर्षः प्रतिग्रहितुर्मखे जायते।। 1।।

卐16.123.2 यद्दक्षिणतः पात्रस्य श्छिरङ्करोति यमाय च पितृभ्यश्चा वृश्चते।। 2।।

卐16.123.3 यत्पश्चात्पात्रस्य श्छिर ङ्करोति प्रतीची प्रतिग्रहितारं शरव्यछितु।। 3।।

卐16.123.4 यदुत्तरतः पात्रस्य श्छिर ङ्करोति सोमाय च राज्ञे सप्तऋषिभ्यश्चा वृश्चते।। 4।। 16 - 124

卐16.124.1 यच्छुक्रो भवत्यादित्यानामेव प्रियं धामोपैति। स य श्शुक्रं प्राश्नीयादादित्यानां त्वा प्रियेण धाम्ना प्राश्नामीत्येनं प्राश्नीयात्। ततश्चैनमन्येन धाम्ना प्राश्नात्यादित्येभ्यश्चा वृश्चते।। 1।।

卐16.124.2 यत्फलीकृतो भवति विश्वेषामेव देवानां प्रियं धामोपयति। स यः फलीकृतं प्राश्नीयाद्विश्वेषां त्वा देवानां प्रियेण धाम्ना प्राश्नामीत्येनं प्राश्नीयात्। ततश्चैनमन्येन धाम्ना प्राश्नाति विश्वेभ्यो देवेभ्यावृश्चते।। 2।।

卐16.124.3 यद्फलीकृतो भवति मरुतामेव देवानां प्रियं धामोपैति। स यो फलीकृतं प्राश्नीयान्मरुतान्त्वा देवानां प्रियेण धाम्ना प्राश्नामीत्येनं प्राश्नीयात्। ततश्चैनमन्येन धाम्ना प्राश्नाति मरुद्ध्याऽवृश्चते।। 3।।

卐16.124.4 यद् वक्षामो भवत्यग्नेरेव देवानां प्रियं धामोपैति। स यद् वक्षाम प्राश्नीयादग्नेस्त्वा प्रियेण धाम्ना प्राश्नामीत्येनं प्राश्नीयात्। ततश्चैनमन्येन धाम्ना प्राश्नात्यग्नयाऽवृश्चते।। 4।।

卐16.124.5 यदनवक्षामो भवति मित्रावरुणयोरेव देवानां प्रियं धामोपैति। स यदनोवक्षामं प्राश्नीयान्मित्रावरुणयोस्त्वा प्रियेण धाम्ना प्राश्नामीत्येनं प्राश्नीयात्। ततश्चैनमन्येन धाम्ना प्राश्नामि मित्रावरुणाभ्यामावृश्चते।। 5।।

卐16.124.6 यत् क्लिन्नो भवतीन्द्रस्यैव देवानां प्रियं धामोपैति। स यत् क्लिन्न प्राश्नीयादीन्द्रस्य त्वा प्रियेण धाम्ना प्राश्नामीत्येनं प्राश्नीयात्। ततश्चैनमन्येन धाम्ना प्राश्नातीन्द्राया वृश्चते।। 6।।

卐16.124.7 यत् क्लिन्नो भवति पितृणामेव देवानां प्रियं धामोपैति। स यत् क्लिन्नं प्राश्नीयात्पितृणां त्वा प्रियेण धाम्ना प्राश्नामीत्येनं प्राश्नीयात्। ततश्चैनमन्येन धाम्ना प्राश्नाति पितृभ्याऽऽवृश्चते।। 7।।

卐16.124.8 यत् क्षुद्रो भवत्यपामेव देवानां प्रियं धामोपैति। स यत् क्षुद्रं प्राश्नीयादपां त्वा प्रियेण धाम्ना प्राश्नामीत्येनं प्राश्नीयात्। ततश्चैनमन्येन धाम्ना प्राश्नात्यपाभ्याऽऽवृश्चते।। 8।।

卐16.124.9 यच्छिद्रो भवति दिशामेव देवानां प्रियं धामोपैति स यत् छिद्रं प्राश्नियाद्दिशां त्वा प्रियेण धाम्ना प्राश्नामीत्येनं प्राश्नीयात्। ततश्चैनमन्येन धाम्ना प्राश्नाति दिग्भ्याऽऽवृश्चते।। 9।।

卐16.124.10 यद् गलन्ती भवति प्रजापतेरेव प्रियं धामोपैति। स यद् गलन्तीनं प्राश्निया प्रजापतेस्त्वा प्रियेण धाम्ना प्राश्नामीत्येनं प्राश्नीयात्। ततश्चैनमन्येन धाम्ना प्राश्नाति प्रजापतय आ वृश्चते।। 10।।

卐16.124.11 यच्छुष्को भवत्युर्ध्व नभस एव प्रियं धामोपैति। स यच्छुष्कं प्राश्नीयादूर्ध्वनभसस्त्वा प्रियेण धाम्ना प्राश्नामीत्येनं प्राश्नीयात्। ततश्चैनमन्येन धाम्ना प्राश्नात्यूर्ध्वनभस आ वृश्चते।। 11।। 16 - 125

卐16.125.1 यत्क्षीरमुपसिच्य प्रथमं प्राश्नाति किल सः प्रतिग्रहीता भवन्ति।। 1।।

卐16.125.2 यत्सर्पिरुपसिच्य प्रथमं प्राश्नाति शर्वः प्रतिग्रहितारं हन्ति।। 2।।

卐16.125.3 यन्मधूपसिच्य प्रथमं प्राश्नाति महादेवः प्रतिग्रहितारं हन्ति।। 3।।

卐16.125.4 यन्मांसमुपसिच्य प्रथमं प्राश्नातीशानः प्रति ग्रहितारं हन्ति।। 4।।

卐16.125.5 यदुदकमुपसिच्य प्रथमं प्राश्नाति तत्समृद्धम्। योग्जीवति सर्वमायुरेति न पुरा जरसः प्र मीयते य एवं वेद।। 5।। 16 - 126

卐16.126.1 यत्प्राशिष्यन् पुरस्तादभि मृशति। प्राङ् प्रतिग्रहीतुः प्राणः प्र क्रामति ततो एवोत्थाय प्र ब्रजति शिरस्तस्य रुदतीति द्वादशीर्नाथ जीवत्येनं चैनं प्राश्नन्तमुपद्रष्टा गृह्णामि।। 1।।

卐16.126.2 यत्प्राशिष्यन् दक्षिणतः प्रमृशति। दक्षिणा प्रतिग्रहीतुः प्राणः प्र क्रामति ततो दिवोत्थाय प्र ब्रजति शिरस्तस्य रुदतीति द्वादशीर्नाथ जीवत्येनं चैनं प्राश्नन्तमुपद्रष्टा गृह्णामि।। 2।।

卐16.126.3 यत्प्राशिष्यनुत्तरतः प्र मृशति। उदङ् प्रतिग्रहीतुः प्राणः प्र क्रामति तत एवोत्थाय प्र ब्रजति शिरस्तस्य रुदतीति द्वादशीर्नाथ जीवत्येनं चैनं प्राश्नन्तमुपद्रष्टा गृह्णामि।। 3।।

卐16.126.4 यत्प्राशिष्यन्पश्चात् प्राञ्चमभिमृशति। शर्मणा चैवैनं तद्वर्मणा चाभिमृशति शर्म चैवास्मै वर्म च भवति जयत्योदन मोदन लोक भवति य एवं वेद।। 4।। 16 - 127

卐16.127.1 इन्द्रस्यौज स्थेन्द्रस्य सह स्थेन्द्रस्य बलं स्थेन्द्रस्य नृम्णं स्थेन्द्रस्य शुक्रं स्थेन्द्रस्य वीर्यं स्थ। जिष्णवे योगायेन्द्र योगैर्वो युनज्मि जिष्णवे योगाय विश्वानि मा रूपाण्युप तिष्ठन्तु युक्ता माप स्स्थ।। 1।।

卐16.127.2 इन्द्रस्यौज स्थेन्द्रस्य सह स्थेन्द्रस्य बलं स्थेन्द्रस्य नृम्णं स्थेन्द्रस्य शुक्रं स्थेन्द्रस्य वीर्यं स्थ। जिष्णवे योगाय क्षत्र योगैर्वः युनज्मि जिष्णवे योगाय विश्वानि मा रूपाण्युप तिष्ठन्तु युक्ता मापस्स्थ।। 2।।

卐16.127.3 इन्द्रस्यौज स्थेन्द्रस्य सह स्थेन्द्रस्य बलं स्थेन्द्रस्य नृम्णं स्थेन्द्रस्य शुक्रं स्थेन्द्रस्य वीर्यं स्थ। जिष्णवे योगाय ब्रह्म योगैर्वः युनज्मि जिष्णवे योगाय विश्वानि मा रूपाण्युप तिष्ठन्तु युक्ता मापस्स्थ।। 3।।

卐16.127.4 इन्द्रस्यौज स्थेन्द्रस्य सह स्थेन्द्रस्य बलं स्थेन्द्रस्य नृम्णं स्थेन्द्रस्य शुक्रं स्थेन्द्रस्य वीर्यं स्थ। जिष्णवे योगायान्न योगैर्वः युनज्मि जिष्णवे योगाय विश्वानि मा रूपाण्युप तिष्ठन्तु युक्ता मापस्स्थ।। 4।।

卐16.127.5 इन्द्रस्यौज स्थेन्द्रस्य सह स्थेन्द्रस्य बलं स्थेन्द्रस्य नृम्णं स्थेन्द्रस्य शुक्रं स्थेन्द्रस्य वीर्यं स्थ। जिष्णवे योगायापां योगैर्वो युनज्मि जिष्णवे योगाय विश्वानि मा रूपाण्युप तिष्ठन्तु युक्ता मापस्स्थ।। 5।। 16 - 128

卐16.128.1 अग्नेर्भागस्स्थ। अपां शुक्रं देवीरापो वर्चो अस्मासु धत्त। प्रजापतेर्वो धाम्नाऽस्मै लोकाय सादये।। 1।।

卐16.128.2 इन्द्रस्य भागस्स्थ। अपां शुक्रं देवीरापो वर्चोऽस्मासु धत्त। प्रजापतेर्वो धाम्नाऽस्मै लोकाय सादये।। 2।।

卐16.128.3 सोमस्य भागस्स्थ। अपां शुक्रन्देवीरापो वर्चो अस्मासु धत्त। प्रजापतेर्वो धाम्नाऽस्मै लोकाय सादये।। 3।।

卐16.128.4 वरुणस्य भागस्स्थ। अपां शुक्रन्देवीरापो वर्चोऽस्मासु धत्त। प्रजापतेर्वो धाम्नाऽस्मै लोकाय सादये।। 4।।

卐16.128.5 यमस्य भागस्स्थ। अपां शुक्रन्देवीरापो वर्चोऽस्मासु धत्त। प्रजापतेर्वो धाम्नाऽस्मै लोकाय सादये।। 5।।

Sri Ganapati Sachchidananda Avadhoota Dattapeetham

卐16.128.6 पितृणां भागस्स्थ। अपां शुक्रन्देवीरापो वर्चो अस्मासु धत्त। प्रजापतेर्वो धाम्नाऽस्मै लोकाय सादये।। 6।।

卐16.128.7 वृहस्पतेर्भाग स्स्थ। अपां शुक्रन्देवीरापो वर्चो अस्मासु धत्त। प्रजापतेर्वो धाम्नाऽस्मै लोकाय सादये।। 7।।

卐16.128.8 देवस्य सवितुर्भागस्स्थ। अपां शुक्रं देवीरापो वर्चो अस्मासु धत्त। प्रजापतेर्वो धाम्नाऽस्मै लोकाय सादये।। 8।। 16 - 129

卐16.129.1 यो व आपोऽपां भागोऽप्स्वन्त र्यजुष्यो देवयजनः। इदन्तमति सृजामि तं माभ्यवनिक्षि। तेन तमभ्यति सृजामि योऽस्मान्द्वेष्टि यं वयं द्विष्मः। तं वधेयन्तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या।। 1।।

卐16.129.2 यो व आपो अपां भूमिरप्स्वन्त र्यजुष्यो देवयजनः। इदन्तमति सृजामि तं माभ्यवनिक्षि। तेन तमभ्यति सृजामि योऽस्मान् द्वेष्टि यं वयं द्विष्मः। तं वधेयन्तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या।। 2।।

卐16.129.3 यो व आपो अपां वेगोऽप्स्वन्तर्यजुष्यो देवयजनः। इदन्तमति सृजामि तं माभ्यवनिक्षि। तेन तमभ्यति सृजामि योऽस्मान् द्वेष्टि यं वयं द्विष्मः। तं वधेयन्तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या।। 3।।

卐16.129.4 यो व आपो अपां विन्दुरप्स्वन्त र्यजुष्यो देवयजनः। इदन्तमति सृजामि तं माभ्यवनिक्षि। तेन तमभ्यति सृजामि योऽस्मान् द्वेष्टि यं वयं द्विष्मः। तं वधेयन्तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या।। 4।।

卐16.129.5 यो व आपो अपां गर्भोऽप्स्वन्त र्यजुष्यो देवयजनः। इदन्तमति सृजामि तं माभ्यवनिक्षि। तेन तमभ्यति सृजामि योऽस्मान् द्वेष्टि यं वयं द्विष्मः। तं वधेयन्तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या।। 5।।

卐16.129.6 यो व आपो अपां वत्सोऽप्स्वन्त र्यजुष्यो देवयजनः। इदन्तमति सृजामि तं माभ्यवनिक्षि। तेन तमभ्यति सृजामि योऽस्मान् द्वेष्टि यं वयं द्विष्मः। तं वधेयन्तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या।। 6।।

卐16.129.7 यो व आपोऽपोपां वृषभो अप्स्वन्त र्यजुष्यो देवयजनः। इदन्तमति सृजामि तं माभ्यवनिक्षि। तेन तमभ्यति सृजामि योऽस्मान् द्वेष्टि यं वयं द्विष्मः। तं वधेयन्तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या।। 7।।

卐16.129.8 यो व आपो अश्मा पृश्निर्दिव्योऽप्स्वन्त र्यजुष्यो देवयजनः। इदन्तमति सृजामि तं माभ्यवनिक्षि। तेन तमभ्यति सृजामि योऽस्मान् द्वेष्टि यं वयं द्विष्मः। वधेयन्तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या।। 8।।

卐16.129.9 यो व आपो हिरण्यगर्भोऽप्स्वन्त र्यजुष्यो देवयजनः। इदन्तमति सृजामि तं माभ्यवनिक्षि। तेन तमभ्यति सृजामि योऽस्मान् द्वेष्टि यं वयं द्विष्मः। तं वधेयन्तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या।। 9।।

卐16.129.10 यो व आपोऽग्नयोऽप्स्वन्त र्यजुष्या देवयजनाः। इदन्तमति सृजामि तां माभ्यवनिक्ष। तैस्ततमभ्यति सृजामि योऽस्मान् द्वेष्टि यं वयं द्विष्मः। तं वधेयन्तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या।। 10।। 16 - 130

卐16.130.1 यदर्वाचीनमेक हायनादनृतं किं चोदिम। आपो मा तस्मादेनसो दुरितात्पान्तु विश्वतः।। 1।।

卐16.130.2 अरिप्रा आपो अपरिप्रमस्मत्। प्रास्मदेनो दुरितं सुप्रतीकाः प्रदुःष्वप्न्यं प्र मलं बहन्तु।। 2।।

卐16.130.3 समुद्रं वोप सृजामि स्वां योनिमपीतन। अरिष्टा स्सर्वाहायसो मा च नः किं च नाममत्।। 3।। 16 - 131

卐16.131.1 विष्णोः क्रमोऽसि सपत्नहा पृथिवी संशितोऽग्नि तेजाः। पृथिवीमनु वि क्रमेऽहं पृथिव्या स्तन्निर्भजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः।। 1।।

卐16.131.2 पूर्वजा न्सपत्नानवैनान्वाधे अत्येना प्राक्रामान्वपाङ्गनुपत्त स्सपत्नः।। 2।।

卐16.131.3 विष्णोः क्रमोऽसि सपत्नहाऽन्तरिक्ष संशितो वायु तेजाः। अन्तरिक्षमनु वि क्रमेऽहमन्तरिक्षात्तं निर्भजामो योस्मान् द्वेष्टि यं वयं द्विष्मः।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐16.131.4 सहजान्सपत्नानवैनान्वाधे अत्येनाप्राक्रामा न्वपाङ्गनुपत्त स्सपत्नः। विष्णोः क्रमोऽसि सपत्नहा द्यौसंशित स्सूर्य तेजाः। दिवमनु विक्रमेऽहं दिवस्तं निर्भजामो योऽस्मान्द्वेष्टि यं वयं द्विष्मः।। 4।।

卐16.131.5 अपरजान् सपत्नानवैनान्वाधे अत्येनाप्राक्रामा न्वपाङ्गनुपत्तः सपत्नः। विष्णोः क्रमोऽसि सपत्नहा दिक् संशितो वाततेजाः। दिशो अनु वि क्रमेऽहं दिग्भ्यस्त न्निर्भजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः।। 5।।

卐16.131.6 विष्णोः क्रमोऽसि सपत्नहा शासंशितो मनस्तेजाः। आशाऽनु वि क्रमेऽहमाशाभ्यस्त न्निर्भजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः।। 6।।

卐16.131.7 विष्णोः क्रमोऽसि सपत्नहाप्संशितो वरुण तेजाः। आपोऽनु वि क्रमेऽहमद्भ्यस्त न्निर्भजामो योऽस्मान द्वेष्टि यं वयं द्विष्मः।। 7।।

卐16.131.8 विष्णोः क्रमोऽसि सपत्नहा ऋक्संशित स्साम तेजाः। ऋचो अनु वि क्रमेऽहमृग्भ्यस्तं निर्भजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः।। 8।।

卐16.131.9 विष्णोः क्रमोऽसि सपत्नहा यज्ञ स्संशितो ब्रह्म तेजाः। यज्ञमनु वि क्रमेऽहं यज्ञात्तन्निर्भजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः।। 9।।

卐16.131.10 विष्णोः क्रमोऽसि सपत्नहौषधी संशित स्सोम तेजाः। ओषधीरनु वि क्रमेऽह मोषधिभ्यस्त न्निर्भजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः।। 10।।

卐16.131.11 विष्णोः क्रमोऽसि सपत्नहा कृषिसंशितः पुरुष तेजाः। कृषिमनु वि क्रमेऽहं कृष्यास्तन्निर्भजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः।। 11।।

卐16.131.12 विष्णोः क्रमोऽसि सपत्नहा प्राण संशितोऽन्न तेजाः। प्राणमनु वि क्रमेऽहं प्राणात्तन्निर्भजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः।। 12।। 16 - 132

卐16.132.1 अगमन्स्वरगमन् ज्योतिरभ्यष्ठां विश्वाः पृतनाऽरातीः। योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तस्येदं प्राणमायुर्नि वेष्टयामीदमेन मधमन्तमो गमयामसि।। 1।।

卐16.132.2 सूर्यस्यावर्त मन्वावर्त्ते दक्षिणामन्वावृतम्। सा मे द्रविणं यच्छतु सा मे ब्राह्मण वर्चसम्।। 2।।

卐16.132.3 दिशो ज्योतिष्मतीरभि पर्यावर्ते। ता मे द्रविणं यच्छन्तु ता मे ब्राह्मणवर्चसम्।। 3।।

卐16.132.4 सप्तऋषीनभि पर्यावर्ते। ता मे द्रविणं यच्छन्तु ता मे ब्राह्मणवर्चसम्।। 4।।

卐16.132.5 ब्रह्माभि पर्यावर्ते। ता मे द्रविणं यच्छन्तु ता मे ब्राह्मणवर्चसम्।। 5।।

卐16.132.6 ब्राह्मणानभि पर्यावर्ते। ते मे द्रविणं यच्छन्तु ते मे ब्राह्मण वर्चसम्।। 6।।

卐16.132.7 यत्ते अन्नं भूवस्पत आक्षियेत पृथिवीमनु। तस्यनस्त्वं भूवस्पते संप्रयच्छ प्रजापते।। 7।।

卐16.132.8 यं वयं मृगयामहे तं वधै स्स्तृणवामहै। व्यात्ते परमेष्ठीनो ब्रह्मणापीपदाम तम्।। 8।।

卐16.132.9 वैश्वानरस्य दंष्ट्राभ्यां मृत्युस्तं समधादभि। इयन्तं पत्वाहुति स्समिद्देवी सहीयसी।। 9।।

卐16.132.10 राज्ञो वरुणस्य बन्धोसि सोऽमुमामुष्यायण ममुष्याः पुत्र मन्ने प्राणे बधान। अपामस्मै वज्रं प्र हरामि चतुर्भृष्टिं शीर्षभिद्याय विद्वान्।। 10।।

卐16.132.11 सोऽस्य पर्वाणि प्र श्रृणातु सर्वा तन्मे देवाह्यनु जानन्तु विश्वे। यदग्ने तपसा तप उप प्रेक्षामहे वयम्। प्रिया श्श्रुतस्य भूयाश्चायुष्मन्त स्सुमेधसः।। 11।। 16 - 133

卐16.133.1 विराड्वा इदमग्रे ऽजायत तस्या जातायाऽबिभेत् सर्वम्। इयमेवेदं भविष्यति न वयमिति।। 1।।

卐16.133.2 सोदक्रामत्सा दक्षिणाग्नौ न्यक्रामत्। यज्ञर्त्तो वासतेयो भवति य एवं वेद।। 2।।

卐16.133.3 सोदक्रामत् सा गार्हपत्ये न्यक्रामत्। गृहमेधि गृहपतिर्भवति य एवं वेद।। 3।।

卐16.133.4 सोदक्रामत् साहवनीये न्यक्रामत्। यन्त्यस्य देवा देवहुतिं प्रियो देवानां भवति य एवं वेद।। 4।।

卐16.133.5 सोदक्रामत् सा सभायां न्यक्रामत्। अस्य सभां सभ्यो भवति य एवं वेद।। 5।।

卐16.133.6 सोदक्रामत्सा समितौ न्यक्रामत्। अस्य समितिं सामित्यो भवति य एवं वेद।। 6।।

卐16.133.7 सोदक्रामत्सा मन्त्रणे न्यक्रामत्। यन्त्यस्या मन्त्रणामामन्त्रणीयो भवति य एवं वेद।। 7।।

卐16.133.8 सोदक्रामत् सान्तरिक्षे चतुर्धा विक्रान्ता तिष्ठत्तां देवमनुष्या अब्रुवन्नियं तद्वेद यदुभय उपजीवेम मामुपह्वया महा इति तामुपाह्वयन्त। ऊर्जैहि स्वधैहि सुनृतै हीरावत्यैहीति।। 8।।

卐16.133.9 तस्याऽग्निर्वत्स आसीद्गायत्र्य विधान्यभ्रमूधः। तस्या वृहच्चरथन्तरञ्च द्वौस्तनावास्तां यज्ञायज्ञियञ्च वामदेव्यं च द्वौ।। 9।।

卐16.133.10 ओषधीरेव रथन्तरन्देवा अदुहन्व्यचो वृहदपो वामदेव्यं यज्ञं यज्ञायज्ञियम्। ये ते वै विराजः कामधुगास्तनाः। कामङ्कामं विराजः दुहे य एवं वेद।। 10।। 16 - 134

卐16.134.1 सोदक्रामत् सा वनस्पतीनागच्छत्तां वनस्पतयोऽघ्नत सा संवत्सरे समभवत्। तस्मात्संवत्सरे वनस्पतीनां वृक्णमपि रोहति वृश्चतेऽस्या प्रियो भ्रातृव्यो य एवं वेद।। 1।।

卐16.134.2 सोदक्रामत्सा पितॄनागच्छत्तां पितरोऽघ्नत सा मासि समभवत्। तस्मान्मासि पितृभ्यो ददाति स्वधावान् पितृषु भवति प्र पितृयाणं पन्थां जानाति य एवं वेद।। 2।।

卐16.134.3 सोदक्रामत् सा देवानागच्छत्तां देवाघ्नत सार्धमासे समभवत्। तस्मादर्धमासि देवेभ्यो जुहोति जुहोत्यग्निहोत्रं प्र देवयानं पन्थाञ्जानाति य एवं वेद।। 3।।

卐16.134.4 सोदक्रामत्सा मनुष्यानागच्छत्तां मनुष्याघ्नत सा सद्य स्समभवत्। तस्मादुभय द्युर्मनुष्याणा मुपहरन्त्युपास्य गृहे हरन्ति य एवं वेद।। 4।। 16 - 135

卐16.135.1 सोदक्रामत् सासुरा नागच्छत्तामसुरा उपाह्वयन्तमाय एहीति। तस्या विरोचनःप्राह्लादिर्वत्स आसीदयस्पात्रं पात्रम्। तां द्विमूर्धात्व्र्योऽधोक्तां मायामधोक्। तां मायामसुरा उपजीवन्त्युप जीवनीयो भवति य एवं वेद।। 1।।

卐16.135.2 सोदक्रामत्सा पितॄनागच्छत्तां पितर उपाह्वयन्त स्वधा एहीति। तस्य यमो वैवस्वतो वत्साऽसीद्रजत पात्रंपात्रम्। तामन्तको मार्त्यवोऽधोक्तां स्वधामधोक्। तां स्वधां पितर उपजीवन्त्युपजीवनीयो भवति य एवं वेद।। 2।।

卐16.135.3 सोदक्रामत् सा मनुष्यान् आगच्छत्तां मनुष्या उपाह्वयन्तेरावत्यहीति। तस्यामनुर्वैवस्वतो वत्स आसीत् पृथिवी पात्रंपात्रम्। तां पृथिवैन्योऽधोक्तां कृषिञ्च सस्यञ्चाधोक्। ता कृषिञ्च सस्यञ्च मनुष्या उपजीवन्त्युप जीवनीयो भवति य एवं वेद।। 3।।

卐16.135.4 सोदक्रामत्सा देवानागच्छत्तां देवा उपाह्वयन्तोर्ज एहीति। तस्या इन्द्रो वत्स आसीद्दारु पात्रंपात्रम्। तां सविता अधोक्तामूर्जामधोक्। तामूर्जान्देवा उपजीवन्त्यु पजीवनीयो भवति य एवं वेद।। 4।।

卐16.135.5 सोदक्रामत्सा सप्तर्षीनागछत्तां सप्तर्षय उपाह्वयन्त ब्रह्मण्वत्येहीति। तस्या स्सोमो वत्स आसीच्छन्दः पात्रं पात्रम्। तां बृहस्पतिराङ्गिरसोऽधोक्तां ब्रह्म च तपश्चाधोक्। तद्ब्रह्म च तपश्च सप्तर्षय उपजीवन्त्युपजीवनीयो भवति य एवं वेद।। 5।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham • Mysore

卐16.135.6 सोदक्रामत् सा गन्धर्वाप्सरस आगच्छत्तां गन्धर्वाप्सरस उपाह्वयन्त पुण्यगन्ध एहीति। तस्या चित्ररथ स्सौर्यवर्चसो वत्स आसीत्पुष्करपर्णं पात्रंपात्रम्। तां वसुरुचि स्सैर्य वर्चसोऽधोक्तां पुण्य गन्धमधोक्। तं पुण्यङ्गन्धं गन्धर्वाप्सरस उपजीवन्त्यु पजीवनीयो भवति य एवं वेद।। 6।।

卐16.135.7 सोदक्रामत् सा पुण्यजनानागच्छत्तां पुण्यजना उपाह्वयन्ति तिरोध एहीति। तस्याः कुवेरो वैश्रवणो वत्सासीदारु पात्रंपात्रम्। तां रजतनाभिः कावेरकोऽधक्तां तिरोधामधोक्। तां तिरोधां पुण्यजना उपजीवन्त्युपजीवनीयो भवति य एवं वेद।। 7।।

卐16.135.8 सोदक्रामत्सा सर्पानागच्छत्तां सर्पा उपह्वयन्त विषवत्येहीति। तस्यास्तक्षको वैशालेयो वत्स आसीदलाबु पात्रं पात्रम्। तं धृतराष्ट्र ऐरावतोऽधोक्तां विषमधोक्। तद्विषं सर्पा उपजीवन्त्युपजीवनीयो भवति य एवं वेद।। 8।।

卐16.135.9 तस्माद्यस्या अलाबुनाभिषिञ्चेन्मनसा त्वा प्रत्याहन्मीत्येनं प्रत्याहन्यात्। यत्प्रत्याहन्ति विषं प्रत्याहन्ति न च प्रत्याहन्ति विषमनुप्रसिच्यते। विषमस्या प्रियं भ्रातृव्यं हन्ति य एवं वेद।। 9।

इति (क्षुद्रकाण्डे)षोडशकाण्डे उनविंशोऽनुवाकः। । 16 - 136

卐16.136.1 अघायतामपि नह्या मुखानि सपत्नेषु वज्रमर्पयैतम्। इन्द्रेण दत्ता प्रथमाशतौदना भ्रातृव्यघ्नी यजमानाय गातुः।। 1।।

卐16.136.2 वेदिष्टे चर्म भवतु बर्हिर्लोमानि यानि ते। एषा त्वा रशनाग्रहीद्ग्रावा तै षोऽधि नृत्यतु।। 2।।

卐16.136.3 बालास्ते प्रक्षणी स्सन्तु जिह्वा सम्मार्ष्ट्वघ्न्ये। शुद्धा त्वं यज्ञिया भूत्वा दिवं प्रेहि शतौदने।। 3।।

卐16.136.4 य श्शतौदनां पचति काम प्रेण स कल्पते। प्रिता ह्यस्य ऋत्विजस्सर्वे यान्तु यथा यथम्।। 4।।

卐16.136.5 ये ते देवि समितारः प्रक्तारो ये च ते जनाः। ते त्वा सर्वे गोप्स्यन्ति मैभ्यो भैषी श्शतौदने।। 5।।

卐16.136.6 स स्वर्गमारोहति यत्राद स्त्रिदिवन्दिवः। हिरण्यज्योतिषं कृत्वा यो ददाति शतौदनाम्।। 6।।

Srimatpati Sachchidananda Avadhoota Datta Peetam • Mysore •

卐16.136.7 स तांल्लोकान् समाप्नोति येषु देवास्समासते। अपूपनाभिं कृत्वा यो ददाति शतौदनाम्।। 7।।

卐16.136.8 वसवस्त्वा दक्षिणत उत्तरान्मरुतस्त्वा। आदित्याः पश्चाद् गोप्स्यन्ति साग्निष्टोममति द्रव।। 8।।

卐16.136.9 गन्धर्वाप्सरसो देवा रुद्राङ्गिरसस्त्वा। ते त्वा सर्वे गोप्स्यन्ति सातिरात्रमति द्रव।। 9।।

卐16.136.10 अन्तरिक्षन्दिवं भूमि मादित्यान्मरुतो दिशः। लोकान् सर्वानाप्नोति यो ददाति शतौदनाम्।। 10।। 16 - 137

卐16.137.1 घृतं पोक्षन्ती सुभगा देवान्देवी गमिष्यति। पक्तारमघ्न्ये मा हिंसीर्दिवं प्रेहि शतौदने।। 1।।

卐16.137.2 ये पितरो दिविषदोऽन्तरिक्षसदश्च ये ये चेमे भूम्यामधि। तेभ्यस्त्वन्धुक्ष्व सर्वदा क्षीरं सर्पीरथो मधु।। 2।।

卐16.137.3 यत्ते शिरो ये च शृङ्गे यौ कर्णौ यौ च ते अक्षौ। आमिक्षान्दुहतां दात्रे क्षीरं सर्पीरथो मधु।। 3।।

卐16.137.4 यत्ते मुखं या जिह्वा ये दन्ता ये च ते हनू। आमिक्षान्दुहतां दात्रे क्षीरं सर्पीरथो मधु।। 4।।

卐16.137.5 यत्ते क्लोमा यद्धृदयं पुरीतत्सहकण्ठिका। आमिक्षान्दुहतां दात्रे क्षीरं सर्पीरथो मधु।। 5।।

卐16.137.6 यत्ते यकृद्ये मतस्ने आन्त्राणि याश्च ते गुदाः। आमिक्षान्दुहतां दात्रे क्षीरं सर्पीरथो मधु।। 6।।

卐16.137.7 यस्ते प्लाशिर्योवनिष्ठुर्यौ कुक्षी यच्च उदरम्। आमिक्षां दुहतां दात्रे क्षीरं सर्पीरथो मधु।। 7।।

卐16.137.8 यत्ते मज्जायान्यस्थीनि यन्मांसं यच्च लोहितम्। आमिक्षां दुहतां दात्रे क्षीरं सर्पीरथो मधु।। 8।।

卐16.137.9 यौ ते बाहू यौ ते अंसौ ये दोषणी या च ते ककुत्। आमिक्षान्दुहतां दात्रे क्षीरं सर्पीरथो मधु।। 9।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐16.137.10 ये ते स्कन्धा या ग्रीवा या॰ पृष्ठीर्याश्च पर्शवः। आमिक्षान्दुह्रतां दात्रे क्षीरं सर्पीरथो मधु।। 10।। 16 - 138

卐16.138.1 यौ त उरू अष्ठीवन्तौ ये श्रोणी या च ते भसत्। आमिक्षान्दुह्रतां दात्रे क्षीरं सर्पीरथो मधु।। 1।।

卐16.138.2 यत्ते पुच्छं ये बाला यदूधो ये च ते स्तनाः। आमिक्षान्दुह्रतां दात्रे क्षीरं सर्पीरथो मधु।। 2।।

卐16.138.3 यास्ते जङ्घा या॰ कुष्ठिका ऋच्छरा ये च ते शफा। आमिक्षान्दुह्रतां दात्रे क्षीरं सर्पीरथो मधु।। 3।।

卐16.138.4 यत्ते चर्म शतौदने यानि लोमान्यघ्न्ये। आमिक्षान्दुह्रतां दात्रे क्षीरं सर्पीरथो मधु।। 4।।

卐16.138.5 अयन्ते स्तनाऽऽमिक्षामयं सर्पीरथो मधु। अयन्ते सर्वकान्दुहा न्देवि शतौदने।। 5।।

卐16.138.6 क्रोडौ ते स्तां पुरोडाशा वाज्येनाभि घारितौ। तौ पक्षौ देवि कृत्वा सा दातारन्दिवं वह।। 6।।

卐16.138.7 उलूखले मुषले यश्च चर्मणि यो वा शूर्पेतण्डुला॰ कणाः। यद्वा वातो मातरिश्वा ममाथाग्निष्टद्धोता सुहुतं कृणोतु।। 7।।

卐16.138.8 अपो देविर्मधुमती र्घृतश्चुतो ब्रह्मणां हस्तेषु प्रपृथक् सादयामि। यत्काम इदमभि षिञ्चामि वोऽहं तन्नोऽस्तु वयं स्याम पतयो रयीणाम्।। 8।। 16- 139

卐16.139.1 प्रजापतिश्च परमेष्ठी च शृङ्गे इद्रश्शिरो अग्निर्ललाटं यम॰ कृकाटं सोमोराजा मस्तिस्कः। सत्यं चक्षुर्ऋतं श्रोत्रे प्राणापानौ नासिके द्यौरुत्तरहनु॰ पृथिव्यधर।। 1।।

卐16.139.2 अग्निरास्यं विद्युज्जिह्वा मरुतो दन्ता॰ पवमान॰ प्राणः। विश्वं वायु॰ कण्ठ स्स्वर्गो लोक॰ कृष्णद्रं विधरणी निवेष्यः।। 2।।

卐16.139.3 रेवती ग्रीवाः कृत्तिकास्कन्धा घर्मो वहः श्येनः क्रोडो अन्तरिक्षं पाजस्यम्। मित्रश्च वऋणश्चांसौ त्वष्टा चार्यमा च दोषणी।। 3।।

卐16.139.4 महादेवो बाहू बृहस्पति॰ कुकुद्बृहती॰ कीकसाः। देवानां पत्नी॰ पृष्टय उपसद॰ पर्शवः।। 4।।

卐16.139.5 इन्द्राणी भसद्वात॰ पृच्छं पवमानो बालाः। ब्रह्म च क्षत्रञ्च श्रोणी बलमुरू धाता च सविता चाष्ठीवन्तौ।। 5।।

卐16.139.6 जङ्घा गन्धर्वाप्सरस॰ कुष्ठिका अदिति श्शफाः। चेतो हृदयं यकृन्मेधा हरिमापित्तं व्रत्तं पुरीतत्।। 6।।

卐16.139.7 क्षुत्कुक्षिरिरा वनिष्ठु॰ पर्वताप्लाशि दैवजना गुदा मनुष्या आन्त्राण्यत्रा उदरमितरजना ऊबध्यं रक्षांसि लोहितम्।। 7।।

卐16.139.8 क्रोधो वृक्कौ मन्युराण्डौ प्रजा शेपः। समुद्रो वस्तिर्नदी सूत्री स्तनइत्नुरुधो वर्षस्य पतय स्तनाः।। 8।।

卐16.139.9 विश्वव्यचाश्चर्मौषधयो लोमानि नक्षत्राणि रूपम्। अभ्रं पिवो मज्जा निधनम्। निधनं भूत्वा प्रजाया॰ पशूनां भवति य एवं वेद।। 9।।

卐16.139.10 इन्द्र॰ प्राङ् तिष्ठन्दक्षिणा तिष्ठन्यमः प्रत्यङ्ङिष्ठन्धातोदङ् तिष्ठन् सविता। तृणानि प्राप्त॰ सोमोराजा आवृत्त आनन्दः।। 10।।

卐16.139.11 इक्षमाणो मित्रो युज्यमानो वैश्वदेवो युक्त॰ प्रजापतिर्विमुक्त स्सर्वमेतद्वै गोरूपम्। उपैनं रूपवन्त॰ पशवस्तिष्ठन्ति य एवं वेद।। 11। । इति (क्षुद्रकाण्डे) षोडषकाण्डे विंशति अनुवाकः। । 16- 140

卐16.140.1 श्रमेण तपसा सृष्टा ब्रह्मणा वित्तर्ते श्रिता।। 1।।

卐16.140.2 सत्येनावृता श्रिया प्रावृता यशसा परिवृता।। 2।।

卐16.140.3 स्वधया परिहिता श्रद्धया पर्युढा दीक्षया। गुप्ता यज्ञे प्रतिष्ठिता लोको निधनम्।। 3।।

卐16.140.4 छन्दांसि रूपमङ्गिरस स्सन्तापा। ब्रह्म पदवायं ब्राह्मणोऽधिपतिः।। 4।।

卐16.140.5 तामाददानस्य ब्रह्मगवीं जिनतो ब्राह्मणं क्षत्रियस्य।। 5।।

卐16.140.6 अप क्रामति सूनृता वीर्यं पुण्या लक्ष्मीः।। 6।। 16 - 141

卐16.141.1 ओजश्च तेजश्च सहश्च बलञ्च।। 1।।

卐16.141.2 वाक् चेन्द्रियञ्च श्रीश्च धर्मश्च।। 2।।

卐16.141.3 ब्रह्म च क्षत्रञ्च राष्ट्रञ्च विशश्च।। 3।।

卐16.141.4 त्विषिश्च यशश्च वर्चश्च द्रविणञ्च।। 4।।

卐16.141.5 आयुश्च रूपञ्च नाम च कीर्त्तिश्च।। 5।।

卐16.141.6 पयश्च रसश्चान्नञ्चान्नाद्यञ्च।। 6।।

卐16.141.7 प्राणश्चापानश्च चक्षुश्च श्रोत्रञ्च।। 7।।

卐16.141.8 ऋतञ्च सत्यञ्चेष्टञ्च पूर्तञ्च प्रजा च पशवश्च।। 8।।

卐16.141.9 तानि सर्वाण्यपक्रामन्ति क्षत्रियस्य ब्रह्मगवीमा ददानस्य।। 9।। 16- 142

卐16.142.1 सैषा भीमा ब्रह्मगव्यघविषा साक्षात्कृत्या कुल्बजमावृता। सर्वाण्यस्यां क्रुराणि सर्वे च मृत्यवः।। 1।।

卐16.142.2 सर्वाण्यस्यां घोराणि सर्वे पुरुषवधाः। सा ब्रह्मज्यं ब्रह्मगव्या दीयमाना मृत्योꣳ पड्विष आद्यति।। 2।।

卐16.142.3 मेनि श्शतवधा हि सा ब्रह्मज्यस्य क्षितिर्हि सा। तस्माद्वै ब्रह्मणानां गौर्दुराधर्षा विजानता।। 3।।

卐16.142.4 वैश्वानर उद्वीथा महादेवो पेक्षमाणा वज्रो धावन्ति हेति स्सफानुत्खिदन्ती। क्षुरपविरीक्षमाणा मृतुर्हिङ् कृण्वन्ति। वाश्यमानाभि स्फूर्जन्ति ब्रह्मगवी ब्रह्मज्यम्।। 4।। 16- 143

卐16.143.1 उग्रो देवꣳ पुच्छं पर्यस्यन्ती सर्वज्यानि कर्णौ वरीवर्जयन्ती राजयक्ष्मो मेहन्ति मेनिर्दुह्यमाना शीर्षक्तिर्दुग्धा। सेदी रूपतिष्ठन्ति मिथो योधꣳ परामृष्टा शरव्या मुखेऽपि नह्यमान।। 1।।

卐16.143.2 ऋतिर्हन्यमाना गृध्रा हि ताघविषा निपतन्ती तमो निपतिता। अनुगच्छन्ती प्राणानुप दासयति ब्रह्मगवी ब्रह्मज्यस्य।। 2।। 16 - 144

卐16.144.1 वैरं विकृत्यमाना प्रौत्राद्यं विभाज्यमाना। देवहेतिर्हियमाणा मतिर्हिता निर्ऋति निहिता। पाप्माधि धीयमाना पारुष्यमवधीयमाना प्रयस्ता विहिता।। 1।।

卐16.144.2 घर्मꣳ परिधीयमाना वैश्वानरꣳ पर्याहिता विषं प्रयस्यन्ति तक्मा प्रयस्ता। मूलबर्हणी पर्या क्रीयमाणा क्षितिꣳ पर्या कृता।। 2।।

卐16.144.3 अघं पच्यमाना पराभूतिꣳ पक्का। सुगुद्ध्रियमाणाशी विष उद्धृता असंज्ञा गन्धेन।। 3।।

卐16.144.4 अभूति रूपह्रियमाणा पराभूतिरुपहृता। शर्वꣳ क्रुद्धꣳ पिश्यमाणा शिमिदा पिशिता।। 4।।

卐16.144.5 अवर्तिरश्यमाना वीकर्त्तोरशिता। अशिता लोकाच्छिनत्ति ब्रह्मगवी ब्रह्मज्य मस्माच्चा मुष्माच्च।। 5।। 16- 145

卐16.145.1 तस्या आहननं कृत्या मेनिराशासनं वलग उवध्यमस्वगता परिह्नुता। अग्निः क्रव्याद्भूत्वा ब्रह्मगवी ब्रह्मज्यं प्रविश्यात्ति। 1।।

卐16.145.2 सर्वास्याङ्गा मूलानि वृश्चति छिनत्त्वस्य पितृवन्धून् परा भावयति मातृवन्धून्। विवाहाञ्ज्ञातिन् सर्वानपि क्षापयति ब्रह्मगवी क्षत्रियस्या पुनर्दीयमाना।। 2।।

卐16.145.3 अवास्तु मे नम स्वगमप्रजसङ्करोत्य परापरणो भवति क्षीयते। य एवं विदुषो ब्रह्मणस्य क्षत्रियो गामादत्ते।। 3।।

卐16.145.4 क्षिप्रं वै तस्याहनने गृध्राः कुर्वत ऐलवम्। क्षिप्रं वै तस्या दहनं परिनृत्यन्ति केशिनी राघ्यानाः प्राणिनोरसि कुर्वाणाः पापमैलबम्।। 4।।

卐16.145.5 क्षिप्रं वै तस्य वास्तुषु गङ्गणङ्कुर्वते वृकाः।। 5।।

卐16.145.6 क्षिप्रं वै तस्य पृच्छन्ति यत्तदासीदिदं नु तत्।। 6।। 16- 146

卐16.146.1 छिन्ध्या छिन्ध्य प्र छिन्ध्यपि क्षापय क्षापय। आददान माङ्गिरसि ब्रह्मज्यमुप दासय।। 1।।

卐16.146.2 वैश्वदेवी ह्युच्यसे कृत्या कूल्बज मावृता। ओषन्ती समोषन्ती ब्रह्मणो वज्रः।। 2।।

卐16.146.3 क्षुरपविर्मृत्युर्भूत्वा वि धाव त्वम्। आ दत्से जिनतां वर्च इष्टञ्च पूर्त्तञ्चाशिषः।। 3।।

卐16.146.4 आदाय जीतं जीताय लोकेऽमुष्मिन् प्र यच्छति। अघ्न्ये पदवीर्भव ब्राह्मणस्याभिशस्त्या।। 4।।

卐16.146.5 मेनि श्शरव्या भवाघादघविषा भव। अघ्न्ये प्रशिरो जहि ब्रह्मज्यस्य कृतागसः।। 5।।

卐16.146.6 त्वया वृणक्त मृदितमग्निर्दहतु दुष्कृतन्दैव पीयुमराधसम्। वृश्च प्रवृश्च छिन्धि प्रछिन्धि कृन्त प्रकृन्त। पिंश प्र पिंशौष समोषो दह प्र दह। ब्रह्मज्यं देव्यघ्न्य आमूलादनु सन्दह।। 6।। 16- 147

卐16.147.1 यत्ते शीर्षणि दौर्भाग्यं शक्तं केशेषु निहितं ललाटे। अयन्तद् विश्वभेषजो ऽपामार्गोऽप लुम्पतु।। 1।।

卐16.147.2 यत्ते भ्रुवोर्दौर्भाग्यं कर्णयो रक्ष्णोर्हितम्। अयन्तद्विश्वभेषजो अपामार्गोऽप लुम्पतु।। 2।।

卐16.147.3 यत्ते मुखे नासिकायां दौर्भाग्यं वाच्योष्ठयोः। अयन्तद् विश्वभेषजोऽपामार्गोऽप लुम्पतु।। 3।।
卐16.147.4 यत्ते दत्सु दौर्भाग्यञ्जिह्वाया श्चुबुके हितम्। अयन्तद् विश्वभेषजोऽपामार्गोऽप लुम्पतु।। 4।।
卐16.147.5 यत्ते मनसि संकल्पे दौर्भाग्यं प्राण आहितम्। अयन्तद् विश्वभेषजोऽपामार्गोऽपलुम्पतु।। 5।।
卐16.147.6 यत्ते हन्वोर्दौर्भाग्यङ्कण्ठे क्लोमसु विष्ठितम्। अयन्तद्विश्व भेषजोऽपामार्गोऽप लुम्पतु।। 6।।
卐16.147.7 यत्ते स्कन्धेषु ग्रीवासु दौर्भाग्यं कीकसा स्वनूक्ये। अयन्तद्विश्व भेषजोऽपामार्गोऽप लुम्पतु।। 7।।
卐16.147.8 यत्ते दोष्णो दौर्भाग्यं असयोरुप पक्षयोः। अयन्तद्विश्वभेषजोऽपामार्गोऽप लुम्पतु।। 8।।
卐16.147.9 यत्ते बाह्वोर्दौर्भाग्यमरत्न्योः कल्मुषीरनु। अयन्तद्विश्वभेषजोऽपामार्गोऽप लुम्पतु।। 9।।
卐16.147.10 यत्ते हस्तयोर्दौर्भाग्यं पाण्यो रङ्गुलीरनु। अयन्तद्विश्वभेषजोऽपामार्गोऽप लुम्पतु।। 10।। 16- 148
卐16.148.1 यत्ते पृष्ठेषु दौर्भाग्यं जघने स्फिजोर्हितम्। अयन्तद्विश्व भेषजोऽपामार्गोऽप लुम्पतु।। 1।।
卐16.148.2 यत्ते उरसि दौर्भाग्यं पार्श्वयोस्तनयोर्हितम्। अयन्तद्विश्व भेषजोऽपामार्गोऽप लुम्पतु।। 2।।
卐16.148.3 यत्ते हृदये दौर्भाग्यन्नाभ्यां वक्षणा अनु। अयन्तद्विश्व भेषजोऽपामार्गोऽप लुम्पतु।। 3।।
卐16.148.4 यत्ते पिह्व दौर्भाग्यं यद्वा यकनि वृक्कयोः। अयन्तद्विश्व भेषजोऽपामार्गोऽप लुम्पतु।। 4।।
卐16.148.5 यत्ते गुदास्वन्त्रेषु दौर्भाग्यमुदरे हितम्। अयन्तद्विश्व भेषजोऽपामार्गोऽप लुम्पतु।। 5।।
卐16.148.6 यत्ते वस्तौ दौर्भाग्यं वनिष्ठौ प्लाशा वा हितम्। अयन्तद्विश्व भेषजोऽपामार्गोऽप लुम्पतु।। 6।।
卐16.148.7 यत्ते भससि दौर्भाग्यं यद्वा याशुषु मुष्कयोः। अयन्तद्विश्व भेषजोऽपामार्गोऽप लुम्पतु।। 7।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐16.148.8 यत्ते श्रोण्यो दौर्भाग्यमवचालूखयोर्हितम्। अयन्तद्विश्व भेषजोऽपामार्गोऽप लुम्पतु।। 8।।

卐16.148.9 यत्ते उसति दौर्भाग्य मूर्वोर्जानुनोर्हितम्। अयन्तद्विश्व भेषजोऽपामार्गोऽप लुम्पतु।। 9।।

卐16.148.10 यत्ते जंघयोर्दौर्भाग्यं स्थुरयो पाष्र्यो र्हितम्। अयन्तद्विश्व भेषजोऽपामार्गोऽप लुम्पतु।। 10।। 16- 149

卐16.149.1 यत्ते गुल्फयोर्दौर्भाग्यं पादयोरङ्गुलीरनु। अयन्तद्विश्व भेषजोऽपामार्गोऽप लुम्पतु।। 1।।

卐16.149.2 यत्ते परुषु दौर्भाग्यं मांसे अस्थिषु मज्जसु। अयन्तद्विश्व भेषजोऽपामार्गोऽप लुम्पतु।। 2।।

卐16.149.3 यत्ते किञ्चिद् दौर्भाग्य मङ्गेष्वङ्गेषु प्रतिष्ठितम्। यद्वा लोमसुविष्ठितं। अयन्तद्विश्व भेषजोऽपामार्गोऽप लुम्पतु।। 3।।

卐16.149.4 यत्ते अक्षेषु दौर्भाग्यं ग्रहायामधि देवने। अयन्तद्विश्व भेषजोऽपामार्गोऽप लुम्पतु।। 4।।

卐16.149.5 यत्ते पशुषु दौर्भाग्यं कृष्यामशनेर्हितम्। अयन्तद्विश्व भेषजोऽपामार्गोऽप लुम्पतु।। 5।।

卐16.149.6 या ते लक्ष्मीर्भ्रूणहत्याथो या ते अपुत्रता। अयन्तद्विश्व भेषजोऽपामार्गोऽप लुम्पतु।। 6।।

卐16.149.7 यत्ते ऽदृष्टं पितृषद्यमथो या ते अपत्यता। अयन्तद्विश्व भेषजोऽपामार्गोऽप लुम्पतु।। 7।।

卐16.149.8 या ते का च पापी लक्ष्मीरथो या ते अपशुता। अयन्तद्विश्व भेषजोऽपामार्गोऽप लुम्पतु।। 8।।

卐16.149.9 कण्ठदघ्ना महिमार्त्ति मे नृणां देवेभ्यः किल्विषं यद्बभूव। इमास्तदापः प्र वहन्तुरिप्रं पुनातु मा शतधारं पवित्रम्। 9।।

卐16.149.10 स्नाहिरिप्रं शमलञ्च सर्वं कृष्णे चेले सादयित्वा पापम्। हित्वावर्त्तिं निर्ऋतिं मृत्युपाशान्सूर्यं ज्योतिरभ्ये ह्यग्निम्।। 10।।

卐16.149.11 उद्यन्तो अस्मान्महत स्समुद्रा न्मुच्यमानोङ्गसः पाप्मनश्च। पुनर्मनः पुनरायुर्न आगन्मा दभन्पणयो यातुधानाः।। 11।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐16.149.12 अवरि प्रमनिक्ष्म मह्यशस्तिमप्यात्मानः। वर्च आ धियतान्मयि तेज आ धियतान्मयि। प्राणापानौ मा मा हासिष्टं सर्वमायुरशीय।। 12।। 16 - 150

卐16.150.1 ब्रह्म यज्ञानं प्रथमं पुरस्ताद् वि षीमत स्सुरुचो वेन आवः। स बुध्न्या उपमा अस्य विष्ठा स्सतश्च योनिमसतश्च वि वः।। 1।।

卐16.150.2 ब्रह्मभ्राजदुदगादन्तरिक्षं दिवञ्च ब्रह्मावाधूष्टामृतेन मृत्युम्। ब्रह्मोपद्रष्टा सुकृतस्य साक्षाद्ब्रह्मा स्मदपहन्तु शमलन्तमश्च।। 2।।

卐16.150.3 प्रतीचीरायतास्थिता वितताः पश्यामहै। समुद्रेप्सूयाहिता स्सुराणामयस्मयै।। 3।।

卐16.150.4 हरि स्सुपर्णो दिवोमारुहोऽर्चिषा येत्वा दिप्सन्ति दिवमुत्पतन्तम्। अव ताञ्जहि हरसा जातवेदो बिभ्यदुग्रोऽर्चिषा दिवमा रोह सूर्य।। 4।।

卐16.150.5 अयोजाला असुरा मायिनोऽयस्मयैः पाशैरङ्किनो ये चरन्ति। तां स्ते रन्धयामि हरसा जातवेदस्सहस्रर्ष्टि स्सपत्ना न्प्रमृणन्पाहि वज्रः।। 5।।

卐16.150.6 देवानामधिपा एति घर्म्म ऋतेन भ्राजन्नमृतं वि चष्टे। हिरण्यवर्णो नभसो देव सूर्य घर्म्मो भ्राजन्दिवो अन्तां पर्येषु विद्युता।। 6।।

卐16.150.7 वि द्योतन्ते विद्युतो अग्निजिह्वा हिरण्यवर्णा अमृता अप्स्वन्त स्समुद्रे। रुद्रस्य क्षिपण स्स्तनयित्नो र्विद्युत्तस्य वैश्वानरस्य हेतिः परि णो वृणोक्तु।। 7।।

卐16.150.8 विद्युता भ्राजन् ह्लदं यात्यग्निर्व्याघ्राऽप्सुषदो यत्र भीमाः। विष्णोः क्रमै स्स्तनयन्नेति रुद्रो नुदञ्छत्रून्विमृधो वाधमानोऽसपत्नाः प्रदिशो मे कृणोतु।। 8।।

卐16.150.9 अपो वसान स्समैत्यन्तरिक्षन्दिवञ्च समिद्धो अग्निर्दिव्य स्तपोऽधात्। वैश्वानर श्शमय श्शीतरूरे अपां सुपर्णो दिवैति पृष्ठे।। 9।।

卐16.150.10 वैश्वानर स्समुद्रं पर्यैति शुक्रो घर्मो भ्राजन्तेजसा रोचमानः। नुदञ्छत्रून् प्रदहन्मे सपत्नानादित्यो द्यामध्यरुक्षद्विपश्चित्।। 10।। 16 - 151

卐16.151.1 वैश्वानर स्सन्तपत्यन्तरिक्षन्दिवञ्च समिद्धो अग्निर्दिव्यो स्तपोऽधात्। शिक्षन्त्वस्मा अभिषुण्वन्ति सोममृतेन भ्राजन्नमृतं वस्ते अत्की।। 1।।

卐16.151.2 रारह्यते नीलयते शीतरूरेतन्वावस्यभीमे। रूपाण्येति बहुधा वसानो ग्रहा कृण्वानस्तन्वः पराचीः।। 2।।

卐16.151.3 पञ्चारे चक्रे परिवर्तमाने समारोहन्ति भुवनानि विश्वा। तस्यनाक्षस्तप्यते भूरिभार स्सनादेव न छिद्यते सनाभिः।। 3।।

卐16.151.4 पञ्चाभिस्तप्त स्तपत्येष एतत्सहस्र धामानि मनुतिष्ठन्त्येनम्। सप्त त्वा सूर्य हरितो वहन्ति ब्रह्मणादित्य स्त्रिवृता मुखेन।। 4।।

卐16.151.5 वि द्योतन्ते द्योतत आ च द्यदते अप्स्वन्तरमृतो घर्म उद्यन्। हन्ता वृत्रस्य हरिता मनीकमनाधृष्टा स्तन्व स्सूर्यस्य।। 5।।

卐16.151.6 घर्मꣳ पश्चादुतघर्मꣳ पुरस्तादयो दंष्ट्राय द्विषतोऽपि दध्मः। वैश्वानर श्शीतरूरे वसान स्सपत्नान्मे द्विषतो हन्तु सर्वान्।। 6।।

卐16.151.7 ऋतूनृतुभि श्श्रमयति ब्रह्मणैकवीरो घर्मश्शुचान स्समिधा समिन्द्धः। ब्रह्म त्वा तपति ब्रह्मणा तेजसा च।। 7।।

卐16.151.8 ब्रह्म यज्ञानं प्रथमं समाददे तज्जायमानं न विभिदे न विद्यते। तदङ्गमानं पितरं व्याहन्ति तस्य नाड्यातता विततास्तता उताः।। 8।।

卐16.151.9 अमर्त्यज्ञान स्स्वराजभारो रयिं जजान स्वजासु भर्त्ता। प्रजापतिꣳ प्रजाभि स्सम्विदान स्त्रिणि ज्योतींषि दधते न पाकः।। 9।।

卐16.151.10 प्रजापतिश्चरति गर्भे अन्त स्स्वजायमानो बहुधा प्र जायते। तस्य पदमभिपश्यन्ति वेधसस्तस्मिन्नार्पिता भुवनानि विश्वा।। 10।। 16 - 152

卐16.152.1 यस्मिन्देवाꣳ पितरो मनुष्या अरानाभाविव श्रिताः। अपान्त्वा पुष्पं पृच्छामि यत्र तन्मायया हितम्।। 1।।

卐16.152.2 यत्रापां पुष्पन्निहितं माययाति हितं गुहा। यो वै तद्विद्यात्प्रत्यक्षं सविद्याद् ब्राह्मणं महत्।। 2।।

卐16.152.3 मणिस्तु सूत्रे निहित स्स्वर्य दूर्ध्वस्त्रियङ् विशएति प्रजानन्। स पुमान्पुंसो जनयनृतेन सर्वामदन्तान्गच्छति सद्य एव।। 3।।

卐16.152.4 सर्वां रात्रिं समोषत्वादित्यो जातवेदसा। अग्नेरधि दिवमारोहन्नायुषा समनक्तु मां वर्चसा संसृजतु माम्।। 4।।

卐16.152.5 घर्मस्साहस्त्र स्समिधा समिद्धोऽसपत्ना॰ प्रदिशो मे कृणोतु। सपत्नान् सर्वान्मेसूर्यो हन्तु वैश्वानरो हरिः।। 5।।

卐16.152.6 घर्मस्तप्त प्र दहतु भ्रातृव्यान् द्विषतो वृका। आदत्ताञ्छत्रूनादित्य उद्यन्सूर्य॰ पृतन्यतः।। 6।।

卐16.152.7 वैश्वानर॰ प्र दहतु भ्रातृव्यान् द्विषतो मम। उद्यन्मे शुक्र आदित्यो विमृधो हन्तु सूर्यः।। 7।।

卐16.152.8 शुक्रं सुवर्णं हरि ब्रह्मभ्राजदजस्त्रं ज्योतिर्दिव माततान। हरिस्सुवर्ण॰ प्रमथिष्णुराशु स्सपत्नान्हन्तु महता वधेन।। 8।।

卐16.152.9 हरिस्सुवर्ण स्सृजत्वोभयङ्करो हिरण्यवर्णो दुरितादाप आशुः। सपत्नान्सर्वान्मे सूर्य आदित्यं हन्तु रश्मिभिः।। 9।।

卐16.152.10 महान्तमर्थं परिसद्य एत्यहोरात्रे विततच्छुक्र उद्यन्। सपत्नान्सर्वान्मे सूर्य हन्तु वैश्वानरो गृह्णन्।। 10।।

卐16.152.11 उद्यन्नद्य चित्रमहस्सपत्नान्मेऽव जहि। दिवैनान्रश्मिभिर्जहि रात्रैणां स्तमसावधिस्ते यन्त्वधमन्तमः।। 11।।

卐16.152.12 तेजस्तपांसि मुखतो बिभ्रष्यानन्दं भूतं महसि॰ प्रतिष्ठाम्। पर्यूहमाण श्श्रियमेषि सर्वतोऽमोघं सत्यं यश उद्यतन्ते।। 12।। 16 - 153

卐16.153.1 ब्रह्मचारिष्णश्चरति रोदसी उभे अस्मिन्देवा स्संमनसो भवन्ति। स दाधार पृथिवीन्द्यामुतामुं स आचार्यन्तपसा पिपर्त्तु।। 1।।

卐16.153.2 आचार्य उपनयमानो ब्रह्मचारिणङ्कृणुते गर्भमन्तः। तं रात्रीस्तिस्त्र उदरे बिभर्ति तञ्जातं द्रष्टुमभिसंयन्ति देवाः।। 2।।

卐16.153.3 ब्रह्मचारिणं पितरो मनुष्या देवजना गन्धर्वा अनुसंयन्ति सर्वे। त्रयस्त्रींशत् त्रिशता ष्षड्सहस्त्रा स्सर्वान्स देवांस्तपसा पिपर्त्तु।। 3।।

卐16.153.4 इयं समित्पृथिवीद्यौ द्वितीयोतान्तरिक्षं समिधा पृणाति। ब्रह्मचारि समिधा मेखला विश्रमेण लोकांस्तपसा पिपर्त्ति।। 4।।

卐16.153.5 पूर्वो जातो ब्रह्मणो ब्रह्मचारी घर्मं वसानस्तपसोदतिष्ठत्। तस्माज्जातं ब्राह्मणं ब्रह्मज्येष्ठन्देवाश्च सर्वे अमृतेन साकम्।। 5।।

卐16.153.6 ब्रह्मचारी समिधा समिद्धः कार्ष्णं वसानो दीक्षितो दीर्घश्मश्रुः। स सद्य एति पूर्वादपरं समुद्रं लोकान् संगृभ्य मुहुराचरिक्रत्।। 6।।

卐16.153.7 ब्रह्मचारी जनयन्ब्रह्मापो लोकान् प्रजापतिं परमेष्ठिनं विराजम्। गर्भो भूत्वामृतस्य योनाविन्द्रो भूत्वासुरांस्ततर्हि।। 7।।

卐16.153.8 इमां भूमिं पृथिवीं ब्रह्मचारी भिक्षामाजभार प्रथमो दिवञ्च। ते ब्रह्म कृत्वा समिधौ उपास्ते तयोरार्पिता भुवनानि विश्वा।। 8।।

卐16.153.9 आचार्यस्ततक्ष नभसी उभे उर्वीङ्गभीरे पृथिवीन्दिवञ्च। ते ब्रह्मचारी तपसाभि रक्षति तयोर्देवा स्सधमादं मदन्ति।। 9।।

卐16.153.10 अर्वागन्यः परोऽन्यो गुहा निधी निहितौ ब्राह्मणस्य। तौ ब्रह्मचारी तपसाभि रक्षति तत् केवलं कृणुते ब्रह्म विद्वान्।। 10।। 16- 154

卐16.154.1 अर्वागन्यो दिवस्पृष्ठादितोऽन्यः पृथिव्याग्नि समेतो नभसी अन्तरेमे। तयोश्श्रयन्ते रश्मयोऽधि दृढास्ताना तिष्ठति तपसा ब्रह्मचारी।। 1।।

卐16.154.2 अभिक्रन्दन्नरुण श्शितिङ्गो बृहच्छेपोऽनुभूमौ जभार। ब्रह्मचारी सिञ्चति सानौ रेतः पृथिव्यां तेन जीवन्ति प्रदिशश्चतस्रः।। 2।।

卐16.154.3 पर्जन्यो मृत्युर्वरुण स्सोम ओषधयः पयः। जीमूता आसन्सत्वान स्तैरिदं स्वराभरन्।। 3।।

卐16.154.4 अग्नौ सूर्ये चन्द्रमसि मातरिश्वन् ब्रह्मचार्यप्सु समिधमा दधाति। तेषामर्चीषि पृथगभ्रे चरन्ति तेषामाज्यं पुरुषो वर्षमश्वः।। 4।।

卐16.154.5 अमा घृतङ्कृणुते केवलमाचार्यो भूत्वा वरुणो यद्यदैच्छत्प्रजापतौ। तद् ब्रह्मचारी प्रायछत्स्वान्मित्रो अध्यात्मनः।। 5।।

卐16.154.6 आचार्यो ब्रह्मचारी ब्रह्मचारी प्रजापतिः। प्रजापतिर्वि राजति विराडिन्द्रोऽभवद्वशी।। 6।।

卐16.154.7 ब्रह्मचर्येण तपसा राजा राष्ट्रं वि रक्षति। आचार्यो ब्रह्मचर्येणब्रह्मचारिणमिच्छते।। 7।।

卐16.154.8 ब्रह्मचर्येण कन्या युवानं विन्दते पतिम्। अनड्वान् ब्रह्मचर्येणाश्वो घासं जिगीषति।। 8।।

卐16.154.9 ब्रह्मचर्येण तपसा देवा मृत्युमुपाजयन्। इन्द्रो ह ब्रह्मचर्येणामृतं स्वराभरत्।। 9।।

卐16.154.10 ओषधयो भूतभव्यमहोरात्रे वनस्पतयः। संवत्सर स्सहर्तुभिस्ते जाता ब्रह्मचारिणः।। 10।। 16 - 155

卐16.155.1 पार्थिवा दिव्याः पशव आरण्या ग्राम्याश्च ये। अपक्षाः पक्षिणश्च ये ते जाता ब्रह्मचारीणः।। 1।।

卐16.155.2 पृथक्सर्वे प्राजापत्याः प्राणानात्मसु बिभ्रति। सर्वास्तान् ब्रह्म रक्षति ब्रह्मचारिण्याभृतम्।। 2।।

卐16.155.3 ब्रह्मचारी ब्रह्मभ्राजद्बिभर्ति तस्मिन्देवाऽधि विश्वे समोता। स स्नातोः बभ्रुः पिङ्गलः पृथिव्यां बहु रोचते।। 3।।

卐16.155.4 देवानामेतत् परिषूतमनभ्यारूढञ्चरति रोचमानम्। तस्मिन् सर्वे पशवस्तत्र यज्ञ स्तस्मिन्नन्नं सह देवताभिः।। 4।।

卐16.155.5 प्राणापानौ जनयन्ना द्व्यानञ्चक्षु श्श्रोत्रञ्जनयन्ब्रह्म मेधाम्। वाचं श्रेष्ठां यशो अस्मासु धेहि।। 5।।

卐16.155.6 अन्नं रेतो लोहितमुदरन्तानि कल्पम्। ब्रह्मचारी सलिलस्य पृष्ठे तपोतिष्ठ त्तप्यमानस्समुद्रे।। 6। इति क्षुद्रकाण्डे (षोडशकाण्डे) द्वाविंशति अनुवाकः इत्यथर्ववेदे पैप्पलादसंहितायां (क्षुद्रकाण्डः) षोडशकाण्ड स्समाप्तः

## ʊ अथ सप्तदशः काण्डः 17- 1

卐17.1.1 सत्यं बृहद्दतमुग्र न्दीक्षा तपो ब्रह्मयज्ञः पृथिवीन्धारयन्तु। सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु।। 1।।

卐17.1.2 असम्वाधं मध्यतो मानवेषु यस्या उद्वतः प्रवत स्समं बहु। नानावीर्या ओषधीर्या बिभर्त्ति पृथिवी नः प्रथतां राध्यतान्नः।। 2।।

卐17.1.3 यस्यां समुद्र उत सिन्धुरापो यस्यान्देवा अमृतमन्वविन्दन्। या बिभर्त्ति बहुधा प्राणदेजत्सा नो भूमिर्गोष्वश्वे ष्वप्यन्ने कृणोतु।। 3।।

卐17.1.4 यस्यां पूर्वे पूर्वजना विचक्रिरे यस्यान्देवा असुरानभ्यवर्त्तयन्। यस्यामिदञ्जीवति विश्वमेजत्सा नो भूमिः पूर्वपे ये दधातु।। 4।।

卐17.1.5 यस्याश्चतस्रः प्रदिशः पृथिव्या यस्यामन्नं कृष्टय स्संबभूवुः। गवामश्वानां वयसश्च विष्ठा भगं वर्चः पृथिवी नो दधातु।। 5।।

卐17.1.6 विश्वम्भरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी। वैश्वानरं बिभ्रती भूमिरग्निमिन्द्रर्षभा द्रविणे नो दधातु।। 6।।

卐17.1.7 यस्यामापः परिचरा स्समानी रहोरात्रेऽप्रमादं क्षरन्ति। सा नो भूमिर्भूरिधारा पयो दुहामथोक्षन्तु वर्चसा।। 7।।

卐17.1.8 यां रक्षन्त्वस्वप्ना विश्वदानीन्देवा भूमिं पृथिवीमप्रमादम्। सा नो मधु प्रियं दुहा मथोक्षन्तु वर्चसा।। 8।।

卐17.1.9 यार्णवेऽधि सलिलमग्र आसीद्यां मायाभिरन्व चरन्मनीषिणः। यस्यां हृदयं परमे व्योमन्सत्येनावृतममृतं पृथिव्या। सा नो भूमिस्त्विषिं बलं राष्ट्रे दधातूत्तमे।। 9।।

卐17.1.10 यामश्विनावमिमातां विष्णुर्यस्यां विचक्रमे। इन्द्रो यां चक्र आत्मने अनमित्राञ्च्छचिपतिः। सा नो भूमिर्वि सृजतां माता पुत्राय नः पयः।। 10।। 17 - 2

卐17.2.1 गिरयस्ते पर्वता हिमवन्तो ऽरण्यन्ते पृथिवी स्योनमस्तु नः। बभ्रुङ्कृष्णां रोहिणीं विश्वरूपान्ध्रुवां भूमिं पृथिवीमिन्द्रगुप्ताम्।। 1।।

卐17.2.2 अजितोऽहतोऽक्षतोऽध्यष्ठां पृथिवीमहम्। यत्ते मध्यं पृथिवी यच्च नभ्यं यास्त ऊर्यस्तन्व स्संबभूवुः।। 2।।

卐17.2.3 तासु नो धेह्यभिनः पवस्व माता भूमिः पुत्रोऽहं पृथिव्याः। पर्जन्यः पिता स उ नः पिपर्त्तु।। 3।।

卐17.2.4 यस्यां वेदिं परिगृह्णन्ति भूम्यां यस्यां यज्ञं तन्वते विश्वकर्माणः। यस्यां मीयन्ते स्वरवः पृथिव्यामूर्ध्वा श्शुक्राऽऽहुत्याः पुरस्तात्। सा नो भूमिर्वर्द्धयाद् वर्द्धमाना।। 4।।

卐17.2.5 यो नो द्वेषत् पृथिवी यः पृतन्याद् योऽभिमन्यातै मनसा बधेन तं नो भूमे रन्धय पूर्व कृत्वरि।। 5।।

卐17.2.6 त्वज्जातास्त्वयि चरन्ति मर्त्यास्त्वं बिभर्षि द्विपदश्चतुष्पदः। त्वयीमे पृथिवी पञ्च मानवा येभ्यो ज्योतिरमृतं मर्त्येभ्य उद्यन् सूर्यो रश्मिभिरातनोति।। 6।।

卐17.2.7 ता नः प्रजाः सन्दुह्रतां समग्रा वाचो मधु पृथिवी धेहि मह्यम्। विश्वस्वं मातरमोषधीना न्ध्रुवां भूमिं पृथिवीन्धर्मणा धृताम्। शिवां स्योनामनुचरेम विश्वहा।। 7।।

卐17.2.8 महत् सधस्थं महती बभूविथ महान्वेग एजथुर्वेपथुष्टे। महांस्तेन्द्रो रक्षति वीर्येण सा नो भूमे प्र रोचय हिरण्यस्येव सन्दृशि।। 8।।

卐17.2.9 अग्निर्भूम्यामोषधीष्वग्निमापो विभ्रत्यग्निरश्मसु। अग्निरन्तः पुरुषेषु गोष्वश्वेष्वग्नयः।। 9।।

17- 3

卐17.3.1 अग्निर्दिव आ तपत्यग्नेर्देवस्योर्व अन्तरिक्षम्। अग्नि मर्त्यास इन्धते हव्यवाहं घृतप्रियम्।। 1।।

卐17.3.2 अग्निवासाः पृथिव्यसि तज्जुस्त्विषीमन्तं संशितं मा कृणोतु। भूम्यान्देवेभ्यो जुह्वति यज्ञं हव्यमरङ्कृतम्।। 2।।

卐17.3.3 भूम्यां मनुष्या जीवन्ति स्वधयान्नेन मर्त्त्याः। सा नो भूमिः प्राणमायुर्दधातु जरदष्टिं मा पृथिवी कृणोतु।। 3।।

卐17.3.4 यस्ते गन्धः पृथिवी संबभूव यं बिभ्रत्योषधयो यमापः। यं गन्धर्वाप्सरसश्च भेजिरे यस्ते गामश्वमर्हति तेनास्मान्सुरभिन् कृणु मा नो द्विक्षत कश्च न।। 4।।

卐17.3.5 यस्ते गन्धः पुष्करमाविवेश यं सञ्जभ्रू स्सूर्याया विवाहे। अमर्त्त्याः पृथिवी गन्धमग्रे तेनास्मान्सुरभिन् कृणु मा नो द्विक्षत कश्च न।। 5।।

卐17.3.6 यस्ते भूमे पुरुषेषु स्त्रीषु पुंसु भगो रुचिर्यो वधूषु वधूयुषु। यो गोष्वश्वेषु यो मृगेषूत हस्तीषु कन्यायां वर्चो यद् भूमे। तेनास्माङ्कपि सं सृज मा नो द्विक्षत कश्च न।। 6।।

卐17.3.7 शिला भूमिरश्मापांसुर्या भूमि स्सन्धृता धृता। यस्यां वृक्षा वानस्पत्या धृवास्तिष्ठन्ति विश्वहा। भूमिं हिरण्य वक्षसं धृतामच्छा वदामसि।। 7।।

卐17.3.8 उदीराणा उतासीनास्तिष्ठन्तः पक्रामन्तः। पद्भ्यां दक्षिणसव्याभ्यां मा व्यथिष्महि भूम्याम्।। 8।।

卐17.3.9 विमृग्वरीं पृथिवीमावदामि क्षमां भूमिं ब्रह्मणा वावृधानाम्। ऊर्जं पुष्टिं बिभ्रतीमन्न भाग ङ्घृतं त्वाभि नि षीदामि भूमे।। 9।।

卐17.3.10 शुद्धा म आपस्तन्वे॰ क्षरन्ति यो मे सेदुरप्रिये तं निदध्मः। पवित्रेण पृथिवी मोत्पुनामि।। 10।।

卐17.3.11 निधिन् बिभ्रति बहुधा गुहा वसु मणिं हिरण्यं पृथिवी ददातु नः। वसूनि नो वसुदा रासमाना देवी दधातु सुमनस्यमाना।। 11।। 17 - 4

卐17.4.1 यास्ते प्राची॰ प्रदिशो या उदीचीर्यास्ते भूमे अधराद्याश्च पश्चात्। स्योनास्ता मह्य ञ्चरते भवन्तु मा नि पप्तं भुवने शिश्रियाणः।। 1।।

卐17.4.2 मा मा पश्चान्मापुरस्तान्नुदिष्ठा मोत्तरादधरादुत। स्वस्ति भूमे मे कृणु वरीयो यावया वधं मा विदन्परिपन्थिनः।। 2।।

卐17.4.3 यावत्तेभि विपश्यामि भूमे सूर्येण मेदिना। तावन्मे चक्षुर्मा मेष्टोत्तरामुत्तरां समाम्।। 3।।

卐17.4.4 यत्ते भूमे विखनाम्योषं तदपि रोहतु। मा ते मर्म विमृग्वरि मा ते हृदयमर्पिपम्।। 4।।

卐17.4.5 यच्छयान॰ पर्यावर्त्ते दक्षिणं सव्यमभि भूमे पार्श्वम्। उत्तानास्त्वा प्रतीचीं पृष्ठ्या यदधि शेमहे।। 5।।

卐17.4.6 मा हिंसीस्तत्र नो भूमे सर्वस्य प्रतिशीवरि। ग्रीष्मस्ते भूमे वर्षाणि शरद्धेमन्त शिशिरो वसन्तः।। 6।।

卐17.4.7 ऋतवस्ते विहिता हायना अहोरात्रे पृथिवी नो दुहाताम्। याप सर्पन्नुदमाना विमृग्वरी यस्यामासन्नग्नयो अप्स्वन्तः।। 7।।

卐17.4.8 परादस्युन्ददती देवपीयूनिन्द्रं वृणाना पृथिवी न वृत्रं शक्राय दध्रे वृषभाय वृष्णे। सा नो भूमि रादिशतु यद्धनं कामयामहे।। 8।।

卐17.4.9 भगो अनुप्रयुङ्क्तामिन्द्रो यातु पुरोगवः। यस्यां सदो हविर्धाने युयो यस्यां निमीयते।। 9।।

卐17.4.10 ब्रह्माणो यस्यामर्चयन्ति ऋग्भिस्साम्ना यजुर्विदः। युज्यन्ते यस्यामृत्विज स्सोममिन्द्राय पातवे।। 10।।

卐17.4.11 सा नो भूमिर्दक्षिणायां सुशेवा यज्ञे दधातु सुमनस्यमाना। यस्यां पूर्वे भूतकृत ऋषयो गा उदानृचुः।। 11।।

Sri Ganapathy Sachchidananda Avadhoota Datta Peetham • Mysore •

卐17.4.12 सप्तसत्त्रेण वेधसो यज्ञेन तपसा सह। सा नः पशून् विश्वरूपान्दधातु दीर्घमायु स्सविता कृणोतु।। 12।।

卐17.4.13 यस्यामन्नं व्रीहियवौ यत्रेमाः पञ्च कृष्टयः। भूम्यै पर्जन्यपत्न्यै नमोऽस्तु वर्षमेदसे।। 13।।

17 - 5

卐17.5.1 यस्याङ्गायन्ति नृत्यन्ति जना मर्त्त्या व्यैलवाः। युध्यन्ते यस्यामाक्रन्दो यस्यां वादति दुन्दुभिः। सा नो भूमिः प्र णुदतां सपत्नान् यो नो द्वेष्ट्यधरन्तं कृणोतु।। 1।।

卐17.5.2 यस्यां पुरो देवकृताः क्षेत्रे यस्यां विकुर्वते। प्रजापतिः पृथिवीं विश्वगर्भामाशामाशां रण्यां नः कृणोतु।। 2।।

卐17.5.3 जनं बिभ्रती बहुधा विवाचसं नानाधर्माणं पृथिवी यथौकसम्। सहस्रन्धारा द्रविणस्य नो दुहां ध्रुवेव धेनुरनप स्फुरन्ती।। 3।।

卐17.5.4 यस्ते सर्पो वृश्चिकस्तृष्टदंश्मा हेमन्त जब्धो भृमलो गुहाशये। क्रिमिर्जिन्वत् पृथिवि प्रावृषि यदेजति तन्न स्सर्पन्मोप सृपद्यच्छिवन्तेन नो मृड।। 4।।

卐17.5.5 ये ते पन्थानो बहवो जनायना रथस्य वर्त्मन्नसश्च यातवे। येभिश्चरन्त्युभये भद्रपापास्तं पन्थानं जयेमान मित्रमतस्करं यच्छिवं तेन नो मृड।। 5।।

卐17.5.6 मल्वं बिभ्रती गुरुभृद् भद्रपापस्य निधनं तितिक्षुः। सुकरेण पृथिवी संविदाना वराहाय वि जिहीते मृगाय।। 6।।

卐17.5.7 ये त आरण्याः पशवो मृगा वने हितास्सिंहा व्याघ्राः पुरुषादश्चरन्ति। उलं वृकं पृथिवी दुच्छुनामित ऋक्षीकां रक्षो अप वाधयास्मत्।। 7।।

卐17.5.8 ये गन्धर्वाप्सरसो ये चारायाः किमिदीनः। पिशाचान्सर्वा रक्षांसि तानस्मद् भूमे यावय।। 8।।

卐17.5.9 यां द्विपादः पक्षिण स्संपतन्ति हंसा स्सुपर्णा श्शकुना वयांसि। यस्यां वात इयते मातरिश्वा रजांसि कृण्वं श्च्यावयंश्च वृक्षान्।। 9।।

卐17.5.10 वातस्य प्रवामुपवामनुवात्यर्चिः। यस्यां कृष्णमरुणं च संभृते अहोरात्रे विहितेर्भूम्यामधि। वर्षेण भूमिः पृथिवी वृतावृता सा नो दधातु भद्रया प्रिये धामानि धामानि।। 10।। 17 - 6

卐17.6.1 द्यौश्च म इदं पृथिवी चान्तरिक्षञ्च मे व्यचः। अग्निस्सूर्य आपो मेधां विश्वेदेवाश्च सन्ददुः।। 1।।

卐17.6.2 अहमस्मि सहमान उत्तरो नाम भूम्याम्। अभिषाडस्मि विश्वाषाडाशामाशां विषासहिः।। 2।।

卐17.6.3 यददो देवी प्रथमाना꣸ पुरस्ताद्देवै स्सृष्टा व्यसर्पो महित्वम्। आ त्वा सुभूत मविशत्तदानी मकल्पयथा꣸ प्रदिशश्चतस्रः।। 3।।

卐17.6.4 ये ग्रामाया न्यरण्यानि यास्सभा अधि भूम्याम्। तेष्वहं देवी पृथिव्युद्वासं मधुमद्वचः।। 4।।

卐17.6.5 यद्वदामि मधुमत्तद्वदामि यदीक्षे तद्वनन्तु मा। त्विषीमानस्मि जूतिमानवान्यान् हन्मि दोधतः।। 5।।

卐17.6.6 अश्वेव रजो दुधुवे वि ताञ्जना नाक्षियन् पृथिवी मा दजायत। मन्दाग्रेत्वरी भुवनस्य गोपा वनस्पतीनां गृभिरोषधीनाम्।। 6।।

卐17.6.7 शन्तिवा सुरभि स्स्योना कीलालोध्नी पयस्वती। भूमि दुर्हार्दो अधि ब्रवीतु पृथिवी पयसा सह।। 7।।

卐17.6.8 भूमे मातर्नि धेहि मां भद्रया सुप्रतिष्ठितम्। संविदाना दिवा त्वं श्रियां मा धेहि भूत्याम्।। 8।।

卐17.6.9 यामन्वैच्छ द्धविषा विश्वकर्मा यस्यामास न्नग्नयोऽप्स्वन्तः। भुजिष्यं पात्रन्निहित ङ्गुहासी दाविर्भोगै रभवन्मातृ मद्भ्यः।। 9।।

卐17.6.10 त्वमस्या वपनी जनानामदिति꣸ कामदुघा विश्वरूपा। यत्त ऊनं तत्त आ पूरयाति प्राजापति꣸ प्राजाभि स्संविदानः।। 10। इति (एकानृच)सप्तदशः काण्डे प्रथमोऽनुवाकः 17 - 7

卐17.7.1 कस्मिन्नङ्गे तपोऽस्याधि तिष्ठति कस्मिन्नङ्गे ऋतमस्याध्याहितम्। क्व व्रतं क्व श्रद्धास्य तिष्ठति कस्मिन्नङ्गे सत्यमस्य प्रतिष्ठितम्।। 1।।

卐17.7.2 क्व ब्रह्म क्व तिष्ठन्याप꣸ कस्मिन्नङ्गे दिशोऽस्य प्रतिष्ठिताः। कतमदङ्ग मनु सञ्चरेते अहोरात्रे संविदाने समानम्।। 2।।

卐17.7.3 कस्मिन्नङ्गे तिष्ठति भूमिरस्य कस्मिन्नङ्गे तिष्ठत्यन्तरिक्षम्। कस्मिन्नङ्गे तिष्ठत्याहिता द्यौ꣸ कस्मिन्नङ्गे तिष्ठन्त्युत्तरं दिवः।। 3।।

卐17.7.4 कस्मादङ्गा द्दिप्यतेऽग्निरस्य कस्मादङ्गा त्पवते मातरिश्वा। कस्मादङ्गाद्वि मिमीतेऽधि चन्द्रमा स्कम्भस्य मह्द्विमिमानो अङ्गम्।। 4।।

卐17.7.5 क्व प्रेप्सन्दिप्यत ऊर्द्ध्वो अग्निः क्व प्रेप्सन् पवते मातरिश्वा। यत्र प्रेप्सन्ती रभियन्त्यावृतः स्कम्भन्तं ब्रूहि कतम स्स्विदेव सः।। 5।।

卐17.7.6 क्व प्रेप्सन्ती युवती विरूपे अहोरात्रे द्रवत स्सम्विदाने। यत्र प्रेप्सन्ती रभियन्त्यापः स्कम्भन्तं ब्रूहि कतम स्स्विदेव सः।। 6।।

卐17.7.7 क्वार्धमासाः क्व यन्ति मासा स्सम्वत्सरेण सह सम्विदानाः। यत्र यन्त्यृतवो यत्रार्त्तवा स्स्कम्भन्तं ब्रूहि कतम स्स्विदेव सः।। 7।।

卐17.7.8 यस्मिन् स्तब्ध्वा प्रजापतिर्लोकान् सर्वानधारयत्। स्कम्भन्तं ब्रूहि कतम स्स्विदेव सः।। 8।।

卐17.7.9 यत्परमं यच्च मध्यमं प्रजापति स्ससृजे विश्वरूपम्। कियता स्कम्भः प्र विवेश तत्र यन्न प्राविशत् कियत्तद् बभूव।। 9।।

卐17.7.10 कियता स्कम्भः प्र विवेश भूतं कियद् भविष्यदन्वाशयेस्य। एकं यदङ्गमकृणोत् सहस्रधा कियता स्कम्भः प्रविवेश तत्र।। 10।। 17 - 8

卐17.8.1 यत्र लोकांश्च कोशांश्च ब्रह्मापो जना विदुः। असच्च यच्च सच्चान्तः स्कम्भन्तं ब्रूहि कतम स्स्विदेव सः।। 1।।

卐17.8.2 यत्र तपः पराक्रम्य ऋतं धारयत्युत्तरम्। व्रतं च यत्र श्रद्धा च ब्रह्माप स्समाहिता स्स्कम्भन्तं ब्रूहि कतम स्स्विदेव सः।। 2।।

卐17.8.3 यस्मिन् भूमिरन्तरिक्षं द्यौर्यस्मिन्नध्याहिता। यत्राग्निश्चन्द्रमा स्सूर्यो वातस्तिष्ठन्त्यार्पिता स्स्कम्भन्तं ब्रूहि कतम स्स्विदेव सः।। 3।।

卐17.8.4 यस्य त्रयस्त्रिंशद्देवा अङ्गे सर्वे समाहिता स्स्कम्भन्तं ब्रूहि कतम स्स्विदेव सः। 4।।

卐17.8.5 यत्र ऋषयो भूतकृत ऋचस्साम यजुर्मही। एकर्षिर्यस्मि न्नार्पिता स्स्कम्भन्तं ब्रूहि कतम स्स्विदेव सः।। 5।।

卐17.8.6 यस्य चतस्रः प्रदिशो नाड्यस्तिष्ठन्ति प्रथमाः। यज्ञो यस्मिन् पराक्रान्त स्स्कम्भन्तं ब्रूहि कतम स्स्विदेव सः।। 6।।

卐17.8.7 यत्रामृतं च मृत्युश्च पुरुषश्च समाहिताः। समुद्रो यस्य नाड्य स्स्कम्भन्तं ब्रूहि कतम स्स्विदेव सः।। 7।।

卐17.8.8 ये पुरुषे ब्रह्म विदुस्ते स्कम्भ्र मनुसं विदुः। यो वेद परमेष्ठिनं यश्च वेद प्रजापतिम्। ज्येष्ठं ये ब्राह्मणं विदुस्ते स्कम्भमनुसं विदुः।। 8।।

卐17.8.9 यस्य शिरो वैश्वानरश्चक्षुरङ्गिरसो ऽभवन्। अङ्गानि यस्य यातव स्स्कम्भन्तं ब्रूहि कतम स्स्विदेव सः।। 9।।

卐17.8.10 यस्य ब्रह्म मुखमाहुर्जिह्वां मधुकशामुत। विराजं यस्योध आहु स्स्कम्भन्तं ब्रूहि कतम स्स्विदेव सः।। 10।। 17 - 9

卐17.9.1 यस्मादृचो अपातक्षन् यजुर्यस्मा दपाकषन्। छन्दांसि यस्य लोमानि स्स्कम्भन्तं ब्रूहि कतम स्स्विदेव सः।। 1।।

卐17.9.2 असच्छाखां प्रतिष्ठन्तीं परममिव जना विदुः। उतो सन्मन्यन्तेऽवरे यस्य शाखामुपासते।। 2।।

卐17.9.3 यत्रादित्याश्च रुद्राश्च वसवश्च समाहिता स्स्कम्भन्तं ब्रूहि कतम स्स्विदेव सः।। 3।।

卐17.9.4 यस्य त्रयस्त्रिंशद्देवा निधिं रक्षन्ति सर्वदा। निधिं तमद्य को वेद यन्देवाऽभि रक्षथ।। 4।।

卐17.9.5 यत्र देवा ब्रह्मविदो ब्रह्म जेष्ठमुपासते। यो वै तद्ब्रह्मणो वेद तं वै ब्रह्मविदो विदुः।। 5।।

卐17.9.6 बृहन्तो नाम ते देवा असतस्परि यज्ञिरे। एकं तदङ्गं स्कम्भस्यासदाहुः परो जनाः।। 6।।

卐17.9.7 यत्र स्कम्भः प्रजनयन् पुराणं व्यवर्त्तयत्। एकं तदङ्ग स्कम्भस्य पुराणमनुसंविदुः।। 7।।

卐17.9.8 यस्य त्रयस्त्रिंशद्देवा अङ्गे गात्रा विभेजिरे। तान्वै त्रयस्त्रिंशद्देवानेके ब्रह्म विदो विदुः।। 8।।

卐17.9.9 हिरण्य गर्भं परममनत्युद्यं जना विदुः। स्कम्भस्तदग्रे प्रासिञ्चद्धिरण्यं लोके अन्तरा।। 9।।

卐17.9.10 स्कम्भे लोका स्स्कम्भे तप स्स्कम्भे ऽध्यृतमाहितम्। स्कम्भ न्त्वा विद्म प्रत्यक्षमिन्द्रे सर्वं समाहितम्।। 10।। 17 - 10

卐17.10.1 इन्द्रे लोका इन्द्रे तप इन्द्रेऽध्यृतमाहितम्। इन्द्रन्त्वा विद्म प्रत्यक्षं स्कम्भे सर्वं समाहितम्।। 1।।

卐17.10.2 नाम नाम्ना जोहवीमि पुरा सूर्यात् पुरोषसः। यदजः प्रथमं संबभूव स ह तत् स्वराज्य ञ्जगाम यस्मान्नः परमस्ति भूतम्।। 2।।

卐17.10.3 यस्य भूमिः प्रमान्तरिक्षमुतोदरम्। दिवं यश्चक्रे मूर्धानन्तस्मै ज्येष्ठाय ब्रह्मणे नमः।। 3।।
卐17.10.4 यस्य सूर्यश्चक्षुश्चन्द्रमाश्च पुनर्नवः। अग्निं यश्चक्र आस्यं तस्मै ज्योष्ठाय ब्रह्मणे नमः।। 4।।
卐17.10.5 यस्य वातः प्राणापानौ चक्षुरङ्गिरसो ऽभवन्। दिशो यश्चक्रे प्रज्ञानिस्तस्मै ज्येष्ठाय ब्रह्मणे नमः।। 5।।
卐17.10.6 य श्श्रमात्तपसो जातो लोकान्सर्वान् समानसे। सोमं यश्चक्रे केवलन्तस्मै ज्येष्ठाय ब्रह्मणे नमः।। 6।।
卐17.10.7 स्कम्भो दाधार पृथिवीं द्यामुतामुं स्कम्भो दाधारोर्वन्तरिक्षम्। स्कम्भो दाधार प्रदिशाष्षडुर्वी स्कम्भेदं विश्वं भुवन माविवेश।। 7।।
卐17.10.8 कथं वातो नेलयति कथन्न रमते मनः। किमापस्सत्यं प्रेप्सन्तीः प्र चक्रमिति सर्वदा।। 8।।
卐17.10.9 महद्यक्षं भुवनस्य मध्ये तपसि क्रान्तं सलिलस्य पृ। तस्मिञ्छ्रयन्ते य उ के च देवा वृक्षस्य स्कन्धः परित इव शाखाः।। 9।।
卐17.10.10 यस्मै हस्ताभ्यां पादाभ्यां वाचा श्रोत्रेण चक्षुषा। यस्मै देवा स्सदा बलिं प्रयच्छन्ति विमितेऽमितं स्कम्भन्तं ब्रूहि कतम स्स्विदेव सः।। 10।। 17 - 11
卐17.11.1 अप तस्य तमो हतं व्यावृत्तस्स पाप्मना। सर्वाणि तस्मिञ्ज्योतींषि यानि त्रीणि प्रजापतौ।। 1।।
卐17.11.2 यो वेतसं हिरण्ययं तिष्ठन्तं सलिले वेद। स वै गुह्यः प्रजापतिः।। 2।।
卐17.11.3 न प्रजापतिमित्येति नात्येति परमेष्ठीनम्। उतोत तत्र नो ब्रूत य ज्येष्ठं परोऽ त्ययत।। 3।।
卐17.11.4 अस्ति वै तत् परो भूमेरस्मि वै तत्परो दिवः। लोका वै तस्मिन् संप्रोसीताः यस्मिन्होताः प्रजा इमाः।। 4। इति (एकानृच) सप्तदशकाण्डे द्वितीयोऽनुवाकः 17 - 12
卐17.12.1 अन्तः पात्रे रेरिहतीं दुश्श्वेतु न्निहितैषिणी। दुरण्डे अभिचङ्क्मे वक्म के वस्तवासिनीम्।। 1।।
卐17.12.2 सर्वासां भण्वाव स्साकं नामधेयानि विद्मसि। यानि जातानि वर्त्तति नश्यतेत स्सदान्वाः।। 2।।
卐17.12.3 कर्णाद्दश द्रथामहमुलुकीं केशिनीं क्रकूम्। खडुरिम बर्हिष्वं नाशयाम स्सदान्वाः।। 3।।

卐17.12.4 पण्डुगिरीं फालजती मसौ सूक्ता निगारिणीम्। आमाता स्सर्वावो ब्रूमो नश्यतेत स्सदान्वाः।। 4।।

卐17.12.5 या श्शयान ञ्जम्भयन्त नक्तमिच्छ न्त्यातुरम्। अथोदनस्य सुप्तस्य सुखहस्ता नि प्र लीयन्ते। तत्सदुदक मनोहिताः ता इतो नाशयामसि।। 5।।

卐17.12.6 अपदन्नीर्वक्षणाना वस्तगन्धा स्सदान्वाः। भण्वासि न हतोश्छामि तीक्ष्ण श्रृङ्ग इवर्षभः।। 6।।

卐17.12.7 सदान्वा स्सादान्वेयां स्त्रीपुंसानुभयान् सह। सहे सहस्वान्सासह विमृधो हन्मि रक्षसः।। 7।।

卐17.12.8 चतुर्द्रंष्ट्रान् कुम्भमुस्का न्दीर्घकेशाङ् असृङ्मुखान्। अलावुगन्धिनुन्दुरान्दुर्न्नाम्नो नाशयामसि।। 8।।

卐17.12.9 स्तम्भेजाताधिपाले रोदाकाङ् रुहतीन्त्वत्। दुर्णाम्नी स्सर्वा स्सन्तोका नाशयाम स्सदान्वाः।। 9।।

卐17.12.10 यसां जातानि क्रोशन्तिहश्छं तज्जले ज्वलदुप वृक्षेषु शेरते। या वातात्रदुत्पन्ति ते च त्वा वर्षेण विद्युताः। शाला इच्छन्ति सत्वरम्। दुर्णाम्नी स्सर्वा स्सन्तोका नाशयाम स्सदान्वाः।। 10।। 17 - 13

卐17.13.1 या धान्यात् संभवन्ति क्षेत्रा द्दप्ताव्यर्पितात्। कृतादभि प्रहार्या नश्यतेत स्सदान्वाः।। 1।।

卐17.13.2 याः पुरुषाः पापगन्धा सदारुक्षा विसृक्पदी। ता वज्रेण समर्पयय न्तिरजेत श्शचीपतेः।। 2।।

卐17.13.3 उत्तिष्ठतः निर्द्रवत न व इहास्ति न्यञ्चनम्। इन्द्रो वस्सर्वासां साकं गर्भानाण्डानि भेत्स्यति।। 3।।

卐17.13.4 इन्द्र जहि स्थूरशङ्कं मृणीहि दुन्निशीङ्कुहम्। अरायां शकधूम्यं नाशयाम स्सदान्वाः।। 4।।

卐17.13.5 किमासुता ध्वग्निह्यमजमायुञ्च निघ्नतीः। विटिटिङ्गाः प्रतोदिनी र्नाशयाम स्सदान्वाः।। 5।।

卐17.13.6 यस्यां सुतं रन्धयद्धेयुं यं भण्वा स्सदान्वाः। त्रिष्ठं कृणुतान्दुरं य भारसेन तृप्यतामसुरापव मे हिता।। 6।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐17.13.7 तस्याः पित्वावमन्यतेऽथो शीर्षक्याशये। ता एतान्न दूषणीं नाशयाम स्सदान्वाः।। 7।।
卐17.13.8 अपारोगाञ्छकधूमान् वृक्षाणां यान्ति सत्वरम्। अथो दुर्हादसो गृहं प्रविशन्त्वरायाः।। 8।।
卐17.13.9 तासामेकात्म वृका शकावङ्का वने क्रुकुहि शनीका कनिक्रदा। सर्वासां भण्वाव स्साकं नामधेयानि विद्मसि। यानि जातानि दस्युभ्यो नश्यतेत स्सदान्वाः।। 9।।
卐17.13.10 सहस्वतीं प्रहरामीमां शालां विषासहिम्। सदान्वाघ्नी मोषधीं जैत्रायाच्छा वदामसि।। 10।। 17 - 14
卐17.14.1 दुश्शङ्काशे भीम चक्षो रनग्ने भण्वे सदान्वे। ध्राजिं त्विषिं शुचि मग्निमरायि कीमिहेक्षसे। धूममाभि प्र गाह्य निस्तूषामि सदान्वे।। 1।।
卐17.14.2 कङ्कौकाः पृषदेकाः किमुच्छ्र्य न्त्यभिश्रिया। चरन्ति नक्तं दुर्णाम्नो रायी सूतकीष्यस्ता इतो नाशयामसि।। 2।।
卐17.14.3 अपक्राता मभिश्रया मानृत्यन्ती कुतूहलम्। कुशूलियं रसभञ्जनी ज्ञ्वला ज्वातास्त्रि व्रूक्य स्ता इतो नाशयामसि।। 3।।
卐17.14.4 या विकेशीरुन्मृत्यो रोना घोरचक्षवः। शीर्षाण्या न्यान्यासां वितावन्ती रिवासते। सदान्वा ब्रह्मणस्पते पदो भ्रूणान्यर्पय।। 4।।
卐17.14.5 यासा ङ्गन्धो नानारूपः पर्यैति पुरुषं पति। ता अग्नि स्सहतामितो जातवेदा स्सदान्वा स्ता इतो नाशयामसि।। 5।।
卐17.14.6 याः पुरुषं दह्यमानं शून्यमग्नौ जिघत्सन्ति। याः पुरुषं दह्यमानं शून्यमग्नौ जिघत्सन्ति। भण्वान कुष्ठनामांसि मुष्टाग्रेण सदान्वा स्ता इतो नाशयामसि।। 6।।
卐17.14.7 या दुचिताऽऽवपने शुष्कं खदन्ति वष्मुषाम्। वडवा गर्दभीरिव नाशयामस्सदान्वाः।। 7।।
卐17.14.8 गर्भानेकः प्रतिमृशन् या अदन्ति सदान्वाः। उचितस्तन्वो स्त्रीया गावो आरोहिणीरिव ता इतो नाशयामसि।। 8।।
卐17.14.9 याः पित्र्या त्संभवन्तीन्द्रजान स्सदान्वाः। अपमृत्यु मिवाहन्तुं पुनस्ता प्रति दध्मसि।। 9।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐17.14.10 आमादिनी꣬ क्रूरादिनी रनग्नि दग्धादिनीः। अमुं परेभ्यो हुतं शवमत्त सदान्वाः। सव꣬ केवलाचार꣬ किमुशालास्युच्छ्रितः।। 10।। 17 - 15

卐17.15.1 या꣬ कुमारीर्या स्त्ववीरा युवतीर्या स्सदान्वाः। सर्वायन्तु कुरुटिनी꣬ कुलिना धेनु सर्पत्वरायी रषिभा हिताः।। 1।।

卐17.15.2 ताभ्यो रुद्रो वि सृज त्विषि मध्यघ घात्विनी। तास्ता हन्तु विद्युता वज्रेणा न पराधिना। तासान्त्वं शक्र मोच्छिष इन्द्र भण्वा꣬ फलिकुरुः।। 2।।

卐17.15.3 कुमारानेका स्थवीरां या अदन्ति प्रघातिनी। ता इन्द्रो हन्तु वृत्रहा यो देवो विश्वाद्रक्षांसि सेधति।। 3।।

卐17.15.4 याश्च दासीरसुराणां मनुष्येभ्यश्च या꣬ कृताः। उभयीस्ता꣬ परायन्तु परावतो नवति न्नाव्या अति।। 4।।

卐17.15.5 यासां घोषा स्सङ्गतानां वृकाणामिव गङ्गणः। प्रच ङ्कशा मयि वारं प्रयच्छन्तीं प्रतिग्रहा नाशयाम स्सदान्वाः।। 5।।

卐17.15.6 या निशां यथा स्थामाद्रात्री यक्षाणी प्रेरतो। अग्निष्ट्वा सर्वा सन्तोका विश्वा द्रक्षांसि सेधतु।। 6।।

卐17.15.7 या रुक्षीका꣬ ककिला न्ताप्सु जाता꣬ पुलिकयाः। गोपा आसामेको वेद यतो याता स्सदान्वा स्ता इतो नाशयामसि।। 7।।

卐17.15.8 गुरुछाया मूर्द्धार्यं शिशुमाकां प्रतिश्रुका। अति दुह्माव्युतरन्तीं व्यतुलिमाम्। सर्वाश्चण्डस निम्यो नाशयाम स्सदान्वाः।। 8।।

卐17.15.9 आवदन्तीं नामहूकां त्वं स्तनीकां वृङ्गपदीम्। उग्रिदन्ती मनामिकां नाशयाम स्सदान्वाः।। 9।।

卐17.15.10 वावदाका मल्भगासां विजव्रां लव्रूं बव्रुम्। अरायीं वातमेजयान् नाशयाम स्सदान्वाः।। 10। इत्येकानृच (सप्तदश)काण्डे तृतीयोऽनुवाकः 17 - 16

卐17.16.1 ददामित्येव ब्रूयादनुचैनामभूत्सत। वशां ब्रह्मभ्यो याचद्भ्यस्तत् प्रजावद् पत्यवत्।। 1।।

卐17.16.2 प्रजया स विक्रीणीते पशुभिश्चोपदस्यति। य आर्षेयेभ्यो याचद्भ्यो देवानाङ्गां न दित्सति।। 2।।

卐17.16.3 कुटयास्य सं शीर्यन्ते श्लोणया काटमर्दति। बण्डया दह्यन्ते गृहा꞉ काणया दीयते स्वम्।। 3।।

卐17.16.4 विलोहितो अधिष्ठानाच्छक्रो विन्दति गोपतिम्। तथा वशाया स्संविद्यं दुरदभ्ना ह्युच्यसे।। 4।।

卐17.16.5 यो अस्या꞉ कर्णावास्कुनोत्या स देवेषु वृश्चते। लक्ष्म कुर्व इति मन्यते कनीय꞉ कृणुते स्वम्।। 5।।

卐17.16.6 पदोरस्या अधिष्ठानाद् विक्लिन्दुर्णाम विन्दति। अनामनात्सं शीर्यन्ते या मुखेनोप जिघ्रति।। 6।।

卐17.16.7 यदस्या गोपतौ सत्या लोम ध्वांक्षो अजीहिडत्। तत꞉ किशोरा म्रियन्ते वत्सांश्च घातुको वृकः।। 7।।

卐17.16.8 यदस्या꞉ कस्मैचित् भोगाय बालान् कश्चित्प्रकृन्तति। तत꞉ कुमाराम्रियन्ते यक्ष्मश्चरत्य नामनात्।। 8।।

卐17.16.9 यदस्या꞉ पल्पूलनाय शकृद्दासी समस्यति। ततोऽपरूपं जायते तस्मादव्येष्य देनसः।। 9।।

卐17.16.10 जायमानाभि जायते देवान् स ब्राह्मणान् वशा। तस्माद्ब्रह्मभ्यो देयैषा तदाहुः स्वस्य गोपनम्।। 10।। 17 - 17

卐17.17.1 य एनां वनिमायन्ति तेषां देवकृता वशा। ब्रह्मज्येयं तदब्रुवन् य एनां नि प्रियायते।। 1।।

卐17.17.2 य एनां याचद्भ्यो आर्षेयेभ्यो न दित्सति। आ स देवेषु वृश्चते ब्राह्मणानाञ्च मन्यवे।। 2।।

卐17.17.3 यस्या न्यस्याद्वशा भोगो अन्यामिच्छेत तर्हि सः। हिंस्याददत्ता गोपतिं याचिताञ्च न दित्सति।। 3।।

卐17.17.4 यथा शेवाधिर्निहितो ब्राह्मणानां तथा वशा। तामेतदायन्ति यस्मिन् कस्मिंश्च जायते।। 4।।

卐17.17.5 स्वमेतदायन्ति यद्वशां ब्राह्मणा अभि। यथैतानन्यज्जीनिया देवास्या निरोधनम्।। 5।।

卐17.17.6 चरेदेवा त्रैहायना दविज्ञात गदा सती। वशाञ्च विद्यान्नारद ब्राह्मणास्तर्ह्येष्याः।। 6।।

卐17.17.7 य एनामवशामाह देवानान्निहितं निधिम्। उभौ तस्मै भवाशर्वौ परिक्रम्ये षुमस्यतः।। 7।।

卐17.17.8 दूरदभ्नैनमा शये याचिताञ्च न दित्सति। नास्मै कामा स्समृध्यन्ते यामदत्त्वा चिकीर्षति।। 8।।

卐17.17.9 योऽस्या उधो न वेदाथो अस्या स्तनानुत। उभये नैवास्मै दुहे दातुं चेदशक द्वशाम्।। 9।।

卐17.17.10 देवा वशां याचन्तिं मुखं कृत्वा ब्राह्मणम्। तेषां सर्वेषाम ददद्धेडं न्येति मानुषः।। 10।। 17 - 18

卐17.18.1 हेडं पशूनां न्येति ब्राह्मणेभ्योऽददद्वशाम्। देवानां निहितं भागं मर्त्त्यश्चेन्नि प्रियायते।। 1।।

卐17.18.2 यदन्ये शतं याचेयुर्ब्राह्मणा गोपतिं वशाम्। अथैतान्देवा अब्रुवन्नेवं ह विदुषो वशा।। 2।।

卐17.18.3 य एवं विदुषे दत्त्वाथान्यस्मै ददद्वशाम्। दुर्गातस्मा अधिष्ठाने पृथिवी सह देवता।। 3।।

卐17.18.4 देवावशाम याचन् यस्मिन्नग्रे अजायत। तामेतां विद्यान्नारद स्सह देवैरुदाजत।। 4।।

卐17.18.5 अनपत्यमल्प पशुं वशा कृणोतु पुरुषम्। ब्राह्मणैश्च याचिता मथैनान्नि प्रियायते।। 5।।

卐17.18.6 अग्नीषोमाभ्या ङ्कामाय मित्राय वरुणाय च। तेभ्यो याचन्ति ब्राह्मणास्तेभ्यो आवृश्चते ऽददत्।। 6।।

卐17.18.7 यावदस्या गोपति र्नोपश्रुणुयादृच स्स्वयम्। चरेदस्य तावद्गोषु नास्य श्रुत्वा गृहे स्यात्।। 7।।

卐17.18.8 यो अस्या ऋचो उपश्रुत्याथ गो ष्वचीचरत्। आयुश्च तस्य भूतिञ्च देवा वृश्चन्ति हीडिताः।। 8।।

卐17.18.9 वशा चरन्ति बहुधा देवानां निहितो निधिः। आविष्कृणुष्व रूपाणि यदा स्थाम जिघांसति।। 9।।

卐17.18.10 आविरात्मानं कृणुते यदा स्थाम जिघांसति। अथो ह ब्रह्मभ्यो वशा याञ्च्याय कृणुते मनः।। 10।। 17 - 19

卐17.19.1 मनसा सं कल्पयति तद्देवाङ्कपि गच्छति। अथोह ब्रह्माणो वशा मुप प्रयन्ति याचितुम्।। 1।।

卐17.19.2 स्वधा कारेण पितृभ्यो यज्ञेन देवताभ्यः। दानेन राजन्यो वशाया मातुर्हेडं न गच्छति।। 2।।

卐17.19.3 वशा राजन्य ते माता तथा संभूतमग्रशः। तस्य आहुरनर्पणं यद् ब्रह्मभ्यः प्रदीयसे।। 3।।

卐17.19.4 यदाज्यं प्रतिगृहीत मालुम्पेत्स्रुचोऽग्नये। एवाह ब्रह्मभ्यो वशा मग्नये वृश्चतेऽददत्।। 4।।

卐17.19.5 पुरोडाशवत्सा सुदुघा लोके अस्योप तिष्ठति। सास्मै सर्वान् कामान् दुहे वशा प्रददुषे बहून्।। 5।।

卐17.19.6 सर्वान् कामान्यमराज्ये वशा प्रददूषे दुहे। अथोहुर्नारकं लोकं निरुन्धानस्य याचिताम्।। 6।।

卐17.19.7 प्रवीयमाना चरति कृद्धा गोपतये वशा। वेहतं मा मन्यमानो मृत्योः पाशेषु बध्यताम्।। 7।।

卐17.19.8 यो वेहतं मन्यमानो गृहेषु पचते वशाम्। अप्यस्य पुत्रान् पौत्रांश्च याचयते बृहस्पतिः।। 8।।

卐17.19.9 महदेषाव तपति चरन्ती गोषु गौरपि। ततो ह गोपतये वशा ददुषे विषन्दुहे।। 9।।

卐17.19.10 प्रियं पशूनां भवति यद्ब्रह्मभ्यः प्रदीयते। अथो वशायास्तत् प्रियं यद्येवत्रा हवि स्स्यात्।। 10।। 17 - 20

卐17.20.1 या वशा उदकल्पयन् देवा यज्ञादुदेत्य। तासां विलिप्त्यं भीमा मुदाकुरुत नारदः।। 1।।

卐17.20.2 तां देवा अमीमांसन्त वशेयाम वशेति। तामब्रवी न्नारद एषा वशानां वशतमा।। 2।।

卐17.20.3 कति नु वशा नारद यास्त्वं वेत्थ मनुष्यजाः। कतमासां भीमतमा कस्या नाश्नीयादब्राह्मणः।। 3।।

卐17.20.4 विलिप्त्या बृहस्पते या च सूतवशा वशा। तासां नाश्नीयादब्राह्मणो य आशंसेत भूत्याम्।। 4।।

卐17.20.5 नमस्तेऽस्तु नारदानुष्ठु विदुषे वशा। कतमासां भीमतमा यामदत्वा पराभवेत्।। 5।।

卐17.20.6 विलिप्त्या बृहस्पते या च सूतवशा वशा। याः प्रयच्छेद् ब्रह्मभ्यः य आशंसेत भूत्याम्।। 6।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐17.20.7 त्रीणि वै वशा जातानि विलिप्त्यी सूतवशा वशा। ताः प्रयच्छेद् ब्रह्मभ्य स्सोऽनाव्रस्कः प्रजापतौ।। 7।।

卐17.20.8 एतद्वो ब्राह्मणा हविरिति मन्वीत याचितः। वशाश्चेदेनं याचेयुर्या भीमा ददुषो गृहे।। 8।।

卐17.20.9 देवा वशामुपा वदन्न नोऽदादिति हीडिताः। एताभिर् ऋग्भिर्भेदस्य तस्माद्वै स पराभवत्।। 9।।

卐17.20.10 उतैतां भेदो नाददाद्वशा मिन्द्रेण याचितः। तस्मात्त्वं देवा एनसोऽवृश्च न्नहमुत्तरे।। 10।।

卐17.20.11 ये वशाया अदानाय वदन्ति परिरापिणः। इन्द्रस्य मन्ववे जाल्मा आ वृश्चन्ते अचित्त्या।। 11।।

卐17.20.12 ये गोपतिं पराणीयाथाहुर्मा ददा इति। रुद्रस्यास्तां हेतिं ते परि यन्त्यचेतसः।। 12।।

卐17.20.13 यदि हुतां यद्यहुताममा च पचते वशाम्। देवान् स ब्राह्मणानृत्वा जिह्मो लोकान्निर् ऋच्छति।। 13। इत्येकानृच (सपतदशः) काण्डे चतुर्थोऽनुवाकः 17 - 21

卐17.21.1 असृङ्मांसं त्वचं पेष्टं संभरण मंसान् शरीरम्। अग्निः क्रव्यादत्त्व मुष्यायणस्यामुष्याः पुत्रस्य।। 1।।

卐17.21.2 प्रातर्यावद्भ्योः देवेभ्यस्सायं यावद्भ्यो देवेभ्यो विश्वदानीं यावद्भ्यो देवेभ्यः। अमुमामुष्यायण ममुष्याः पुत्रमा वृश्चामि।। 2।।

卐17.21.3 वैश्वानराय क्षिप्रधन्वने अमुमामुष्यायण ममुष्याः पुत्रमा वृश्चामि।। 3।।

卐17.21.4 क्षिप्रधन्वनः क्षिप्रहस्ता मुमामुष्यायण ममुष्याः पुत्रस्य हृदयं अकृन्मातस्थे प्रविध्य।। 4।।

卐17.21.5 इन्द्राग्निभ्यां प्रजापतये परमेष्ठिने सोमाय राज्ञे वरुणाय राज्ञे। पूष्णे धात्रे सवित्रे त्वष्ट्रे अमुमामुष्यायण ममुष्याः पुत्रमा वृश्चामि।। 5।।

卐17.21.6 उषसे अह्ने रात्रये सूर्याया मुमामुष्यायण ममुष्याः पुत्रमा वृश्चामि।। 6।।

卐17.21.7 वीरुद्भ्यौषधीभ्यो वनस्पतिभ्यो वानस्पत्येभ्योऽमुमा मुष्यायण ममुष्याः पुत्रमा वृश्चामि।। 7।।

卐17.21.8 अद्भ्योः मातरिश्वने द्यावापृथिवीभ्याममु मामुष्यायण ममुष्याः पुत्रमा वृश्चामि।। 8।।

卐17.21.9 इदावत्सराय परिवत्सराय संवत्सराय बृहते विश्वरूपाया मुमामुष्यायण ममुष्या॰ पुत्रमा वृश्चामि।। 9।।

卐17.21.10 अद्ध्य स्संवत्सराया मुमामुष्यायण ममुष्या॰ पुत्रमा वृश्चामि।। 10।। 17 - 22

卐17.22.1 दिग्भ्यो अन्तर्देशेभ्य आशाभ्य आशापालेभ्यो ऽमुमामुष्यायण ममुष्या॰ पुत्रमा वृश्चामि।। 1।।

卐17.22.2 ऋतुभ्यो आर्त्तवेभ्योऽधिपतिभ्य अधिपत्येभ्यो ऽमुऽमुमामुष्यायण ममुष्या॰ पुत्रमा वृश्चामि।। 2।।

卐17.22.3 ऋषिभ्य आर्षेयेभ्य अङ्गिरभ्य अङ्गिरसेभ्यो ऽथर्वभ्यो ऽथर्वणेभ्यो ऽमुमामुष्यायण ममुष्या॰ पुत्रमा वृश्चामि।। 3।।

卐17.22.4 वसुभ्य ऋद्रेभ्य आदित्येभ्यस्साध्येभ्य आप्तेभ्यो ऽमुमामुष्यायण ममुष्या॰ पुत्रमा वृश्चामि।। 4।।

卐17.22.5 मत्रऋद्भ्योऽश्विभ्यां ब्रह्मणे ब्रह्मणस्पत्ये ऽमुमामुष्यायण ममुष्या॰ पुत्रमा वृश्चामि।। 5।।

卐17.22.6 ये अम्भश्चकुर्ये अम्बरजिष्वव स्तेभ्य स्स्वकृद्ध्य स्स्वकारेभ्यो ऽमुमामुष्यायण ममुष्या॰ पुत्रमा वृश्चामि।। 6।।

卐17.22.7 ते स्वकृत स्स्वकारा अमुमामुष्यायणममुष्या॰ पुत्रं पराभावयन्तु।। 7।।

卐17.22.8 ये तपश्चकुर्ये जिष्णव स्तेभ्य स्तपस्स्कृद्ध्य स्तपस्कारेभ्यो ऽमुमामुष्यायण ममुष्या॰ पुत्रमा वृश्चामि।। 8।।

卐17.22.9 ते तपस्कृत स्तपस्कारा अमुमामुष्यायणममुष्या॰ पुत्रं पराभावयन्तु।। 9।।

卐17.22.10 ये ब्रह्मचकुर्ये ब्रह्मजिष्वव स्तेभ्य ब्रह्मकृद्ध्य ब्रह्मकारेभ्यो ऽमुमामुष्यायण ममुष्या॰ पुत्रमा वृश्चामि।। 10।।

卐17.22.11 ते ब्रह्मकृत ब्रह्मकारा अमुमामुष्यायण ममुष्या॰ पुत्रं पराभावयन्तु।। 11।।

卐17.22.12 अघारिणी ममुमघविद्धां विकेशीमुप प्रतिमा सोक्तान् देवमनुष्याः पश्यन्तु अमुमामुष्यायण ममुष्या॰ पुत्रं परा भावयन्तु।। 12।।

卐17.22.13 अलिक्लुशाका गृध्राः कङ्का स्सुवर्णा श्वापदा॰ पतत्रिणः। वयांसि शकुनयो ऽमुमामुष्यायण ममुष्या॰ पुत्रमादहने चरन्तु।। 13।। 17 - 23

卐17.23.1 एतदापः प्रवहता वद्यञ्च मलञ्च यत्। यद्वा दुष्ष्वप्न्यमारिमा यद्दचा नृतमूदिम। आपस्सप्त सुस्रवन्तीस्ता नो मुञ्चन्त्वंहसः।। 1।।

卐17.23.2 मुञ्चन्तु मा शपथ्यादथो वारुण्यादुत। अथो यमस्य पड्विषाद्विश्वस्माद्येव दुष्कृतात्।। 2।।

卐17.23.3 यामि शंसाद्युष्वप्न्याद् द्रुहो मा मुञ्चन्तु वरुणस्य पाशात्। मह्यमिन्द्रो वरुणो बृहस्पति स्सविता वर्चो आदधन्।। 3।।

卐17.23.4 भ्रातृव्यहं सपत्नहमसौ मे भ्रातृव्यंसौ सपत्नः। तं हन्मि तन्दुष्ष्वप्नेन विध्यामि तं उना इष्टायावेन विध्यामि। तं क्षेपितायवेन विध्यामि तमधराञ्चं मृत्युपथमपनुदामि।। 4।। 17 - 24

卐17.24.1 विद्मते स्वप्न जनित्रं पाप्मनः पुत्रोऽस्य भूत्याऽधिजातो यमस्य करणः। तं त्वा स्वप्न तथा विद्म। योऽभद्र स्स्वप्न स्स्वप्नमयः पापस्तं द्विषते प्र हिण्मः।। 1।।

卐17.24.2 तमस्मै गमयामस्तेनैनं विध्यामोऽभूत्यैनं विध्यामो निर्भूत्यैनं विध्यामः पराभूत्यैनं विध्यामो ग्राह्यैनं विध्यामस्तमस्यैनं विध्यामोऽग्नि नैनं क्रव्यादा वृश्चामः। देवानामेनं घोरैः क्रुरैः प्रेष्यैरभि प्रेष्यामो वैश्वानरस्यैनं दंष्ट्रयोरपि दध्मः।। 2।।

卐17.24.3 विद्मते स्वप्न जनित्र ङ्ग्राह्या पुत्रोऽसि निरृऋत्या अधि जातो यमस्य करणः। तन्त्वा स्वप्न तथा विद्म। योऽभद्र स्स्वप्न स्स्वप्नमय पापस्तं द्विषते प्र हिण्मः।। 3।।

卐17.24.4 विद्मते स्वप्न जनित्रं वरुणस्य पुत्रोऽसि वरुणान्याऽधि जातो यमस्य करणः। तन्त्वा स्वप्न तथा विद्म। योऽभद्र स्स्वप्न स्स्वप्नमय पापस्तं द्विषते प्र हिण्मः।। 4।।

卐17.24.5 विद्मते स्वप्न जनित्रमह्नः पुत्रोऽसि रात्र्याऽधि जातो यमस्य करणः। तन्त्वा स्वप्न तथा विद्म। योऽभद्र स्स्वप्न स्स्वप्नमय पापस्तं द्विषते प्र हिण्मः।। 5।।

卐17.24.6 विद्मते स्वप्न जनित्रन्दिवस्पुत्रोऽसि भूम्याऽधि जातो यमस्य करणः। तन्त्वा स्वप्न तथा विद्म। योऽभद्र स्स्वप्न स्स्वप्नमय पापस्तं द्विषते प्र हिण्मः।। 6।।

卐17.24.7 विद्मते स्वप्न जनित्रं वनस्पती तां पुत्रस्योषधिभ्योधि जातो यमस्य करणः। तन्त्वा स्वप्न तथा विद्म। योऽभद्र स्स्वप्न स्स्वप्नमय पापस्तन्द्विषते प्र हिण्मः।। 7।।

卐17.24.8 विद्मते स्वप्न जनित्रं वानस्पत्यानां पुत्रोऽसि वीरुद्भ्यो अधि जातो यमस्य करणः। तं त्वा स्वप्न तथा विद्म। योऽभद्रस्स्वप्नस्स्वप्नमय पापस्तन्द्विषते प्र हिण्मः।। 8।।

卐17.24.9 विद्मते स्वप्न जनित्रं तन्त्रियाः पुत्रोऽसि कोट्ययाऽधिजातो यमस्य करणः। तन्त्वा स्वप्न तथा विद्म। योऽभद्र स्स्वप्न स्स्वप्नमय पापस्तं द्विषते प्र हिण्मः।। 9।।

卐17.24.10 विद्मते स्वप्न जनित्रं रक्षसां पुत्रोऽस्योद्धवेभ्योऽधि जातो यमस्य करणः। तन्त्वा स्वप्न तथा विद्म। योऽभद्रस्स्वप्नस्स्वप्नमय पापस्तं द्विषते प्र हिण्मः।। 10।।

卐17.24.11 विद्मते स्वप्न जनित्रं गन्धर्वाणां पुत्रोऽस्यप्सरोभ्यो अधिजात यमस्य करणः। तं त्वा स्वप्न तथा विद्म। योऽभद्रस्स्वप्नस्स्वप्नमय पापस्तं द्विषते प्र हिण्मः।। 11।।

卐17.24.12 तमस्मै गमयामस्तेनैनं विध्यामोभूत्यैनं विध्यामो निर्भूत्यैनं विध्यामः पराभूत्यैनं विध्यामो ग्राह्यैनं विध्यामस्तमस्यैनं विध्यामोऽग्निनैनं क्रव्यादावृश्चामो देवानामेनं घोरैः क्रुरैः प्रेष्यैरभिप्रेष्यामो वैश्वानरस्यैनं द्रंष्ट्रयोरपिदध्मः।। 12।। 17 - 25

卐17.25.1 द्यावापृथिवी अहोरात्रे नक्षत्र एषः। इदमह ममुष्मिन्ना मुष्यायणे अमुष्याः पुत्रे दुष्ष्वप्न्यं व्रजेत्। यदस्मास्युत्याष्टादशकी।। 1।।

卐17.25.2 मा प्र गाम पथो वयं मा यज्ञादिन्द्र सोमिनः। मान्तस्थुर्नो अरातयः।। 2।।

卐17.25.3 यो यज्ञस्य प्रसाधनस्तन्तुर्देवेष्वा ततः। तमाहुतमशीमहि।। 3।।

卐17.25.4 नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत। दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शंसत।। 4।।

卐17.25.5 सा मा सत्योक्तिः परिपातु विश्वतो द्यावा च तत्र तत नन्नहानि च। विश्वमन्यन्नि विशते यदेजति विश्वाहापो विश्वाहोदेति सूर्यः।। 5।।

卐17.25.6 न ते अदेवः प्रदिवो वि वासति यदेतशेभिः प्रतरै रथर्यसि। प्राचीनमन्य दनुवर्त्तते रज उदन्येन ज्योतिषा याहि सूर्य।। 6।।

卐17.25.7 येन सूर्य ज्योतिषा वाधसे तमो जगच्च विश्वमभियर्षि भानुना। तेनास्मद्विश्वा मनिरामनाहुति मपामीवामप दुष्वप्न्यं सुव।। 7।।

卐17.25.8 विश्वामनिरा ममीवा मनाहुति ममुष्या मुष्यायणायामुष्याः पुत्राय प्रहिण्मः।। 8।। 17 - 26

卐17.26.1 द्यावापृथिवी वहतं दुष्ष्वप्न्यं परा वहतं दुष्ष्वप्न्यम्। अमुष्या मुष्यायणायामुष्याः पुत्राय प्रहिण्मः।। 1।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐17.26.2 वाता पवमानौ वहतं दुष्ष्वप्न्यं परा वहतं दुष्ष्वप्न्यम्। अमुष्या मुष्यायणायामुष्याः पुत्राय प्रहिण्मः।। 2।।

卐17.26.3 इन्द्राग्नी वहतन्दुष्ष्वप्न्यं परा वहतन्दुष्ष्वप्न्यम्। अमुष्या मुष्यायणायामुष्याः पुत्राय प्रहिण्मः।। 3।।

卐17.26.4 मित्रावरुणौ वहतं दुष्ष्वप्न्यं परा वहतं दुष्ष्वप्न्यम्। अमुष्या मुष्यायणायामुष्याः पुत्राय प्रहिण्मः।। 4।।

卐17.26.5 भवाशर्वौ वहतं दुष्ष्वप्न्यं परा वहतं दुष्ष्वप्न्यम्। अमुष्या मुष्यायणायामुष्याः पुत्राय प्रहिण्मः।। 5।।

卐17.26.6 देवाश्विना वहतं दुष्ष्वप्न्यं परा वहतं दुष्ष्वप्न्यम्। अमुष्या मुष्यायणायामुष्याः पुत्राय प्रहिण्मः।। 6।।

卐17.26.7 देवा मरुतो वहतं दुष्ष्वप्न्यं परा वहतन्दुष्ष्वप्न्यम्। अमुष्या मुष्यायणायामुष्याः पुत्राय प्रहिण्मः।। 7।।

卐17.26.8 देवाः पितरो वहतं दुष्ष्वप्न्यं परा वहतन्दुष्ष्वप्न्यम्। अमुष्या मुष्यायणायामुष्याः पुत्राय प्रहिण्मः।। 8।।

卐17.26.9 देव सूर्य वहतन्दुष्ष्वप्न्यं परा वहतन्दुष्ष्वप्न्यम्। अमुष्या मुष्यायणायामुष्याः पुत्राय प्रहिण्मः।। 9।।

卐17.26.10 देव चन्द्रमसो वहतन्दुष्ष्वप्न्यं परा वहतन्दुष्ष्वप्न्यम्। अमुष्या मुष्यायणायामुष्याः पुत्राय प्रहिण्मः।। 10।।

卐17.26.11 देवा नक्षत्राणि वहतन्दुष्ष्वप्न्यं परा वहतन्दुष्ष्वप्न्यम्। अमुष्या मुष्यायणायामुष्याः पुत्राय प्रहिण्मः।। 11।।

卐17.26.12 देवीरापो वहतन्दुष्ष्वप्न्यं परा वहतन्दुष्ष्वप्न्यम्। अमुष्या मुष्यायणायामुष्याः पुत्राय प्रहिण्मः।। 12।।

卐17.26.13 देवा विष्णो वहतन्दुष्ष्वप्न्यं परा वहतन्दुष्ष्वप्न्यम्। अमुष्या मुष्यायणायामुष्याः पुत्राय प्रहिण्मः।। 13।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐17.26.14 देव त्वष्टर्वह दुष्ष्वप्न्यं परा वहतन्दुष्ष्वप्न्यम्। अमुष्या मुष्यायणायामुष्याः पुत्राय प्रहिण्मः।। 14।।

卐17.26.15 देव धातर्वहतन्दुष्ष्वप्न्यं परा वहतन्दु ष्ष्वप्न्यम्। अमुष्या मुष्यायणायामुष्याः पुत्राय प्रहिण्मः।। 15।।

卐17.26.16 देवसवित र्वहतन्दुष्ष्वप्न्यं परा वहतन्दु ष्ष्वप्न्यम्। अमुष्या मुष्यायणायामुष्याः पुत्राय प्रहिण्मः।। 16।।

卐17.26.17 देव पूषन्वहतं दुष्ष्वप्न्यं परा वहतन्दु ष्ष्वप्न्यम्। अमुष्या मुष्यायणायामुष्याः पुत्राय प्रहिण्मः।। 17।।

卐17.26.18 देववृहस्पतेर्वहतन्दुष्ष्वप्न्यं परा वहतन्दु ष्ष्वप्न्यम्। अमुष्या मुष्यायणायामुष्याः पुत्राय प्रहिण्मः।। 18।।

卐17.26.19 देव प्रजापते वहतन्दुष्ष्वप्न्यं परा वहतन्दु ष्ष्वप्न्यम्। अमुष्या मुष्यायणायामुष्याः पुत्राय प्रहिण्मः।। 19।।

卐17.26.20 देव परमेष्ठीन् वहतन्दुष्ष्वप्न्यं परा वहतन्दु ष्ष्वप्न्यम्। अमुष्या मुष्यायणायामुष्याः पुत्राय प्रहिण्मः।। 20।।

卐17.26.21 अहोरात्रे वहतन्दुष्ष्वप्न्यं परा वहतन्दु ष्ष्वप्न्यम्। अमुष्या मुष्यायणायामुष्याः पुत्राय प्रहिण्मः।। 21। इत्येकानृच (सप्तदशः) काण्डे पञ्चमोऽनुवाकः 17 - 27

卐17.27.1 इन्द्रो वज्रमसिञ्चत वृत्राय हन्तवे। त्वष्टा वज्रमसिञ्चत वृत्राय हन्तवे।। 1।।

卐17.27.2 यो वज्र स्सो विश्वानरो यत्ते अग्नेर्वीर्यं स विश्वाषाडै यदारम्भ्रणं स वैश्वानरः।। 2।।

卐17.27.3 एतद्वा इदं सर्वं यदेतानि त्रीणि।। 3।।

卐17.27.4 विश्वानरो वौश्वानरो विश्वाषाट्।। 4।।

卐17.27.5 सर्वाण्येव पुण्याल्लोकानवरुन्द्धे सर्वाश्च देवता य एवं विद्वाननडुहो व्रतं बिभर्त्ति।। 5।। 17 - 28

卐17.28.1 तमादत्त वतमुदीशयत्त मुपामुपैति प्र भराणीति।। 1।।

卐17.28.2 सोम्यहस्तादमुच्यत दैवो वज्रः क्षुरः पवि स्सहस्रपुष्टिर्दिवस्पृशः।। 2।।

卐17.28.3 स संसिदानोतिष्ठद्धरुत्तरा भवन्वेतदिच्छन्।। 3।।

卐17.28.4 स समुद्रं प्राविशत्स समुद्रमदहत्।। 4।।

卐17.28.5 तस्मात् समुद्रो दुर्गरपि व वैश्वानरेण हि दग्धः।। 5।।

卐17.28.6 स शक्र उदक्रामत्सोऽध्यायतु दिशो वज्रै आसुरैः। सपद्य देवास्तरक्षति व्रतं चराणीति स व्रतमचरत्।। 6।।

卐17.28.7 सोऽणुꣳ कृशो भवति तस्मादणुꣳ कृशो व्रतचारी। भवत्यवडुयि कृशो भूत्वेन्द्रो असुरानुपावृङ्क्त।। 7।।

卐17.28.8 स परमेष्ठिनुपाधावत्। स प्रजापतिमुपाधावत्।।

卐17.28.9 स विष्णुमुपाधावत्। स गृहपतिमुपाधावत्।।

卐17.28.10 स विराजमुपाधावत्। स स्वराजमुपाधावत्।।

卐17.28.11 स सम्राजमुपाधावत्। सोऽहरात्रे उपाधावत्।।

卐17.28.12 सोऽर्धमासानुपाधावत्। स मासानुपाधावत्।।

卐17.28.13 स ऋतुनुपाधावत्। स आर्त्तवानुपाधावत्।।

卐17.28.14 स ऋषीनुपाधावत्। स आर्षेयानुपाधावत्।।

卐17.28.15 सोऽङगिरसानुपाधावत्। सो अथर्वणमुपाधावत्।।

卐17.28.16 सो आथर्वणानुपाधावत्।। 8।।

卐17.28.17 विश्वान्देवान्मरुद्गणान् तमन्दसान्दवं स्तोम प्रथममथेन्द्राग्नी तमुपामन्त्रयेते पुण्यया वाचा क्रुरया वाचा हहिष्या स साविल्यन्।।

卐17.28.18 अथैषामोपचामे निष्यसीति। स उपशाम्यत्। तस्माद् यो ब्रह्म वेदो तापस्स तं शमयति दोहयत् एवैनाम्।। 9।।

卐17.28.19 तमृक्सामाभ्यामुतो यजुषा यज्ञेन गायत्रेण वामेन वामदैव्येन च।। 10।।

卐17.28.20 एतद्वा इदं सर्वं यदृक्सामौ एताविन्द्रस्य बाहू। तमादत्त तं परुष्वा धत्ते। प्रजा वै समृद्धिमक्षतिं पशवꣳ परुंषि। प्रजामेव समृद्धिमक्षति मवरुन्द्धे य एवं वेद।। 11।। 17 - 29

卐17.29.1 स दिक्षु प्रत्यतिष्ठत्। दिश एव प्रतितिष्ठति य एवं वेद।। 1।। 17 - 30

卐17.30.1 स विश्वामाह्यक्रमत। एष वै विश्वाषाट् सौरे वासौ। एते वै सर्वे पुण्यलोका स्सर्वाश्च देवता स्स नाधारयत्। सर्वानेव पुण्याल्लोकानवरुन्द्धे। सर्वाश्च देवता य एवं वेद।। 1।। 17 - 31

卐17.31.1 स विश्वानरे ऽक्रमत्। एष वै वैश्वानरो यदन्तरिक्षं समुद्रः। एते वै पथयो देवयाना य स्सूर्यस्य रश्मयः। स॰ पथिषु देवयानेषु ध्रीयते प्र पथो देवयानान् जानाति य एवं वेद।। 1।। 17 - 32

卐17.32.1 स वैश्वानरे ऽक्रमत्। एष वै वैश्वानर उदयन्पवमानः। एते वै सर्वानुप्रसारो द्रुह्यते। स नाधारयत्। ध्रियन्ते ऽस्मिन् प्राणा य एवं वेद।। 1।। 17 33

卐17.33.1 स वृत्रे ऽक्रमत। तस्य वृत्रस्याङ्गा॰ पर्वाणि शरीराण्यभिद्यन्त। एतानि वै वृत्रस्याङ्गा॰ पर्वाणि शरीराणि। यदिमे पर्वतामस यत्र हृदा मनसा कामयेति। इह स राध्यते। तस्मै राध्यते। अस्यामेव प्रतिष्ठामायतनं विन्दते य एवं वेद।। 1।। 17 - 34

卐17.34.1 स देवानागच्छ त्तन्देवा अब्रुवन्नाशं सामेक्तन्मेति व्रतम्। आ हिरण्येषु पशुषु ग्राम्येष्वश्वेष्वेति। सोऽनड्वाह मुपाधावत्। तमनड्वानब्रवी त्किं मे प्रतीवाहो भविष्यसीति वरं वृणीष्वेति।। 1।।

卐17.34.2 स वरमवृणीत बुध्नलोकोऽसानि बुध्नस्य विष्टपे श्रिया इति। षोडशो वा इतोर्ध्वो लोको यद्बुध्नो लोको यद्बुध्नस्य विष्टपे श्रीयते य एवं वेद।। 2।। 17 - 35

卐17.35.1 अथाहीन आश्वत्थादब्रवीत्। न अब्राह्मण निद्यानि यादेनमश्नुणुन्ये जुष्टपूर्त्तेनं व्यभवानीति। कृता वा एषा मनुष्येषु तरति यदनड्वान् यदनड्व्रतीन्।। 1।।

卐17.35.2 य एवं विदुषो साधुकीर्ति य तीष्ठमेवास्य पूर्त्तिं मायां सं वृङ्क्ते। इन्द्रो वाग्रेषु रेष्वनड्वान् व्रत मचरत्त्वेष मिष्टपूर्तिमाया सं वृक्तानिन्द्रं ह्येनम्। सोऽनडुहो वत्त्वे क्रमत सर्वाल्लोकान् प्राजानात्।। 2।।

卐17.35.3 यावस्य पूर्वपादौ तौ पूर्वपक्षौ यावरपादौ तावपरपक्षौ। यावस्यौष्ठौ तौ पुरोडाशौ ये नासिके तौ स्रुवौ ये अस्याक्षौ तौ सूर्याचन्द्रमसौ ये निमेषा स्तावहोरात्रे यानि वक्षणानि ते सूर्यस्य रश्मयस्स द्रोणकलश श्शिरस्सोमो राजा मस्तिस्कः।। 3।।

卐17.35.4 ये ऽस्यश्रृङ्गे तद्दतं सत्यम्। ध्रुवं वा ऋतं सत्यम्। तस्मादेते ध्रुवे। ध्रुवमेवन्तं सत्यमनु प्रति तिष्ठति य एवं वेद।। 4। । 17 - 36

卐17.36.1 यावस्य कर्णौ सा श्रद्धा। चराऽचरा वै श्रद्धा तस्मात्कर्णौ मुहु र्वरीवर्जयति। श्रद्धतेऽस्मै श्राद्धानि यो भवति य एवं वेद।। 1।। 17 - 37

卐17.37.1 यास्य दक्षिणा हनु स्सा जुहूर्या दद्यासम्। या सव्या सो बव्रुन् य॰ कण्ठ स्सा ध्रुवा। अग्निरास्यं विद्युज्जिह्वा मऋतो दन्ता॰ पवमान॰ प्राणः।। 1।।

卐17.37.2 एषा वै मायामाहुर्वसोर्धारेति यदन्त्रगुदम्। वसोरेव धारां समृद्धि मक्षति मवरुन्द्धे य एवं वेद।। 2।। 17 - 38

卐17.38.1 यदस्य चर्म तदभ्रं यानि लोमानि तानि नक्षत्राणि। स्वे वर्षमुष्माणि ह्वारो यदोषधयश्च वनस्पतय श्चोवध्वम्।। 1।।

卐17.38.2 योऽस्य दक्षिणोर्धोस्तौ शारदौ मासौ यास्सव्यस्तौ हैमन्तौ। योऽस्य जघनार्ध स्तौ शैशिरौ मासौ यः पूर्वार्द्धस्तौ वासन्तौ।। 2।।

卐17.38.3 यदस्य पृष्ठ न्तौ ग्रैष्मौ मासौ यन्मध्यन्तौ वार्षिकौ। संवत्सरो वा एष संभृतो येनानड्वान् येन नडद्वतीन्।। 3।।

卐17.38.4 कल्पन्ते अस्मार्तवो नर्तूष्वा वृश्चतर्तूनां प्रियो भवति य एवं वेद।। 4।। 17 - 39

卐17.39.1 तपश्च वरश्च महश्च यशश्च यदस्मिन्नन्तर्ऋच स्सामानि यजूंषि ब्राह्मणम्। ब्रह्म चैव लोकश्चावरुन्द्धे ब्राह्मण वर्चसी भवति य एवं वेद।। 1।। 17 - 40

卐17.40.1 अथ यदस्मिन्नन्तः। शतं श्राद्धाश्शतं दीक्षा शतं यज्ञाश्शतं दक्षिणाश्शतं भूतयश्शतमभूतय श्शतन्निर्भूतयश्शतं पराभूतयश्शतं समृद्धयः।। 1।।

卐17.40.2 शतं सिन्ध्यानि शतं अब्गणानि शतं तमांसि शतं रुधिराणि। य एवं विदुषो साधुकीर्तय त्येतैरेवैनन्तमोभिः प्रोर्णोति। यदस्य प्राचीनन्नाभ्यास्तेन द्विषन्तमाविशति।। 2।।

卐17.40.3 अथ यदस्य प्रतीचीन नाभ्यास्तेन मृत्युं नाष्ट्रामवर्तं तरति प्रपथे देवयानां जानाति य एवं वेद।। 3।। 17 -41

卐17.41.1 अथ यदस्मिन्नन्तः। शतमर्द्धमासाश्शतं मासा श्शतमृतवश्शत मार्तवाः। शतमिदावत्सरा श्शतमनुवत्सरा श्शतं परिवत्सराश्शतं संवत्सराः।।

卐17.41.2 शतं ब्रह्माणि शतं कर्माणि शतं ज्योतींषि शतममृतानि। शतं प्राणा श्शतमपानाश्शतं व्यानाश्शतं समानाः। ज्योग्जीवती सर्वमायुरेति न पुरा जरसः प्र मीयते य एवं वेद।। 2।। 17 - 42

卐17.42.1 अथ यदस्मिन्नन्त श्शतं गायत्राश्शतं सान्हाश्शतं त्रिरात्राश्शतमतिरात्राः। शतमग्निष्टोमाश्शतं द्वादशाहाश्शतं षोडशिनश्शतं सर्वपृष्टाश्शतं राजसूयाश्शतं वाजपेयाश्शतं कामप्रास्सहस्त्रं सत्रायणानि।। 1।।

卐17.42.2 एष वा अनड्वान सर्वाङ्गस्सर्वात्मा सर्व परुस्सर्वपान्मध्यतꣳ प्रत्यतिष्ठात्। ऋक्सामाभ्या मुभयतो यजुषा यज्ञेन गायत्रेण ब्रह्मणा प्रथत उपरिष्ठात्। प्रथते प्रजया पशुभिर्गृहैर्धनेन य एवं वेद।। 2।। 17 - 43

卐17.43.1 इन्द्रो बलेनासि परमेष्ठी व्रतेन येन गौस्तेन वैश्वदेवः। योऽस्मान्द्वेष्टि यञ्च वयं द्विष्मस्तस्य प्राणान्सं बर्ह तस्य प्राणान्वि बर्ह।। 1।।

卐17.43.2 इन्द्रोऽसीन्द्रस्य रूपमसि प्रजापतिरसि परमेष्ठिरसि स्वरसि स्वर्गोऽसि स्वर्गो लोकोऽसि स्वर्गं मा लोकङ्गमय।। 2।।

卐17.43.3 येनास्यवहस्तेन यज्ञो येन वहति तेन लोकः। येनैनं पश्यति तेन विश्वो येनैनङ्गमयति तेन सर्वः येऽस्य पादा स्सा प्रतिष्ठा।। 2।।

卐17.43.4 प्रति तिष्ठसि प्रजया पशुभिर्गृहैर्धनेन य एवं विद्वाननडुहो व्रतं बिभर्ति।। 4। इत्येकानृच सप्तदशकाण्डे षष्ठोऽनुवाकः 17 - 44

卐17.44.1 नडमारोह न ते अत्र लोक इदं सीसं भागधेयन्त एहि। यो गोषु यक्ष्मꣳ पुरुषेषु यक्ष्मस्तेन त्वं साकमधराङ् परेहि।। 1।।

卐17.44.2 अघशंस दुश्शंस दुश्शंसौ करेणानुकरेण च। मृत्युंश्च सर्वांस्तेनेतो यक्ष्मांश्च निरजामसि।। 2।।

卐17.44.3 निरितो मृत्युं निरृर्तिं निर्यक्ष्म मजामसि। यो नो द्वेष्टि तमद्ध्यग्नेऽक्रव्याद् यं द्विष्मस्तन्ते प्रसुवामः।। 3।।

卐17.44.4 यद्यग्निः क्रव्याद्यदि वा व्याघ्रेमं गोष्ठमन्योका विवेश। तं माषाज्यं कृत्वा प्र हिणोमि दूरं स गच्छत्यप्सुषदो ऽप्यग्नीन्।। 4।।

卐17.44.5 यत्त्वा क्रुद्धाः प्रचक्रुर्मन्युना पुरुषे मृते। सुकल्पमग्ने तत्त्वया पुनस्त्वो द्दीपयामसि।। 5।।

卐17.44.6 पुनस्त्वादित्या रुद्रा वसवꣳ पुनर्ब्रह्माणो वसुनीतिरग्ने। पुनस्त्वा ब्रह्मणस्पति राधाद्दीर्घायुत्वाय शतशारदाय।। 6।।

卐17.44.7 योऽग्निꣳ क्रव्यात्प्र विवेश नो गृहमिमं पश्यन्नितर ञ्जातवेदसम्। तं हरामि पितृयज्ञाय दूरं स घर्ममिन्धां परमे सधस्थे।। 7।।

Sri Ganapati Sacchidananda Avadhoota Dattapeetham

卐17.44.8 क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्ञो ग्च्छतु रिप्रवाहः। इहैवायमितरो जातवेदा देवो देवेभ्यो हव्यं वहतु प्रजानन्।। 8।।

卐17.44.9 क्रव्यादमग्निमिषितो हरामि जनान्दंहन्तुं वज्रेण मृत्युम्। नि तं शास्मि गार्हपत्येन विद्वान्पितृणां लोकेऽपि भागोऽस्य।। 9।।

卐17.44.10 क्रव्यादमग्नि शशमानमुक्थ्यं प्र हिणोमि पथिभिः पितृयाणैः। मा देवयानैः पथिभिरा गा अत्रैवैधि पितृषु जागृहि त्वम्।। 10।। 17 - 45

卐17.45.1 समिन्धते सङ्कुसुकं स्वस्तये शुद्धा भवन्त श्शुचयः पावकाः। जहाति रिप्रमत्येन एति समिद्धो अग्निस्सु पुना पुनातु।। 1।।

卐17.45.2 देवोऽग्नि स्सङ्कसुको दिवस्पृष्ठा न्यारुहत्। मुच्यमानो निरंहसो मोह्यस्माङ् अशस्त्याः।। 2।।

卐17.45.3 अस्मिन् वयं सङ्कसुके अग्नौ रिप्राणि मृज्महे। अभूम यज्ञिया श्शुद्धाः प्र ण आयूंषि तारिषत्।। 3।।

卐17.45.4 सङ्कसुको विकसुको निरृथो यश्च निस्वरः। ते ते यक्ष्म सुवेदसो दूरद्दुर मुचुच्युवुः।। 4।।

卐17.45.5 अन्येभ्यस्त्वा पुरुषेभ्यः गोभ्यो अश्वेभ्यस्त्वा। क्रव्याद न्निर्णुदामस्यग्निं जीवितयोपनम्।। 5।।

卐17.45.6 यो नोऽश्वेषु वीरेषु यो गोषु योऽजाविषु। क्रव्यादं निर्णुदाम स्यग्नि र्योजनयोपनः।। 6।।

卐17.45.7 समिद्धोऽग्नि आहुत स नो माभ्यपक्रमीः। अत्रैव दीदिहि द्यवि ज्योक्च सूर्याय दृशे।। 7।।

卐17.45.8 यस्मिन्देवा असृजत यस्मिन् मनुष्या उत। तस्मिन् घृतस्तावो मृष्ट्वा त्वमग्ने दिवं रुह।। 8।।

卐17.45.9 सीसे मृड्ढ्वन्नडे मृड्ढ्व मग्नि स्सङ्कसुकश्च यः। अथो अव्यां रामायां शीर्षक्ति मुपबर्हणे।। 9।।

卐17.45.10 सीसे मलं सादयित्वा शीर्षक्ति मुपबर्हणे। अव्याम सिक्न्यां मृष्ट्वा शुद्धा भवन्तु यज्ञियाः।। 10।। 17 - 46

卐17.46.1 परं मृत्योऽनुपरेहि पन्थां यस्त एष इतरो देवयानात्। चक्षुष्मते श्रृण्वते ते ब्रवीमीही मे वीरा बहवो भवन्तु।। 1।।

卐17.46.2 इमे जीवा विमृतैरावव‍ृत्रन्नभूद्‌ भद्रा देवहूतिर्नो अद्य। प्राञ्चो अगाम नृतये हसाय सुवीरासो विदथमा वदेम।। 2।।

卐17.46.3 इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरो अर्थमेतम्‌। ज्योग्जीवन्त श्शरदः पुरुचीस्तिरो मृत्युन्दधतां पर्वतेन। 3।।

卐17.46.4 यथाहान्यनुपूर्वं भवन्ति यथर्तव ऋतुभिर्यन्ति साकम्‌। यथा नु पूर्वमपरो जहात्येवा त्वष्टरायूंषि कल्पयैषाम्‌।। 4।।

卐17.46.5 आ रोहतायुर्जरसं वृणाना अनुपूर्वं यजमाना यति स्थ। तान्वस्त्वष्टा सुयोनिमा सजोषा स्सर्वमायुर्नयतु जीवनाय।। 5।।

卐17.46.6 अश्मन्वती रीयते सं रभध्वं वीरयध्वं प्र तरता सखा यः। अत्रा जहीत ये असन्दुरेवा अनमीवानुत्तरे माभि वाजान्‌।। 6।।

卐17.46.7 उत्तिष्ठता प्र तरता सखायो ऽश्मन्वती स्यन्दते नदीयम्‌। अत्रा जहीत ये असन्नशिवा श्शिवान्‌ स्योनानुत्तरे माभि वाजान्‌।। 7।।

卐17.46.8 वैश्वदेवीं सूनृतामा रभध्वं शुद्धा भवन्त श्शुचयः पावकाः। अतिक्रामन्तो दुरितानि विश्वा शतं हिमा स्सर्ववीरा मदेम।। 8।।

卐17.46.9 उदीचीनैः पथिभि र्वायुमद्भि रतिक्रामन्तो दुरितान्‌ परेभिः। त्रिस्सप्तकृत्व ऋषयः परेता मृत्युं प्रत्यौहन्‌ पदयोपनेन।। 9।।

卐17.46.10 मृत्योः पदं योपयन्त एत द्राघीय आयुः प्रतरन्दधानाः। आसीना मृत्युन्नुदता सधस्थेऽथ जीवा विदथमा वदेम।। 10।। 17- 47

卐17.47.1 इमा नारीरविधवा स्सुपत्नीराञ्जनेन सर्पिषा सं विशन्तु। अनश्रवो अनमीवा स्सुरत्ना आ रोहन्तु जनयो योनिमग्रे।। 1।।

卐17.47.2 इमे वीरा अविधवास्सुजानय आञ्जनेन सर्पिषा सं स्पृशन्ताम्‌। अनश्रवोऽनमीवा स्सुरत्ना स्योनाद्योनेरधि तल्पं रुहेयुः।। 2।।

卐17.47.3 व्याकरोमि हविषाहमेतौ तौ ब्राह्मणा व्यहं कल्पयामि। स्वधां पितृभ्यो अजरां कृणोमि दीर्घेणायुषा समिमान्सृजामि।। 3।।

卐17.47.4 यो नोऽग्निः पितरो हृत्स्वन्त राविवेशामृतो मर्त्येषु। मय्यहन्तं प्रति गृह्णामि देवं मा सोऽस्मान्द्विक्षत मा वयन्तम्।। 4।।

卐17.47.5 अपावृत्याग्निं गार्हपत्यङ्क्व्यादाः प्रेत दक्षिणाः। प्रियं पितृभ्याऽऽत्मने ब्रह्मणे कृणुता प्रियम्।। 5।।

卐17.47.6 द्विभागधनमादाय प्र क्षिणात्यवर्त्त्या। अग्निः पुत्रस्य ज्येष्ठस्य यः क्रव्याद् निराहितः।। 6।।

卐17.47.7 यत्कृसते यद्वनुते यच्चव स्नेन विन्दते। सर्वं मर्त्यस्य तन्नास्ति क्रव्याच्चेद् निराहितः।। 7।।

卐17.47.8 अयज्ञियो हतवर्चा भवति नैनेन हविरत्तवे। छिनत्ति कृषिं गां धनं यं क्रव्यादनुवर्त्तते।। 8।।

卐17.47.9 मुहुर्गृध्यैः प्र वदत्यार्तिं मर्त्यो नीत्य च। क्रव्यादमग्निः रन्तिकादनुविद्वान् वितावति।। 9।।

卐17.47.10 ग्राह्या गृहा स्सं सृज्यन्ते यत् स्त्रीया म्रियते पतिः। ब्रह्मैव विद्वानेष्यो यः क्रव्यादन्निरादधत्।। 10।। 17- 48

卐17.48.1 यद्रिप्रं दुरितञ्चक्रुम यच्च दुष्कृतम्। आपो मा तस्माच्छुन्धन्त्वग्ने स्सङ्कसुकाच्च यत्।। 1।।

卐17.48.2 ता अधरादुदीचीराववृत्रन् प्रजानतीः पथिभिर्देवयानैः। पर्वतस्य ऋषभस्याधिपृष्ठे नवाश्चरन्ति सरितः पुराणीः। अग्नेऽक्रव्या न्निष्क्रव्याद न्नुदाः देव यजनं वह।। 2।।

卐17.48.3 इम ङ्क्रव्याद् प्रविवेशायं क्रव्यादमन्वगात्। व्याघ्रौ कृत्वा नानानन्तं हरामि शिवापरम्।। 3।।

卐17.48.4 अन्तर्धि देवानां परिधि र्मनुष्याणा मग्निर्गार्हपत्य उभयानन्तरा श्रितः। जीवानामग्ने प्र तिरदीर्घमायुः पितृणां लोकमुपयन्तु ये मृताः।। 4।।

卐17.48.5 सुगार्हपत्यो वितपन्नरातीरुषामृषां श्रेयसीं श्रेयसीं दधत्। सर्वानग्ने सहमानः सपत्ना नैषामूर्जं रयिमस्मासु धेहि।। 5।।

卐17.48.6 इममिन्द्रं वह्निं पप्रिमन्वारभध्वं स वो न विद्वान् विजहाति मृत्युम्। तेनाप हत शरुमापतन्तं तेन रुद्रस्य परि पातास्ताम्।। 6।।

卐17.48.7 अहोरात्रे अन्वेषि बिभ्रत् क्षेम्यस्तिष्ठन् प्रतरणस्सुवीरः। अनातुरा स्सुमनसस्तल्प बिभ्र ज्योगेव नः पुरुषगन्धि रेधि।। 7।।

卐17.48.8 ते देवेभ्यावृश्च्यन्ते पापं जीवन्ति सर्वदा। क्रव्याद् यानग्निरन्तिका दनुविद्वान्वितावति।।
8।।
卐17.48.9 प्रेव मनसा पतति मृहुरावर्तते पुनः। क्रव्याद्यानग्नि रान्तिकादश्व इवानु वपते नडम्।। 9।।
17 - 49
卐17.49.1 येऽश्रद्धया धनकाम्या क्रव्यादा समासते। ते वाऽन्येषां कुम्भीं पर्जादधतु सर्वदा।। 1।।
卐17.49.2 इषिकां जरतीमिष्ट्वा तिल्पिञ्जं दण्डनं नडम्। तानिन्द्र इध्मं कृत्वा यमस्याग्निनिनिरादधौ।।
2।।
卐17.49.3 अविः कृष्णा भागधेयं पशूनां सीसं क्रव्यादोऽपि चन्द्रन्त आहुः। माषाः पिष्टा भागधेयं हव्यं ते अरण्यान्या गह्वरं सचस्व।। 3।।
卐17.49.4 प्रत्यञ्चमर्कं प्रत्यर्पयित्वा प्रविद्वान् पन्थां वि ह्याचकार। परामीषा मसून्दिदेश दीर्घेणायुषा समिमान् दधामि।। 4।।
卐17.49.5 अनड्वाहं प्लवमन्वारभध्वं स वो निर्वक्षद्दुरिता दवद्यात्। आ रोहत सवितुर्नावं हिरण्यै ष्षड्भिरुर्वीभि रमतिं तरेम।। 5।।
卐17.49.6 गोभिष्टरेमा मतिं दूरेवां यवेन क्षुधं पुरुहूत विश्वाम्। वयं राजानः प्रथमा धनाना मरिष्टासो वृजनीभि स्तरेम।। 6।।
卐17.49.7 पूर्णन्नारी प्र हराभि कुम्भमपां रसमोषधीनां घृतस्य। इमान् पातृनमृतैरा समङ्धि स्थिरावीरा स्सुमनसो भवन्तु।। 7। इत्येकानृच सप्तदशकाण्डे सप्तमोऽनुवाकः 17 - 50
卐17.50.1 पुमान् पुंसोऽधि तिष्ठ चर्म तत्र ह्वयस्व यतमा प्रिया ते। यावन्तावग्रे प्रथमं समेयथु स्तद्वां वयो यमराज्ये समानम्।। 1।।
卐17.50.2 तावद्वां तेजस्तति वीर्याणि तावच्चक्षुस्ततिधा वाजिनानि। अग्नि श्शरीरं सचते यदैधो अधा पक्वान् मिथुना सं भवाथ।। 2।।
卐17.50.3 समस्मिंल्लोके समु देवयाने सं स्मा समेतं यमराज्ये। पूतौ पवित्रैरूप तद्धयेथां यद्यद्रेतो अधि वां संबभूव। 3।।
卐17.50.4 आपः पुत्रासो अभिसं विशध्वमिमञ्जीवं जीवधन्या स्समेत्य। तासां भजध्वममृतं यमाहुर्यमोदनं पचति वो जनित्री।। 4।।

卐17.50.5 यं व॰ पिता पचति यञ्च माता रिप्रान्निर्मुक्त्यै शमलाच्च वाचः। स ओदन श्शतधार स्स्वर्ग उभे व्याप नभसी महीत्वा।। 5।।

卐17.50.6 उभे नभसी उभयांश्च लोकान् ये यज्वनामभिजितास्स्वर्गाः। तेषां ज्योतिष्मा न्मधुमान् योऽग्रे तस्मिन्पूत्रैर्जरसि सं श्रयेथाम्।। 6।।

卐17.50.7 प्राचीं प्राचीं प्रदीशमारभेथामेतं लोकं श्रद्दधानास्सचन्ते। मिमाथां पात्रं तद्वां पूर्णमस्तु स वां पक्व॰ पितृयाणौ त्वामो यत्।। 7।।

卐17.50.8 दक्षिणान्दिश मभिनक्षमाणौ पर्यावर्त्तेथा मभिपात्रमेतत्। तस्मै वां यम॰ पितृभि स्सम्विदान॰ पक्काय शर्म बहुलं नि यच्छात्।। 8।।

卐17.50.9 प्रतीची दिशामियमिद्वरं वां यस्यां सोमो अधिपा मृडिता च। तस्यां मिमाथां सुकृत॰ परेथा मधा पक्केन सह सं भवेम।। 9।।

卐17.50.10 उत्तरं राष्ट्रं प्रजयोत्तरावद्दीशामुदीची कृणवन्नो अग्रम्। पाङ्क्तं छन्द॰ परुषो बभूव विश्वैर्विश्वाङ्गै स्सह सं भवेम।। 10।। 17 - 51

卐17.51.1 ध्रुवेयं विराण्नमो अस्त्वस्यै शिवा पुत्रेभ्य उत मह्यमस्तु। सा नो देव्यदिते विश्ववार इर्य इव गोपा अभिरक्ष पक्वम्।। 1।।

卐17.51.2 पितेवपुत्राङ् अभिसं स्वजस्व न श्शिवा नो वाता उप वान्तु शग्मा। यमोदनं पचतो देवतैह तन्न स्तप उत सत्यञ्च वेत्तु।। 2।।

卐17.51.3 यद्यत्कृष्ण श्शकुन एह गत्वात्सरं विषक्तं बिल आससाद। दासी वा यदार्द्रहस्ता समङ्क्त उलूखलं मुसलं शुन्धतापः।। 3।।

卐17.51.4 अयं ग्रावा पृथुबुध्नो वयोधा॰ पूत॰ पवित्रैरपहन्तु रक्षः। आ रोह चर्म महि शर्म यच्छ मा दम्पती पौत्रमघन्नि गाताम्।। 4।।

卐17.51.5 वनस्पतिस्सह देवैर्न आगन् रक्ष॰ पिशाचाँ अप वाधमानः। स उच्छ्रयातै॰ प्र वदाति वाचं तेन लोकाँ अभिसर्वाङ् जयेम।। 5।।

卐17.51.6 सप्त मेधान्पशव॰ पर्यगृह्णं य एषां मेधस्वानुतयश्चकर्श। त्रयस्त्रिंशद्देवता स्तान् सचन्ते स नस्स्वर्ग मभि नेषि लोकम्।। 6।।

卐17.51.7 स्वर्गं लोकमभि नो नयासि सञ्जायया सह पुत्रैस्स्याम। गृह्णामि हस्तमन्वेत्वत्र मा न स्तारी न्निरृतिर्मो अरातिः।। 7।।

卐17.51.8 ग्राहिं पाप्मानमति ताँ अयाम तमो व्यस्य प्र वदासि बल्गुः। वानस्पत्य उद्यतो माजीहिंसीर्मा तण्डुलं वि शरीद्देवयन्तम्।। 8।।

卐17.51.9 विश्वव्यचा घृतपृष्ठो भविष्य न्सयोनिर्लोक मुप याहि एतम्। वर्षवृद्धमुपयच्छ शूर्पन्तुषं पलावान् अपतद्विनक्तु।। 9।।

卐17.51.10 त्रयो लोका स्संमिता ब्रह्मणेन द्यौरेवासौ पृथिव्यन्तरिक्षम्। अंशून् गृभीत्वामनु संरभेथा मा प्यायन्तां पुनरायन्तु शूर्पम्।। 10।। 17 - 52

卐17.52.1 पृथग्रूपाणि बहुधा पशूनामेकरूपो भवति सं समृध्या। एतां त्वचं लोहिनीन्तां नुदेथाग्रावा शुन्धाति मलग इव वस्त्रा।। 1।।

卐17.52.2 जनित्रीव प्रति हृण्यासि सूनुं सन्त्वा दधामि पृथिवीं पृथिव्या। उखा꣡ कुम्भीर्वेद्यां सञ्चरन्तां यज्ञायुधै राज्येनातिषक्ता। 2।।

卐17.52.3 भूम्यां त्वा भूमिमधि धारयामि तनूस्समानी विकृता त एषा। यद्यद् द्युतं लिखितमर्पणञ्च तेन मा सुस्रोरपि तद्वपामि।। 3।।

卐17.52.4 अग्नि꣡ पचन्नक्षतु त्वा पुरस्ता दिन्द्रो अस्मा द्दक्षिणतो मरुत्वान्। सोमस्त्वा दृंहाद्धरणे प्रतीच्या उत्तरात्त्वा वरुणस्सं ददातै।। 4।।

卐17.52.5 आ यन्तु दिव꣡ पृथिवीं सचन्ते भूम्यास्सचन्ते उर्वन्तरिक्षम्। शुद्धास्सतीस्ता उ शुन्धन्त एव ता नस्स्वर्ग मभिलोकं नयन्तु।। 5।।

卐17.52.6 पूता꣡ पवित्रै꣡ पवन्ते अभ्राद्दिवं च यन्ति पृथिवीं च लोकान्। ता जीवला जीवधन्या꣡ प्रतिष्ठाः꣡ पात्र आसीक्ता꣡ पर्यग्नि रेनाम्।। 6।।

卐17.52.7 उतेव प्रभ्वीरुत संमितास उत शुक्रा श्शुचयश्चामृतासः। ता ओदनन्दंपतीभ्यां प्रशिष्टा आपश्शिक्षन्ती पचता सुनाथाः।। 7।।

卐17.52.8 उद्योधन्त्यभि वल्गन्ति तप्ता꣡ फेनमस्यन्ति बहुलाञ्च बिन्दून्। योषेव दृष्ट्वा पति मृत्वियायै तैस्तण्डुलै र्भवता समापः।। 8।।

卐17.52.9 संख्याता स्तोका॰ पृथिवीं सचन्ते प्राणापानैस्समिता ओषधीभिः। असंख्याता ओप्यमाना स्सुवर्णा स्सर्वं समापं शुचय श्शुचित्वम्।। 9।।

卐17.52.10 उत्थापय सीदतो बुध्न एना नद्भिरात्मान मभि सं सृजन्ताम्। अमासि पात्रैरुदकं यदेत न्मितास्तण्डुला॰ प्रदिशो यदीमाः।। 10।। 17 - 53

卐17.53.1 प्र यच्छ पर्शुन्त्वरया हरन्त्वहिंसन्त ओषधीर्दान्तु पर्वम्। सोमो यासां परिराज्यं बभूवामन्युता वीरुधो मे भवन्तु।। 1।।

卐17.53.2 नवं वर्हि रोदनाय स्तृणीत प्रियं हृदश्चक्षुषो वल्वस्तु। तत्र देवा स्सह दैवीर्विशन्त्विमं प्राश्नन्तु दक्षिणतो निषद्य।। 2।।

卐17.53.3 वनस्पते स्तीर्णमा सीद बर्हि रग्निष्टोमै स्संमितो देवताभिः। त्वष्ट्रेव रूपं सुकृतं स्वधित्यैना एहा॰ परि पात्रे ददृश्राम्।। 3।।

卐17.53.4 धर्त्तां ध्रियस्व धरुणे पृथिव्याऽच्युतन्त्वा देवताश्च्यावयन्तु। तन्दम्पती जीवन्तौ जीवपुत्रौ उद्वासयात॰ पर्यग्नि धानात्।। 4।।

卐17.53.5 षष्ठ्या शरद्भि॰ परिदध्म एतं स्व॰ पक्वेनाभ्यश्नवातैः। उपैनं पुत्रा पितरश्चसीदानिमं स्वर्गं गमयान्तमग्ने।। 5।।

卐17.53.6 सर्वान् समागा अभिजित्य लोकान्यावन्त॰ कामा स्समती तृपस्तान। विगाहेथा मायवनं च दर्वि रेकस्मिन् पात्रे अध्युद्धरैनम्।। 6।।

卐17.53.7 उपत्सृणीहि प्रथया पुरस्ताद्धृतेन पात्र मभिघारयेदम्। वाश्रेवोस्रा तरुणं स्तनस्यु मिमं देवासो अभिहिंकराथ।। 7।।

卐17.53.8 उपास्तरी रकरो लोकमेत मुरु॰ पृथुश्चा समस्स्वर्गः। तस्मिन्सुपर्णो महिषच्छ्रयातै देवा एनं देवताभ्य॰ प्र यच्छान्।। 8।।

卐17.53.9 यद्यज्जाया पचतित्वत्पर॰ पर॰ पतिर्वा जाये त्वत्तिरः। सन्तत्सृजेथां सह वां तदस्तु संराधयन्तौ सह लोकमेतम्।। 9।।

卐17.53.10 यावन्तो अस्या॰ पृथिवीं सचन्ते अस्मत्पुत्रा॰ परि ये संबभूवुः। सर्वांस्तान् उप पात्रे ह्वयेथा न्नाभिं जानाना श्शिशव स्समायान्।। 10।। 17 - 54

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐17.54.1 वसोर्या धारा मधुना समक्ता घृतेन मिश्रा अमृतस्य नाभयः। सर्वास्ता ऽवरुन्धे स्वर्ग ष्षष्ट्यां शरत्सु निधिपा अभीच्छात्।। 1।।

卐17.54.2 निधि न्निधिपा अभ्येनमिच्छा दनीश्वरा अभित स्सन्त्वन्ये। अस्माभिर्दत्तो निहितस्स्वर्ग स्त्रिभिः काण्डैस्त्रीन् स्वर्गानरुक्षत्।। 2।।

卐17.54.3 अग्नी रक्षस्तपतु यद्विदेवं क्रव्यात्पिशाच इह मा प्र पास्त। नुदाम एन मव रुध्मो अस्म दादित्या नो अङ्गिरस स्सचन्ताम्।। 3।।

卐17.54.4 आदित्येभ्यो अङ्गिरोभ्यो मध्विदं घृतेन मिश्रं प्रति वेदयामः। शुद्धहस्तौ ब्राह्मणस्या निहत्यैनं स्वर्गं सुकृतावपीतम्।। 4।।

卐17.54.5 इदं काण्डमुत्तमं प्रापमस्य यस्मा ल्लोकात्परमेष्ठी समाप। आ सिञ्च सर्पिर्घृतवत्समङ्ग्धेष भागो अङ्गिरसो नोऽत्र।। 5।।

卐17.54.6 सत्याय च तपसे देवताभ्य निधिं शेवधिं परि दध्म एतम्। मा नो द्युतेव गान्मा समित्यां मा स्मान्यस्मा उत्सृजता पुरा मत्।। 6।।

卐17.54.7 न किल्बिष मत्र नाधारो ऽस्ति न यन्मित्रै स्समममान एति। पक्तारं पक्वः पुनराविशास्यनूनं पात्रं निहितं नोऽस्तु।। 7।।

卐17.54.8 अहं पचाम्यहमि द्दामि ममेदु कर्मन् करुणेऽपि जायाः। कौमारो लोको अजनिष्ट पुत्रोऽन्वारभेथां वय उत्तरावत्।। 8।।

卐17.54.9 प्रियं प्रियाणां कृणवाम एतत्तमस्ते यन्तु यतमे द्विषन्ति। धेनुरनड्वा न्वयोवय यदन्यत्पौरुषेय मपमृत्युं नुदन्तु।। 9।।

卐17.54.10 समग्नयो विदुरन्योऽन्यं य ओषधीस्सचते यश्च सिन्धून्। यावन्तो देवा दिव्या तपन्ति हिरण्यं योतिर्दधतो बभूव।। 10।। 17 - 55

卐17.55.1 एषा त्वचां पुरुषे सं बभूवा नग्नास्सर्वे पशवो ये अन्ये। क्षेत्रेणात्मानं परि धापयाथो ऽमोतं वासो मुखमोदनस्य।। 1।।

卐17.55.2 यदक्षेषु वदसि यत्समित्यां यद्वा धने अनृतं वित्तकाम्या। समानन्तन्तुं सह संवसानौ तस्मिन् सर्वं शमलं सादयाथः।। 2।।



Sri Sachchidananda Avadhoota Datta Peetham • Mysore •

卐17.55.3 वर्षं वनुष्वापि गच्छ देवां स्त्वचो धूमं पर्युत्पातयासि। विश्वव्यचा विश्वकर्मा स्वर्गस्सयोनिर्लोकमुप याह्येतम्।। 3।।

卐17.55.4 तन्वं स्वर्गो बहुधा वि चक्रे यथा विद आत्म न्नन्यवर्णाम्। अपाजैत्कृष्णां रुशतीं पुनानो या लोहिनी तान्ते अग्नौ जुहोमि।। 4।।

卐17.55.5 प्राच्यै दिशे अग्नये ऽधिपतयेऽसिताय रक्षित्र आदित्यायेषुमते एतं परि दध्मः। तन्नो गोपाय न्त्वस्माकमैतोः दिष्टन्नो अत्र जरसे नि नेषत्। जरा मृत्यवे परि णो ददात्वथ पक्वेन सह सं भवेम।। 5।।

卐17.55.6 दक्षिणायै दिशे इन्द्रायाधिपतये तिरश्चिराजये रक्षित्रे वसुभ्य इषुमद्भ्य एतं परि दध्मः। तन्नो गोपायन्त्वस्माकमैतोः दिष्टन्नो अत्र जरसे नि नेषत्। जरा मृत्यवे परि णो ददात्वथ पक्वेन सह सं भवेम।। 6।।

卐17.55.7 प्रतीच्यै दिशे वरुणायाधिपतये पृदाकवे रक्षित्रे मित्रायेषुमत एतं परि दध्मः। तं नो गोपायन्त्वस्माकमैतोः दिष्टं नो अत्र जरसे नि नेषत्। जरा मृत्यवे परि णो ददात्वथ पक्वेन सह सं भवेम।। 7।।

卐17.55.8 उदीच्यै दिशे सोमायाधिपतये स्वजाय रक्षित्रे वातायेषुमत एतं परि दध्मः। तन्नो गोपाय न्त्वस्माकमैतोः दिष्टन्नो अत्र जरसे नि नेषत्। जरा मृत्यवे परि णो ददात्वथ पक्वेन सह सं भवेम।। 8।।

卐17.55.9 ध्रुवायै दिशे विष्णवे ऽधिपतये कल्माषग्रीवाय रक्षित्रे वीरुद्भ्य इषुमद्भ्य एतं परिदध्मः। तन्नो गोपाय न्त्वस्माकमैतोः दिष्टन्नो अत्र जरसे नि नेषत्। जरा मृत्यवे परि णो ददात्वथ पक्वेन सह सं भवेम।। 9।।

卐17.55.10 ऊर्ध्वायै दिशे बृहस्पतये ऽधिपतये श्वित्राय रक्षित्रेऽशनिभ्य इषुमतीभ्य एतं परि दध्मः। तन्नो गोपायन्त्वस्माकमैतोः दिष्टन्नो अत्र जरसे नि नेषत्। जरा मृत्यवे परि णो ददात्वथ पक्वेन सह सं भवेम।। 10। इत्येकानृचकाण्डे (सप्तदशकाण्डे)अष्टमोऽनुवाकः इत्यथर्ववेदे पैप्पलादसंहितायां (एकानृचकाण्डः) सप्तदशः काण्डस्समाप्तः

## ॐ अथ अष्टादशः काण्डः (महत्काण्डः)

18 - 1

卐18.1.1 सत्येनोत्तभिता भूमिस्सूर्येणोत्तभिता द्यौः। ऋतेनादित्यास्तिष्ठन्ति दिवि सोमो अधि श्रितः।। 1।।

卐18.1.2 सोमेनादित्या बलिनस्सोमेन पृथवी मही। अथो नक्षत्राणा मेषामुपस्थे सोम आहितः।। 2।।

卐18.1.3 सोमं मन्यते पपीवान् यत्सं पिंषन्त्योषधिम्। सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति पार्थिवः।। 3।।

卐18.1.4 आच्छद्विधानै र्गुपितो बार्हतैस्सोम रक्षितः। ग्राव्णामि च्छृण्वन्तिष्ठसि न ते अश्नाति पार्थिवः।। 4।।

卐18.1.5 चित्तिरावत् उपबर्हणं चक्षुराव दभ्यञ्जनम्। द्यौर्भूमिः कोश आसी द्यदयात्सूर्या पतिम्।। 5।।

卐18.1.6 रैभ्यासीदनुदेयी नाराशंसी न्योचनी। सूर्याया भद्रमिद्वासो गाथयैति परिस्कृता।। 6।।

卐18.1.7 स्तोमा आसन्प्रतिधयः कुरीरञ्छन्द ओपशः। सूर्याया अश्विना वराग्नि रासीत्पुरोगवः।। 7।।

卐18.1.8 सोमो वधूयुरभवदश्विनास्तामुभा वरा। सूर्यां यत् पत्ये शंसन्तीं मनसा सवितादात्।। 8।।

卐18.1.9 मनो अस्या अन आसीद् द्यौरासीदुत च्छदिः। शुक्रा वनड्वाहावास्तां यदयात्सूर्या पतिम्।। 9।।

卐18.1.10 ऋक्सामाभ्या मभिहितौ गावौ ते सामनावैताम्। श्रोत्रे ते चक्रे आस्तान्दिवि पन्था श्चराचरः।। 10।। 18 - 2

卐18.2.1 शुची ते चक्रे यात्या व्यानोऽक्ष आहतः। अनो मनस्मयं सूर्यारोहत् प्रयती पतिम्।। 1।।

卐18.2.2 सूर्याया वहतुः प्रागात्सविता यमवासृजत्। मघासु हन्यन्ते गावः फल्गुनीषु व्युह्यते।। 2।।

卐18.2.3 यदश्विना पृच्छमानावयातं त्रिचक्रेण वहतुं सूर्यायाः। क्वैकं चक्रं वामासीत् क्व देष्ट्राय तस्थथुः।। 3।।

卐18.2.4 यदयातं शुभस्पती वरेयं सूर्यामुप। विश्वेदेवा अनु तद्वाम जानन्पुत्रः पितरावव‍ृणीत पूषा।। 4।।

卐18.2.5 द्वे ते चक्रे सूर्ये ब्रह्माण ऋतुथा विदुः। अथैकं चक्रं यद् गुहा तदद्धातय इद् विदुः।। 5।।

卐18.2.6 प्र त्वा मुञ्चामि वरुणस्य पाशाद्येन त्वा बध्नात्सविता सुशेवाः। ऋतस्य योनौ सुकृतस्य लोके स्योनं ते अस्तु सह पत्यै वधु।। 6।।

卐18.2.7 अर्यमणं यजामहे सुबन्धुं पतिवेदनम्। उर्वारुकमिव बन्धनादितो मुञ्चन्तु मामुतः।। 7।।

卐18.2.8 प्रेतो मुञ्चन्तु मामुतस्सुबद्धाममुतस्करत्। यथेयमिन्द्र मिढ्वस्सुपुत्रा सुभगा सति।। 8।।

卐18.2.9 भगस्त्वेतो नयतु हस्त गृह्याश्विना त्वा प्र वहतां रथेन। गृहान्गच्छ गृहपत्नी यथासो वशिनी त्वं विद्थमा वदासि।। 9।।

卐18.2.10 इह प्रियं प्रजायै ते समृध्यतामस्मिन् गृहे गार्हपत्याय जागृहि। एना पत्या तन्वं सं स्पृशस्वाथ जिर्विर्विदथमा वदा3सि।। 10।। 18 - 3

卐18.3.1 इहैव स्तं मा वि यौष्टं दीर्घमायु र्व्यश्नुतम्। क्रीडन्तौ पुत्रैर्नप्तृभि र्मोदमानौ स्वे गृहे।। 1।।

卐18.3.2 पूर्वापरं चरतो माययैतौ शिशू क्रीडन्तौ परि यातोऽध्वरम्। विश्वान्यन्यो भूवना विचष्टे ऋतूं रन्यो विदधज्जायते नवः।। 2।।

卐18.3.3 नवो नवो भवति जायमानोऽह्नां केतु रुषसामेत्यग्रम्। भागं देवेभ्यो वि दधात्यायन् प्र चन्द्रमा स्तीरते दीर्घमायुः।। 3।।

卐18.3.4 परा देहि शामुल्यं ब्रह्मभ्यो वि भजा वसु। कृत्यैषा पद्वती भूत्वा जाया विशते पतिम्।। 4।।

卐18.3.5 नीललोहितं भवति कृत्यासक्तिर्व्यज्यते। एधन्ते अस्या ज्ञातयः पतिर्बन्धेषु बध्यते।। 5।।

卐18.3.6 अश्लीला तनूर्भवति रुशति पापयामुया। पतिर्यद्वध्वो वासस स्स्वमङ्ग मभ्यूर्णुते।। 6।।

卐18.3.7 आशसनं विशसन मथोऽधि विकर्तनम्। सूर्यायाः पश्य रूपाणि तानि ब्रह्मोत शुन्धति।। 7।।

卐18.3.8 तृष्टमेतत् कटुकमपाष्ठवद् विषवन्नै तदत्तवे। सूर्यां यो ब्रह्मा वेद स इद्वाधूयमर्हति।। 8।।

卐18.3.9 स वै तत्स्योनो हरति ब्रह्मा वास स्सुमङ्गलम्। प्रायश्चित्तिं योऽध्येति येन जाया न रिष्यति।। 9।।

卐18.3.10 युवं भगं सं भरत स्समृद्ध मृतं वदन्ता वृतोद्येन। ब्रह्मणस्पते पतिमस्यै रोचयामुं चारु सम्भलो वदतु वाचमेताम्।। 10।। 18 - 4

卐18.4.1 इहेदसाथ न परो गमाथेमं गाव꠳ प्रजया वर्धयाथ। शुभं यतीरुस्त्रिया स्सोमवर्चसो विश्वेदेवा꠳ क्रन्निह वो मनांसि।। 1।।

卐18.4.2 इमं गाव꠳ प्रजया सं विशाध्वमयं देवानानन मिनाति भागम्। अस्मै व꠳ पूषा मरुतश्च सर्वे अस्मै वो धाता सविता सुवाति।। 2।।

卐18.4.3 अनृक्षरा ऋजव स्सन्तु पन्था नो येभि स्सखायो यन्ति नो वरेयम्। सं भगेन समर्यम्णा सं धाता सृजतु वर्चसा नः।। 3।।

卐18.4.4 येन महानघ्न्या जघनमश्विना येन वा सुरा। येनाक्षा अभ्यषिञ्चन्त तेनेमां वर्चसावतम्।। 4।।

卐18.4.5 यद्वर्चो अक्षेषु सुरायाञ्च यदाहितम्। यद्गोष्वश्विना वर्चस्तेनेमां वर्चसावतम्।। 5।।

卐18.4.6 यो अनिध्मो दीदायाप्स्वन्तर्यं विप्रास ईडते अध्वरेषु। अपान्नपा न्मधुमती रपोदा याभिरिन्द्रो वावृधे वीर्यावान्।। 6।।

卐18.4.7 इदमहं रुशन्तं ग्राभन्तनू दूषिमपि नुदामि। यश्शिवो भद्रो रोचन स्तमुदचामि।। 7।।

卐18.4.8 आस्यै हरन्तु स्नपनीर्ब्राह्मणा अवीरघ्नीरुदजन्त्वापः। अर्यम्णो अग्निं पर्येतु क्षिप्रं प्रतीक्षन्ते श्वशुरा देवरश्च।। 8।।

卐18.4.9 शन्ते हिरण्यं शमु सन्त्वाप श्शन्ते मेथिर्भवतु शं युगस्य तर्द्म। शन्त आपश्शतपवित्रा भवन्तु शं पत्या तन्वं सं स्पृशस्व।। 9।।

卐18.4.10 यथा सिन्धुर्नदीनां साम्राज्यं सुषुवे वृषा। एवा त्वं सम्राज्ञेधि पत्युरस्तं परेत्य।। 10।। 18 - 5

卐18.5.1 सम्राज्ञेधि श्वशुरेषु सम्राज्ञुत श्वश्रुवाम्। ननान्दु स्सम्राज्ञेधि सम्राज्ञुत देवृषु।। 1।।

卐18.5.2 या अकृन्तन्नवयन् याश्च तत्निरे या देवीरन्ताँ अभितोऽददन्त। तास्त्वा जरसे संव्ययन्त्वायुष्मतीदं परि धत्स्व वासः।। 2।।

卐18.5.3 जीवं रुदन्ति वि नयन्त्यध्वरन् दीर्घामनु प्रसितिन्दीध्युर्नरः। वामं पितृभ्यो य इदं समीरिरे मयꣳ पतिभ्यो जनये परिष्वजे।। 3।।

卐18.5.4 ध्रुवं स्योनं प्रजायै ते धारयाम्यश्मानं देव्याꣳ पृथिव्या उपस्थे। तमारोहा नुमाद्या सुवीरा दीर्घन्त आयु स्सविता कृणोतु।। 4।।

卐18.5.5 देवस्ते सविता हस्तं गृह्णातु सोमो राजा सुप्रजसं कृणोतु। अग्निस्सुभगां जातवेदाꣳ पत्ये पत्नीं जरदष्टिं कृणोतु।। 5।।

卐18.5.6 गृह्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः। भगो अर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हं पत्याय देवाः।। 6।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐18.5.7 येनाग्निरस्या भूम्या हस्तं जग्राह दक्षिणम्। तेन गृह्णामि ते हस्तं मा व्यथिष्ठा मया सह।। 7।।

卐18.5.8 धाता ते हस्तमग्रही त्सविता हस्तमग्रहीत्। भगस्ते हस्तमग्रहीदर्यमा ते हस्तमग्रहीत्। पत्नी त्वमसि धर्मणाहं गृहपतिस्तव।। 8।।

卐18.5.9 ममेयमस्तु पोष्या मह्यन्त्वादाद् बृहस्पतिः। मया पत्या प्रजावति सञ्जीव शरदश्शतम्।। 9।।

卐18.5.10 त्वष्टा वासो व्यदधाच्छुभे कं बृहस्पते॰ प्रशिषा कवीनाम्। तेनेमान्नारीं सविता भगश्च सूर्यामिव परि धत्तां प्रजया।। 10।। 18 - 6

卐18.6.1 गृहास्त्वा प्रोर्णुवन्त वर्चसा भगेन ज्योतिष्मतीदं प्रति मुञ्चस्व वपुः। उषा इव सूर्यस्य सन्दृशि।। 1।।

卐18.6.2 इन्द्राग्नी द्यावापृथिवी ह पूषा मित्रावरुणा भगो अश्विनोभा। बृहस्पतिर्मरुतो ब्रह्म सोम इमां नारीं प्रजया वर्धयन्तु।। 2।।

卐18.6.3 बृहस्पति॰ प्रथम स्सूर्याया श्शीर्षे केशाँ अकल्पयत्। तेनेमा मश्विना नारीं पत्या सं शोभयामसि।। 3।।

卐18.6.4 इदन्तद्रूपं यदवस्त योषा जायां जिज्ञासे मनसा चरन्तीम्। तामन्वर्तिष्ये सखिभि र्नवग्वै॰ क इमं विद्वान् वि चचर्त्त पाशम्।। 4।।

卐18.6.5 अहं विष्यामि मयि रूपमस्या वेददित्पश्य न्मनस॰ कुलायम्। नस्तेयमद्मि मनसोदमुच्चे स्वयं श्रथ्नानो वरुणस्य पाशम्।। 5।।

卐18.6.6 इमं वि ष्यामि वरुणस्य पाशं येन त्वाबध्नात्सविता सुशेवाः। उरुं लोकं सुगमत्र पन्थां कृणोमि तुभ्यं सहपत्न्यै वधु।। 6।।

卐18.6.7 उद्यच्छध्वमप रक्षो ह नाथेमां नारीं सुकृते दधात। धाता विपश्चित्पतिमस्यै विवेद् भगो राजा पुर एतु प्रजानम्।। 7।।

卐18.6.8 भगस्ततक्ष चतुर॰ पदो भगस्ततक्ष चत्वार्युष्पलानि। त्वष्टापिपेश मध्यतो वध्रान्सा नो अस्तु सुमङ्गली।। 8।।

卐18.6.9 येनाज्येन हविषा प्रजायै च वरेण्यम्। पशुभ्यः चक्षुषे च कंसमग्निं समिधीमहि।। 9।।

卐18.6.10 सु किंशुकं बहतुं विश्वरूपं हिरण्यवर्णं सुवृतं सुचक्रम्। आ रोह सूर्ये अमृतस्य लोकं स्योनं पतिभ्यो वहतुं कृणु त्वम्।। 10।।

卐18.6.11 मा हिंसिष्टं कुमार्यं स्थूणे देवकृते पथि। शालाया देव्या द्वारं स्योनं कृण्मो वधू पथम्।। 11।।

卐18.6.12 ब्रह्मापरं युज्यतां ब्रह्म पूर्वं ब्रह्मान्ततो मध्यतो ब्रह्म सर्वतः। अनाव्याधां देवपुरां प्रपद्य शिवा स्योना पतिलोके वि राज।। 12। इति अष्टादशकाण्डे प्रथमोऽनुवाकः 18 - 7

卐18.7.1 तुभ्यमग्रे पर्यवहन् सूर्यां वहतु ना सह। स न॰ पतिभ्य जायान्दा अग्ने प्रजया सह।। 1।।

卐18.7.2 पुन॰ पत्नीमग्निरदा दायुषा सह वर्चसा। दीर्घायुरस्या य॰ पतिर्जीवाति शरद श्शतम्।। 2।।

卐18.7.3 सोमस्य जाया प्रथमं गन्धर्वस्तेऽपर॰ पतिः। तृतीयोऽग्निष्टे पतिस्तुरीयो मनुष्यजाः।। 3।।

卐18.7.4 सोम ददद् गन्धर्वाय गन्धर्वो दददग्नये। रयिं च पुत्रां श्चादा दग्निर्मह्यमथो इमाम्।। 4।।

卐18.7.5 आ वा मगन् सुमतिर्वाजिनी वसू न्यश्विना हृत्सु कामा अरंसत्। अभूतङ्गोपा मिथुना शुभस्पती प्रिया अर्यम्णो दुर्यामशीमहि।। 5।।

卐18.7.6 सा मन्दसाना मनसा शिवेन रयिं धेहि सर्ववीरं वचस्यम्। सुगन्तीर्थं सुप्रमाणं शुभस्पती स्थाणुं प्रथिष्टामप दुर्मतिं हतम्।। 6।।

卐18.7.7 अपरक्षांस्यप दुर्मतिं हतं शुभस्पती वहतोर्यातो अस्मात्। पुरोगवो जनयन् रक्षांस्यग्ने क्षेत्र वि पूर्वो वि मृधो नुदस्व।। 7।।

卐18.7.8 या ओषधयो या नद्यो यानि क्षेत्राणि या वना। ते त्वा वधु प्रजावतीं पत्ये रक्षन्तु रक्षसः।। 8।।

卐18.7.9 एमं पन्था मगन्म सुगं स्वस्ति वाहनम्। यत्र वीरो न रीष्य त्यन्येषां विन्दते वसु।। 9।।

卐18.7.10 इदं सु मे नरश्शृणुत ययाशिषा दम्पती वाममश्नुतः। ये गन्धर्वाप्सरसश्च देवी रेषु वानस्पत्येष्वध्या धितस्थुः। स्योनास्ते अस्यै वध्वै भवन्तु मा हिंसिषुर्वहतुमुह्यमानम्।। 10।। 18 - 8

卐18.8.1 ये वध्वश्चन्द्रं वहतु यक्ष्मा यन्तु जनाँ अनु। पुनस्तान् यज्ञिया देवा नयन्तु यत आगताः।। 1।।

卐18.8.2 मा विदन्परि पन्थिनो य आसीदन्ति दम्पती। सुगेन दुर्गमती तामप द्रान्त्वरातयः।। 2।।

卐18.8.3 सङ्काशयामि वहतुं ब्रह्मणा गृहै रघोरेण चक्षुषा मित्रियेण। पर्याणद्धं विश्वरूपं यदस्मिन् स्योनं पतिभ्य स्सविता कृणोतु तत्।। 3।।

卐18.8.4 शिवा नारी यमस्तमाग न्निमं धाता लोकमस्यै विवेद। तामर्यमा भगो अश्विनोभाः प्रजापतिः प्रजया वर्धयन्तु।। 4।।

卐18.8.5 आत्मन्वत्युर्वरा नारी यमागन्त स्यान्नरो वपत बीजमस्याम्। सा वः प्रजां जनयद् वक्षणाभ्यो बिभ्रती दुग्धमृषभस्य रेतः।। 5।।

卐18.8.6 प्रति तिष्ठ विराडसि विष्णुरिवेह सरस्वती। दुर्वैवेन्द्र प्र जायतां भगस्य सुमतावसत्।। 6।।

卐18.8.7 उद्व ऊर्मि श्शम्ये हन्त्वापो योक्त्राणि मुञ्चन्तु। मा दुस्कृतौ व्येनसावघ्न्या वशूनमारताम्।। 7।।

卐18.8.8 अघोरचक्षुरपतिघ्नी स्योना शग्मा सुशेवा सुयमा गृहेषु। प्रजावती वीरसुर्देवृकामे ममग्निं गार्हपत्यं सपर्य।। 8।।

卐18.8.9 अदेवृघ्न्य पतिघ्नीहैधि स्योना पशुभ्य स्सुमना स्सुवीराः। वीरसुर्देवृकामा स्योना सन्त्वयैधि षीमहि सुमनस्यमाना।। 9।।

卐18.8.10 उत्तिष्ठेतः किमिच्छन्तीदमागा अहन्त्वेडे अभिभुस्स्वाद् गृहात्। शून्यैषी निरृत्ते याजगन्थो त्तिष्ठाराते प्र पत माति रंस्थाः।। 10।। 18 - 9

卐18.9.1 यदा गार्हपत्य मसपर्यै त्पूर्वमग्निं वधूरियम्। अधा सरस्वत्यै नारि पितृभ्यश्च नमस्कुरु।। 1।।

卐18.9.2 शर्म वर्मै तदाहरास्यै नार्या उपस्तरे। सिनीवाली प्र जायतां भगस्य सुमतावसत्।। 2।।

卐18.9.3 उपस्तृणीहि वल्वजमधि चर्मणि रोहिते। तत्रोपविश्य सुप्रजा इममग्निं सपर्यतु।। 3।।

卐18.9.4 यं वल्वजं न्यस्यथ चर्म चोप स्तृणीथन। तदा रोहतु सुप्रजा या कन्या विन्दते पतिम्।। 4।।

卐18.9.5 आ रोह चर्मोप सीदाग्निमेष देवो हन्तु रक्षांसि सर्वा। सुमङ्ग ल्युप सीदेम मग्निं सपत्नी प्रति भूषेह देवान्।। 5।।

卐18.9.6 प्र जायन्तां मातुरस्या उपस्था न्नानारूपाः पशवो जायमानाः। इह प्रजाञ्जनय पत्येऽस्मै सुज्यैष्ठ्यो भवतु ते पुत्र एषः।। 6।।

卐18.9.7 सुमङ्गली प्रतरणीं गृहाणां सुशेवा पत्ये श्वशुराय शम्भूः। स्योना श्वश्रवै॰ प्रगृहान् विशेमान्प्रजावती जरदष्टिर्यथासः।। 7।।

卐18.9.8 सुमङ्गलीरियं वधूरिमां समेत पश्यत। सौभाग्य मस्यै दत्त्वा दौर्भाग्येन परेतना।। 8।।

卐18.9.9 या दुर्हार्दो युवतयो याश्चेह जरतीरपि। वर्चो ह्यस्यै संदत्ताथास्तं वि परेतन।। 9।।

卐18.9.10 ऋक्म प्रस्तरणं वह्यं विश्वारूपाणि विभ्रतम्। आरोहत् सूर्या सावित्री बृहते सौभगाय कम्।। 10।। 18 - 10

卐18.10.1 आ रोह तल्पं सुमनस्यमानेह प्रजाञ्जनय पत्येऽस्मै। इन्द्राणीव सुबुधा वुध्यमाना ज्योतिरग्रा उषस॰ प्रति जागरः।। 1।।

卐18.10.2 देवा अग्रेन्यपद्यन्त पत्नी स्समस्पृशन्त तन्वस्तनूभिः। सूर्येव नारि विश्वरूपा महित्वा प्रजावती पत्या संभवासि।। 2।।

卐18.10.3 उदीर्ष्वात॰ पतिवती ह्येषा विश्वावसुं मनसा गीर्भिरीडे। जामिमिच्छ पितृषद न्व्यक्तां स ते भागो जनुषा तस्य विद्धि।। 3।।

卐18.10.4 या अप्सरसस्सधमादं मदन्त्यन्तरा हविर्धानं सूर्यञ्च। तास्ते जनित्रमभि ता॰ परेहि नमस्ते गन्धर्वर्तुना कृणोमि।। 4।।

卐18.10.5 नमो गन्धर्वस्य नमसे नमो भामाय चक्षुषे च कृण्मः। विश्वावसो ब्रह्मणाते कृणोम्यभि जाया अप्सरस॰ परेहि।। 5।।

卐18.10.6 राया वयं सुमनस स्स्यामोऽदितो गन्धर्व मावीवृताम्। अगन्स देव॰ परमं सधस्थ मगन्म वयं प्रतिरन्त आयुः।। 6।।

卐18.10.7 सं पितरावृत्विये सृजेथां पिता माता च रेतसो भवाथ। मर्यो योषामधिरोहयैनां प्रजां कृण्वाथामिह मोदमानौ। 7।।

卐18.10.8 आ वां प्रजाञ्जनयतु प्रजापति रहोरात्राभ्यां समनक्त्वर्यमा। अदुर्मङ्गली पतिलोक मा विशेमं शन्नो भव द्विपदे शञ्चतुष्पदे।। 8।।

卐18.10.9 तान्पूष ञ्छिवतमा मे रयस्व यस्यां बीजं मनुष्या वपन्तु। या न ऊरू उशती विश्रयाते यस्यामुशन्त॰ प्रहरेम शेपः।। 9।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐18.10.10 आ रोहोरु मुपधत्स्व हस्तं परिष्वजस्व जायां सुमनस्यमानः। प्रजां कृण्वाथामिह पुष्यतं रयिन्दीर्घं त आयु स्सविता कृणोतु।। 10।। 18 - 11

卐18.11.1 यन्नो ददुर्ब्रह्मभागं वधू योर्वासो वध्वश्च वस्त्रम्। युवं ब्रह्मणेऽनु मन्यमानौ बृहस्पते साकमिन्द्रश्च दत्तम्।। 1।।

卐18.11.2 देवैर्दत्तं मनुना साकमेतद्वाधूयं वध्वो वासो अस्याः। यो ब्रह्मणे चिकितुषे ददाति स इ द्रक्षांसि तल्प्यानि हन्ति।। 2।।

卐18.11.3 स्योना द्योनेरधि वुध्यमानौ हसामुदौ महसा मोदमानौ। सुगू सुपुत्रौ सुगृहौ तराथो जीवावुषसो विभातीः।। 3।।

卐18.11.4 नवं वसान स्सुरभि स्सुवासा उदागाञ्जीव उषसो विभातीः। आण्डात् पतत्रीवामुक्षि विश्वस्मा देनसस्परि।। 4।।

卐18.11.5 शुंभनी द्यावापृथिवी अन्तिशुम्ने महिव्रते। आपस्सप्त स्रवन्तीस्ता नो मुञ्चन्त्वंहसः।। 5।।

卐18.11.6 सूर्यायै देवेभ्यो मित्राय वरुणाय च। भूतस्य प्रचेतस स्तेभ्योऽहमकरन्नमः।। 6।।

卐18.11.7 य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः। सन्धाता सन्धिं मघवा पुरु वसु र्निष्कर्त्ता विहृतं पुनः।। 7।।

卐18.11.8 अपास्मत्तम उच्छतु नीलं पिशङ्गमुत लोहितं यत्। निर्दहनीं या पृषातक्य स्मिन्तां स्थाणावध्या सृजामि।। 8।।

卐18.11.9 यावतीः कृत्या उपवासने यावन्तो राज्ञो वरुणस्य पाशाः। व्यृद्धयो या असमृद्धय श्चास्मिन्तां स्थाणौ प्रति मुञ्चामि सर्वाः।। 9।।

卐18.11.10 ये अन्ता यावतीस्सिच ओन्तवो ये च तन्तवः। वासो यत् पत्नीभिरुतं तन्ना स्योनमुप स्पृशात्।। 10।। 18 - 12

卐18.12.1 उशतीः कन्यला इमाः पितृलोकात् पतिं यतीः। अव दीक्षामसृजत स्वाहा।। 1।।

卐18.12.2 बृहस्पतिनावसृष्टां विश्वे देवा अधारयन्। वर्चो गोषु प्रविष्टं यत्तेनेमां सं सृजामसि।। 2।।

卐18.12.3 बृहस्पतिनावसृष्टां विश्वेदेवा अधारयन्। तेजो गोषु प्रविष्टं यत्तेनेमा सं सृजामसि।। 3।।

卐18.12.4 बृहस्पति नावसृष्टां विश्वे देवा अधारयन्। पयो गोषु प्रविष्टं यत्तेनेमा सं सृजामसि।। 4।।

卐18.12.5 बृहस्पति नावसृष्टां विश्वे देवा अधारयन्। यशो गोषु प्रविष्टं यत्तेनेमा सं सृजामसि।। 5।।

卐18.12.6 बृहस्पति नावसृष्टां विश्वे देवा अधारयन्। भगो गोषु प्रविष्टं यत्तेनेमा सं सृजामसि।। 7।।

卐18.12.7 यदसौ दुहिता तव विकेश्य रुदद्वहु रोदेन कृण्वत्यघम्। अग्निष्ट्वा तस्मादेनस स्सविता च प्र मुञ्चताम्।। 8।।

卐18.12.8 यदमी केशिनो जना गृहे ते समनर्तिषू रोदेन कृण्वन्तोऽघम्। अग्निष्ट्वा तस्मादेनस स्सविता च प्र मुञ्चताम्।। 9।।

卐18.12.9 यज्जामयो यद्युवतयो गृहे ते समनर्तिषु रोदेन कृण्वतीरघम्। अग्निष्ट्वा तस्मादेनस स्सविता च प्र मुञ्चताम्।। 10।।

卐18.12.10 यदिमौ दम्पती उभौ विवाहे अघमारुतो रोदेन कृण्वन्तावघम्। अग्निष्ट्वा तस्मादेनसस्सविता च प्र मुञ्चताम्।। 11।। 18 - 13

卐18.13.1 यत्ते प्रजायां पशुषु यद्वा गृहेषु निष्ठितमघकृद्भिरघं कृतम्। अग्निष्ट्वा तस्मादेनसस्सविता च प्र मुञ्चताम्।। 1।।

卐18.13.2 इयं नार्युप ब्रूते पूल्पान्यावपन्तिका। दीर्घायुरस्तु मे पतिरेधन्तां पितरो मम।। 2।।

卐18.13.3 इहेमाविन्द्र सं नुद चक्रवाकेव दम्पती। प्रजावन्तौ स्वस्तकौ दीर्घमायुर्व्यश्नुताम्।। 3।।

卐18.13.4 यदासन्द्यामुपधाने यद् वोपवासने कृतम्। विवाहे कृत्यां यां चक्रुरास्नाने तां निदध्मसि।। 4।।

卐18.13.5 यद्दुष्कृतं यच्छमलं विवाहे वहतौ च यत्। तत्सम्भलस्य कम्वले मृज्महे दूरितं वयम्।। 5।।

卐18.13.6 सम्भले मलं सादयित्वा कम्वले दुरितं वयम्। अभूम यज्ञियाश्शुद्धाꣳ प्र ण आयूंषि तारिषत्।। 6।।

卐18.13.7 या मे प्रियतमा तनू स्सा मे बिभाय वाससः। तस्याग्रे त्वं वनस्पते नीविं कृणुष्व मा वयं रिषाम।। 7।।

卐18.13.8 कृत्रिमꣳ कङ्कत श्शतदन् य एषः। अपास्याःꣳ केश्यं मलमप शीर्षण्यं लिखात्।। 8।।

卐18.13.9 अङ्गा दङ्गा द्वयमस्याऽप यक्ष्म न्नि धत्तन। तन्मा प्रापत् पृथिवीं मोत देवान्दिवं मा प्रापदुर्वन्तरिक्षम्।। 9।।

卐18.13.10 अपो मा प्रापन्मलमेतदग्ने यमं मा प्रापत्पितृंश्च सर्वान्। सन्त्वा नह्यामि पयसा पृथिव्यास्सं त्वा नह्यामि पयसौषधीनाम्। सन्त्वा नह्यामि प्रजया धनेन सा सन्नद्धा सनुहि वाजमेमम्।। 10।। 18 - 14

卐18.14.1 अमोहमस्मि सा त्वं द्यौरहं पृथिवी त्वम्। मनोऽहमस्मि वाक्त्वन्ताविह संभवाव प्रजा मा जनयावहै।। 1।।

卐18.14.2 जनियन्ति नोऽग्रवः पुत्रियन्ति सुदानवः। अरिष्टासस्सचेमहि बृहते वाजसातये।। 2।।

卐18.14.3 ये पितरो वधू दर्शा इमं वहतुमागमन्। तेऽस्यै वध्वै संपत्न्यै प्रजावच्छर्म यच्छन्तु।। 3।।

卐18.14.4 येदं पूर्वागन् रशनायमाना प्रजामस्यै द्रविणञ्चेह दत्त्वा। तां वहन्त्वगतस्याभि पन्थां विराडियं सुप्रजा अत्यजैषीत्।। 4।।

卐18.14.5 प्र वुध्यस्व सुबुधा वुध्यमाना दीर्घायुत्वाय शतशारदाय। गृहान्प्रेहि सुमनस्यमाना दीर्घन्त आयुस्सविता कृणोतु।। 5।।

卐18.14.6 वि ते मुञ्चामि रशनां वि रश्मीन् वि योक्राणि परिचर्त्तनानि च। अरिष्टास्मिन् ज्योतिषि शिवा गृहपतौ भव।। 6।।

卐18.14.7 स्योना भव श्वशुरेभ्य स्स्योना पत्ये गृहेभ्यः। स्योनास्यै सर्वस्यै दृशे स्योना पुष्टायैषां भव।। 7। इति अष्टादशकाण्डे द्वितीयोऽनुवाकः 18 - 15

卐18.15.1 उदेहि वाजिन् योप्स्वन्तरिदं राष्ट्रं प्र विश सुनृतावत्। यो रोहितो विश्वमिदञ्जजान स त्वा राष्ट्राय सुभृतं पिपर्तु। 1।।

卐18.15.2 उद्वाज आगन्यो ऽप्सन्त र्विश आ रोह त्वद्योनयो याः। सोमं दधानोऽप ओषधीर्गाश्चतुष्पदो द्विपद आ वेशयेह।। 2।।

卐18.15.3 यूयमुग्रा मरुतः पृश्निमातर इन्द्रेण युजा प्र मृणीत शत्रून्। आ वो रोहित श्शृणवत्सुदानव स्त्रिषप्तासो मरुतस्स्वादु संमुदः।। 3।।

卐18.15.4 रुहो रुरोह रोहित आ रुरोह गर्भो जनीनां जनुषा मुपस्थम्। ताभिस्संरब्धो अन्वविन्दत् षडुर्वी गातुं प्रपश्यन्निह राष्ट्रमाहाः।। 4।।

卐18.15.5 आ ते राष्ट्रमिह रोहितोऽहार्मृधो व्यास्थदभयन्ते अभूत्। तस्मै ते द्यावापृथिवी रेवतीभिः कामं दुहातामिह शक्वरीभिः।। 5।।

卐18.15.6 रोहित द्यावापृथिवी जजान तत्रतन्तुं परमेष्ठी ततान। तत्र शिश्रियेऽज एकपादो ऽदृंहद् द्यावापृथिवी बलेन।। 6।।

卐18.15.7 रोहित द्यावापृथिवी अदृंहत्तेन स्वस्तभितं तेन नाकः। तेनान्तरिक्षं विमिता रजांसि तेन देवा अमृतमन्वविन्दन्।। 7।।

卐18.15.8 वि रोहित अमृशद्विश्वरूपं समाकृण्वानः प्ररुहो रुहश्च। दिवं रुढ्वा महता महिम्ना सं ते राष्ट्रमनक्तु पयसा घृतेन।। 8।।

卐18.15.9 यास्ते रुहः प्ररुहो यास्त आरुहो याभिरापृणासि दिवमन्तरिक्षम्। तासां ब्रह्मणा पयसा वावृधानो विशि राष्ट्रे जागृहि रोहितस्य।। 9।।

卐18.15.10 यास्ते विशस्तपस स्संबभूवु र्वत्सं गायत्रीमनु ता इहागुः। तास्त्वा विशन्तु मनसा शिवेन सम्माता वत्सो अभ्येतु रोहितः।। 10।। 18 - 16

卐18.16.1 उर्ध्वो रोहितोऽधिनाके अस्थाद्विश्वारुपाणि जनयन् युवा कविः। तिग्मेनाग्निर्ज्योतिषा वि भाति तृतीये चक्रे रजसि प्रियाणि।। 1।।

卐18.16.2 सहस्रश्रृङ्गो वृषभो जातवेदा घृताहुत स्सोमपृष्ठ स्सुवीरः। मा मा हासीन्नाथितो नेत्वा जहानि गोपोषञ्च मे वीरपोषञ्च धेहि।। 2।।

卐18.16.3 रोहितो यज्ञस्य जनिता मुखञ्च रोहिताय वाचा श्रोत्रेण मनसा जुहोमि। रोहितं देवा यन्ति सुमनस्यमानास्स मा रोहैस्सामित्यै रोहयाति।। 3।।

卐18.16.4 रोहितो यज्ञं व्यदधाद्विश्वकर्मणे तस्मात्तेजांस्युप मेमान्यागुः। वोचेय न्ते नाभिं भुवनस्याधि मज्मानि।। 4।।

卐18.16.5 आ त्वा रुरोह बृहत्युत पङ्क्तिरा ककुद्वर्चसा विश्ववेदः। आ त्वा रुरोहो ष्णिहाक्षरो वषट्कार आ त्वा रुरोह रोहित रेतसा सह।। 5।।

卐18.16.6 अयं वस्ते गर्भं पृथिव्यान्दिवं वस्तेऽय मन्तरिक्षम्। अयं ब्रध्नस्य विष्टप स्स्वर्लोकान् समानशे।। 6।।

卐18.16.7 वाचस्पते पृथिवी न स्स्योना योनिस्तल्पा सुशेवा। इहैव प्राणस्सख्ये नोऽस्तु तन्त्वा परमेष्ठिन् पर्यग्निर्वर्चसा दधातु।। 7।।

卐18.16.8 वाचस्पत ऋतवः पञ्च वैश्वकर्मणा परि ये बभूवुः। इहैव प्राणस्सख्ये नोऽस्तु तन्त्वा परमेष्ठिन् परिरोहित वर्चसा दधातु।। 8।।

卐18.16.9 वाचस्पते सौमनसं मनश्च गोष्ठे नो गा रमय योनिषु प्रजाम्। इहैव प्राणस्सख्ये नोऽस्तु तन्त्वा परमेष्ठिन् पर्यहं वर्चसा दधामि।। 9।।

卐18.16.10 परि त्वा धात्सविता देवोऽग्निर्वर्चसा मित्रावरुणावभि त्वा। सर्वा अरातीरपक्रामन्नेहीदं राष्ट्रं कृणुहि सूनृतावत्।। 10।। 18 - 17

卐18.17.1 इयन्त्वा पृषतीरथे पृष्टिर्वहति रोहित शुभा यासि रिणन्नपः। तेनेमं ब्रह्मणस्पते रोहं रोहयोत्तमम्।। 1।।

卐18.17.2 अनुव्रता रोहिणी रोहितस्य सूरिस्सुवर्णा वृहती सुवर्चाः। त्वया वाजान्विश्वरूपाञ्जयेम तया विश्वाः पृतनाऽभि ष्याम।। 2।।

卐18.17.3 इदं सदो रोहिणी रोहितस्यासौ पन्थाः पृषती येन याति। ताङ्गन्धर्वाः कश्यपा उन्नयन्ति तां रक्षन्ति कवयोऽप्रमादम्।। 3।।

卐18.17.4 सूर्यस्याश्वा हरयः केतुमन्त स्सदा वहन्त्यमृता स्सुखं रथम्। घृतपावा रोहितो भ्राजमानो दिवन्देवः पृषतीमा विवेश।। 4।।

卐18.17.5 यो रोहितो वृषभस्तिग्मशृङ्गः पर्यग्निं परि सूर्यं बभूव। यो विष्टभ्नाति पृथिवीं दिवञ्च तस्माद्देवा अधिसृष्टीस्सृजन्ते।। 5।।

卐18.17.6 रोहितो दिवमारुहन् महतस्पर्यर्णवात्। सर्वा रुरोह रोहितो रुहः।। 6।।

卐18.17.7 वि मिमीष्व पयस्वतीं घृताचीं देवानां धेनुरनपस्पृगेषा। इन्द्रस्सोमं पिबतु क्षेमो अस्त्वग्निः प्र स्तौतु वि मृधो नुदस्व।। 7।।

卐18.17.8 समिद्धो अग्नि स्समिधानो घृतो वृद्धो घृताहुतः। अभिषाड्विश्वाषाडग्नि स्सपत्नान् हन्तु ये मम।। 8।।

卐18.17.9 हन्त्वेनान् प्र दहत्वग्निर्यो नः पृतन्यति। क्रव्यादाग्निना वयं सपत्नान् प्र दहामसि।। 9।।

卐18.17.10 अग्ने सपत्नमधरं पादयास्मद् व्यथया सजातमुत्पिपानं बृहस्पते। इन्द्राग्नि मित्रावरुणावधरे पद्यन्तामप्रति मन्युयमानाः।। 10।। 18 - 18

卐18.18.1 अवाचीनानव जहीन्द्र वज्रेण बाहुमान्। अधा सपत्नान् मामकानग्नेस्तेजोऽभिरादधे।। 1।।



Sri Ganapathy Sachchidananda Avadhoota Datta Peetham • Mysore •

卐18.18.2 उद्यं त्वन्देव सूर्य सपत्नान्मेऽधरां कृणु। अवैना नश्मना जहि ते यन्त्वधमन्तमः।। 2।।

卐18.18.3 वत्सो विराजो वृषभो मतीनामा रुरोह शुक्रपृष्ठोऽन्तरिक्षम्। घृतेनार्कमभ्यर्चन्ति वत्सं ब्रह्म सन्तं ब्रह्मणा वर्धयन्तु।। 3।।

卐18.18.4 दिवञ्च रोह पृथिवीञ्च रोह राष्ट्रञ्च रोह द्रविणञ्च रोह। प्रजाञ्च रोहामृतञ्च रोह रोहितेन तन्वं सं स्पृशस्व।। 4।।

卐18.18.5 ये देवा राष्ट्रभृतो अभितो यन्ति सूर्यम्। तेभिष्टे रोहितस्सम्विदानो राष्ट्रं दधातु सुमनस्यमानः।। 5।।

卐18.18.6 उत्त्वा यज्ञा ब्रह्म पूता वहन्त्वध्वगतो हरयस्त्वा वहन्तु। तिरस्समुद्रमति रोचसेऽर्णवम्।। 6।।

卐18.18.7 रोहिते द्यावापृथिवी अधि श्रिते वसुजिति गोजिति सञ्जिति सन्धनाजिति। सहस्रं यस्य द्रविणानि सप्तति वौ चेयन्ते नाभिं भुवनस्याधि मज्मनि।। 7।।

卐18.18.8 यशा यासि प्रदिशो अनुयशाः पशूनामुत चर्षणीनाम्। यशाः पृथिव्या अदित्या उपस्थेऽहमस्मि सवितेव चारुः।। 8।।

卐18.18.9 अमुत्र संन्निह वेत्थेतस्संस्तानि पश्यति। इतः पश्यन्ति रोचनन्दिवि सूर्यं विपश्चितम्।। 9।।

卐18.18.10 देवो देवान् मर्च्चयत्यन्त श्चरत्यर्णवे। समानमग्नि मिन्धते तं विदुः कवयः परे।। 10।।

18 - 19

卐18.19.1 अवः परेण पर एना वरेण पदा वत्सं बिभ्रती गौरुदस्थात्। सा कद्रीची कं स्विदर्धं परागात् क्व स्वित्सूते नहि युथे अस्मिन्।। 1।।

卐18.19.2 एकपदी द्विपदी सा चतुस्पद्यष्टापदी नवपदी बभूवुषी। सहस्राक्षरा भुवनस्य पङ्क्तिस्तस्या स्समुद्रा अधि वि क्षरन्ति।। 2।।

卐18.19.3 आरोहन् द्याममृतः प्राव मे व च उत्त्वा यज्ञा ब्रह्मपूता वहन्ति। घृतं पिबन्तं हरयस्त्वा वहन्ति।। 3।।

卐18.19.4 वेद तत्ते अमर्त्य यत्त आक्रमणन्दिवि। यत्ते सधस्थं परमे व्योमन्।। 4।।

卐18.19.5 सूर्यो द्यां सूर्यꣳ पृथिवीं सूर्य आपोऽति पश्यति। सूर्य भूतस्यैकं चक्षुरारुरोह दिवं महीम्।। 5।।

卐18.19.6 उर्वीरासन् परिधयो वेदिर्भूमि रकल्पत। तत्रैतावग्नी आधत्त हिमं घ्रंसञ्च रोहितः।। 6।।

卐18.19.7 हिमं घ्रंसञ्चाधाय यूपान् कृत्वा पर्वतान्। वर्षाज्यावग्नी ईजाते रोहितस्य स्वर्विदः।। 7।।

卐18.19.8 स्वर्विदो रोहितस्य ब्रह्मणाग्नि स्समाहितः। तस्माद् घ्रंसस्तस्माद्धिम स्तस्माद्यज्ञो अजायत।। 8।।

卐18.19.9 ब्रह्मणाग्नीस्संविदानोः ब्रह्मवृद्धो ब्रह्माहुतः। ब्रह्मेद्धावग्नी ईजाते रोहितस्य स्वर्विदः।। 9।।

卐18.19.10 अप्स्वन्य स्समाहित स्सत्ये अन्य स्समाहितः। ब्रह्मेद्धावग्नी ईजाते रोहितस्य स्वर्विदः।। 10।।

卐18.19.11 यं वातोꣳ परि शुम्भति यमिन्द्रो ब्रह्मणस्पतिः। ब्रह्मेद्धावग्नी ईजाते रोहितस्य स्वर्विदः।। 11।। 18 - 20

卐18.20.1 वेदिं भूमिं कल्पयित्वा दिवं कृत्वा दक्षिणाम्। घ्रंसं तदग्निं कृत्वा चकार विश्व मात्मन्वद्वर्षेणाज्येन रोहितः।। 1।।

卐18.20.2 वर्षमाज्यं घ्रंसो अग्निर्वेदिर्भूमि रकल्पत। तत्रैतान् पर्वताँ अग्नीर्गीर्भि रुर्द्धाङ् अकल्पयत्।। 2।।

卐18.20.3 गीर्भिरुर्ध्वान् कल्पयित्वा रोहितो भूमिमब्रवीत्। त्वयिदं सर्वं जायतां यद्भूतं यच्च भव्यम्।। 3।।

卐18.20.4 सः यज्ञꣳ प्रथमो भूतो भव्यो अजायत। तस्माद्ध यज्ञेदं सर्वं यत्किञ्चेदं विरोचते रोहितेन ऋषिणा भृतम्।। 4।।

卐18.20.5 उदस्य केतवो दिवि शुक्रा भ्राजन्त ईरते। आदित्यस्य नृचक्षसो महिव्रतस्य मीढुषः।। 5।।

卐18.20.6 दिशां प्रज्ञानां स्वरयन्तमर्चिषा सुपक्षमाशुं पतयन्तमर्णवे। स्तवाम सूर्यं भुवनस्य गोपां यो रश्मिभिर्दिशो आभाति सर्वाः।। 6।।

卐18.20.7 यत्प्राङ् प्रत्यङ् स्वधया यासि शीभं नानारूपे अहनी कर्षिमायया। तदादित्य महि तत्ते महि श्रवो यदेको विश्वं परि भूम जायसे।। 7।।

Sri Ganapati Sachchidananda Avadhoota Dattapeetham

卐18.20.8 विपश्चितन्तरणिं भ्राजमानं वहन्ति यं हरितस्सप्त बह्वीः। श्रुताद्य मत्रिर्दिवमुन्निनाय तन्त्वा पश्येम परियान्त माजिम्।। 8।।

卐18.20.9 मा त्वा दभन् परियान्तमाजिं सुगेन दुर्गमति याहि शीभम्। दिवञ्च सूर्य पृथिवीञ्च देवी महोरात्रे विमिमानो यदेषि।। 9।।

卐18.20.10 स्वस्ति ते सूर्य चरसे रथाय येनोभावन्तौ परियासि सद्यः। यन्ते वहन्ति हरितो वहिष्ठास्तमारोह सुखमा स्वश्रव्यम्।। 10।। 18 - 21

卐18.21.1 सुखं सूर्य रथमंशुमन्तं स्योनं सुवह्नि मधि तिष्ठ वाजिनम्। यं वहन्ति हरितो वहिष्ठा श्शतमश्वा यदि वा सप्त बह्वी। 1।।

卐18.21.2 सप्त सूर्यो हरितो यातवे रथे हिरण्यत्वचसो बृहतीरयुक्तः। अमोची शुक्रो रजसᳲ परस्ताद् विधूय देवस्तमो दिवमारुहत्।। 2।।

卐18.21.3 उत्केतुना बृहता देव आगन्नपावृक्तमोऽभि ज्योतिरश्रैत्। दिव्यस्सुपर्णस्स वीरो व्यख्यददितेᳲ पुत्रो भूवनानि विश्वा।। 3।।

卐18.21.4 उद्यन् रश्मीना तनूषे प्रजास्सर्वा वि पुष्यसि। उभा समुद्रैᳲ क्रतुना वि भाति सर्वां ल्लोकान् परिभू र्भ्राजमानः।। 4।।

卐18.21.5 पूर्वापरं चरतो माययैतौ शिशु क्रिडन्तौ परियातो अर्णवम्। विश्वान्यन्यो भुवना भिवस्ते हैरण्यैरन्य हरितो वहन्ति।। 5।।

卐18.21.6 दिवि त्वात्त्रि रधारयत् सूर्या मासाय कर्तवे। स एषिस्सु घृतस्तपन् विश्वा भूता वचाकशत्।। 6।।

卐18.21.7 उभावन्तौ समर्षति वत्स स्संमातरामिव। नन्वेतदितᳲ पुरा ब्रह्म देवा अमी विदुः।। 7।।

卐18.21.8 यत्समुद्रमनु श्रितं तत्सिषासति सूर्यः। अध्वास्य विततो महान् पूर्वश्चापरश्च यः।। 8।।

卐18.21.9 तं समाप्नोति जूतिभि स्स्तस्मानाप चिकित्सति। तेनामृतस्य भक्षं देवानां नाव रुन्धते।। 9।।

卐18.21.10 उदु त्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम्।। 10।। 18 - 22

卐18.22.1 अपत्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः। सुराय विश्व चक्षसे।। 1।।

卐18.22.2 अदृश्रन्नस्य केतवो वि रश्मयो जनाँ अनु। भ्राजन्तो अग्नयो यथा।। 2।।



Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐18.22.3 तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्यः। विश्वमाभासि रोचनः।। 3।।

卐18.22.4 प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषी। प्रत्यङ् विश्वं स्वर्दृशे।। 4।।

卐18.22.5 येना पावक चक्षषा भूरण्यन्तं जनाँ अनु। त्वं वरुण पश्यसि।। 5।।

卐18.22.6 वि द्यामेषि रजस्पृथ्वहर्मिमानो अक्तुभिः। पश्यन् यन्मानि सूर्य।। 6।।

卐18.22.7 सप्त त्वा हरितो रथे वहन्ति देव सूर्य। शोचिष्केशं विचक्षणम्।। 7।।

卐18.22.8 अयुक्त सप्त शुन्ध्युवस्सूरो रथस्य नप्त्यः। ताभिर्याति स्वयुक्तिभिः।। 8।।

卐18.22.9 अभि मा वर्चसा गिर स्सिञ्चतीरा चरण्यवः। अभि वत्सं न धेनवः।। 9।।

卐18.22.10 ता अर्षन्तु शुभ्रियꣳ पृञ्चन्तीर्वर्चसा प्रियः। जातं जात्रीर्यथा हृदा।। 10।। 18- 23

卐18.23.1 वज्रायेव साध्यः यꣳ कीर्तिं श्रेयमाण मावहान्। मह्यमायुर्घृतं पयः।। 1।।

卐18.23.2 रोहितो दिवमाक्रमान्तपसा तपस्वी। स योनिमैति स उ जायते पुन स्स देवाना मधिपतिर्बभूव।। 2।।

卐18.23.3 यो विश्वचर्षणिरुत विश्वतो मुखो विश्वतस्पाणिरुत विश्वतस्पृथः। सं बाहुभ्यां धमति सं पतत्रै र्द्यावापृथिवी जनयन्देव एकः।। 3।।

卐18.23.4 एकपाद्द्विपदो भूयो वि चक्रमे द्विपात् त्रिपादमभ्येति पश्चात्। द्विपाद्ध षद्दो भूयो वि चक्रमे त एकपद स्तन्वं मां समासते।। 4।।

卐18.23.5 अतन्द्रो यास्यन् हरितो यदास्थाद् दिवि रूपङ्कृणुते रोचमानः। केतुमाङ् उद्यन्सहमानो रजांसि विश्वा आदित्य प्रवतो वि भासि।। 5।।

卐18.23.6 वण्महाꣳ असि सूर्य वडादित्य महाꣳ असि। महांस्ते महतो महिम्ना त्वमादित्य महाङꣳ असि।। 6।।

卐18.23.7 रोचसे दिवि रोचसे अन्तरिक्षे पतङ्ग पृथिव्यां रोचसे रोचसे अप्स्वन्तः। उभा समुद्रौ रुच्या व्यापिथ देवो देवासि महिष स्स्वर्वित्।। 7।।

卐18.23.8 अर्वाङ् परस्तात् वियतो व्यध्व आशुर्विपश्चि त्पतयन् पतङ्गः। विष्णुर्विचित्त श्शवसाधितिष्ठन् प्र केतुना सहते विश्वमेजत्।। 8।।

卐18.23.9 तिग्मो विभ्राजन्तन्वं शिशानो ऽरङ्गमासꣳ प्रवतो रराणः। ज्योतिष्मान्पक्षी महिषो वयोधा विश्वा आस्थात्प्रदिशꣳ कल्पमानः।। 9।।

卐18.23.10 चित्रश्चिकित्वान् महिषस्सुपर्ण आरोचयन् रोदसी अन्तरिक्षम्। अहोरात्रे परि सूर्यं वसाने प्रास्य विश्वा तिरतो वीर्याणि।। 10।। 18 - 24

卐18.24.1 चित्रं देवानां केतुरनीकं ज्योतिष्मान् प्रदिश स्सूर्य उद्यन्। दिवाकरोऽति द्युम्नैस्तमांसि विश्वा तारीद्दुरितानि शुक्रः।। 1।।

卐18.24.2 चित्रन्देवाना मुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः। आप्राङ् द्यावापृथिवी अन्तरिक्षं महित्वा सूर्य आत्मा जगत स्तस्थुषश्च।। 2।।

卐18.24.3 उच्चा पतन्तमरुणं सुपर्णं मध्ये दिवस्तरणिं भ्राजमानम्। पश्येम त्वा सवितारं यमाहुरजस्रं ज्योतिर्यद् विन्ददत्रिः।। 3।।

卐18.24.4 दिवस्पृष्ठे धावमानं सुपर्णमादित्या॰ पुत्रं नाथकाम उप यामि भीतः। स न स्सूर्य प्र तिर दीर्घमायुर्मा रिषाम सुमतौ ते स्याम।। 4।।

卐18.24.5 आहोरात्राणि विदधत् कृण्वान॰ पार्थिवं रजः। नवं नवं सखी भवं कृणुषे देवसूर्य।। 5।।

卐18.24.6 सहस्राण्ह्यं वियतावस्य पक्षौ हरेर्हंसस्य पतत स्स्वर्गम्। सविश्वा न्देवानुर स्युपदद्य संपश्यन्याति भुवनानि विश्वा। 6।।

卐18.24.7 रोहितो कालो अभवद्रोहितो अग्रे प्रजापतिः। रोहितो यज्ञानां मुखं रोहितो ज्योतिरुच्यते।। 7।।

卐18.24.8 रोहितो भूतो अभवद्रोहितो भव्यमाभरत्। रोहितो यज्ञानां मुखं रोहितस्स्वरा भरत्।। 8।।

卐18.24.9 रोहितः लोको अभवद् रोहितोऽत्यतपद्दिवम्। रोहितो रश्मिभिर्भूमिं समुद्रमनु सञ्चरत्।। 9।।

卐18.24.10 सर्वादिशस्सं चरति रोहित अधिपतिर्दिवः। दिवं समुद्रमाद्भूमिं सर्वाँल्लोकान् वि रक्षतु।। 10।। 18 - 25

卐18.25.1 विभर्त्यंशुं प्रति मुञ्चते स्रजो मुहूर्ते रश्मीनंशं बृहन्तम्। दिवाकरः पश्यति यत्परात्परं प्राह्णं प्रवृष्मणाद् विश्वमाप्राङ् हिरण्ययो हरित केतुरुद्यन्।। 1।।

卐18.25.2 आरोहन् शुक्रो बृहतीरतन्द्रोऽमर्त्यः कृणुते वीर्याणि। दिव्यस्सुपर्णो महिषो वातरंहा यत् सर्वाँल्लोकाङ् अभियद् विभाति।। 2।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham SGS

卐18.25.3 अभ्यन्यदेति पर्यन्यदस्यतेऽहोरात्राभ्यां महिषꣳ कल्पमानः। सूर्यं वयं रजसि क्षियन्तं गातुविदं हवामहे नाथकामाः।। 3।।

卐18.25.4 पृथिवीप्रो महिषो नाधमानस्य गातुरदब्धचक्षुꣳ परि सर्वं बभूव। विश्वं संपश्यन् सुविदत्रो यजत्र श्शिवायान स्तन्वा शर्म यच्छात्।। 4।।

卐18.25.5 पर्यस्य महिमा पृथिवीं समुद्रं ज्योतिषा विभ्राजन् परि द्यामन्तरिक्षम्। अहोरात्राभ्यां सह संविदान उषा न आयुꣳ प्रतरादाविष्टम्।। 5।।

卐18.25.6 अबोध्यग्नि स्समिधा जनानां प्रतिधेनुमिवायती मुषासम्। यह्वा इव प्र वयामुज्जिहानाꣳ प्र भानवस्सिस्रते नाकमच्छ।। 6।।

卐18.25.7 कुमारं माता युवती गर्भमन्तर्गुहा बिभर्त्ति न ददाति पित्रे। अनीकमस्य न मिनज्जनासꣳ पुरꣳ पश्यन्ति निहितमरतौ।। 7।।

卐18.25.8 तमेतन्त्वं युवते कुमारं पेषी विभर्षि महीषी जजान। पूर्विहि गर्भश्शरदो ववर्द्धापश्यज्ञातं यमसूत माता।। 8।।

卐18.25.9 यस्य तिस्रो वित्ति न एकधा सतो यस्मै बलिन्देवजना हरन्ति। तस्यासौ द्यौꣳ पृथिव्यन्तरिक्षङ्गुहा तिष्ठन्ति वसुना समक्ता।। 9।।

卐18.25.10 नव दिवो देव जनेन गुप्ता नवान्त रिक्षाणि नव भूमय इमाः। यस्मिन्निदं सर्वमोतं प्रोतं यस्मादन्य न्न परं किञ्च नास्ति।। 10।। 18 - 26

卐18.26.1 न तस्मात् पूर्व न्नपरं न्वस्ति न भूतन्नोत भव्यं यदासीत्। सहस्रपाद्वेकमूर्द्धाव्यात्मा स एवेदमा वरीवर्ति भूतम्।। 1।।

卐18.26.2 एकैकं ये अपतं सुपतं सुपर्णास्सोमं दिप्सन्तो ह्यानिवाढाः। कस्तेषां वेद पितरं मातरञ्च को निदानङक आत्मानमेषाम्।। 2।।

卐18.26.3 योभिर्वात इषितꣳ प्रवाति ये ददन्ते पञ्चदिशस्सध्रीचीः। य आहुतिमत्य मन्यन्त देवा अपान्नेतारꣳ कतमे त आसन्।। 3।।

卐18.26.4 इमामेषां पृथिवीं वस्त एको अन्तरिक्षं पर्येको बभूव। दिवमेषां ददते यो विधर्त्ता स्सर्वा दिशो रक्षत्येक एषाम्।। 4। इति महत्(अष्टादशः) काण्डे चतुर्थोऽनुवाकः 18 - 27

卐18.27.1 व्रात्यो वा इदमग्र आसीदीयमान एव स प्रजापतिं समैरयत्। स प्रजापति रात्मन स्सुपर्ण मपश्यत्।। 1।।

卐18.27.2 तदेकमभव त्तल्ललाममभव त्तन्महद्भव त्तज्ज्येष्ठमभव त्तत्तपोऽभवत्। तत्सत्यमभवत्तद् ब्रह्माभवत्तेन प्राजायत।। 2।।

卐18.27.3 सो ऽवर्धत स महानभवत्स महादेवोऽभवत्स ईषानोऽभवत्स देवानामीशाङ्ग गच्छेत्स देवानामेक व्रात्योऽभवत्।। 3।।

卐18.27.4 सधनुरादत्त तदिन्द्रधनु रभवत्। नीलमस्योदरं लोहितमस्य पृष्ठम्।। 4।।

卐18.27.5 नीलेनाप्रियं भ्रातृव्यं प्रोर्णोति लोहितेन द्विषन्तं विध्यतीति ब्रह्मवादिनो वदन्ति।। 5।। 18 - 28

卐18.28.1 स प्राचीं दिशमनुव्यचलत्। तं बृहच्च रथन्तरञ्च विश्वे च देवा आदित्याश्चानु व्यचलन्।। 1।।

卐18.28.2 वृहतश्च वै स रथन्तरस्य च विश्वेषाञ्च देवाना मादित्यानाञ्च प्रियं धाम भवति य एवं वेद।। 2।।

卐18.28.3 वृहते च वै स रथन्तराय विश्वेभ्यश्च देवेभ्य आदित्येभ्यश्चा वृश्चते य एवं विद्वांसं व्रात्यमुपवदति। तस्य प्राच्यां दिशि।। 3।।

卐18.28.4 श्रद्धा पुंश्चलो मित्रो मागधो विज्ञानं वासो ऽहरुष्णीषं रात्रीकेशा हरितौ प्रवर्तौ कल्मलिर्मणिः।। 4।।

卐18.28.5 भूतञ्च भव्यञ्च परिष्कन्दौ मनो विपथम्। मातरिश्वा च पवमानश्च विपथबाहौ वातस्सारथी रेष्मा प्रतोद४ कीर्त्तिश्च यशश्च पूरस्सरावैनं कीतिर्गच्छत्यैनं यशः गच्छति य एवं वेद।। 5।।

卐18.28.6 स दक्षिणां दिशमनु व्यचलत्। तं यज्ञायज्ञियञ्च वामदेव्यञ्च यज्ञश्च यजमानश्च पशवश्चानु व्यचलन्।। 6।।

卐18.28.7 यज्ञायज्ञियस्य च वै स वामदेव्यस्य च यज्ञस्य च यजमानस्य च पशूनाञ्च प्रियं धाम भवति य एवं वेद।। 7।।

卐18.28.8 यज्ञायज्ञियाय च वै स वामदेव्याय च यज्ञाय च यजमानाय च पशुभ्यश्चा वृश्चते य एवं विद्वांसं व्रात्यमुपवदति। तस्य दक्षिणायां दिशि।। 8।।

卐18.28.9 उषा॰ पूंश्चली मन्त्रो मागधो विज्ञानं वासोऽहरुष्णीषं रात्री केशा हरितौ प्रवर्तौ कल्मलिर्मणिः।। 9।।

卐18.28.10 अहश्च रात्री च परिष्कन्दौ मनो विपथम्। मातरिश्वा च पवमानश्च विपथबाहौ वातस्सारथी रेष्मा प्रतोद॰ कीर्त्तिश्च यशश्च पूर स्सरावैनं कीतिर्गच्छत्यैनं यश गच्छति य एवं वेद।। 10।।

卐18.28.11 स प्रतीचीं दिशमनुव्यलत्। तं वैरूपञ्च वैराजञ्च वरुणश्च राजा पश्चानु व्यचलन्। वैरूपस्य च वै स वैराजस्य च वरुणस्य चापञ्च राज्ञः प्रियं धाम भवति य एवं वेद।। 11।।

卐18.28.12 वैरूपाय च वै स वैराजाय च वरुणाय च राज्ञेभ्यश्चा वृश्चते य एवं विद्वांसं व्रात्यमुपवदति। तस्य प्रतीच्यां दिशि।। 12।।

卐18.28.13 इरा पुंश्चली हसो मागधो विज्ञानं वासोऽहरुष्णीषं रात्री केशा हरितौ प्रवर्तौ कल्मलिर्मणिः। पौर्णामासी चामावास्या च परिष्कन्दौ मनो विपथम्।। 13।।

卐18.28.14 मातरिश्वा च पवमानश्च विपथबाहू वातस्सारथीः रेष्मा प्रतोद॰ कीर्तिश्च यशश्च पुरस्सरावैनङ् कीर्तिर्गच्छत्यैनं यशो गच्छति य एवं वेद।। 14।।

卐18.28.15 स उदीचीं दिशमनुव्यचलत्। तं श्यैतं च नौधसं च सोमश्च राजा सप्तर्षयश्चानुव्यचलन्। श्येतस्य च वै स नौधसस्य च सोमस्य राज्ञः सप्तर्षीणां च प्रियं धाम भवति य एवं वेद।। 15।।

卐18.28.16 श्यैताय च वै स नौधसाय च सोमाय च राज्ञे सप्तर्षिभ्यश्चा वृश्चते य एवं विद्वांसं व्रात्यमुपवदति। तस्योदीच्यां दिशि।। 16।।

卐18.28.17 विद्युत् पुंश्चली स्तनइत्नुर्मागधो विज्ञानं वासोऽहरुष्णीषं रात्री केशा हरितौ प्रवर्त्तौ कल्मलिर्मणिः। श्रुतञ्च विश्रुतञ्च परिष्कन्दौ मनो विपथम्। मातरिश्वा च पवमानश्च विपथबाहौ वातस्सारथी रेष्मा प्रतोद॰ कीर्त्तिश्च यशश्च पुर स्सरावैनङ् कीर्त्तिर्गच्छत्यैनं यशो गछति य एवं वेद।। 17।। 18 - 29

卐18.29.2 स संवत्सरमूर्ध्वोऽतिष्ठत्तं देवाऽब्रुवन् व्रात्य किन्नु तिष्ठतीति। सोऽब्रवीदासन्दी मे सम्भरन्त्विति। तस्मै आसन्दीं समभरम्।। 1।।

卐18.29.3 तस्या वसन्तश्च ग्रीष्मश्च पूर्वौ पादावास्तां वर्षाश्च शरच्चापरौ। तं वृहच्च रथन्तरञ्चा नुच्ये आस्तां यज्ञायज्ञियञ्च वामदेव्यञ्च तिरश्च्ये।। 2।।

卐18.29.4 ऋचः प्राञ्चस्तन्तवो यजूंषि तिर्यञ्चः। वेद आस्तरणं ब्रह्मोपवर्हणं सामासाद उद्गीथो ऽपश्रयस्तामासीदत्।। 3। तस्य संकल्पाः प्राहाय्या आसन्देवजनाः परिष्कन्दा अप्सरसः पत्नी विश्वानि भूतान्युपसदः। ऐनं विश्वानि भूतानि गच्छन्ति प्रियो विश्वेषां भूतानां भवति य एवं वेद।। 4।।

卐18.30.1 18 - 30

卐18.30.2 तस्मै प्राच्यां दिशः। वासन्तौ मासौ गोप्तारावकुर्वन् वृहच्च रथन्तरञ्चानुष्ठातारौ। वसन्तावेनं मासौ प्राच्या दिशो गोपायतो वृहच्च रथन्तरञ्चा नुतिष्ठतो य एवं वेद।। 1।।

卐18.30.3 तस्मै दक्षिणाया दिशः। ग्रैष्मौ मासौ गोप्तारावकुर्वन् यज्ञायज्ञियञ्च वामदेव्यञ्चानुष्ठातारौ। ग्रैष्मावेनं मासौ दक्षिणाया दिशो गोपायतो यज्ञायज्ञियञ्च वामदेव्यं चानु तिष्ठतो य एवं वेद।। 2।।

卐18.30.4 तस्मै प्रतीच्या दिशः। वार्षिकौ मासौ गोप्तारावकुर्वन् वैरुपञ्च वैराजञ्चा नुष्ठातारौ। वार्षिकावेनं मासौ प्रतीच्या दिशो गोपायतो वैरुपञ्च वैराजञ्चा नुतिष्ठतो य एवं वेद।। 3।।

卐18.30.5 तस्मा उदीच्या दिशः। शारदौ मासौ गोप्तारावकुर्वञ्छ्यैत्यञ्च नौधसञ्चानुष्ठातारौ। शारदावेनं मासावुदीच्या दिशो गोपायत श्श्यैतञ्च नौधसञ्चानु तिष्ठतो य एवं वेद।। 4।।

卐18.30.6 तस्मै ध्रुवाया दिशः। हैमन्तौ मासौ गोप्तारावकुर्वन् भूमिंश्चग्निश्चा नुष्ठातारौ। हैमन्तावेनं मासौ ध्रुवाया दिशो गोपायतो भूमिश्चाग्निश्चानु तिष्ठतो य एवं वेद।। 5।।

卐18.30.7 तस्मा उर्ध्वाया दिशः। शैशिरौ मासौ गोप्तारावकुर्वन्दिवं चादित्यञ्चानुष्ठातारौ। शैशिरावेनं मासावुर्ध्वाया दिशो गोपायतो द्यौश्चादित्यश्चानु तिष्ठतो य एवं वेद।। 6।। 18 - 31

卐18.31.1 तस्मै प्राचीनादन्तर्देशाद् भवमिष्वास मनुष्ठातार मकुर्वन्। भव एनमिष्वासः प्राचीनान्तर्देशा दनुष्ठातानु तिष्ठति नैनं शर्वो न भवो नेशानः। नास्य पशून्न समानान्हिनस्ति य एवं वेद।। 1।।

卐18.31.2 तस्मै दक्षिणा दन्तर्देशाच्छर्व मिष्वास मनुष्ठातारमकुर्वन्। शर्व एनमिष्यासो दक्षिणा दन्तर्देशा दनुष्ठातानु तिष्ठति नैनं शर्वो न भवो नेशानः। नास्य पशून्न समानान् हिनस्ति य एवं वेद।। 2।।

卐18.31.3 तस्मै प्रतीचीना दन्तर्देशादुग्र मिष्वास मनुष्ठातारमकुर्वन्। उग्रं एनमिष्वासो प्रतीचीना दन्तर्देशा दनुष्ठातानु तिष्ठति नैनं शर्वो न भवो नेशानः। नास्य पशून्न समानान्हिनस्ति य एवं वेद।। 3।।

卐18.31.4 तस्मै उदीचीनादन्तर्देशात् पशुपतिमिष्वास मनुष्ठातारमकुर्वन्। पशुपतिरेन मिष्वास उदीचीना दन्तर्देशादनुष्ठातानु तिष्ठति नैनं शर्वो न भवो नेशानः। नास्य पशून्न समानान्हिनस्ति य एवं वेद।। 4।।

卐18.31.5 तस्मै ध्रुवाया दन्तर्देशाद्रुद्रं देवमिष्वास मनुष्ठातारमकुर्वन्। रुद्रमेनं देवमिष्वासो ध्रुवादन्तर्देशा दनुष्ठातानु तिष्ठति नैनं शर्वो न भवो नेशानः। नास्य पशून्न समानान्हिनस्ति य एवं वेद।। 5।।

卐18.31.6 तस्मा उर्ध्वाया अन्तर्देशान्महादेवा मिष्वास मनुष्ठातामकुर्वन्। महादेव एनमिष्वास उर्ध्वाया अन्तर्देशा दनुष्ठातानु तिष्ठति नैनं शर्वो न भवो नेशानः। नास्य पशून्न समानान्हिनस्ति य एवं वेद।। 6।।

卐18.31.7 तस्मै सर्वेभ्यो अन्तर्देशेभ्य ईशानमिष्वास मनुष्ठातारमकुर्वन्। ईशान एनमिष्वासस्सर्वेभ्यो अन्तर्देशेभ्यो ऽनुष्ठातानु तिष्ठति नैनं शर्वो न भवो नेशानः। नास्य पशून्न समानान हिनस्ति य एवं वेद।। 7।। 18 - 32

卐18.32.1 स ध्रुवां दिशमनु व्यचलत्। तं भूमिश्चाग्निश्चौषधयश्च वनस्पतयश्च वीरुधश्च वानस्पत्याश्चा नुव्यचलन्। भूमेश्च वै सोग्नेश्चौषधीनाञ्च वनस्पतीनाञ्च वीरुधाञ्च वानस्पत्यानाञ्च प्रियं धाम भवति य एवं वेद। भूमये च वै सोऽग्नये चौषधीभ्यश्च वनस्पतिभ्यश्च वीरुद्भ्यश्च। वानस्पत्येभ्यश्चा वृश्चते य एवं विद्वांसं व्रात्यमुपवदति।। 1।।

卐18.32.2 स उर्ध्वान्दिशमनु व्यचलत्। तमृतञ्च सत्यञ्च सूर्यश्च चन्द्रमाश्च नक्षत्राणि चानु व्यचलन्। ऋतस्य च वै स सत्यस्य च सूर्यस्य च चन्द्रमसश्च नक्षत्राणाञ्च प्रियं धाम भवति य एवं वेद। ऋताय च वै स सत्याय च सूर्याय च चन्द्रमसे च नक्षत्रेभ्यश्चा वृश्चते य एवं विद्वांसं व्रात्यमुपवदति।। 2।।

卐18.32.3 स बृहती दिशमनुव्यचलत्। तमृचश्च सामानि च यजूंषि च ब्रह्म चानुव्यचलन्। ऋचाञ्च वै सा साम्नाञ्च यजुषाञ्च ब्रह्मणश्च प्रियं धाम भवति य एवं वेद। ऋग्भ्यश्च वै स सामभ्यश्च यजुर्भ्यश्च ब्रह्मणे चावृश्चते य एवं विद्वांसं व्रात्यमुपवदति।। 3।।

卐18.32.4 स उत्तमान्दिश मनुव्यचलत्। तमितिहासश्च पुराणञ्च गाथाश्च नाराशंसीश्चानु व्यचलन्। इतिहासस्य च वै स पुराणस्य च गाथानाञ्च नाराशंसीनाञ्च प्रियं धाम भवति य एवं वेद। इतिहासाय च वै पुराणाय च गाथाभ्यश्च नाराशंसीभ्यश्चा वृश्चते य एवं विद्वांसं व्रात्यमुपवदति।। 4।।

Sri Ganapati Sachchidananda Avadhoota Dattapeetham • Mysore •

卐18.32.5 तमृतव श्चार्तवाश्च लोकाश्च लौक्याश्चानु व्यचलन्। ऋतुनाञ्च वै स आर्तवानाञ्च लोकानाञ्च लौक्यानाञ्च प्रियं धाम भवति य एवं वेद। ऋतुभ्यश्च वै स आर्तवेभ्यश्च लोकेभ्यश्च लौकेभ्यश्चा वृश्चते य एवं विद्वांसं व्रात्यमुपवदति।। 5।।

卐18.32.6 सो कद्रीचीं दिशमनुव्यचलत्। ततो नावत्स्यन्य मन्यत। तं विराडनु व्यचलन् सर्वे च देवा स्सर्वाश्च देवता श्चानुव्यचलन्। विराजश्च वै स सर्वेषाञ्च देवानां सर्वासाञ्च देवतानाञ्च प्रियं धाम भवति य एवं वेद। विराजे च वै स सर्वेभ्यश्च देवेभ्य स्सर्वाश्च देवताभ्य श्चावृश्चते य एवं विद्वांसं व्रात्यमुपवदति।। 6।।

卐18.32.7 सोऽनादिष्टां दिशमनुव्यचलत्। तमाहवनीयश्च गार्हपत्यश्च दक्षिणाग्निश्च यज्ञश्च यजमानश्च पशवश्चानु व्यचलन्। आहवनीयस्य च वै स गार्हपत्यस्य च दक्षिणाग्नेश्च यज्ञस्य च यजमानस्य च पशूनाञ्च प्रियं धामो भवति य एवं वेद। आहवनीयाय च वै गार्हपत्यायश्च दक्षिणाग्निभ्यश्च यज्ञाय च यजमानाय च पशूभ्यश्चा वृश्चते य एवं विद्वांसं व्रात्यमुपवदति।। 7।।

卐18.32.8 सोऽनावृत्तां दिशशमनुव्यचलत् ततो नावत्स्यन्नमन्यत। तं दितिश्चादितिश्चेडा चेन्द्राणी चानुव्यचलन्। दितेश्च वै सोऽदितेश्चेडाया श्चेन्द्राण्याश्च प्रियं धामो भवति य एवं वेद। दितये च वै सोऽदितये चेडायै चेन्द्राण्यै चावृश्चते य एवं विद्वांसं व्रात्यमुपवदति।। 8।।

卐18.32.9 स दिशोऽनु व्यचलत्। तं प्रजापति च परमेष्ठी च पिता च पितामहाश्चानु व्यचलन्। प्रजापतेश्च वै स परमेष्ठिनश्च पितुश्च पितामहस्य च प्रियं धाम भवति य एवं वेद। प्रजापतये च वै स परमेष्ठीने च पित्रे च पितामहाय चावृश्चते य एवं विद्वांसं व्रात्यमुपवदति।। 9। इति (महत्काण्डे) अष्टादशकाण्डे पञ्चमोऽनुवाकः 18 - 33

卐18.33.1 स महिमा स दुर्भुत्वान्तं भूम्याऽगच्छत्स समुद्रोऽभवत्। तं प्रजापतिश्च परमेष्ठी चापश्च श्रद्धा च वर्षञ्च भूत्वानु व्यवर्त्तयन्त।। 1।।

卐18.33.2 तं यज्ञश्च लोक श्चान्नञ्चान्नाद्यञ्च भूत्वाभि पर्यावर्त्तन्त।। 2।।

卐18.33.3 ऐनमापो गच्छत्यैनं वर्षं गच्छत्यैनं श्रद्धा गच्छत्यैनं दीक्षा गच्छत्यैनं यज्ञो गच्छत्यैनं लोको गच्छत्यैनमन्न ङ्गच्छत्यैनमन्नाद्य ङ्गच्छति य एवं वेद।। 3।। 18 - 34

卐18.34.1 सो ऽरज्यत तस्माद्रज्य मानाद्राजन्यो अजायत। स विश स्स बन्धूनन्नमन्नाद्य ञ्चभ्युदतिष्ठत्।। 1।।

卐18.34.2 विशाञ्च वै स सबन्धुनाञ्चान्नस्य चान्नाद्यस्य च प्रियं धाम भवति य एवं वेद।। 2।।

卐18.34.3 विशाभ्यश्च वै स सबन्धुभ्यश्चान्नाय चान्नाद्याय चावृश्चते य एवं विद्वांसं व्रात्यमुपवदति।। 3।। 18 - 35

卐18.35.1 स विशोऽनु व्यचलत्। तं सभा च समितिश्च सेना च सुरा चानुव्यचलन्।। 1।।

卐18.35.2 सभायाश्च वै स समितेश्च सेनायाश्च सुरायाश्च प्रियं धामो भवति य एवं वेद।। 2।।

卐18.35.3 सभायै च वै समितियै च सेनायै च सुरायै चावृश्चते य एवं विद्वांसं व्रात्यमुपवदति।। 1।। 18 - 36

卐18.36.1 यस्यैवं विद्वान् व्रात्यो राज्ञोऽतिथि गृहानागच्छेत्। श्रेयां समेन मात्मनो मानयेत्तथा राष्ट्राय नावृश्चते।। 1।।

卐18.36.2 तथा क्षत्राय ना वृश्चते तथा ब्रह्मणेना वृश्चते। ततो वै ब्रह्म च क्षत्रञ्चो दतिष्ठतान्ते अब्रूतां कं प्र विशावेति।। 2।।

卐18.36.3 ते प्रजापति रब्रवीत् बृहस्पतिमेव ब्रह्म प्राविशत्विन्द्रं क्षत्रमिति। ततो वै बृहस्पतिमेव ब्रह्म प्राविशदिन्द्रं क्षत्रम्।। 3।।

卐18.36.4 इयं वा उ भूमिर्बृहस्पतिरसौ द्यौरिन्द्रः। अयं वा उ अग्निर्ब्रह्मा सावादित्यः क्षत्रम्।। 4।।

卐18.36.5 ऐनं क्षत्रं गच्छती न्द्रियावान् भवति य आदित्यं क्षत्रन्दिवमिन्द्रं वेद। ऐनं ब्रह्म गच्छति ब्रह्मवर्चसी भवति योऽग्निं ब्रह्म बृहस्पतिं भूमिं वेद।। 5।। 18 - 37

卐18.37.1 यस्योद्धृतेष्वग्निष्वहुते अग्निहोत्रे एवं विद्वान् व्रात्योऽतिथिर्गृहाना गच्छेत्। स्वयमेनमभ्युदेत्य ब्रूयाद् व्रात्य क्वाऽवात्सी रिति व्रात्योदकमिति व्रात्य तर्पयन्त्विति।। 1।।

卐18.37.2 यदाह व्रात्य क्वाऽवात्सीरिति पथ एव तेन देवयानानवरुन्द्धे। व्रात्योदकमित्यप एव तेनावरुन्द्धे।। 2।।

卐18.37.3 यदाह व्रात्य तर्पयन्त्विति प्राणमेव तेन वर्षियांसं कृणुते। पुराग्निहोत्रस्य हवनादुपांशु कृण्वीत।। 3।।

卐18.37.4 व्रात्य यथा ते प्रियं तथास्त्विति व्रात्य यथा ते निकाम स्तथास्त्विति व्रात्य यथा वशास्तथास्त्विति।। 4।।

卐18.37.5 यदाह व्रात्य यथा ते प्रियं तथास्त्विति प्रियमेव तेनाव रुन्द्धे। प्रिये प्रियस्य भवत्यैनं प्रियं गच्छति य एवं वेद।। 5।।

卐18.37.6 यदाह व्रात्य ते निकामस्तथास्त्विति निकाममेव तेनाव रुन्द्धे। निकामे निकामस्य भवत्यैनं निकामो गच्छति य एवं वेद।। 6।।

卐18.37.7 यदाह व्रात्य यथा ते वशस्तथास्त्विति वशमेव तेनावरुन्द्धे। वशी वशिनां भवत्यैनं वशो गच्छति य एवं वेद।। 7।। 18 - 38

卐18.38.1 यस्याधिश्रिते अग्निहोत्र एवं विद्वान्व्रात्यो ऽतिथिर्गृहमागच्छेत्। स्वयमेन मभ्युदेत्य ब्रूयाद् व्रात्याति सृजत होष्यामीति।। 1।।

卐18.38.2 स अति च सृजेज्जुहुयान्न चाति सृजेन्न जुहुयात्। यो वा एवं विदुषा व्रात्येना नातिसृष्टो जुहोति।। 2।।

卐18.38.3 प्र देवयानं पन्थां जानाति प्र पितृयाण मा देवेष्वु वृश्च्यते हुतमस्य भवति। यो वा एवं विदुषा व्रात्येनाति सृष्टो जुहोति।। 3।।

卐18.38.4 न देवयानं पन्थां जानाति न पित्तृयाणं पर्यस्या स्मिंल्लोक आयतनं शिष्यते य एवं विदुषा व्रात्येनातिसृष्टो जुहोति।। 4।। 18 - 39

卐18.39.1 यस्यैवं विद्वान् व्रात्य एकां रात्रिमतिथिर्गृहे वसति। ये पृथिव्यां पुण्या लोका स्तानेवै नानव रुन्द्धे।। 1।।

卐18.39.2 यस्यैवं विद्वान् व्रात्यो द्वितीयां रात्रिमतिथिर्गृहे वसति। ये अन्तरिक्षे पुण्या लोका स्तानेवै नानव रुन्द्धे।। 2।।

卐18.39.3 यस्यैवं विद्वान् व्रात्यस्तृतीयां रात्रिमतिथिर्गृहे वसति। ये दिवि पुण्या लोका स्तानेवैनानव रुन्द्धे।। 3।।

卐18.39.4 यस्येवं विद्वान् व्रात्यश्चतुर्थीं रात्रिमतिथिर्गृहे वसति। सर्वानेवै नेन पुण्या लोकास्तानेव तेनाव रुन्द्धे।। 4।।

卐18.39.5 यस्यैवं विद्वान् व्रात्योपरिमिता रात्रि रतिथिर्गृहे वसति। य एवापरिमिता एवैनेन पुण्या लोकान्तेनाव रुन्द्धे।। 5।। 18 - 40

卐18.40.1 यस्या व्रात्यो व्रात्य ब्रूवो नाम बिभ्रती गृहानतिथिरागच्छेत्। कर्षेदेनं न चैनं कर्षेत्।। 1।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐18.40.2 एतस्यै देवताया उदकं याचामीत्यस्मा उदकं याचेत्। एतां देवतां परिवेवेष्मीत्येनं परि वेविष्यात्।। 2।।

卐18.40.3 एतस्यामेवास्य तद् देवतायां हुतमिष्टं भवति य एवं वेद।। 3।। 18 - 41

卐18.41.1 स यत्प्राचीं दिशमनु व्यचलन्मारुतं शर्धो भूत्वानु व्यचलन्मनो ऽन्नादं कृत्वा मनसा न्नादेनान्नमत्ति य एवं वेद।। 1।।

卐18.41.2 स यद्दक्षिणां दिशमनु व्यचलदिन्द्रो भूत्वानु व्यचलद् बलमन्नादं कृत्वा। बलेना न्नादेनान्नमत्ति य एवं वेद।। 2।।

卐18.41.3 यत्प्रतीचीं दिशमनु व्यचलद्वरुणो राजा भूत्वानु व्यचलदपोऽन्नादीः कृत्वा अद्भिरन्नादीभि रन्नमत्ति य एवं वेद।। 3।।

卐18.41.4 स यदुदीचीं दिशमनु व्यचलत् सोमो राजा भूत्वानु व्यचलत् सप्तर्षिभिर्हुत आहुतिमन्नादीं कृत्वा आहुत्यान्नाद्यानमत्ति य एवं वेद।। 4।।

卐18.41.5 स यद्ध्रुवां दिशमनु व्यचलद्विष्णुर्भूत्वानु व्यचलद्विराज मन्नादीं कृत्वा। विराजान्नाद्यान्नमत्ति य एवं वेद।। 5।।

卐18.41.6 स यदूर्ध्वां दिशमनु व्यचलद्बृहस्पति र्भूत्वानु व्यचलद् वषट्कार मन्नादं कृत्वा। वषट्कारेणान्ना देनान्नमत्ति य एवं वेद।। 6।।

卐18.41.7 यत्पशूननु व्यचलद्रुद्रो भूत्वानु व्यचलदोषधीभिरन्नादीः कृत्वा। ओषधीभिरन्नादिभिरन्नमत्ति य एवं वेद।। 7।।

卐18.41.8 स यद्देवाननु व्यचल दीशानो भूत्वानु व्यचलन्मन्यु मन्नादं कृत्वा। मन्युनान्ना देनान्नमत्ति य एवं वेद।। 8।।

卐18.41.9 स यन्मनुष्याननु व्यचल दग्निर्भूत्वानु व्यचलत् स्वाहाकार मन्नादं कृत्वा। स्वाहाकारेणान्ना देनान्नमत्ति य एवं वेद।। 9।।

卐18.41.10 स यत्पित्तृननु व्यचलद्यमो राजा भूत्वानु व्यचलत् स्वधाकार मन्नादं कृत्वा। स्वधाकारेणान्ना देनान्नमत्ति य एवं वेद।। 10।।

卐18.41.11 स यत्प्रजामनु व्यचलत् प्रजापतिर्भूत्वानु व्यचलत् प्राणमन्नादं कृत्वा। प्राणेनान्ना देनान्नमत्ति य एवं वेद।। 11।।

卐18.41.12 स यदन्तर्देशाननु व्यचलद्वायुर्भूत्वानु व्यचलद्वातमन्नादं कृत्वा। वातेनान्ना देनान्नमत्ति य एवं वेद।। 12।।

卐18.41.13 स यद्दिशोऽनु व्यचलत्परमेष्ठी भूत्वानुव्यचलद् ब्रह्मान्नादं कृत्वा। ब्रह्मणान्ना देनान्नमत्ति य एवं वेद।। 13।। 18 - 42

卐18.42.1 तस्य सप्त प्राणास्सप्तापानास्सप्त व्यानाः। योऽस्य प्रथमः प्राण उर्द्ध्वो नाम सोऽयमग्निः।। 1।।

卐18.42.2 योऽस्य द्वितीयः प्राणः प्रौढो नामा सोऽसावादित्यः।। 2।।

卐18.42.3 योऽस्य तृतीयः प्राणोऽभ्युढो नामासौ चन्द्रमाः।। 3।।

卐18.42.4 योऽस्य चतुर्थः प्राण विभुर्नामा सोऽयं पवमानः।। 4।।

卐18.42.5 योऽस्य पञ्चमः प्राणो ऽपरिमितो नाम ते इमे पशवः।। 5।।

卐18.42.6 योऽस्य षष्ठः प्राणः प्रियो नाम ता इमाः प्रजाः।। 6।।

卐18.42.7 योऽस्य सप्तमः प्राणो योनि नाम ता इमाऽऽपः।। 7।। 18 - 43

卐18.43.1 योऽस्य प्रथमोऽपानः। सा पौर्णमासी।। 1।।

卐18.43.2 योऽस्य द्वितीयोऽपानः। साऽष्टका।। 2।।

卐18.43.3 योऽस्य तृतीयोऽपानः। साऽमावास्या।। 3।।

卐18.43.4 योऽस्य चतुर्थोऽपानः। सा श्रद्धा।। 4।।

卐18.43.5 योऽस्य पञ्चमोऽपानः। सा दीक्षा।। 5।।

卐18.43.6 योऽस्य षष्ठोऽपानः। स यज्ञः।। 6।।

卐18.43.7 योऽस्य सप्तमोऽपानः। स वषट्कारः।। 7।।

卐18.43.8 योऽस्य प्रथमो व्यानः। सेयं भूमिः।। 8।।

卐18.43.9 योऽस्य द्वितीयो व्यानस्तदन्तरिक्षम्।। 9।।

卐18.43.10 योऽस्य तृतीयो व्यान स्सा द्यौः।। 10।।

卐18.43.11 योऽस्य चतुर्थो व्यानस्तानि नक्षत्राणि।। 11।।

卐18.43.12 योऽस्य पञ्चमो व्यानस्त ऋतवः।। 12।।

卐18.43.13 योऽस्य षष्ठो व्यानस्त आर्तवा।। 13।।

卐18.43.14 योऽस्य सप्तमो व्यानस्स सम्वत्सरः।। 14।।

卐18.43.15 समानमर्थं परियन्ति देवा इति संवत्सरो वा एतदृतवोऽनु पारियन्ति। यदादित्य मभिसंविशन्तीति पौर्णमासीञ्चैव तदमावास्याञ्च अभि संविशन्ति।। 15।।

卐18.43.16 तदेकं रूपम मृतत्व मेषामित्याहुति रेव। रूपं रूपं तपसा वर्धमाना इत्यहोरात्र एव।। 16।।

卐18.43.17 योस्य दक्षिण कर्णस्सो ऽयमग्निर्यस्सव्यस्सोऽयं पवमानः। यदस्य दक्षिणमक्ष्यसावादित्यो यत्सव्यं तदसौ स चन्द्रमाः।। 17।।

卐18.43.18 दितिश्चादितिश्च शीर्षकपाले संवत्सरश्शिरोऽहोरात्रे नासिके। रात्र्या प्राङ् अह्ना प्रत्यङ्नमो व्रात्याय।। 18। इति (महत्काण्डे) अष्टादशः काण्डे षष्ठोऽनुवाकः 18 - 44

卐18.44.1 अति सृष्टोऽपां वृषभो अति सृष्टाग्नयो दिव्याः। रुजन्परिरुजन्मृणन् प्रमृणन् म्रोक मनोहा खनो निर्दाह आत्मदूषिस्तनूदुषिः।। 1।।

卐18.44.2 इदन्तानति सृजामि तं माभ्यवनिक्षि। तैस्तमभ्यति सृजामि योस्मान्द्वेष्टि यं वयं द्विष्मः।। 2।।

卐18.44.3 अपामग्रमसि समुद्रन्त्वाभ्यव सृजामि। योऽप्स्वग्नयोऽति तं सृजामि म्रोकङ्वनिं तनूदुषिम्।। 3।।

卐18.44.4 यो व आपोऽग्निराविवेश स एष यद्वो घोरं तदेतत्। इन्द्रस्येन्देणाभि षिञ्चेत् अरिप्रा आपोऽपरिप्रमस्मत्। प्रैनो वहतु प्र दुष्ष्वप्न्यम्।। 4।।

卐18.44.5 शिवेन मा चक्षुषा पश्यताप श्शिवया तन्वोप स्पृशत त्वचं मे। शिवानग्नी नप्सुषदो हवामहे मयि क्षत्रं वर्च आ धत्त देवीः।। 5।। 18 - 45

卐18.45.1 निर्दुरर्मण्य ऊर्जा मधुमती वाङ्मधुमती स्थ। मधुमतीं वाचमुदेयं वाचोऽहं मा यवम्।। 1।।

卐18.45.2 अदव्धो मे गोपा अदब्धो गोपीथः। सुश्रुतौ कर्णौ भद्रश्रुतौ कर्णौ भद्रं श्लोकं श्रुयासम्।। 2।।

卐18.45.3 उपश्रुतिश्च मा अनुश्रुतिश्च मा हाशिष्टां सौपर्ण ञ्चक्षुरजस्रं ज्योतिः। ऋषीणां प्रस्तरोऽसि नमो दैवाय प्रस्तराय। मूर्धानं रयिणां मूर्धा समानानां भूयासम्।। 3।। 18 - 46

卐18.46.1 रुजश्च मा वेनश्च मा हासिष्टामुर्वश्च मा चमसश्च मा हासिष्टां विमोकश्च मा द्रपविश्च मा हाशिष्टा मा द्रदानुश्च मा मातरिश्वा च मा हासिष्टां मूर्धाच मा विधर्मा च मा हासिष्टां धर्त्ता च मा धरुणश्च मा हासिष्टामृधश्च मा वैमृधश्च मा हासिष्टाम्।। 1।।

卐18.46.2 बृहस्पतिर्म आत्मा नृम्णा नाम हृदः। हृदयाजरसं मा मा हासीरसंतापं मे हृदयमस्तु।। 2।।

卐18.46.3 उर्वी गव्युति स्समुद्रोऽस्मि विधर्मणा। नाभिरहं रयिणां नाभिरहं समानानां भूयासम्।। 3।। 18 - 47

卐18.47.1 स्वासदसि सूषा अमृतो मर्त्येष्वा। मा मां प्राणो वहाय परा गान्मा मां अपानोऽवहाय परा गात्।। 1।।

卐18.47.2 सूर्यो माह्नः पात्वग्निः पृथिव्या वायोरन्तरिक्षाद्यमो मनुष्येभ्य स्सरस्वती पार्थिवेभ्यः।। 2।।

卐18.47.3 प्राणापानौ मा मा हासिष्टं मा जने प्र मेषि। स्वस्त्यद्योषसो दोषसश्च सर्वा आपस्सर्वगणो अशीय।। 2।। 18 - 48

卐18.48.1 सु भूरसि रश्मिरस्या युर्द्धास्यायुर्मयि धेहि।। 1।।

卐18.48.2 सु भूरसि रश्मिरसि वर्चोधासि वर्चो मयि धेहि।। 2।।

卐18.48.3 सु भूरसि रश्मिरसि तेजोधासि तेजो मयि धेहि।। 3।।

卐18.48.4 सूर्यो मे वर्चोधा वर्चो दधात्विन्द्रिय मसीन्द्रियं मयि धेहि।। 4।।

卐18.48.5 वर्चोसि वर्चो मयि धेहि।। 5।।

卐18.48.6 शक्करी स्थ पशवो मोपस्थेषुर्मित्रावरुणौ मे प्राणापानावग्निर्मे दक्षन्दधातु।। 6। इति महत् (अष्टादशः) काण्डे सप्तमोऽनुवाकः 18 - 49

卐18.49.1 विद्म ते स्वप्न जनित्रं पाप्मनः पुत्रोऽसि यमस्य करणः। स न स्स्वप्न सु ष्वप्न्यात्पाहि।। 1।।

卐18.49.2 विद्म ते स्वप्न जनित्रं ग्राह्याः पुत्रोऽसि यमस्य करणः। स न स्स्वप्न सुष्वप्न्यात्पाहि।। 2।।

卐18.49.3 विद्म ते स्वप्न जनित्र न्निर्ऋत्या पुत्रोऽसि यमस्य करणः। स न स्स्वप्न सुष्वप्न्यात्पाहि।। 3।।

卐18.49.4 विद्म ते स्वप्न जनित्रमभूत्याः पुत्रोऽसि यमस्य करणः। स न स्स्वप्न सुष्वप्न्यात्पाहि।। 4।।
卐18.49.5 विद्म ते स्वप्न जनित्र न्निर्भूत्याः पुत्रोऽसि यमस्य करणः। स न स्स्वप्न सुष्वप्न्यात्पाहि।। 5।।
卐18.49.6 विद्म ते स्वप्न जनित्रं पराभूत्याः पुत्रोऽसि यमस्य करणः। स न स्स्वप्न सुष्वप्न्यात्पाहि।। 6।।
卐18.49.7 विद्म ते स्वप्न जनित्र न्देवजामीनां पुत्रोसि यमस्य करणः। स न स्स्वप्न सुष्वप्न्यात्पाहि।। 7।। 18 - 50
卐18.50.1 अजैष्मा द्यासनामाद्या भूमानागसो वयम्। उषो यस्माद्दुष्ष्वप्न्या दभैष्माप तदुच्छतु।। 1।।
卐18.50.2 द्विषते तत् परा वह शपते तत्परा वह। यन्द्विष्मो यश्च नो द्वेष्टि तस्मा एनद् गमयामः।। 2।।
卐18.50.3 उषा देवी वाचा सम्विदाना वाग्देव्युषसा सम्विदाना। उषस्पतिर्वाचस्पतिना सम्विदाना वाचस्पतिरुषस्पतिना सम्विदानः।। 3।।
卐18.50.4 तेऽमुष्मै परावहन्त्वरायान् दुर्नाम्न स्सदान्वा रक्षांसि। कुम्भीका दूषिकाः पीयकान्।। 4।।
卐18.50.5 जाग्रद्दुष्ष्वप्नं स्वप्न्ये दुष्ष्वप्न्यम्। अनागमिष्यतो वरानवित्तेः संकल्पानमुच्या द्रुहः पाशान्।। 5।।
卐18.50.6 तदमुष्माग्ने परा वहन्तु देवाः वाध्रिर्यथा सद्विथुरो न साधुः। तदस्मै गमयाम इति।। 6।। 18 - 51
卐18.51.1 एवानेवाव सा गरत्। असौ मां द्वेष्टि स आत्मानं द्वेष्टु योस्मान् द्वेष्टि तदात्मा द्वेष्टु।। 1।।
卐18.51.2 निर्द्विषन्तन्दिवो निष्पृथिव्या निरन्तरिक्षात् भजाम। सुयामंश्चाक्षुष।। 2।।
卐18.51.3 इदमहमामुष्या यणेऽमुष्याः पुत्रे दुष्ष्वप्न्यादेव दये। यददो अदो अभ्यगच्छन् यद्दोषा यत्पूर्वाङ् रात्रिम् यद्दिवा यन्नक्तं यज्जाग्रतो यत्स्वपन्तः।। 3।।
卐18.51.4 यदहरहः दुष्ष्वप्न्यमभिगच्छामि तस्मादेनमव दये। तञ्जहि तेन मन्दस्व तस्य पृष्टीरपि श्रृणिहि तं प्राणो जहातु। स वि प्राणोऽस्तु स प्र मीयतां सततो मा जीवित्।। 4।। 18 - 52
卐18.52.1 जितमस्माक मुद्भिन्न मस्माकमृत मस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामो ऽमुमामुष्यायण ममुष्याः

पुत्रमसौ यः। स ग्राह्याः पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 1।।

卐18.52.2 जितमस्माक मुद्भिन्न मस्माकमृत मस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामो ऽमुमामुष्यायण ममुष्याः पुत्रम् असौ यः। स निर्ऋत्याः पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेन मधमन्तमो गमयामि।। 2।।

卐18.52.3 जितमस्माक मुद्भिन्नमस्माक मृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामो ऽमुमामुष्यायणममुष्याः पुत्रम् असौ यः। सोऽभूत्याः पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 3।।

卐18.52.4 जितमस्माक मुद्भिन्नमस्माक मृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामो ऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। स निर्भूत्याः पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 4।।

卐18.52.5 जितमस्माक मुद्भिन्नमस्माक मृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामो ऽमुमामुष्यायणममुष्याः पुत्रम् असौ यः। स पराभूत्याः पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 5।।

卐18.52.6 जितमस्माक मुद्भिन्नमस्माक मृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामो ऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। स देवयामीनां पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 6।।

卐18.52.7 जितमस्माक मुद्भिन्नमस्माक मृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। स ऋषीणां पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 7।।

卐18.52.8 जितमस्माक मुद्भिन्नमस्माक मृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामो ऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। स आर्षेयाणां पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 8।।

卐18.52.9 जितमस्माक मुद्भिन्नमस्मा कमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। सोऽङ्गिरसां पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 9।।

卐18.52.10 जितमस्माक मुद्भिन्नमस्माक मृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। स आङ्गिरसानां पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 10।।

卐18.52.11 जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रम् असौ यः। स अथर्वणां पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 11।।

卐18.52.12 जितमस्माक मुद्भिन्नमस्माक मृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। स आथर्वणानां पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 12।।

卐18.52.13 जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। स ऋतूनां पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 13।।

卐18.52.14 जितमस्माक मुद्भिन्नमस्माक मृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रम् असौ यः। स आर्त्तवानां पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 14।।

卐18.52.15 जितमस्माक मुद्भिन्नमस्माक मृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। स ओषधीनां पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 15।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐18.52.16 जितमस्माक मुद्भिन्नमस्माक मृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। स वीरुधां पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 16।।

卐18.52.17 जितमस्माक मुद्भिन्नमस्माक मृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। स वनस्पतीनां पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 17।।

卐18.52.18 जितमस्माक मुद्भिन्नमस्माक मृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। स वानस्पत्यानां पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 18।।

卐18.52.19 जितमस्माक मुद्भिन्नमस्माक मृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। स इदावत्सरस्य पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 19।।

卐18.52.20 जितमस्माक मुद्भिन्नमस्माक मृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। स परिवत्सरस्य पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 20।।

卐18.52.21 जितमस्माक मुद्भिन्नमस्माक मृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामोऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। स संवत्सरस्य पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 21।।

卐18.52.22 जितमस्माक मुद्भिन्नमस्माक मृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामो ऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। सोऽहरात्रयोः पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 22।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐18.52.23 जितमस्माक मुद्भिन्नमस्माक मृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामो ऽमुमामुष्यायणममुष्याः पुत्रमसौ यः। सोऽह्नः संयतोः पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 23।।
卐18.52.24 जितमस्माक मुद्भिन्नमस्माक मृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामो ऽमुमामुष्यायणममुष्याঃ पुत्रमसौ यः। स इन्द्राग्न्योः पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 24।।
卐18.52.25 जितमस्माक मुद्भिन्नमस्माक मृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामोऽमुमामुष्यायणममुष्याঃ पुत्रमसौ यः। स बृहस्पतेः पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 25।।
卐18.52.26 जितमस्माक मुद्भिन्नमस्माक मृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामो ऽमुमामुष्यायणममुष्याঃ पुत्रमसौ यः। स प्रजापतेः पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 26।।
卐18.52.27 जितमस्माक मुद्भिन्नमस्माक मृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामो ऽमुमामुष्यायणममुष्याঃ पुत्रमसौ यः। स परमेष्ठीनः पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 27।।
卐18.52.28 जितमस्माक मुद्भिन्नमस्माक मृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामो ऽमुमामुष्यायणममुष्याঃ पुत्रमसौ यः। स राज्ञो वरुणस्य पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेनमधमन्तमो गमयामि।। 281।।
卐18.52.29 जितमस्माक मुद्भिन्नमस्माक मृतमस्माक न्तेजोऽस्माकं ब्रह्मास्माकम्। स्वरस्माकं यज्ञोऽस्माकं पशवोस्माकं वीरास्माकं प्रजास्माकम्। तस्मान्निर्भजामोऽमुमामुष्यायणममुष्याঃ पुत्रमसौ यः। स मृत्योঃ पड्विशात्पाशान्मामोचि। तस्येदं प्राणमायुर्नि वेष्टयामीदमेन मधमन्तमो गमयामि।। 29।। 18 - 53
卐18.53.1 जितमस्माकमुद्भिन्नमस्माकमभ्यष्टां विश्वাঃ पृतना अरातीस्स्वरभ्यावर्त्तै। सूर्यस्या वृतमन्वावर्त्ते दक्षिणामन्वावृतम्।। 1।।

卐18.53.2 तदग्निराह तदुसोम आहः पूषा मा धात्सुकृतस्य लोके। अगन्म स्व स्स्वरगन्म सं सूर्यस्य ज्योतिषामगन्म। वसो भूयाय वसुमान् यज्ञो वसु वंशिषीय वसुमान् भूयासम्।। 2। इत्यष्टादशकाण्डे (महत्काण्डे) अष्टमोऽनुवाकः 18 - 54

卐18.54.1 विषासहिं सहमानं सासहानं सहीयां सं सहमानं सहोजितम्। विश्वजीतं स्वर्जीतमभिजितं वसुजितङ्गोजितं सञ्जितं सन्धनाजितम्। इड्यन्नाम ह्व इन्द्रमायुस्मान् भूयासम्।। 1।।

卐18.54.2 विषासहिं सहमानं सासहानं सहीयां सं सहमानं सहोजितम्। विश्वजीतं स्वर्जीतमभिजितं वसुजितं गोजितं संजितं सन्धनाजितम्। इड्यन्नाम ह्व इन्द्रं देवानां प्रियो भूयासम्।। 2।।

卐18.54.3 विषासहिं सहमानं सासहानं सहीयां सं सहमानं सहोजितम्। विश्वजीतं स्वर्जीतमभिजितं वसुजितङ्गोजितं सञ्जितं सन्धनाजितम्। इड्यन्नाम ह्व इन्द्रं प्रजानां प्रियो भूयासम्।। 3।।

卐18.54.4 विषासहिं सहमानं सासहानं सहीयां सं सहमानं सहोजितम्। विश्वजीतं स्वर्जीतमभिजितं वसुजितङ्गोजितं सञ्जितं सन्धनाजितम्। इड्यन्नाम ह्व इन्द्रं पशूनां प्रियो भूयासम्।। 4।।

卐18.54.5 विषासहिं सहमानं सासहानं सहीयां सं सहमानं सहोजितम्। विश्वजीतं स्वर्जीतमभिजितं वसुजितङ्गोजितं सञ्जितं सन्धनाजितम्। इड्यन्नाम ह्व इन्द्रं समानानां प्रियो भूयासम्। । 18 - 55

卐18.55.1 उदिह्युदिहि सूर्य वर्चसा माभ्युदिहि। द्विषंश्च मह्यं रध्यतु मा चाहं द्विषतेरधं तवेद्विष्णो बहुधा वीर्याणि। त्वन्नः पृणीहि पशुभिर्विश्वरूपै स्स्वधायान्नो धेहि परमे व्योमन्।। 1।।

卐18.55.2 उदिह्युदिहि सूर्य वर्चसामाभ्युदिहि। यांश्च पश्यामि यांश्च न तेषु मा सुमतिं कृधि तवेत्विष्णो बहुधा वीर्याणि। त्वन्नः पृणीहि पशुभिर्विश्वरूपैस्स्वधायान्नो धेहि परमे व्योमन्।। 2।।

卐18.55.3 मा त्वा दभन्सलिले अप्स्वन्तर्ये पाशिन उपतिष्ठन्त्यत्र। हित्वाशस्तिं दिवमारुक्ष एतां स नो मृड सुमतौ ते स्याम तवेद्विष्णो बहुधा वीर्याणि। त्वन्नः पृणीहि पशुभिर्विश्वरूपै स्स्वधायान्नो धेहि परमे व्योमन्।। 3।।

卐18.55.4 त्वन्न इन्द्र महते सौ भगायादब्धेभिः परिपाह्यक्तुभि स्तवेद्विष्णो बहुधा वीर्याणि। त्वन्नः पृणीहि पशुभिर्विश्वरूपैः स्वधायान्नो धेहि परमे व्योमन्।। 4।।

卐18.55.5 त्वन्न इन्द्रोतिभि श्शिवाभि श्शन्तमो भव। आरोहंस्त्रिदिवं दिवो गृणान स्सोमपीतये प्रियं धामा स्वस्तये तवेद्विष्णो बहुधा वीर्याणि। त्वन्नः पृणीहि पशुभिर्विश्वरूपै स्स्वधायान्नो धेहि परमे व्योमन्।। 5।।

卐18.55.6 त्वमिन्द्रासि विश्वजित्सर्ववित् पुरुहूत स्त्वमिन्द्रेमं सुहवं स्तोम मेरयस्व शिवाभिस्तनूभि रभिनस्सजस्व तवेद्विष्णो बहुधा वीर्याणि। त्वन्नः पृणीहि पशुभिर्विश्वरूपै स्स्वधायान्नो धेहि परमे व्योमन्।। 6।।

卐18.55.7 अदब्धो दिवि पृथिव्यामुतासि न त आपुर्महिमान मन्तरिक्षे। अदब्धेन ब्रह्मणा वावृधाना स त्वन्न इन्द्र दिवि षञ्छर्मयच्छ तवेद्विष्णो बहुधा वीर्याणि। त्वन्नः पृणीहि पशुभिर्विश्वरूपै स्स्वधायान्नो धेहि परमे व्योमन्।। 7।।

卐18.55.8 या त इन्द्र तनुरप्स्वन्त र्यान्तरग्नौ या पृथिव्यां या त इन्द्र पवमाने स्वर्विद। ययेन्द्र तन्वान्तरिक्षं समापिथ तथा न इन्द्र तन्वा संशिसाधि तवेद्विष्णो बहुधा वीर्याणि। त्वन्न पृणीहि पशुभिर्विश्वरूपै स्स्वधायान्नो धेहि परमे व्योमन्।। 8।।

卐18.55.9 त्वामिन्द्र ब्रह्मणा वर्द्धयन्त स्सत्रं निषेदु ऋषयो नाधमाना स्तवेद्विष्णो बहुधा वीर्याणि। त्वन्नः पृणीहि पशुभिर्विश्वरूपै स्स्वधायान्नो धेहि परमे व्योमन्।। 9।।

卐18.55.10 त्वं रक्षसे प्रदिशश्चतस्रस्त्वं शोचिषा नभसी वि भासि। ऋतस्य पन्था मन्वेषि विद्वांस्तमिमा विश्वाभुवनानुतिष्ठसि तवेद्विष्णो बहुधा वीर्याणि। त्वन्नः पृणीहि पशुभिर्विश्वरूपै स्स्वधायां नो धेहि परमे व्योमन्।। 10।। 18 - 56

卐18.56.1 सप्तभि पराङ् तपस्येकयार्वाङ् अशस्तिमेषि सुदिने वाधमानः। त्वन्तृतन्त्वं पर्यैष्युत्सं सहस्रधारं वितथं स्वर्विदं तवेद् विष्णो बहुधा वीर्याणि। त्वं नः पृणीहि पशुभिर्विश्वरूपैः स्वधायां नो धेहि परमे व्योमन्।। 1।।

卐18.56.2 त्वमिन्द्रस्त्वं महेन्द्रस्त्वं विष्णुस्त्वं प्रजापतिः। तुभ्यं यज्ञो वि तायते तुभ्यं जुह्वति जुह्वत स्तवेद्विष्णो बहुधा वीर्याणि। त्वन्नः पृणीहि पशुभिर्विश्वरूपैः स्वधायां नो धेहि परमे व्योमन्।। 2।।

卐18.56.3 असति सत् प्रतिष्ठितं तं सति भूतं प्रतिष्ठितम्। भूतं ह भव्य आहितं भव्यं भूते समाहितं तवेद्विष्णो बहुधा वीर्याणि। त्वन्नः पृणीहि पशुभिर्विश्वरूपै स्स्वधायां नो धेहि परमे व्योमन्।। 3।।

卐18.56.4 शुक्रोऽसि भ्राजोऽसि। स यथा त्वं भ्राजता भ्राजोस्येवाहं भ्राजता भ्राज्यासम्।। 4।।

卐18.56.5 रुचिरोऽसि रोचोऽसि। स यथा त्वं रुच्या रोचोऽस्येवाहं प्रजया पशुभिर्ब्राह्मण वर्चसेन रोचिषीय।। 5।।

卐18.56.6 उद्यते नम उदायते नम उदिताय नमः। विराजे नमस्स्वराजे नमस्सम्राजे नमः।। 6।।

卐18.56.7 अस्तंयते नमोऽस्तमेष्यते नमोऽस्तमिताय नमः। विराजे नमस्स्वराजे नमस्सम्राजे नमः।। 7।।

卐18.56.8 आदित्या नावमा रुक्ष श्शतारित्रां स्वस्तये। अहर्नोऽत्यपीपरो रात्रिं सत्राति पारय।। 8।।

卐18.56.9 सूर्य नावमारुक्ष श्शतारित्रां स्वस्तये। रात्रिन्नो अत्यपीपरोह स्सत्राति पारय।। 9।।

卐18.56.10 प्रजापतेरावृतोब्रह्मणा वर्मणाहं कश्यपस्य ज्योतिषा वर्चसा च। जरदष्टिः कृतवीर्यो विहाया स्सहस्रायु स्सुकृतश्चरेयम्।। 10।।

卐18.56.11 ऋतेन गुप्त ऋतुभिश्च सर्वैर्भूतेन गुप्त उत भव्येन चाहम्। मा मा प्रापन्निषवो दैव्या या मा मानुषीरवसृष्टा वधाय।। 11।।

卐18.56.12 परिवृतो ब्रह्मणा वर्मणाहं कश्यपस्य ज्योतिषा वर्चसा च। मा मा प्रापत्पाप्मा मोत मृत्युरन्तर्दधेऽहं सलिलेन वाचः।। 12।।

卐18.56.13 अग्निर्मा गोप्ताः परिपातु विश्वतो व्युच्छन्ती रुषसꣳ पर्वताध्रुवाः। उद्यन्सूर्योनुदतां मृत्युपाशान् सहस्रं प्राणा मयि ते रमन्ताम्।। 13। इति महत्काण्डे (अष्टादश काण्डे) नवमोऽनुवाकः।। महत्काण्डे द्वितीयखण्ड स्समाप्तः।। 18 - 57

卐18.57.1 ओ चित्सखायं सख्या ववृत्यान्तिरꣳ पुरू चिदर्णवं जगन्वान्। पितृर्न पातमा दधीत वेधा अधि क्षमि प्रतरन्दीध्यानः।। 1।।

卐18.57.2 न ते सखा सख्यं वष्ट्येतत्सलक्ष्मा यद्विषुरूपा भवाति। महस्पुत्रासो असुरस्य वीरा दिवो धर्त्तार उर्विया परि ख्यन्।। 2।।

卐18.57.3 उशन्ति घा ते अमृतास एत देकस्य चित्त्यजसं मर्त्यस्य। नि ते मनो मनसि धाय्यस्मे जन्युꣳ पतिस्तन्वमा विविश्याः।। 3।।

卐18.57.4 न यत्पुरा चकृमा कद्ध नूनमृतं वदन्तो अनृतं रपेमः। गन्धर्वा अप्सूप्या च योषा सा नो नाभिꣳ परमञ्जामि तन्नौ।। 4।।

卐18.57.5 गर्भे नू नौ जनिता दम्पती कर्देवस्त्वष्टा सविता विश्वरूपः। न किरस्य प्र मिनन्ति व्रतानि वेद नावस्य पृथिवी उत द्यौः।। 5।।

卐18.57.6 कोऽद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून्। आसन्निषून् हृत्स्वसो मयोभून् य एषां भृत्यामृणधत्स जीवात्।। 6।।

卐18.57.7 कोऽस्य वेद प्रथमस्याह्नः क ईन्ददर्श क इह प्र वोचत्। बृहन्मित्रस्य वरुणस्य धाम कदु ब्रव आहनो वीच्या नृन्।। 7।।

卐18.57.8 यमस्य मा यम्यङ्काम आगन्समाने योनौ सहशेय्याय। जायेव पत्ये तन्वं रिरिच्यां वि चद् बृहेव रथ्येव चक्रा।। 8।।

卐18.57.9 न तिष्ठति न निमिषन्त्येते देवानां स्पश ईह ये चरन्ति। अन्येन मदाहनो याहि तूयं तेन वि वृह रथ्येव चक्रा।। 9।।

卐18.57.10 रात्रीभिरस्मा अहभिर्दशस्येत् सूर्यस्य चक्षुर्मुह रुन्मिमीयात्। दिवा पृथिव्या मिथुना सबन्धू यमीर्यमस्य विवृहादजामि।। 10।। 18 - 58

卐18.58.1 आ धा ता गच्छानुत्तरा युगानि यत्र जामयः कृणवन्नजामि। उप बर्बृहि वृषभाय बाहुमन्यमिच्छस्व सुभगे पतिं मत्।। 1।।

卐18.58.2 किं भ्राता सद्यदनाथं भवाति किमु स्वसा यन्निरृति र्निगच्छात्। काममूता बह्वेतद्रपामि तन्वा मे तन्वं सं पिपृग्धि।। 2।।

卐18.58.3 न वा उ ते तन्वा तन्वं सं पपृच्यां पापमाहुर्य स्स्वसारं निगच्छात्। अन्येन मत् प्रमुदः कल्पयस्व न ते भ्राता सुभगे वष्ट्ये तत्।। 3।।

卐18.58.4 न ते नाथं यम्यत्राहमस्मि न ते तनू तन्वा सं पपृच्याम्। असं यदेतन्मनसो हृदो मे भ्राता स्वसुः शयने यच्छयीय।। 4।।

卐18.58.5 बतो बतासि यम नैव ते मनो हृदयञ्चा विदाम। अन्या किल त्वाङ्क्षेव युक्तं परिष्वजाते लिबुजेव वृक्षम्।। 5।।

卐18.58.6 तस्य वा त्वं मन इच्छा स वा तवाधा कृणुष्व संविदं सुभद्राम्। अन्यमू षु त्वं यम्यस्य उ त्वां परिष्वजाते लिबुजेव वृक्षम्।। 6।।

卐18.58.7 त्रीणि छन्दांसि कवयो वि येतिरे पुरुरूपं दर्शतं विश्वचक्षणम्। वाता आपो ओषधयस्तान्येकस्मिन् भुवनार्पितानि।। 7।।

卐18.58.8 वृषा वृष्णे दुदुहे दोहसा दिवः पयांसि यह्वो अदितेरदाभ्यः। विश्वं स वेद वरुणो यथा धिया स यज्ञियो यजति यज्ञिया नृतून्।। 8।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐18.58.9 रपद् गन्धर्वीरप्या च योषणा नदस्य नादे परि पातु नो मनः। इष्टस्य मध्ये अदितिर्निधातु नो भ्राता नो ज्येष्ठः प्रथमो वि वोचति।। 9।।

卐18.58.10 सो चिन्नु भद्रा क्षुमती यशस्वत्युषा उवास मनवे स्वर्वती। यदीमुशन्त मुशतामनु क्रतु मग्निं होतारं विदधाय जीजनन्।। 10।। 18 - 59

卐18.59.1 अध त्यं द्रप्सं विभ्वं विचक्षणं विराभरदिषित श्श्येनोऽध्वरे। यदि विशो वृणतेदस्ममार्या अग्निं होतारमध धीरजायत।। 1।।

卐18.59.2 सदासि रण्वो यवसेव पुष्यते होत्राभिरग्ने मनुषस्स्वध्वरः। विप्रस्य वा यच्छशमान उक्थ्यं वाजं ससवाङ् उपयाहि भूरिभिः।। 2।।

卐18.59.3 उदीरय पितरा जार आ भगमियक्षति हर्यतो हृत्त इष्यति। विवक्ति वह्नि स्स्वपस्य ते मखस्तविष्यते असुरो वेपते मती।। 3।।

卐18.59.4 यस्ते अग्ने सुमतिं मर्त्तो अख्यत् सहसस्सुनोऽति स प्रश्रुण्वे। हर्षन्दधानो वहमानो अश्वैरा स द्युमाङ् अमवान् भूषति द्युन्।। 4।।

卐18.59.5 श्रुधि नो अग्ने सदने सधस्थे युक्ष्वारथ ममृतस्य द्रवित्नुम्। आ नो वह रोदसी वेदपुत्रे माकिर्देवाना मप भूरिह स्याः।। 5।।

卐18.59.6 यदग्न एषा समति र्भवाति देवी देवेषु यजता यजत्र। रत्ना च यद्विभजासि स्वधावो भागन्नो अत्र वसुमन्तं वीतात्।। 6।।

卐18.59.7 प्रत्यग्नि रुषसामग्र मख्यत् प्रत्यहानि प्रथमो जातवेदाः। प्रति सूर्यस्य पुरुधा च रश्मीन् प्रति द्यावापृथिवी आ ततान।। 7।।

卐18.59.8 अन्वग्नि रुषसामग्र मख्यदन्वहानि प्रथमो जातवेदाः। अनु सूर्यस्य पुरुधा च रश्मीननु द्यावापृथिवी आ ततान।। 8।।

卐18.59.9 द्यावा ह क्षामा प्रथमे ऋतेनाभि श्श्रावे भवत स्सत्यवाचा। देवो यन्मर्तान् यजथाय कृण्वन्त् सीदद्धोता प्रत्यङ् स्वमसुं यन्।। 9।।

卐18.59.10 देवो देवान् परि भूरृतेन वहा नो हव्यं प्रथमश्चिकित्वान्। धूमकेतु स्समिधा भाऋजीको मन्द्रो होता नित्यो वाचा यजीयान्।। 10।। 18 - 60

卐18.60.1 अर्चामि वां वर्धायापो घृतस्नु द्यावाभूमी श्रृणतं रोदसी मे। अहा यद्देवा असुनीतिमायन्मध्वा नो अत्र पितरा शिशीताम्।। 1।।

卐18.60.2 स्वावृग्देव स्यामृतं यदी गोरतो जातासो धारयन्त उर्वी। विश्वे देवा अनु तत्ते यजु र्गुर्दुहे यदेनी दिव्यं घृतं वाः।। 2।।

卐18.60.3 किं स्विन्नो राजा जगृहे कदस्याति व्रतं चकृमा को वि वेद। मित्रश्चिद्धिष्मा जुहुराणो देवा ञ्छ्लोको न याता मपिवाजो अस्ति।। 3।।

卐18.60.4 दुर्मन्त्वत्रामृतस्य नाम सलक्ष्मा यद्विषुरूपा भवाति। यमस्य यो मनवते सुमन्त्वग्ने तमृष्व पाह्यप्रयुच्छन्।। 4।।

卐18.60.5 यस्मिन्देवा विदथे मा दयन्ते विवस्वत स्सदने धारयन्ते। सूर्ये ज्योति रदधुर्मास्यक्तून् परि द्योतनिं चरतो अजस्रा।। 5।।

卐18.60.6 यस्मिन्देवा मन्मनि सञ्चरन्त्यपीच्ये न वयमस्य विद्म। मित्रो नो अत्रादिति रनागान् सविता देवो वरुणाय वोचत्।। 6।।

卐18.60.7 सखाय आ शिषामहे ब्रह्मेन्द्राय वज्रिणे। स्तुष ऊ षु नृतमाय धृष्णवे।। 7।।

卐18.60.8 शवसा ह्यसि श्रुतो वृत्रहत्येन वृत्रहा। मघैर्मघो नो अति शूर दाशसि।। 8।।

卐18.60.9 स्तेगो न क्षामत्त्येषि पृथिवीं मही नो वाता इह वान्तु भूमौ। मित्रो नोऽत्र वरुणो युज्यमानोऽग्निर्वने न व्यसृष्ट शोकम्।। 9।।

卐18.60.10 स्तुहि श्रुतं गर्त सदञ्जनानां राजान भीममुपहत्नु मग्रम्। मृडा जरित्रे रुद्रस्तवानो अन्यमस्मत्ते नि वपन्तु सेन्यम्।। 10।। 18 - 61

卐18.61.1 सरस्वती न्देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने। सरस्वतीं सुकृतो हवन्ते सरस्वती दाशुषे वार्यन्दात्।। 1।।

卐18.61.2 सरस्वतीं पितरो हवन्ते दक्षिणा यज्ञमभिनक्षमाणाः। आसद्यास्मिन् बर्हिषीमादयध्व मनमीवा ईष आ धेह्यस्मे।। 2।।

卐18.61.3 सरस्वती या सरथं ययाथोक्थै स्स्वधाभिर्देवि पितृभिर्मदन्ती। सहस्रार्घमिडोऽत्र भागं रायस्पोषं यजमानाय धेहि।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐18.61.4 उदीरतामवर उत्परास उन्मध्यमाꣳ पितरस्सोम्यासः। असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु।। 4।।

卐18.61.5 आहं पितॄन् सुविदत्राङ् अवित्सि नपातं च विक्रमणं च विष्णोः। वर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठाः।। 5।।

卐18.61.6 इदं पितृभ्यो नमोऽस्त्वद्य ये पूर्वासो येऽपरासꣳ परे ईयुः। ये पार्थिवे रजस्या निषत्ता ये वा नूनं सुवृजनासु दिक्षु।। 6।।

卐18.61.7 मातली कवैर्यमो अङ्गिरोभि र्बृहस्पतिर्ऋक्वभि र्वावृधानः। यांश्च देवा वावृधुर्ये च देवान्त्स्वाहान्ये स्वधयान्ये मदन्ति।। 7।।

卐18.61.8 स्यादुष्किलायं मधुमाङ् उतायन्तीव्रꣳ किलायं रसवाङ् उतायम्। उतो न्वस्य पपिवाङ्गमिन्द्रं न कश्चन सहत आहवेषु।। 8।।

卐18.61.9 परेयिवांसं प्रवतो महीरिनु बहुभ्यꣳ पन्था मनुपस्पशानम्। वैवस्वतं सङ्गमनञ्जनानां यमं राजानं हविषा दुवस्य।। 9।।

卐18.61.10 यमो नो गातुं प्रथमो विवेद नैषा गव्युतिरपभर्तवा उ। यत्रा नꣳ पूर्वे पितरꣳ परेयु रेना यज्ञानाꣳ पथ्या अनु स्वाः।। 10।। 18 - 62

卐18.62.1 बर्हिषदꣳ पितर ऊत्यर्वा गिमा वो हव्या चकृमा जुषध्वम्। त आ गतावसा शन्त मे नाऽथा न श्शं योररपो दधात्।। 1।।

卐18.62.2 आच्या जानु दक्षिणतो निषद्येमं यज्ञमभि गृणीत विश्वे। मा हिंशिष्ट पितरꣳ केन चिन्नो यद्व आगꣳ पुरुष ताकराम।। 2।।

卐18.62.3 त्वष्टा दुहित्रे वहतुं कृणोतीतीदं विश्वं भुवनं समेति। यमस्य माता पर्युह्यमाना महो जाया विवस्वतो ननाश।। 3।।

卐18.62.4 प्रेहि प्रेहि पथिभिꣳ पूर्व्येभिर्यत्रा ते पूर्वे पितरꣳ परेताः। उभा राजाना स्वधया मदन्ता यमं पश्यसि वरुणञ्च देवम्।। 4।।

卐18.62.5 अपेत वीत वि च सर्पतातोऽस्मा एतं पितरो लोकमक्रन्। अहोभि रद्भिरक्तुभिर्व्यक्तं यमो ददात्यवसान मस्मै।। 5।।

Sri Sachchidananda Avadhoota Datta Peetham • Mysore •

卐18.62.6 उशन्तस्त्वा नि धीमह्युशन्त स्समिधीमहि। उशन्नु शत आ वह पितॄन् हविषे अत्तवे।। 6।।
卐18.62.7 द्युमन्तस्त्वा नि धीमहि द्युमन्त स्समिधीमहि। द्युमान्द्युमत आ वह पितॄन् हविषे अत्तवे।। 7। इति महत्काण्डे (अष्टादशकाण्डे) दशमोऽनुवाकः 18 - 63
卐18.63.1 अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगव स्सोम्यासः। तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम।। 1।।
卐18.63.2 अङ्गिरोभि र्यज्ञियैरा गहीह यम वैरूपै रिह मादयस्व। विवस्वन्तं हुवे यः पिता ते अस्मिन् यज्ञे वर्हिष्या निषद्यः।। 2।।
卐18.63.3 इमं यमः प्रस्तरमा हि सीदा रङ्गिरोभिः पितृभि स्संविदानः। आ त्वा मन्त्राः कविशस्ता वहन्त्वेना राजन् हविषो मादयस्व।। 3।।
卐18.63.4 यमाय सोमं सुनुत यमाय जुहुता हविः। यमं ह यज्ञो गच्छत्यग्निदूतो अरङ्कृतः।। 4।।
卐18.63.5 यमाय घृतवद्धविर्जुहोत प्र च तिष्ठत। स नो जीवेष्वा यमेद्दीर्घमायुष्प्रजीवसे।। 5।।
卐18.63.6 यमाय मधुमत्तमं राज्ञे हव्यं जुहोतन। इदन्नमो ऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यः।। 6।।
卐18.63.7 त्रिकद्रुकेभिः पतति षडुर्वी रेकमिद्बृहत्। त्रिष्टुब्गायत्री छन्दांसि सर्वा ता यम आर्पिता।। 7।।
卐18.63.8 मैनमग्ने वि दहो माभि शोचो मास्य त्वचं चिक्षिपो मा शरीरम्। यदा शृतं कृणवो जातवेदो ऽथेममेनं प्रहिणुतात् पितृभ्यः।। 8।।
卐18.63.9 शृतं यदा करसि जातवेदो ऽथेमेनं परि दत्तात् पितृभ्यः। यदा गच्छात्यसुनीतिमेता मथ देवानां वशनीर्भवाति।। 9।।
卐18.63.10 सूर्यं चक्षुर्गच्छतु वातमात्मा दिवञ्च गच्छ पृथिवीं च धर्मणा। आपो वा गच्छ यदि तत्र ते हित मोषधीषु प्रति तिष्ठा शरीरैः।। 10।। 18 - 64
卐18.64.1 अजो भाग स्तपसस्तं तपस्व तन्ते शोचिस्तपतु तन्ते अर्चिः। यास्ते शिवास्तन्वो जातवेद स्ताभिर्वहैनं सुकृतामु लोकम्।। 1।।

卐18.64.2 यास्ते शोचयो रंहयो जातवेदस्तन्वः क्रुराः पर्यङ्खयाते। अजं यन्तमनु तास्ते समृण्वता मथेतराभि श्शिवतमाभि श्शृतं कृधि।। 2।।

卐18.64.3 अव सृज पुनरग्ने पितृभ्यो यस्त आहुतश्चरति स्वधाभिः। आयुर्वसान उप यातु शेष स्सं गच्छतां तन्वा सुवर्चाः।। 3।।

卐18.64.4 अति द्रव सारमेयौ श्वानौ चतुरक्षौ शबलौ साधुना पथा। अथा पितॄन् सुविदत्राङ् अपेहि यमेन ये सधमादं मदन्ति।। 4।।

卐18.64.5 यौ ते श्वानौ यम रक्षितारौ चतुरक्षौ पथिरक्षी नृचक्षसा। ताभ्यामेनं परिधेहि राजन् स्वस्ति चास्मा अनमीवञ्च धेहि।। 5।।

卐18.64.6 उरुणसा वसुतृपावुदुम्बलौ यमस्य दूतौ चरतो जनाङ् अनु। तावस्मभ्यन्दृशये सूर्याय पुनर्दाता मसुमद्येह भद्रम्।। 6।।

卐18.64.7 सोम एकेभ्यः पवते घृतमेक उपासते। येभ्यो मधु प्रधावति तांश्चिदेवापि गच्छतात्।। 7।।

卐18.64.8 ये चित् पूर्वे ऋतसाता ऋतजाता ऋतायवः। पितॄन्तपस्वतो यम तपोजाङ् अपि गच्छतात्।। 8।।

卐18.64.9 तपसा ये अनाधृष्या स्तपसा ये स्वर्ययुः। वण्महाँ अधिसूर्य वडादित्य महाँ असि।। 9।।

卐18.64.10 तपो ये चक्रिरे महस्तांश्चिदेवापि गच्छतात्। सहस्रणीथाः कवयो ये गोपायन्ति सूर्यम्। ऋषीन्तपस्वतो यम तपोजाङ् अपि गच्छतात्।। 10।। 18 - 65

卐18.65.1 ये युध्यन्ते प्रधनेषु शूरासो ये तनूत्यजः। ये वा सहस्र दक्षिणा स्तांश्चिदेवापि गच्छतात्।। 1।।

卐18.65.2 सोनास्मै पृथिवी भवानृक्षरा निवेशिनी। यच्छास्मै शर्म सप्रथाः।। 2।।

卐18.65.3 असंवाधे पृथिव्या उरौ लोके नि धीयते। स्वधा याश्चकृषे जीवन्तास्ते सन्तु मधुश्चुतः।। 3।।

卐18.65.4 ह्वयामि ते मनसा मन इहेमान् गुहामुप जुजूषाण एहि। सङ्गच्छस्व पितृभिर्यच दत्तं स्योनास्त्वा वाता उप वान्तु शग्माः।। 4।।

卐18.65.5 आ त्वा वहन्तु मरुत उदवाहा उदप्लुतः। अजेन कृण्वन्त श्शीतं वर्षेणोक्षन्तु बालिति।। 5।।

卐18.65.6 उदह्व मायुरायुषे क्रत्वे दक्षाय जीवसे। स्वान्गच्छतु ते मनो अधा पितॄन् उप द्रवः।। 6।।

卐18.65.7 मा ते मनो मासोर्माङ्गानां मा रसस्य ते। मा ते हा स्त तन्वᳲ किञ्चनेह।। 7।।

卐18.65.8 मात्वा वृक्षस्सं बाधिष्ट मा देवी पृथिवी मही। लोकं पितृषु वित्त्वैधस्व यमराजसु।। 8।।

卐18.65.9 यत्ते अङ्ग विनिहतं पराचैरपानᳲ प्राणो य उ ते परेतः। तत्ते संगत्य पितरस्सनीडा घासे घासमा सादयन्तु।। 9।।

卐18.65.10 अपेमं जीवा अरुधन्गृहेभ्य स्तं निर्वहत परि ग्रामादितः। मृत्युर्यमस्यासीद्दूतᳲ प्रचेता असून् पितृभ्यो गमयाञ्चकर्थ।। 10।। 18 - 66

卐18.66.1 ये दस्यवᳲ पितृषु प्रविष्टा ज्ञातिमुखा अहुतादश्चरन्ति। परापुरो निपुरो ये हरन्ति तानस्मा द्यज्ञात्प्र धमन्तु देवाः।। 1।।

卐18.66.2 सं विशन्त्विह पितर स्स्वा न स्स्योनं कृण्वन्त प्रतिरन्त आयुः। तेभ्यश्शकेम हविषा नक्षमाणा ज्योग्जीवन्त श्शरदᳲ पुरुचीः।। 2।।

卐18.66.3 यान्ते धेनुन्नि पृणामि यं वा ते क्षीर ओदनं। तेना जनस्यासो भर्त्ता योऽत्रासद् जीवनः।। 3।।

卐18.66.4 अश्वावतीं प्र तर या शुशेवा ऋक्षाकं वा प्रतरं नवीयः। यस्त्वा जघान वध्य स्सो अस्तु मा सो अन्यद्विदत भागधेयम्।। 4।।

卐18.66.5 यमᳲ परोस्तादवरो विवस्वान्ततᳲ परं नाति पश्याम्यन्यत्। यमे अध्वरो अधि मे निविष्टो भुवे विवस्वा नन्वाततान।। 5।।

卐18.66.6 अपागूहन्नमृतां मर्त्येभ्यᳲ कृत्वा सवर्णा मदधुर्विवस्वते। उतास्विना वभरद् यत्तदासी दजहादु द्वा मिथुना सरण्यूः।। 6।।

卐18.66.7 ये निखाता ये परोप्ता ये दग्धा ये चोद्धिताः। सर्वांस्ता नग्न आ वह पित्तॄन् हविषे अत्तवे।। 7।।

卐18.66.8 ये चेह पितरो ये च नेह यांश्च विद्म याङ् उ च न प्रविद्म। त्वं वेत्थ यदि ते जातवेद स्स्वधाभिर्यज्ञं सुकृतञ्जुषन्ताम्।। 8।।

卐18.66.9 शन्तप माति तपो अग्ने मा तन्वन्तपः। वनेषु शुष्मो अस्तु ते पृथिव्यामस्तु यद्धरः।। 9।।

卐18.66.10 ददाम्यस्मा अवसानमेतद्य एष आगन् मम चेदभूदिह। यमश्चिकित्वान् प्रत्येतदाह ममैष राय उप तिष्ठतामिह।। 10।। 18 - 67

卐18.67.1 प्रेमां मात्राम्मिमीमहे यथा परन्न मासातै। शते शरत्सु नो पुरा।। 1।।

卐18.67.2 उदिमां मात्राम्मिमीमहे यथा परन्न मासातै। शते शरत्सु नो पुरा।। 2।।

卐18.67.3 अपेमां मात्राम्मिमीमहे यथा परन्न मासातै। शते शरत्सु नो पुरा।। 3।।

卐18.67.4 वीमां मात्राम्मिमीमहे यथा परन्न मासातै। शते शरत्सु नो पुरा।। 4।।

卐18.67.5 निरिमां मात्राम्मिमीमहे यथा परन्न मासातै। शते शरत्सु नो पुरा।। 5।।

卐18.67.6 उदिमां मात्राम्मिमीमहे यथा परन्न मासातै। शते शरत्सु नो पुरा।। 6।।

卐18.67.7 समिमां मात्राम्मिमीमहे यथा परन्न मासातै। शते शरत्सु नो पुरा।। 7।।

卐18.67.8 अमासि मात्रां स्वरगा मायुष्मान् भूयासम्। यथा परन्न मासातै शते शरत्सु नो पुरा।। 8।।

卐18.67.9 प्राणोऽपानो उत वा व्यान आयुश्चक्षु र्दृशये सूर्याय। अपरि परेण यथा यमराज्ञः पितृन् गच्छ।। 9।।

卐18.67.10 ये नः पितुः पितर ये पितामहा य आविविशु रुर्वन्तरिक्षम्। य आक्षियन्ति पृथिवीमुत द्यां तेभ्यो पितृभ्यो नमसा विधेम।। 10।।

卐18.67.11 ये अग्रव इशशमानाः परेयुर्हित्वा द्वेषांस्यन पत्यवन्तः। ते द्यामुदित्याविदन्त लोकन्नाकस्य पृष्ठे अधि दीध्यानाः।। 11।।

卐18.67.12 उदन्वती द्यौरवमा पीलु मतीति मध्यमा। तृतीया ह प्रद्यौरिति यस्यां पितर आसते।। 12।।

卐18.67.13 इदमिद्वा उ तमं दिवि पश्यति सूर्यम्। माता पुत्रं यथा सिचाभ्येनं भूम ऊर्णुहि।। 13।। 18 - 68

卐18.68.1 इदमिद्वा उ नापरं जरस्यत उतापरम्। जाया पतिमिव वाससा भ्येनं भूम ऊर्णुहि।। 1।।

卐18.68.2 अभि त्वोर्णोमि पृथिव्या मातुर्वस्त्रेण भद्रया। जीवेषु भद्रन्तन्मयि स्वधा पितृषु सा त्वयि।। 2।।

卐18.68.3 अग्निषोमा पथिकृता स्योनं देवभ्यो रत्नं दधथुर्वि लोकम्। उप प्रेष्यन्त पूषणं यो वहात्यञ्जो यानैः पथिभिस्तत्र गच्छतु।। 3।।

卐18.68.4 पूषा त्वेतश्च्यावयतु प्र विद्वान्नष्ट पशुर्भुवनस्य गोपा। स त्वैतेभ्यः परि ददत् पितृभ्योऽग्निर्देवेभ्य स्सुविदत्रियेभ्यः।। 4।।

卐18.68.5 आयुर्विश्वायुः परि पातु त्वा पूषा त्वा पातु प्रपथे पुरस्तात्। यत्रासते सुकृतो यत्र त ईयु स्तत्र त्वा देव स्सविता दधातु।। 5।।

卐18.68.6 इदन्त्वा वासः प्रथमं न आगन्नपैतदूह यदिहा विभुः पुराः। इष्टापूर्त्त मनुसंक्राम विद्वान्यत्र ते दत्तं बहुधा विबन्धुषु।। 6।।

卐18.68.7 इमौ जुनज्मि ते वह्नी असूनीताय नेतवे। ताभ्यां यमस्य सादनं समितिं चोप गच्छतात्।। 7।।

卐18.68.8 अग्नेर्वर्म परि गोमिर्व्ययस्व सं प्रोर्णुष्व पीवसा मेदसा च। नेत्त्वा धृष्णुर्हरसा जर्हृषाणो दधृग्विधक्षन् परिङ्खयातै।। 8।।

卐18.68.9 धनुर्हस्ता दाददानो मृतस्य सह क्षत्रेण वर्चसा बलेन। अत्रैव त्वमिह वयं सुवीरा विश्वा मृधो अभिमा तिर्जयेम।। 9।।

卐18.68.10 दण्डं हस्तादाददानो मृतस्य सह श्रोत्रेण वर्चसा बलेन। समागृभाय वसु भूरि पुष्टमर्वाङ् त्वमेह्यभि जीवलोकम्।। 10।।

卐18.68.11 इयन्नारी पतिलोकं वृणाना नि पद्यत उप त्वा मर्त्य प्रेतम्। धर्मं पुराणमनु पालयन्ती तस्यै प्रजां द्रविणञ्चेह धेहि।। 11।।

卐18.68.12 उदीर्ष्व नार्यभि जीवलोकं गतासुमेतमुप शेष एहि। हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभि सं बभूविथ।। 12। इति महत्काण्डे ( अष्टादशकाण्डे ) एकादशोऽनुवाकः 18 - 69

卐18.69.1 अपश्यं युवतीं नीयमानां जीवां मृतेभ्यः परिणीयमानाम्। अन्धेन यत्तमसा प्रावृतासीत् प्राक्तो अपाचीमनयं तदेनाम्।। 1।।

卐18.69.2 प्रजानत्यघ्न्ये जीवलोकं भवन्ति देवानां पन्थामनु सं चरन्ति। एष ते गोपति स्तञ्जुषस्व स्वर्गं लोकमधि रोहयैनम्।। 2।।

卐18.69.3 उप द्यामुप वेतसमवत्तरो नदीनाम्। अग्ने पित्तमपामसि।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐18.69.4 यन्त्वमग्ने समदहस्तमु निर्वापया पुनः। क्याम्बूरत्र रोहतु शाण्डदुर्वा व्यल्कशा।। 4।।

卐18.69.5 इदन्त एकं पर ऊ त एकं तृतीयेन ज्योतिषा सं विशस्व। सम्वेशने तन्वा चारुरेधि प्रियो देवानां परमे सधस्थे।। 5।।

卐18.69.6 उत्तिष्ठ प्रेहि प्र द्रवौकꣳ कृणुष्व सलिले सधस्थे। तत्र त्वं पितृभि स्संविदान स्सं सोमेन मदस्व सं स्वधाभिः।। 6।।

卐18.69.7 प्र च्यवस्व तन्वं सं भरस्व मा ते गात्रा वि हायि मो शरीरम्। मनो निविष्टमनुसं विशस्व यत्र भूमेर्जुषसे तत्र गच्छ।। 7।।

卐18.69.8 वर्चसा मां पितरस्सोम्यासो अञ्जन्तु देवा मधुना घृतेन। चक्षुषे मा प्रतरं तारयन्तो जरसे मा जरदष्टिं वर्धयन्तु।। 8।।

卐18.69.9 वर्चसा मां समनक्त्वग्नि र्मेधां मे विष्णुर्न्य नक्त्वासन्। रयिं मे विश्वे नि यच्छन्तु देवाश्शुद्धा आपꣳ पवनैर्मा पुनन्तु।। 9।।

卐18.69.10 मित्रावरुणा परि मामधाता मादित्या मा स्वरवो वर्द्धयन्तु। वर्चो म इन्द्रो न्यनक्तु हस्तयोर्जरदष्टिं मा सविता कृणोतु।। 10।। 18 - 70

卐18.70.1 यो ममार प्रथमो मर्त्यानां यꣳ प्रेयाय प्रथमो लोकमेतम्। वैवस्वतं सङ्गमनञ्जनानां यमं राजानं हविषा दुवस्व।। 1।।

卐18.70.2 परा यात पितर आ च याता यं वो यज्ञो मधुना समक्तः। दत्तो अस्मभ्यं द्रविणेह भद्रं रयिञ्च न स्सर्ववीरं दधात।। 2।।

卐18.70.3 कण्व कक्षीवान् पुरुमीढो अगस्त्य श्यावाश्व स्सोभर्यर्चनानाः। विश्वामित्रोऽयं यमदग्निर्वसिष्ठो ऽवन्तु नꣳ कश्यपो वामदेवः।। 3।।

卐18.70.4 विश्वामित्रर्जमदग्निर्वसिष्ठो भरद्वाजो गोतमो वामदेवः। शर्दिर्नो अत्रिरग्रभिन्नमोभि स्सु संशासꣳ पितरो मृडता नः।। 4।।

卐18.70.5 कस्ये मृजाना अति यन्ति रिप्रमायुर्दधानाꣳ प्रतरं नवीयः। आप्यायमानाꣳ प्रजया धनेन शुद्धा भवन्त श्शुचयꣳ पावकाः।। 5।।

卐18.70.6 यद्वो मुद्रं पितर स्सोम्यञ्च ते नो सचध्वं स्वयशसो हि भूत। ते अर्वाणꣳ कवय आ शृणोत सुविदत्रा विदथे हूयमानाः।। 6।।

卐18.70.7 ये अत्रयो अङ्गिरसो नवग्वा इष्टावन्तो रातिषाचो दधानाः। दक्षिणावन्त सुकृतो य उ स्था सद्यास्मिन् वर्हिषि मादयध्वम्।। 7।।

卐18.70.8 अधा यथा नः पितरः परासः प्रत्नासो अग्नि ऋतमा शुषाणाः। शुचिदयन्दी धिति मुक्थशासः क्षामा भिन्दन्तो अरुणीरपव्रन्।। 8।।

卐18.70.9 सुकर्माण स्सु रुचो देवयन्तोऽयो न देवा जनिमा धमन्तः। शुचन्तो अग्निं ववृधन्त इन्द्रमुर्वीं गव्यां वर्हिषदन्नो अक्रन्।। 9।।

卐18.70.10 आ यूथेव क्षुमति पश्वो अख्य द्देवानां यज्जनिमान्त्युग्रः। मर्तानाञ्चि दुर्वशीरकृप्रन् वृधे चिदर्थ उपरस्यायोः।। 10।। 18 - 71

卐18.71.1 अकर्म ते स्वपसो अभूम ऋतमवस्रन् नुषसो विभातीः। विश्वन्तद्भद्रं यद्वहन्ति देवा बृहद् वदेम विदथे सुवीराः।। 1।।

卐18.71.2 इन्द्रो मा मरुत्वान् प्राच्य दिशः पातु बाहुच्युता पृथिवीं द्यामिवोपरि। लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इहा स्थ।। 2।।

卐18.71.3 धाता मा निरृत्या दक्षिणाया दिशः पातु बाहुच्युता पृथिवीं द्यामिवोपरि। लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इहा स्थ।। 3।।

卐18.71.4 अदितिर्मादित्यैः प्रतीच्या दिशः पातु बाहुच्युता पृथिवीं द्यामिवोपरि। लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इहा स्थ।। 4।।

卐18.71.5 आदित्यो र्मादित्ये विश्वैर्देवै रुदिच्या दिशः पातु बाहुच्युता पृथिवीं द्यामिवोपरि। लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इहा स्थ।। 5।।

卐18.71.6 धर्त्ता ह त्वा धरुणो धारयाता ऊर्ध्वं भानुं सविता द्यामिवोपरि। लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इहा स्थ।। 6।।

卐18.71.7 प्राच्यान्त्वा दिशि पुरा संवृत स्स्वधाया मा दधामि बाहुच्युता पृथिवीं द्यामिवोपरि। लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ। 7।।

卐18.71.8 दक्षिणायान्त्वा दिशि पुरा संवृत स्स्वधाया मा दधामि बाहुच्युता पृथिवीं द्यामिवोपरि। लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इहा स्थ।। 8।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham • Mysore

卐18.71.9 प्रतीच्यान्त्वा दिशि पुरा संवृत स्स्वधाया मा दधामि बाहुच्युता पृथिवीं द्यामिवोपरि। लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इहा स्थ।। 9।।

卐18.71.10 उदीच्यान्त्वा दिशि पुरा संवृत स्स्वधाया मा दधामि बाहुच्युता पृथिवीं द्यामिवोपरि। लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इहा स्थ।। 10।। 18 - 72

卐18.72.1 ध्रुवायान्त्वा दिशि पुरा संवृतस्स्वधायामा दधामि बाहुच्युता पृथिवीं द्यामिवोपरि। लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इहा स्थ।। 1।।

卐18.72.2 ऊर्ध्वायान्त्वा दिशि पुरा संवृत स्स्वधाया मा दधामि बाहुच्युता पृथिवीं द्यामिवोपरि। लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इहा स्थ।। 2।।

卐18.72.3 ध्रुवोसि धरुणोऽसि वंशगोऽसि। उदपूरोऽसि घृतपूरोऽसि ऋतपुरोऽसि मधुपूरोऽसि वातपूरोऽसि।। 3।। 18 - 73

卐18.73.1 इतश्च मामुतश्चावतां यमे इव यतमाने यदैतम्। प्र वां भरन् मानुषा देवयन्त।। 1।।

卐18.73.2 आ सीदतं स्वमूलोकं विदाने स्वासस्थे भवतमिन्दवे नः। युजे वां ब्रह्म पूर्व्यं नमोभिर्वि श्लोक एति पथ्येव सूरेः।। 2।।

卐18.73.3 शृण्वन्तु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः। त्रीणि पादानि रुपोऽन्वरोहं चतुष्पदी मन्वेमि व्रतेन। अक्षरेण प्रति मिम एतां मृतस्य नाभावधि सं पुनामि।। 3।।

卐18.73.4 देवेभ्यः कमवृणीत मृत्युं प्रजायै कममृतं नावृणीत। बृहस्पति र्यज्ञमकृण्वत ऋषिः प्रियां यमस्तन्वं प्रारिरेचीत्।। 4।।

卐18.73.5 त्वमग्न ईळितो जातवेदो ऽवाड्व्यानि सुरभिणि कृत्वी। प्रादाः पितृभ्यः स्वधया ते अक्षं नद्धि त्वन्देव प्रयता हवींषी।। 5।।

卐18.73.6 आसीनासो अरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्याय। पुत्रेभ्यः पितरस्तस्य वस्वः प्र यच्छत त इहोर्जं दधातु।। 6।।

卐18.73.7 अग्निष्वात्ताः पितर एह गच्छत सदस्सद स्सदत सुप्रणीतयः। अत्ता हवींषि प्रयतानि बर्हिषि रयिञ्च न स्सर्ववीरं दधातु।। 7।।

卐18.73.8 उपहूताः पितर स्सोम्यासः बर्हिष्येषु निधिषु प्रियेषु। त आ गमन्तु त इह श्रुव न्त्वधि ब्रुवन्तु तेऽवन्त्वस्मान्।। 8।।

卐18.73.9 ये नः॰ पूर्वे पितर स्सोम्यासो अनुहिरे सोमपीथं वसिष्ठाः। तेभिर्यम स्सं रराणो हविंष्यु शन्नुशद्भिः॰ प्रतिकाममत्तु।। 9।।

卐18.73.10 ये दातृषुर्देवत्रा जेहमाना होत्राविद स्तोमतष्टासो अर्कैः। आग्नेयाहि सुविदत्रेभिरर्वाङ् सत्यैः॰ कविभिः॰ पितृभिर्घर्मसद्भिः।। 10।। 18 - 74

卐18.74.1 ये सत्यास्यो हविरदो हविष्पा इन्द्रेण देवैस्सरथं दधानाः। अग्ने याहि सहस्रं देववन्दैः॰ परैः॰ पूर्वैः॰ पितृभिर्घर्म सद्भिः।। 1।।

卐18.74.2 उप सर्प मातरं भूमिमेतामुरुव्यचसं पृथिवीं सुशेवाम्। ऊर्णम्रदा पृथिवी दक्षिणावत एषा त्वा पातु निर्ऋते रुपस्थात्।। 2।।

卐18.74.3 उच्छ्वञ्चस्व पृथिवी मा नि बाधथा स्सूपायनास्मै भव सूप वञ्चना। माता पुत्रं यथा सिचा ऽभ्येनं भूम ऊर्णुहि।। 3।।

卐18.74.4 उच्छ्वञ्चमाना पृथिवी सु तिष्ठतु सहस्रं मित उप हि श्रयन्ताम्। ते गृहासो घृतश्चुतस्स्योना विश्वहास्मै शरणास्सन्त्वत्र।। 4।।

卐18.74.5 उत्ते स्तभ्नाति पृथिवीं त्वत्परिमं लोगं विदधन् मोऽहं रिषम्। एतां स्थूणां पितरो धारयन्त्यत्रा यम स्सादना ते कृणोतु।। 5।।

卐18.74.6 अथर्वा पूर्णञ्चमसं यमिन्द्रा या बिभर्वाजिनीवते। तस्मिन् कृणोतु सुकृतस्य भक्षं तस्मिन्निन्दुः॰ पवते विश्वदानीम्।। 6।।

卐18.74.7 अमुमग्ने चमसं मा वि जिह्वरः॰ प्रियो देवानामुत सोम्यानाम्। एष यश्चमसो देवपान स्तस्मिन्देवा अमृता मादयन्ते।। 7।।

卐18.74.8 यत्ते कृष्णश्शकुन आतुतोद पिपीलस्सर्प उत वा श्वापदः। अग्निष्टद्विश्वा दापृणातु विद्वान् सोमश्च यो ब्राह्मणाङ् आविवेश।। 8।।

卐18.74.9 पयस्वती रोषधयः॰ पयस्वन्मामकं पयः। अथो पयस्वदित् पयस्तेन मा सह जिन्वथ।। 9।।

卐18.74.10 इमा नारिरविधवा स्सुपत्नी राञ्जनेन सर्पिषा सं विशन्तु। अनश्रवो अनमीवा स्सुरत्ना आ रोहन्तु जनयो योनिमग्रे।। 10।। 18 - 75

卐18.75.1 स्वं गच्छस्व पितृभिस्सं विदानेष्टापूर्त्तेन परमे व्योमन्। हित्वा यावद्यं पुनरस्तमेहि सं गच्छस्व तन्वा सुवर्चाः।। 1।।

卐18.75.2 ये अग्निदग्धा येऽनग्निदग्धा मध्ये दिवस्स्वधया मादयन्ते। तेभ्यस्स्वराड सुनितिमेतां यथा वशं तन्वः कल्पयाति।। 2।।

卐18.75.3 आ रभस्व जातवेद स्तेजस्वद्धरो अस्तु ते। शरीरमस्य सन्दहाथैनं धेहि सुकृतामु लोके।। 3।।

卐18.75.4 पुनर्देहि वनस्पते य एष निहितस्त्वयि। यथा यमस्य सादन आसातै विदथा वदन्।। 4।।

卐18.75.5 शन्ते निहारो भवतु शन्ते पृष्वाव शीयताम्। शीतिके शीतिकावति ह्लादिके ह्लादिकावति। मण्डुक्याप्सु शं भुव इमं स्त्वग्निं शमय।। 5।।

卐18.75.6 विवस्वान्नोऽभयं कृणोतु परैतु मृत्युरमृतं न ऐतु। इह मे वीरा बहवो भवन्त्व श्ववन् गोमन्मय्यस्तु पुष्टम्।। 6।।

卐18.75.7 विवस्वान्नो ऽमृतत्वे दधातु यस्सुत्रा मा जिरदानु स्सुदानुः। इमान्रक्षः पुरूषाना जरिम्णा मो ष्वेषामसवो जमङ्गुः।। 7।।

卐18.75.8 यो दध्रे अन्तरिक्षे न मह्ना पितृणां कविः प्रमति र्मतीनाम्। तमर्चत विश्वमित्रा हविर्भिस्स नो यमः प्रतरं जीवसे धात्।। 8।।

卐18.75.9 आ रोहत दिवमुत्तमामृषो यो मा बिभीतन। सोमपा स्सोमपायिन इदं वः क्रियते हविरगन्म ज्योति रुत्तमम्।। 9।।

卐18.75.10 प्र केतुना बृहता भात्यग्निरा रोदसी वृषभो रोरवीति। दिवश्चिदन्ताङ् उपमाङ् उदानळपामुपस्थे महिषो ववर्ध।। 10।।

卐18.75.11 नाके सुपर्णमुप यत्पतन्तं हृदा वेनन्तो अभ्यचक्षत त्वा। हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम्।। 11।।

卐18.75.12 इन्द्र क्रतुन्न आ भर पिता पुत्रेभ्यो यथा। शिक्षाणोऽस्मिन् पुरुहूत वाजिनि जीवा ज्योति रशीमहि।। 12।।

卐18.75.13 ये ते पूर्वे परागता अपरे पितरश्च ये। तेभ्य घृतस्य कुल्यैतु शतधारा व्युन्दती।। 13।

इति महत् (अष्टादशः) काण्डे एकादशोऽनुवाकः 18 - 76

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐18.76.1 आ रोहत जनित्रीं जातवेदसः पितृयाणै स्सं वो आ रोहयामि। अवाड्ढ व्येषितो हव्यवाह ईजानं युक्ता स्सुकृतां धत्त लोके।। 1।।

卐18.76.2 देवा यज्ञमृतवः कल्पयन्ति हविः पुरोडाशं स्रुचो यज्ञ आयुधानि। तेभिर्याहि पथिभिः देवयानै यैरीजाना स्स्वर्गं यन्ति लोकम्।। 2।।

卐18.76.3 ऋतस्य पन्थामनु पश्य साध्वाङ्गिरस स्सुकृतो येन यन्ति। ब्रध्नस्य विष्टप्यधि विक्रयस्व यत्रादित्या अमृत भक्षयन्ति।। 3।।

卐18.76.4 त्रयस्सुपर्णा उपरस्या सखाय नाकस्य पृष्ठे अधि विष्टपि श्रिताः। स्वर्गालोका अमृतेन विष्ठा कामंकामं यजमानाय दुह्राम्।। 4।।

卐18.76.5 जुहुर्दाधार द्यामुपभृदन्तरिक्षं ध्रुवा दाधार पृथिवीं प्रतिष्ठाम्। प्रतिष्ठां लोका घृतपृष्ठाः प्र पीनां स्वधामूर्जं यजमानाय दुह्राम्।। 5।।

卐18.76.6 ध्रुव आ रोह पृथिवीं विश्ववेद समन्तरिक्ष मुपभृदा क्रमस्व। जुहु द्यां गच्छ यजमानेन साकं स्रुवेण वत्सेन दिशः प्रपीनाः सर्वाधुक्ष्वा अहृणीयमानाः।। 6।।

卐18.76.7 तिर्थैस्तरन्ति प्रवतो महीरनु यज्ञकृतः सुकृतो येन यन्ति। अत्राभजं यजमानाय लोकं दिशो भूतानि यदकल्पयन्त।। 7।।

卐18.76.8 अङ्गिरसा मयनं पूर्वो अग्नि रादित्याना मयनं गार्हपत्यो दक्षिणानामयनं दक्षिणाग्निः। महिमानमग्ने र्विहितस्य ब्रह्मणा समङ्ग सर्व उप याहि शग्मम्।। 8।।

卐18.76.9 पूर्वो अग्निष्ट्वा तपतु शं पुरस्ताच्छं पश्चात्तपतु गार्हपत्यः। दक्षिणाग्निष्टे तपतु शर्म वर्मोत्तरतो मध्यतो अन्तरिक्षाद् दिशो दिशो अग्ने परि पाहि घोरात्।। 9।।

卐18.76.10 यूयमग्ने शन्तमाभि स्तनूभिरीजानं अभिलोकं स्वर्गम्। अश्वा भूत्वा पृष्टिवाहो वहाथ यत्र देवैस्सधमादं मदन्ति।। 10।। 18 - 77

卐18.77.1 शमग्ने पश्चात्तप शं पुरस्ताच्छमधरात्तप शं जातवेदः। एकस्त्रेधा विहितो जातवेद स्सम्यगेनं धेहि सुकृतामु लोके।। 1।।

卐18.77.2 शमग्नय स्समिद्धा आ रभन्तां प्राजापत्यं मेध्यं जातवेदसः। श्रृतं कृण्वन्त इह माव चिक्षिपन्।। 2।।

卐18.77.3 यज्ञ एति विततः कल्पमान ईजानो ऽभि लोकं स्वर्गम्। तमग्नय स्सर्वहुतं जुषन्तां तमस्मिन्देवा जानतां भागधेयम्।। 3।।

卐18.77.4 ईजान श्चित्तमारुक्ष दग्निं नाकस्य पृष्ठाद् दिव मुत्पतिष्यन्। तस्मै प्र भाति नभसो ज्योतिषीमान् स्वर्गः पन्थास्सुकृतो देवयानः।। 4।।

卐18.77.5 अग्निर्होताध्वर्युष्टे बृहस्पति रिन्द्रो ब्रह्मा दक्षिणतस्ते अस्तु। हुतोऽयं संस्थितो यज्ञ एतु यत्र पूर्वमयनं हुतानाम्।। 5।।

卐18.77.6 अपूपवान् क्षीरवांश्चरुरेह सीदतु त्रिभुवन् पृथिवीं द्यामिवोपरि। लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इहस्थ।। 6।।

卐18.77.7 अपूपवान् दधिवां श्चरुरेह सीदतु त्रिभुवन् पृथिवीं द्यामिवोपरि। लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इहस्थ।। 7।।

卐18.77.8 अपूपवान् द्रप्सवां श्चरुरेह सीदतु त्रिभुवन् पृथिवीं द्यामिवोपरि। लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इहस्थ।। 8।।

卐18.77.9 अपूपवान् घृतवां श्चरुरेह सीदतु त्रिभुवन् पृथिवीं द्यामिवोपरि। लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इहस्थ।। 9।।

卐18.77.10 अपूपवान् मांसवांश्चरुरेह सीदतु त्रिभुवन् पृथिवीं द्यामिवोपरि। लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इहस्थ।। 10।। 18 - 78

卐18.78.1 अपूपवान् मधुमांश्चरुरेह सीदतु त्रिभुवन् पृथिवीं द्यामिवोपरि। लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इहस्थ।। 1।।

卐18.78.2 अपूपवानन्न वांश्चरुरेह सीदतु त्रिभुवन् पृथिवीं द्यामिवोपरि। लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इहस्थ।। 2।।

卐18.78.3 अपूपवा न्रसवांश्चरुरेह सीदतु त्रिभुवन् पृथिवीं द्यामिवोपरि। लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इहस्थ।। 3।।

卐18.78.4 अपूपवा नपवांश्चरुरेह सीदतु त्रिभुवन् पृथिवीं द्यामिवोपरि। लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इहस्थ।। 4।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐18.78.5 अपूपापिहितान् कुम्भान् यांस्ते देवा अधारयन्। ते ते सन्तु स्वधावन्तो मधुमन्तो घृतश्चुतः।। 5।।

卐18.78.6 यास्ते धाना अनुकिरामि तिलमिश्रा स्स्वधावतीः। तास्ते सन्तुद्भ्वीः प्रभ्वी स्तास्ते राजानु मन्यतां यमोऽक्षितं भूयसीम्।। 6।।

卐18.78.7 द्रप्सश्चस्कन्द प्रथमा मनु द्यामिमञ्च योनि मनु यश्च पूर्वः। ऋतस्य योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः।। 7।।

卐18.78.8 शतधारं वायुमर्कं स्वर्विदं नृचक्षसस्ते अभि चक्षते रयिम्। ये पृणन्ति सर्वदा ते दुह्रते दक्षिणां सप्तमातरम्।। 8।।

卐18.78.9 उत्सं दुहन्ति कलशञ्चतुर्बिल मिडां धेनुं मधुमतीं स्वस्तये। ऊर्जं मदन्तीमदितिं जनेष्वग्ने मा हिंसीः परमे व्योमन्।। 9।। 18 - 79

卐18.79.1 एतत्ते देवस्सविता वासो ददाति भर्तवे। तत्त्वं यमस्य राज्ये वसान स्तार्प्यं चर।। 1।।

卐18.79.2 धाना धेनुरभवद्वत्सो अस्यास्तिलो ऽभवत्। तान्त्वं यमस्य राज्ये अक्षितामुप जीवति।। 2।।

卐18.79.3 एनास्ते असौ धानाः कामदुघा भवन्तु। एनीश्श्येनी र्विरूपा स्वरुपा स्तिलवत्सा उपतिष्ठन्त्वत्र।। 3।।

卐18.79.4 एनीर्धाना हरिणीश्श्येनीरस्य कृष्णा धाना रोहिणी र्धेनवस्ते। तिलवत्सा ऊर्जमसै दुहाना विश्वाहा सन्त्वनपस्फुरन्ती।। 4।।

卐18.79.5 वैश्वानरे हविरिदं जुहोम्येतं साहस्रं शतधारमुत्सम्। स बिभर्ति पितरं पितामहान् प्रपितामहान् बिभर्ति पिन्वमानः।। 5।।

卐18.79.6 सहस्रधार मुत्सं शतधार मक्षितं व्यचमानं सलिलस्य पृष्ठे। ऊर्जन्दुहाना अनपस्फुरन्त मुपासतां सुकृतां यत्र लोकः।। 6।।

卐18.79.7 इदं कसाम्बु चयनेन चित्तं तत्सजाता अव पश्यतेत। मर्त्योऽय ममृतत्वमेति तस्मै लोकं कृणुत यावत् सबन्धुः।। 7।।

卐18.79.8 इहैवैधि धनसनि रिह चित्त इह क्रतुः। इहैधि वीर्य वत्तरो वयोधा अपराहतः।। 8।।

卐18.79.9 पुत्रान्पौत्रानभि तर्पयन्ती रापो मधुमती रिमाः। स्वधां पितृभ्यो अमृतं दुहाना आपो देवीरुभयां स्तर्पयन्तु।। 9।।

卐18.79.10 आपो अग्निं प्र हिणुतेमं यज्ञं पितरो नो जुषन्ताम्। आसीनामूर्जमुप ये सचन्ते ते नो रयिं सर्ववीरन्नि यच्छान्।। 10।। 18 - 80

卐18.80.1 समिन्धते अमर्त्यं हव्यवाहं घृतप्रियं। स वेद निहितान् निधीन् पितॄन् परावतो गतान्। यन्ते मन्थं याङ्कलम्भं यमोदनं यन्मासं नि पृणामि ते।। 1।।

卐18.80.2 ते ते सन्तु स्वधावन्तो मधुमन्तो घृतश्चुतः। सरस्वतीं यां सुकृतो हवन्ते दक्षिणा यज्ञमभि रक्षमाणाः।। 2।।

卐18.80.3 सहस्रा यौ मैनानत्रपरादा दीर्घमेषामायुष्कृणु विश्वरूपे। इदं पूर्वमपरं नियानं येन ते पूर्वे पितरः परेताः।। 3।।

卐18.80.4 पुरोगवा ये अभिशाचो अस्य ते त्वा वहन्तु सुकृतामु लोकम्। पृथिवीन्त्वा पृथिव्या मावेशयामि देवो नो धाता प्र तिरात्यायुः।। 4।।

卐18.80.5 परापरैता वसुविद्वो अस्त्वधा मृतैꣳ पितरस्सं भवाथ। एयमगन्दक्षिणा भद्रतो नोऽनेन दत्ता सुदुघा वयोधाः।। 5।।

卐18.80.6 यौवने जीवाङ्कुप पृञ्चती जरा पितृभ्य उपसं पराणयात्। आ प्र च्यवेथामप तन्मृजेथां यद्वामभिभा अत्रोचुः।। 6।।

卐18.80.7 अर्वाञ्चावेतमघ्न्यौ तद्वशीयो पात्रे पितृष्विह भजनौ मम। इदं पितृभ्यꣳ प्र हरामि बर्हिं जीवं देवेभ्य उत्तरं स्तृणामि।। 7।।

卐18.80.8 तदा रोह पुरुषो मेध्यो भवन् प्रति त्वा जानन्तु पितरꣳ परेतम्। एदं बर्हिरदसदो मोध्योभूꣳ प्रति त्वा जानन्तु पितरꣳ परेतम्।। 8।।

卐18.80.9 यथा परु तन्वं सं भरस्व गात्राणि ते ब्रह्मणा कल्पयामि। पर्णो राजापिधानं चरूणा मूर्जो बलं सह ओजो न आगन्।। 9।।

卐18.80.10 आयुर्जीवेभ्यो वि दधद्दीर्घायुत्वाय शतशारदाय।। 10।। 18 - 81

卐18.81.1 ऊर्जो भागो य इदं जजाना श्मान्नाना मधिपतिर्बभूव। तमर्चतꣳ विश्वामित्रा हविर्भि स्स नो यमꣳ प्रतरञ्जीयसे धात्।। 1।।

卐18.81.2 यथा यमाय हर्म्यमवपन् पञ्च मानवाः। एवा वपामि हर्म्यं यथा मे भूरयोसत।। 2।।

卐18.81.3 इदं हिरण्यं बिभृहि यत्ते पिताबिभः पुरा। स्वर्गं यतः पितुर्हस्तं निर्मृड्ढि दक्षिणम्।। 3।।

卐18.81.4 ये जीवा ये च मृता ये जाता ये च यज्ञिया। तेभ्य घृतस्य कुल्यैतु शतधारा व्युन्दती।। 4।।

卐18.81.5 वृषा मतीनां पवते विचक्षणः सूरो अह्नां प्रतरितोषसां दिवः। प्राणस्सिन्धूनां कलशां अचिक्रद् दिन्द्रस्य हार्दि मा विशन्मनीषया।। 5।।

卐18.81.6 त्वेषस्ते धूम ऊर्णोति दिवि षंच्छुक आततः। सूरो न हि द्युता त्वां कृपा पावक रोचसे।। 6।।

卐18.81.7 प्र वा एतीन्दुरिन्द्रस्य निष्कृतिं सखा सख्युर्न प्र मिनाति संगिरः। मर्य इव योषा स्समर्षसे सोमः कलशे शत यामना पथा।। 7।।

卐18.81.8 आ यातः पितर स्सोम्यासो गम्भीरेभिः पथिभिः पितृयाणैः। प्रजामस्मभ्यं दधत रयिञ्च दीर्घायुत्वाय शतशारदाय।। 8।।

卐18.81.9 परा यात पितर स्सोम्यासो गम्भीरेभिः पथिभिः पितृयाणैः। अधामासि पुनरायात नो गृहान् हविरत्तुं सुप्रजस स्सुवीराः।। 9।।

卐18.81.10 अक्षन्नमी मदन्त ह्याव प्रिया अधूषतः। अस्तोषत स्वभानवः परेतु पितरो गृहान्।। 10।। 18 - 82

卐18.82.1 यद्वो अग्निरजहा देकमङ्ग पितृलोकं गमयञ्जातवेदाः। तद्व एतत्पुनरा वेशयामि साङ्गा स्स्वर्गे पितरो मादयध्वम्।। 1।।

卐18.82.2 असौहा इह ते मनः। ककुत्सलमिव जामयो ऽभ्येनं भूम उर्णुहि।। 2।।

卐18.82.3 रमध्वं मा विभीतन अस्मिन् गोष्ठे करीषिणः। ऊर्जं दधाना सुकृत श्शुचिव्रता गृहा जीवन्त उप व स्सदेम।। 3।।

卐18.82.4 ऊर्जं मे देवा अदधुरूर्जं मनुष्या उत। ऊर्जं पितृभ्यो हार्ष मूर्जष्वन्तो गृहा मम।। 4।।

卐18.82.5 पयो मे देवा अदधुः पयो मनुष्या उत। पयः पितृभ्य आहार्षं पयस्वन्तो गृहान् मम।। 5।।

卐18.82.6 उदुत्तमं वरुणपाशमस्म द्वाधमं वि मध्यमं श्रथाय। अधादित्य व्रते वयं तवानागसो ऽदितये स्याम।। 6।।

卐18.82.7 ये ते शतं वरुण ये सहस्रं यज्ञिया पाशा वितता महान्तः। तेभ्यो अस्मान् वरुण स्सोम इन्द्रो विश्वे मुञ्चन्तु मरुत स्स्वर्काः।। 7।।

卐18.82.8 प्रास्मत् पाशान् वरुण मुञ्च सर्वान् यै स्समाने बध्यते यैर्व्यामे। अथ जीवेम शरदं शतानि त्वया राजन् गुपिता रक्षमाणाः।। 8।।

卐18.82.9 अव ते हेळ इमहे नमोभिरिव यज्ञेभि रीमहे हविर्भिः। यदस्मद्वरुण प्रचेता राजन्नेनांसि शिश्रथः कृतानि।। 9।।

卐18.82.10 चन्द्रमा अप्स्वन्तरा सुपर्णो धावते दिवि। न वो हिरण्य नेमयः पदं विन्दति विद्युतो वित्तं मेऽस्य रोदसी।। 10। हरिः ॐ। इति महत् काण्डे द्वादशोऽनुवाकः। इत्यथर्ववेदे पैप्पलादसंहितायां (महत्काण्डः) अष्टादशकाण्ड स्समाप्तः

## ॐ अथोनविंशः काण्डः 19 - 1

卐19.1.1 दोषो गाय बृहद्गाय द्युमद् गाय आथर्वणं। स्तुहि देवं सवितारम्।। 1।।

卐19.1.2 तमु स्तुहि योऽन्त स्सिन्धुं सूनुं सत्यस्य युवानम्। अद्रोघ वाचं सुशेवम्।। 2।।

卐19.1.3 स घा नो देवस्सविता सा विषद्वसु पतिर्वसूनि। उभे सुष्टुती सुगातुम्।। 3।।

卐19.1.4 इन्द्राय सोममृत्विज स्सुनोत ना च धावत। स्तोतुर्यो हवं शृणवद्धवञ्च नः।। 4।।

卐19.1.5 सुनोता सोमपाव्ने सोममिन्द्राय वज्रिणे। युवा जेतेशान स्स पुरुष्टुतः।। 5।।

卐19.1.6 आत्वा विशन्त्वीन्दवो वयो न वृक्षमन्धसः। विरप्शिन् विमृधो जहि रक्षस्विनीः।। 6।।

卐19.1.7 आरे ऽसावस्मदस्तु हेति र्देवासोऽसत्। आरे मर्त्ताना मशस्तिः।। 7।।

卐19.1.8 सखैव नो रातिरस्तु सखेन्द्र स्सखा सविता। सखा भग स्सत्यधर्मा नोऽस्तु।। 8।।

卐19.1.9 अभि नो देवीरवसा महाश्शर्मणा नृपत्नीः। अच्छिन्न पत्रा स्सचन्ताम्।। 9।।

卐19.1.10 इडे अग्निं भवं शर्वं रक्ष उपव्ज दहिम्। वलासमुत सेधि मुग्राम्।। 10।।

卐19.1.11 आरे अस्मद्दधते दैव्यं भयं सुवीर्यम्। मरुतश्शर्म यच्छत।। 11।।

卐19.1.12 इडे द्यावापृथिवी पर्वतां अपश्च सूर्य मुर्वन्तरिक्षम्। वनस्पति नोषधीर्गा उतर्च ऋतस्य नः पतयो मृडयन्तु।। 12।।

卐19.1.13 हुवे विष्णुं पूषणं ब्रह्मणस्पतिं भगं नु शं सं सविता रमूतये। इह सोमो वरुणो वायुरग्नि र्भगोग्रा ऽवसे नो गमन्तु।। 13।।

卐19.1.14 पातं नो इन्द्रापूषणा वरुणः पान्तु मरुतः। अपान्नपात् सिन्धव स्सप्त पातन पातु विष्णुरुत द्यौः।। 14।।

卐19.1.15 पातान्नो द्यावापृथिवी अभिष्टये पातु ग्रावा पातु सोम नो अंहसः। पातु नो देवी सुहवा सरस्वती पात्वग्निर्ये शिवाऽस्य पायवः।। 15।।

卐19.1.16 पातान्नो देवाश्विना सुदं ससोषा सा नक्तोत न उरुष्यताम्। अपान्न पाद्धिह्वृती कयस्य चिद्दिवो मूर्द्ध न्न दिते शर्मयच्छ नः।। 16।। 19 - 2

卐19.2.1 त्वष्टा मे दैवं वचः पर्जन्यो ब्रह्मणस्पतिः। पुत्रैर्भ्रातृभि रदितिर्नु पातु नो दुष्टरन्त्रामणे शवः।। 1।।

卐19.2.2 अंशो भगो वरुणो मित्रो ऽर्यमादितिः पात्वंहसः। अप तस्य द्वेषो गम दविह्वतो यावय च्छत्रुमन्तितम्।। 2।।

卐19.2.3 देवत्वष्टर्वर्द्धय सर्वतातये धिये समुश्रिये प्रावतान्नः। उरुष्या न उरुतरः प्रयुच्छन् द्यौस्पित र्यावय दुच्छुनामितः।। 3।।

卐19.2.4 यो नो वचोऽभिरुदति सनाभिस्त न्न स्सोम पलिताऽप यन्ति। नीचैस्तान् वृश्चन् यथा विरुक्षन् मा ते दृशन् सूर्यमुच्चरन्तम्।। 4।।

卐19.2.5 त्वयेष्टया त्वया सोम धन्वना त्वया मुष्टिघ्ना शाशद्महे वयम्। तन्त्वां वृश्च य इदं न आदृशा क त्वं ह नामदण्डै रुदितं सनाभिः।। 5।।

卐19.2.6 पदेन तान् पदव्य नयन्तु वधैरेनान्पितरो दोषयन्तु। यथा न जीवाति कतमश्चनैषाम्।। 6।।

卐19.2.7 येन सोमादितिः पथा मित्रा वा यन्त्य द्रुहः। तेना नो ऽविताभुवः।। 7।।

卐19.2.8 यो नस्सोम शुशंसीनो दुश्शंसो ऽभिदासति। वज्रेणास्य मुखेजहि स संपिष्टो अपायति।। 8।।

卐19.2.9 यो नस्सोमा भिदासति स नाभिर्यश्च निष्ट्यः। अप तस्य बलन्तिर महीव द्यौर्वधत्मना।। 9।।

卐19.2.10 पुनरघ मघकृतमेतु देवाः पुनरेनै नमस्कृतं विजानत्। पुनः पुत्रः पितरमेतु विद्वान् हुतमुता द्यदस्य श्वमस्ति।। 10।।

卐19.2.11 येन चासौ शपति येन चैनं शपामसि। उभौ सं वृज्यतौ तस्मादतिकाद्धेतिमसस्यताम्।। 11।।

卐19.2.12 ये पार्थिवासश्शपथा य उरावन्तरिक्षे। ये वातस्य प्रभर्मणि तेभिष्टं वर्त्तयामसि योऽस्मान् द्वेष्टि यं वयं द्विष्मः।। 12।।

卐19.2.13 योऽस्मान् परि मा सृप़ कुल्लिपयानि विभ्रतः। उद्देवस्तेषां वृश्चतु मूलमुर्वार्वा यथा।। 13।।

卐19.2.14 यो देवा अघ धामघ मन्यस्मिन्न शेसंगति। भारो अघस्य दुस्सह प्रत्यक्कर्त्तार मृच्छतु।। 14।।

卐19.2.15 पुनरेवाघ धामघं द्युम्नमिवैतु वर्षतु। आदित्या दुर्यमाहिषी महीं सिन्धोरिवावनिः।। 15।।

19 - 3

卐19.3.1 शश्वद्विद्युत् क्रियमाणा प्रतीचीन हि पप्त च। प्रत्यक्कर्त्तारमृच्छतु।। 1।।

卐19.3.2 शश्वन्तमिच्छ सदानमन्यस्मा ईषूर्दिहानम्। प्रतीचीः शरुरृच्छतु।। 2।।

卐19.3.3 यदेतद्धूरिशासदः प्रतीचीनमुपोहसे। विषादिव विषमद्धितत्।। 3।।

卐19.3.4 नमस्ते प्रवतो नपाद्यतस्तप स्समूहसे। मृडयान स्तनूभ्य श्शं न स्तोकेभ्यष्कृधि।। 4।।

卐19.3.5 प्रवतो नपान्नमोऽस्तु तुभ्यं नमस्ते हेतये तपुष्यै। विद्मते नाम परमं गुहा यत्समुद्रे अन्तर्निहितासि नाभिः।। 5।।

卐19.3.6 यान्त्वा देवा अजनयन्त विश्व ईषुं कृण्वाना अशनाय धृष्णुम्। सा नो मृड विदथे गृणाना मित्रस्य च वरुणस्य प्रसृष्टौ।। 6।।

卐19.3.7 यूयं नः प्रवतो नपान्मरुतः सूर्यत्वचसः। शर्म यच्छाथ सप्रथाः।। 7।।

卐19.3.8 सुमृडत सुषूदत मृडया नो अघ्नाभ्यः। स्तोकाय तन्वे च।। 8।।

卐19.3.9 नमस्ते अस्तु विद्युते नमस्ते स्तनयित्नवे। नमस्ते अस्त्वश्मने येना दुडाशे अस्यसि।। 9।।

卐19.3.10 योऽस्मान् ब्रह्मणस्पते देवो अभिदासति। सर्वं तं रिरधासि नः।। 10।।

卐19.3.11 येभिस्सोम स्साहन्त्यासुरान् रन्धयासि। तेभिर्नो ऽविताभुवः।। 11।।

卐19.3.12 येन देवा असुराणामोजांस्य वृणीध्वम्। तेभिर्नो अधि वोचत।। 12।।

卐19.3.13 उदेनमुत्तरं नयाग्ने घृतेभिराहुतः। समेनं वर्चसा सृज देवानां भागधा असत्।। 13।।

卐19.3.14 इन्द्रेमं प्रतरं कृधि सजातानामसद्वशी। रायस्पोषेण सं सृज प्रजया च बहुं कृधि।। 14।।
卐19.3.15 यस्य कृण्मो गृहे हविस्तमग्ने वर्धया त्वम्। तस्मै सोमो अधि ब्रवदयञ्च ब्रह्मणस्पतिः।। 15।। 19 - 4
卐19.4.1 ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम्। अजस्त्रं घर्ममीमहे।। 1।।
卐19.4.2 स इदं प्रति यः पृथग् यज्ञस्य स्वरुत्तिरन्। ऋतूं उत्सृजते वशी।। 2।।
卐19.4.3 अग्निः प्रियेषु धामसु कामो भूतस्य भव्यस्य। सम्राडेको वि राजति।। 3।।
卐19.4.4 परि द्यामिव सूर्योऽहीनां जनिमागमम्। रात्री जगदिवान्यद्धं सादवारी रिमं विषम्।। 4।।
卐19.4.5 यद्ब्रह्मभिर्यदृषिभि र्यद्देवैरुदितं पुरा। यद्भूतं भव्यमासन्वत्तेन ते वारये विषम्।। 5।।
卐19.4.6 मधुना पृञ्चे नद्यः पर्वता गिरयो मधु। मधु परुष्णी शीपाला समास्ने अस्तु शं हृदे।। 6।।
卐19.4.7 यथेयमूर्वी पृथिवी दाधार विष्टितं जगत्। एवा ते ध्रियतां गर्भो अनु सूतं सवितवे।। 7।।
卐19.4.8 यथेयमूर्वी पृथिवी दाधारेमान् वनस्पतीन्। एवा ते ध्रियतां गर्भो अनु सूतुं सवितवे।। 8।।
卐19.4.9 यथेयमूर्वी पृथिवी दाधार पर्वताङ् अपः। एवा ते ध्रियतां गर्भो अनु सूतुं सवितवे।। 9।।
卐19.4.10 सस्त्रुषीस्तदपसो दिवानक्तं च सस्त्रुषीः। वरेण्यक्रतुरहमपो देवी रुपब्रुवे।। 10।।
卐19.4.11 ओता आपः कर्मण्या मुञ्चन्त्वीतः प्रणीतये। सद्यो भवन्त्वेतवे।। 11।।
卐19.4.12 देवस्य सवितुस्सवे कर्म कृण्वन्ति मानुषाः। शन्नो भवन्त्वप ओषधीरिमाः।। 12।।
卐19.4.13 शतस्यते धमनीनां सहस्रस्य हिराणाम्। अस्थुर्मध्यमा याः साकमन्ता अरंसत।। 13।।
卐19.4.14 परि वस्सिकतामयी धनु स्थिरश्चिदस्थिरम्। तिष्ठते लयता सुकम्।। 14।।
卐19.4.15 अमूर्या यन्ति यामयस्सर्वा लोहितवाससः। अभ्रातर इव योषितस्तिष्ठन्ति हत वर्चसः।। 15।।
卐19.4.16 तिष्ठावरे तिष्ठ पर उत त्वं तिष्ठ मध्यमे। कनिष्ठिका च तिष्ठाति तिष्ठादिद्धमनिर्मही।। 16।
(इत्यूऊनविंश काण्डे प्रथमोऽनुवाकः) 19 - 5
卐19.5.1 नमो देववधेभ्यो नमो राजवधेभ्यः। अथो ये विश्यानां वधास्तेभ्यो मृत्यो नमोऽस्तु ते।। 1।।
卐19.5.2 नमस्ते अधिवाकाय परावाकाय ते नमः। सुमत्यै मृत्यो ते नमो दुर्मत्यै त इदन्नमः।। 2।।
卐19.5.3 नमस्ते यातुधानेभ्यो नमस्ते भेषजेभ्यः। मूलेभ्यो मृत्यो ते नमो ब्राह्मणेभ्यो इदन्नमः।। 3।।

卐19.5.4 नव च या नवतिश्च संयन्ति मन्यामभि। इतस्ता स्सर्वा नश्यन्तु वाका अपचितामिव।। 4।।

卐19.5.5 सप्त च यास्सप्ततिश्च संयन्ति स्कन्ध्या अ+भि। इतस्ता स्सर्वा नश्यन्तु वाका अपचितामिव।। 5।।

卐19.5.6 पञ्च च याः पञ्चाशच्च संयन्ति ग्रैव्या अभि। इतस्ता स्सर्वा नश्यन्तु वाका अपचितामिव।। 6।।

卐19.5.7 आबयोरनाबयो रसस्त उग्र आबयो। आते करम्भ मशिमहि।। 7।।

卐19.5.8 स हि न त्वमसि यस्त्व मात्मान मावयः। वभ्रुश्च वभ्रुकर्णश्च नीला गलशाला शिशवः पश्य।। 8।।

卐19.5.9 तौ विलिके वेलया वायमैलव ऐलयीत्। व्रीहि स्वामाहुतिं जुषाणो मनसा स्वाहा।। 9।।

卐19.5.10 स्वाहा मनसा यदिदं कृणोमि। यस्या स्त आसनि जुहोमि घोरे। एषां वद्धानामवसर्जनाय कम्।। 10।।

卐19.5.11 भूमिरिति त्वाभि प्रमन्वते जना निर्ऋति रिति त्वाहं परि वेद विश्वतः। भूते हविष्मत्यस्यैष ते भागस्तेन ते विधेयं स्वाहा।। 11।।

卐19.5.12 एवोष्वस्मत्त्वं निर्ऋते विश्ववारे अयस्मयान् प्र मुमुग्धि पाशान्। यमेन त्वं यम्या संविदानो योऽष्मान् द्वेष्टि यं वयं द्विष्म स्तस्मिन्ता न्पाशान्प्रति मुञ्चन्तु सर्वान्।। 12।।

卐19.5.13 उत्तमोऽस्योषधीनां तव वृक्षा उपस्तयः। उपस्तिरस्माकं भूयाद्योऽस्माङ् अभिदासति।। 13।।

卐19.5.14 सबन्धुश्चासबन्धुश्च योऽस्माङ् अभिदासति। सबन्धुन्सर्वांस्तीर्त्वाहं भूयासमुत्तमः।। 14।।

卐19.5.15 यथा सोमो ओषधीना मुत्तमं हविरुच्यते। एवात्वमिव वृक्षाणामहं भूयासमुत्तमः।। 15।।

19 - 6

卐19.6.1 वरणो वारयाता अयन्देवो वनस्पतिः। यक्ष्मो यो अस्मिन्नाविष्ट स्तमु देवा अवीवरन्।। 1।।

卐19.6.2 इन्द्रस्य वचसा वयं मित्रस्य वरुणस्य च। देवानां सर्वेषां वाचा यक्ष्मन्ते वारयामहे।। 2।।

卐19.6.3 यथा वृत्र इमा आप स्तस्तम्भ विश्वधा यतीः। एवा ते अग्निना यक्ष्मं वैश्वानरेण वारये।। 3।।

卐19.6.4 ध्रुवं ध्रुवेण हविषाभि स्सोमं मृशामसि। अत्रा त इन्द्रः केबलीर्विशो बलिहृतस्करत्।। 4।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐19.6.5 आ त्वाहार्षमन्तरभूर् ध्रुवस्तिष्ठाभि चाचलत्। विशस्त्वा सर्वा आ यन्तु मा त्वद्राष्ट्रमधि भ्रशत्।। 5।।

卐19.6.6 इहैवैधि मापच्योष्ठाः पर्वत इवा विचाचलि। इन्द्रेहेव ध्रुवस्तिष्ठेह राष्ट्रं नि धारय।। 6।।

卐19.6.7 इन्द्र एत मदीधरद् ध्रुवं ध्रुवेण हविषा। तस्मै सोमो ऽधिब्रुव दयञ्च ब्रह्मणस्पतिः।। 7।।

卐19.6.8 ध्रुवन्ते देवस्सविता ध्रुवं देवो बृहस्पतिः। ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम्।। 8।।

卐19.6.9 ध्रुवा द्यौर्ध्रुवा पृथिवी समुद्राः पर्वता ध्रुवाः। देवा ह धर्मणा ध्रुवा ध्रुवो राजा विशामयम्।। 9।।

卐19.6.10 वृषेन्द्रस्य वृषा दिवो वृषा पृथिव्या अयम्। वृषा विश्वस्य भूतस्य त्वमेको वृषो भव।। 10।।

卐19.6.11 समुद्र ईशे स्रवतामग्निः पृथिव्या वशी। सूर्यो नक्षत्राणामीशे त्वमेको वृषो भव।। 11।।

卐19.6.12 सम्राडस्य सुराणां ककुन्मनुष्याणाम्। देवानामर्ध भागसि त्वमेको वृषो भव।। 12।।

卐19.6.13 परिवर्त्मान्येषामिन्द्रः पूषा च सस्रतुः। मुह्यन्त्व द्यामू स्सेना अमित्राणां परस्तराम्।। 13।।

卐19.6.14 मुग्धा अमित्राश्चरत आशीर्षाण इवाहयः। अथैषामग्निरुद्धानामिन्द्रो हन्तु वरं वरम्।। 14।।

卐19.6.15 ऐषु नह्य वृषाजिनं हरिणस्य भियं कृधि। पराङ् अमित्र एषत्वर्वाची गौरुपेषतु।। 15।। 19 - 7

卐19.7.1 सं समिद्युवसे वृषन्नग्ने विश्वान्यर्य आ। इडस्पदे समिध्यसे स नो वसुन्या भर।। 1।।

卐19.7.2 सं जानीध्वं सं पृच्यध्वं सं वो मनांसि जानताम्। देवा भागं यथा पूर्वे सञ्जानाना उपासते।। 2।।

卐19.7.3 समानो मन्त्रस्समिति स्समानी समानं चित्तं सह वो मनांसि। समानेन वो हविषा जुहोमि यथा संमनसो सथ।। 3।।

卐19.7.4 समानो मन्त्रस्समितिस्समानी समानं मनस्सह चित्तमेषाम्। समानं मन्त्रमभि मन्त्रये व स्समान मेषां हविषा जुहोमि।। 4।।

卐19.7.5 उत्सूर्यो दिव एति पुरो विश्वा निजूर्वन्। आदित्यः पर्वताङ् अभिर्विश्व दृष्टो अदृष्टहा।। 5।।

卐19.7.6 आयुर्दिवं विपश्चितं श्रुतां कण्वस्य वीरुधम्। आहार्षं विश्वभेषजीमस्यादृष्टान्निशमयत्।। 6।।

卐19.7.7 नि गावो गोष्ठे असदन्नि मृगासो अविक्षत। नि केतवो जनाना न्न्यद्दष्टा अलिप्सत।। 7।।

卐19.7.8 हिमवतः प्र स्रवत ता स्सिन्धु मुपगच्छत। आपो घ मह्यं तद्देवीर्ददन् हृद्योत भेषजम्।। 8।।

卐19.7.9 यदक्षीभ्यां आदिद्योत पार्ष्णिभ्यां हृदयेन च। आपस्तत् सर्वं निष्करन् त्वष्टारिष्ट मिवानशत्।। 9।।

卐19.7.10 सिन्धुराज्ञै स्सिन्धुपत्नीस्सर्वा या नद्यस्थ नः। दत्त नस्तस्य भेषजन्तेन वो भूनजामहै।। 10।।

卐19.7.11 पुनन्तु मा देवजनाः पुनन्तु मनवो धिया। पुनन्तु विश्वा भूतानि पवमानः पुनातु माम्।। 11।।

卐19.7.12 पुनातु मा पवमानः क्रत्वे दक्षाय जीवसे। ज्योक्क सूर्यं दृशे।। 12।।

卐19.7.13 उभाभ्यां देव सवितः पवित्रेण सवेन च। अस्मान् पुनीहि चक्षसे।। 13।।

卐19.7.14 ईर्ष्याया ध्राजिं प्रथमा मधमा मुत्तमामुत। मन्युं हृदय्यं शोकं तन्ते निर्मन्त्रयामहे।। 14।।

卐19.7.15 एतद्यत्ते हृदि श्रितं मनस्कं पतयिष्णुकम्। ततस्त ईर्ष्यां मुञ्चामि निरुष्माणं दृतेरिव।। 15।।

卐19.7.16 यथा भूमिर्मृतमना मृतान्मृतमनस्तरा। यथोत मम्रुषो मन एवेर्ष्योर्मृतं मनः।। 16।। 19 - 8

卐19.8.1 द्यौश्चमा पृथिवी च प्रचेतसौ शुक्रो बृहन् दक्षिणा मा पिपर्तु। अनु स्वधा चिकितां सोमो अग्निर्वायुर्मा पातु सविता भगश्च।। 1।।

卐19.8.2 पुनर्मनः पुनरायुर्न आगन् पुनश्चक्षुः पुनराकूतिरागन्। वैश्वानरो नो अदब्धस्तनूपा अन्तस्तिष्ठाति दुरितादवद्यात्।। 2।।

卐19.8.3 सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सं शिवेन। त्वष्टा सुदत्रो वरिवः कृणोत्वनु नो मार्ष्टु तन्वो विरिष्टम्।। 3।।

卐19.8.4 इदन्तद्युज उत्तरं येनेन्द्रं शुम्भाम्यष्टये। अस्य क्षत्रं श्रीयं महीं वृष्टिरिव वर्धया तृणम्।। 4।।

卐19.8.5 अस्य क्षत्रमग्नी षोमावस्य वर्धयतं रयिम्। इमं राष्ट्रस्याभीवर्गे कृणुतं युज उत्तरम्।। 5।।

卐19.8.6 सबन्धुश्चा सबन्धुश्च यो जातो यश्च निष्ट्यः। यजमानाय सुन्धते सर्वन्तं रीरधासि नः।। 6।।

卐19.8.7 यशो वृहद् वर्धतामिन्द्रजूतं सहस्त्रभृष्टि स्सुकृतं सहस्वत्। प्रसस्त्राण मनुदीर्घाय जीवसे हविष्मन्तं वर्धय सर्वतातये।। 7।।

卐19.8.8 यशा इन्द्रो यशा अग्निर्यशा स्सोमो ऽजायत। यशा विश्वस्य भूतस्याह मस्मि यशस्तमः।। 8।।

卐19.8.9 वयन्ते अग्ने यशसो यशोभि र्यशस्विनो हविषैना विधेम। स नो देहि राष्ट्रमिन्द्रजूतं तव तेऽरातौ अधिवाके स्याम।। 9।।

卐19.8.10 अवज्यामिव धन्वनो मन्युं तनोमि ते हृदः। यथा संमनसौ भूत्वा सखायाविव सचावहै।। 10।।

卐19.8.11 वि ते मन्युं नयामसि सखिकेव स चावहै। अधस्ते अश्मनामन्युं गुरुणापि नि दध्मसि।। 11।।

卐19.8.12 अभि तिष्ठामि ते मन्युं पार्ष्णिभ्यां प्रपदाभ्याम्। परा ते दंष्ट्रिणं बधं परा मन्युं सुवामि ते।। 12।।

卐19.8.13 हिरण्मयः पन्था आसीदरित्राणि हिरण्मया। नावो हिरण्मयीरासन् याभिः कुष्ठं निरावहन्।। 13।।

卐19.8.14 सुपर्ण सुवने गिरौ जातं हिमवतस्परि। धनैरभिश्रुतं यन्ति कुष्ठेहि तक्मनाशनः।। 14।।

卐19.8.15 यो गिरिषु जायसे वीरुधां बलवत्तमः। कुष्ठेहि तक्मनाशन तक्मानं नाशयन्नितः।। 15।

इत्यृचो नाम ऊनविंशः काण्डे द्वितीयोऽनुवाकः 19 - 9

卐19.9.1 इदावत्सराय परिवत्सराय संवत्सराय कृणुता वृहन्नमः। तेषां वयं सुमतौ यज्ञियानामपिभद्रे सौमनसे स्याम।। 1।।

卐19.9.2 इहैव पन्था बहवो देवयाना अनु द्यावापृथिवी सञ्चरन्ति। तेषां मज्यानि ज्ञतमो न आवहत्तस्मै नो देवाः परिधत्तेह सर्वे।। 2।।

卐19.9.3 शरद्धेमन्त शिशिरो वसन्तो ग्रीष्मो वर्षा स्स्विते नो दधातु। आ नो गोषु भजतौषधीषु निवातइद्ध श्शरणे स्याम।। 3।।

卐19.9.4 वैश्वानरो न ऊतय आ प्र यातु परावतः। अग्निरुक्थैर्नो अंहसु।। 4।।

卐19.9.5 वैश्वानरो नो आगमदिमं यज्ञं सजूः। उपेमं सुष्टुतिं मम।। 5।।

卐19.9.6 वैश्वानरो नोऽङ्गिरोभि स्तोमं यज्ञञ्च चाक्लृपत्। ऐषु द्युम्नं स्वर्यमत्।। 6।।
卐19.9.7 अजैषं त्वा संलिखितमजैषमुत संरुधम्। अविं वृको यथा मथ देवा मथ्नामि ते कृतम्।। 7।।
卐19.9.8 यथा वृक्षमशनि र्विश्वाहा हन्त्य प्रति। एवाहममुं कितवमक्षैर्बध्यासम प्रति।। 8।।
卐19.9.9 तुराणामतुराणां विशां देवयतीनाम्। समैतु विश्वतो भागो अन्तर्हस्त्यं कृतं मनः।। 9।।
卐19.9.10 यावद्यौर्यावत् पृथिवी यावदाभाति सूर्यः। तावत्सृजामि ते विषं यावदर्षन्ति सिन्धवः।। 10।।
卐19.9.11 उच्छ्वसन्त उदीरते गावो अवसथादिव। अहीनां पश्यता विषमपवक्ता न विद्यते।। 11।।
卐19.9.12 आ जघान पृथग्धनु स्सङ्गथे धमनीनाम्। मूर्द्धन्यं विषमास्कद्याङ्गानि व्यसिस्त्रसत्।। 12।।
卐19.9.13 मा नो देवा अहिर्वधीत् सन्तोकान् सह पूरुषान्। संयतन्न वि ष्वरद् व्यात्तं न सं यमत्।। 13।।
卐19.9.14 सं ते ददामि दद्भिर्दत स्सन्ते हन्वा हनू। सन्ते जिह्वया जिह्वां संत्वास्नाह आस्यम्।। 14।।
卐19.9.15 नमोऽहये असिताय नमस्तिरश्चि राजये। स्वजाय बभ्रवे नमो नमो देवजनेभ्यः।। 15।।
19 - 10
卐19.10.1 मनसे चेतसे धिय आकूतय उत चित्तये। मत्यै श्रुताय चक्षसे विधेम हविषा वयम्।। 1।।
卐19.10.2 प्राणाय पानाय व्यानाय भूरिरेतसे। सरस्वत्या उरुव्यचे विधेम हविषा वयम्।। 2।।
卐19.10.3 मानो हासिषुर्ऋषयो दैव्यासस्तनू पावान श्शूचय स्तपोजाः। अमर्त्या मर्त्याङ् अभि न स्सचध्व मायुर्नः प्रतरञ्जीवसे धुः।। 3।।
卐19.10.4 इदमिद् वा उ भेषजमिदं रुद्रस्य भेषजम्। येनेषुमेक ते जनां शतशल्यामप ब्रुवत्।। 4।।
卐19.10.5 जालाषेणाभि षिञ्चत जालाषेणोप षिञ्चत। जालाषे भद्रं भेषजं तस्य नो धत्त जीवसे।। 5।।
卐19.10.6 शञ्च नो मयश्च नो मा च नः किञ्च नाममत्। क्षमारपो विश्वं नोऽस्तु भेषजम्।। 6।।
卐19.10.7 यशसं मेन्द्रो मघवान् कृणोतु यशसं सोमो वरुणो वायुरग्निः। यशसं मा देवस्सविता कृणोतु प्रियो दातुर्दक्षिणाया स्स्यामहम्।। 7।।
卐19.10.8 यथेन्द्रो द्यावापृथिव्यो र्यशस्वान् यथाप ओषधीषु। यथा विश्वेषु देवेष्वेवा देवेषु यशस स्स्याम।। 8।।

卐19.10.9 अच्छावय मिन्द्रं यशसं यशोभि र्यशस्विनो हविषैना विधेम। स नो दधद्राष्ट्रमिन्द्रजूतं तस्य राते अधिवाके स्याम।। 9।।

卐19.10.10 एह यातु वरुणस्सोम अग्नि र्बृहस्पति र्वसुभिरेह यातु। अस्य श्रियमभि सञ्जात सर्व उग्रस्य चेत्तुस्संमनस स्सजाताः।। 10।।

卐19.10.11 एह यात माप याता ध्यस्मत् पूषा वः परस्ता दपथं कृणोतु। वास्तोष्पतिरनु वोऽय मह्यन् मयि सजाता रमतिर्वोऽस्तु।। 11।।

卐19.10.12 या व श्शुष्मो हृदयेऽष्वन्तर्य आकुतिर्मनसि प्रविष्टा। तान्त्सीव यामि हविषा धृतेन मयि सजाता रमतिर्वोऽस्तु।। 12।।

卐19.10.13 मम चित्तः प्रयव मन्युते हेन्द्राग्न्योरिव हवमेत सर्वे। बृहस्पतिर्वो नि युनक्तु मह्यं मम वाचमेकचित्ता स्सचध्वम्।। 13।।

卐19.10.14 अहं गृह्णामि मनसा मनांसि मम चित्तमुपचित्तेभिरेत। मम वशे हृदयं वः कृणोमि मम वाचमनु वर्त्मान एत।। 14।।

卐19.10.15 सं वश्चक्षुर्गच्छतु मां प्राणो धाता पदमनुवर्त्म वः कृणोतु। ये वो महान्त उत ये कुमारा मम यात मनु यातेभिरेत।। 15।। 19 - 11

卐19.11.1 अश्वत्थो देव सदन स्तृतीयस्या मितो दिवि। तत्रामृतस्य चक्षणं ततः कुष्ठोऽजायत।। 1।।

卐19.11.2 देवेभ्योऽधिजातोऽसि सोमस्य सखा हितः। स प्राणाया पानाय चक्षुषेऽस्य मृड।। 2।।

卐19.11.3 अयस्मये द्रुपदे बेधिषे धिय यदभिहितो मृत्युभिर्ये सहस्त्रम्। यमो मह्यं पुनरित्वां ददाति तस्मै देवाय हविषा विधेम।। 3।।

卐19.11.4 यत्ते देवि निरृऋतिरा बबन्ध दाम ग्रीवास्व विचृत्यम्। तत्ते वि ष्याम्यायुषे बलाया नमीवं पितुमद्धि प्रसूतः।। 4।।

卐19.11.5 नमस्तु ते निरृऋते विश्ववारे अयस्मयं विचृता बन्धमेतम्। यमेन त्वं पितृभिस्संविदानोत्तमे नाके अधि रोहयैनम्।। 5।।

卐19.11.6 अन्तर्दावे जुहुता स्वेतद्यातुधान क्षयणं घृतेन। आराद्रक्षांसि प्रति दह अग्ने मास्माकं तन्वमुप तीतपन्तु।। 6।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐19.11.7 शर्वो वो ग्रीवा अशरीत्पिशाचाः पुष्टीर्वोऽपि शृणात्वग्निः। विरुद्धो विश्वधा वीर्या मृत्युना समजीगमत्।। 7।।

卐19.11.8 अपिशाचन्नो अधरा दपिशाचन्न उत्तरात्। इन्द्रा पिशाचन्नः पश्चादपिशाचं पुरस्कृधि।। 8।।

卐19.11.9 इन्द्रश्चकार प्रथमो नैर्हस्तमसुरेभ्यः। वृश्चामि शत्रूणां बाहून् अनेन हविषा वयम्।। 9।।

卐19.11.10 निर्हस्त श्शत्रुरभिदा सन्नोऽस्तु ये सेनाभिर्युधमा यन्त्यस्मान्। समर्पयेन्द्र महता वधेन द्रात्वेषा मघहारो विविद्धः।। 10।।

卐19.11.11 अवमन्युरवायता अव बाहू मनोयुजा। पराशर त्वन्तेषां पराञ्चं शुष्ममर्दयावाञ्चं रयिमाकृधि।। 11।।

卐19.11.12 आतन्वाना आयच्छन्तोऽस्यन्तो ये च धावथ। निर्हस्ता श्शत्रव स्स्थेनेन्द्रो वोऽद्य पराशरीत्।। 12।।

卐19.11.13 निर्हस्तास्सन्तु शत्रवोऽङ्गैषां म्लापयामसि। यथैषामिन्द्र वेदांसि यूथशो वि भजामहै।। 13।।

卐19.11.14 निर्हस्तेभ्यो नैर्हस्तं यं देवा श्शरुमस्यथ। जयन्तु सत्वानो मम स्थिरेणेन्द्रेण मेदिना।। 14।। 19 - 12

卐19.12.1 शमीमश्वत्थ आरुढ स्तत्र पुंसवनं कृतम्। तदेव तस्य भेषजं यत्स्त्रीष्वा हरन्ति तम्।। 1।।

卐19.12.2 पुंसि वै रेतो भवति तत्स्त्रियामनु षिच्यते। तद्वै पुत्रस्य वेदनं तत्प्रजापति रब्रवीत्।। 2।।

卐19.12.3 प्रजापति रन्वमंस्त शिनीवाल्य चीक्लृपत्। स्त्रीषूयमन्यत्र दधत् पुमांसमु दधादिह।। 3।।

卐19.12.4 या ओषधयस्सोमराज्ञी बह्वीश्शत विचक्षणाः। बृहस्पति प्रसूतास्ता नो मुञ्चत्वंहसः।। 4।।

卐19.12.5 मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत। अथो यमस्य पड्बीशा द्विश्वस्माद्देव दुष्कृतात्।। 5।।

卐19.12.6 यच्चक्षुषा यन्मनसा यच्च वाचोपारिम यज्जाग्रतो यत्स्वपन्तः। सोमो मा तस्मादेनस स्स्वधया पुनातु विद्वान्।। 6।।

卐19.12.7 अभिभूर्यज्ञो अभिभूरग्निर स्त्वभिभू स्सोमो अभिभूरिन्द्रो अस्तु। अभ्ययं विश्वाः पृतना यथासीदेवा विधेमाग्निहोत्रा इदं हविः।। 7।।

Sri Ganapati Sachchidananda Avadhoota Dattapeetham SGS

卐19.12.8 स्वधास्तु मित्रावरुणा प्रजावत् क्षत्रं मध्वेह पिन्वतम्। वाधेथां द्वेषो निर्ऋर्तिं पराचैरस्मै क्षत्रं वर्च्च आ धत्तमोजः।। 8।।

卐19.12.9 इमं वीरमनु हर्षध्वमुग्रमिन्द्रं सत्वानो अनु सं रभध्वम्। ग्रामजितं गोजितं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा।। 9।।

卐19.12.10 अग्नेरिव प्रसितिरस्य शुष्मिण उतेव मत्तो विलपन्नपायति। तस्मै तेऽरुणाय बभ्रवे तपुर्मघाय नमोऽस्तु तक्मने।। 10।।

卐19.12.11 नमो यमाय नमोऽस्तु मृत्यवे नमो राज्ञे वरुणाय त्विषीमते। नमः क्षेत्रस्य पतये नमो दिवे नमः पृथिव्यै नम ओषधीभ्यः।। 11।।

卐19.12.12 अयं यो जनान् हरितान् कृणोत्युच्छोचय न्नग्निरिवाभि दुन्वन्। अधा हि तक्मन्नरसो हि भूया अधान्यङ् अधराङ् वा परेहि।। 12।।

卐19.12.13 इन्द्रो जयाति न परा जयाता अधिराजो राजसु राजयातै। चर्कृत्य ईड्यः वन्यश्चोपसद्यो नमस्यो भवेह।। 13।।

卐19.12.14 त्वमिन्द्राधिराज स्स्रवस्युस्त्वं भूरभिभूतिर्जनानाम्। त्वं दैवीर्विश इमा वि राजायुष्मत् क्षत्रमजरन्ते अस्तु।। 14।।

卐19.12.15 प्राच्यां दिशि त्वमिन्द्राधिराजो दीच्यां दिशि वृत्रहन् शत्रुहोऽसि। यत्र यन्ति स्रोत्या स्तज्जितन्ते दक्षिणतो वृषभोऽसि हव्यः।। 15। इत्यृच (ऊनविंशः) काण्डे तृतीयोऽनुवाकः 19 - 13

卐19.13.1 अभि त्वेन्द्र वरिमतः पुरा त्वां हुरणेभ्यः। ह्वयाम्युग्रं चेत्तारं पुरुणा मानमेकजम्।। 1।।

卐19.13.2 योऽद्यसेन्यो वधो जिघांसन्न उदीरते। इन्द्रस्य तत्र बाहू समन्तं परि दध्महे।। 2।।

卐19.13.3 परिदध्म इन्द्रस्य बाहू समन्तं त्रातुस्त्रायतान्नः। देवसवित स्सोम राजन् सुमनसं मा कृणुतं स्वस्तये।। 3।।

卐19.13.4 देवा अदुस्सूर्योऽदाद् द्यौरदात् पृथिव्यदात्। सर्वा स्सरस्वतीरदु स्सचित्ता विषदूषणम्।। 4।।

卐19.13.5 यद्वो देवा उपजीका आसिञ्चन्धन्व न्युदकम्। तेन देव प्रसूते नेदं दूषयता विषम्।। 5।।

卐19.13.6 असुराणामसि दुहिता देवानामसि स्वसा। दिवस्पृथिव्या यज्ञिषे सा चकर्थारसं विषम्।। 6।।

卐19.13.7 अस्थि स्त्रंसं परुस्त्रं समास्थितं हृदया मयम्। बलासं सर्वं निष्कृध्यङ्गेष्ठा यश्च पर्वसु।। 7।।
卐19.13.8 निर्वलासं बलासिनः क्षिणोमि पुष्करं यथा। छिनद्म्यस्य बन्धनं मूल मूल्वार्वा यथा।। 8।।
卐19.13.9 निर्वलासेतः प्र पत स्सुपर्णो वसतेरिव। अथो इट इव हायनोऽप द्राह्य वीरहा।। 9।।
卐19.13.10 आ वृषा यस्य श्वसिहि वर्धस्व प्रथयस्व च। यथाङ्गं वर्धतान्ते शेपस्तेन योषितमिज्जहि।। 10।।
卐19.13.11 येना कृशमेधयन्ति येन हिन्वन्त्यातुरम्। तेनास्य ब्रह्मणस्पते धनुरिवा तानया पसः।। 11।।
卐19.13.12 आहं तनोमि ते पसो अधि ज्यामिव धन्वनि। क्रमस्वर्श इव रोहित मनवग्लायता त्वम्।। 12।।
卐19.13.13 देवाः कपोत ईषितो यदिच्छन्दूतो निर्ऋत्यां इदमाजगाम। तस्मा अर्चाम कृणवाम निष्कृतिं शन्नो अस्तु द्विपदे शञ्चतुष्पदे।। 13।।
卐19.13.14 शिवः कपोत ईषितो नो अस्त्व नागा देवाश्शकुनो गृहे नः। अग्निर्हि विप्रो जुषतां हविर्नः परि हेतिः पक्षिणी नो वृणक्तु।। 14।।
卐19.13.15 हेतिः पक्षिणी न दभात्यस्मा नाष्ट्री पदं कृणुते अग्निधाने। शन्नो गोभ्य उत पूरुषेभ्यो मानो देवा इह हिंसित् कपोतः।। 15।।
卐19.13.16 ईषम्मदन्तः परिगां नयामस्सं योपयन्तो दुरिता पदानि। ऋचा कपोतन्नुदत प्रणोदं हित्वा न ऊर्जं प्र पतात्पथिष्ठः।। 16।।
卐19.13.17 नुदे त्वा प्र णुदे त्वा कपोत रक्षसा सह। यतो न पुनरायासि तत्र त्वा गमयामसि।। 17।।

19 - 14

卐19.14.1 यथायं बाहो अश्विना समैति सञ्च वर्त्तते। एवा मामभि ते मन स्समैतु सञ्च वर्तताम्।। 1।।
卐19.14.2 आहं खिदामि ते मनो राजाश्वः पृष्ठ्यामिव। रेष्मच्छिन्नं यथा तृणं मयि ते वेष्टितां मनः।। 2।।
卐19.14.3 आञ्जनस्य मधुघस्य कुष्ठस्य नलदस्य च। तुरो भगस्य हस्ताभ्या मनुरोध नमाभरे।। 3।।
卐19.14.4 अयमा यात्यर्यमा पुरस्ताद्विषितस्तुपः। स इच्छेदग्रुवै पतिमथो जायामजानये।। 4।।
卐19.14.5 अश्र मदीयमर्य मन्नन्यासां समनं यती। अङ्गोन्वस्या अर्यमन्नन्या स्समन मायति।। 5।।

卐19.14.6 धाता दाधार पृथिवीं धाता द्यामुत सूर्यम्। धातास्या अग्रुवै पतिं दधातु प्रतिकाम्यम्।। 6।।

卐19.14.7 मह्यमापो मधुमदेरयन्त मह्यं सूर्यो अभरज्ज्योतिषां कम्। मह्यं देवा उत विश्वे तपोजा मह्यं देव स्सविता व्यचो धात्।। 7।।

卐19.14.8 अहन्दाधार पृथिवीमुत द्यामहं सिन्धूनजनयं सप्त साकम्। अहं सत्यमनृतं यद्वदाम्यहं वाचं परि सर्वाभिषिञ्चे।। 8।।

卐19.14.9 अहं विव्यज्मि पृथिवी मुतद्या महमृतूनसृजे सप्त साकम्। अहं वाचं परिसर्वा मभूवन् योऽग्नीषोमा वजुषे सखायै।। 9।।

卐19.14.10 अनुड्वाद्यो नः प्रथमं धेनुभ्यस्त्व मरुन्धति। अधेनवे वयसे शर्म यच्छ चतुष्पदे।। 10।।

卐19.14.11 शर्म यच्छत्वोषधी स्सह देवीररुन्धति। करत् पयस्वन्तं गोष्ठमयक्ष्माङ् उत पूरुषान्।। 11।।

卐19.14.12 विश्वरूपां सुभगामच्छा वदामि जीवलाम्। सा नो रुद्रस्यास्तां हेतिं दूरं नयतु गोभ्यः।। 12।।

卐19.14.13 यमो मृत्युरघमारो निरृत्थो भवश्शर्वोऽस्ता शिखण्डी। देवजना स्सेना मुत्तस्थि वां सस्तेऽस्माकं परि वृञ्जन्तु वीरान्।। 13।।

卐19.14.14 मनसा होमैर्हरसा घृतेन शर्वायास्त्र उत राज्ञे भवाय। नमस्तेभ्यो नम एभ्यः कृणोम्यन्यत्रास्म दघविषा नयन्तु।। 14।।

卐19.14.15 त्रायध्वं नोऽघविषाभ्यो वधादग्नीषोमा मरुतः पूतदक्षाः। विश्वेदेवा मरुतो विश्ववेदसो वाता पर्जन्ययो स्सुमतौ स्याम।। 15।। 19 - 15

卐19.15.1 सञ्ज्ञानतां मनसा सं चिकित्वा संगच्छतु मन्युना दैव्येन। मा घोषा उत्थाद्बहुले विनिर्हते मेषुः पप्तदिन्द्रस्या हन्यागते।। 1।।

卐19.15.2 सं वो मनांसि सं व्रता समाकूति र्नयामसि। इमे ये विव्रतास्थन तान् व स्सं ज्ञपयामसि।। 2।।

卐19.15.3 संज्ञपनं वो मनसो अथो संज्ञपनं हृदः। अथो भगस्य यच्छ्रान्तं तेन संज्ञपयाति वः।। 3।।

卐19.15.4 सं वः॰ पृच्यन्तां तन्वस्सं मनांसि समु त्वचः। सं वो ब्रह्मणस्पति स्सोम स्सं ज्ञपयाति वः।। 4।।

卐19.15.5 संज्ञानं न स्स्वेभ्य स्संज्ञान मरणेभ्यः। संज्ञानमश्विना युवमिहास्मासु नि यच्छतम्।। 5।।

卐19.15.6 यथादित्या वसुभिस्सं बभूवुर्मरुद्भिरुग्रा अहृणीयमानाः। एवा त्रिणामन्नहृणीयमान इमाञ्जना न्संमनसं कृणु त्वम्।। 6।।

卐19.15.7 निरमुं नुद ओकसस्सपत्नो यः॰ पृतन्यति। निर्बाध्येन हविषेन्द्र एनं पराशरीत्।। 7।।

卐19.15.8 इहि तिस्रः॰ परावत इहि पञ्च जनाङः॰ अनु। इहि सप्ताति रोचना यावत्सूर्यो असद्दिवि।। 8।।

卐19.15.9 परमां त्वा परावतमिन्द्रो देवो अजीगमत्। यथा न पुनरायसि शश्वतीभ्य स्समाभ्यः।। 9।।

卐19.15.10 प्रतीचीनो फलो हि त्वमपामार्ग बभूविथ। सर्वान् मच्छपथाङ् अधि वरीयो यावया त्वम्।। 10।।

卐19.15.11 अघद्विष्टा देवजूता वीरुच्छपथ योपनी। उद्गा मलमिवा वानै स्सर्वान्मच्छ पथाङ् अधि।। 11।।

卐19.15.12 यदेनं परिषीदन्ति समा दधाति चक्षसे। संप्रेद्धो अग्निर्जिह्वाभि रुदेति हृदयादधि।। 12।।

卐19.15.13 अग्ने स्सान्तपन स्याह मायुषे पदमारभे। अद्धातिर्यस्य पश्यति धूममुद्यन्त मास्यतः।। 13।।

卐19.15.14 योऽस्य समिधं वेद क्षत्रियेण समाहिताम्। नाभिह्वारे पदं निदधाति स मृत्यवे।। 14।।

卐19.15.15 नैनं घ्नन्ति पर्यायिणो न सन्नाङ् अव गच्छति। अग्नेर्यः क्षत्रियो विद्वान्नाम गृह्णात्यायुषे।। 15।। 19 - 16

卐19.16.1 अस्थाद्यौरस्था त्पृथिव्यस्था द्विश्वमिदं जगत्। तिष्ठन्ति पर्वता इमे स्थामन्नश्वा अरंसत्।। 1।।

卐19.16.2 य उदानड्व्ययनं य उदानट्परायणम्। आवर्त्तनं निवर्त्तनं यो गोपा अपि तं हुवे।। 2।।

卐19.16.3 या आवृतोन्यावृतो ऽभ्यावर्त्तन मानयम्। अग्निश्चतस्र आवृतस्ताभिष्ट्वा तर्पयामसि।। 3।।

卐19.16.4 जातवेदो नि वर्तय शतन्ते शन्त्वावृतः। सहस्रन्त उपावृत स्ताभिरेनं नि वर्तय।। 4।।

卐19.16.5 अदारसृग् भवतु देव सोमास्मिन् यज्ञे मरुतो मृडता नः। मा नो विद दभिभा मो अशस्ति र्मा नः प्रापद् दुच्छुना द्वेष्याया।। 5।।

卐19.16.6 यो ऽद्यदैव्यो वधो जिघांसन्न उपायति। युवं तं मित्रावरुणा वस्मद्यावयतं परि।। 6।।

卐19.16.7 इतश्चामुतश्चाघं वरुण जावय। वि महच्छर्म यच्छ वरियो यावया बधम्।। 7।।

卐19.16.8 अपेन्द्रो प्राचो मघवनमित्रा नपा प्राचो अभिभूते नुदस्व। अपोदीचो अपशूराधराच उरौ यथा तव शर्मन्मदेम।। 8।।

卐19.16.9 तेन भूतस्य हविषा पुन राप्यायता मयम्। जायां जामस्मा आविदन् सा रसेनाभि वर्धताम्।। 9।।

卐19.16.10 अभि वर्धतां प्रजयाभि राष्ट्रेण वर्धताम्। इषा सहस्रवीर्याविमौ स्तामनु पक्षितौ।। 10।।

卐19.16.11 त्वष्टा जायामजनयत् त्वष्टास्यै त्वां पतिन्दधौ। त्वष्टा सहस्रमायूंषि दीर्घमायुष्कृणोतु वाम्।। 11।।

卐19.16.12 अन्तरिक्षेण पतति विश्वाभूतावचाकशत्। शुनो दिव्योस्यैतन्मह स्तस्मा एतेन हविषा जुहोमि।। 12।।

卐19.16.13 अप्सुते जन्म दिवि ते सधस्थं समुद्रं आत्मा महिमा ते पृथिव्याम्। शुनो दिव्योस्यै तन्मह स्तस्मा एतेन हविषा जुहोमि।। 13।।

卐19.16.14 ये त्रयः कालकाञ्जा दिवि देवा इव श्रिताः। तान्सर्वानह्व उतये ऽस्मारिष्ट तातये।। 14।।

卐19.16.15 यः पुरुषं ह्रच्छयसि श्वा दिव्यै अवीरहा। तन्त्वाहं ब्रह्मणा नुदे पुरुषं मा परा वधीः।। 15।।

卐19.16.16 यः पिशङ्गो अयो दंष्ट्रा श्श्वा दिव्यः परिप्लवः। तस्याहं नामजग्रभा स्मारिष्टतातये अयन्नो जीवतादिति।। 16।।

卐19.16.17 अयं नो नभसस्पति स्संस्फानो ऽभिरक्षतु। असमातिं गृहेषु नः।। 17।।

卐19.16.18 त्वन्नो नभसस्पतिरूर्जं गृहेषु धारय। आपुष्टमेत्वावसु।। 18।।

卐19.16.19 देव संस्फान सहस्रापोषस्ये शिषे। तस्य नो धेहि तस्य ते भक्षीमहि तस्य ते भक्तिवांसो भूयास्म स्वाहा।। 19। इत्यृच (उनविंशः) काण्डे चतुर्थोऽनुवाकः 19 - 17

卐19.17.1 यन्तासि यच्छसे हस्ता वपरक्षांसि सेधसि। प्रजान्धनञ्च गृह्णानꣳ परिहस्तो ऽभूद्यम्।।
1।।
卐19.17.2 परिहस्त वि धारय योनिं गर्भाय कर्तवे। मर्यादे पुत्रमा धेहि तन्त्वमा गमयागमे।। 2।।
卐19.17.3 यं परिहस्त मबिभर दितिꣳ पुत्रकाम्या। त्वष्टा तमस्या आ बध्नाद्यथा पुत्रं सुवादिति।। 3।।
卐19.17.4 आगच्छत आगतस्य नाम गृह्णाम्यायतः। इन्द्रस्य वृत्रघ्नो राज्ञो वासवस्य शतक्रतोः।।
4।।
卐19.17.5 येन सूर्यां सावित्री मश्विनोहतुꣳ पथाः। तेन मामब्रवीद् भगो जायामा वहतादिति।। 5।।
卐19.17.6 यस्ते अङ्कुशो वसुदानो वृहन्निन्द्र हिरण्ययः। तेना जनीयते जायान्त्वं धेहि शतक्रतोः।।
6।।
卐19.17.7 त्वन्नो मेधे प्रथमा गोभिरश्वेभिरा गहि। त्वं सूर्यस्य रश्मिषु त्वन्नो वसुदा यज्ञिया।। 7।।
卐19.17.8 मेधामहं प्रथमा व्रह्मण्वती मृषिष्टुतां। प्रणीतां व्रह्मचारिभिः देवाना मवसा वृणे।। 8।।
卐19.17.9 मेधां सायं मेधां प्रातर्मेधां मध्यन्दिनं परि । मेधां सूर्येणोद्यतो दीराणा उत्तुष्टुमः।। 9।।
卐19.17.10 पार्थिवस्य रसे देवा भगस्य तन्वो बले। आयुरस्मै सोमो वर्च आधाद्वर्चो आ धाद्
बृहस्पतिः।। 10।।
卐19.17.11 आयुरस्मै धेहि जातवेदꣳ प्रजां त्वष्टरधि निधेह्योनः। रायस्पोषं सवितरा सुवास्मै
शतञ्जीवातु शरदस्तवायम्।। 11।।
卐19.17.12 अशीर्ण ऊर्जमुत सुप्रजास्त्वं दक्षं दधातु द्रविणं सुवर्चसम्। संञ्जयन् क्षेत्राणि
सहसायमिन्द्र कृण्वानो अन्या नधरान्सपत्नान्।। 12।।
卐19.17.13 आयमगन्सविता क्षुरेणो ष्णेन वाय उदके नेहि। आदित्या रुद्रा वसव स्सचेतस स्सोमस्य
राज्ञो वपत प्रचेतसः।। 13।।
卐19.17.14 येनावपत् सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान्। तेन ब्रह्माणो वपतेदमस्या
युस्मान् दीर्घायुरयमस्तु वीरः।। 14।।
卐19.17.15 अदिति श्श्मश्रु वपत्वाप उन्दन्तु वर्चसा। धारयतु प्रजापतिꣳ पुनꣳ पुनस्सु वप्तवे।।
15।। 19 - 18

卐19.18.1 यास्ते हिरा धमनयो ऽङ्गान्यनु विष्ठिताः। तासान्ते सर्वासां साकं निर्विषाणि ह्वयामसि।। 1।।

卐19.18.2 यान्ते रुद्र ईषुमास्य दङ्गेभ्यो हृदयाय च। इमां तामद्य ते वयं विषूचीं वि वृहामसि।। 2।।

卐19.18.3 नमस्ते रुद्रास्यते नमः प्रतिहिताभ्यः। नमो विसृज्यमानाभ्यो नमस्त्रायताभ्यः।। 3।।

卐19.18.4 अवाचीः परिमूर्धन्या यास्ते धमनयश्शतम्। तास्ते प्रभद्यन्तां पृथ गनु त्वं लोहितावटम्।। 4।।

卐19.18.5 स्यन्दन्तां लोचनावती रनु त्वं लोहितावटम्। यथास्यामन्त्रं न रस्यन् नानुकूल मिवोदकम्।। 5।।

卐19.18.6 प्रतीचीनस्सूर्य एति प्रतीची स्स्रवतः कृताः। अवाचीस्ते अस्नः कुल्या इयं तृणत्वोषधीः।। 6।।

卐19.18.7 इमं यवमष्टायोगै ष्षड्योगेभि रचर्कृषुः। स घा ते तन्वो रपः प्रतीचीनमप व्ययत्।। 7।।

卐19.18.8 न्यग्वातो वाति न्यक्तपति सूर्यः। नीचीनमघ्न्या दुहे नग्भवतु ते रपः।। 8।।

卐19.18.9 आप इद्वा उ भेषजी रापो अमीव चातनीः। आप स्समुद्रार्था यतीः परा वहन्तु ते रपः।। 9।।

卐19.18.10 अमी ये युधमायन्ति केतून् कृत्वानीकशः। इन्द्रस्तान् पर्यहार्दाम्ना तानग्ने सन्द्या त्वम्।। 10।।

卐19.18.11 यावतीस्सिञ्च आयन्त्वि नीकानिय तिष्ठन्। इन्द्रस्तान् पर्यहार्दाम्ना तानग्ने सन्द्या त्वम्।। 11।।

卐19.18.12 सं परमान् समवमा नथो सन्द्यामि मध्यमाम्। इन्द्रस्तान् पर्यहार्दाम्ना ता नग्ने सन्द्या त्वम्।। 12।।

卐19.18.13 सन्दानं वो बृहस्पति स्सन्दानं सविताकरत्। सन्दानमिन्द्र श्चाग्निश्च सन्दानं भगो अश्विना।। 13।।

卐19.18.14 यास्ते रुचो देवसूर्यो या अतो दिव्याततः। ताभिर्मा मद्यसर्वाभि र्मनुष्येभ्यो रुचे कृणु।। 14।।

卐19.18.15 रुचे मा धेहि ब्रह्मसु रुचे राजसु धेहि माम्। रुचे विश्येषु शूद्रेषु मयि धेहि रुचे रुचम्।। 15।।

卐19.18.16 या रुचो हिरण्यये याग्नौ याश्च सूर्ये। इन्द्राग्नी म एता रुचो रुचो धेहि बृहस्पते।। 16।।

19 - 19

卐19.19.1 अव मा पाप्मन् सृज वशी सन्मृडयासि नः। आ मा भद्रेषु धामसु त्वं धेह्यविह्रुतम्।। 1।।

卐19.19.2 यो मा पाप्मन्न जहासि तमुत्वा जहिमो वयम्। अन्यत्रा स्मन्न्युच्यतु सहस्राक्षो ऽमर्त्य।। 2।।

卐19.19.3 पथोर्वयं व्यावर्त्तने निष्पाप्मन् सुवामसि। यो नो द्वेष्टि तं गच्छ यं द्विष्मस्तञ्जहि।। 3।।

卐19.19.4 स वा इवासि सन्नद्धो न भोग मविदं त्वयि। शिरो भिनद्मि ते पाप्मन् यथा न पुनरायसि।। 4।।

卐19.19.5 इन्द्रो अस्मान्दिवा पातु मृत्यो꠹ पाशात् स्वस्तये। द्यौर्न मध्यत꠹ पातु भूमि राज्ञी स्वस्तये।। 5।।

卐19.19.6 सूर्य अस्मान्दिवा पातु मृत्यो꠹ पाशात् स्वस्तये। वातो नो मध्यत꠹ पान्त्वहोरात्री स्वस्तये।। 6।।

卐19.19.7 सोमो अस्मान्दिवा पातु मृत्यो꠹ पाशाद् स्वस्तये। आपो नो मध्यत꠹ पान्तु मानो निर्ऋति रिशत्।। 7।।

卐19.19.8 सं वा चक्षुस्सं हृदयं मनसा वीवनं मनः। अस्या स्सरूप वत्साया घृते होमेन सर्पिषा।। 8।।

卐19.19.9 यत्कक्षिवां संवननं पुत्रो अङ्गिरसामवेत्। तेन मामद्य देवा स्सं प्रियो समवी वनन्।। 9।।

卐19.19.10 संवननं वाङ्मनसो अथो संवननं हृदः। अथो भगस्य यच्छ्रान्तं तेन सं व नयामि वः।। 10।।

卐19.19.11 अहन्ते मनसा मनश्चक्षुर्गृह्णामि चक्षुसा। एवा परि षजस्व मा यथासन्मयि ते मनः।। 11।।

卐19.19.12 आ रथस्येव चक्रे अभ्यावर्त तामसौ। रेष्मच्छिन्नं यथा तृणं वेष्टासौ मनसा मयि।। 12।।

卐19.19.13 परि त्वा पान्तु रसरं परि मातुः॒ परि स्वसुः। परि त्वा नाभ्य स्तरीभ्यो न यौ ध्यासरम्।। 13।।

卐19.19.14 य इन्द्रस्य सभाधानो यस्मिन् समितिमासते। हिरण्या यस्य पर्णानि तस्मा अश्वत्थ ते नमः।। 14।।

卐19.19.15 य श्शाखाभि रन्तरिक्ष मा पूरएति निष्ठ्यः। छन्दांसि यस्य पर्णानि तस्मै अश्वत्थ ते नमः।। 15।।

卐19.19.16 यं मृगो न समाप्नोति पक्षाभ्यां शकुनिष्पथन्। दिवं य स्सर्वा स्तभ्नाति तस्मा अश्वत्थ ते नमः।। 16।। 19 - 20

卐19.21.1 ज्येष्ठघ्न्यां जातो विचृतो र्यमस्य मा हिंसीः॒ पितरौ वर्धमानः। स्योनौ व्याघ्रावुत तौ शिवौ स्तामति त्वा नेषं दुरितानि विश्वा।। 1।।

卐19.21.2 व्याघ्रे अह्न्य जनिष्टवीरो नक्षत्रजा स्सर्ववीर स्सुवीरः। स मा हिंसीः॒ पितरौ वर्धमान स्तस्य ते देवाः॒ प्रतिगृह्णन्तु होमम्।। 2।।

卐19.21.3 या रोहिणीर्देवपत्या प्र धेनुरिव पिन्वते। तत्र तिस्रो व्यष्टका स्सर्वाङ् अधिबृवन्तु प्रजायै जगते च वाम्।। 3।।

卐19.21.4 यदार्द्राभ्या मणिभ्या न्देवा श्शक्रा ऽमन्तं पुरुषेण पूरुषम्। अत्रा पुष्यतं मिथुना सयोनि जीवां प्रजा ञ्जरदष्टिं सुतेजसा।। 4।।

卐19.21.5 हतं पतङ्ग मुत तर्दमाखु मश्विना भिन्तं शिरो मृणतं हनू दतः। यथा न श्शास्यं नघवासं व्यद्धरा एवाभयं कृणुतं धान्याय नः।। 5।।

卐19.21.6 तर्दहै पतङ्ग है जम्भहा उपक्वस। अनदत्त इदं धान्य महिंसन्तो अपोदित।। 6।।

卐19.21.7 तर्दापते वघापते तृष्टदंष्ट्रा श्रृणोत नः। होत्रेवा प्राशितं हविर्वृक्णजिह्वां उपाध्वम्।। 7।।

卐19.21.8 तर्दा द्यामोप जिह्वया यदिमं दिव्यं पीयूषं प्रथमस्ति तृप्सात्। तं प्रत्यञ्च मर्चिषा विध्वमर्मन्।। 8।।

卐19.21.9 ये अभ्रजा ये वातजा ये दिवस्परि यज्ञिरे। मरिच्याः॒ पुत्राणां वयमपि नह्याम्यास्यम्।। 9।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐19.21.10 ये अर्जुना ये हरिता ये कृष्णा ये च रोहिताः। कबन्धस्य प्रशासने शलभ्याञ्जम्भयामसि।। 10।।

卐19.21.11 अन्तरिक्षेण पतत्यमावस्यमभि मध्वम्। गिरिणां सानुषु सीदति तृणं कपालमुत्तम श्शलभास्तद्दिशामिव।। 11।।

卐19.21.12 यथा श्वासो यथा धूरं युक्ता वहन्ति साधु या। एवा मूत्र प्र भिद्यस्व वि वस्तेरा सं सृज।। 12।।

卐19.21.13 विषितं ते वस्तिविलं समुद्र स्योदधेरिव। प्र ते भिनद्मि मेहनं वर्त्तं वेशन्त्या इव।। 13।।

卐19.21.14 यास्समुद्रा दुच्चरन्ति जरती रूपजिह्विकाः। प्रमेहणस्य ता विदुरुभयो र्मेहनस्य च।। 14।।

卐19.21.15 शीर्ष्णोबली रास्नोबली रङ्गादङ्गा न्मुखाद्बलीः। सर्वास्ता इन्द्राणी बली रपमष्ट्वधि त्वचः।। 15।।

卐19.21.16 यास्त्वचो बलयो जाता या जाता स्तन्वस्परि। सर्वास्ता इन्द्राणी बली श्शमीशाखा स्वासदत्।। 16।।

卐19.21.17 आशमी मामकी बली रुरोहाति जहाति माम्। एताविन्द्रस्य जाया बली धानीमकृण्वत।। 17। इत्यृच(ऊनविंश) काण्डे पञ्मोऽनुवाकः 19 - 21

卐19.21.1 यथा सूर्यो नक्षत्राणां वर्चांसि युवते दिवः। एवा सपत्नानामहं वर्च इन्द्रिय मा ददे।। 1।।

卐19.21.2 यच्च वर्च स्सपत्नानां भ्रातृव्येषु च यद्वसु। तदिन्द्रो वृत्रहा धाता सविता दीधरन्मयि।। 2।।

卐19.21.3 याश्च गाव स्सपत्नानां भ्रातृव्येषु च यद्वसु। तं निर्येयमवजित्या धाता सविता दीधरन्मयि।। 3।।

卐19.21.4 सत्यमेव जयतु नानृतं सत्यस्य पन्था रुजुरस्तु साधुः। सत्यं वदन्त स्समिधे विधेम सत्येन द्यावापृथिवी अप्रचेताम्।। 4।।

卐19.21.5 वाग्भागस्य च सत्येन रुद्रस्य मनस्य या। इन्द्रेणाधि ब्रुवता वयं वसु प्राशं विधेमहि।। 5।।

卐19.21.6 या ते रुद्रेषिरा यता वाचि वाते अरङ्कृता। येनेदं विविदामहे तस्य प्राश न्त्वञ्जहि।। 6।।

卐19.21.7 जहि त्वन्तस्य प्राश मुतसत्यमुता नृताम्। योऽस्मानिन्द्र वृत्रहन् वाचा प्राशं जिगीषति।। 7।।

卐19.21.8 उत्पमैतु प्राणो वह्वीर्यसी देवं पृणः। उतो दिवस्स सिञ्चतां समुद्रस्येव मध्यतः।। 8।।

卐19.21.9 समुद्रस्य शतधार स्सहस्रधार आक्षितिः। पुरस्तादिन्द्र आचरत्पूर्णो गोष्ठमिदं पुनः। इहोप पृण संपृण वृष प्रजननाः कृधि।। 9।।

卐19.21.10 इह गावः प्र जायध्वमिहाश्वा इह पूरुषाः। इहो सहस्र दक्षिणोऽभिप्रासा वि षीदतु।। 10।।

卐19.21.11 ज्येष्ठघ्न्यै नक्षत्राणामह्ने रात्र्या इदं नमः। जुहोमि विश्वकर्मणे स शिवो मृडयाति नः।। 11।।

卐19.21.12 मा ज्येष्ठं वधीदय मग्निरेषां मूलबर्हणं परिवृणक्त्वेनम्। ग्राह्या पाशान्वि चृत प्रजानन् पितापुत्रौ मातरं मुञ्च सर्वान्।। 12।।

卐19.21.13 उन्मुञ्च पाशां स्त्वमग्न एषां त्रयस्त्रिभि रुत्थिता येभिरासन्। मायं हिंसीः पितरं वर्धमानो मा मातरं प्रमिनीर्या जनित्री।। 13।।

卐19.21.14 ग्राह्याः पाशान्वि चृत ये सिनन्ति यां ब्रह्मणा परिवृञ्चन्ति वेधसः। उन्मुच पाशां स्त्वमग्न एषां तज्जातस्या नहरहस्तु भद्र।। 14।।

卐19.21.15 नि वर्तध्वं मानु गातास्मान् सिषक्त रेवतीः। अग्नीषोमा पुनर्वसू अस्य वर्धतं रयिम्।। 15।।

卐19.21.16 पुनरेना निवर्त्तय पुनरेना उपा कुरु। इन्द्र एना नियच्छत्वग्निरेना उपा जतु।। 16।।

卐19.21.17 परि वो विश्वतो दध ऊर्जा घृतेन पयसा। ये देवाः के च यज्ञियास्ते रय्या सं सृजन्तु माम्।। 17।। 19 - 22 (नीलरत्नोपनिषद्)

卐19.22.1 नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु। ये अन्तरिक्षे ये दिवि तेभ्य स्सर्पेभ्यो नमः।। 1।।

卐19.22.2 ये चामी रोचने दिवो ये च सूर्यस्य रश्मिषु। येषामप्सु सदस्कृतं तेभ्य स्सर्पेभ्यो नमः।। 2।।

卐19.22.3 या इषवो यातुधानानां ये वा वनस्पतीनाम्। ये वा वटेषु शेरते तेभ्यस्सर्पेभ्यो नमः।। 3।।

卐19.22.4 यवोच्छिष्ट हविषा वर्धयेमं यथा द्युम्नैः कृणुवद्वीर्याणि। सजूर्देवेभिरभि भू स्सपत्नान् आयुष्मत् क्षत्रमजरन्ते अस्तु।। 4।।

卐19.22.5 पुंसा यवेन हविषा पयस्वतो च्छिष्टस्यायं रक्षन्तु देवाः। देवाह्यस्मि न्निदधुर्नृम्णं बृह दस्मिनिन्द्रो वयो दधातु।। 5।।

卐19.22.6 समुच्छिष्टस्य हविषा समुक्थै समायुषा वर्चसा पयो दधातु। देवाह्यस्मि न्निदधुर्नृम्णं बृह दस्मिनिन्द्रो वयो दधातु।। 6।।

卐19.22.7 वायुरेना स्समाकरत्त्वष्टा पोषाय ध्रियताम्। इन्द्र आभ्यो अधि ब्रुव द्रुद्रो भूम्ने चिकित्सतु।। 7।।

卐19.22.8 यथा चक्रुर्देवाऽसुरा यथा मनुष्या उत। एवा सहस्रपोषाय कृणुतं लक्ष्माश्विना।। 8।।

卐19.22.9 लोहितेन स्वधितिना मिथुनं कर्णयोः कृधि। अकर्ता मश्विनालक्ष्म तदस्तु प्रजया बहु।। 9।।

卐19.22.10 कृष्णन्नियानं हरय स्सुपर्णा अपो वसाना दिवमुत्पतन्ति। आ च वर्त्तन्ते सदना दृतस्या दिद्घृतेन पृथिवीं व्युद्यते।। 10।।

卐19.22.11 पयस्वतीः कृणुथाप ओषधी रिमा यदेजथा मरुतो रुक्मवक्षसः। ऊर्जं च तत्र सुमतिं च पिन्वत यत्रा नरो मरुतस्सिञ्चता मधु।। 11।।

卐19.22.12 उदप्लुतो मरुतस्तां इयर्त वृष्टिर्यद्विश्वा निवत स्पृणाथ। एजाति गल्हा कन्येवतु न्नैरुन्तुन्दाना पत्येव जाया।। 12।।

卐19.22.13 त्वष्टेव पूषे सूर्यो दमुना महि स्वस्तिर्वृषणा न आगन्। विश्वा आशा सुयवशा संरराणो ऽस्या रय्याः पुरएता न एहि।। 13।।

卐19.22.14 एह यन्तु मधुमद्युहाना अनमीवा उषतीर्विश्वरूपाः। बह्वीर्भवन्ती रुपजायमानो इहेन्द्रो वो रमयतु गावः।। 14।।

卐19.22.15 प्रजापतिर्जनयतु प्रजा इमा स्त्वष्टा दधातु सुमनस्यमानः। संवत्सर ऋतुभि स्संविदानो मयि पुष्टिं पुष्टिपतिर्दधातु।। 15।। 19 - 23

卐19.23.1 सहसी नाम वा असि सहस्य परि यज्ञिषे। सहस्वा निन्द्रो देवेषु सहसे त्वा खनामसि।। 1।।

卐19.23.2 सहस्येन भेषजेन दिव्येन शतपर्वणा। तेन सहस्र काण्डेन कृणोमि पुनराभृतम्।। 2।।

卐19.23.3 सह सोऽहं भेषजस्य दिव्यस्य नाम जग्रभ। व्याशिष इव तस्थिरे यक्ष्मासः पुरुषाद्दधि।। 3।।

卐19.23.4 अपेत एतु निरृत्र्ऋति र्नेहास्यापि किञ्चन। अपास्यां सत्वनः पाशा न्मृत्यु नेकशतन्नुदे।। 4।।

卐19.23.5 ये ते पाशा एकशतं मृत्यो मर्त्याय हन्तवे। तांस्ते यज्ञस्य मायया सर्वाङ् अप यजामसि।। 5।।

卐19.23.6 निरितो यन्तु नैरृत्र्ऋत्या मृत्योव एकशतं परः। सेधान्मैषां यत्तमः प्राणान् ज्योतिश्च दध्महे।। 6।।

卐19.23.7 त्रिषप्ता वारणा इमा स्ताभिर्मामिन्द्रो अब्रवीत्। विषं वारयतादिति विषं दूषयतादिति।। 7।।

卐19.23.8 अपब्रूतेदं मरुतो महीन्द्रस्याप वाचनी। एषां सहस्र मर्हत्येषां वारयते विषम्।। 8।।

卐19.23.9 अस्थाद्यौरास्था त्पृथिव्यस्था द्विश्वमिदं जगत्। अस्थुर्विषस्या भीतयः प्रतिकूल इवाबलाः।। 9।।

卐19.23.10 यथा वाणस्सु संशितः परापत त्याशुमत्। एवा कासे परापतत् साकं वातस्य ध्राज्या।। 10।।

卐19.23.11 यथा चक्षु श्चक्षुष्मतः परापतति केतुमत्। एवा कासे परापतत् साकं सूर्यस्य रश्मिभिः।। 11।।

卐19.23.12 यथा मदो मन्यु मतां परा पतति योजनम्। एवा कासे परापतत् समुद्रस्यानु विक्षरम्।। 12।।

卐19.23.13 इत एवाव गच्छतोग्रा भवतु माबलाः। ह्वयन्तु सर्वे वो देवास्सर्वा वो वृण्वतां विशः।। 13।।

卐19.23.14 यदवगमेन हविषाव वो गमयामसि। अत्रा त इन्द्रः केबलिर्विशो बलिहृतस्करत्।। 14।।

卐19.23.15 इन्द्र॰ कश्यप आदग्निरिडा तुरिया व स्सखा। यद्भूतं भव्यमसुन्वत् तेनाव गमयामिव।।
15।। 19 - 24

卐19.24.1 न तं यक्ष्मा अरुन्धते नैनं शपथोऽश्नुते। यं भेषजस्य गुग्गुलो स्सुरभिर्गन्धो ऽश्नुते।। 1।।

卐19.24.2 यं गुग्गुलोर्भेषजस्य सुरभिर्गन्धोऽश्नुते। विश्वञ्च स्तस्मा द्यक्ष्मा मृगा अश्वा इवे रते।। 2।।

卐19.24.3 यद् गुग्गुलु सैन्धवं यद्वाघासि समुद्रियम्। उभयोरग्रभं नामास्मा अरिष्ट तातये।। 3।।

卐19.24.4 देवा एतं मधुना संयुतं यवं सरस्वत्यामधि मणावचर्कृषुः। इन्द्र आसीत् सीरपति श्शतक्रतु॰ कीनाशा आसन् मरुत स्सुदानवः।। 4।।

卐19.24.5 बृहत्पलाशे सुभग उर्ध्वस्वप्न ऋतावरि। मातेव पुत्रेभ्यो मृड केशेभ्यो न श्शमि।। 5।।

卐19.24.6 यस्ते मदो ऽवकेशो यो विकेशो येनाभिहस्यं पुरुषं कृणोषि। भृणघ्नो विरुवारा चर त्वन्तस्य ते प्रजया॰ प्र सुवामि केशान्।। 6।।

卐19.24.7 आकूतिं देवीं सुभगां पुरो दधे चित्तस्य माता सुहवा नोऽस्तु। या माशामेमि केवली सा मेऽस्तु विदेयमेनां मनसि प्रविष्टाम्।। 7।।

卐19.24.8 आकूत्या नो बृहस्पत आकूत्या न उपा गहि। अथो भगस्य नो धेह्यथो नस्सुभगो भव।।
8।।

卐19.24.9 बृहस्पतिर्म आकूतिमाङ्गिरस॰ प्रति जानातु वाचमेताम्। यस्य देवा देवतास्सं बभूवु स्स सुप्रणीत॰ कामो अन्वेत्वस्मान्।। 9।।

卐19.24.10 मनोऽन्वा हुवामहे नाराशंसेन स्तोमेन। पितृणाञ्च मन्मभिः।। 10।।

卐19.24.11 आ न एतु मन॰ पुन॰ क्रत्वे दक्षाय जीवसे। ज्योक्क सूर्यन्दृशे।। 11।।

卐19.24.12 पुनर्न॰ पितरो मनो ददातु दैव्यो जनः। जीवं व्रातं स चेमहि।। 12।।

卐19.24.13 वयं सोम व्रते तव मनस्तनुषु बिभ्रतः। प्रजावन्त स्स चेमहि।। 13।।

卐19.24.14 वर्चो मे मित्रावरुणा वर्चो देवी सरस्वती। वर्चो मे अश्विनोभा धत्तां पुष्कर स्त्रजा।।
14।।

卐19.24.15 यच्च वर्चो यजमाने यच्च यज्ञेऽध्याहितम्। सुरायां बभ्रु यद्वर्चस्तस्य भक्षीय वर्चसः।।
15।।

卐19.24.16 या उत्सेभ्य॰ प्रस्रवन्ति दिवोधारा नदीभ्यः। तासां त्वा सर्वासामपामभि सिञ्चामि वर्चसा।। 16।।

卐19.24.17 यद्राजानं शकधूमं नक्षत्रा ण्यकृण्वत। भद्राहमस्मै प्रायच्छन् ततो राष्ट्रमजायत।। 17।।

卐19.24.18 भद्राहमस्तु न स्सायं भद्राहं प्रातरस्तु नः। भद्राहमस्मभ्यं त्वं शकधूम सदा कृणु।। 18।।

卐19.24.19 यो नो भद्राहमकरत् सायं प्रातरथो दिवा। तस्मै ते नक्षत्रराज शकधूम सदा नमः।। 19।।

卐19.24.20 यदाहु श्शकधूमं महा नक्षत्राणां प्रथमजं ज्योतिरग्रे। तन्नस्सतीं मधुमतीं कृणोतु रयिञ्च न सर्ववीरं नि यच्छात्।। 20। इत्यृच ( ऊनविंशः )काण्डे षष्ठोऽनुवाकः 19 - 25

卐19.25.1 युपे रन्ते विद्वेषणं देवानां वर्चसा कृतम्। अग्निर्वामस्त्वन्तरा यथा वां न सहासति।। 1।।

卐19.25.2 यथाऽहिं द्वेष्टि पूरुषो ऽहिर्वा द्वेष्टि पूरुषम्। अग्निर्वा मस्त्वन्तरा यथा वां न सहासति।। 2।।

卐19.25.3 नानानं वामाकूतानि नाना चित्तानि सन्तु वाम्। विश्वञ्चौ पर्यावर्तयेथां यथा वां न सहासति।। 3।।

卐19.25.4 अडद्देकमडद्धे तुण्डे न मशीतकं भङ्गला पतेद्धः। एतद्यत्ते यद्वा न वा न चासन् नो च ते भुवत्।। 4।।

卐19.25.5 स्वप्ने वित्तं यथा धनं नश्याद्यदेति रेचितम्। आगिलो गिला पापाजितो गिल नस्याद्बध्न कमभि कम्।। 5।।

卐19.25.6 दीर्घायुत्वाय सहसे मह्या अरिष्टतातये। सुपर्णो मह्यमब्रवी देतदाश्लिष्ट भेषजम्।। 6।।

卐19.25.7 सक्तुर्नवति तुत उना पुनन्तो विद्वांसो वाचमग्रत। अङ्गेभ्यो विश्वाङ्गेभ्य॰ प्र ते छिनद्मा माश्लिष्टम्।। 7।।

卐19.25.8 अवछिन्घ्याश्लिष्टं ऊर्वा ह्यसि भेषजी। दिव्य स्सुपर्णो अब्रवीदेतदाश्लिष्ट भेषजम्।। 8।।

卐19.25.9 अभि भूरहमागमं विश्वकर्मास्यायुजः। अहं मित्रस्य कल्पयन् आश्वाश्वासु दुष्टरः।। 9।।

卐19.25.10 अहं समित्ययनो अहं विशां पुरोहितः। अहं मित्राणि कल्पयन्मयि वागस्तु धरुण्यसि।। 10।।

卐19.25.11 आवश्वक्षुरावो वाचमा व स्समितिं ददे। योगक्षेमं व आदायाहं भूयासमुत्तमः।। 11।।

卐19.25.12 ब्रह्मणाग्नि स्संविदानो रक्षोहा नुदतामितः। अरायो यस्ते तन्वां दुर्णामा योनिमाशये।। 12।।

卐19.25.13 यस्तेऽराया तन्वां दुर्णामा योनिमाशये। अग्निष्टं ब्रह्मणा युजा रक्षोहा नुदतामितः।। 13।।

卐19.25.14 यान्यृत्व्यानि रक्षांसि येऽराया यातुधानाः। अग्निष्टान् शग्मया तन्वा रक्षोहा पातु तेभ्यः।। 14।। 19 - 26

卐19.26.1 अग्निश्च देव सवित रिषमूर्ज न्दधानौ। पातं मा दुश्चरितादामा सुचरिते भजतं युवय रवसा सुम्न मशीय।। 1।।

卐19.26.2 इदन्तदुप युव इदन्तदुपह्वये यच्छुश्रुमा त्वत्परि। वाचस्पतिर्नियच्छतु मय्येवास्तु ममाश्रुतम्।। 2।।

卐19.26.3 माप ज्यायस्ते अकरन्मा श्रुतेन वि राधिषि। अमोघ मस्माकं श्रान्तमग्ने द्रविणवत्कृधि।। 3।।

卐19.26.4 मध्यमेष्ठा वर्चस्वत्यायुषे वर्चसे कृतम्। वनुष्व विश्वदेवेषु वनुष्व त्वं बृहस्पतौ।। 4।।

卐19.26.5 घृतेन प्रजां वनुते घृतेन रयिमश्नुते। घृतेनायुष्यं वर्चस्यं देवेभ्यो वनुते परि।। 5।।

卐19.26.6 पर्जन्य पिप्पलास्तुभ्यं नद्यो गर्भं स्वस्तये। मर्यादा ब्रह्मदेवयीरायुष्यं वर्चसा सिचम्।। 6।।

卐19.26.7 यथा हस्ती हस्तिन्याः पदेन पदमन्वगात्। एवात्वमग्ने वर्चस्व पदेन पदमन्विहि।। 7।।

卐19.26.8 यथा रथस्य चक्रेण विपथः पांशुमस्याथः। एवाह मनो व्यस्यामि हृदं संवननाय कम्।। 8।।

卐19.26.9 इन्द्रस्य प्रथमं वचो देवानामपरं वचः। तृतीयमश्विनोर्वचस्तेन गां वानयामसि।। 9।।

卐19.26.10 उदित श्श्यावौ विथुरौ दिवं गृध्राविवेयथुः। शोचना वभिशोचना वस्योच्छोचनौ हृदः।। 10।।

卐19.26.11 शोचयाभि शोचया दीपयोप दीपयः। अहेरग्ने विषन्त्वं तृणमिव कल्वलं दह।। 11।।

卐19.26.12 सीदतं निसक्तारावतं मोङ्कतम्। कृष्णा वां गौ स्सारस्वती।। 12।।

卐19.26.13 यथा रात्री कृष्णतमा गौः कृष्णा कृष्णवर्त्मनी। शाची पूर्वो यथा रूपमेवेदं मामकं शिरः।। 13।।

卐19.26.14 यथाङ्गरोभिषिक्तो दर्विदाको यथासितः। अनुस्यन्दस्य कल्मषमेवेदं मामकं शिरः।। 14।।

卐19.26.15 यथा दावाद् दह्यमानात्कृष्णो ज्वालोपध्वंसते। नैषां न्यस्य यथा मुखमेवेदं मामकं शिरः।। 15।। 19 - 27

卐19.27.1 यत्किं चासौ मनसा यच्च वाचा यज्ञैर्जुहोति हविषा यजुर्भिः। तन्मृत्युना निर्ऋतिस्सम्विदाना पुरा दृष्टादाज्यं हत्वस्य।। 1।।

卐19.27.2 यातुधाना निऋर्तिराद् रक्षस्तेऽस्यघ्नन्त्वनृतेन सत्यम्। इन्द्रेषिता आज्यमस्य मथ्नन्तु मातत्सं पादि यदसौ जुहोति।। 2।।

卐19.27.3 परित्वाग्ने पुरं वयं विप्रं सहस्य धीमहि। भिषग्वर्णं दिवेदिवे हन्तारं भङ्गुरावतम्।। 3।।

卐19.27.4 अजिराधिराजौ श्वेनौ सम्पातिनाविव। आज्यं पृतन्यतो हतां योऽस्मान् पृतनायति।। 4।।

卐19.27.5 पृथिव्यै वनस्पतिभ्य ओषधीभ्योऽग्नयेऽधिपतये स्वाहा।। 5।।

卐19.27.6 अन्तरिक्षाय प्राणाय वातेभ्यो वायवेऽधिपतये स्वाहा।। 6।।

卐19.27.7 दिवे चक्षुसे नक्षत्रेभ्य स्सूर्यायाऽधिपतये स्वाहा।। 7।।

卐19.27.8 पिप्पल्य स्समवदन्ता यतीर्जननादधि। यं जीवमश्नवामहै न स रिष्याति पूरुषः।। 8।।

卐19.27.9 पिप्पली क्षिप्तभेषज्युताति विद्धभेषजी। तां देवास्सम कल्पयनलं जीवितवा इति।। 9।।

卐19.27.10 असुरास्त्वा न्यखनन् देवास्त्वोद वपन्पुनः। वातीकृतस्य भेषजी पिप्पली क्षिप्त भेषजी।। 10।।

卐19.27.11 यदुलूको वदति मोघमेत द्यत्कपोतꣳ पदमग्नौ कृणोति। यस्य दूतौ प्रहिताविदमेजथु स्तस्मै यमाय नमोऽस्तु मृत्यवे।। 11।।

卐19.27.12 यस्ते दूतो निर्ऋत आजगामा प्रहितꣳ प्रहितो वा गृहं नः। कपोतोलूका वपदन्तदस्त्व वै रहत्यमिद माजगन्थ सुवीरताया इदमासद्याद् तस्मै यमाय नमोऽस्तु मृत्यवे।। 12।।

卐19.27.13 यꣳ प्रथमꣳ प्रवतमाससाद्य बहुभ्यꣳ पन्थामनुपस्पशानः। यो ईशेऽस्य द्विपदो यश्चतुष्पदस्तस्मै यमाय नमोऽस्तु मृत्यवे।।

卐19.27.14 यथासितः प्रथयते वशाँ अनु वपुंषि कृण्वन्नसुरस्य मायया। एवा मे शेप स्सहसा यमर्को एनाङ्गेन संसमकं कृणोतु।। 14।।

卐19.27.15 यावदङ्गीनं पारस्वतं हास्तिनङ्गार्दभञ्च यत्। यावदश्वस्य वाजिनस्तावन्मे वर्धतां पसः।। 15।।

卐19.27.16 यथा पसस्त्वायादरं वातेन स्थूलभं कृतम्। यावत् परस्वतः पसस्तावन्मे वर्धतां पसः।। 16।। 19 - 28

卐19.28.1 यस्येदमा रजो युजस्तुजे जनं वनं स्वः। इन्द्रस्य नाधृषे शवः।। 1।।

卐19.28.2 धृषाणो धृषित श्शवः पुरा यथा यतिष्ठन्। इन्द्रस्य रन्त्यरियं महत्।। 2।।

卐19.28.3 स नो ददातु नो रयिमुरुं पिशङ्ग सन्दृशम्। इन्द्रः पतिस्तु विष्टमो जनेष्वा।। 3।।

卐19.28.4 आयुरग्नि इहा वहा जातवेदास्तनू वशिन्। यथाहं योग्जीवोऽसानि प्रजानामधिपा वशी।। 4।।

卐19.28.5 आयुरिन्द्रो दधातु मे आयुर्देवो बृहस्पतिः। आयुर्मे विश्वे देवा अहोरात्रे च चक्रतुः।। 5।।

卐19.28.6 आयुरायुस्या पततां प्राणं प्राणो दधातु मे। देवा यच्चक्रुर्देवेभ्य स्स्वर्यन्तो यथा यथम्।। 6।।

卐19.28.7 उत्पतन्तुर्नभस्वती समुद्रादधि घोषिणी। उच्चा समुद्रिया आप स्ताभिष्ट्वा तर्पयामसि।। 7।।

卐19.28.8 या आपो दिव्या या वातात्परि यज्ञिरे। इन्द्रो मरुत्वां स्तप्तात्मा ताभिष्ट्वा तर्पयामसि।। 8।।

卐19.28.9 याः शुष्का या हरिणीर्या भूमि मनुवा दधु। सर्वास्समग्रा ओषधीस्ताभिष्ट्वा तर्पयामसि।। 9।।

卐19.28.10 आ नो मेधा सुमतिर्विश्वरूपा शिरो बृंहती रावेशयन्ती। रुचो मे वह्नीर्नि युनक्तु गावो यथा साम भूवनेषु कर्ण नः।। 10।।

卐19.28.11 दीक्षा तपो मनसो मातरिश्वा बृहस्पतिर्वाचो अस्या स योनिः। वेदांसि विद्यामयुजन्तु वह्नीरग्नीषोमौ यशो अस्मासु धत्तम्।। 11।।

卐19.28.12 यदग्ने तपसा तप उप प्रेक्षामहे वयम्। प्रियां श्रुतस्य भूयास्मा युष्मन्त स्सुमेधसः।। 12।।

卐19.28.13 यस्त्वामातुरुत वा पितुः परिजायमान मभिसंबभूव। तं त्वद्यक्ष्ममधि नाशयाम स्सोऽन्यस्मिंच्छ्रयातैः प्रविष्टः।। 13।।

卐19.28.14 यस्ते यक्ष्मो हृदयेष्ठो नाभिष्ठा उदरंगमः। अथो य श्शिश्रिये परे तं त्वद्यक्ष्ममधि नाशयामः सोऽन्यस्मिंच्छ्रयातैः प्रविष्टः।। 14।।

卐19.28.15 शीर्षरोगमङ्गरोगं संस्रावणं विबर्हणमभिशाचं विसल्पकम्। यस्ते यक्ष्मो मज्जसु परुंषु यो गुदासु तंत्वद्यक्ष्ममधि नाशयाम स्सोऽस्मिंच्छ्रयातैः प्रविष्टः।। 15। इत्यृच (ऊनविंशः) काण्डे सप्तमोऽनुवाकः 19 - 29

卐19.29.1 अग्निरक्षोहा तिग्मस्तिग्मशृङ्गो हन्तु रक्षो नुदतामरातिम्। अपाघशं समस्यतु।। 1।।

卐19.29.2 आ न एतु परावतो बलमोजो दिवस्परि। आ गिरिभ्यः पर्वतेभ्य आयुष्टे विश्वतो दधत्।। 2।।

卐19.29.3 पुनस्तेऽसुं पृथिवी ददातु पुनर्द्यौर्देवी पुनरन्तरिक्षम्। पुनस्ते सोमस्तन्वं ददातु पुनः पूषा पथ्यां यास्स्वस्तिः।। 3।।

卐19.29.4 कष्कषाः कष्कषा पिष्टा येवाषाः येवाषाः। इष्टर्गवेषयन्त स्सैकताः पांशवाः।। 4।।

卐19.29.5 अदृष्टान्नदृष्टान। दृष्टाङ् अदृष्टान्धनपते जहीन्द्रस्य वधेन।। 5।।

卐19.29.6 एताश्च विश्वरूपाश्च गृध्राः कोकाश्च ते हताः। कामे कामय समाः प्रतीचीः प्रती मा भवन्।। 6।।

卐19.29.7 मामनु प्रते मनो वत्सा पाकेव धावतु। अभिले अभिमादन्य सौमामभि माद्यतु।। 7।।

卐19.29.8 विद्म पतत्त्रिण्यवर्यमिषु के नामकं तव। अहन्ते मन आ ददे मनो मनोमुषिर्यथा।। 8।।

卐19.29.9 मयि ते मन आहितं रथ इव रथवाहने। उदसौ सूर्यो अगान्मह्य मवतुना सह।। 9।।

卐19.29.10 अहं विशां पुरोहितो मधुहस्तो मधुजिह्वोः। मयि वागस्तु धरुण्यसी।। 10।।

卐19.29.11 अहं विश्येन केतुना समक्षे मानुषेष्वा। अस्माकमस्तु केवलं वृहद्यसो अधि विश्वेषु राजसु।। 11।।

卐19.29.12 स्वादोश्चिन्मा स्वादीयांसं मधोश्चिन्मधुमत्तरम्। प्रियाचित्सख्युरन्तर मादित्यासः कृणोतु मा।। 12।।

卐19.29.13 अग्ने ब्रह्म त्वं ब्रह्मासि विद्धि त्वं प्रास्मभ्यं ब्रूहि। यदीदन्तथा भविष्यसि यदि वा ना मथैतस्य हविषो विहि स्वाहा।। 13।।

卐19.29.14 वि पृच्छे द्यावापृथिवी वीन्द्रं वि बृहस्पतिम्। वि देवान् यज्ञियान् पृच्छे व्यसं जीवनाय कम्।। 14।।

卐19.29.15 विज्ञानायोद्यतꣳ प्रस्तुत स्सुगं यमराजन् हविरिदं जुषस्व। अगतासोरिहविषो मादयस्व निर्ऋतिं गच्छतु यं गतासोः।। 15।। 19 - 30

卐19.30.1 य त्वां मांसे अपववौ यन्मन्थे यदोदने। अग्निष्ट्वा विश्वभेषजस्तस्मात्पात्वंहसः।। 1।।

卐19.30.2 यस्त्वावातो आ वात्वधरादुत्तरादुत। आपो या विश्वशंभुव स्तास्त्वा पात्वं हसः।। 2।।

卐19.30.3 अपत्वं मृत्युं निर्ऋतिमपयक्ष्मं नि दध्मसि। यथात्वमरपो अस उदोजा उत्तरो भव।। 3।।

卐19.30.4 वैश्वानरो रस्मिभिर्नः पुनातु वातꣳ प्राणेनेषिरो नमोभिः। द्यावापृथिवी पयसा पयस्वती ऋतावरी यज्ञिये मा पुनीताम्।। 4।।

卐19.30.5 प्रजापतिर्ऋतुभिꣳ पञ्चभिस्संवत्सरो धामभिꣳ पातु विश्वैः। इहैवप्राण स्सख्ये नो अस्तु तमात्मनि पुनरावेशयामि।। 5।।

卐19.30.6 वैश्वदेवीं सुनृतामा रभध्वं शुद्धा भवन्त श्शुचयः पावकाः। तया गृणन्त स्सधमादेषु वयं स्यामो पतयो रयीणाम्।। 6।।

卐19.30.7 वैश्वानरीं वर्चस आ रभध्वं यस्या आशास्तन्वो वीतपृष्ठाः। इडयेह सधमादं मदन्तो ज्योक्पश्येम सूर्यमुच्चरन्तम्।। 7।।

卐19.30.8 अवत्कं मम भेषजमवत्कं परिवाचनम्। नराव्यसिमातु दोवन्वाना रोगभेषजम्।। 8।।

卐19.30.9 शम्भु लेहमिहाहरत् मुदक्षीरा उदस्यति। तदास्त्रावस्य भेषजं तदु रोगमनीनशत्।। 9।।

卐19.30.10 नदीषुनड्वलासु कुम्भेषु कलशेषु च। प्रतीशेचन भेषजन्तत्ते कृणोमि भेषजम्।। 10।।

卐19.30.11 मध्यमं सं पिवोदकं पद्वटिङ्गं विपश्चलं विपश्य। अविदाम यदैच्छामि पिशाच क्षयणं हविः।। 11।।

卐19.30.12 तेन क्रव्यादो हन्मि स्सर्वाश्च यातुधान्यः। इच्छन्ति त्वा पदातय इच्छन्ति रथिनस्त्वा।। 12।।

卐19.30.13 प्रीणन्ति गोभिरश्वैरमृतस्येव वा असि। अमुं सुनाम भेषजं पृथिव्या अध्युद्धृतम्।। 13।।

卐19.30.14 वक्ता तन्मह्यमब्रवी दिदं हि पारयादिति। चक्षुरसि पुरुषस्य चक्षुर्गोश्चक्षुरर्वतः।। 14।।

卐19.30.15 चक्षुर्भूतस्य भव्यस्य चक्षुरप्सरसामसि। चक्षुरसि सुपर्णस्य चक्षुरहेरथो शुनः।। 15।।

卐19.30.16 यक्षुस्सर्वस्य पश्यतो अथो यद् विश्वमेजति। आदधानं सहस्त्राक्षं प्रतिस्पाशनमब्रूवन्। दर्शय मा यातुधानान् दर्शय यातुधान्यः।। 16।। 19 - 31

卐19.31.1 अतिमानक्षं पृथिवीमतिद्यामति सूर्यम्। अति विश्वमिदं भूतमत्यक्षं यातुधान्यः।। 1।।

卐19.31.2 दर्शय मा यातुधानान् दर्शय यातुधान्यः। अघायून् सर्वान्दर्शये त्यौषधी रभे।। 2।।

卐19.31.3 एवा सहस्त्र चक्षो त्वं प्रति पश्यास्यायतः। सहोऽसि यातुधान जम्भनम्।। 3।।

卐19.31.4 इमाः पारे पृदाक्वस्त्रिषप्ता निर्जरायवः। तासां जरायुणा वयमक्ष्यावपि व्यायाम स्यघायोः परिपन्थिनः।। 4।।

卐19.31.5 विषूच्येतु कृन्तती पिनाकमिव बिभ्रती। विष्वक् पुनर्भवा मनो असमृद्धा अघायवः।। 5।।

卐19.31.6 अपेतः परिपन्थिनो योऽघायु रर्षतु। न बहव स्सं शक्नुवन्नार्भका अभि धृष्णवम्।। 6।।

卐19.31.7 प्रेतं पादौ प्र स्फुरतं वहतं पृणतो गृहम्। इन्द्राण्येतु प्रथमाजीतामुषिता पथा।। 7।।

卐19.31.8 आयमगन् फल्गुमणि र्बलेन बलदा स्सह। येनेन्द्रो दस्युना वीराँ असुराणा मवातिरत्।। 8।।

卐19.31.9 वर्चसां मां पयसोक्षन्तु देवा वर्चसा द्यावापृथिवी उभे। वर्चो मे देवस्सविता दधातु वर्चो विप्रः कश्यपो मे दधातु।। 9।।

卐19.31.10 वर्चो मे आपो दधतु वर्चो मो वीरुधो दधन्। भूतानि सर्वास्सङ्गत्य वर्च आधुर्मुखे मम।। 10।।

卐19.31.11 याः पुरस्ताद्विितिष्ठन्ते गावः प्रव्राजीनीरिव। वातीकृतस्य भेषजीः पिप्पलैः पारयिष्णवः।। 11।।

卐19.31.12 रुद्रस्य मूत्रमस्य मृतस्य नाभिः। पृथिव्यां मूलं निष्ठितमसि विषाणा नाम वातीकृतस्य भेषजी।। 12।।

卐19.31.13 शन्ते अस्तु मतस्नाभ्यां शं य क्लेशं तलीभ्यौ। शन्ते पृष्टिभ्यो मज्जभ्य श्शमस्तु तन्वे तव।। 13।।

卐19.31.14 नहि ते अग्ने तन्वः क्रूरमानंश मर्त्यम्। कविर्बिभस्तु ते जनं स्वं जरायु गौरिव।। 14।।

卐19.31.15 त्वेष इव सञ्च वि चोर्वच्यसे यदुत्तरद्रावुपरस्य खादतः। शीर्ष्णा शिरो अप्ससाप्सो अर्दयन्नंशून् बभस्ति हरितेभि रासभिः।। 15।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐19.31.16 सुपर्णा वाचमक्रतोपद्य व्याखरे कृष्णा ईषिरा अनर्तिषुः। नि यन्निश्चन्त्य पुरस्य निष्कृतिं पुरू रेतो दधिरे सूर्यस्तयः।। 16।। 19 - 32

卐19.32.1 भगेन मा शांशपेन साकमिन्द्रेण मेदिना। कृणोमि भगिनं माप द्रान्त्वरातयः।। 1।।

卐19.32.2 यो अन्धो यः॰ पुरस्सरो भगो वृक्षेष्वार्पितः। भगो मे अस्तु शांशपो ऽपः द्रान्त्वरातयः।। 2।।

卐19.32.3 यथा वृक्षाङ् अभ्यभव स्साकमिन्द्रेण मेदिना। एवा मा भगिनं कृण्वप द्रान्त्वरातयः।। 3।।

卐19.32.4 अपेतो नीललोहितं जातं हिमवतस्परि। कीश्मीलमुर्वराभ्यो दिवो जातमनीनशम्।। 4।।

卐19.32.5 अभ्राज्जातं वर्षाज्जात मथोजातं दिवस्परि। अथो समुद्राज्जातं कीश्मीलं नाशयामसि।। 5।।

卐19.32.6 यो नीहाराद्यः पृष्ठाया योभ्यस्परिजायसे। गर्भो यो विद्युतामसि स नः कीश्मील मृडय।। 6।।

卐19.32.7 नोदेया स्सिकता इमा स्सिन्धुतस्पर्याभृताः। ताभिर्यमस्य कीश्मीलं संभृताभिरनी नशम्।। 7।।

卐19.32.8 त्वया पूर्वं विभीतकं सञ्जिता असुरा हताः। त्वं सपत्नचातनो भ्रातृव्याङ् अव धूनुष्व।। 8।।

卐19.32.9 वि भिनत्तु विभीतकस्तीक्ष्णश्रृङ्ग इव ऋषभः। अथो सपत्नानादत्ता मथो हन्तु दुरस्यतः।। 9।।

卐19.32.10 व्यवधात्सहमान स्सपत्नान् द्विषतो मे अधराङ् अकः। अभ्यभूद्भूत्योभयाः।। 10।।

卐19.32.11 य आस्कन्दः॰ परास्कन्द आखुः॰ कुकुम्भात् कृमिः। उपचीकान् उपक्सान् तान् सर्वान् जम्भयामसि।। 11।।

卐19.32.12 अपि नह्यस्याखोर्मुञ्जेन मुखमास्यम्। अपनुदन् यथा चारादपेत उर्वराभ्यः।। 12।।

卐19.32.13 अपिनद्धमुख आखुः॰ परोक्तः॰ प्राट्धराजतः। शृणाम्यस्य दन्तान्विरक्षो पातयामसि।। 13।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐19.32.14 अश्विना सारघेण मा मधुनाङ्क्त शुभस्पती। यथा गर्भस्वतीं वाचमावदानि जनाङ् अनु।।
14।।
卐19.32.15 यशा अहं निमिशते प्रत्यक् सत्रे यशा अहम्। अत्रैमितद्यशा अहमुत तत्र यशा अहम्।।
15।।
卐19.32.16 अस्मै च सर्वस्मै भूताय सर्वस्मै च विपश्यते। सर्वस्मै इदहं यशा। 16।।
卐19.32.17 अपोत्तर पोर्णहि यदीदमस्ति वा न वा। व्यन्यं विल्गणञ्चक्षु रक्षिभ्यां कृधि।। 17।।
卐19.32.18 अङ्क हिरण्मयं कृत्वा लङ्गलाष मर्मञ्च। तद्देवा अपलुम्पतु चक्षुष्मन्मे मनो अस्तु।। 18।।
卐19.32.19 चक्षुष्मद् हृदयं मन चक्षुष्मच्चित्तमस्तु मे। चक्षुश्चक्षुष्मदस्तु मे चक्षुराधेहि मे अक्ष्योः।।
18। इति त्यृचो (ऊनविंशः)काण्डे अष्टमोऽनुवाकः 19 - 33
卐19.33.1 सोमो राजा सविता च राजा भगो राजा भुवनञ्च राजा। शर्वो राजा शर्म च राजा त उ न
श्शर्मयच्छन्तु देवाः।। 1।।
卐19.33.2 आदित्यैर्नो बृहस्पति र्भगस्सोमेन न स्सह। श्वे देवा उर्वन्तरिक्षं त उ न श्शर्मयच्छन्तु
देवाः।। 2।।
卐19.33.3 उतारुद्धां निष्विदतामथोऽस्त्रश्री यथायथम्। मा नो विश्वे देवा मरुतो हेतिमस्यन्ताम्।।
3।।
卐19.33.4 अपामिदं न्ययनं समुद्रस्य निवेशनम्। मध्ये ह्रदस्य नो गृहाः पराचीना मुखा कृधि।।
4।।
卐19.33.5 आयने ते परायणे दूर्वा रोहतु पूष्पिणीः। उत्सो वा तत्र जायतां ह्रदो वा पुण्डरीकवान्।।
5।।
卐19.33.6 हिमस्य त्वा जरायुणा शाले परि व्ययामसि। शीत ह्रदा हि नो भुवोऽग्निर्ददातु भेषजम्।।
6।।
卐19.33.7 अयन्दर्भ विमन्युक स्स्वाय चारणाय च। मन्योर्विमन्युको मन्यु शमनोऽस्तु ते।। 7।।
卐19.33.8 अयं यो भूरिमूल स्समुद्रमव गच्छति। दर्भः पृथिव्या निष्ठित स्स ते अस्तु विमन्युकः।।
8।।

卐19.33.9 वि ते हनव्यां शरणिं विते मुख्यां नयामसि। यथा वशो न वादिषो मम चित्तमुपायसि।।
9।।
卐19.33.10 येभिः पाशैः परिवित्तो विबद्धः परौपरावार्पितो अङ्गे अङ्गे। वि ते चृत्यन्तां विचृतो हि सन्ति भ्रुणघ्नि पूषन् दूरितानि मृष्टाः।। 10।।
卐19.33.11 त्रिते देवा अमृजतैन एतत्त्रित एनन्मनुष्ये ष्वमृष्टः। ततो जहि त्वा मध्येन आहर त्तदहं त्वद्ब्रह्मणाप करोमि।। 11।।
卐19.33.12 मरिचीर्धूमं प्र विशानु वात मुदारान् गच्छोत वा नीहारान्। नदीनां फेनमनुत द्विनश्यतु भ्रूणघ्नि पूषन् दुरितानि मृष्टाः।। 12।।
卐19.33.13 अग्ने रक्षः प्रतिदह यत् कुम्भ्याभिरा भृतम्। अनाधृष्यस्य यास्यत्य भूज्जीवात्तवेयम्।।
13।।
卐19.33.14 यन्नखवद्य च्छपवत्प्रसुमत्किश्च पुष्पवत्। उर्वामत्स्यो मधूलकं तस्य प्रास्यत्यय मनास्त्रावमरोगणम्।। 14।।
卐19.33.15 या समुद्रात्प्रस्त्रवन्ति देवीर्हिमवतस्परि। आपो या विश्वसंभूव स्ता इहा यान्तु भेषजीः।।
15।। 19 - 34
卐19.34.1 त्वचापिधाने सुभगे यत्परिस्तरणे कवे। एकामिव व्रजेगां परि त्वा वर्चसा सिचम्।। 1।।
卐19.34.2 अग्रेणीरिव हंसानां प्रपश्यन्ती पुरस्पथम्। जिह्वे मा विव्यथो मा यथा पूर्वं त्वं वदः।। 2।।
卐19.34.3 वर्चस्व दहमुद्यासं ब्रह्मराजन्याभ्यां शूद्राय चार्याय च। यस्मै च कामयामहे सर्वस्मै च विपश्यते।। 3।।
卐19.34.4 अर्वाञ्चौ पादौ प्र हराम्यऽर्वाचीनं मनस्तव। अर्वाचीनं नश्यतेतः पराङ् मन्युर्नि वर्तताम्।।
4।।
卐19.34.5 यश्च छागलादे भगवो अर्वाग्ज्योतिः परस्तमः। आत्वा खलेऽग्निका त्तस्मात् पुनरावर्त्तयामसि।। 5।।
卐19.34.6 यथा ब्रीहिन् ब्रीहिखले समाकुर्वन्ति तूलिभिः। एवाते निष्ठितं मन स्स मा करोमि मामुभे।।
6।।
卐19.34.7 त्वमुत्तमं सुराघसां माध्यमं हुवतोरसि। त्वया विदुर्विजङ्गहे तं त्वा वर्चस आददे।। 7।।



Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐19.34.8 मूर्ध्यस्ते मूर्ध्योभ्यो ऽग्रुवः प्रति विद्याः। यक्ष्मं शीर्षत आ ददे।। 8।।

卐19.34.9 यश्चस्फामा ते अङ्गेषु यः प्रेमा हृदये च ते। तन्त्वदा वेशयामहे मयि भ्राजातिदीद्यत्।। 9।।

卐19.34.10 वातरंहा वाजीन् भव युज्यमान इन्द्रस्य याहि प्रसवे मनोजवाः। युञ्जन्तु त्वा मरुतो दैव्यास आ ते त्वष्टापत्सु जवं दधातु।। 10।।

卐19.34.11 जवस्ते अर्वन्निहितो गुहा य श्श्येने चरति यश्चवाते। तेन त्वं वाजिन्बलवान्बलेना जिञ्जय समने पारयिष्णुः।। 11।।

卐19.34.12 आसीयानोऽधि मनसा आसीयानोऽधि चक्षुषा। आसीयान स्स वाचा भूत्वा जिञ्जय समने पारयिष्णुः।। 12।।

卐19.34.13 तनूस्ते वाजिन्तन्वं वहन्ती वाम मस्मभ्यं धातु शर्म तुभ्यम्। अहृतो महो धरुणाय देवा दिव्यमिव ज्योतिस्स्वरा मिमीयात्।। 13।।

卐19.34.14 इन्द्रो माव वक्षति वृत्रहा यो वृत्रञ्जयः। स मे रथ्यं सुसारथिं सोऽश्वान् मधु मे नयात्।। 14।।

卐19.34.15 इन्द्रो मा तेन नयतु पन्था य उभय स्सुगः। दक्षिणा पारयाति वा मा रिषन् समरे युधः।। 15।।

卐19.34.16 हृत्सु के परिणो नमा पारिषन्तन्वं कृधि। यूयं तु पर्णिनं शिर मुतापर्णं रिषादिति।। 16।।

19 - 35

卐19.35.1 विश्वे देवा इदं हवि रादित्यास स्सपर्यत्। अस्मिन् यज्ञे मा व्यथिष्व मृताय हविष्कृतम्।। 1।।

卐19.35.2 अव्यसश्च व्यचसश्च विलं वि ष्यामि मायया। ताभ्यामुद्धृत्य वेदमथ कर्माणि कृण्महे।। 2।।

卐19.35.3 यस्मात् कोषादुद्धराम वेदं तस्मिन्नन्त रव दध्म एनम्। कृतमिष्टं ब्रह्मणो वीर्येण तेनमा देवास्तपसावतेह।। 3।।

卐19.35.4 वैश्वानरो अजीजनदग्निर्नव्यां सुमतिः। क्ष्मया वृधान ओजसा।। 4।।

卐19.35.5 स नः पावक दीदिह्यग्ने वैश्वानरद्युमत्। जमदग्निभिराहुतः।। 5।।

卐19.35.6 दिवि पृष्टो ऽरोचताग्नि वैश्वानरो बृहन्। ज्योतिषा बाधते तमः।। 6।।

卐19.35.7 हरिणस्य पतत्रिण श्शीर्ष्णो भेषजमा भृतम्। तल्लोक वद्यल्लोकवत् तदस्तु क्षेत्रिय नाशनम्।। 7।।

卐19.35.8 अन्नपो ऽस्त्वन्नपति रन्नं मंस्थ वृषा यो वाः। कीनाशां अन्व मंसतं अनुगावोर्ण मंसत।। 8।।

卐19.35.9 नमोऽस्त्वाया विभ्यो निविभ्यो हृदयाय च। नमः क्षेत्रस्य पतये नमः क्षेत्रस्य पत्यै।। 9।।

卐19.35.10 तत्ते हृदयं शोचयामि हस्तेनाभि मरीमृशत्। केशिन् वृषण्यया तव मुष्कौ मूर्द्धा न शुष्यताम्।। 10।।

卐19.35.11 अग्निष्ट्वा तपतु सूर्यस्त्वा तपतु वातस्त्वा युङ्क्तां मरुतश्च युञ्जताम्। मृगान्मरीचीरप्येतु ते मनः।। 11।।

卐19.35.12 उत्वा हन्मि निपतनादुत्वा हन्मि नि गृहेभ्यः। मा स्पृक्षथा निशदनाय साधव उत्तिष्ठ प्रेहि सभाम्।। 12।।

卐19.35.13 उत्तद् अस्मि दावत्यथो उल्वावतीं कुरु। पत्ये स्वशुराय च।। 13।।

卐19.35.14 विबर्हो हराशयो रसं ज्ञानमति भृज्जः। साकमृष्टा वि नाशय।। 14।।

卐19.35.15 साकं वातस्य ध्राज्या साकं सूर्यस्य रश्मिभिः। साकं सूर्येणोद्यता सपत्नीं नाशयामसि।। 15।। 19 - 36

卐19.36.1 दीर्घजिह्वा बृहद्वाचो याभिरिन्द्राणि वामासि। गावो घृतस्य मातरो दिवि भेषजमक्रत।। 1।।

卐19.36.2 अर्जुनी नामपचितां कृष्णा मातेति शुश्रोव। मुनेर्देवस्य मूलेन सर्वाश्छिन्दामि ता अहम्।। 2।।

卐19.36.3 छिन्दाम्यासां प्रथमां छिन्दाम्युत मध्यमाम्। उतो जघन्यामासामा छिन्दामि स्तुकामिव।। 3।।

卐19.36.4 अपेहि मनसस्पते किमशस्तानि शंसति। परेहि न त्वा कामये वृक्षान्वनानि सञ्चरः।। 4।।

卐19.36.5 अवश्वसा निश्श्वसा यत्पराश सोपारिमः यज्जाग्रतो यत्स्वपन्तः। अग्निर्विश्वान्यप दुस्कृता न्यजुष्टान्यारे अस्मद्दधातु।। 5।।

Sri Ganapathy Sachchidananda Avadhoota Datta Peetham • Mysore •

卐19.36.6 यदिन्द्र ब्रह्मणस्पते उत मृषा चरामसि। प्रचेता न आङ्गिरसो द्विषतस्पातु तेभ्यः।। 6।।

卐19.36.7 एहमामुत्तरं कृधि सहस्व पृतनायतः। व्यस्मत्कृत्या व्यस्म च्छपथाङ् अज।। 7।।

卐19.36.8 यो नो ऽधिरुषान्मनसा यश्च पापेन नोभ्यमात्। आकूतिं तस्य देवा हृदश्चित्तानि वृश्चन्ताम्।। 8।।

卐19.36.9 अश्व इव धृतियोग प्रति हायामहे धस। कृत्वानं ब्रह्मणस्पते दंष्ट्राभ्या मभिसञ्जहि।। 9।।

卐19.36.10 योऽन्याधि प्रजायथा मूर्ध्नोऽध्युद वर्धथाः। त्वं सपत्न चातनो भ्रातृव्याङ् अव धूनुष्व।। 10।।

卐19.36.11 बहुरयं सङ्गुरुष्टे न्यक्तो भूम्यामधि। तेनाह मास्यं कृत्स्यामि यथा त्वा मा गमिष्यति।। 11।।

卐19.36.12 स्थामागं बृहदक्षत्रं स्थामन्ताक्षिणो व्यस्यति। अनुष्ठानस्य यो राजा स उत्थाम गमिष्यति।। 12।।

卐19.36.13 अगमद्राजा सदनमगमत्सूर्यो दिवम्। उदयन् वृत्रहन् प्लीहाङ्गराजो अवीरहा।। 13।।

卐19.36.14 यथा पन्थां कवापथो अप्येति महापथम्। एवा त्वं प्लिहीन्नप्लीहि यतो नस्यध्वागतः।। 14।।

卐19.36.15 इन्द्रेण दत्तं बलमासुराभ्यां शितङ्गै तच्छाल्वतायै च तुभ्यम्। तौ नुदेथा कण्वा अशिवा अजुष्टा अधा गृहाणां गृहपास्तमेषाम्।। 15।।

卐19.36.16 त्वमग्ने गृहपतिर्गृहाणां त्वं प्रजानां जनिता सुजातः। त्वं नुदस्व कण्वाऽशिवा अजुष्टा स्सदान्वा निदधस्येता पापीः।। 16।।

卐19.36.17 चर्माभ्यः क्रूरमान् हि हरिणस्य भयं कृधि। मृगाङ् अनु प्र पातय मरीचीरनु नाशय।। 17।।

卐19.36.18 यद्यस्यप्सरावी यदि त्वा रक्षो अग्रभीत्। तस्मा अपप्लुवं हविर्मनसा जुहोमि ते।। 18।
इति त्र्यृचो (ऊनविंशः) काण्डे नवमोऽनुवाकः 19 - 37

卐19.37.1 अभि त्वा शतपाशया अथो सहस्रपाशया। दासो मत्स्यमिवतीदेन मयि वध्नामि ते मनः।। 1।।

卐19.37.2 आ हि ते दक्षिणं पदं हृदय्यं ददे। उपस्थे पदमोपि नि त्वामकृच्छ्रे ऽवसे।। 2।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐19.37.3 परि त्वा गामिवासरं मम पत्तो निपातवे। तं मारुतं ह वैरुधमाव तं करणं कृतम्।। 3।।

卐19.37.4 आ नयामि ते मनो अश्वमिवा श्वाभिधान्या। उप ते मुञ्चे मनꣳ पदोरुपानहौ यथा।। 4।।

卐19.37.5 यथा सुरा यथा मधु यथाक्षा अधि देवने। यथा ह गव्यतो मन एवा मामभि ते मनः।। 5।।

卐19.37.6 एवा कृणुष्व मा प्रियामन्तꣳ कृणुष्व मां हृदि। यथा नान्यापचेतया नान्यासं कीर्त्तयाश्चन।। 6।।

卐19.37.7 यस्येदं वैष्टपं हविर्भगस्य हस्तयोर्हितम्। तेना त्वाभि मृणामसिमृशे सौभाग्याय स्वस्तये।। 7।।

卐19.37.8 भगमेमां स्तं वष्यारो मा पश्चान्मा पुरो दघः। अधा भगस्य यो भगस्तेनमां संसृजा भग।। 8।।

卐19.37.9 भगेन त्वा सं सृजामि मासरेण सुरामिव। अथाससि प्रियꣳ पतिर्देवृग्भ्य स्सुभगोऽससि।। 9।।

卐19.37.10 उदितो दैव्यं वच ईषुमिव तृन्य इष्यते। तेनासपत्नान्मामकान् सासहानि जहानि च।। 10।।

卐19.37.11 अग्निर्मा पातु वसुभिꣳ पुरस्ता त्सवितादित्यैरभि पातु दक्षिणात्। इन्द्रो मरुद्भिरभिपातु पश्चाद्विश्वे देवा अभिरक्षन्तु नोत्तरात्।। 11।।

卐19.37.12 देव राक्षसान्मा पाहि मनुष्यराक्षसान्मा पाहि। विश्वस्मान्मा रक्षसꣳ पाहि।। 12।।

卐19.37.13 असौ यस्त्रि ककुद्भिर्ऋ शिश्वङ्गाभ्या मभि तिष्ठति। न सं पतत्रमुद्यगं बलासमिव तिष्ठतु।। 13।।

卐19.37.14 दिव्यस्सुपर्णो आ पतदयं दंष्ट्रो अयोमुखः। स सं पतत्रमुद्यग मितो यक्ष्मं पराभवत्।। 14।।

卐19.37.15 साकं वलास प्र पत चाषेण किकिदीविना। साकं वातस्य ध्राज्या सह नश्य निहाकया।। 15।। 19 - 38

卐19.38.1 माभिगाय श्शबलेयं श्रोणीयं साधुवाहनम्। नमस्ते भद्रया कृण्मोऽविहृता चक्षुषा त्वं शमका शमयाति त्वा।। 1।।

卐19.38.2 तृङ्ख विक्षिणीहि पयस॰ कुर्वाणि गा त्वम्। जारेण पत्या जक्षति गृहान् गोपाय मानिका शमका शमयाति त्वा।। 2।।

卐19.38.3 आङ्क्षाभ्यङ्क्षाभ्यङ्क्षा शपनं गमः। अथो पितृभ्यो गा गच्छ विज्ञानेन भगेन च शमका शमयाति त्वा।। 3।।

卐19.38.4 अपेहि मनसस्पापा पक्राम परश्चर। परो निरृत्या आ चक्षुर्बहुत्रा जीवतो मनः।। 4।।

卐19.38.5 भद्रं वै वरं वृणते भद्रं युञ्जति दक्षिणम्। भद्रं वैवश्वते चक्षुर्बहुत्रा जीवतो मनः।। 5।।

卐19.38.6 यन्मे छिद्रं मनसो यच्च वाच स्सरस्वतीं मन्युचित्तं जगाम। विश्वैस्तद्देवै स्सह सम्विदान स्सन्दधातु बृहस्पतिः।। 6।।

卐19.38.7 स्फिरा स्फिरतरं स्फिरा आत्तारः। शतहस्त समाहर सहस्र हस्त सं कीर। इहैवा किर सं किरे हैवस्फातिमा स्फिरम्।। 7।।

卐19.38.8 स्फिरेयमस्त्वोषधिस् समुद्रस्येव संस्रवः। उत्तरा आगमं नुपोत्तरा न आगमम्।। 8।।

卐19.38.9 इमा या॰ पञ्च प्रदिशो मानवी॰ पञ्च कृष्टयः। वृष्टेशापं नदी रिवेह स्फातिं समावहान्।। 9।।

卐19.38.10 वि मयुखा आ यच्छन्तु गर्दभा इव तूर्यजाः। मुह्यन्तु सर्वे तन्तवो व्रतानाडी वि तन्तिके।। 10।।

卐19.38.11 प्रवामीष्वे प्रपतां प्र ययन्तु प्र निवेष्टनम्। मुह्यन्तु सर्वे तन्तवोऽन्धे वितत वाक्ष्यौ।। 11।।

卐19.38.12 आयवनी निवेष्टनं व्रतात सरमीष्वे। मुह्यन्तु सर्वे तन्तवोऽन्धे वितत वाक्ष्यौ।। 12।।

卐19.38.13 मयारकारी प्रथमोर्णवा भिरथो शका। देवानां पत्नी॰ कृत्तिका इमं तन्तुममोमुहन्।। 13।।

卐19.38.14 अग्निर्न एतु प्रथम॰ पुरएता बृहस्पतिः। अधा भग प्र णो यच्छ त्वं हि धनदा असि।। 14।।

卐19.38.15 प्र णश्शूद्र उतार्य॰ प्र णो राजोत वृत्रहा। अथो यत्सर्व मात्वन्वत्र णो यच्छतु दक्षिणाम्।। 15।।

卐19.38.16 कविर्यज्ञस्य वि तनोषि पन्थामृतस्य पृष्ठे अधिदीध्यानः। येन हव्यं वहसि देवदूत इत॰ प्रचेता ममुतो वनीयान्।। 16।।

卐19.38.17 मधुहस्तो मधुजिह्वो मधुपर्णो मधुव्रतः। अथो मधु प्रशामनो भगो मा वर्चसावतु।। 17।। 19 - 39

卐19.39.1 या त्रिसप्ताः पुनरेति नाना रूपाणि बिभ्रतीः। वाचस्पतिर्बला तस्या आरेहेति दधातु मत्।। 1।।

卐19.39.2 वाचा नुत्ता कृत्यादीन्द्रवती जाग्रता स्वपती कृता। या नुत्ता पाकस्य शंसेन प्रत्यक्कर्त्तारमृच्छतु।। 2।।

卐19.39.3 यदेतद्भुरि स्पर्द्धसे कृत्या स्माति मन्यसे। प्रतीचीना परेत्य विषादिव विषमन्धतः।। 3।।

卐19.39.4 परेणैत्वघशंसो नैनेन समरामहै। द्यौश्चास्मान् पृथिवी चोभे पातामं हसः।। 4।।

卐19.39.5 यवयास्मद् द्वेषांसि यवमयेन हविषा। दुर्हार्दे चकृषे कृत्यां ग्रीवासु प्रति मुञ्चता।। 5।।

卐19.39.6 अन्या वो अन्यामव त्वन्यान्यस्या उपावत। अश्व यवः प्रव्रजन्तीः कृत्यां हतौषधयो ऽरातिं हतौषधयः।। 6।।

卐19.39.7 मेहोप गा मपरस्या पथानि दुर्गाण्यवेहि। सपत्नीं नस्यतादितो दूरं गच्छात्योकसः।। 7।।

卐19.39.8 यस्यास्ते नाम गृह्णामि यस्मिन्द्धारमसेचने। आपरस्याः परावतस्सपत्नीं नाशयामसि।। 8।।

卐19.39.9 त्रिंशतं त्रिंश्च पर्वतां चतुरश्चगिरीनति। सपत्नीं ब्रह्मणस्पते परो भ्रूणान्यर्पय।। 9।।

卐19.39.10 उन्मादयतः मरुतस्समुद्रा उद् द्यावापृथिवी उभे। उत्त्वा समुद्रषतृद् उत्वामग्निरयं दुहात्।। 10।।

卐19.39.11 यत्सपत्न्य सपत्न्या अमुष्या वर्च आददे। अधस्ता दुपवादिन्य सौम्यादह मुत्तरात्।। 11।।

卐19.39.12 आ ते बध्नाम्योषधिं सपत्नेभ्यः प्रचातनीम्। यथा ते ऽसदुदम्पतिः पुत्राणां ते भवत् पिता।। 12।।

卐19.39.13 यान्नृणान्यनुवर्त्तादस्मि यमस्य येन बलिना चरामि। इदन्तदग्ने अनृणो भवा मीदं तदग्ने अवदानमस्तु।। 13।।

卐19.39.14 यास्ते सप्त प्रवतो या उ तिस्रो यास्ते सन्तु निवतो या अभिवतः। अर्वावतो अष्टधा त्रीणि रोचनास्तास्ते अग्ने संमनसो भवन्तु। जानं यमाय निवहा कुसीदम्।। 14।।

卐19.39.15 यास्त उर्ध्वास्तन्वो जातवेदो यास्तीरश्चिरुत या अनुचीः। अभिष्टमग्ने सयुजस्स्तृणानो जानं यमाय निवहा कुसीदम्।। 15।। 19 - 40

卐19.40.1 नाशय पलितं शीर्ष्णो यꣳ कृष्णास्तन्व आभरः। तमोषधे त्वं वर्धय केशं कृष्णतरङ्कृधि।। 1।।

卐19.40.2 यथाञ्जनं यथासित यथा त्रैककुदं तथा। तत्सं भवा तत्संभरते व्युच्छन्ती रनुषसः।। 2।।

卐19.40.3 यत्रासि यत्र तिष्ठति यतोनस्यत्वासिनम्। दिव्यस्सुपर्णोऽब्रवीदेतत्पलित भेषजम्।। 3।।

卐19.40.4 दिवो नु मां बृहतो अन्तरिक्षादपां स्तोको अभ्यपप्तद्रसाय। समिन्द्रियेण पयसाहमग्नि रुषीणां यज्ञैस्सुकृतां कृतेन।। 4।।

卐19.40.5 यदि वृक्षादभ्यपप्तत्फलं तदभ्यन्तरिक्षात्तदुवायुरेव। यत्रास्पृक्षत् तन्वो यत्र वाससो न तत्प्राप्नोति निरृर्तिं परस्तात्।। 5।।

卐19.40.6 अभ्यञ्जनं सुरभ्याधि वासश्चन्द्रं हिरण्यमधि पूत्रिमं यमत्। सर्वा पवित्रा विततध्यस्मच्छतं जीवाति शरदस्तवायम्।। 6।।

卐19.40.7 यꣳ कीकसाꣳ प्रश्शृणाति तलीद्यमुपतिष्ठति। परास्तं सर्वं जायान्यं यꣳ कश्चित् ककुदि श्रितः।। 7।।

卐19.40.8 पक्षी जायान्यꣳ पतति य आ विशति पौरुषम्। तस्याहं वेद ते नाम यतो जायान्य जायसे।। 8।।

卐19.40.9 कथं ह तत्र त्वं हन्या यत्कुर्यान् महद्धविः। य आस्यं प्रविशति करोत्युदरं महत्।। 9।।

卐19.40.10 यक्ष्मो योऽत्र जायते तञ्जायान्य मनीनशम्। आरोहान् मे मुखं जातमारोहाज्जघनं मम।। 10।।

卐19.40.11 आरोहात् सर्वा जातास्मि ऋषभस्य पयो धनात्। स्वादीयसी सुराया लवणाच्चारुमुत्तरात्। गोभ्यो वनीयसी दहम्।। 11।।

卐19.40.12 यान्त्वा वातो ऽवारयदा रुद्रनाभा महर्षयः। तस्यास्ते देवि पृथिव्याहं सं वननन्दद आ ते सौष्कास्यन्ददे।। 12।।

卐19.40.13 युक्तौ मनसा सञ्च रेतसा देवेभ्यो हव्यं कृणवाम साधु। येषां भागस्तु इदञ्जुषन्ता मविक्षुद्धा दयार्य भद्रया।। 13।।

卐19.40.14 येन देवा ज्योतिषाद्यामुपायन् येनादित्याः वसवो येन रुद्राः। येनाङ्गिरस स्स्वरारुरुहु स्तेनोदयद् यजमान स्स्वस्ति।। 14।।

卐19.40.15 यं पपाचादितिः पुत्रकामा येन प्रजाः कश्यपः पर्यगृह्णात्। य ओदनः पच्यते वैश्वदेव स्स नो य मे ऽक्षतो भागोऽस्तु।। 15। इति त्यृच (ऊनविंशः)काण्डे दशमोऽनुवाकः 19 - 41

卐19.41.1 सोमस्य प्राणः पवते पुरस्ताद्दक्षिणत इन्द्र आ वातु वातः। यस्यादिशो मारुतो याः प्रतीचीस्स नो देवाश्शिवोऽस्तु हि वातः।। 1।।

卐19.41.2 मित्रस्य प्राणः पवते य उत्तराद् बृहस्पतेरूर्जं उद्वातु वातः। योऽन्तरिक्षमनुवाति विद्वान् स नो देवा श्शिवो ऽस्त्विह वातः।। 2।।

卐19.41.3 य उत्तरात्पवते यः पुरस्ताद् यो दक्षिणात्पवते यश्च पश्चात्। उर्ध्वाङ् उद्देशाङ् अनु यः प्रवाति स नो देवा श्शिवोऽस्त्विह वातः।। 3।।

卐19.41.4 त्रीण्यन्तरिक्षाण्यनु वहसि वात तिस्रो वहसि परावतः। सहस्राक्षौ वृत्रहा पाह्यर्वाङ् नुदन्क्षेत्रियं रपः।। 4।।

卐19.41.5 न तत्र दारः कृपणं ससार न प्रतिघ्नाना रुदती न बिभ्रती। इन्द्रो नो यक्रो ?रुकृर्विचक्षण स्स नोज्जातं महति नि यच्छात्।। 5।।

卐19.41.6 इन्द्रस्सेनां मोहयतु मरुतो घ्नन्त्वोजसा। अग्नेर्वातस्य ध्राज्या तान्विषूचो वि नाशय।। 6।।

卐19.41.7 न द्यौरेषां न पृथिवी नादीति निधनं जयात्। चक्षूंष्यग्नि राधत्तां पुनर्यन्तु पराजिताः।। 7।।

卐19.41.8 अमित्राणां दारय ग्राममिन्द्र यो न श्शत्रुरभ्येति जिघांसन्। यथैषामिन्द्र नुत्ताना मग्निना वेषो अनुवर्त्तयानि मे।। 8।।

卐19.41.9 जिह्वां युगं कृण्वतामिन्द्रनुत्ताः पराचीनैः पथिभिर्यन्तु रिष्यन्तः। अमित्राञ्जयन्तो अन्वासदे माग्निना वेषो अनुवर्त्तयन्तः।। 9।।

卐19.41.10 अमित्राणां ग्राममुपयुक्तमिन्द्रेण नक्तं विरदात्यग्निः। सत्वानस्सन्त्वनुमाद्या इमे येभ्यश्चरामि हविषा घृतेन।। 10।।

卐19.41.11 अर्यमाणं हि देवं भद्रं कन्या अयक्षत। स एनां वृत्रहा देव इतो मुञ्चन्तु मामुतः।। 11।।

卐19.41.12 इयन्ते राजन्वरुण जामिका कृणुते हविः। तस्यै पति न्न्या वह सुभद्रं पतिकाम्यम्।। 12।।

卐19.41.13 आ क्रन्दय धनपते वरमामनसं कृणु। सर्वं प्रदक्षिणङ्कृधि पतिमस्यै पतिकाम्यम्।। 13।।

卐19.41.14 आपश्चादापुरस्तादोत्तरादधरादुत। पूर्णा भगस्य वर्त्तनि स्तेनेमामभि वर्त्तयामसि वर्चसा च भगेन च।। 14।।

卐19.41.15 नासृगस्ति पतङ्गस्य तर्दस्य मसकाद्वाः। न संपतत्र मुद्यगो न ग्लौरत्र भविष्यति।। 15।।

卐19.41.16 अपदस्क दपादशन् तुण्डिवघ्ना अपादशत्। अपापो चिदीतोऽदश दपेतो ग्लौर्न शिष्य त्यपि वघ्नादशिष्यति।। 16।।

卐19.41.17 यथा सूर्यश्चन्द्रमस मुद्यन्नेवावपगूहति। एवात्वमुग्र ओषध इमां ग्लाव मवगूहतादिति।। 17।। 19- 42

卐19.42.1 अपदस्क दपादशन् तुण्डिवघ्ना अपादशत्। अपापो चिदीतोऽदश दपेतो ग्लौर्न शिष्य त्यपि वघ्नाद शिष्यति।। 16।।

卐19.42.2 मा शिले मा शिलावति माते शेषश्शिलोञ्छने। यावच्छिलस्य ते शिलं तावच्छेष श्शिलं तव।। 2।।

卐19.42.3 यथा यूपाग्रा दुदकं विनिष्टं भूमिमश्नुते। एवात्वमरसे शिले विनिष्ठा भूमिमश्नुहि।। 3।।

卐19.42.4 वज्रोऽसि सपत्नहा त्वया ह वृत्रं साक्षीय। त्वामद्य वनस्पते वृक्षाणा मुदयुष्महि।। 4।।

卐19.42.5 स न इन्द्र पुरोहितो विश्वतस्पाहि रक्षसः। अभि गावो अनूषताभि द्युम्नं बृहस्पते।। 5।।

卐19.42.6 प्राण प्राणं त्रायस्वासोऽसवे मृड। निरृर्ते निरृत्या नः पाशेभ्यमुञ्च।। 6।।

卐19.42.7 हृच्छोक मस्मिन्ना दध्मो यथा शुष्याति त्वा मनु। यथास्य हृदयं शुष्यादपि छिन्नेव शंगुणी।। 7।।

卐19.42.8 प्रजापतिष्ट्वा प्रजया सं पुत्रेण सृजतु सं भगेन। जुष्टं देष्ट्री हि कामो ब्राह्मणस्य पुमांसं दधत्सवितु स्सवेन।। 8।।

卐19.42.9 प्रत्वासः प्रत्याङ्गतः कुमारः पुरुषादधिः। रुतोर्यमृत्वियावती यन्ते धाता अचीक्लृपत्।। 9।।

卐19.42.10 यन्ते धाता यन्ते त्वष्टा यन्ते ब्रह्माचीक्लृपत्। तं त्वं पुत्रं विन्दस्व तस्मै त्वञ्जीव जीवसे।। 10।।

卐19.42.11 ध्वस्त्रास्तिष्ठन्ति रजसा समक्ता यज्ञस्य होत्राः प्रशितास उष्णाः। तासां सौम्यस्य दिव आ वपन्ति तदमूत्रे यजमानस्य रूपम्।। 11।।

卐19.42.12 ये ब्राह्मणं वर्चो हित्वाय मल्वारेण वर्णेन परि धापयन्ति। तासां सौम्यस्य दिव आ वपन्ति तदमूत्रे यजमानस्य रूपम्।। 12।।

卐19.42.13 अ सारथिस्सम रथो यथा रथो ह त्वा संविष्टं यक्षसो याति अमून्। एवा यज्ञो यजमानं जहाति यत्र सौम्यान् सोमपीथान् नयन्ति।। 13।।

卐19.42.14 छन्दांसि तद्यजमानस्सृजन्ति तत्र सौम्यान् सोमपीथान् नयन्ति। अब्राह्मणो यत्पिबति सोमस्य तद्वै अच्छिद्रं दक्षिणायापि धेयम्।। 14।।

卐19.42.15 ब्रभ्रोऽसि वाची॰ परिपाणी॰ प्रथमा देवेभ्यस्पर्याभृताः। माते रिषन् खनिता यस्मै च त्वा खनामसि।। 15।।

卐19.42.16 मा देवा॰ पापमारान्म मा कर्तुं पापयामुया। माहन् मरिष्यजो हस्तमा रिप्सुर्धनकाम्याम्।। 16।।

卐19.42.17 मा मा देवा॰ पराजाता मा मा कर्तव्याध्वम्। माहन् मरिष्यजश्शिर आरिप्सु मो अहन्मृषी।। 17।। 19 - 43

卐19.43.1 प्रतीकं मे विचक्षणमक्ष्यौ मे मधुकाशिनि। कर्णाभ्याम्भूरि शुश्रुवे।। 1।।

卐19.43.2 जिह्वामे मधुसं स्त्रावा जिह्वा मे मधुवादिनी। तयाहमद्य जिह्वयो द्यासन् मधुमद्वचः।। 2।।

卐19.43.3 यथा मधु मधु कृत स्सं भरन्ति मधावधि। एवाहमद्य छन्दो ऽभिरुध्यासन् मधुमद्वचः।। 3।।

卐19.43.4 वायो॰ पूत॰ पवित्रेण प्रत्यङ्ङ् सोमोऽति द्रुतः। इन्द्रस्य युज्यस्सखा।। 4।।

卐19.43.5 यत्किंचेदं वरुण दैव्ये जने अभिद्रोहं मनुष्याश्चरन्ति। अचित्त्यी यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः।। 5।।

卐19.43.6 आपोऽस्मान् मातरस्सूदयन्तु घृतेन नो घृतपुव॰ पुनन्तु। विश्वं हि रिप्रं प्रवहन्तु देवीरुदिदाभ्यश्शुचिरा पूत एमि।। 6।।

卐19.43.7 मित्रश्च सम्राड् वरुणस्य राजा तौ ते भक्षं कृणुतां प्रातरग्ने। तयोरह मनुभक्षं कृणोमि सूर्यवर्चा भगभक्तो न आविशः।। 7।।

卐19.43.8 सूर्योवर्चा न आविश विश्वविन् मनसस्पतिः। अने हा सोमो जागृविरिन्द्र꠱ प्रातोऽस्तु तेनृभिः।। 8।।

卐19.43.9 इन्द्र꠱ प्रातस्तु ते वयं शक्रस्य रोचनावतः। भक्षीमहि प्रजामिषं सहस्रस्य यशस्विनः।। 9।।

卐19.43.10 अग्नि꠱ प्रातस्सवने पात्वस्मा न्वैश्वानर꠱ पथिकृद्विश्वकृष्टिः। स न꠱ पावको द्रविणे दधात्या युष्मन्त स्सह भक्षा स्स्याम।। 10।।

卐19.43.11 विश्वे देवा मरुत इन्द्रो अस्मानस्मिन् द्वितीये सवने न जह्युः। आयुष्मन्त꠱ प्रियमेषां वदन्तो वयं देवानां सह भक्षा स्स्याम।। 11।।

卐19.43.12 इदं तृतीयं सवनं कवीनामृतेन यच्चमसं समैरयन्। सौधन्वना अमृतमानशाना स्स्विष्टिं नोऽभि वस्यो नयाथ।। 12।।

卐19.43.13 सं सं स्रवन्तु नद्यस्सं वातास्सं पतत्रिणः। यज्ञमिमं वर्द्धयता गिर स्सं स्राव्येण हविषा जुहोमि।। 13।।

卐19.43.14 इमं होमाय यज्ञमवतेमं संस्रावणा उत। यज्ञमिमं वर्द्धयता गिर स्सं स्राव्येण हविषा जुहोमि।। 14।।

卐19.43.15 रूपंरूपं वयोवय स्सं रभ्यैनं परिष्वजे।। 15।।

卐19.43.16 यज्ञमिमं चतस्र꠱ प्रदिशो वर्धयन्तु नद्य स्सं स्राव्येण हविषा जुहोमि।। 16।। 19 - 44

卐19.44.1 स्यूता देवेभिरमृतैर्न आगन्मुखा स्वसारमधि मेदिमस्थात्। सत्यं पूर्वं रुषयश्चाकृपाना यज्ञपतिषु प्रतिरन्त्वायुः।। 1।।

卐19.44.2 उखां स्रवन्तीमगदामगन्म त्वष्टा वायु꠱ पृथिव्यन्तरिक्षम्। यतश्चुतद्धृतमग्नौ तदस्तु न तत्प्राप्नोति निर्ऋति꠱ परस्तात्।। 2।।

卐19.44.3 अन्तरग्नावश्चुतत् स्तोकेषु नैनं सुजाते निर्ऋर्ति꠱ परस्तात्। विश्वावसोर्हविषो वावृधानो इमं यज्ञ स्सु कृतामेति लोकम्।। 3।।

卐19.44.4 श्येनोऽसि गायत्रीछन्दाऽनु त्वा रभे स्वस्ति मा सम्पारय।। 4।।

卐19.44.5 सम्राडसि त्रिष्टुप् छन्दाऽनु त्वा रभे स्वस्ति मा सम्पारय।। 5।।

卐19.44.6 स्वरोसि गयोसि जगछन्दा अनु त्वा आरभे स्वस्ति मा सं पारय।। 6।।

卐19.44.7 त्रायमाणे सर्वविदे मा परिदेहि। सर्वविद् द्विपाच्च सर्वं रक्ष चतुस्पाद् यच्च न स्स्वम्।। 7।।
卐19.44.8 सर्वविद्विश्वविदे मा परि देहि। विश्वविद्विपाच्च सर्वं रक्ष चतुस्पाद् यच्च नस्स्वम्।। 8।।
卐19.44.9 विश्ववित्कल्याणै मा परि देहि। कल्याणि द्विपाच्च सर्वं रक्ष चतुस्पाद् यच्च न स्स्वम्।। 9।।
卐19.44.10 कल्याणि त्रायमाणायै मा परि देहि। त्रायमाणे द्विपाच्च सर्वं रक्ष चतुस्पाद् यच्च न स्स्वम्।। 10।।
卐19.44.11 वि खन वि रुज वि जह्यत्रैवा ना कृतश्च न। समहमायुषा सं मयायुः।। 11।।
卐19.44.12 वि खन वि रुज वि जह्यत्रैवा ना कृतश्चन। समहं वर्चसा सम्मया वर्चः।। 12।।
卐19.44.13 वि खन वि रुज वि जह्यत्रैवा ना कृतश्च न। समहं तेजसा सम्मया तेजः।। 13।।
卐19.44.14 वि खन वि रुज वि जह्यत्रैवा ना कृतश्च न। समहं प्रजया सम्मया प्रजा।। 14।।
卐19.44.15 वि खन वि रुज वि जह्यत्रैवा ना कृतश्च न। समहं पशुभिस्सम्मया पशवः।। 15।।
卐19.44.16 दिवो रेतोऽसि पृथिव्या नभ्यम्। नभ्यमसि नभ्यम्मा कृणु।। 16।।
卐19.44.17 दिवो रेतोऽसि पृथिव्यां शक्तिः। शक्तिरसि शक्तये ते विधेयम्।। 17।।
卐19.44.18 दिवो रेतोऽसि पृथिव्याः वित्तिः। वित्तिरसि वित्तये ते विधेयम्।। 18।।
卐19.44.19 दिवो रेतोऽसि पृथिव्याᳲ पुष्टिः। पुष्टिरसि पुष्ट्यै ते विधेयम्।। 19।।
卐19.44.20 दिवो रेतोऽसि पृथिव्याः भूतिः। भूतिरसि भूतये ते विधेयम्। भूतिरसि भूत्या सम्भूयासम्।। 20।।
卐19.44.21 शुक्रोऽसि भ्राजोऽसि। स यथा त्वं भ्राजतो भ्राजोऽस्येवाहं भ्राजतो भ्राज्यासम्।। 21।।
卐19.44.22 सायंसायं गृहपतिर्नो अग्निᳲ प्रातᳲप्रातᳲ सौमनस्य दाता। वसोर्वसोर्वसुदान एधि वयं त्वेन्धाना स्तन्वं पुषेम।। 22।।
卐19.44.23 प्रातः प्रातर्गृहपतिर्नो अग्निस्सायं सायं सौमनस्य दाता। वसोर्वसोर्वसुदान एधीन्धानास्त्वा शतं हिमा ऋधेम।। 23।।
卐19.44.24 योन आ वि शशपतिर्यश्च स्ता यद् चित्या मन्युना यत्सपत्नः। अग्निष्ट्वान्पाशान् प्रमुमोक्त देवो यावयतु शपथां वरुणो धृतव्रतः।। 24। इति त्यृच (ऊनविंशः) काण्डे एकादशोऽनुवाकः 19 - 45
卐19.45.1 प्राग्नये वाचमीरय वृषभाय क्षितीनाम्। स नᳲ पर्षदति द्विषः।। 1।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐19.45.2 यः परस्याः परावतस्तिरो विश्वाभि रोचते। स नः पर्षदति द्विषः।। 2।।

卐19.45.3 यो रक्षांसि निजूर्वत्यग्निश्शुक्रेण शोचिषा। स नः पर्षदति द्विषः।। 3।।

卐19.45.4 यो विश्वाभि विपश्यति भुवना सञ्च पश्यति। स नः पर्षदति द्विषः।। 4।।

卐19.45.5 मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्गावो भवन्तु नः।। 5।।

卐19.45.6 मधु नक्तं उतोषसो मधुमत् पार्थिवं रजः। माध्विर्न स्सन्त्वोषधीः।। 6।।

卐19.45.7 मधुमान्नो वनस्पतिर्मधुमाङ् अस्तु सूर्यः। मधुद्यौरस्तु नः पिताः।। 7।।

卐19.45.8 आपो हि ष्ठा मयोभूवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे।। 8।।

卐19.45.9 यो व श्शिवतमो रस स्स्तस्य भाजयतेह नः। उशतीरिव मातरः।। 9।।

卐19.45.10 तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः।। 10।।

卐19.45.11 आयं गौः पृश्निरक्रमीदसदन् मातरं पुरः। पितरं च प्रयन्त्स्वः।। 11।।

卐19.45.12 अस्य प्राणादपान त्यन्तश्चरति रोचना। व्यख्यन्महिषो दिवम्।। 12।।

卐19.45.13 त्रिंशद्धाम वि राजति वाक्पतङ्गाय शिश्रियत्। प्रति वस्तो रहर्द्युभिः।। 13।।

卐19.45.14 यच्छक्रा वाचमा रुहन्नन्तरिक्षं सिषासन्तः। सन्देवा अमदन् वृषा।। 14।।

卐19.45.15 शक्रो वाचमधृष्ठा योरुवाचो अधृष्णुहि। मंहिष्ठ आमहर्दिवि।। 15।।

卐19.45.16 शक्रो वाचम धृष्णुहि धाम धर्मन् वि राजति। विमदन् वर्हिरासरन्।। 16।। 19 - 46

卐19.46.1 ध्रुवोऽसि धरूणोऽस्तृतो विश्वकर्मणा सुधृतः। मा त्वा समुद्र उद्वधीन्मा सुपर्णो ऽव्यथमान इमन्दृंह।। 1।।

卐19.46.2 आषाढोऽसि सहमान स्सहस्वा रातिं सहस्व पृतनायतः। सहस्र वीर्योऽसि स इमं जिन्व।। 2।।

卐19.46.3 अद्भ्य स्सं भूतोऽसि पृथिव्या रसाच्च विश्वकर्मण स्समवर्त्तताऽधि। तस्य त्वष्टा विदध देतिरूपं विद्वान्तत्ते देव माजानमग्रे।। 3।।

卐19.46.4 षष्टिश्चाध्वर्यो नवतिश्च पाशा होतारमग्नि मन्तरा विचृत्ताः। छिन्दन्ति पाशमति धीर एत्वृतस्य पन्थामनु नेषि विद्वान्।। 4।।

卐19.46.5 यो अध्वर्यु स्सप्त होत्राणि विद्वान्पूर्वो होत्री यजता विभर्ति। उर्द्ध्वं स यज्ञमध्वरं कृणोति य इञ्चकेत हविषो विभागे।। 5।।

卐19.46.6 अत्र विभक्ति र्हविषो विभागे मा निर्भाक्षीद् भागिनं मोपहत्या। समो अभागो विदत यो मुमोह।। 6।।

卐19.46.7 वाताऽऽवातु भेषजं शम्भु मयोभू नो हृदे। प्र ण आयूंषि तारिषन्।। 7।।

卐19.46.8 उत वात पितासि न उत भ्रातोत न स्सखा। स नो जीवातवे कृधि।। 8।।

卐19.46.9 यददो वात ते गृहे नि हितं भेषजङ्गुहा। तस्य नो देहि जीवसे।। 9।।

卐19.46.10 यो न जीवोऽसि न मृतो देवानाममृत गर्भोऽसि स्वप्न। वरुणानी ते माता यमः पिता।। 10।।

卐19.46.11 यथा कलां यथा शफं यथर्णं संनयन्ति। एवा ह दुष्प्यन्यं सर्वमप्रिये सन्नयामसि।। 11।।

卐19.46.12 अररुर्नामसि तं वा ष्वप्न तथा विद्म। स नष्ष्वप्न स्सुष्वप्न्यान्तान्देहि।। 12।।

卐19.46.13 नैतस्याग्रे हविरदन्तु देवा निर्भक्त एष सुकृतस्य लोके। पापीं धियं जुजुष आत्मनैष स हि दुष्कृतन्मनुष्वेष्वन्तः।। 13।।

卐19.46.14 यो मातृहा पितृहा स्वसृहा ये च दुष्कृताः। दिधिषौते अमृतक्षमलं मनुष्या इव।। 14।।

卐19.46.15 एतदेवयुतं निरृत्र्ऋतिरुषदेवा भृणघ्नाल्लोक मप्येत्वेषः। न चेतृत्वे हविषा नाथितश्च राष्ट्रमेतेशक्रा वि चृतन्ति पाशम्।। 15।। 19 - 47

卐19.47.1 य आखो यो व्युखो विणावाङ् इव सर्पति। तं परि परिभेषजं वृश्चिक जम्भनमसि।। 1।।

卐19.47.2 मयूरो अत्ति वृश्चिकं मयूरं वयं विद्मसि। तं परि परिभेषजं वृश्चिक जम्भनमसि।। 2।।

卐19.47.3 आप इद्वा उ भेषजीरापो अमीव चातनी। आपो विश्वस्य भेषजीरापो वृश्चिक जम्भनी।। 3।।

卐19.47.4 त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा। त्वं यज्ञेष्वीड्यः।। 4।।

卐19.47.5 यद्वो वयं प्रमिनाम व्रतानि विदुषां देवा अविदुष्टरासः। अग्निष्टद् विश्वादा पृणातु विद्वान् सोमस्य यो ब्राह्मणाङ् आविवेश।। 5।।

卐19.47.6 आ देवानामपि पन्था मगन्म यच्छक्नवाम तदनुप्रवोढुम्। अग्निर्विद्वान् स यजात् स इद्धोता सो अध्वरान् स ऋतून् कल्पयाति।। 6।।

卐19.47.7 उत्तदा ईशमिद्धतीं विदुर्योणा इव इविदुं पदायि। उतस्याः पातया मनस्सश्वतीभ्यस्समाभ्यः।। 7।।

卐19.47.8 पक्कं मांसमिवाश्विना शकुनिः प्रपतनां कृधि। मृगाँ अनु प्र पातय मरीचीरनु नाशय।। 8।।

卐19.47.9 विश्वञ्चौ गावा वा कुरु विश्वञ्चौ युग्या उत। उतासौ सूर्य उद्यन् विश्वञ्चौ गां व्याकरत्।। 9।।

卐19.47.10 विषमुग्रं विषं स्थिरं विषस्य महिमा महान्। विषं परश्वतश्शिर श्शतधा व्यापातयत्।। 10।।

卐19.47.11 सन्दह ब्रजं यथा वसु भावसु वर्त्तयत्। यं विषं प्र सर्पसि समग्निरिव तन्दह।। 11।।

卐19.47.12 गृहाण मांसान्यव लोमानि पातय। पांशुन् कुकाट आवपात् सिन्ध्यूत्ता न्पादमदीय।। 12।।

卐19.47.13 मधोरहं मधुतरो मधुघान्मधुमत्तरः। आसने किल मे मधु मुखेन मन्दनं कृतम्।। 13।।

卐19.47.14 मामित्त्वमभ्यचाकशो मृगस्तृष्यन्निवोदकम्। अधस्पदा न्मुद्वदामि मण्डुको गो शफादिव।। 14।।

卐19.47.15 उद्वदाम्यध स्पदान्मण्डूको गो शफादिव। अथोपचक्रा आसासैश्वावन्ध इवाहतः।। 15।। 19 - 48

卐19.48.1 आवद बहुलं गोष्ठं सुवीरं बहु पूरुषम्। यथेतो नः प्रमीयता एवामे गोष्ठ मा वद।। 1।।

卐19.48.2 आवद दुहितुस्पित्रे भ्रातुर्जामात रावद। पश्चातुत्तुढ स्फिजः किस्किन्धा नाम वीर्जहि।। 2।।

卐19.48.3 मोघमेत द्यत्कपोतः पदमग्नौ कृणोति। शिति कर्णाय कवये स्तोम्याय तस्मै यमाय नमोऽस्त्वद्य।। 3।।

卐19.48.4 ये ऐन्द्राः पाशा ये च ते वारुणा आरे अस्मत्तान्देवी निर्ऋतिर्दधातु।। 4।।

卐19.48.5 ये वैश्वानरा पाशाः ये च मारुता आरे अस्मत्तान्देवी निर्ऋति र्दधातु।। 5।।

卐19.48.6 ये वैश्वानरा पाशाः ये च वैश्वकर्मणा आरे अस्मत्तान् देवी निर्ऋतिर्दधातु।। 6।।

卐19.48.7 नारदे कितवे वरुणो सोमे ऐच्छन् महिमानं महान्तम्। अविन्दत्त्वं वैश्वकर्मण स्समुद्रे अक्षाणां क्लदमैन मस्मिन्दधामि।। 7।।

卐19.48.8 यद्वस्तयोर्यच्च चक्षुषोर्मनो यत् प्रविवेशते। स्कन्दानस्य प्रस्कन्देन क्लदेन क्लदयामि तत्।। 8।।

卐19.48.9 तिस्रो देविरप्सरस आकैका साकैका प्रेत प्रयामेत्य कस्या नाम। जुषाणा अप्सरस आज्यस्य सहसो व्यन्तु स्वाहा।। 9।।

卐19.48.10 अत्याक्षन्त्वा मनसा आत्याक्षं हृदये न त्वा। अत्याक्षं सर्वैरङ्गैस्त्वा तथा हि त्यजनं कृतम्।। 10।।

卐19.48.11 इमा याः प्रतिनन्दथ स्त्रियः पुमांसं मन्वतम्। सर्वा स्संगत्य ब्रूत त्यजने त्यजनं कृतम्।। 11।।

卐19.48.12 त्यजनं मे द्यावापृथिवी आधातां त्यजनं देव स्सविता वृहस्पतिः। अग्निश्च तुभ्यं सूर्यश्च त्यजने त्यजनं कृतम्।। 12।।

卐19.48.13 सन्दिव स्सं पृथिव्या स्सं वातात् सन्नदीभ्यः। संस्कन्दमिन्द्र आरभत् सहगात् संहरादिदम्।। 13।।

卐19.48.14 संस्कन्दमोज ओजसा देवेभिर्नाम ते हितम्। ईरण्य नाम ते संस्कन्दा स्योषधे।। 14।।

卐19.48.15 सं समुद्रो नदीभि स्सं द्यावापृथिवी उभे। सं जायापत्या योन्यां संस्कन्दास्योषधे।। 15।।

卐19.48.16 सन्ते शीर्ष्णः कपालानि सं योनिं सङ्गवीन्यो। सन्ते सर्वाण्यङ्गानि संस्कन्धेनाभि दध्मसि।। 16।।

卐19.48.17 श्रीयं धातुर्मयि धेहि श्रीया मधिपतिं कृणु। वीशामीशानो मघवा निन्द्रो मा यशसा जयत्।। 17।।

卐19.48.18 मयि त्वदिन्द्रियं बृहन्मयि दक्ष उत क्रतुः। धर्मस्तिश्चिद्धि भातु मा गायत्री छन्दसां विराड्ज्योतिषान्तस्य दोह मशीय।। 18।।

卐19.48.19 अर्का सधस्थौ कविमातरिश्वा नौ जमाङ्गिरसः। यशस्विनं मा देवा यशसः कृणुत स्वाहा।। 19। इति त्यृच (ऊनविंशः) काण्डे त्रयोदशोऽनुवाकः। । 19 - 49

卐19.49.1 इन्द्रं वयं वणिजं हवामहे सनस्त्राता पुर एतु प्रजानन्। घ्नन्नरातिं परिपन्थिनं मृगं स ईशानो धनदा अस्तु मह्यम्।। 1।।

卐19.49.2 पणो नो अस्तु प्रपणो विक्रयश्च प्रति पणो नो धनीनः कृणोतु। सं रराणा आहुतिं जुषन्तां शुनं नोऽस्तु चरितमुत्थितञ्च।। 2।।

卐19.49.3 यत्पणेन प्रतिपणं चरामि स्वेन देवा धनमिच्छमानः। इन्द्रो मे तस्मिन्नुचि मा दधातु बृहस्पति स्सविता सोम अग्निः।। 3।।

卐19.49.4 इहैवः पन्था बहवो देवयाना अनु द्यावापृथिवी सञ्चरन्ति। तेषामहं मा वर्चस्या दधामि यथा क्रीत्वा धनमावहानि।। 4।।

卐19.49.5 विध्य वाससे निरृतेर्ये च पाशा अपश्रिताः। तेभ्यः प्र मुच्यते वल्मी विष्कन्धमुपसादयम्।। 5।।

卐19.49.6 न वै तद्वासो भवति अस्मिन्विध्यन्ति पूरीषम्। अस्नास मह्यते रूपन्तस्मा त्तदपि लोप्यम्।। 6।।

卐19.49.7 उत्तिष्ठन्नु प्रियायत विद्वान्बहु भाज्यम्। न पन्थां भद्रमश्नुते न एनेन चरामहे।। 7।।

卐19.49.8 ब्रह्मणै तत्प्रतिगृह्यन् तेन तत्कृणुते शिवम्। यत् कः प्रमुच्यते पाशां स्तेन दाता वि पश्यति।। 8।।

卐19.49.9 यो व्याघ्राववरुढा ववाञ्चौ जिघत्सतः पितरं मातरञ्च। तौ दन्तौ ब्रह्मणा ब्रह्मणस्पते शिवौ कृत्वमिह जातवेदः।। 9।।

卐19.49.10 ब्रीहिमत्तं यवमत्तं माषमत्त मथो तिलम्। स वां भागो निहितो रत्नधेयं मा हिंसिष्टं पितरं मातरञ्च।। 10।।

卐19.49.11 अघोरौ सयुजा संविदानौ स्योनौ दन्तौ सुमङ्गलौ। मा हिंसिष्टं पितरं मातरञ्चान्यत्र वां तन्वो घोरमस्तु।। 11।।

卐19.49.12 ऐनान्द्यता मिन्द्राग्नि राज्ञा सोमेन मेदिना। इन्द्रो मरुत्वा नादान ममित्रेभ्यः कृणोतु मे।। 12।।

卐19.49.13 इदमादान मकरं तपसेन्द्रेण संशितम्। अमित्रायेऽत्र सन्ति मे ता नाद्या द्विषतो मम।। 13।।

卐19.49.14 आदानेन संदानेना मित्रान् सन्द्यामसि। अपाना ये चैषां प्राणा असुनासून् समछिदन्।। 14।।

卐19.49.15 प्रतूर्त्ता यमरुत्वते स्वाहा।। 15।।

卐19.49.16 जयद्वीराया भिषक्तवे स्वाहा।। 16।।

卐19.49.17 बृहस्पतये विश्वदेववते स्वाहा।। 17।। 19 - 50

卐19.50.1 प्र द्यौꣳ प्र पृथिवी प्रान्तरिक्षं सुमहत्। प्रैतास्समुद्रिया आपश्शल्य मुच्चिच्युवुः।। 1।।

卐19.50.2 प्र त्वा वातश्च्यावयतु प्र भूमि स्सह सासह। प्रैता स्समुद्रिया आप श्शल्य मुच्चिच्युवुः।। 2।।

卐19.50.3 प्र त्वा सूर्यश्च्यावयतु नक्षत्रै स्सह मेदिभिः। प्रै ता स्समुद्रिया आप श्शल्य मुच्चिच्युवुः।। 3।।

卐19.50.4 प्रौतु द्रुवो मणिर्विश्वभेषज आगमत्। सोऽस्मत् सर्वं दुष्ष्वप्न्यमप हन्तु तमश्च यत्।। 4।।

卐19.50.5 अपास्मत् सर्वं दुष्ष्वप्न्यमप पापा या च लक्ष्मीः। अधा हिरण्य वर्चसं सर्वधावा मणे कृधि।। 5।।

卐19.50.6 सर्वधावाहं भगवानिन्द्रिया वान्विषा सहिः। यो वा पौतु द्रवो मणिर्द्रविणेन स आरुहदिन्द्रियेण स आरुहत्।। 6।।

卐19.50.7 पुमानश्वो धनं वित्तिꣳ पुमान्निष्को हिरण्ययः। पुमांसं पुत्रमोषधेऽस्यै आ धेहि नार्य्यै।। 7।।

卐19.50.8 यथा नन्दाꣳ पुंसि जाता न मृगस्तेन कश्चन। एवा त्वं पुत्रमोषधेऽस्यै आ धेहि नार्य्यै।। 8।।

卐19.50.9 अश्वेन रिष्येन गवाꣳ क्रीतास्योषधे। अश्वरश्वेतो धनञ्जय तव हिरण्यं हरितं तव। दत्ता सोमेन राज्ञेह पुंसवनं भव।। 9।।

卐19.50.10 यन्मेऽनृम्णं द्रविणं ब्राह्मणं च यच्च श्रुतं यच्च रत्नं बिभर्मि। एतन्नो अत्र निधिपा नु पातु यावद्देव स्त्रीणिमज्मा व्रत्याः।। 10।।

卐19.50.11 यन्मे नृम्णं द्रविणं ब्राह्मणञ्च ये अग्नयो धृष्णियासो मयीमे। हरिश्चन्द्रो रक्षतु तन्नो अत्र यावद्वै परो ग्रामञ्चरित्वा।। 11।।

卐19.50.12 एषैष ऐमि पुरोग्रामञ्चरित्वा सोऽनृम्णं द्रविणं ब्राह्मणञ्च। यदत्रापित्वे शुचीदं तदहमा ददे।। 12।।

Sri Ganapati Sacchidananda Avadhoota Datta Peetham

卐19.50.13 सासूयो हि प्रथमं दस्युहत्याय शक्र हार्यञ्जाने मघवन् सहस्वन्। दासं वर्णं रन्धयन् आर्याय यञ्चनो बाहूपहूतं वज्रम्।। 13।।

卐19.50.14 आ रूढ ते दस्युहत्याय भूर्णि दृढान पर्वन् श्रृण्विन्द्र। तीव्रश्श्रद्धो बहुलानेमा मयज्जनो अर्पय सं वधेन।। 14।।

卐19.50.15 दर्शनचित्त पावनभिन्द्रं बहु साकं शरमिव पश्यमानः। यो नो घृष्टं मघवानं पृतन्यादभिरुतेषु कवयो व मृत्युः।। 15।। 19- 51

卐19.51.1 इदावत्सराय परिवत्सराय संवत्सराय प्रति वेदयाम एतत्। यद् व्रतेषु दुरित न्निजग्मिम दर्ह्यार्दन्तेन शमलेन आयुः।। 1।।

卐19.51.2 यन्मे व्रतं व्रतपते लुलोभाहोरात्रे समधातां म एतत्। उद्यन्पुरस्ताद् भिषगस्तु चन्द्रमास्सूर्यो रश्मिभिरेभि गृणात्वेतत्।। 2।।

卐19.51.3 यद्व्रत मधिपेदे चित्त्या मनसा हृदा। आदित्या रुद्रास्तन्मयि वसवश्च समिन्धताम्।। 3।।

卐19.51.4 व्रतानां व्रतपतये उपाकरोम्यग्नये। स मे द्युम्नं बृहद्यशो दीर्घमायुष्कृणोतु मे।। 4।।

卐19.51.5 मयो भूर्वातो ऽभिवातूस्रा ऊर्जस्वती रोषधीरा रिशन्ताम्। मेदस्वती र्जीवधन्या मयोभूव ꣳ पद्वतेऽवसाय रुद्रमृड।। 5।।

卐19.51.6 या एकरूपा विश्वरूपा स्सरूपा यासामग्नि रूधो वो जन्म वेद। या अङ्गिरस स्तपसेह चक्रुस्ताभ्य ꣳ पर्जन्य महि शर्म यच्छ।। 6।।

卐19.51.7 या देवेषु तन्व ऐरयन्त यासां सोमो रूपधेयानि वेद। या अङ्गिरसस्तपसेह चक्रुस्ताभ्य ꣳ पर्जन्य महि शर्मयच्छतु।। 7।।

卐19.51.8 ता अस्मभ्यं बहुला ꣳ पिन्वमाना ꣳ प्रजावती रिन्द्रो गोष्ठे दद्दश्याम्। प्रजापति र्मह्यमेता रराणो बह्वीस्मतीरुप मे गोष्ठ आकः।। 8।।

卐19.51.9 तासां वयं प्रजया संसदेम ज्योग्जीवन्त श्शरद ꣳ पुरुचीः। अभिष्ठिता चकृदीति पिशङ्गी बहुकर्दिनी।। 9।।

卐19.51.10 कर्दोह यज्ञे हलिक्ष्णाद् व्रीहेर्माषादथो यवात्। यथा भषद्ध लीक्ष्णस्य न संभवति कर्दने।। 10।।

卐19.51.11 एवाह लग्न कर्दय निर्ग्रामान् निविर्शो जहि। यथा परस्त्वां शर्धते गर्दभः क्रतु सन्दृशि।। 11।।
卐19.51.12 एवा ते शर्धतां भसद्धलीक्ष्ण पर्ण शर्धय वृत्रहा साचि शर्धयः। पवीर वल्लाङ्गलं सुशेवं सोमसत्सरु।। 12।।
卐19.51.13 तदुत्कृषति गामविं प्रफर्व्यञ्च पीवरीं प्रस्थावद् रथवाहनम्। शुनं वरत्रामा यच्छ शुनमष्ट्रा मुदिङ्गय। शुनं वाहस्य युक्तस्याष्ट्र्या जहि दक्षिणम्।। 13।।
卐19.51.14 मधुमत्त न्निगृहाण फालं क्षेत्रेषु सर्वदा। तत्पर्जन्यो ऽभिवर्षतु भूम्ना धान्याय कर्तवे।। 14।।
卐19.51.15 आयतादित्या रुक्षतायत वेँद्यामधि। प्राहाग्निर्हव्यं देवेभ्यो मन्त्रो होता हविष्पतिः।। 15।।
卐19.51.16 एमा अगुर्मयोभूवो मधोरूधांसि बिभ्रतीः। ता उप प्रशिक्षत दुहाना मक्षितं पयः।। 16।।
卐19.51.17 ईडास्थ मधुपृचो विश्वरूपा स्तामा विपश्यत्। सह प्राणेन तेजसा सह हरसा बलेन।। 17।। 19- 52
卐19.52.1 दिवो नभ श्शुक्रं पयो दुहानर्तस्य नाभि रमृतं वि चष्टे। घृतं दुहाना विश्वतः प्रपीणामूर्ज न्दुहाना मनप स्फुरन्तीम्।। 1।।
卐19.52.2 उपासतां सुकृत स्स्वधाभिः। घृतमुत्सं पिन्वमाना मिमां योनिमपाध्वम्। स्वधायाश्चकृषे जीवन् तास्ते सन्तु मधुश्चुतः।। 2।।
卐19.52.3 सं रसा ओषधीनां समाकूतिर्नयन्तु मे। ऊर्जस्वन्तं पयस्वन्तं पृथिव्या हस्तमन्वागात्।। 3।।
卐19.52.4 परिणी तिरसि हस्तस्य पथः परिणी तिरसि। एवा ह दुष्ष्वप्न्यं सर्वं स्तम्भे परिणयामसि।। 4।।
卐19.52.5 पयस्वन्मे क्षेत्रमस्तु पयस्वदुत धान्यम्। कृषिः पयस्वतीवाहं पयस्वान् भूयासम्।। 5।।
卐19.52.6 वृष्णे बृहते स्वर्विदे अग्नये शुक्लं हराम स्त्विषीमते। स नस्थिरान्बलवतः कृणोतु योक्क नो जीवातवे दधातु।। 6।।
卐19.52.7 वेद वै तेऽग्ने नामाभि र्नामासि त्रिवरूथम्। त्रयः पोषास्त्रिव रुदस्मान् यज्ञ स्सचन्ताम्।। 7।।

卐19.52.8 प्रजापतेꣳ पयसा वावृधानावायुष्मन्तो वर्चस्विनः। ज्योग्जीवन्ती मुप स त्वा सदेम।। 8।।

卐19.52.9 उरूणसा वसुतृपा वुदुम्बलौ यमस्य दूतौ चरतौ जनाँ अनु। वेदाहं वेद सूर्यꣳ किमेतौ किं करिष्यथः।। 9।।

卐19.52.10 समाधि दम्भादधी यां न पाकोऽस्मि जनुषा न सुषाट्। अभिषाडस्मि विश्वाषाट् पृतनाषाट् स्वर्विद्य दिवं विश्वं भुवनं सोऽस्मि।। 10।।

卐19.52.11 अस्थादुदस्था दजनिष्ट विप्रो वि मिमीते वरिमाणं पृथिव्याः। आसी दत्सम्राड् भुवनानि विश्वषा डिष्टाद्वेद वरुणस्य व्रतानि।। 11।।

卐19.52.12 प्रजापतिꣳ प्रजावान् स मां प्रजावान्प्रजावन्तं कृणोतु।। 12

卐19.52.13 सूर्यो वर्चस्वान् स मां वर्चस्वान्वर्चस्वन्तं कृणोतु।। 13।।

卐19.52.14 सोमꣳ पयस्वान् स मां पयस्वा न्पयस्वन्तं कृणोतु।। 14।।

卐19.52.15 त्रिंशन्मुष्काꣳ कववस्य दश मुष्कावुलुक्याः। चत्वारस्तव कर्दमाः।। 15।।

卐19.52.16 तांस्त्वमुदग्र काशिनि मूलेन अपि कृन्ततात्। आसुरोऽसि जन्मनस्तं त्वेतो नाशयामसि।। 16।।

卐19.52.17 इन्द्रजा असि सोमजा स्तं त्वेतो निष्प्रहिण्मसि। उर्वामत्सो मधूलकं तस्य पात्सत्य यमना स्त्राव मरोगणम्।। 17।। 19 - 53

卐19.53.1 इषिराचास्य जिराचासि। प्रजापते स्समिदसि संसितिर्नाम लोमशा। प्रजापतिष्ट्वा य प्रतिष्ठा कामो ऋ ऋतस्य प्रत्यतिष्ठत्। स यथा त्वया प्रजापतिꣳ प्रतिष्ठाकामꣳ प्रत्यतिष्ठदेवाहं त्वया प्रतिष्ठा कामꣳ प्रतितिष्ठेषम्। आ मा वरो गमेदा मा ब्रह्मचारिणो गमेयु स्स्वाहा।। 1।।

卐19.53.2 भूतिश्चासि प्रतिष्ठा चासि। प्रजापते स्समिदसि संसितिर्नाम लोमशा। प्रजापतिष्ट्वा य प्रतिष्ठा कामो ऋ ऋतस्य प्रत्यतिष्ठत्। स यथा त्वया प्रजापतिꣳ प्रतिष्ठाकामꣳ प्रत्यतिष्ठदेवाहं त्वया प्रतिष्ठा कामꣳ प्रतितिष्ठेषम्। आ मा वरो गमेदा मा ब्रह्मचारिणो गमेयु स्स्वाहा।। 2।।

卐19.53.3 अस्वप्ना चास्य निद्रया चासि। प्रजापते स्समिदसि संसितिर्नाम लोमशा। प्रजापतिष्ट्वा य प्रतिष्ठा कामो ऋ ऋतस्य प्रत्यतिष्ठत्। स यथा त्वया प्रजापतिꣳ प्रतिष्ठाकामꣳ प्रत्यतिष्ठदेवाहं त्वया प्रतिष्ठा कामꣳ प्रतितिष्ठेषम्। आ मा वरो गमेदा मा ब्रह्मचारिणो गमेयु स्स्वाहा।। 3।।

卐19.53.4 रुचिश्चास्य यक्षश्चासि। प्रजापते स्समिदसि संसितिर्नाम लोमशा। प्रजापतिष्ट्वा य प्रतिष्ठा कामो ऋ ऋतस्य प्रत्यतिष्ठत्। स यथा त्वया प्रजापतिः प्रतिष्ठाकामः प्रत्यतिष्ठदेवाहं त्वया प्रतिष्ठा कामः प्रतितिष्ठेषम्। आ मा वरो गमेदा मा ब्रह्मचारिणो गमेयु स्स्वाहा।। 4।।

卐19.53.5 कीर्तिश्चासि यशश्चासि। प्रजापते स्समिदसि संसितिर्नाम लोमशा। प्रजापतिष्ट्वा य प्रतिष्ठा कामो ऋ ऋतस्य प्रत्यतिष्ठत्। स यथा त्वया प्रजापतिः प्रतिष्ठाकामः प्रत्यतिष्ठदेवाहं त्वया प्रतिष्ठा कामः प्रतितिष्ठेषम्। आ मा वरो गमेदा मा ब्रह्मचारिणो गमेयु स्स्वाहा।। 5।।

卐19.53.6 अम्भश्चासि महश्चासि। प्रजापते स्समिदसि संसितिर्नाम लोमशा। प्रजापतिष्ट्वा य प्रतिष्ठा कामो ऋ ऋतस्य प्रत्यतिष्ठत्। स यथा त्वया प्रजापतिः प्रतिष्ठाकामः प्रत्यतिष्ठदेवाहं त्वया प्रतिष्ठा कामः प्रतितिष्ठेषम्। आ मा वरो गमेदा मा ब्रह्मचारिणो गमेयु स्स्वाहा।। 6।।

卐19.53.7 अन्नं चास्यन्नाद्यश्चासि। प्रजापते स्समिदसि संसितिर्नाम लोमशा। प्रजापतिष्ट्वा य प्रतिष्ठा कामो ऋ ऋतस्य प्रत्यतिष्ठत्। स यथा त्वया प्रजापतिः प्रतिष्ठाकामः प्रत्यतिष्ठदेवाहं त्वया प्रतिष्ठा कामः प्रतितिष्ठेषम्। आ मा वरो गमेदा मा ब्रह्मचारिणो गमेयु स्स्वाहा। 7।।

卐19.53.8 प्रयच्छन्ती चासि प्रवदन्ती चासि। प्रजापते स्समिद स्यूपोलपा नाम लोमशा। प्रजापतिष्ट्वा य प्रतिष्ठा कामो ऋ ऋतस्य प्रत्यतिष्ठत्। स यथा त्वया प्रजापतिः प्रतिष्ठाकामः प्रत्यतिष्ठदेवा हन्त्वया प्रतिष्ठा कामः प्रतितिष्ठेषम्। आ मा वरो गमेदा मा ब्रह्मचारिणो गमेयु स्स्वाहा।। 8।।

卐19.53.9 अनुकामा चासि कामदुघा चासि। प्रजापते स्समिदस्यूपोलपा नाम लोमशा। प्रजापतिष्ट्वा य प्रतिष्ठा कामो ऋ ऋतस्य प्रत्यतिष्ठत्। स यथा त्वया प्रजापतिः प्रतिष्ठाकामः प्रत्यतिष्ठदेवा हन्त्वया प्रतिष्ठा कामः प्रतितिष्ठेषम्। आ मा वरो गमेदा मा ब्रह्मचारिणो गमेयु स्स्वाहा।। 9।।

卐19.53.10 आ हरन्ती चासि समा हरन्ती चासि। प्रजापते स्समिद स्यूपोलपा नाम लोमशा। प्रजापतिष्ट्वा य प्रतिष्ठा कामो ऋ ऋतस्य प्रत्यतिष्ठत्। स यथा त्वया प्रजापतिः प्रतिष्ठाकामः प्रत्यतिष्ठदेवाहं त्वया प्रतिष्ठा कामः प्रतितिष्ठेषम्। आ मा वरो गमेदा मा ब्रह्मचारिणो गमेयु स्स्वाहा।। 10।।

卐19.53.11 दिशन्ती यासि प्रदिशन्ती चासि। प्रजापते स्समिद स्यूपोलपा नाम लोमशा। प्रजापतिष्ट्वा य प्रतिष्ठा कामो ऋ ऋतस्य प्रत्यतिष्ठत्। स यथा त्वया प्रजापतिः प्रतिष्ठाकामः प्रत्यतिष्ठदेवाहं त्वया प्रतिष्ठा कामः प्रतितिष्ठेषम्। आ मा वरो गमेदा मा ब्रह्मचारिणो गमेयु स्स्वाहा।। 11।।

卐19.53.12 अनुमति चास्यनु मन्यमाना चासि। प्रजापते स्समिद स्यूपोलपा नाम लोमशा। प्रजापतिष्ट्वा य प्रतिष्ठा कामो ऋ ऋतस्य प्रत्यतिष्ठत्। स यथा त्वया प्रजापतिः प्रतिष्ठाकामः प्रत्यतिष्ठदेवाहं त्वया प्रतिष्ठा कामः प्रतितिष्ठेषम्। आ मा वरो गमेदा मा ब्रह्मचारिणो गमेयु स्स्वाहा।। 12।।

卐19.53.13 जितिश्चासि विजिताश्चासि। प्रजापते स्समिद स्यूपोलपा नाम लोमशा। प्रजापतिष्ट्वा य प्रतिष्ठा कामो ऋ ऋतस्य प्रत्यतिष्ठत्। स यथा त्वया प्रजापतिः प्रतिष्ठाकामः प्रत्यतिष्ठदेवाहं त्वया प्रतिष्ठा कामः प्रतितिष्ठेषम्। आ मा वरो गमेदा मा ब्रह्मचारिणो गमेयु स्स्वाहा।। 13।।

卐19.53.14 सञ्जिति श्चासि सन्दनाजितं चासि। प्रजापते स्समिद स्यूपोलपा नाम लोमशा। प्रजापतिष्ट्वा य प्रतिष्ठा कामो ऋ ऋतस्य प्रत्यतिष्ठत्। स यथा त्वया प्रजापतिः प्रतिष्ठाकामः प्रत्यतिष्ठदेवाहन्त्वया प्रतिष्ठा कामःप्रतितिष्ठेषम्। आ मा वरो गमेदा मा ब्रह्मचारिणो गमेयु स्स्वाहा।। 14।।

卐19.53.15 अग्निः पृथिव्याधिपतिः। सोमस्त्वावतु विद्म त्वा विद्धिमा। अधिपति रस्यधिपतिं मा कृणु गवामश्वानां पूरुषाणां ब्रह्मचारीणां भूत्याऽन्नाद्यस्य।। 15।।

卐19.53.16 वायु रन्तरिक्षस्या धिपतिः। सोमस्त्वावतु विद्म त्वा विद्धिमा। अधिपति रस्यधिपतिं मा कृणु गवामश्वानां पूरुषाणां ब्रह्मचारीणां भूत्याऽन्नाद्यस्य।। 16।।

卐19.53.17 सूर्यो दिवोऽधिपतिः। सोमस्त्वावतु विद्म त्वा विद्धिमा। अधिपति रस्यधिपतिं मा कृणु गवामश्वानां पूरुषाणां ब्रह्मचारीणां भूत्याऽन्नाद्यस्य।। 17।।

卐19.53.18 विन्दन्तु वसवो विन्दन्तु मे गृहान्प्रजां पशून्वित्तिं भूतिं प्रतिष्ठाम्।। 18।।

卐19.53.19 आयन्तु वसवो आयन्तु मे गृहान्प्रजाः पशवो वित्तिं भूतिं प्रतिष्ठाम्।। 19।।

卐19.53.20 संयन्तु वसवो संयन्तु मे गृहान्प्रजाः पशवो वित्तिं भूतिं प्रतिष्ठाम्।। 20।।

卐19.53.21 जीतिरसि जीयासं पार्थिवैः पृतना जीयासम्। विजितिरसि वि जीयाषं मानुषैः पृतना जीयासम्।। 21।।

卐19.53.22 सञ्जितिरसि सञ्जीयासं सर्वैः पृतना जीयासम्।। 22।। 19 - 54

卐19.54.1 वोधयैनं प्र वोधय स्वप्तवे नानु मन्यताम्। उर्ध्वस्तिष्ठा न्ममाध्या नान्या साङ्कीर्तयश्च नः।। 1।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐19.54.2 आ वर्त्तय नि वर्त्तयाभ्या वर्त्तया कुरु। इदमस्य सर्वा चित्तानि स्मरेण प्रचयामसि।। 2।।
卐19.54.3 स्मरन्त तपति मरुत स्समिद्धे जातवेदसि। उदस्य पततां मन स्तदस्य रमतां मयि।। 3।।
卐19.54.4 गणपते गणपतिं मा कृणु तस्मान्मा यवम्। अपिगणाऽपिगणं मा कृणु तस्मान्मा छित्सि।। 4।।
卐19.54.5 सगण सगणं मा कृणु तस्मान्मा न सम्। गणवर्धन गणं मे वर्धय गवामश्वानां पुरुषाणां ब्रह्मचारीणां भूत्याऽन्नाद्यस्य।। 5।।
卐19.54.6 गणाभिवर्धन गणं मेऽभिवर्धय गवामश्वानां पुरुषाणां ब्रह्मचारीणां भूत्याऽन्नाद्यस्य।। 6।।
卐19.54.7 गण प्रवर्धन गणं मे प्रवर्धय गवामश्वानां पुरुषाणां ब्रह्मचारीणां भूत्यान्नाद्यस्य।। 7।।
卐19.54.8 यच्च खातं यच्चाखातं सर्वं तदरसं विषम्। यच्च पिष्टं यच्चापिष्टं सर्वं तदरसं विषम्।। 8।।
卐19.54.9 यच्च दिग्धं यच्चादिग्धं सर्वं तदरसं विषम्। यथा वृका जग्धपुत्रा व्याग्रा वालला भवेत्।। 9।।
卐19.54.10 एवा त्वमरललाभ वा धीभिः प्रेषितो मम। यथा दीप्तं सरतूल मग्निना ललाभवेत्।। 10।।
卐19.54.11 एवा त्वमरललाभ वा धीभिः प्रेषितो मम। आक्रन्दय ललाभ वाहस्य कामेन शुष्व चाधीभिः प्रेषितो मम।। 11।। 19 - 55
卐19.55.1 ययो स्सर्वमिदमार्पितं वशेभूतञ्च भव्य न्निमिशच्च चेष्टत। तौ मे गृह्णीतामुपद्रष्टारमत्र मास्योछेष्व यथावत्प्रजापते।। 1।।
卐19.55.2 यो मा वदन्तं हृदयेन वाचा वाचा श्रोत्रेण मनसा जिह्वक्षात्। तमिन्द्रो देवो वरुणो बृहस्पति रीशानो देवो अभियातु मृत्युर्यथा न जीवादुष सन्तृतीयान्।। 2।।
卐19.55.3 यो मा जिह्वक्षाद् बह्नीयान्म न्यमानमित्थं विद्वांसं प्रमतिर्मतीनाम्। तमिन्द्रो देवो वरुणो बृहस्पति रीशानो देवो अभियातु मृत्युर्यथा न जीवादुष सन्तृतीयान्।। 3।।
卐19.55.4 प्रत्यग्वधे नास्याऽपि दधामि प्राणं मोदानं विदथ मा जिह्वक्षात्। सो अस्यायु राछिनन्तु कुलिशे नेव वृक्ष यथा न जीवादुष सन्तृतीयान्।। 4।।
卐19.55.5 यस्याक्षर मेकमेव परस्सहस्रा अयुतं च शाखाः। तस्या वाचो विदथा मा वदन्तं यो मा जिह्वक्षात्सन्वे त्वार्त्तिम्।। 5।।

卐19.55.6 उषा वादित्य मयीन्धस उषसौ वा उद्यत्सं उद्यन्प्रजाभ्या मपत सोपत मोहत सोन्नाद्यव मारुन्ध।। 6।।

卐19.55.7 अपतो मोहतन्नादो भवति य एवं वेद। वातो वाग्नि मयिन्धस वातेनेन्धो ज्वलत्सो दीप्यत सः।। 7।।

卐19.55.8 मनोमयी ब्राह्मण मयीन्धस ब्रह्मचर्य मवसत्स वेदमन्व वपत सोपत मोहत सन्नाद्यव मारुन्ध। अपतो मोहतन्नादो भवति य एवं वेद।। 8।।

卐19.55.9 होमेन प्रतरं प्रजापते दम्पती परिददामि पुष्ट्या। रायस्पोषं सवितर्नियच्छ जरामृत्यु कृणुहि सर्ववीरौ।। 9।।

卐19.55.10 अयं होमो वर्द्धयन्नेतु दम्पती प्रजावन्तौ पशुवन्तौ सुवीरौ। रायस्पोषं सवितर्नियच्छ जरामृत्यु कृणुहि सर्ववीरौ।। 10।।

卐19.55.11 गोमन्तं पशुवन्त मश्ववन्तं होमं दम्पतीभ्यां जुहोमि। रायस्पोषं सवितर्नियच्छ जरामृत्यु कृणुहि सर्ववीरौ।। 11।।

卐19.55.12 जीवास्थ जीव्यासं सर्वमायुर्जीव्यासं।। 12

卐19.55.13 उपजीवा स्थोप जीव्यासं सर्वमायुर्जीव्यासं।। 13।।

卐19.55.14 संजीवास्थ सं जीव्यासं सर्वमायुर्जीव्यासं।। 14।।

卐19.55.15 जीवलास्थ जीव्यासं सर्वमायुर्जीव्यासं।। 15।।

卐19.55.16 प्रजापते राकूतिरसि साहस्त्री पुष्टिः। प्रजापते राकूत्याहं साहस्त्र्यां पुष्ट्यां साहस्त्रं पशून्पुषेयम्।। 16।।

卐19.55.17 बृहस्पते राकूतिरसि साहस्त्री पुष्टिः। बृहस्पते राकूत्याहं साहस्त्र्यां पुष्ट्यां साहस्त्रं पशून्पुषेयम्।। 17।।

卐19.55.18 ब्रह्मणाऽऽकूतिरसि सहस्त्री पुष्टिः। ब्रह्मणाऽऽकूत्याहं साहस्त्र्यां पुष्ट्यां साहस्त्रं पशून्पुषेयम्।। 18।। 19 - 56

卐19.56.1 विराडसि विराजं मा कृणु तस्या स्तेजशो भक्षीय।। 1।।

卐19.56.2 स्वराडसि स्वराजं मा कृणु तस्यास्ते मधु भक्षीय।। 2।।

卐19.56.3 सम्राडसि सम्राजं मा कृणु तस्यास्ते अन्नं भक्षीय।। 3।।

卐19.56.4 वीर्यावताते हविषा जुहोमि जीवातवे न मर्त्तवे। दक्षन्ते भद्रमाहार्षं परासुवा म्यामयत्।। 4।।

卐19.56.5 अभिवीरेण ते हविषा जुहोमि जीवातवे न मर्त्तवे। दक्षन्ते भद्रमाहार्षं परासुवा म्यामयत्।। 5।।

卐19.56.6 सुवीरेण ते हविषा जुहोमि जीवातवे न मर्त्तवे। दक्षन्ते भद्रमाहार्षं परासुवा म्यामयत्।। 6।।

卐19.56.7 सर्ववीरेण ते हविषा जुहोमि जीवातवे न मर्त्तवे। दक्षन्ते भद्रमाहार्षं परासुवा म्यामयत्।। 7।।

卐19.56.8 प्रजावता ते हविषा जुहोमि गर्भमा धत्स्व योन्याम्। सुकाले जायतां पुनर्दशमे मासि सूतवे।। 8।।

卐19.56.9 सुप्रजसा ते हविषा जुहोमि गर्भमा धत्स्व योन्याम्। सुप्रजसा ते हविषा जुहोमि गर्भमा धत्स्व योन्याम्।। 9।।

卐19.56.10 सुपुत्रेण ते हविषा जुहोमि गर्भमा धत्स्व योन्याम्। सुकाले जायतां पुनर्दशमे मासि सूतवे।। 10।।

卐19.56.11 भूतये ते हविषा जुहोमीमं देवासो अभि हिङ्कराथ। अस्मिन्नेव पशव स्सं विशन्तु चतुष्पदामुत वा ये द्विपादः।। 11।।

卐19.56.12 वित्तयेते हविषा जुहोमीमं देवासोऽभि हिङ्कराथ। अस्मिन्नेव पशव स्संविशन्तु चतुष्पदामुत वा ये द्विपादः।। 12।।

卐19.56.13 सुवृद्धे न ते हविषा जुहोमीमं देवासोऽभि हिङ्कराथ। अस्मिन्नेव पशवस्सं विशन्तु चतुष्पदामुत वा ये द्विपादः।। 14।।

卐19.56.14 क्षेम्येण ते हविषा जुहोमि क्षेम्यो भवासि पशुभिश्च वीरैः। इन्द्राग्नि त्वा सयुजा सखायौ विश्वेभिर्देवैरनु सं दधेताम्।। 15।।

卐19.56.15 प्रतिष्ठितेन ते हविषा जुहोमि प्रति तिष्ठासि पशुभिश्च वीरैः। इन्द्राग्नि त्वा सयुजा सखायौ विश्वेभिर्देवैरनु सं दधेताम्।। 16।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐19.56.16 संभूतेन ते हविषा जुहोमि सं भवासि पशुभिश्च वीरैः। इन्द्राग्नि त्वा सयुजा सखायौ विश्वेभिर्देवैरनु सं दधेताम्।। 17।।

卐19.56.17 प्रभूतेन ते हविषा जुहोमि प्र भवासि पशुभिश्च वीरैः। इन्द्राग्नि त्वा सयुजा सखायौ विश्वेभिर्देवैरनु सं दधेताम्।। 18।।

卐19.56.18 इति त्यृच (ऊनविंशः)काण्डे चतुर्दशोऽनुवाकः। इत्यथर्ववेदे पैप्पलादसंहितायां त्यृचकाण्डः (ऊनविंशः काण्डः) समाप्तः

## अथ विंशतिः काण्डः

ॐ नमो ब्रह्मवेदाय। । 20 - 1

卐20.1.1 धीती वा ये अनयन्वाचो अग्रं मनसा वा येऽवदन्नृतानि। तृतीयेन ब्रह्मणा वावृधाना स्तुरीयेणा मन्वत नाम धेनोः।। 1।।

卐20.1.2 स वेद पुत्रः पितरं स मातरं स सूनुर्भुव त्सभुवत्पुनर्मघः। स द्यामौर्णो दन्तरिक्षं स स्वर्विश्वा भुवो अभवत्स आभवत्।। 2।।

卐20.1.3 अथर्वाणं पितरं विश्वदेवं मातुर्गर्भं पितरसुं युवानम्। य इमञ्चिकेता अमृतस्य धामन्नित्यस्य रायः परिधीं रपश्यत्।। 3।।

卐20.1.4 शिवास्त एका अशिवास्त एका सर्वा बिभर्ष्य हृणीयमानः। गुहा वाच निहितास्तिस्र एता एकेदिदं वि बभूवानु सर्वम्।। 4।।

卐20.1.5 अदितिर्द्यौ रदितिरन्तरिक्ष मदितिर्माता स पिता स पुत्रः। विश्वे देवा अदितिः पञ्चजना अदितिर्जात मदितिर्जनित्वम्।। 5।।

卐20.1.6 दितेः पुत्राणामदितेरकार्षं महाशर्मणां महतामनर्मणाम्। तेषां हि धाम गभिषक् समुद्रिय न्नैषां ये अपसः परोऽस्ति किश्चन।। 6।।

卐20.1.7 वाजस्य नु प्रसवे मातरं मही मदितिं नाम वचसा करामहे। यस्यामिदं विश्वं भूवनमाविवेश सा नो देवी सुहवा शर्मयच्छतु।। 7।।

卐20.1.8 महीमू षु मातरं सुव्रताना मृतस्य पत्नीमवसे हुवेम। तुविक्षत्रा मजरन्ती मुरूचीं सुशर्माण मदितिं सुप्रणीतिम्।। 8।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐20.1.9 सूत्रायमाणं पृथिवीन्द्या मनेहसं सुशर्माण मदितिं सुप्रणीतिम्। दैवीं नावं सुविदत्रा मनागसो अश्रवन्ती मा रुहेमा स्वस्तये।। 9।।

卐20.1.10 एकया च दशभिश्चा सुहुते द्वाभ्यामिष्टये विंशत्या च। तिसृभिश्च वहसे त्रिंशता च वियुग्भिर्वायविह ता वि मुञ्च।। 10।। 20 - 2

卐20.2.1 अया विष्ठा जनयन्कर्वराणि स हि घृणि रुरुर्वराय गातुः। स प्रत्युदैद्धरुणे मध्वोऽग्रं स्वा यत्तनू तन्वा मैरयन्त।। 1।।

卐20.2.2 यज्ञेन यज्ञमयजन्त देवा स्तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानस्सचन्त यत्र पूर्वे साध्यास्सन्ति देवाः।। 2।।

卐20.2.3 यज्ञो बभूव स आ बभूव स पृथिव्या अधिपतिर्बभूव। स प्रत्य यज्ञे स उ वावृधे पुन स्सोऽस्मासु द्रविणमा दधातु।। 3।।

卐20.2.4 देवा यद्देवान् हविषा यजन्ता मर्त्यान्मनसा मर्त्येन। ब्रवाम तत्र परमे व्योमन्पश्येम तदुदितौ सूर्यस्य।। 4।।

卐20.2.5 मुग्धा देवा उत शुना यजन्तोतो गो रङ्गैर्बहुधा यजन्त। य इमं यज्ञं मनसा चिकेत प्राणो वोचत्त मिहेह ब्रवाम।। 5।।

卐20.2.6 यत्पुरुषेण हविषा देवा यज्ञमतन्वत। क्वस्वीत्तदद्य नो श्रेया न्यद् विहव्ये नेजिरे।। 6।।

卐20.2.7 इन्द्र स्सुत्रमा स्ववाङ् अवोभि स्सुमृडीको भवतु विश्व वेदाः। वाधथां द्वेषोऽभयं नꣳ कृणोतु सुवीर्यस्य पतय स्स्याम।। 7।।

卐20.2.8 स सुत्रामा स्ववाङ्गिन्द्रो अस्म दाराच्चिद् द्वेष स्सनुतर्युयोतु। तस्य वयं सुमतौ यज्ञिय स्यापि भद्रे सौमनसे स्याम।। 8।।

卐20.2.9 यस्ते पृथु स्तनइत्नुर्य ऋष्वो यो दैवꣳ केतुर्विश्वमा भूषतीदम्। मृडया नो विद्युता देव सत्यं मोत वधी रश्मिभि स्सूर्यस्य।। 9।।

卐20.2.10 यस्ते स्तन श्शशयुर्यो मयोभू र्यस्सुम्नयु स्सुहवो य स्सुदक्षः। येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धातवे कः।। 10।। 20 - 3

卐20.3.1 इदन्ते हव्यं घृतवत्सरस्वतीदं पितृणां हविरास्यं यत्। इमानि त उदिता शन्तमानि तेभिर्वयं मधुमन्त स्स्याम।। 1।।

卐20.3.2 प्रपथे पथामजनिष्ट पूषा प्रपथे दिव꞉ प्रपथे पृथिव्याः। उभे अभि प्रियतमे सधस्थे आ च परा चरति प्रजानन्।। 2।।

卐20.3.3 पूषेमा आशा अनु वेद सर्वा स्सोऽस्माङ् अभय तमेन नेषत। स्वस्तिदा आघृणि स्सर्ववीरो ऽप्रयुच्छन् पुर एतु प्रजानन्।। 3।।

卐20.3.4 पूषागा अन्येतु न꞉ पूषा रक्ष त्वर्वतः। पूषा वाजां स नो तु नः।। 4।।

卐20.3.5 पूषन्तव व्रते वयं नरिष्येम कदा च न। स्तोतारस्त इह स्मसि।। 5।।

卐20.3.6 शुक्रन्ते अन्य द्यजतन्ते अन्यद्विषुरूपे अहनी द्यौरिवासि। विश्वाहि माया अवसि स्वधावो भद्राते पूषन्निह रातिरस्तु।। 6।।

卐20.3.7 धाता दधातु दाशुसे प्राञ्चञ्जीवातु मक्षिताम्। वयन्देवस्य सा धीमहि सुमतिं सत्य धर्मणः।। 7।।

卐20.3.8 धाता विश्वानि दाशुषे दधातु प्रजा कामाय दाशुषे दुरोणे। तस्य प्रजा अमृतास्सं व्ययन्तु विश्वे देवासो अदिति स्सजोषाः।। 8।।

卐20.3.9 धाता राति स्सवितेदं जुषन्तां प्रजापति र्निधिपतिर्नोऽग्निः। त्वष्टा पूषा प्रजया सं रराणा यजमानाय द्रविणन्दधातु।। 9।।

卐20.3.10 धाता प्रजाना मुतराय ईशे धातेदं विश्वं भुवनं जजानः। सन्दाशुषे वहतु भूरिपुष्टा तस्मै देवाय हविषा विधेम।। 10।। 20 - 4

卐20.4.1 साविर्हि देव प्रथमाय पित्रे वर्ष्माणमस्मै वरिमाणमस्मै। अथास्मभ्यं सवितर्वार्याणि दिवे दिवे आ सुवा भूरि पश्वः।। 1।।

卐20.4.2 भद्रादधि श्रेय꞉ प्रेहि बृहस्पति꞉ पुरएता ते अस्तु। अथेममस्या वर आ पृथिव्या आरे शत्रुङ्कृणुहि सर्ववीरम्। 2।।

卐20.4.3 दमुनादेव स्सविता वरेण्यो दधद्रत्न न्दक्षं पितृभ्य आयूंषि। पिबात्सोमं मम ददेनमिष्टे परिज्मा चित्क्रमतेऽस्य धर्मणि।। 3।।

卐20.4.4 तां सवितु स्सत्यसवस्य चित्रां वयं देवस्य प्रसवे मनामहे। यामस्य कण्वो अदुहत्प्रपीनां सहस्रधारां महिषो भगाय।। 4।।

卐20.4.5 को नोऽस्या द्रुहोऽवद्यवत्या उन्नेष्यति क्षत्रियो वस्य इच्छन्। क पूर्त्तिकाम꞉ क उ यज्ञकाम꞉ को देवेषु वनुते दीर्घमायुः।। 5।।

卐20.4.6 क꞉ पृश्निं धेनुं वरुणेन दत्तामथर्वणे सुदुघां नित्यवत्साम्। तां बृहस्पतिना सख्यन्दुहानो यथा वशन्तन्व ङ्कल्पयाति।। 6।।

卐20.4.7 नघ्रंस्ततताप न हिमो जघान प्र सरस्तते पृथिवी जीरदानुः। आप श्चिदस्मै मदमित्क्षरन्ति यत्र सोम स्सदमित्तत्र भद्रम्।। 7।।

卐20.4.8 यस्या इदं प्रदिशि यद्विरोचते ऽनुमतिं प्रति भूषन्त्या यवः। यस्यौपस्थ उर्वन्तरिक्षं सा नश्शर्म बहुलं नि यच्छात्।। 8।।

卐20.4.9 अन्वद्य नो अनुमतिर्यज्ञं देवेषु यच्छताम्। अग्निश्च हव्यवाहनो भवतां दाशुषे मयः।। 9।।

卐20.4.10 अन्विदनुमते त्वं मंससे शञ्च नस्कृधि। इषन्तोकाय नो दधत्प्र ण आयूंषि तारिषन्।। 10।। 20 - 5

卐20.5.1 अनुमन्यता मनुमन्यमाना꞉ प्रजावती सम क्षीयमाणम्। तस्या वयं हेडसि मापि भूम सा नो देवी सुहवा शर्मयच्छतु।। 1।।

卐20.5.2 अनुमते अनुमन्यस्व तानो या ते वयं चकृमा या तनूभिः। या ते केषु तनूषु या प्रजायां या गोष्वोषधीष्वप्स्वन्तः।। 2।।

卐20.5.3 आनो देव्यनुमति र्यगम्या त्सुक्षेत्रता वीरताया सुजाता। भद्रा ह्यस्या꞉ प्रमतिर्बभूव सेमं यज्ञमवतु देवजुष्टा।। 3।।

卐20.5.4 अनुमति र्विश्वमिदं जजान यदेयति चरति यच्चतिष्ठति। तस्यास्ते देवी सुमतौ स्याम अनुमते अनु हि मंससे नः।। 4।।

卐20.5.5 यत्तेनाम सुहवं सुप्रणीते अनुमते अनुमतं सुदानुः। तेन त्वं सुमतिं देव्यस्मा इषं पिन्व विश्ववारं सुवीरम्।। 5।।

卐20.5.6 प्रजाभ्यस्त्वा प्रजास्त्वानु प्राणन्तु प्रजा꞉ त्वं अनु प्राणिहि। शुक्रन्ते शुक्र क्रीणामि चन्द्रं चन्द्रेणामृत ममृतेन प्रिणामि।। 6।।

卐20.5.7 तपस स्तनुरसि प्रजापतेर्वर्णः। परमेण पशुना क्रीयसे।। 7।।

Sri Ganapati Sacchidananda Avadhoota Datta Peetham

卐20.5.8 अभित्यन्देवं सविता रमोण्यो॰ कविक्रतुम्। अर्चामि सत्यसवं रत्नधामभि॰ प्रियं मतिम्।। 8।।
卐20.5.9 उर्ध्वा यस्या मतिर्भा अदिद्युत त्सवीमनि। हिरण्यपाणि रमिमीत सुक्रतु॰ कृपात्स्वः।। 9।।
卐20.5.10 अयं सहस्र मा नो दृशे कवीनां मतिर्ज्योति र्विधर्मणि। ब्रध्न स्समीचीरुषस स्समीरयात्।। 10।। 20 - 6
卐20.6.1 अरेपस स्सचेतस स्स्वसरे मन्युमत्तमाश्रिते गोः। समेत विश्व ओजसा पतिं दिवो य एक विभूरतिथिर्जनानाम्।। 1।।
卐20.6.2 स पूर्व्यो नूतनमाविवासत्तं वर्तनिरनु वावृत एकमित्पुरुः। कुहून्देवीममृतां विद्मनाप समस्मिन् यज्ञे सुहवा जोहवीमि।। 2।।
卐20.6.3 यो नो ददाति श्रवणं पितृणां तस्यै ते देवि हविषा विधेम। कुहुर्देवानाममृतस्य पत्नी हव्या नो अस्य हविषश्शृणोतु।। 3।।
卐20.6.4 सन्दाशुषे किरतु भूरिपुष्टा रायस्पोषं चिकितुषे दधातु।। 4।।
卐20.6.5 सं जानिध्वं सं पृच्यध्वं सं वो मनांसि जानताम्।। 5।।
卐20.6.6 मित्रो वस्सर्वाः सं सृजान्मयि संज्ञानमस्तु वः।। 6। इत्येकर्चो नामः विंशतिकाण्डे प्रथमोऽनुवाकः 20 - 7
卐20.7.1 यन्नो अग्नि रखनद्योन्न इन्द्रो विश्वे यद्देवा मरुतस्स्वर्काः। तदस्मभ्यं सविता सत्यधर्मा सरस्वत्यनु मतिर्नियच्छात्।। 1।।
卐20.7.2 यूयन्नो देवा उभयाय वेधसे शर्मनो यच्छत् द्विपदे चतुष्पदे। अदत्पिब दूर्जयमानमाशितं तदस्मभ्यं शँ यो ररपो दधातु।। 2।।
卐20.7.3 बृहस्पते सवितर्बोधयैनं संशितं चित्सन्तरं सं शिशाधि। वर्धयैनं महते सौभगाय विश्व एनमनुमदन्ति देवाः।। 3।।
卐20.7.4 अमूत्रभूया दधि यद्यमस्य बृहस्पति रभिशस्त्या अमुञ्चत्। प्रति मृत्यु मौहतामश्विना ते देवानामग्ने भिषजा शचीभिः।। 4।।
卐20.7.5 इन्द्रावरुणा सुतपाविमं सुतं मद्यं सोमं पिबत धृतव्रतौ। युवो रथो अध्वरं देववीतये प्रति स्वसरमुप याति पीतये।। 5।।

卐20.7.6 इन्द्रावरुणा मधुमत्तमस्य वृष्ण स्सोमस्य वृषणा वृषेथाम्। इदं वामस्मे परिषिक्तमन्ध आसद्यास्मिन् वर्हिषि मादयेथाम्। 6।।

卐20.7.7 उरु विष्णो वि क्रमस्वोरु क्षयाय नष्कृधि। घृतं घृतयोने पिब प्र प्रयज्ञपतिन्तिर।। 7।।

卐20.7.8 दिवो विष्ण उत वा पृथिव्या उरोर्वा विष्णो महोऽन्तरिक्षात्। उभा हि हस्ता मधुना पृणस्वा प्रयच्छ दक्षिणादोत सव्यात्।। 8।।

卐20.7.9 विष्णोर्नु कं प्र वोचं वीर्याणि यः पार्थिवानि विममे रजांसि। यो अस्कभा यदुत्तरं सधस्थं विचक्रमाण स्त्रेधोरुगायः।। 9।।

卐20.7.10 प्र तद्विष्णु स्तवते वीर्याणि मृगो न भीमः कुचरो गिरिष्ठाः। यस्योरुषु त्रिषु विक्रमणे ष्वधिक्षियन्ति भुवनानि विश्वा।। 10।। 20 - 8

卐20.8.1 अग्नाविष्णू महि धाम प्रियं वां पाथो घृतस्य गुह्यानि नाम। दमेदमे सप्तरत्ना दधानौ उप वां जिह्वा घृतमा चरण्यात्।। 1।।

卐20.8.2 अग्नाविष्णू महितद्वां महित्वं वीथो घृतस्य गुह्याजुषाणौ। दमेदमे सुष्टुत्या वावृधानौ प्रति वां जिह्वा घृतमुच्चरण्यात्।। 2।।

卐20.8.3 उन्नम्भय पृथिवीं भिन्द्धीदं दिव्यं नभः। उद्नो दिव्यस्य नो धातरीशानो वि ष्या विलम्।। 3।।

卐20.8.4 अपक्रामन् पौरुषेया द्वृणानो दैव्यं सहः। प्रणीतीरभ्या वर्तस्व देवो देवानां सख्या जुषाणः।। 4।।

卐20.8.5 पितोरहं पितुपतिं तदीडे धाता विधर्त्ता भुवनेष्वेषु। नेमेन मह्यं मधुवाङ् इहैधि नेमेनामुष्मै पितुवाङ् न्वैधि।। 5।।

卐20.8.6 अयं पितोः पितुवाङ् आभृतस्य यदिदं श्रृणोतु यदहं ब्रवीमि। नेमेन मह्यं मधुवाङ् वैधि नेमेना मुष्मै पितुवाङ् न्वैधि।। 6।।

卐20.8.7 आत्रै वैनं निरृऋत आरभस्वा त्रैवैनं निर्ऋते प्रक्षिणी ह्यत्रैवैनं सर्वं वि वृश्च। नेमेन मह्यं मधुवाङ् वैधि नेमेना मुष्मै पितुवाङ् न्वैधि।। 7।।

卐20.8.8 यत्वा पितरुपब्रुवे तन्नो आश्रृणवस्मि न्निहवे हव्यो यथासः। अमुन्देवै निर्ऋतिं स्संविदानामुं सिञ्चन्तु वरुणस्य पाशात्।। 8।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐20.8.9 यदस्मृति चकृमा किं चिदग्ने उपारिम चरणैर्जातवेदः। तस्मात् पाहि त्वन्नः प्रचेतश्शुभे सखिभ्यो अमृतत्वमस्मान्।। 9।।

卐20.8.10 अग्नेऽध्यक्षो न एहि पाहि नो दुरितात्पाहि दुष्ष्वप्न्यात्। आशन्या ऽजन्या यक्ष्मान्नः पाहि।। 10।। 20 - 9

卐20.9.1 त्विषिरसि त्विषिवन्तो भूयास्म। चक्षुष्मन्तो गोमन्तः प्रजावन्तो वर्चस्विनः।। 1।।

卐20.9.2 यदुघ्ना सिञ्चन्नतः क्षीरमतो दधि। इदं तद्विश्वरुपं वः पयो हरामि वीरुधा।। 2।।

卐20.9.3 यदुघ्न ओषधीभ्योऽद्य स्संभरथा मधु। इदं तद्विश्वरुपं वः क्षीरं हराम्योषधी।। 3।।

卐20.9.4 योऽभ्यु बभ्रुणायसि स्वपन्तमिच्छ पूरुषं शयान मकस्यलम्। अयस्मयेन वर्मणाऽश्ममयेन वर्मणा पर्यस्मान् वरुणो दधत्।। 4।।

卐20.9.5 यो नो गृहे ब्रह्मणा मन्यमाना घोरां वाचं मिथुना नो ब्रुवन्तु। ये नो रुचो बलिरुचो भवन्तु दुर्योण मस्मत्परिते हरन्तु।। 5।।

卐20.9.6 अयमग्निस्सत्पतिर्वृद्धवृष्ण्यो रथीव पत्तीनजयत् पुरोहितः। नाभा पृथिव्यां निहितो दविद्युत दधस्पदं कृणुतां ये पृतन्यवः।। 6।।

卐20.9.7 अग्ने शर्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु। सं जास्पत्यं सुय ममाकृणुष्व शत्रुयतामभि तिष्ठा महांसि।। 7।।

卐20.9.8 जुष्टोदमुना अतिथिर्दुरोण इमन्नो यज्ञमुपयाहि विद्वान्। विश्वाह्यग्ने अभियुजो विहत्य शत्रूयता माभरा भोजनानि।। 8।।

卐20.9.9 अग्ने सपत्नान् प्र णुदस्व जातान् प्रत्यजातान् जातवेदो नुदस्व। अधि नो ब्रूहि सुमनस्यमान श्शर्म यच्छ त्रिवरुथमुद्भित्।। 9।।

卐20.9.10 प्रान्यान् सपत्नान् सहसा सहस्व प्रत्यजातान् जातवेदो श्रुणीहि। इदं राष्ट्रं पिपृहि सौभगाया नु त्वा देवा वसवो मदन्ताम्।। 10।। 20 - 10

卐20.10.1 यो नो मित्रावरुणा ऽभिदासात् सपत्नो वोत्पिपानो बृहस्पते। सर्वन्तमग्नेऽधरं पारयास्मद् यथेन्द्राहमुत्तम श्चेतयानि।। 1।।

卐20.10.2 अहमेषा मुत्तमश्चेतयानि मम वश मुपतिष्ठन्तु सर्वे। आजुह्वानो घृतपृष्ठस्सुवर्चा वसोर्मध्ये दीदिहि जातवेदः।। 2।।

卐20.10.3 अमुमग्ने अधरं पारयास्मद् व्यायाम उत्पिपानं सपत्नम्। ये नो पूर्वा नोऽधरे ते भवन्तु विश्वाद्वेषांस्यभितो नु वृङ्धि।। 3।।

卐20.10.4 मूर्द्धानन्दिवोऽरतिं पृथिव्या विशस्त्वा सर्वा बलिहृत मुपासताम्। तासामुग्रो मध्यमेष्ठेयमस्या स्वे क्षेत्रे सवितेव वि राजः।। 4।।

卐20.10.5 आ प्रत्यञ्चं दाशुषे दाश्वंसं सरस्वन्तं पुष्टिपतिं रयीणाम्। रायस्पोषं श्रवस्युं वसानमिह हुवेम सदनं रयीणाम्।। 5।।

卐20.10.6 यस्यव्रते पशवो यन्ति सर्वे यस्य व्रत उपतिष्ठन्त आपः। यस्य व्रते पुष्टिपतिर्निविष्टस्तं सरस्वन्तमवसे हुवेम।। 6।।

卐20.10.7 ये ते सरस्वन्नूर्मयो मधुमन्तो घृतश्चुतः। तेभिर्नोऽविताभवः।। 7।।

卐20.10.8 दिव्यं समुद्रं पयसं वृहन्तमपां गर्भमृषभमोषधीनाम्। अभीपतो रय्यातर्पयन्तं सरस्वन्तं रयीष्ठां सादयेह।। 8।।

卐20.10.9 इन्द्रस्य कुक्षिरसि सोमधान आत्मा देवानामुत विश्वरुपः। इह प्रजा जनय यास्त आसु या अन्यत्रेह तास्ते स्वधिता गृणन्तु।। 9।।

卐20.10.10 श्येनस्सुपर्णो दिव्यो नृचक्षास्सहस्रपाच्छत योनिर्वयोधाः। स नो नि यच्छाद् वसुयत्पराभृत मस्माकमस्तु पितृषु स्वधावत्।। 10।। 20 - 11

卐20.11.1 अति धन्वान्यपस्त तर्दश्येनो नृचक्षा अवसानदर्शः। तरन्विश्वा अवरा रजांसीन्द्रेण सख्या शिव आ जगाम।। 1।।

卐20.11.2 आगन् देवस्सविता सर्वादा योरु ज्योति रविदामा नवोभिः। महीं नावमदितेरारुहेमं यत्र सोमं सदमित्तत्र भद्रम्।। 2।।

卐20.11.3 उद्वयं तमसस्परि ज्योतिष्पश्यन्त उत्तरम्। देवन्देवत्रा सूर्य मगन्म ज्योतिरुत्तमम्।। 3।।

卐20.11.4 पतिर्दिवꣳ पतिरग्निꣳ पृथिव्याꣳ पतिर्विश्वस्य भुवनस्य राजति। पतिर्विश्वा ओषधी राविवेश पत्नीवानग्नि रिह याहि सोमम्।। 4।।

卐20.11.5 सं क्रामतं मा जिहीतं शरीरं प्राणापानौ सयुजेह स्ताम्। सप्तऋषिभ्यꣳ परि दद्म एतं त एनं स्वस्ति जरसे नयन्तु।। 5।।

卐20.11.6 यत्ते आयुरतिहितं पराचैरपानः प्राणो य उ वाते परेतः। अग्निष्ट दाहार्निर्ऋतते रुपस्था त्तदात्मनि पुनरा वेशयामि।। 6।।

卐20.11.7 मा त्वा प्राणो हासीद्यस्तया प्रविष्टो मा त्वापानो ऽवहाय परा गात्। संरभ्य जीव श्शरदस्सुवर्चा अग्निष्टे गोपा अधिपा वशिष्ठः।। 7।।

卐20.11.8 राकामहं सुहवां सुष्टुती हुवे श्रृणोतु नस्सुभगा बोधतु त्मना। सीव्यत्वपस्सूच्या च्छिद्यमानया ददातु वीरं शतदायमुक्थ्यम्।। 8।।

卐20.11.9 यास्ते राके सुमतयस्सुपेशसो याभिर्ददामि दाशुषे वसूनि। ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा।। 9।।

卐20.11.10 या राका या सिनीवाली या गुङ्गुर्या सरस्वती। इन्द्राणीमह्व ऊतये वरुणानीं स्वस्तये।। 10।।

卐20.11.11 या सुबाहु स्स्वङ्गुरि स्सुषूमा बहुसूवरी। तस्यै विश्पत्न्यै हविस्सिनीवाल्यै जुहोतनः।। 11।।

卐20.11.12 सिनीवाली पृथुष्टुके या देवानामसि स्वसा। जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः।। 12

卐20.11.13 या विश्वत इन्द्रमसि प्रतीची सहस्रस्तु कामभियन्तु देवी। विष्णोस्पत्नि तुभ्यं राका हवींषि पतिं देवी राधसा चोदयस्व।। 13। इत्येकर्चो नाम विंशतिकाण्डे द्वितीयोऽनुवाकः 20 - 12

卐20.12.1 सूयवसाद् भगवती हि भूया अथो वयं भगवन्त स्स्याम। अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदक माचरन्ती।। 1।।

卐20.12.2 उपह्वये सुदुघान्धेनुमेतां सुहस्तो गोधु गुत दोह देनाम्। श्रेष्ठं सवं सविता साविषन्नोऽभिद्धो धर्मस्तदु षु प्र वोचम्।। 2।।

卐20.12.3 हिङ्कृण्वती वसुपत्नी वसूनां वत्समिच्छन्ती मनसाभ्यागात्। दुहामश्विभ्यां पयो अघ्न्येयं सा वर्धतां महते सौभगाय।। 3।।

卐20.12.4 गौरमीमेदभि वत्सं मिषन्तं मूर्धानं हिङ्ङकृणोन्मातवा उ। सृक्काणं घर्ममभि वावशाना मिमाति मायुं पयते पयोभिः।। 4।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐20.12.5 सञ्जानाना उप सीदन्नभिज्ञु पत्नीवन्तो नमस्यन् नमस्यम्। रिरिक्वांसस्तन्वा सुम्नमाय सखेत्सख्युर्निमिषि रक्षमाणाः।। 5।।

卐20.12.6 समिद्धो अग्निरश्विना तप्तो वां घर्म आगतम्। दुह्यन्ते नूनं वृषणेह धेनवो दस्रा मदन्ति कारवः।। 6।।

卐20.12.7 समिद्धो अग्निरश्विना रथी दिवस्तप्तो घर्मो दुह्यते वामिषे मधु। वयं हि वां पुरुदमासो अश्विना हवामहे सधमादेषु कारवः।। 7।।

卐20.12.8 यदुस्रिया स्वाहुतं घृतं पयोऽयं सोऽश्विना वां भाग आ गतम्। माध्वी धर्त्तारा विदथस्य सत्पती तप्तं घर्मं पिबतं रोचने दिवः।। 8।।

卐20.12.9 तप्तो वां घर्मो नक्षन्तु सुहोता प्र वामध्वर्युश्चरति पयस्वान्। मधोर्दुग्ध स्याश्विना तनाया वीतं पातं पयस उस्रियायाः।। 9।।

卐20.12.10 उप द्रव पयसा गोधुगोषमा घर्मे सिञ्च पय उस्रियायाः। वि नाकमख्य त्सविता वरेण्यो ऽनु द्यावापृथिवी सुप्रणीतिः। 10।। 20 - 13

卐20.13.1 स्वाहा कृत श्शुचिर्देवेषु घर्मो योऽश्विनो श्चमसो देवयानः। तमु विश्वे अमृतासो जुषाणा गन्धर्वस्य प्रत्यास्ना रिहन्ति।। 1।।

卐20.13.2 सुगा वो देवास्सदना कृणोमि य आचष्टेदं सवनं जुषाणाः। वहमाना भरमाणा अभ्रा अस्तं घर्मन्तमुदा तिष्ठता नु।। 2।।

卐20.13.3 शिवा न श्शन्तमा भव सुमृडीका सरस्वति। मा ते युयोम सन्दृशः।। 3।।

卐20.13.4 उपैनं देवो अग्रभीच्चमसेन बृहस्पतिः। यजमानाय शुन्वते इन्द्र गोभिर्न आ रभ।। 4।।

卐20.13.5 सम्मा सिञ्चन्तु मरुत स्सं पूषा सं बृहस्पतिः। सम्मायमग्नि स्सिञ्चतु प्रजया च धनेन च दीर्घमायुष्कृणोतु मे।। 5।।

卐20.13.6 इडा इवास्माङ्ङअनु वस्तां व्रतेन यस्याः पदे पुनते देवयन्तः। घृतपदी शक्करीस्सोमपृष्ठोप यज्ञमस्थित वैश्वदेवी।। 6।।

卐20.13.7 द्रप्सश्चस्कन्द पृथिवी मनु द्यामिमं च योनि मनु यश्च पूर्वः। समानं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः।। 7।।

卐20.13.8 यस्ते द्रप्स स्स्कन्दति यस्ते अंशुर्बाहुच्युतो धिषणाया उपस्थात्। अध्वर्योर्वा परिवा यः पवित्रात्तं ते जुहोमि मनसा वषट्कृतम्।। 8।।

卐20.13.9 यस्ते द्रप्सः पतितोऽवश्च यः पर स्स्रुचा। अयन्देवो बृहस्पतिस्सन्तं सिञ्चतु राधसे।। 9।।

卐20.13.10 यस्ते द्रप्सः पतितः पृथिव्यान्धाना सोमः परिवापः करम्भः। अयन्देवो बृहस्पतिस्सन्तं सिञ्चतु वर्चसे।। 10।। 20 - 14

卐20.14.1 पयस्वती रोषधयः पयस्वन्मामकं वचः। अथो पयस्वतां पय आ हरामि सहस्रशः।। 1।।

卐20.14.2 अयमग्नि र्वरेण्य आयुष्टे विश्वतो दधत्। पुनस्त्वा प्राण आ यति परा यक्ष्मं सुवामि ते।। 2।।

卐20.14.3 जनाद्विश्वजनीनान्वपूषा मुरुक्षितीनाम्। दूरात्त्वामन्ये आभृतमीर्ष्याया नाम भेषजम्।। 3।।

卐20.14.4 दूरादेत त्संभवन्ति इर्ष्याया नाम भेषजम्। तत्संवेगस्य भेषजं तदस्ना सं गृभायिकम्।। 4।।

卐20.14.5 अग्नेरिव दहतो दावस्य दहतो यथा। एतामेतस्येर्षां हृद उद्वाग्निमिव वारये।। 5।।

卐20.14.6 अपमार्ज्य पनयन्म न्यन्ते हृदयादधि। अमुष्मिन्नीर्ष्या मादध्म स्ततो एनां नि दध्मसि।। 6।।

卐20.14.7 तिरश्चिराजेरसितात्पृदाकोरधि संभृतम्। तत्कङ्कपर्वणो विषमियं वीरुददूदुर्षत्।। 7।।

卐20.14.8 इयं वीरुन्मधुजाता मधुश्चुन्मधुला मधूः। सा वीहृतस्य भेषज्यथो मशकजम्भनी।। 8।।

卐20.14.9 यतो दष्टं यतः धीतं ततस्त्वा निर्नयामसि। अर्भस्य तृप्रदंशिनो मशकस्यारसं विषम्।। 9।।

卐20.14.10 अयं यो विख्यो विकटो विपरु र्व्यङ्मुखान्वेषां वृजिना कृणोषि। तानि त्वन्देव सवित रिषीकामिव सम्मनः।। 10।। 20 - 15

卐20.15.1 यदन्नमद्मि बहुधा विरूपं हिरण्यमश्वमुत गामजामवीम्। यदेव किञ्च प्रतिजग्रहाह मग्निष्टद्धिश्वा दगदं कृणोतु।। 1।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐20.15.2 यदाशसा मे चरतो जनाङ् अनु याचमानस्य वदतो विचुक्षुभे। यन्मे तन्वो मनसो विरिष्टं सरस्वती तदा पृणातु घृतेन।। 2।।

卐20.15.3 यदारिम प्रतिगृह्णन्त्व एन श्शिसासन्तो बलिमग्ने चरन्तः। त्वन्न स्तस्मादेनसो मुमुग्धि वैश्वानरः प्रति हव्या गृभाय।। 3।।

卐20.15.4 चक्षुषः पाशा न्मनसश्च पाशा दीक्षायाः पाशादुत शक्करीणाम्। तस्मान्मुमुग्धि विश्वावसो त्वन्नो दातृणान्दानं भुञ्जामहे वयम्।। 4।।

卐20.15.5 अदुर्मे विश्वे देवाऽदात्सवितेदम्। अदान्मे ब्रह्मणस्पतिः प्रियो मित्रोऽदा दिदम्।। 5।।

卐20.15.6 इन्द्रेण मेदिना युजाऽपवाधे पृतन्यतः। अधरे सन्तु शत्रवः।। 6।।

卐20.15.7 अग्निरिन्द्रश्च यद्युवं हतो वृत्राण्यप्रति। उग्रा हि वृत्र हन्तु मा।। 7।।

卐20.15.8 अग्निमिन्द्रश्च यद्वयं पुरोधायै हवामहे। तौ नो मृडातीदृशे।। 8।।

卐20.15.9 याभ्यां स्वरजयन्नग्रे या वा तस्थतुर्भुवना जुषाणः। प्रचर्षणी वृषणा वज्रबाहू अग्निमिन्द्रं वृत्रहणा हुवेहम्।। 9।।

卐20.15.10 ययो रोजसा स्कभिता रजांसि यौ वीर्यैर्वीरतमा शचीभिः। यौ पत्येते अप्रतीतौ सहोभि र्विष्णुमगन्वरुणं पूर्वहूतिः।। 10।। 20 - 16

卐20.16.1 ययोरप्ष्यन्महिमा नदीषु प्ररिरिचे प्रति विरोचनायाम्। ययो रस्त्यनुमति र्भुयिष्टं विष्णुमगन् वरुणं पूर्वहूतिः।। 1।।

卐20.16.2 ययोरिदं प्रदिशि यद् विरोचते प्र चानति वि च चष्टे सचीभिः। सह ऋतस्य धर्मणा युवाना विष्णुमगन् वरुणं पूर्व हूतिः।। 2।।

卐20.16.3 उभा जिग्यथुर्न परा जयेते न परा जिग्ये कतरश्चनैव वाम्। इन्द्रश्च विष्णोर्यदपस्पृधेथां त्रेधा सहस्रं वि तदीरयेथाम्।। 3।।

卐20.16.4 यदशुद्धं यदनृतं यच्चरामि पापया। आपो मा तस्मादेनसो दुरितात् पान्तु विश्वतः।। 4।।

卐20.16.5 दुष्ष्वप्न्यं दुर्जीवितं रक्षो अद्भमराय्यः। दुर्वाच स्सर्वन्दुर्भूतं तदितो नाशयामसि।। 5।।

卐20.16.6 यदवामृक्षत् कृष्णशकुनिर्मुखेन निरृऋते तव। अग्निष्टत्सर्वं शुन्धतु हव्यवाट् घृतसूदनः।। 6।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐20.16.7 यदस्मान् कृष्णशकुनिर्निष्पतित आनशे। आपो मा तस्मादेनसो दुरितात्पान्तु विश्वतः।। 7।।

卐20.16.8 अग्निर्मा पातु प्रथमो दुर्णाम्नो निर्ऋत्यां विश्वा दुरितानि मृज्महे। विश्वेमा देवा मरुतः पुनन्तु वरुणो राजा सविता पवित्रैः।। 8।।

卐20.16.9 अन्तरिक्षे पतति यातुधान निबोधितः। स्तोकं यमभ्यचुच्युत तत्मुस्योनं कृणोमि ते।। 9।।

卐20.16.10 यद्वा कृष्णो अभ्यरुक्षद् देवेभ्यस्परि निर्हतः। शिवन्ते तन्वे तत्कृण्मो वि ते पाशांश्चृतामसि।। 10।। 20 - 17

卐20.17.1 तृष्टिके तृष्ट वन्दन उदमूञ्छिन्धि तृष्टिके। यथा कृतद्विष्टेदशत्सर्वस्मै शेप्यावते।। 1।।

卐20.17.2 तृष्टासि तृष्टिकासि विषा विषातक्यसि। परिवृक्ता यथा सस्यृषभेण वशेव।। 2।।

卐20.17.3 आ ते ददे वक्षणाभ्य आ ददे हृदयादधि। आ ते मुखस्य यद्वर्च आ पुंसो यत्र तृप्ससि।। 3।।

卐20.17.4 मयि वर्चो मयि श्रवो मयि द्युम्नं मयि त्विषिः। अहन्ते मन आ ददेऽहं भूयासमुत्तमः।। 4।

(इत्येकर्चो नाम विंशति काण्डे तृतीयोऽनुवाकः। ) 20 - 18

卐20.18.1 अभि प्रागात् सहस्राक्षो युक्त्वा शपथो रथम्। सप्तार मन्विच्छन्यातु वृक इवाविमतो गृहम्।। 1।।

卐20.18.2 परि णो वृङ्धि शपथ हृदमग्निरिवा दहम्। शप्तारमत्र त्वञ्जहि दिव्या वृक्षमिवाशनिः।। 2।।

卐20.18.3 यो न श्शपादशपत श्शपतो यश्च न श्शपात्। वृक्ष इव विद्युता हत आमूलादनुशुष्यतु।। 3।।

卐20.18.4 शप्तारं यन्तु शपथा यस्सुहार्तेन न स्सह। जिह्वा श्लोक्षणस्य दुर्हार्दः पृष्टीरपि श्रृणीमसि।। 4।।

卐20.18.5 यं द्विष्मो यश्च नो द्वेष्य घायुर्यश्च न श्शपात्। शुने प्रेष्ट्रमिव वक्षाम तं प्रत्यस्यामि मृत्यवे।। 5।।

卐20.18.6 प्रेतो यन्तु व्याध्यः प्राणुध्याः पुरा अशस्तयः। अग्नी रक्षस्विनीर्हन्तु सोमो हन्तु दुरस्यतीः।। 6।।

卐20.18.7 प्र पतेत॰ पाप लक्ष्मि नश्येत॰ प्रामुत॰ पतः। अयस्मयेनाङ्केन यं द्विष्म स्तस्मिन्त्वा सृजामः।। 7।।

卐20.18.8 या त्वा लक्ष्मी॰ पतयालुरजुष्टा अभि चस्कन्द वन्दनेव वृक्षम्। अन्यत्रास्मत्सवित स्तामितो धा हिरण्यहस्तो वसु नो रराणः। 8।।

卐20.18.9 निररणीं सविता साविषत्पदो निर्हस्तयो र्वरुणो मित्रोऽर्यमा। निरादित्या अनुमती रराणा॰ प्र णस्सुवात्सविता सौभगाय।। 9।।

卐20.18.10 एकशतं लक्ष्म्य स्साकं मर्त्यस्य जनुषेह जाताः। तासां पापिष्ठा निरत॰ प्र हिण्म श्शिवास्मभ्यं जातवेदो नि यच्छ।। 10।। 20 - 19

卐20.19.1 यत्त आत्मन् तन्वां घोरमस्ति यद्वो केशेषु प्रतिचक्षणे वा। तत्ते विद्वान् अपवाधेह प्र त्वा सुवात्सविता सौभगाय।। 1।।

卐20.19.2 निर्लक्ष्म्यं ललाम्यं निररातिं सुवामसि। यथा नोऽस्य सीदतो रायस्पोषमिहा सुव।। 2।।

卐20.19.3 अग्निमच्छा देवयतां मनांसि चक्षुंषीव सूर्यं सञ्चरन्ति। यदींसुवाते उषसा विरुपे श्वेतो वाजि जायसे अग्रे अह्नाम्। 3।।

卐20.19.4 इन्द्रो राजा जगतश्चर्षणीनामधि क्षमि विषुरूपं यदस्ति। ततो ददाति दाशुषे वसूनि चोदद्राध उप स्तुतश्चिदर्वाक्।। 4।।

卐20.19.5 शकुनिर्भुत्वा प्रभवस्ति पिप्पलं पत्या निविष्ट्या यदि वाघ पत्न्या। भीमाघोरा लक्ष्म्योस्सह भक्त्या स्ता इतो हविषा निर्यजाम।। 5।।

卐20.19.6 या ते गृहेषू तया धनेषु प्रजा लक्ष्मीर्यदि वा ते बभस्ति। तां बृहस्पतिर्हविषा वाधमानो निर्ह्वय प्रदध्मा दधिदूरमस्मत्। 6।।

卐20.19.7 रिश्यपदिं वृषदतीं गोषेधां विधमामुत। विलीढ्यं व्याधिं ब्रह्मणा तामनीनशम्।। 7।।

卐20.19.8 प्रत्योषन्ती मुत्सङ्गिनीमुत चित्रानु तारिणीम्। सिंहीं ज्येष्ठलक्ष्म्यीं व्याघ्रीं नाशयामसि।। 8।।

卐20.19.9 अनुध्यायिनीं प्ररिचरां विबद्धामुत हिंसतीम्। रोदस्य पत्नीं रोदनां प्रपद सामलक्ष्म्यः।। 9।।

卐20.19.10 वामस्पृहां पितृपद मेषन्तीं तपनीमुत। असिद्धन्ती प्रध्वंसिनीमष्ट्रावधाञ्च लक्ष्म्यं बह्मणा तामनीनशम्।। 10।। 20 - 20

卐20.1.1 असन्मन्त्य्रां वचस्यां संपिबन्तीं शक्करीम्। उत्तदां जनङ्गमां प्रपाधमामि लक्ष्म्यः।। 1।।

卐20.1.2 या ते घोरा तन्वामा विवेश याते लक्ष्मीस्सर्वा स्समक्ताः। अग्निष्टे ताश्चरति सौभगायाप श्शुन्धन्तु बृहते रणाय।। 2।।

卐20.1.3 अदेवृघ्नीं वरुणापतिघ्नीं बृहस्पते। इन्द्रापुत्रघ्नीं लक्ष्मीमस्यै तास्सवित स्सुव।। 3।।

卐20.1.4 या ते लक्ष्मीश्चाक्षुसि या तदस्तु या हस्तयो स्स्तनयोर्योप पक्षयोः। श्रोण्योर्भंससि या पदोष्ठे सर्वास्ताति क्राम घोराः।। 4।।

卐20.1.5 उरुभ्यां ते अष्ठीवद्ध्यां प्राष्णींभ्यां प्रपदाभ्याम्। यक्ष्म्यं श्रोणीभ्या मङ्गेभ्यो याः पापीस्ता अनीनशम्।। 5।।

卐20.1.6 आपाश्लीलं पृथिवी हन्तु यत्पदोरूप यो हस्तयोर्वरुणो मित्रो अर्यमा। अपादित्या अनुमती रराणाः प्र णस्सुवात्सविता सौभगाय।। 6।।

卐20.1.7 एता एना व्याकरं खिलेषा अदितीरिव। रमन्तां भद्रा लक्ष्म्यो याः पापीस्ता अनीनशन्।। 7।।

卐20.1.8 सायुषी नाम वा असि सहमाना सहस्वती। गृह कपोति मनुवर्त्तिनीं कुलायिनीं ता इहा वेशयामसि।। 8।।

卐20.1.9 सं चारिण्युभैर्या बभूवान्याऽन्यां जिन्वति भद्रपापीः। तां लक्ष्मीं निहवान यो मे भद्रां सुभद्रामपि सौभगाय।। 9।।

卐20.1.10 एकशतं लक्ष्मीस्तासां राज्ञी बभूविथ। भद्राभिर्भद्रे संभूय भद्रेणाभि सजस्व नः।। 10।। 20 - 21

卐20.21.1 दिवस्पृथिव्याः पर्यन्तरिक्षा द्वाता पशुभ्यो अध्योषधीभ्यः। यतो लक्ष्मी वृजिना स्संबभूव सा ब्रह्मणा प्रच्युता दूरमेतु।। 1।।

卐20.21.2 वालदुच्छस्य च गन्धेन हिरण्यवर्चसेन च। आ तु पुष्करिण्या यो गन्धो भगो मा तेन जिन्वतु।। 2।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐20.21.3 यदिन्द्रो अग्रे असुरान् जघान यतो लक्ष्मीर्न्यदधुर्मर्त्येषु। तासां पापिष्ठा निरितस्सुवाम शिवा अस्यै जातवेदो नि यच्छ।। 3।।

卐20.21.4 या त्वा लक्ष्मीर्देववृघ्नी या पतिघ्नी गृहेभ्यस्त्वानुदते या व्याडः। अतस्त्वमेन सो मुच्यमानो त्तरेमा स्स्रोत्यास्सप्त साकम्।। 4।।

卐20.21.5 निपिशन्तीं नितुदन्तीं संपिबन्तीं शक्करी। प्रभङ्गा भृणघ्नीं लक्ष्मीं ब्रह्मणा ता अनीनशम्।। 5।।

卐20.21.6 उदोजिष्ठां सहस्त्रां जयन्ती मपराजिताम्। लक्ष्मीर्याः पुण्याः कल्याणीस्ता अस्यै सवितस्सुव।। 6।।

卐20.21.7 अलक्ष्मीस्सम लिप्सत समलिप्सत लक्ष्म्यः। अजैषुर्भद्रा लक्ष्मीः परापापीरजेषत।। 7।।

卐20.21.8 लक्ष्मीणां लक्ष्मीतमे लक्ष्मीणामधिपाअसि। तन्त्वाहं शुद्धो गोप्स्यामि देवजा हि बभूविथ।। 8।।

卐20.21.9 सभा च मा समितिश्चावतां प्रजापतेर्दुहितरौ सचेतसौ। येन संगच्छादुप मा स तिष्ठादन्तर्वदामि हृदये जनानाम्।। 9।।

卐20.21.10 सभा सेना समिति सा मावन्तु प्रजापते र्दुहितरस्स चेतसः। येन वदाम्युप मा स शिक्षादन्तर्वदामि हृदये जनानाम्।। 10।। 20 - 22

卐20.22.1 मां वदन्तु मानु सर्वे वदन्तु मां प्राणन्तु मानु प्राणन्तु सर्वे। मां विशन्तु मानु सर्वे विशन्तु मयि देवा एकव्रता भवन्तु।। 1।।

卐20.22.2 सूर्यो मा चक्षुषः पातु बृहस्पतिर्वाच स्सोमो राजा सभायाः। इन्द्रो वो दृशे भवामि।। 2।।

卐20.22.3 वेद वै ते सभे नाम सुभद्रासि सरस्वति। अथो ये ते सभासदस्ते मे सन्तु सुवाचसः।। 3।।

卐20.22.4 इमा या ब्रह्मणस्पते विषूचिर्वात इरते। सध्रीचीरिन्द्र ताः कृत्वा मह्यं शिवतमाः कृधि।। 4।।

卐20.22.5 अहमेषां हस्तिरसमहं विज्ञान मा ददे। भर्वस्या स्तासास्सन्दद दोऽहं भूयासमुत्तमः। इन्द्रो योगा यथामिव।। 5।।

卐20.22.6 उत्तममुवोत्तमो कृध्युत्तमा हि बभूविथ। यान्त्वा भुरण्य रुन्वैच्छथ सञ्जीव शरद श्शतम्।। 6।।

卐20.22.7 अभिभूरहमागममहं भूयासमुत्तमः। इदं प्रतिप्रवादिनं द्विषन्तमवधून्वे।। 7।।
卐20.22.8 उरुष्टे वस्तिर्भवतु समुद्रस्य बिलं यथा। पुरोदकमिव सिच्य तं मूत्रन्ते तन्वस्परि।। 8।।
卐20.22.9 यथा वातो यथोदकं यथा समुद्र एजति। एवाते गर्भ एजतु निरैतु दशमास्यो बहिर्जरायुणा सह।। 9।।
卐20.22.10 इदमुच्छ्रेयोऽवसान मागां शिवे मे द्यावापृथिवी अभूताम्। असपत्नाः प्रदिशो मे भवन्तु न वै त्वा द्विष्मो अभयन्नोऽस्तु।। 10।। 20 - 23
卐20.23.1 वास्तोष्पत इहनश्शर्म यच्छ भद्राच्छ्रेयो अभि नो नेषस्व। अरिष्टा वीरा इह मे भवन्तु द्विपाच्चतुष्पान्मयस्तु पुष्टम्।। 1।।
卐20.23.2 अनमीवो वास्तष्पते विश्वारूपाण्याविशन्। सखा सुशेव एधि नः।। 2।।
卐20.23.3 ऋतेन स्थूणा अधि रोह वंशोग्रो विराजोन्नप वृङ्क्ष्व शत्रून्। मा ते रिषन्नुपसत्तारो अत्र विराजां जीवात्शरदश्शतानि।। 3।।
卐20.23.4 आरोहतं पक्षावमृतं वसानौ दम्पत्योः कृणुतं दीर्घमायुः। तत्र नारी पुत्रिणी जीव पत्नीदं कुलायमुप शंविशाति।। 4।।
卐20.23.5 अग्निर्मा विश्वाद्दुरिता त्पुनातु मातरिश्वा पवमानः पुरस्तात्। सोमो मा पातु मरुतो बृहस्पति र्वायुश्च मा पवमानः पुनीताम्।। 5।।
卐20.23.6 त्वया सत्यं वि जयन्ते तव सत्यं वि वाचनम्। अग्रे वृक्षस्य जायस इमं जनय पौरुषम्।। 6।।
卐20.23.7 वृक्षस्य शतशाखस्य मा धुन्तस्य निकृन्त नः। विभीतकस्य यत् फलं तेन त्वोन्मादयामसि।। 7।।
卐20.23.8 पूर्वे वातात्प्र पततं पूर्वे पतत मश्विभ्याम्। ईमेन्वर्वणी अहमुह्वे वाग्निमवीवरे।। 8।।
卐20.23.9 मा यक्ष्म मिह हाशिष्टा मारिष्यन्तो विगातु नः। सुभूत मस्मभ्यं धत्त युष्मानन्वेति किल्विषम्।। 9।।
卐20.23.10 इह वर्च इह पय इह चक्षुरूप ह्वये। इहेन्द्रियं दधातन।। 10।। 20 - 24
卐20.24.1 आ हि हरि अवघ्नतामि सं वत्संवनादियम्। अपकामं ह्यघ्न्ये वत्सो देवि ममाददे।। 1।।
卐20.24.2 ये त्वोप विदु र्विदुन्निज वत्सेप दोहस्व। अहन्ते वेद स्संमन स्सं वनन स्सवेदस्ते।। 2।।

卐20.24.3 एष ते अघ्न्ये वत्सस्तं वाञ्छः। तं सत्योऽग्निं ब्रूमः।। 3।।

卐20.24.4 या सरस्वती गोबननी सा वामेनां कसान्येत्य। इमाङ्गां वा नयतु स्वाहा।। 4। इत्येकर्चो नाम विंशतिकाण्डे चतुर्थोऽनुवाकः 20 - 25

卐20.25.1 दूराद् भेषजमा भृतम् बह्वन्यति योजनाः। अपश्यमस्यन्तं रुद्र मदूष्टन्दुष्कृतङ्करत्।। 1।।

卐20.25.2 भिनद्मि ते परावतो विश्वस्य शेप्यामिव। वृषेद्सो यथा मयि कृष्णो विषाणवाङ्गिव।। 2।।

卐20.25.3 सर्वा गावस्समनस स्सत्सभय स्सनाभयः। समानं विभ्रतीर्नावं वत्सानुज्जिहता मिव।। 3।।

卐20.25.4 इन्द्रस्त्वाग्रे अवानयत्सविता त्वा ततोऽपरः। तृतीयमश्विना त्वाघ्न्ये वाञ्छः।। 4।।

卐20.25.5 आते नयतु सविता सविता नयतु बृहस्पतिः। पतिर्यः पतिकाम्यस्तमस्मै धेह्योषधे।। 5।।

卐20.25.6 इन्द्रं वयमनुराधं हवामहे अनु राध्यास्म द्विपदा चतुष्पदा। मानस्सेना अररुषीरुपगु र्विषूचीरिन्द्र द्रुहो वि नाशय।। 6।।

卐20.25.7 भग प्रेहि प्रथमो ऽनु त्वा वयमे मसि। इन्द्राग्नी ब्रह्मणास्मान् स्वस्ति नयतां पथा।। 7।।

卐20.25.8 अदितिः प्रैतु प्रथमा बृहस्पतिः पुरयेता तेऽस्तु। इन्द्रो भयान् विश्वतश्शूद्रांश्च न आर्यांश्च।। 8।।

卐20.25.9 इमे ये अन्वसि युक्ता उष्टारा उत पील्वाः। तेषां समग्रभं पदस्स मा हिंसा स्स मुमुक्थ्यः।। 9।।

卐20.25.10 विमध्यमा अप्रोषत गर्दभा क्षिपिता इव। अधासुरस्य माया न इदं स्थापयामसि।। 10।।

20 - 26

卐20.26.1 सम्मा भगेन द्विगुणेन वर्चसा सम्मा पृथिव्या समवौषधीभिः। सं मापो मयो भुवो भगेन वर्चसा सिचन्।। 1।।

卐20.26.2 वर्चो मे मित्रावरुणा वर्चो देवी सरस्वती। वर्चो मे अश्विनोभा धत्तां पुष्करस्त्रजा।। 2।।

卐20.26.3 रुचं साम यजामहे याभ्यां कर्माणि कृण्वते। वि ते सदसि राजतो यज्ञं देवेषु यच्छताम्।। 3।।

卐20.26.4 अङ्गमङ्गं सन्तनोति चक्षुः प्राणमथो बलम्। प्रिया श्श्रुतस्य भूयास्मा युष्मन्तस्सु मेधसः।। 4।।

Sri Ganapati Sachidananda Avadhoota Datta Peetham • Mysore •

卐20.26.5 एतं नो देव सवितर्जगर्दात्री च रक्षितम्। पूषै नत्पुनराजत्व विलिष्ट मविह्नतम्।। 5।।

卐20.26.6 यावन्त्येव पलितानि साकं यज्ञिरेऽग्रशः। तेभ्यः प्रब्रवीमि त्वा कृष्णाः केशा भवन्तु मे।। 6।।

卐20.26.7 कृष्णान् केशान् सिनीवालि कृष्णान् केशान् सरस्वती। कृष्णान्मे अश्विना केशान् कृणुतं पुष्करस्रजा।। 7।।

卐20.26.8 अदो यदग्रे देवानां पुरस्तादव तिष्ठति। तन्मे अब्रवीत्त्वष्टा विलिष्ट भेषजम्।। 8।।

卐20.26.9 विश्वधाया असि विश्वभेषज्याकृता। यदामयति निष्कृधि निष्कृतिर्नाम वा असि।। 9।।

卐20.26.10 सन्ते चृतामि तगरीं सं योनिं सङ्गविन्यौ। सम्मातरञ्च पुत्रञ्च सं गर्भञ्च जरायुजम्।। 10।। 20 - 27

卐20.27.1 तिर्यङ् ते गर्भो भवतु हृदयेष्टं जरायु ते। आ दोषोमग्निमारोहाद् गच्छेयमसादनम्।। 1।।

卐20.27.2 वि ते चृतामि तगरीं वियोनिं वि गवीन्यौ। वि मातरञ्च पुत्रञ्च वि गर्भञ्च जरायुजम्।। 2।।

卐20.27.3 अन्नन्ते गर्भो भव त्वनुस्रोत जरायुजे। यथा त्वं पुत्रं विन्दस्व यथा जीवासि भद्रया।। 3।।

卐20.27.4 प्रवृष्ठे गर्भ मन्दो यो वियोनि आस्यं सृज। निरैतु दशमास्यो गर्भो गविन्योरधि।। 4।।

卐20.27.5 विष्कम्भेण विष्कम्भाय तौ विश्वञ्चौ व्याकुरु। एषवा मग्निरन्तरा सविश्वञ्चौ व्यस्यतु।। 5।।

卐20.27.6 विष्कम्भो विष्कभायतु मनश्च हृदयं च वाम्। वि वर्त्तय निवर्त्तय शश्वतीभ्यस्समाभ्यः।। 6।।

卐20.27.7 समुद्रन्त्वा प्र हिणोमि स्वां योनिमपि सन्दिहि। अछिद्रस्तन्वा भूयासं मा परा सेचि मे पयः।। 7।।

卐20.27.8 यदत्रापि रसस्य मेऽपरा पपाता स्मृतम्। तदिहोप ह्वयामहे तन्म आप्यायतां पुनः।। 8।।

卐20.27.9 कविरग्ने प्र विलेख धर्त्ता केशाङ् अधारयत्। इहैव विश्वतो दधद्धाता त्वष्टा त्वचि केशानचीक्लृपत्।। 9।।

卐20.27.10 सरस्वति व्रतेषु ते दिव्येषु देवि धामसु। मन्त्रो हिरण्यवर्तने प्र ण आयूंषि तारिषन्।। 10।। 20- 28

卐20.28.1 यदप्सुते सरस्वति गोष्वश्वेषु यन्मधु। तेन नो वाजिनीवती मुखमङ्घि सरस्वति वर्चसा।। 1।।

卐20.28.2 यो अद्य देव सूर्य त्वाञ्च माञ्चान्तरायति। तस्मिन् दुष्वप्न्यं सर्वं दुरितानि च मृज्महे।। 2।।
卐20.28.3 यो नोऽभिच्छाय मत्येष्यग्निं तिष्ठत्यन्तरा। तस्य वृश्चामि ते मूलन्न छायां करवोऽपरम्।।
3।।
卐20.28.4 घ्नन्त्वेनं देवेषवो ब्रह्मणो घ्नन्तु मेन्याः। योऽस्माकं प्रजापते अग्निं तिष्ठत्यन्तरा।। 4।।
卐20.28.5 प्रजापते योऽस्माङ् आ वृश्चाग्निं तिष्ठत्यन्तरा। तं मृत्यवे प्रयच्छामि स रुद्रस्या स्त्वा
गणः।। 5।।
卐20.28.6 प्र सुवैनान्देव वज्रेभ्यो मृत्यु विक्रमतामधि। सिनात्वेनान् निरृत्र्यृति मृत्योः पाशैर्बन्धैर
विमोक्यैः।। 6।।
卐20.28.7 सुमङ्गलेन वचसा केशिन् ग्रामन्वा वद। ब्रह्मणा ब्रह्मणात्वोलूकाछा वदामसि।। 7।।
卐20.28.8 पराङेव परावतं पराचीमनु संवतम्। यथा यमस्य त्वा गृहे रसं प्रतिचाकशा न्निरस्तं
प्रतिचाकशान्।। 8।।
卐20.28.9 शूनमुलूक नो वद यं द्विष्मस्तमितो नय। राज्ञो यमस्य ते गृहे सिकता उर्वि देव्यमाखुस्ते
मूषिको भागः।। 9।।
卐20.28.10 आ वद बहुलं गोष्ठं धीतवत्समनुष्टुगम्। ध्वाङ्क्षाय द्विपदां वद शुने चतुष्पदां वद।। 10।।
20 - 29
卐20.29.1 पुनर्मे राजा वरुणः पुनरिन्द्रः पुनर्भगः। पुनर्मे विश्वे देवा आयुर्जीवा तव अदुः।। 1।।
卐20.29.2 उत्तिष्ठातः प्र द्रवार्वाङ् मात्प्रतिष्ठाऽभिचाकशत्। सपत्न्या वर्च आदायाथा
स्माभिस्सहामसि।। 2।।
卐20.29.3 उत्तिष्ठत निर्द्रवत न व इहास्तु न्यञ्चनम्। अमुष्य वित्तमभि वस्सुवामि तदनुवध्वं
सुदतीरहिनस्तत्।। 3।।
卐20.29.4 योऽस्माकं सबन्धवो विष्ठिताः पृथिवीमनु। तेषामिन्द्र इव देवानामहं भूयासमुत्तमः।।
4।।
卐20.29.5 ये अग्नयः पार्थिवा आहिताः पृथिवीमनु। तेषामसि त्वं सङ्गथे स नो जीवातवे कृधि।।
5।।

卐20.29.6 चित स्स्थ परिचितस्स्था ग्नयस्स्थ निह्वा नाम। ते नो मा निह्वान् वध्यान्तेभ्यो वो नमो नवोऽहं वमेमि। योऽस्मान्द्वेष्टि यं वयं द्विष्म स्सोऽव वो ह्वमेतु।। 6।।

卐20.29.7 इन्द्राग्नि पुनराकुतिं नयत स्थिरवीरावपरावित गूः। अस्माकं सर्वा निह्वे सन्त्वेषां वयं विद्यामु गुह्यं नाम गवाम्।। 7।।

卐20.29.8 प्रजापतेरनु क्रन्दय विश्वे देवाः पदवायास्सं त्वासाम्। आदित्या अनुसंगत्य शूरा इन्द्रज्येष्ठाः पुनरावर्तयन्तु।। 8।।

卐20.29.9 इन्द्र प्रणेतर्वर्धय मामश्ववान् वहतु मां स्वश्वः। ऐन्द्राग्नं वर्म प्रतिमुञ्चमानो उभयेभ्यश्चारु समिति मा वदानि।। 9।।

卐20.29.10 चारुवाक् चारुवदनश्चारु संकाशी नो नृभिः। अ द्वेष्यꣳ प्रतिकाशो जिगीवाङ् अपराजितः।। 10।। 20 - 30

卐20.30.1 अपि वृश्च पुराणवद् व्रततेरिव गुष्पितम्। ओजो दासस्य दम्भय।। 1।।

卐20.30.2 यथेतदस्य संभृतन्मधु तदिन्द्रस्य वि भजावहै। म्लापयामि भ्रजश्शिभ्रं वरुणस्य व्रतेन ते।। 2।।

卐20.30.3 यथा शेपो अपायातै स्त्रीषु चासदनावयाः। अवस्थस्य क्नदीवतो भंगुरस्य नितोदिनः। यदुत्ततमव तत्तनु यदा ततन्नि तत्तनु।। 3।।

卐20.30.4 अमूम्लापयन्ते तन्वं क्लीबन्त्वा वीरुधाकरम्। अन्तꣳ कोश इव कोशेषु स्त्रीष्वप्याकृतश्चनः।। 4।।

卐20.30.5 आ नो मेदिं गृहपतिर्दधा त्विन्द्रेण मेदिना। आ नो मेदिं सरस्वत्या नो वहन्ति सिन्धवः।। 5।।

卐20.30.6 मेदिन्धाता मेदिं पूषा मेदमिन्द्रो दधातु मे। मेदिं मे अश्विनोभा धत्तां पुष्करस्रजाम्।। 6।।

卐20.30.7 उरू मेदिं य मे बाहू अष्ठीवन्ता उरश्च मे। अपां पर्यस्य उदरे मेदिमिन्द्रो दधातु मे।। 7।।

卐20.30.8 चर्मणी वोपनीतस्य सर्वान् केशान् बृहासि ते। अयस्पात्रमिव ते शिरो यथा सच्छमरं समम्।। 8।। 20 - 31

卐20.31.1 दिवस्तार उदसि श्रसन् सप्त सूर्यस्य रश्मयः। धारास्समुद्रिया आपस्स्तास्ते शल्यमुच्चिच्युवुः।। 1।।

卐20.31.2 इडे अग्निं स्वावसुं नमोभिरिह प्रसक्तो वि च यत्कृतं नः। रथैरिव प्र भरे वाजयद्भिः प्रदक्षिणं मरुतां स्तोममृध्याम्।। 2।।

卐20.31.3 सप्त स्रवन्ति शिशवे मरुत्वते पिता पुत्रेभ्यो अप्यवी वृतन्नृतानि। उभे पिपृत उभे अस्य राजत उभे यतेते उभे अस्य पुष्यतः।। 3।।

卐20.31.4 वेद स्वस्तिर्द्रुघण स्स्वस्ति परशुर्वेदिः परशुर्नस्स्वस्तिः। हविष्कृतो यज्ञिया यज्ञकामा स्ते देवासो हविरिदं जुषध्वम्।। 4।।

卐20.31.5 उप प्रियं पनिप्नतं युवानमाहुती वृधम्। अगन्म विभ्रतो नमः।। 5।।

卐20.31.6 इमा यास्ते शतं हिरा स्सहस्रं धमनीरुत। तासान्ते सर्वासां साकमश्मना बिल मप्यधाम्।। 6।।

卐20.31.7 इदं खनामि भेषजं मां पश्यमभिरोरुदम्। येना निचक्र आसुरीन्द्राणी केवलं पतिम्।। 7।।

卐20.31.8 अक्षौ मे मधुसंकाशे अनीकं नौ समञ्जनम्। अन्तः कृणुष्व मां हृदि मन इन्नौ सहासती।। 8।।

卐20.31.9 त्वाष्ट्रेणाहं वचसेर्ष्या व्यमी मदम्। अथो यो मन्युस्ते पते तमु ते शमयामसि।। 9।।

卐20.31.10 व्रतेन त्वं व्रतपते समक्तो हा विश्वा सुमना दीदिहीह। तन्त्वा वयं जातवेद स्समिद्धं प्रजावन्त उपसदेम सर्वे।। 10।। 20 - 32

卐20.32.1 प्रजावतीस्सूयवसे रुशन्तीर्मा वो विद्युतरन् मोतसेना। सुगेतीर्थे सुप्रपाणे पिबन्तीः परिवृह्य वधं गोहनं चरन्तीम्।। 1।।

卐20.32.2 पदज्ञास्थ रमतय स्संहिता विश्वरूपा उप नो देवी देवेभिरेत। इमं गोष्ठमिदं सदो घृतेना न स्समुक्षत।। 2।।

卐20.32.3 या ग्रैव्या अपचितो अथो या उप पक्ष्याः। वि जाम्नि या अपचित स्स्वयं स्रस स्ता इतो नाशयामसि।। 3।।

卐20.32.4 सान्तपना इदं हविर्मरुत स्तज्जुजुष्टन। युष्माकोती रिशादसः।। 4।।

卐20.32.5 यो नो मर्तो मरुतो दुर्हृणायु स्तिरश्चित्तानि वससो जिघांसति। तस्मिन्तान् पाशान् प्रति मुञ्चतां यूयं तपिष्ठे न तपसा हन्तना तम्।। 5।।

卐20.32.6 संवत्सरीणा मरुतस्स्वर्का उरुक्षया स्सगणा मानुषेभ्यः। तेऽस्मत्पाशान्प्रति मुञ्च सर्वान्सान्तपना मत्सरा मादयिष्णवः।। 6।।

卐20.32.7 धृषत्पिब कलशे सोममिन्द्र वृत्रहा शूर समरे वसूनाम्। माध्यन्दिने सवन आ वृषस्व रयिष्ठा नो रयिमस्मासु धेहि।। 7।।

卐20.32.8 युनज्मि त्वा ब्रह्मणा दैव्येनाऽस्मै क्षत्राणि धारयन्तमग्ने। दिदिढ्य स्मभ्यं द्रविणेह भद्रं प्रेमं वोचो हविर्दान्देवतासु।। 8।।

卐20.32.9 विते मुञ्मामि रशनां वि योक्त्रं वि नियोजनम्। इहैव त्व मजस्र एध्यग्ने।। 9।।

卐20.32.10 प्रजापते नहि त्वदन्यो विश्वा रूपाणि महिना यजान। यत्कामास्ते जुहुमो स्तन्नोऽस्तु वयं स्याम पतयो रयीणाम्।। 10।। 20 - 33

卐20.33.1 यत्ते देवा अकृण्वन्भागधेय ममावास्ये संवसन्तो महित्वा। सेमं यज्ञं पिपृहि विश्ववारे रयिं नो धेहि सुभगे सुवीरम्।। 1।।

卐20.33.2 घृतन्ते अग्ने दिव्ये सधस्थे घृतेन त्वा मनुरद्या समिन्धे। घृतन्ते देवा अप्या वहन्तु घृतन्त्वं दुह्रते गावोऽग्ने।। 2।।

卐20.33.3 मय्यग्रे अग्निं गृह्णामि सह क्षत्रेण वर्चसा बलेन। मयि प्रजां मय्यायुर्दधामि स्वाहा मय्याग्निम्।। 3।।

卐20.33.4 अप्सु ते राजन् वरुणो गृहो मिथो हिरण्ययः। ततो धृतव्रतो राजा सर्वा धामानि नो मुञ्चे।। 4।।

卐20.33.5 धाम्नो धाम्नो राजन्नितो वरुण नो मुचे। यदापो अघ्न्या इति वरुणेति यदूचिम। ततो वरुण नो मुचेः।। 5।।

卐20.33.6 यो रुद्रोऽग्नौ योऽप्स्वन्तर्य ओषधीर्वीरुध आविवेश। य इमा विश्वा भुवनानि चाक्लृपे तस्मै रुद्राय नमो अस्त्वद्य।। 6।।

卐20.33.7 अपेह्य रिरस्यरिर्वा असि। विषे विषमपृक्था अहिमेवाभ्यपेहि तं जहि।। 7।।

卐20.33.8 पृतनाजितं सहमानमग्नि मुग्रं हुवेम परमात्स धस्थात्। स नः पर्षदतिदुर्गाणि विश्वा क्षामद्देवो ऽतिदुरिता न्यग्निः।। 8।।

Sri Ganapati Sacchidananda Avadhoota Datta Peetham SGS

卐20.33.9 यद्यन्तरिक्षे यदि वात आस यदि वृक्षेषु यदि वोलपेषु। यदश्रवन् पशवमुद्यमानन्तद् ब्राह्मणं पुनरस्मा नुपैतु।। 10।। 20 -34

卐20.34.1 शम्मा वातो अभिवातु शम्मे तपतु सूर्यः। अहानि शम्भवन्तु मे शं रात्री प्रति धीयतां शमुषा मे व्युच्छतु।। 1।।

卐20.34.2 उत्तिष्ठत पितरो ये पुरा स्थ यं राजान मवशान मर्चतः। अयं नृणानृत्तम श्श्रेष्ठ आगन्तस्मै लोकं कृणुता यावत्स बन्धु।। 2।।

卐20.34.3 यस्येदं शस्यं प्रतिमाकृतं देवैर्दत्तमसूर्यं च संभृतम्। त्रिस्सप्त कृत्व ऋषयꣳ परेता मृत्युन्प्रत्यौहन् पदयोपनेन।। 3।।

卐20.34.4 अगमन् गाव स्सदनमपप्तद्वसतिं वयः। आस्थाने पर्वता अस्थु स्स्थाम्नि वृक्कावरीरमम्।। 4।।

卐20.34.5 आ गावो गोष्ठ मगन्नाग्नि धानान्यग्नयः। आ वृक्कौ समभित्सा तामुत्सक्तभेषजमसि।। 5।।

卐20.34.6 यथा द्याश्च पृथिवीश्चान्त स्तिष्ठन्ति ते जनम्। एवा रोगश्चा स्रावश्च मुञ्चस्तिष्ठ त्यन्तरा।। 6।।

卐20.34.7 अस्थादिदं विश्वं भुवन मस्थाद्वचो वनच्यवः। अस्थुर्वृक्षा ऊर्द्ध स्वप्नास्तिष्ठाद्रोगो अयं तव।। 7।।

卐20.34.8 शतं यद्भेषजानि ते सहस्रं संभृतानि च। तेषामसि त्वमुत्तम मनास्राव मरोगणम्। श्रेष्ठमास्राव भेषज वसिष्ठं रोग नाशनम्।। 8।।

卐20.34.9 यदद्य त्वा प्रयति यज्ञे अस्मिन् होतश्चिकित्वन्नवृणी महीह। ध्रुवमयो ध्रुवमुता शमिष्ठ प्रजानन्विद्वान् उप याहि सोमम्।। 9।।

卐20.34.10 समिन्द्र नो मनसा नेष गोभिस्सं सुरिभिर्हरिवन् सं स्वस्त्या। सं ब्रह्मणा देवकृतं यदस्ति सं देवानां सुमत्या यज्ञियानाम्।। 10।। 20 - 35

卐20.35.1 सं वर्चसा पयसा सन्तनूभि रगन्महि मनसा सं शिवेन। त्वष्टा सुदत्रो वरिवꣳ कृणोत्वनु नो मार्ष्टु तन्वो विरिष्टम्।। 1।।

卐20.35.2 संस्रावभागास्तविषा बृहन्तः प्रस्तरेष्ठा बर्हिषादश्च देवाः। इमं यज्ञमभिविश्वे गृणन्तु स्वाहा देवा अमृता मादयन्ताम्।। 2।।

卐20.35.3 यानावह उशतो देव देवांस्तान् प्रेरय पुनरग्ने स्वे सधस्थे। यक्षिवांस४ पपिवां सो वधून्यस्मै धत्त वसवो वसूंनि।। 3।।

卐20.35.4 अयन्नो यज्ञोऽप्येतु देवा नुत्तरां वेदिमप्येतु वेदिः। विमुञ्चा म्यृत्विजो दक्षिणाभि र्देवा यज्ञैश्च पुनरुत्तरावत्।। 4।।

卐20.35.5 यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ। स्वां योनिं गच्छ स्वाहा।। 5।।

卐20.35.6 एष ते यज्ञो यजमान स्सहसूक्तो नमो वाकः। सुवीरस्स्वाहा।। 6।।

卐20.35.7 मनसस्पत इमन्देव यज्ञं स्वाहा। वाचि स्स्वाहा। वाते धा स्वाहा।। 7।।

卐20.35.8 स्वाहा हूतेभ्यो वषङ्कृतेभ्यः देवागातुविदो गातुं वित्वा गातुमितस्स्वाहा।। 8।।

卐20.35.9 सं बर्हिरक्तं हविषा घृतेन समिन्द्रेण वसुभि स्सं मरुद्भिः। सन्देवेभि र्विश्व वेदेभि रक्तमिन्द्रं गच्छतु यत् स्वाहा।। 9।।

卐20.35.10 आशासाना सौमनसं प्रजाञ्चक्षुरथो बलम्। इन्द्राण्यानुव्रता सन्नह्ये ऽमृताय कम्।। 10।।

20 - 36

卐20.36.1 इन्द्राणी नारी सुभगा सुपत्न्यु दंशेन पति विद्ये बिभेद। त्रिंशद्यस्या जघनं योजना न्युपस्थ इन्द्रं स्थवीरं पिपर्त्तु।। 1।।

卐20.36.2 सेनासि पृथिवी धनञ्जया अदितिर्विश्वरूपा सूर्यत्वक्। इन्द्राणि प्राषाट् सञ्जयन्ती तस्यै तदेना हविषा विधेम।। 2।।

卐20.36.3 अजिरोत्तिष्ठ त्युत्थिताग्रे त्वरी प्राषाट् तूर्त्तमुप चरन्तीम्। प्राषाट् कस्वियिषोग्रे त्वरिकत्स्वयिष मे स त्वा भद्रे।। 3।।

卐20.36.4 पर्यावर्त्ते दुष्ष्वप्न्या त्पापात्स्वप्ना दभूत्याः। ब्रह्माहमन्तरं कृण्वे परा स्वप्न मुखा श्शुचः।। 4।।

卐20.36.5 यत्स्वप्ने अन्नमश्नन्ति न प्रात रधिगम्यते। सर्वन्तदस्तु न श्शिव न्न हि तद्दृश्यते दिवा।। 5।
इत्येकर्चो नाम विंशतिकाण्डे षष्ठोऽनुवाकः 20 - 37

卐20.37.1 विश्वं विव्यञ्जि पृथिवीव पुष्टमायदाय त्प्रतिगृह्णा म्यन्नम्। वैश्वानरस्य महतो महिम्ना स्योन मस्मभ्यं मधुमत्कृणोतु।। 1।।

卐20.37.2 त्रिश्शृङ्गमसि दुरभिधर्षमिन्द्राय धीयसे। पूषा ते अप्राषिता।। 2।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐20.37.3 प्राहि नो अग्ने तन्वं पाहि गा॰ पाहि यत्तनू कृतम्। अहूतादा वमत्यौं तावस्मिन्पातु अंहसः।। 3।।
卐20.37.4 यौ देवानामहुतादावमत्तौं स्वर्भानुश्च स्वर्ज्योतिश्च। तयो स्त्वास्येन प्राश्ना म्यग्नेष्ट्वा वैश्वानर स्यत्वास्येन प्राश्नामि।। 4।।
卐20.37.5 दक्षश्चत्वा मानस॰ प्राश्नीतां स्वर्भानुश्च मरुतश्च। सा पृणन्पूर्त्वा वि राजा मो वयं प्रजया धनेन।। 5।।
卐20.37.6 अनाधृष्यस्य ते पितोरनाधृष्य श्शवसः। सर्ववीरा स्सर्वात्मानो भक्षं क्रियास्म।। 6।।
卐20.37.7 कामो मे राज्ञ॰ प्र विवेश त्वान्त महन्निरुह्य ये पुनः। गृहेषु गोषु मे मनो अक्षोरस्तु मे भगो जिह्वायामस्तु मे रसो वाह्वोरस्तु मे बल मूर्वोरस्तु मे जवः।। 7।।
卐20.37.8 दिवोऽसि निर्मथितं पृथिव्या अध्युद्धृतम्। समुद्रा दुच्यसे जात मक्ष्यामय भेषज मस्याथर्वणम्।। 8।।
卐20.37.9 पूषा पुरस्तादावर्तय चतस्रो भूम्यादिशः। स गलिग पुषलिग पुनर्न नष्टमायति जीवेन भूनजामहै।। 9।।
卐20.37.10 यदाभर च्छतदग्नि स्तेजने नष्टवेदनम्। खर्गलेव पुनर्दहं पुनरस्माश्विना नष्ट माजतम्।। 10।। 20 - 38
卐20.38.1 यद्यस्य प्रियजा यदि वान्यत आभृतः। विषल्पकस्य भेषजीर्देवीराप इमामवन्।। 1।।
卐20.38.2 वयस्य पूतिकस्य दृशाम्वस्योत गर्मुतः। तेषां समग्रभं शुष्ममाशूनान्धावतामिव।। 2।।
卐20.38.3 यस्तनु॰ पृथुर्वीणा वधू इव प्र सर्पति। मयुर॰ किल ते विषङ्कक वा कृश्च जक्षतु।। 3।।
卐20.38.4 उदीचीन॰ प्र तनोति नितत्नी र्भुम्यामधिम्। ओज्मानं पश्य वीरुधो मिथुना समवीवनत्।। 4।।
卐20.38.5 न त्वा चरन्नि तत्निना वारि त्वा गां सहीयसा। सेनादभि द्रवीयसी सुपर्णान्नु गरीयसी।। 5।।
卐20.38.6 यदत्रापि मधोरहं निरिष्टं विषमश्नुतम्। अग्निश्च तत् सविता च पुनर्मे जठरे धत्ताम्।। 6।।
卐20.38.7 अग्ने रुद्रस्य जायासि दुरितासि प्रजापते। उच्चै श्श्लोको दानपत्नी हवीश्रव उप त्वा ह्वयस्व उप त्वा मा ह्वयस्व।। 7।।

Sri Ganapati Sacchidananda Avadhoota Dattapeetham

卐20.38.8 नरिष्टा नाम वा असि यासौ हरिणो वृक उलादधि प्र स्कन्दति। एवा नि स्कन्दति पित्र्यात् भगं जयन्ति धनं जयन्ती।। 8।।

卐20.38.9 रिज्यश्वा मह्यमब्रवीत् गन्धर्वस्यानु शासनम्। एतत्ते पतिवेदनम्।। 9।।

卐20.38.10 पाटा भिनत्ति कुम्भीं पाटा कुम्भी गो दहनीम्। पाटा सर्वस्य पात्रस्य वधूङ्कृणोतु विश्वतः।। 10।। 20 -39

卐20.39.1 अपेहि तक्मञ्ज्वर परो अन्यमस्मदिच्छ पुरुषङ्किञ्च दैवम्। वेद ते तक्मन्पितरं वेद मातरम्।। 1।।

卐20.39.2 शमीवान् यशसामेति शामिवानभिशोकः। अभिशोको हार्षणी हर्षणो जाङ्गभिः।। 2।।

卐20.39.3 यꣳ पशूनां मार्जनीयो यन्त्व मंशेन भेजिषे। अभि हि तक्मन्न गर्दभन्न मा मभ्येतुमर्हति।। 3।।

卐20.39.4 विस्निस नाम ते माता किकशा नाम ते पिता शमिदा नाम ते स्वसा। गिरिङ्गच्छ गिरिजासि गिरौ ते माहिषो गृहः।। 4।।

卐20.39.5 दासी चक्रमा स्थापनास्ना ते निष्क्रन्दयिष्यति। आ वातो वात्वनध स्सर्वस्य दूतो अभिशस्त्या याः।। 5।।

卐20.39.6 जलासमित्प्र सिञ्चतु तद्विषस्योप सिञ्चतु। यामस्य पृश्निबाहु रिष्टं हरिदपर्णम्।। 6।।

卐20.39.7 तामस्य निष्विदामसि यथा जीवासि भद्रया। अश्रान्तस्य त्वा मनसा युनज्मि प्रथमस्य च।। 7।।

卐20.39.8 उत्कुल मुद्वहो भुवो दुह्यत् प्रतिधावतात्। एतन्दन्तं निर्ऋत्या घोरमाहुर्यस्त आसन्नवरुढ एषः।। 8।।

卐20.39.9 तन्दुर्हार्दे प्रहिणोमि घोरं मा नो हींसी ज्यायसो मा कनीयसः। शिव श्शग्म भवतु दन्त एष मा नो हींसी ज्यायसो मा कनीयसः।। 9।।

卐20.39.10 अघमार मघशंस न्निर्ऋथन्तन्ते दन्तं सचताङ्घोर एषः।। 10।। 20 - 40

卐20.40.1 अघमारमघशंस न्निर्ऋथं दुहार्दे दन्तं प्रहिणोमि घोरम्। सो अस्याभू द्विपदश्चतुष्पद श्शिवो अस्मभ्यं सुमना अस्त्वेषः।। 1।।



Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐20.40.2 शिवं ते दन्तं हविषा कृणोमि शिवो मह्यं कुर्वते दन्तोऽस्तु। शिवानि ते त्रीणि त्रिकदुकाणि सन्तु शिवो मह्यन्नभसा रोहसी स्ताम्।। 2।।

卐20.40.3 पुरुरूपा पृथुपेषा अरं कृद्यहतोरसि। प्रतिष्ठासि चतुष्पदां यस्त एष पञ्चमः पादस्तं तेन प्रतिगृह्णामि।। 3।।

卐20.40.4 स सर्परी रमतिं वाधमाना वृहन्मीमाय यमदग्नि दत्ता। आ सूर्य दुहिता ततान श्रवोदेवेष्वमृत मदुर्यम्।। 4।।

卐20.40.5 स सर्परीर भरत्भूय सेभ्योऽधिश्रवः पाञ्चजन्यासु कृष्टिषु। सा पक्षीया न भूमायुर्दधाना यां मे पुलस्ति यमदग्नयो ददुः।। 5।।

卐20.40.6 अघ्न्ये ये दूरमुत्क्रन्द न्निपदश्चतुरो जहि। अधागो दुह श्शीर्षणि शपां उरसि वा दय।। 6।।

卐20.40.7 शृङ्गाभ्या मुपस्त्रष्टारं पदावर्तय गो दुहम्। अथो येऽन्ये तिष्ठन्ति तान्विशूचो विनाशयः।। 7।।

卐20.40.8 यथानर्त्ता सक्षिकाजिं कुल्पमभि नृत्यति। एवात्व मघ्न्ये पद सर्वान् साकमुदर्दय।। 8।।

卐20.40.9 उदुक्षीर मत्तभितं स्यन्दन्ता मस्य धेनवः। असृक्तस्य गावो दुहां यो अस्मान्ना पचायति।। 9।।

卐20.40.10 ऋक्षीकाया यथा मनो व्याघ्रस्य यथा मनः। एवा तस्य गवां मनोऽस्मान्ना पचायति।। 10।। 20 - 41

卐20.41.1 उत्तमोऽस्योषधीनां वीरुधां बलवत्तमः। य स्यन्दन त्वमोषधे सर्वास्यन्द गा इमाः। अरन्तु रथन्तुम्।। 1।।

卐20.41.2 वनेषु शुष्मोऽस्तु ते पृथिव्या मस्तु यद्धरः। अकृदश्वो अकृत्खरो अकृदश्वतरो हरिः।। 2।।

卐20.41.3 एवासु बाल्हिके तव भसन्नदत्वाशिता। यथा नन्दति गर्दभो एवानन्दति ते भसत्।। 3।।

卐20.41.4 व्रीहेर्यवस्य माषस्यो तत्पश्यामि दर्शनम्। उद्धरो द्यावापृथिवी तदाप उदग्नि मुदिद्र मुत्सूर्य मुद्रा त्रीमुदहः।। 4।।

卐20.41.5 नमस्कृत्य द्यावापृथिवीभ्यामन्तरिक्षाय मृत्यवे। मेक्ष्वा मूर्ध्वस्तिष्ठन्मा मा हींसिषु रीश्वराः।। 5।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐20.41.6 यन्मेस्त्वा यदप्सरसः पयो देवीरहृषत्। तदिहोप ह्वयामहे चक्षुषे च बलाय च देवानान्देवहूत्या मयि त्वा देवताः पुनः।। 6।।

卐20.41.7 यास्य दोषा रसस्य मे त्वन्देवी तत्तर्पिथ। नाराशंसेन स्तोमेनाहन्त्व त्पुनराददे युष्म दप्सरसस्परि।। 7।।

卐20.41.8 यन्मे तन्वो रसं वयमुदप्स रसस्परि। नाराशंसेन स्तोमेन प्रजा माप्यायामहे।। 8।।

卐20.41.9 यन्मे पयो विषिषिचे जाग्रतस्स्वपतश्च यत्। पुनस्तदद्यमेव देवा आसिञ्चतु तनू अधि।। 9।। 20 -42

卐20.42.1 यदद्य दुग्धं पृथवी मसक्तं यदोषधी रप्यसरद्यदापः। वत्से पयो गवि पयो यदस्मा ऽस्मत्सृजतां पयः।। 1।।

卐20.42.2 परापतन्त्वाशवो ऽश्वसाधो धुरं यथा। एवामुत्र प्र भिद्यस्य वि वस्तेरा सं सृज।। 2।।

卐20.42.3 विषितन्ते वस्थिबिलं समुद्रस्योदधेरिव। प्रते भिनद्मि मेहनं वर्त्तं वेशन्त्या इव।। 3।।

卐20.42.4 यदस्य पारे तमस श्शुक्रं ज्योतिरमर्त्यम्। तन्नः पात्वं हसस्तन्नः पातु विश्वतः। आ नो मेधा सुमतिर्विश्वरूपा हिरण्यवर्णा जगती जगम्यात्।। 4।।

卐20.42.5 सा नो अग्ने मेधा जुषतामिह प्रचेताः। निष्क्रामत्वृषिर्यो अत्र वयांश्च सयुजा या विहस्तः।। 5।।

卐20.42.6 सप्तर्षीणां स्यूमरश्म पथैतु अश्वान्मृगान्पुन रप्येतु कृष्णः। सप्तर्षीन्गाच्छ स्यूमरश्म ये मृगान्कृष्ण स्सचतां वाजो अश्वम्।। 6।।

卐20.42.7 ईडे अस्मा न्सुप्रजस स्सुवीरान्सह यज्ञेन पयसा सजाते। नमोस्त्वर्षये स्यूमरश्म ये नमः कृष्णाय वाजोऽस्य।। 7।।

卐20.42.8 नमो देवायावितेषु जिष्णवे यन्नो वाजी प्रतिराजात्यायुः। अति यन्त्वहा न्वति रात्रि रत्युषसः।। 8।।

卐20.42.9 आपो अन्तर्ध्वावरी स्ताभिरन्तर्दधे त्वा। यथा नैवाद्घ्येमासि वह्नी श्शुष्मोन्त्वोषधीः।। 9।।

卐20.42.10 एवा प्रशुष्ममामनु यच्च पश्यामि यच्च न। पाटा विभर्त्यङ्कुशं हिरण्यवन्त मङ्किनम्। तेनाहं मन्वेषां स्त्रीयमा लुम्पामि ममैधसम्।। 10। इत्येकर्चो नाम विंशतिकाण्डे सप्तमोऽनुवाकः 20 - 43

卐20.43.1 इन्द्र जीव सूर्य जीव देवा जीवा जीव्यासमहं। सर्वमायुर्जीव्यासम्।। 1। अनाभूरश्मि नहि भवे तन्त्यां बद्धो दिवा विश्रितः। आहात्वा निरृत्ऋतये रन्तिरसि रमतिरसि।। 2। सं श्रुतेन राधिषीय मा श्रुतेन विराधिषी। दर्शोऽसि दर्शतोऽसि विश्वतस्सं दृष्टः। सोमोऽसि रुद्रोऽसि।। 3। तन्त्वा यन्देवा अंशु माप्यायन्ति। तन्त्वा यमादित्या अंशु माप्यायन्ति। तन्त्वा यमक्षितमभित ये पिबन्ति स न स्सोमꣳ प्रतिरद्दीर्घमायुः।। 4। अन्येषां प्राणेना प्यायस्व मास्माकं प्राणेन। योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मस्तस्य प्राणेनाप्यायस्व।। 5। चिदसि समुद्र योनि श्श्वेन ऋतावान्। सोम पीथोपनए ह्यर्वाङ् रायस्पोषेण प्रजया धनेन।। 6। स्वरवस्थ नमो वो महतामुर्जायै। पर्णामावगाम्।। 7। प्रजापतिꣳ परमेष्ठी नारदो नाम वा असि। बृहस्पतिꣳ प्रजापतिर्नारदो ब्रह्मचारिणः।। 8। अपश्चाद्दग्धान्नस्य भूयासम्। अन्नादायान्न पतये ये रुद्राय नमोऽग्नये।। 9। या ते वसोवात इषु स्सा त एषा। तया नो मृड।। 10।।

20 - 44

卐20.44.1 अग्नि स्तक्मान मपवाधतामितो वरुणो ग्रावा मरुतꣳ पूतदक्षाः। वर्हिषद स्समिध श्शोशुचाना स्तक्मन श्शोमां अभिनिर्नुदन्तु।। 1।।

卐20.44.2 योऽद्य बभृणायसि स्वपन्तमिष्वा रुषंशयानम कोविदम्। स न स्सहस्रवीर्यानुष्ठीत श्शिवो भव।। 2।।

卐20.44.3 देवो यातुरसि मृडोऽसि। मृडास्माकं द्विपदे चतुष्पदे। मा तस्य मामृडो द्विपदे चतुष्पदे योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः।। 3।।

卐20.44.4 अनुयातुरसि मृडोऽसि। मृडास्माकं द्विपदे चतुष्पदे। मा तस्य मामृडो द्विपदे चतुष्पदे योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः।। 4।।

卐20.44.5 ब्रह्म यातुरसि मृडोऽसि। मृडास्माकं द्विपदे चतुष्पदे। मा तस्य मामृडो द्विपदे चतुष्पदे योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः।। 5।।

卐20.44.6 मनुष्य यातुरसि मृडोऽसि। मृडास्माकं द्विपदे चतुष्पदे। मा तस्य मामृडो द्विपदे चतुष्पदे योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः।। 6।।

卐20.44.7 परेत यातुरसि मृडोऽसि। मृडास्माकं द्विपदे चतुष्पदे। मा तस्य मामृडो द्विपदे चतुष्पदे योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः।। 7।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐20.44.8 अवभरणो नामासि देव त्राणोऽक्षमापः। योऽस्मान्द्वेष्टि यं द्विष्मस्तत आसन्नपि दध्मः।। 8।।

卐20.44.9 यददोस्नाना आसुरो दीक्षितो चरत्। तस्य यन्मल मवाश्रवत्स हि नासीताव दनुष्या त्वा विद्मा रसं वृश्चिक ते विषम्।। 9।।

卐20.44.10 केतुलुङ्गा नाम ते माता कर्कटः पिता। तात्सत्य मरसमभग ते विषम्।। 10।।

卐20.44.11 द्वे विषस्य धारे स्त्रिया अन्या पुंसो अन्या। ते उभेऽरसे।। 11।। 20 - 45

卐20.45.1 विश्ववित्तं नष्टमनुपश्यसि। अदो मे नष्टं तन्मे पुनर्धेहि।। 1।।

卐20.45.2 विश्वकर्मन्तत्त्व मुपगच्छसि। विश्वव्यच स्तत्त्वय्यद्धा हितम्।। 2।।

卐20.45.3 अदो मे नष्टं तन्मे पुनर्धेहि। परि पूषा पुरस्ताद्धस्तं दधातु दक्षिणम्।। 3।।

卐20.45.4 पुनर्नो नष्टमायति जीवेन भुनजामहै। इन्द्रस्त्वाभैत्सर्पतु त्वा ग्रेष्ठाः दधात्।। 4।।

卐20.45.5 तदा स्नावस्य भेषजं तदुरोग मनीनशत्। विष्णोर्मनसा पूतो स्थ देवो वा सवितोत्पुनातु।। 5।।

卐20.45.6 अछिद्रेण पवित्रेण सहस्रधारेण सुप्लवा । हृदा पूतं मनसा जातवेदो विश्वानि देवो वयुनानि विद्वान्। सप्तास्यानि तव यान्यग्ने तेभ्यो जुहोमि स जुषस्व हव्यम्।। 6।।

卐20.45.7 अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अधिराज एषः। तस्मै जुहोमि हविषा घृतेन मा देवानां योयुवद् भागधेयम्।। 7।।

卐20.45.8 यस्ते केशाङ् अवाचीनान् क्रिमिर्बृहति मूर्द्धतः।। 8।।

卐20.45.9 प्राणं तस्योप दशया वीरुधः खनति भेषजी। वेद वै ते भगन्नाम भूरिर्नामासि रयिर्नाम।। 9।।

卐20.45.10 तं त्वा भग प्र विशामि स मा भग प्र विशा। तस्मिन् सहस्र काण्डे नि मृजेन भग त्वयि।। 10।। 20 - 46

卐20.46.1 आ मा गच्छन्तु ब्रह्मचारीणो स्वाहा।। 1।।

卐20.46.2 चराणि स्वाहा।। 2।।

卐20.46.3 वि राजानि स्वाहा।। 3।।

卐20.46.4 असानि भद्रेभ्यश्श्रेयान् स्वाहा।। 4।।

卐20.46.5 यशस्वी जनुतामनुचराणि स्वाहा।। 5।।

卐20.46.6 देवानां मा मनुष्याणां पशूनां ब्रह्मचारीणाम् प्रियं प्रजापते कृणु स्वाहा।। 6।।

卐20.46.7 हा अम्वपनेचरी।। 7।।

卐20.46.8 अयं मे हस्तो अक्षितो रुदति तमुमेऽगदं कृधि।। 8।।

卐20.46.9 त्वं क्षितस्य भेषज्युभयो रक्षितस्य च उदेलडी।। 9।।

卐20.46.10 असुरसि स्वाहा क्रतुरसि स्वाहा।। 10।। 20 - 47

卐20.47.1 पुरुषोऽसि स्वाहा।। 1।।

卐20.47.2 विजातिरोऽसि स्वाहा।। 2।।

卐20.47.3 प्रजापतिरसि स्वाहा।। 3।।

卐20.47.4 स्वजाति नामासि स्वाहा।। 4।।

卐20.47.5 स्वजातिरसि स्वाहा।। 5।।

卐20.47.6 वेद् वै ते नारद् नाम वाग्नीमासि। तस्य ते यशो भक्षीय।। 6।।

卐20.47.7 वेद् वै ते अशना त्कुमार नाम चक्षुरग्निमासि। तस्य ते मधु भक्षीय।। 7।। 20 - 48

卐20.48.1 स्नुषासौ सेनास्याः सेनाया इहास्या स्स्वसुरो यमस्यास्स्वसुरः। सा यथा स्नुषा स्वसुरादधस्पद्यते अधरा पद्यते नीचि पद्यते। 1।।

卐20.48.2 एवासौ सा नेस्यास्सेनाया अधस्पद्यता मधरपद्यता न्नीचि पद्यताम्। सेहाग्निभ्यां हतवीरां हतपूरुषां पराजितां प्रशुभै तु परमां परावतम्।। 2।।

卐20.48.3 तमिन्द्राग्नी हतवीरां हतपूरुषां परजितां प्रणुत्त्तां यतीमनु वाक्शीताम्। पराजित एत्व सावमुष्यायणो ऽमुष्या४ पुत्रः।। 3।।

卐20.48.4 अस्नाव्यक्त एतु। अघं हिरण्येत्वसावा मुष्यायणो अमुष्याः पुत्रः।। 4।।

卐20.48.5 अघप्रतीको ऽघे नैनं विध्यामः। अभूया एनं पाशेसि त्वा दुष्ष्वस्वप्नेन संसृज्य मृत्योर्व्यात्त आसन्नपि दधामि।। 5।। 20 - 49

卐20.49.1 सृजाम्यप उशती उपेमास्सं रराणाः पयसा सं बभूवुः। दत्तो अस्मभ्य न्द्रविणेह भद्रा अपां प्रति प्रतिगृह्णात्वेनाः।। 1।।

卐20.49.2 उत्त्रयस्व बहुर्भवस्वेन महसा यव। पृणीहि सर्वा पात्राणि मा त्वा दिव्या शनिर्वधात्।। 2।।
卐20.49.3 आश्रृण्वन्तं यवं देवं यत्र त्वाच्छा वदामसि। तदुत्त्रयस्व द्यौरिव समुद्रे वैध्यक्षितः।। 3।।
卐20.49.4 अक्षितास्त उपसदो अक्षितास्सन्तु राशयः। प्रणतो अक्षिता स्स न्त्वत्तार स्सन्त्वक्षिताः।। 4।।
卐20.49.5 सकृद्ध द्यौरजायत सकृद्भूमिरजायत। सकृद॰ पृश्न्या दुग्धं तदन्यो नानुजायते मा त्वानुजनि कश्च न।। 5।।
卐20.49.6 इष्वग्रमिषु या वनं मणिं कृण्विषु मङ्गलम्। समा शरव्याभ्य॰ पातु दिवा नक्तञ्च जीवसे।। 6।।
卐20.49.7 प्रतिष्ठितोऽसि ब्रह्मणा जम्भयामसि त्वा वयम्। अपामार्गेण विद्वला इदन्त्वाप मृज्महे युवन्तं क्षिवन्तन्त्वञ्जहि।। 7।।
卐20.49.8 शीर्णन्त एतन्न क्षुतन्तदेत त्संयुतं दुक्षुतन्तुभ्यमस्तु। रुद्रा शनिष्टे जघनेन ग्रीवा इन्द्र इव वृत्रं वज्रेण हन्तु।। 8।।
卐20.49.9 अनुहवं परिहवं परिवादं परिक्षपम्। सर्वैर्मे रिक्त कुम्भान्परा तान्सवित स्सुव।। 9।।
卐20.49.10 अपपापं परिक्षवं पुण्य भक्षिमहि क्षवम्। शिवा ते पाप नासिकां पुण्यगश्चाभि मे हताम्।। 10।। 20 - 50
卐20.50.1 अभित्वा पञ्च शाखेन हस्तेनाधां सहियसा। विद्विषावहै न विभवाव कदा च न।। 1।।
卐20.50.2 चक्रवाकं संवनन मश्वस्य स्वङ्करम्। अमुस्वं कृणोतु मे यमहङ्कामये प्रियम्।। 2।।
卐20.50.3 यत्कक्षीवान् संवननं च्यवनश्चक्र आसुरः। तद्वां कृणोमि दम्पती सं प्रियो भवतं युवम्।। 3।।
卐20.50.4 यथा संयुक्तौ पक्षिणौ सं प्रियौ चरतौ मृगौ। एवा संयुक्तौ ब्रह्मणा सं प्रियौ भवतं युवम्।। 4।।
卐20.50.5 प्रेहि प्र हर पादावा गृहेभ्यस्स्वस्तये। कपिञ्जल प्रदक्षिणं शतपत्राभि नो वद।। 5।।
卐20.50.6 भद्रं वद दक्षिणतो भद्रमुत्तरतो वद। भद्रं पुरस्तान्नो वद भद्रं पश्चात् कपिञ्जल।। 6।।
卐20.50.7 शुनं वद दक्षिणत श्शुनमुत्तर तो वद। शुनं पुरस्तान्नो वद शुनं पश्चात् कपिञ्जल।। 7।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐20.50.8 यौ वनानि महयसि जिग्युषामिव दुन्दुभिः। कपिञ्जल प्रदक्षिणं शतपत्राभि नो वद।। 8।
इति एकर्चो नाम विंशतिकाण्डे अष्टमोऽनुवाकः 20 - 51
卐20,51.1 उत्तभ्नामि गवां क्षीर मुद्रथं रथवाहनम्। उत्तभ्ना म्यस्माकङ्वीरा मयि गावश्च गोपतौ।। 1।।
卐20,51.2 उत्ताभ्नातु सविता देवो अग्निरुन्मित्रावरुणावश्विनोभा। सर्वा न्सपत्नानवधीर्युगेन विशां पतिरुप सृप्तैध्यत्र।। 2।।
卐20,51.3 त्वं हि रुद्र वशिनी निर्विषे त्वं देवेषूतमानुषेषु। यदीशानो नयसि यच्च हिंस्यस्माकमस्तु पितृषु स्वधावत्।। 3।।
卐20,51.4 वायवा रुन्धि नो मृगानस्मभ्यं मृगयद्भ्यः। स नो नेदिष्टमा कृधि वातो हि रशनाकृतः।। 4।।
卐20,51.5 उदसूर्य उदयनन् कृत स्थाम गच्छतु ते पुनः। यतो नि लयते यत् कृत उत् प्रस्तम्भमाजतु। सेमं पृथुं प्रवर्त्तमेजमानस्त्वभिन्नं कर।। 5।।
卐20,51.6 य॰ पार्श्वे सन्तनोति हृदयं जिह्वया सह। तान्त्वं देवी पृथिवी हिक्कामय रसां कृधि।। 6।।
卐20,51.7 अनुसृप्तां गहनेषु धूक्ष्णां पापीं शिमिद्वतीम्। तामेतां दस्यूनां दासीं प्र दहातश्रुकाकणि।। 7।।
卐20,51.8 प्रपतात स्सुकटनालि सुषे॰ कुषीतको यथा। स्त्रक्के ते धक्ष्यामि धक्ष्यामि सा नशिष्यसि पुत्थगी।। 8।।
卐20,51.9 यदास्या स्स्त्रक्के दहेद्यथा मूर्धानमग्निना। अथैषा दस्यूनान्दासी पुत्थगी नि लयिष्यते।। 9।।
卐20,51.10 अहरहर्बलिमित्ते हरन्तो ऽश्वायेव तिष्ठते घासमस्मै। रायस्पोषेण समिषा मदन्तोऽग्ने माते प्रतिवेशा रिषाम।। 10।। 20 - 52
卐20.52.1 रात्रीं रात्रीमप्रयातं भरन्तो ऽश्वायेव तिष्ठते घासमस्मै। रायस्पोषेण समिषा मदन्तो मा ते अग्ने प्रतिवेशा रिषाम।। 1।।
卐20.52.2 अग्न आयूंषि पिवस्वा सुवोर्जमिषञ्च नः। आरे बाधस्व दुच्छुनाम्।। 2।।
卐20.52.3 त्रिण्यायूंषि तवजातवेदस्तिस्रो व्युष्टीरुषसस्ते अग्ने। तिस्रस्ते तन्वो देवशंसिता स्ताभिर्न॰ पाहि सदमप्रमादम्। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐20.52.4 पाहि नोऽग्न एकया पाहि नोत द्वितीयया। पाहि गीर्भिस्तिसृभि रुर्जां पते पाहि चतसृभिर्वसो।। 4।।

卐20.52.5 समीची मघायनी पातामायुष्मत्या ऋचो मा छैत्सि। तनूपास्साम्नो वसुविदं लोकमनुचरामि।। 5।।

卐20.52.6 य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः। संधाता सन्धिं मघवा पुरू वसुर्निष्कर्ता विहृतं पुनः।। 6।।

卐20.52.7 भगेह्यर्वाङ् उपमामिह त्वं मदो नामासि मयि मादयामुम्। सुरा त एष मभवज्जनित्र्य मग्नेरधि जातोऽसि ब्रह्मणस्तेजसा च।। 7।।

卐20.52.8 सहानया प्रविशेहान्तरात्माम् प्रविशेह। विशन्त्येहि प्रविशन्त्येह्या मा विश प्र मा विशो उपत्वाह्वय उप मा ह्वयस्व। नरिष्ठा नाम वा असि।। 8।।

卐20.52.9 यथापः प्रवता यन्ति यथा मासा अहर्जरम्। एवा मा ब्रह्मचारिणो धातरायन्तु सर्वदा।। 10।।

卐20.52.10 आ गन्ता मा रिषण्यत प्रस्तोतारो माप स्थात समन्यवः। वृढासो अमयिष्णवो मा व पिष्यवः।। 11।। 20 - 53

卐20.53.1 धाता ते हस्तमग्रहीत्सविता ते हस्तमग्रहीत्। मित्रस्त्वमसि धर्णणाग्निराचार्यस्तव।। 1।।

卐20.53.2 अग्ने ब्रह्मचार्यसि मम ब्रह्मचार्यसि। प्रजापतिष्ट्वा गोपायतु देवाय त्वा सवित्रे परि ददामि स्वस्ति चरतादिहासौ।। 2।।

卐20.53.3 विश्वमसि विश्वपते सर्वमसि सर्वपते। तन्त्वासौ देवाय त्वा सवित्रे परि ददामि स्वस्ति चरतान्मयि।। 3।।

卐20.53.4 समाववर्ति विष्ठितो जिगीषुर्विश्वेषां कामश्चरतामिहास्तु। विश्वा द्वेषांसि दुरिता हित्वायं त्वनुव्रता सवितुर्दैव्यस्य।। 4।।

卐20.53.5 आ नो हस्तौ अकृतागास्स्वर्गः पुनरैतु तन्वा सम्विदानः। प्राणेन तेजसा हरसा बलेन मित्रो अस्मान्वरुण उभयतस्पातु।। 5।।

卐20.53.6 यत्काम कामयमाना इदं कृण्मसि ते हविः। तन्नस्सर्वं समृध्यतामथैतस्य हविषो वीहि स्वाहा।। 6।।

卐20.53.7 यद्वर्चो द्यावापृथिव्योरथो यदाञ्जनं त्वयि। तेन सुचक्षार्वर्चस्यहं भूयासमाञ्जन।। 7।।

卐20.53.8 यद्यसृक् श्लिष्टं यद्दिवा स्वप्न यानु श्लिष्टम्। आश्लिष्टा वच्छेदन मस्यभिदृष्ट वीर्यम्।। 8।।

卐20.53.9 अव वारिव वारिवा अव वर्षं गिरेरिव। अवज्यामिव धन्वनो हृदि श्लिष्टं छिनद्मि ते।। 9।।

卐20.53.10 यत्ते हृदि श्लिष्टं यच्चाश्लिष्टं पुरीरति। मध्ये सृष्ठीनां यच्छ्लिष्ट तत्पार्ष्णाव छिनद्मि ते।। 10।।

20 - 54

卐20.54.1 यत्ते श्लिष्टं क्लोम कर्णेषु यच्च सिस्नेसु नाभ्याम्। इन्द्र स्तदब्रवी द्भिषक् पार्ष्णि राश्लिष्टावत् छेदनीम्।। 1।।

卐20.54.2 एषां वै दुष्टं हनमि पार्ष्णिराश्लिष्टावत् छेदनीम्। इदमह ममुस्मिन्ना मुष्यायणेऽमुष्याः पुत्रस्याश्लिष्टं प्र छिनद्मि।। 2।।

卐20.54.3 विपश्चित् पुच्छ माभरत्तद्विष्णुः पुनराभरत्। तदग्निना मनसा संविदान पुमांसमस्यै पुत्रन्देहि स्वाहा।। 3।।

卐20.54.4 विपश्चित्पुच्छमाभरत् यर्ज्जरहस्ताचित्या। यथास्याः पुत्रो जायतां अभिभूर्णो विपश्चिता।। 4।।

卐20.54.5 अपेहीतो विपश्चित्त्वं पुमानयं जनिष्यते। पुमान्पुंसो अधि संभूतस्स पुमानेव जायताम्।। 5।।

卐20.54.6 भद्राय कर्णः क्रोशतु भद्रायाक्षि वि वेपताम्। परा दुष्ष्वप्न्यं सुव यद्भद्रं तन्न आ सुव।। 6।।

卐20.54.7 अक्षिवेपं दुःष्वप्न्यमार्त्तिं पुरुषरेशिणीम् । तदस्मदश्विना युवमप्रिये प्रतिमुञ्चतम्।। 7।।

卐20.54.8 यत्पार्श्वादुरसो मे अङ्गादङ्गादुप वेपते। अश्विना पुष्करस्त्रजा तस्मान्नः पातमंहसः।। 8।।

卐20.54.9 यदीदमृत काम्याघं रिप्रमुपेयिम। अन्धश्श्रोता इव हीयतां मानोन्वागादघं यतः।। 9।।

卐20.54.10 अरिप्रा आपो अपरिप्रमस्मत्। योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मस्तस्मिन् दुष्ष्वप्न्य मा सृजामि।। 10।। 20 - 55

卐20.55.1 अदर्शि गातु वित्तमो यस्मिन् व्रतान्यादधुः। उपो षु जातमार्यस्य वर्धनं सोमं गच्छन्तु नो गिरः।। 1।।

卐20.55.2 प्र दैवो दासो अग्निर्देवाङ्गच्छा न मज्मना। अनु मातरं पृथिवीं वि वावृते तस्थौ नाकस्य सानवि।। 2।।

Sri Ganapati Sachchidananda Avadhoota Dattapeetham

卐20.55.3 यस्माद्रेजन्तु कृष्टयश्चर्कृत्यानि कृण्वतः। सहस्रसां मेधसाता विवत्मनाग्निं धीभिर्दुवस्य च।। 3।।
卐20.55.4 आ प्यायस्व समेतुते विश्वतस्सोम वृष्ण्यम्। भवा वाजस्य संगथे।। 4।।
卐20.55.5 आ प्यायस्व मदिन्तम सोम विश्वेभिरंशुभिः। भवा न स्सुम्नयु स्सखा वृधे।। 5।।
卐20.55.6 सं ते पयांसि समुयन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः। आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमा निधिष्व।। 6।।
卐20.55.7 विद्म त्वा वयं सोमं राजानं येत्वा न विदुः। तेषाञ्चक्षुषा श्रोत्रेण प्राणेन प्रजया पशुभिर्गृहैर्धनेना प्यायस्व।। 7।।
卐20.55.8 एषा त ओषधीस्तया त्वमाप्यायस्व। आपीलो अस्मान् आप्यायच्चक्षुषा श्रोत्रेण प्राणेन प्रजया पशुभिर्गृहैर्धनेनाप्यायस्व।। 8।।
卐20.55.9 यद्वेद राजा वरुणो वेद देवो बृहस्पतिः। इन्द्रो यद्वृत्रहावेद तत्सत्यं चित्तमर्हणम्।। 9।।
卐20.55.10 शर्वेण नीलशिखण्डेन भवेन मरुतां पित्रा। विरूपाक्षेण वभ्रूणा वाचं वदिष्यतो हतम्।। 10।। 20 - 56
卐20.56.1 एतद्वदन्यत्र जिघांसति यदन्यत्र प्र विवेशत्। तद्वश्चित्त ममूमुहं तद्वश्चित्त मनीनशम्।। 1।।
卐20.56.2 अस्ति वै पथान्निष्कुट न्नदीनाञ्च निरङ्कुशम्। तद्वश्चित्त ममूमुहं तद्वश्चित्त मनीनशम्।। 2।।
卐20.56.3 यानि वस्सप्त चेतांस्यष्टौ यानि मनांसि च। तद्वश्चित्त ममूमुहं तद्वश्चित्त मनीनशम्। । 3।।
卐20.56.4 इन्द्रेण मेदिना युजाग्निना जातवेदसा। तेन वश्चित्त ममूमुहं तेन वश्चित्त मनीनशम्।। 4।।
卐20.56.5 प्रतीचीनान्वो अभ्यधा मश्वमिवा श्वाभिधान्या। कृण्वे वो मामके वशे पदोरुपानहौ यथा।। 5।।
卐20.56.6 देवानां समिदसि देवानां यातुरसि। यया तन्वा ब्रह्म जिन्वसि तया मा जिन्व।। 6।।
卐20.56.7 रोचे मा प्रकाशे मा कृण्वाविदन् मा गमय। अनु मा वुध्यन्ताम्।। 7।।
卐20.56.8 वयस्सुपर्णा उप सेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः। अपध्वान्त मूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मा न्निधयेव बद्धान्।। 8।।
卐20.56.9 अप्सुजातस्य महतस्पर्यश्मनः। स्वयञ्जातस्य शोचिषोऽद्भिः पर्वतानां शये।। 9।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐20.56.10 उतोदिनीं समिद्वतीं दुर्गा योनिर्व्यद्वला। मृगाँ अनु प्र पातय मरीचीरनु नाशय।। 10।।

卐20.56.11 अश्वस्याश्व संपतिता पर्णेते वसतिस्कृता। असृक् पतत्रिणामसि जहि वामून् प्र वाधसः।। 11।।

卐20.56.12 असृक्तो अधि जातोसि पर्णे ते सदनं कृतम्। आण्डं पतत्रिणामसि जहि वामून् प्र वाधसः।। 12।।

卐20.56.13 यथा गर्दभो विवर्धनाद्वधूयुर्व्यपलायते। एवासौ पलायता ममुष्मा दध्या नयत्।। 13।।

20 - 57

卐20.57.1 सनिरसि सनितासि सनेयम्।। 1।।

卐20.57.2 कृतिरसि कर्तासि क्रियासम्।। 2।।

卐20.57.3 वित्तिरसि वेत्तासि विदेयम्।। 3।।

卐20.57.4 भूतिरसि भवितासि भूयासम्।। 4।।

卐20.57.5 भूरसि सुभूरसि सुभूर्नामासि।। 5।।

卐20.57.6 प्रजापतिर्मध्य मश्श्रेष्ठो रश्मिरसि।। 6।।

卐20.57.7 भूतये त्वा वित्तये त्वा पशूनां त्वा वित्तय आ दधामि।। 7।।

卐20.57.8 अग्निर्वह्निर्वह्निरग्निः।। 8।।

卐20.57.9 इन्द्रारोद्धा प्रजापतिः प्रजाता। बृहस्पतेस्त्वा मुखेन याचामि।। 9।।

卐20.57.10 प्रजापतेष्ट्वा मुखेन याचामि।। 10।।

卐20.57.11 सूर्यस्यत्वा चक्षुषा प्रतिक्षे अदब्धेन त्वा चक्षुषा वेक्षये।। 11।।

卐20.57.12 अयुतोहमयुतो मात्माऽऽयुतं मे चक्षुरयुतं मे श्रोत्रमयुतो मे प्राणोऽयुतो मेऽपानोऽयुतोहं सर्वः।। 12।।

卐20.57.13 देवस्य त्वा सवितुः प्रसवेऽश्विनर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रसूत आ रभे।। 13।।

卐20.57.14 अग्नेष्ट्वा स्येन प्राश्नामि बृहस्पतेर्मुखेन।। 14।।

卐20.57.15 इन्द्रस्य त्वा जठरे सादयामि वरुणोस्योदरे। योऽग्निर्नृम्णा नाम ब्राह्मणेषु प्रविष्टः।। 15।।

卐20.57.16 तस्मिन्नेष सुहुतमस्तु प्राशित्र न्तन्मा मा हिंसीत्परमे व्योमन्।। 16।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

इति एकर्चो नाम विंशति काण्डे नवमोऽनुवाकः 20 - 58

卐20.58.1 वेद् वै ते तक्मन्नाम विश्वसो नाम वा असि। असमक्तो नाम ते पिताहर्षी नाम तक्मन्ते माता समिद्धा नाम ते स्वसा।। 1।।

卐20.58.2 गिरिं गच्छेत स्सप्त मुखे।। 2।।

卐20.58.3 असुरास्त्वोदवभरन् समुद्रादधिमायया। तदास्त्रावस्य भेषज न्तदुरोगमनीनशत्।। 3।।

卐20.58.4 रोगस्थानमसृक् स्थानमथो अस्त्राव भेषजम्। बभ्रो विश्वम्भुवरेणापि नह्यामि ता अहम्।। 4।।

卐20.58.5 यन्मे दण्डो वा पाति दीक्षया तपसा सह। तमहं ब्रह्मणा ददे पुनरिन्द्रꣳ पुनर्भगः। पुनर्मे ब्रह्मणस्पति ब्रह्म जीवीत वा अदात्।। 5।।

卐20.58.6 इत्थादुलूका पतन्युत्तान् पादमर्भकः। स मे ध्रियमाण मा वहद् विद्वेषꣳ परा वहत्।। 6।।

卐20.58.7 यथा वाणस्सु संशितꣳ परापतत्याशुमत्। एवामूत्रस्य ते धारा परा पतति केतुमत्।। 7।।

卐20.58.8 यथा मधु मधुकृत स्सं भरन्ति मधावधी। एवा मे मधुमद्वचो देवेषु पुरुषेषु च।। 8।।

卐20.58.9 दीर्घायुत्वाय तपसे मह्या अरिष्टतातये। सुपर्णो मह्यमब्रवी देतत्समक्त भेषज मेतत्पुलित भेषजम्।। 9।।

卐20.58.10 अग्नी रक्षांसि सेधति शुक्रशोचिरमर्त्यः। शुचिꣳ पावक इड्यः।। 10।। 20 - 59

卐20.59.1 पेशिर्माताꣳ पेशिꣳ पिता पैशयꣳ पैश्याहितः। अद्धा कृतस्य ब्रह्मणा वृश्चिकस्यारसं विषम्।। 1।।

卐20.59.2 निर्ह्वयामि पर्णसादा न्निरुप्स च्छादुते विषम्। भूमिस्त उच्यते माता तस्मै ते नम उत्सृजत्।। 2।।

卐20.59.3 किमिदं त्वावयाति किमभूदुपवेशनम्। आपो निरस्यता क्रिमिमगदे कृणुता हनू।। 3।।

卐20.59.4 यत्र भूम्या अनावृतं दिवि चन्द्रमधिश्रितम्। विद्वाङ् अहं तत्र मन्ये माहं प्रौत्रमघं निगाम्।। 4।।

卐20.59.5 यत्ते सुसीमे हृदयं मनो वै तत्प्रजापतौ। वेदाम तस्य ते वयं माहं पौत्रमघन्निगाम्।। 5।।

卐20.59.6 यत् सुपर्णाया हृदयं पृथिव्या मधि निष्ठितम्। वेदाह न्तस्यास्तन्वां मम माहं पौत्रमघन्निगाम्।। 6।।

卐20.59.7 तदग्नेर्हृदयमसि विद्युद् द्युत्या तथा वेद। वेदाम तस्य ते वयं माहं पौत्र मघन्निगाम्।। 7।।
卐20.59.8 प्रजायै मे प्रजापतिरिन्द्राग्नी शर्मयच्छतम्। यथाहं ज्योग् जीवोऽसानि प्रजानामधिपा वशी।। 8।।
卐20.59.9 यां प्रजा मविदामज्यात्मनः परि निर्मितताम्। आयुष्मतीं तनूकृतां तामग्ने जरसे नय।। 9।।
卐20.59.10 इन्द्र इव सासहानरग्निरिव ज्योतिषावहम्। सूर्य इव विश्वतः प्रत्यङ् समुद्र इव जुष्टरः।। 10।। 20 - 60
卐20.60.1 ऋचं साम यदप्राक्षं हविरोजो यजुर्बलम्। एतम्मा तस्मान्माहिंसीद् वेदः पृष्ठ श्शचीपते।। 1।।
卐20.60.2 उद्धर द्यावापृथिवी सहौषधीभिः। गृह्णामि प्रजां निरपस्सृजामि।। 2।।
卐20.60.3 मान आपो मेधां मा ब्रह्म प्र मथिष्ठन। सुष्यदा यूयं स्यन्दध्वमुपहूतोऽहं सुमेधा वर्चस्वी। 3।।
卐20.60.4 मा नो मेधां मा नो दीक्षां मा नो हिंसिष्ट यत्तपः। शिवान स्सर्वमायुषे आपो भवन्तु मातरः।। 4।।
卐20.60.5 इह प्रजा विश्वरूपा रमन्तामस्मिन् गोष्ठे विश्वभृतो जनित्रीः। अग्नि ङ्कुलायमुप संविशन्ति र्जानन्तु नः पयसा घृतेन।। 5।।
卐20.60.6 रन्तयस्थ रमतयस्थ मयि श्रिता स्थ मयि श्रयध्वम्। मनोतानामा स्थ ग्राम्या अप्सरसो वेदवित्तमाः मा विशत्।। 6।।
卐20.60.7 शर्वनीलशिखण्डेन वीर कर्मणिकर्मणि। इमामस्य प्राशञ्जहि येनेदं विभजामहे।। 7।।
卐20.60.8 तृतीयकं वितीयं सदन्दि न्तक्मानमुत राजयक्ष्मम्। यथा शक्र उन्मुमोच तृतीयक मेवाहन्तद न्मुञ्चामि।। 8।।
卐20.60.9 तृतीयकन्त्वा मस्या मोषध्यां बध्नामि। आध्वस्त पक्षिणे बृहते यथाह मकरन्नमः।। 9।।
卐20.60.10 तृतीयकन्त्वा मस्या मोषध्यां बध्नामि। इन्द्राय त्विषीमते यथाह मकरन्नमः।। 10।। 20 - 61
卐20.61.1 व्याघ्रायो भयादते यथाहमकरं नमः। नमस्ते पथ्ये रेवती स्वस्ति मा पराणय स्वस्ति पुनरानय।। 1।।

卐20.61.2 अथो स्वस्ति निष्कृधि जीवा ज्योतिरशीमहि। आमनं यजामहे सत्यं प्राशं पुरोहितम्।। 2।।
卐20.61.3 तन्देवं प्रथमं यजेद् व्योम्ना मनसख्करत्। आमनस्क देवकारो रुवत्क देव क।। 3।।
卐20.61.4 अर्वाचावस्तरं कृधि यमहं कामये प्रियम्। अयन्नो अग्निरध्यक्षो ऽयन्नो वसुवित्तमः।। 4।।
卐20.61.5 अस्योपसद्ये मा रिषा मायं रक्षतु नꣳ प्रजाम्। अस्मिन्त्सहस्त्रं पुष्यास्मैध माना स्स्वे गृहे।। 5।।
卐20.61.6 इमं समिन्धिषी मह्यायुष्मन्त स्सु वर्चसः। शुद्धवाता कृष्णफला कब्रू बलास भेषजी।। 6।।
卐20.61.7 शुक्ति वल्गास्य नाशनी देवीर्ददातु भेषजम्। अश्वत्थो देवसदन स्तृतीयस्यामितो दिवि।। 7।।
卐20.61.8 तत्र लोहित वृक्षजात श्शिश्रुः क्षिप्त भेषजः। न तत्र भवो हन्ति न शर्व इषुमस्यति।। 8।।
卐20.61.9 यत्र त्वन्देव तुम्वुरा पर्वतेषु वि रोहति। कृष्यामन्यो वि रोहति शिरेरन्योऽधि पक्षसि।। 9।।
卐20.61.10 त्रातारौ सुश्रितावीवा गन्तां सुकृतं पुरु।। 10।। 20 - 62
卐20.62.1 यावत्पर्णं यावत्फलं यावन्नो ऽध्यरुक्षत। तावत्त श्शुस्मास्तु पुर स्तदू ते विषदूषणीः।। 1।।
卐20.62.2 रुद्रजलास भेषजेऽमुं रोग मशीशमोजि ज्वलन्निति। आस्था द्यौरस्थात् पृथिव्यस्था दिदमुर्व मन्तरिक्षम्।। 2।।
卐20.62.3 रुषभस्येव कनिक्रदो हृदयं शमयामि ते। सम्मा सिञ्चन्तु मरुत स्सम्मा सौ रोहिणीदिवः।। 3।।
卐20.62.4 सम्मायमग्नि स्सिञ्चन्तु प्रजया च धनेन च दीर्घमायुष्कृणोतु मे।। 4।।
卐20.62.5 नक्तं हरि मृगयते दिवा सुपर्णा रोहितौ। भवाय च शर्वाय चोभाभ्या मकरन्नमः।। 5।।
卐20.62.6 नमो भवाय नमश्शर्वाय नमꣳ कुमारसत्रवे। नमो नीलशिखण्डाय नमस्सभा प्रपादिने।। 6।।
卐20.62.7 यस्य हरी अश्वतरौ गर्दभावभितस्सरौ। तस्मै नीलशिखण्डाय नमस्सभा प्रपादिने।। 7।।
卐20.62.8 असावेति शिशुमारो असावेति पुलिकया। कुमार सत्रोवरा होदकं परिवाचनम्।। 8।।

卐20.62.9 यथेदमभ्र मर्भकं पर्जन्यादपसीयते। एवामे अश्विना मुखा दभिल्य मपसीयताम्।। 9।।

卐20.62.10 अभील नश्येतः परस्तृचं मे माभिर्मि ह्लिपः। अगस्त्यस्य ब्रह्मणाभीलीन् नाशयामसि।। 10।। 20 - 63

卐20.63.1 सेसिचा मुपत्वचां नाशया पुरुरूपा दभील्यं मुखात्। यन्मे ऽकृतादभिप्रिया दारुरोहमलं मुखम्।। 1।।

卐20.63.2 अपां वात इव शीफालं सूर्यस्तदपलुम्पतु। अप मेऽभीलि पतत्त्वां वात ह्रदं यथा।। 2।।

卐20.63.3 आ मा सुपर्णङ्गच्छन्तु सुभागमस्तु मे मुखम्। यथा सूर्य सोपादये हिरण्यं प्रति रोचते।। 3।।

卐20.63.4 एवामे अश्विनामुखं सुपर्ण प्रतिरोचताम्। प्रयद्गावो नभ्युर्णय स्त्वेवयांस्य क्रमन्।। 4।।

卐20.63.5 घ्नन्तु कृष्णामुपत्वचं सुभागमस्तु मे मुखम्। इन्द्रेण प्रेषित उलूक सं पचामि ते।। 5।।

卐20.63.6 घ्नन्तु कृष्णामुपत्वचं सुभागमस्तु मे मुखम्। सोमेन प्रेषित उलूक सं पचामि ते।। 6।।

卐20.63.7 घ्नन्तु कृष्णामुपत्वचं सुभागमस्तु मे मुखम्। सूर्येण प्रेषित उलूक सं पचामि ते।। 7।।

卐20.63.8 घ्नन्तु कृष्णामुपत्वचं सुभागमस्तु मे मुखम्। वृहस्पतिना प्रेषित उलूक सं पचामि ते।। 8।।

卐20.63.9 घ्नन्तु कृष्णामुपत्वचं सुभागमस्तु मे मुखम्। प्रजापतिना प्रेषित उलूक सं पचामि ते।। 9।। 20 - 64

卐20.64.1 घ्नन्तु कृष्णामुपत्वचं सुभागमस्तु मे मुखम्। ग्राह्या दूतो ऽस्युलूक सं पचामि ते।। 1।।

卐20.64.2 घ्नन्तु कृष्णामुपत्वचं सुभागमस्तु मे मुखम्। निर्ऋत्या दूतो ऽस्युलूक सं पचामि ते।। 2।।

卐20.64.3 घ्नन्तु कृष्णामुपत्वचं सुभागमस्तु मे मुखम्। वरुणस्य दूतो ऽस्युलूक सं पचामि ते।। 3।।

卐20.64.4 घ्नन्तु कृष्णामुपत्वचं सुभागमस्तु मे मुखम्। मृत्योर्दूतो ऽस्युलूक सं पचामि ते।। 4।।

卐20.64.5 घ्नन्तु कृष्णामुपत्वचं सुभागमस्तु मे मुखम्। यमस्य दूतो ऽस्युलूक सं पचामि ते।। 5।।

卐20.64.6 राजात्वा वरुणो अखन दत्तां सोमेन वभ्रुणा। तान्त्वा विद्म प्रपातिकां प्रामुष्य हृदयन्तव।। 6।।

卐20.64.7 नि शोचयैनं प्रपतैनं समेनं तक्मना सृज। यथास्य दह्यमानस्याग्निः पर्वाण्यन्वयत् हृदयं परि वर्जयाक्षौ कामेन शोचया मूर्तं मामपश्यत।। 7।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐20.64.8 अयमित्वाग्निरानयत् वातस्त्वा त उद्यमात्। यन्त्वमेन न्निर्वर्त्तया असौ हा इह ते मनः।। 8।।

卐20.64.9 अग्निष्ट्वा तपतु सूर्यस्त्वा तपतु वातस्त्वा युङ्क्तां मरुतश्च युञ्जताम्। अर्वाङ् एहि समश्नुव आ नो मरिचिभिः।। 9।।

卐20.64.10 गृहाणि ते लोमान्यङ्भ्य स्त्वच मिमां सन्त्वराय्यो स्यास्ते। इह ते रमतां मनो मयि ते रमतां मनः।। 10।। 20 -65

卐20.65.1 अयं पिण्डः कर्करः पिण्डस्स्मरः पाञ्चाल स्संतपनः करङ्करः। अमुष्य हृदयन्तपो यमहङ्कामये प्रियम्।। 1।।

卐20.65.2 यथायमग्नि स्तपति यथा तपति सूर्यः। एवा ते तप्यतां मनो हृदयमङ्गमङ्गं परुस्परु र्माङ्कामेन न रमासा अत्र।। 2।।

卐20.65.3 यथा तपन्ति परशुं यथा वासि नि खादिरम्। यथा सूर्य उद्यन् सर्वं सन्तपन्ति।। 3।।

卐20.65.4 एवाते तप्यतां मनो हृदयमङ्गमङ्गं परुस्परु र्माङ्कामेन न रमासा अत्र।। 4।।

卐20.65.5 स त्वा द्यौश्च पृथिवी च तपतां माङ्कामेन न रमासा अत्र।। 5।।

卐20.65.6 स्मरहै स्मरतादमु मङ्गज्वरेणो छोचनीनाम्। तक्मनैनं संसृज विश्व शारदेन मम कामेन।। 6।।

卐20.65.7 अष्टाशीति सहस्राण्ये त्यवादीद्वचो मम। इहारेहमवादिषु मत्रारे प्रायस्वस्तम्।। 7।।

卐20.65.8 यं सुमित्र स्सुमित्रायै चक्रेवासास्मरम्। यथा सा तस्य कामेन न सुष्वाप कदा चन।। 8।।

卐20.65.9 एवासौ मम कामेन माव स्वप्सीत् कदा चन। पर्यग्नि रापस्तपति परिद्यामेति सूर्यः।। 9।।

卐20.65.10 परित्वामिन्द्रो वृत्रहा मह्यन्तपतु सर्वतः। यथा वातो न्वावाति यथा तपति सूर्यः।। 10।।

卐20.65.11 एवात्वमिन्द्र वृत्रहन् नमुं मह्यमिहानय। शालाला त्वं सं वननं वनाद्वनन मा भृतम्।। 11।।

卐20.65.12 येन पयो गन्धर्वोऽप्सरसां समवानयत्। तेनाहममुं मयि वा नयाम्या मृत्योरा परावतः।। 12। (इति एकर्चो नामः विंशतिकाण्डे दशमोऽनुवाकः)

इत्येकर्चकाण्ड स्समाप्तः इत्यथर्ववेदे पैप्पलादसंहितायां एकर्चो नाम विंशतिकाण्ड स्समाप्तः

## पैप्पलाद संहिता समाप्ता